.. 5. udyogaparva Kumbhaghonam Edition ..

॥ ५. उद्योगपर्व ॥

उद्योगपर्व - अध्याय ००१
॥ श्रीः ॥
५.१. अध्यायः १

Mahabharata - Udyoga Parva - Chapter Topics
विराटसभां प्रविष्टेषु राजसु श्रीकृष्णेन
पाण्डववृत्तान्तकथनपूर्वकं धृतराष्ट्रंप्रति
दूतप्रेषणनिर्धारणम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१-० (३१६८८)
श्रीवेदव्यासाय नमः। ५-१-०क्ष् (३३२७)
नारायणं नमस्कृत्य नरं चैव नरोत्तमम् ।
देवीं सरस्वतीं चैव ततो जयमुदीरयेत् ॥ ५-१-१ (३१६८९)
वैशम्पायन उवाच। ५-१-१क्ष् (३३२८)
कृत्वा विवाहं तु कुरुप्रवीरा-
स्तदाऽभिमन्योर्मुदिताः सपक्षाः ।
विश्रम्य रात्रावुषसि प्रतीताः
सभां विराटस्य ततोऽभिजग्मुः ॥ ५-१-१ (३१६९०)
सभा तु सा मत्स्यपतेः समृद्धा
मणिप्रवेकोत्तमरत्नचित्रा ।
न्यस्तासना माल्यवती सुगन्धा
तामभ्ययुस्ते नरराजवर्याः ॥ ५-१-२ (३१६९१)
अथासनान्याविशतां पुरस्ता-
दुभौ विराटद्रुपदौ नरेन्द्रौ ।
वृद्धौ च मान्यौ पृथिवीपतीनां
पित्रा समं तमजनार्दनौ च ॥ ५-१-३ (३१६९२)
पाञ्चालराजस्य समीपतस्तु
शिनिप्रवीरः सहरौहिणेयः

मत्स्यस्य राज्ञस्तु सुसन्निकृष्टौ
जनार्दनश्चैव युधिष्ठिरश्च ॥ ५-१-४ (३१६९३)
सुताश्च सर्वे द्रुपदस्य राज्ञो
भीमार्जुनौ माद्रवतीसुतौ च ।
प्रद्युम्नसाम्बौ च युधि प्रवीरौ
विराटपुत्रैश्च सहाभिमन्युः ॥ ५-१-५ (३१६९४)
सर्वे च शूराः पितृभिः समाना
वीर्येण रूपेण बलेन चैव ।
उपाविशन्द्रौपदेयाः कुमाराः
सुवर्णचित्रेषु वरासनेषु ॥ ५-१-६ (३१६९५)
तथोपविष्टेषु महारथेषु
विराजमानाभरणाम्बरेषु
रराज सा राजवती समृद्धा
ग्रहैरिव द्यौर्विमलैरुपेता ॥ ५-१-७ (३१६९६)
ततः कथास्ते समवाययुक्ताः
कृत्वा विचित्राः पुरुषप्रवीराः ।
तस्थुर्मुहूर्तं परिचिन्तयन्तः
कृष्णं नृपास्ते समुदीक्षमाणाः ॥ ५-१-८ (३१६९७)
कथान्तमासाद्य च माधवेन
संघट्टिताः पाण्डवकार्यहेतोः ।
ते राजसिंहाः सहिता ह्यशृण्व-
न्वाक्यं महार्थं सुमहोदयं च ॥ ५-१-९ (३१६९८)
श्रीकृष्ण उवाच। ५-१-१०क्ष् (३३२९)
सर्वैर्भवद्भिर्विदितं यथाऽयं
युधिष्ठिरः सौबलेनाक्षवत्याम् ।
जितो निकृत्याऽपहृतं च राज्यं
वनप्रवासे समयः कृतश्च ॥ ५-१-१० (३१६९९)
शक्तैर्विजेतुं तरसा महीं च
सत्ये स्थितैः सत्यरथैर्यथावत् ।
पाण्डोः सुतैस्त्रद्भुतमुग्ररूपं
वर्षाणि षट् सप्त च चीर्णमग्र्यैः ॥ ५-१-११ (३१७००)
त्रयोदशश्चैव सुदुस्तरोऽय-
मज्ञायमानैर्भवतां समीपे ।
क्लेशानसह्यान्विविधान्सहद्भि-
र्महात्मभिश्चापि वने निविष्टम् ।
एतैः परप्रेष्यनियोगयुक्तै-

रिच्छद्भिराप्तं स्वकुलेन राज्यम् ॥ ५-१-१२ (३१७०१)
एवं गते धर्मसुतस्य राज्ञो
दुर्योधनस्यापि च यद्धितं स्यात् ।
तच्चिन्तयध्वं कुरुपाण्डवानां
धर्म्यं च युक्तं च यशस्करं च ॥ ५-१-१३ (३१७०२)
अधर्मयुक्तं न च कामयेत
राज्यं सुराणामपि धर्मराजः ।
धर्मार्थयुक्तं तु महीपतित्वं
ग्रोमेऽपि कस्मिंश्चिदयं बुभूषेत् ॥ ५-१-१४ (३१७०३)
पित्र्यं हि राज्यं विदितं नृपाणां
यथाऽपकृष्टं धृतराष्ट्रपुत्रैः ।
मिथ्योपचारेण यथा ह्यनेन
कृच्छ्रं महत्प्राप्तमसह्यरूपम् ॥ ५-१-१५ (३१७०४)
न चापि पार्थो विजितो रणे तैः
स्वतेजसा धृतराष्ट्रस्य पुत्रैः ।
तथाऽपि राजा सहितः सुहृद्भि-
रभीप्सतेऽनामयमेव तेषाम् ॥ ५-१-१६ (३१७०५)
यत्तु स्वयं पाण्डुसुतैर्विजित्य
समाहृतं भूमिपतीन्प्रपीड्य
तत्प्रार्थयन्ते पुरुषप्रवीराः
कुन्तीसुता माद्रवतीसुतौ च ॥ ५-१-१७ (३१७०६)
बलाभियुक्तैर्विविधैरुपायैः
संप्रार्थिता हन्तुममित्रसङ्घैः ।
राज्यं जिहीर्षद्भिरसद्भिरुग्रैः
सर्वं च तद्वो विदितं यथावत् ॥ ५-१-१८ (३१७०७)
तेषां च लोभं प्रसमीक्ष्य वृद्धं
धर्मज्ञतां चापि युधिष्ठिरस्य ।
संबन्धितां चापि समीक्ष्य तेषां
मतिं कुरुध्वं सहिताः पृथक्व । ५-१-१९ (३१७०८)
इमे च सत्येऽभिरताः सदैव
तं पालयित्वा समयं यथावत् ।
अतोऽन्यथा तैरुपचर्यमाणा
हन्युः समेतान्धृतराष्ट्रपुत्रान् ॥ ५-१-२० (३१७०९)
तैर्विप्रकारं च निशम्य कार्ये
सुहृज्जनास्तान्परिवारयेयुः ।
युद्धेन बाधेयुरिमांस्तथैवं

तैर्बाध्यमाना युधि तांश्च हन्युः ॥ ५-१-२१ (३१७१०)
तथाऽपि नेमेऽल्पतयाऽसमर्था-
स्तेषां जयायेति भवेन्मतिर्वः ।
समेत्य सर्वे सहिताः सुहृद्भि-
स्तेषां विनाशाय यतेयुरेव ॥ ५-१-२२ (३१७११)
दुर्योधनस्यापि मतं यथाव-
न्न ज्ञायते किं नु करिष्यतीति
अज्ञायमाने च मते परस्य
मन्त्रस्य पारं कथमभ्युपेमः ॥ ५-१-२३ (३१७१२)
तस्मादितो गच्छतु धर्मशीलः
शुचिः कुलीनः पुरुषोऽप्रमत्तः ।
दूतः समर्थः प्रशमाय तेषां
राज्यार्धदानाय युधिष्ठिरस्य ॥ ५-१-२४ (३१७१३)
निशम्य वाक्यं तु जनार्दनस्य
धर्मार्थयुक्तं मधुरं समं च ।
समाददे वाक्यमथाग्रजोऽस्य
संपूज्य वाक्यं तदतीव राजन् ॥ ॥ ५-१-२५ (३१७१४)

इति श्रीमन्महाभारते उद्योगपर्वणि सेनोद्योगपर्वणि प्रथमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-१-१ प्रतीताः प्रबुद्धाः ॥
१ ॥
५-१-३ आविशतामुपविष्टौ । पित्रा बसुदेवेन ॥
३ ॥
५-१-१० अक्षवत्यां द्यूतक्रीडायाम् ॥
१० ॥
५-१-११ सत्यं रथवदारोढुं योग्यं योषाम् ॥
११ ॥
५-१-१४ बभूषेत् प्राप्तुमिच्छेत् । तङभाव आर्षः ॥
१४ ॥
५-१-१६ अनामयं कुशलम् ॥
१६ ॥
५-१-२० अतो राज्यार्धप्रदानात् ॥
२० ॥

॥ श्रीः ॥
५.२. अध्यायः २

Mahabharata - Udyoga Parva - Chapter Topics
बलरामेण कृष्णमतानुमोदनपूर्वकं स्वस्य दुर्योधने
पक्षपताविष्करणम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-२-० (३१७१५)
बलदेव उवाच। ५-२-०क्ष् (३३३०)
श्रुतं भवद्भिर्गदपूर्वजस्य
वाक्यं यथा धर्मवदर्थवच्च ।
अजातशत्रोश्च हितं च युक्तं
दुर्योधनस्यापि तथैव राज्ञः ॥ ५-२-१ (३१७१६)
अर्धं हि राज्यस्य विसृज्य वीराः
कुन्तीसुतास्तस्य कृते यतन्ते ।
प्रदाय चार्धं धृतराष्ट्रपुत्रः
सुखी सहास्माभिरतीव मोदेत् ॥ ५-२-२ (३१७१७)
लब्ध्वा हि राज्यं पूरुषप्रवीराः
सम्यक्प्रवृत्तेषु परेषु चैव ।
ध्रुवं प्रशान्ताः सुखमाविशेयु-
स्तेषां प्रशान्तिश्च हितं प्रजानाम् ॥ ५-२-३ (३१७१८)
दुर्योधनस्यापि मतं च वेत्तुं
वक्तुं च वाक्यानि युधिष्ठिरस्य ।
प्रियं च मे स्याद्यदि तत्र कश्चि-
द्व्रजेच्छमार्थं कुरुपाण्डवानाम् ॥ ५-२-४ (३१७१९)
स भीष्ममामन्त्र्य कुरुप्रवीरं
वैचित्रवीर्यं च महानुभावम् ।
द्रोणं सपुत्रं विदुरं कृपं च
गान्धारराजं च समूतपुत्रम् ॥ ५-२-५ (३१७२०)
सवे च येऽन्ये धृतराष्ट्रपुत्रा
बलप्रधाना निगमप्रधानाः ।
स्थिताश्च धर्मेषु यथा स्वकेषु
लोकप्रवीराः श्रुतशीलवृद्धाः ॥ ५-२-६ (३१७२१)
एतेषु सर्वेषु समागतेषु

पौरेषु वृद्धेषु च संगतेषु ।
ब्रवीतु वाक्यं प्रणिपातयुक्तं
कुन्तीसुतस्यार्थकरं यथा स्यात् ॥ ५-२-७ (३१७२२)
सर्वास्ववस्थासु च ते न कोप्या
ग्रस्तो हि सोऽर्थो बलमाश्रितैस्तैः ।
प्रियाभ्युपेतस्य युधिष्ठिरस्य
द्यूते प्रसक्तस्य हृतं च राज्यम् ॥ ५-२-८ (३१७२३)
निवार्यमाणश्च कुरुप्रवीरः
सर्वैः सुहृद्भिर्ह्यमप्यतञ्झः ।
स दीव्यमानः प्रतिदीव्य चैनं
गान्धारराजस्य सुतं मताक्षम् ॥ ५-२-९ (३१७२४)
हित्वा हि कर्णं च सुयोधनं च
समाह्वयद्देवितुमाजमीढः ।
दुरोदरास्तत्र सहस्रशोऽन्ये
युधिष्ठिरो यान्विषहेत जेतुम् ॥ ५-२-१० (३१७२५)
उत्सृज्य तान्सौबलमेव चायं
समाह्वयत्तेन जितोऽक्षवत्याम् ।
स दीव्यमानः प्रतिदेवनेन
अक्षेषु नित्यं स्वपराङ्भुखेषु ॥ ५-२-११ (३१७२६)
संरम्भमाणो विजितः प्रसह्य
तत्रापराधः शकुनेर्न कश्चित् ।
तस्मात्प्रणम्यैव वचो ब्रवीतु
वैचित्रवीर्यं बहुसामयुक्तम् ॥ ५-२-१२ (३१७२७)
तथा हि शक्यो धृतराष्ट्रपुत्रः
स्वार्थे नियोक्तुं पुरुषेण तेन ।
अयुद्धमाकाङ्क्षत कौरवाणां
साम्नैव दुर्योधनमाश्वसध्वम् ॥ ५-२-१३ (३१७२८)
साम्ना जितोऽर्थोऽर्थकरो भवेत
युद्धेऽनयो भविता नेह सोऽर्थः ॥ ५-२-१४ (३१७२९)
एवं ध्रुवत्येव मधुप्रवीरे
शिनिप्रवीरः सहसोत्पपात
तच्चापि वाक्यं परिनिन्द्य तस्य
समाददे वाक्यमिदं समुन्युः ॥ ॥ ५-२-१५ (३१७३०)

इति श्रीमन्महाभारते उद्योगपर्वणि सेनोद्योगपर्वणि द्वितीयोऽध्यायः ॥
५-२-१६ (३१७३१)

५-२-३ राज्यं राज्यार्धम् ॥
३ ॥
५-२-६ बलं चतुरङ्गम् । निगमो नीतिशास्त्रं ते उभे प्रधानं योषाम् ॥
५-२-१० दुरोदराः द्यूतकाराः ॥
५-२-१२ संरम्भमाणः हठं कुर्वाणः ॥

उद्योगपर्व - अध्याय ००३
॥ श्रीः ॥
५.३. अध्यायः ३

Mahabharata - Udyoga Parva - Chapter Topics
सात्यकिना बलरामवचनप्रतिक्षेपपूर्वकं दुर्योधननिग्रहनिर्धारणम्
॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-३-० (३१७३२)
सात्यकिरुवाच। ५-३-०क्ष् (३३३१)
यादृशः पुरुषस्यात्मा तादृशं संप्रभाषते ।
यथारूपोऽन्तरात्मा ते तथारूपं प्रभाषते ॥ ५-३-१ (३१७३३)
सन्ति वै पुरुषाः शूराः सन्ति कापुरुषास्तथा ।
उभावेतौ दृढौ पक्षौ दृश्येते पुरुषान्प्रति ॥ ५-३-२ (३१७३४)
एकस्मिन्नेव जायेते कुले क्लीबमहाबलौ ।
फलाफलवती शाखे यथैकस्मिन्वनस्पतौ ॥ ५-३-३ (३१७३५)
नाभ्यसूयामि ते वाक्यं ब्रुवतो लाङ्गलध्वज ।
ये तु शृण्वन्ति ते वाक्यं तानसूयामि माधव ॥ ५-३-४ (३१७३६)
कथं हि धर्मराजस्य दोषमल्पमपि ब्रुवन् ।
लभते परिषन्मध्ये व्याहर्तुमकुतोभयः ॥ ५-३-५ (३१७३७)
समाहूय महात्मानं जितवन्तोऽक्षकोविदाः ।
अनक्षज्ञं यथाऽश्रद्धं तेषु धर्मजयः कुतः। ५-३-६ (३१७३८)
यदि कुन्तीसुतं गेहे क्रीडन्तं भ्रातृभिः सह ।
अभिगम्य जयेयुस्ते तत्तेषां धर्मतो भवेत् ॥ ५-३-७ (३१७३९)
समाहूय तु राजानं क्षत्रधर्मरतं सदा ।
निकृत्या जितवन्तस्ते किं नु तेषां परं शुभम् ॥ ५-३-८ (३१७४०)

कथं प्रणिपतेच्चायमिह कृत्वा पणं परम् ।
वनवासाद्विमुक्तरतु प्राप्तः पैतामहं पदम् ॥ ५-३-९ (३१७४१)
यद्ययं परवित्तानि कामयेत युधिष्ठिरः ।
एवमप्ययमत्यन्तं परान्नार्हति याचितुम् ॥ ५-३-१० (३१७४२)
कथं च धर्मयुक्तास्ते न च राज्यं जिहीर्षवः ।
निवृत्तवनवासांस्तान्य आहुर्विदिता इति ॥ ५-३-११ (३१७४३)
अनुनीता हि भीष्मेण द्रोणेन विदुरेण च ।
न व्यवस्यन्ति पाण्डूनां प्रदातुं पैतृकं वसु ॥ ५-३-१२ (३१७४४)
अहं तु ताञ्छितैर्बाणैरनुनीय रणे बलात् ।
पादयोः पातयिष्यामि कौन्तेयस्य महात्मनः ॥ ५-३-१३ (३१७४५)
अथ ते न व्यवस्यन्ति प्रणिपाताय धीमतः ।
गमिष्यन्ति सहामात्या यमस्य सदनं प्रति ॥ ५-३-१४ (३१७४६)
न हि ते युयुधानस्य संरब्धस्य युयुत्सतः ।
वेगं समर्थाः संसोढुं वज्रस्येव महीधराः ॥ ५-३-१५ (३१७४७)
को हि गाण्डीवधन्वानं कश्च चक्रायुधं युधि ।
मां चापि विषहेत्क्रुद्धं कश्च भीमं दुरासदम् ॥ ५-३-१६ (३१७४८)
यमौ च दृढधन्वानौ यमकल्पौ महाद्युती ।
विराटद्रुपदौ वीरौ यमकालोपमद्युती ॥ ५-३-१७ (३१७४९)
को जिजीविषुरासादेद्धृष्टद्युम्नं च पार्षतम् ।
पञ्चैतान्पाण्डवेयांस्तु द्रौपद्याः कीर्तिवर्धनान् ॥ ५-३-१८ (३१७५०)
समप्रमाणान्पाण्डूनां समवीर्यान्मदोत्कटान् ।
सौभद्रं च महेष्वाससममरैरपि दुःसहम् ॥ ५-३-१९ (३१७५१)
गदप्रद्युम्नसाम्बांश्च कालसूर्यानलोपमान् ।
ते वयं धृतराष्ट्रस्य पुत्रं शकुनिना सह ॥ ५-३-२० (३१७५२)
कर्णं चैव निहत्याजावभिषेक्ष्याम पाण्डवम् ।
नाधर्मो विद्यते कश्चिच्छत्रून्हत्वाऽऽततायिनः ॥ ५-३-२१ (३१७५३)
अधर्म्यमयशस्यं च शात्रवाणां प्रयाचनम् ।
हृज्जतस्तस्य यः कामस्तं कुरुध्वमतन्द्रिताः ॥ ५-३-२२ (३१७५४)
धार्तराष्ट्रो ह्ययुद्धेन न राज्यं दातुमिच्छति ।
अद्य पाण्डुसुतो राज्यं लभतां वा युधिष्ठिरः ।
निहता वा रणे सर्वे स्वप्स्यन्ति वसुधातले ॥ ॥ ५-३-२३ (३१७५५)

इति श्रीमन्महाभारते उद्योगपर्वणि सेनोद्योगपर्वणि तृतीयोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-३-३ फलाफलावती । सुपो लुक् आर्षः पूर्वसवर्णो वा ॥

उद्योगपर्व - अध्याय ००४
॥ श्रीः ॥
५.४. अध्यायः ४

Mahabharata - Udyoga Parva - Chapter Topics
द्रुपदेन सात्यकिमतानुमोदनेन राज्ञामाह्वानाय
दूतप्रस्थनकथनपूर्वकं स्वपुरोहितस्य धृतराष्ट्रंप्रति
प्रेषणकथनम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-४-० (३१७५६)
द्रुपद उवाच। ५-४-०क्ष् (३३३२)
एवमेतन्महाबाहो भविष्यति न संशयः ।
न हि दुर्योधनो राज्यं मधुरेण प्रदास्यति ॥ ५-४-१ (३१७५७)
अनुवर्त्स्यति तं चापि धृतराष्ट्रः सुतप्रियः ।
भीष्मद्रोणौ च कार्पण्यान्मौख्र्याद्राधेयसौबलौ ॥ ५-४-२ (३१७५८)
बलदेवस्य वाक्यं तु मम ज्ञाने न युज्यते ।
एतद्धि पुरुषेणाग्रे कार्यं सुनयमिच्छता ॥ ५-४-३ (३१७५९)
न तु वाच्यो मृदुवचो धार्तराष्ट्रः कथंचन ।
नहि मार्दवसाध्योऽसौ पापबुद्धिर्मतो मम ॥ ५-४-४ (३१७६०)
गर्दभे मार्दवं कुर्याद्गोषु तीक्ष्णं समाचरेत् ।
मृदु दुर्योधने वाक्यं यो ब्रूयात्पापचेतसि ॥ ५-४-५ (३१७६१)
मृदुं वै मन्यते पापो भाषमाणमशक्तिकम् ।
हितमर्थं न जानीयादबुद्धिर्मार्दवे सति ॥ ५-४-६ (३१७६२)
एतच्चैव करिष्यामो यत्नश्च क्रियतामिह ।
प्रस्थापयाम मित्रेभ्यो बलान्युद्योजयन्तु नः ॥ ५-४-७ (३१७६३)
शल्यस्य धृष्टकेतोश्च जयत्सेनस्य वा विभो ।
केकयानां च सर्वेषां दूता गच्छन्तु शीघ्रगाः ॥ ५-४-८ (३१७६४)
स च दुर्योधनो नूनं प्रेषयिष्यति सर्वशः ।
पूर्वाभिपन्नाः सन्तश्च भजन्ते पूर्वचोदनम् ॥ ५-४-९ (३१७६५)
तत्वरध्वं नरेन्द्राणां पूर्वमेव प्रचोदने ।
महद्धि कार्यं वोढव्यमिति मे वर्तते मतिः ॥ ५-४-१० (३१७६६)
शल्यस्य प्रेष्यतां शीघ्रं ये च तस्यानुगा नृपाः ।
भगदत्ताय राज्ञे च पूर्वसागरवासिने ॥ ५-४-११ (३१७६७)

अमितौजसे तथोग्राय हार्दिक्यायान्धकाय च ।
दीर्घप्रज्ञाय शूराय रोचमानाय वा विभो ॥ ५-४-१२ (३१७६८)
आनीयतां बृहन्तश्च सेनाबिन्दुश्च पार्थिवः ।
सेनजित्प्रतिबिन्ध्यश्च चित्रवर्मा सुवास्तुकः ॥ ५-४-१३ (३१७६९)
बाह्लीको मुञ्जकेशश्च चैद्याधिपतिरेव च ।
सुपार्श्वश्च सुबाहुश्च पौरवश्च महारथः ॥ ५-४-१४ (३१७७०)
शकानां पह्लवानां कर्णवेष्टश्च पार्थिवः ॥
सुरारिश्च नदीजश्च कर्णवेष्टश्च पार्थिवः ॥ ५-४-१५ (३१७७१)
नीलश्च वीरधर्मा च भूमिपालश्च वीर्यवान् ।
दुर्जयो दन्तवक्रश्च रुक्मी च जनमेजयः ॥ ५-४-१६ (३१७७२)
आषाढो वायुवेगश्च पूर्वपाली च पार्थिवः ।
भूरितेजा देवकश्च एकलव्यः सहात्मजैः ॥ ५-४-१७ (३१७७३)
कारूषकाश्च राजानः क्षेमधूर्तिश्च वीर्यवान् ।
काम्भोजा ऋषिका ये च पश्चिमानूपकाश्च ये ॥ ५-४-१८ (३१७७४)
जयत्सेनश्च काश्यश्च तथा पञ्चनदा नृपाः ॥
जानकिश्च दुर्धर्षः पार्वतीयाश्च ये नृपाः ॥ ५-४-१९ (३१७७५)
जानकिश्च सुशर्मा च मणिमान्योतिमत्सकः ।
पांशुराष्ट्राधिपश्चैव धृष्टकेतुश्च वीर्यवान् ॥ ५-४-२० (३१७७६)
तुण्डश्च दण्डधारश्च बृहत्सेनश्च वीर्यवान् ।
अपराजितो निषादश्च श्रेणिमान्वसुमानपि ॥ ५-४-२१ (३१७७७)
बृहद्बलो महौजाश्च बाहुः परपुरंजयः ।
समुद्रसेनो राजा च सह पुत्रेण वीर्यवान् ॥ ५-४-२२ (३१७७८)
उद्भवः क्षेमकश्चैव वाटधानश्च पार्थिवः ।
श्रुतायुश्च दृढायुश्च साल्वपुत्रश्च वीर्यवान् ॥ ५-४-२३ (३१७७९)
कुमारश्च कलिङ्गानामीश्वरो युद्धदुर्मदः ।
एतेषां प्रेष्यतां शीघ्रमेतद्धि मम रोचते ॥ ५-४-२४ (३१७८०)
अयं च ब्राह्मणो विद्वान्मम राजन्पुरोहितः ।
प्रेष्यतां धृतराष्ट्राय वाक्यमस्मै प्रदीयताम् ॥ ५-४-२५ (३१७८१)
यथा दुर्योधनो वाच्यो यथा सान्तनवो नृपः ।
धृतराष्ट्रो यथा वाच्यो द्रोणश्च रथिनां वरः ॥ ॥ ५-४-२६ (३१७८२)

इति श्रीमन्महाभारते उद्योगपर्वणि सेनोद्योगपर्वणि चतुर्थोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-४-२ कार्पण्यात् तदन्नभक्षणेन दैन्यात् ॥
२ ॥

उद्योगपर्व - अध्याय ००५
॥ श्रीः ॥
५.५. अध्यायः ५

Mahabharata - Udyoga Parva - Chapter Topics
श्रीकृष्णेन द्रुपदवाक्यप्रशंसनपूर्वकं राज्ञां धृतराष्ट्रस्य
च दूतपुरोहितप्रेषणं संदिश्य द्वारकांप्रति गमनम् ॥ १ ॥
विराटद्रुपददूताहूदानां राज्ञामागमनम् ॥ २ ॥
दुर्योधनदूताहूतानां च राज्ञामागमनम् ॥ ३ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-५-० (३१७८३)
वैशम्पायन उवाच। ५-५-०क्ष् (३३३३)
द्रुपदेनैवमुक्ते तु वाक्ये वाक्यविदां वरः ।
वसुदेवसुतस्तत्र पृष्णिसिंहोऽब्रवीदिदम् ॥ ५-५-१ (३१७८४)
उपपन्नमिदं वाक्यं सोमकानां धुरंधरे ।
अर्थसिद्धिकरं राज्ञः पाण्डवस्यामितौजसः ॥ ५-५-२ (३१७८५)
एतच्च पूर्वं कार्यं नः सुनीतिमभिकाङ्क्षताम् ।
अन्यथा ह्याचरन्कर्म पुरुषः स्यात्सुबालिशः ॥ ५-५-३ (३१७८६)
किं तु संबन्धकं तुल्यमस्माकं कुरुपाण्डुषु ।
यथेष्टं वर्तमानेषु पाण्डवेषु च तेषु च ॥ ५-५-४ (३१७८७)
ते विवाहार्थमानीता वयं सर्वे तथा भवान् ।
कृते विवाहे मुदिता गमिष्यामो गृहान्प्रति ॥ ५-५-५ (३१७८८)
भवान्वृद्धतमो राज्ञां वयसा च श्रुतेन च ।
शिष्यवत्ते वयं सर्वे भवामेह न संशयः ॥ ५-५-६ (३१७८९)
भवन्तं धृतराष्ट्रश्च सततं बहु मन्यते ।
आचार्ययोः सखा चासि द्रोणस्य च कृपस्व च ॥ ५-५-७ (३१७९०)
स भवान्प्रेषयत्वद्य पाण्डवार्थकरं वचः ।
सर्वेषां निश्चितं तन्नः प्रेषयिष्यति यज्ञवान् ॥ ५-५-८ (३१७९१)
यदि तावच्छमं कुर्यन्नयायेन कुरुपुङ्गवः ।
न भवेत्कुरुपाण्डूनां सौभ्रात्रेण महान्क्षयः ॥ ५-५-९ (३१७९२)
अथ दर्पान्वितो मोहान्न कुर्याद्धृतराष्ट्रजः ।
अन्येषां प्रेषयित्वा च पश्चादस्मान्सभाह्वये ॥ ५-५-१० (३१७९३)
ततो दुर्योधनो मन्दः सहामात्यः सबान्धवः ।
निष्ठामापत्स्यते मूढः क्रुद्धे गाण्डीवधन्वनि ॥ ५-५-११ (३१७९४)

वैशम्पायन उवाच। ५-५-१२क्ष् (३३३४)
ततः सत्कृत्य वार्ष्णेयं विराटः पृथिवीपतिः ।
गृहान्प्रस्थापयामास सगणं सहबान्धवम् ॥ ५-५-१२ (३१७९५)
द्वारकं तु गते कृष्णे युधिष्ठिरपुरोगमाः ।
चक्रुः साङ्ग्रामिकं सर्वं विराटश्च महीपतिः ॥ ५-५-१३ (३१७९६)
ततः संप्रेषयामास विराटः सह बान्धवैः ।
सर्वेषां भूमिपालानां द्रुपदश्च महीपतिः ॥ ५-५-१४ (३१७९७)
वचनात्कुरुसिंहानां मत्स्यपाञ्चालयोश्च ते ।
समाजग्मुर्महीपालाः संप्रहृष्टा महाबलाः ॥ ५-५-१५ (३१७९८)
तच्छ्रुत्वा पाण्डुपुत्राणां समागच्छन्महद्बलम् ।
धृतराष्ट्रसुताश्चापि समानिन्युर्महीपतीन् ॥ ५-५-१६ (३१७९९)
समाकुला मही राजन्कुरुपाण्डवकारणात् ।
तदा समभवत्कृत्स्ना संप्रयाणे महीक्षिताम् ॥ ५-५-१७ (३१८००)
संकुला च तदा भूमिश्चतुरङ्गबलान्विता ।
बलानि तेषां वीराणामागच्छन्ति ततस्ततः ॥ ५-५-१८ (३१८०१)
चालयन्तीव गां देवीं सपर्वतवनामिमाम् ।
ततः प्रज्ञावयोवृद्धं पाञ्चाल्यः स्वपुरोहितम् ।
कुरुभ्यः प्रेषयामास युधिष्ठिरमते स्थितः ॥ ॥ ५-५-१९ (३१८०२)

इति श्रीमन्महाभारते उद्योगपर्वणि सेनोद्योगपर्वणि पञ्चमोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-५-४ संबन्धकं तुत्यमिति । पाण्डवेषु कुन्तीद्वारा । कुरुषु दुर्योधनकन्यायाः साम्बेनाहरणात् ॥
५-५-११ निष्ठां नाशम् ॥

उद्योगपर्व - अध्याय ००६
॥ श्रीः ॥
५.६. अध्यायः ६

Mahabharata - Udyoga Parva - Chapter Topics
द्रुपदेन धृतराष्ट्रंप्रति स्वपुरोहितप्रेषणम् ॥ १ ॥
पुरोहितस्य हास्तिनपुरगमनम् ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-६-० (३१८०३)

द्रुपद उवाच । ५-६-०क्ष् (३३३५)
भूतानां प्राणिनः श्रेष्ठाः प्राणिनां बुद्धिजीविनः ।
बुद्धिमत्सु नराः श्रेष्ठा नरेष्वपि द्विजातयः ॥ ५-६-१ (३१८०४)
द्विजेषु वैद्याः श्रेयांसो वैद्येषु कृतबुद्धयः ।
कृतबुद्धिषु कर्तारः कर्तृषु ब्रह्मवादिनः ॥ ५-६-२ (३१८०५)
स भवान्कृबुद्धीनां प्रधान इति मे मतिः ।
कुलेन च विशिष्टोऽसि वयसा च श्रुतेन च ।
प्रज्ञया सदृशश्चासि शुक्रेणाङ्गिरसेन च ॥ ५-६-३ (३१८०६)
विदितं चापि ते सर्वं यथावृत्तः स कौरवः ।
पाण्डवश्च यथावृत्तः कुन्तीपुत्रो युधिष्ठिरः ॥ ५-६-४ (३१८०७)
धृतराष्ट्रस्य विदिते वञ्चिताः पाण्डवाः परैः ।
विदुरेणानुनीतोऽपि पुत्रमेवानुवर्तते ॥ ५-६-५ (३१८०८)
शकुनिर्बुद्धिपूर्वं हि कुन्तीपुत्रं समाह्वयत् ।
अनक्षज्ञं मताक्षः सन्क्षत्रवृत्ते स्थितं शुचिम् ॥ ५-६-६ (३१८०९)
ते तथा वञ्चयित्वा तु धर्मराजं युधिष्ठिरम् ।
न कस्यांचिदवस्थायां राज्यं दास्यन्ति वै स्वयम् ॥ ५-६-७ (३१८१०)
भवांस्तु धर्मसंयुक्तं धृतराष्ट्रं ब्रुवन्वचः ।
मनांसि तस्य योधानां ध्रुवमावर्तयिष्यति ॥ ५-६-८ (३१८११)
विदुरश्चापि तद्वाक्यं साधयिष्यति तावकम् ।
भीष्मद्रोणकृपादीनां भेदं संजनयिष्यति ॥ ५-६-९ (३१८१२)
अमात्येषु च भिन्नेषु योधेषु विमुखेषु च ।
पुनरेकत्र करणं तेषां कर्म भविष्यति ॥ ५-६-१० (३१८१३)
एतस्मिन्नन्तरे पार्थाः सुखमेकाग्रबुद्धयः ।
सेनाकर्म करिष्यन्ति द्रव्याणां चैव सञ्चयम् ॥ ५-६-११ (३१८१४)
भिद्यमानेषु च स्वेषु लम्बमाने तथा त्वयि ।
न तथा ते करिष्यन्ति सेनाकर्म न संशयः ॥ ५-६-१२ (३१८१५)
एतत्प्रयोजनं चात्र प्राधान्येनोपलभ्यते ।
संगत्या धृतराष्ट्रश्च कुर्याद्धर्म्यं वचस्तव ॥ ५-६-१३ (३१८१६)
स भवान्धर्मयुक्तश्च धर्म्यं तेषु समाचरन् ।
कृपालुषु परिक्लेशान्पाण्डवीयान्प्रकीर्तयन् ॥ ५-६-१४ (३१८१७)
वृद्धेषु कुलधर्मं च ब्रुवन्पूर्वैरनुष्ठितम् ।
विभेत्स्यति मनांस्येषमिति मे नात्र संशयः ॥ ५-६-१५ (३१८१८)
न च तेभ्यो भयं तेऽस्ति ब्राह्मणो ह्यसि वेदवित् ।
दूतकर्मणि युक्तश्च स्थविरश्च विशेषतः ॥ ५-६-१६ (३१८१९)
स भवान्पुष्ययोगेन मुहूर्तेन जयेन च ।
कौरवेयान्प्रयात्वाशु कौन्तेयस्यार्थसिद्धये ॥ ५-६-१७ (३१८२०)

वैशम्पायन उवाच। ५-६-१८क्ष् (३३३६)
तथाऽनुशिष्टः प्रययौ द्रुपदेन महात्मना ।
पुरोधा वृत्तसंपन्नो नगरं नागसाह्वयम् ॥ ५-६-१८ (३१८२१)
शिष्यैः परिवृतो विद्वान्नीतिशास्त्रार्थकोविदः ।
पाण्डवानां हितार्थाय कौरवान्प्रतिजग्मिवान् ॥ ॥ ५-६-१९ (३१८२२)

इति श्रीमन्महाभारते उद्योगपर्वणि सेनोद्योगपर्वणि षष्ठोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-६-२ वैद्याः विद्यावन्तः । कृतबुद्धयः सिद्धान्तज्ञाः ॥
२ ॥

उद्योगपर्व - अध्याय ००७
॥ श्रीः ॥
५.७. अध्यायः ७

Mahabharata - Udyoga Parva - Chapter Topics
दुर्योधनार्जुनयोः कृष्णदर्शनाय यदृच्छया युगपत् द्वारकागमनम्
॥ १ ॥
अर्जुनेन सारथ्येन वरयित्वा तेन सह युधिष्ठिरसमीपगमनम् ॥ २ ॥
दुर्योधनेन नारायणाह्वयकृष्णकुमारानादाय कृतवर्मणासह
स्वपुरगमनम् ॥ ३ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-७-० (३१८२३)
वैशम्पायन उवाच। ५-७-०क्ष् (३३३७)
पुरोहितं ते प्रस्थाप्य नगरं नागसाह्वयम् ।
दूतान्प्रस्थापयामासुः पार्थिवेभ्यस्ततस्ततः ॥ ५-७-१ (३१८२४)
प्रस्थाप्य दूतानन्यत्र द्वारकां पुरुषर्षभः ।
स्वयं जगाम कौरव्यः कुन्तीपुत्रो धनञ्जयः ॥ ५-७-२ (३१८२५)
गते द्वारवतीं कृष्ण बलदेवे च माधवे ।
सह वृष्ण्यन्धकैः सर्वैर्भोजैश्च शतशस्तदा ॥ ५-७-३ (३१८२६)
सर्वमागमयामास पाण्डवानां विचेष्टितम् ।
धृतराष्ट्रात्मजो राजा गूढैः प्रणिहितैश्चरैः ॥ ५-७-४ (३१८२७)
स श्रुत्वा माधवं यान्तं सदश्वैरनिलोपमैः ।
बलेन नातिमहता द्वारकामभ्ययात्पुरीम् ॥ ५-७-५ (३१८२८)

तमेव दिवसं चापि कौन्तेयः पाण्डुनन्दनः ।
आनन्नतनगरीं रम्यां जगामाशु धनञ्जयः ॥ ५-७-६ (३१८२९)
तौ यात्वा पुरुषव्याघ्रौ द्वारकां कुरुनन्दनौ ।
सुप्तं ददृशतुः कृष्णं शयानं चाभिजग्मतुः ॥ ५-७-७ (३१८३०)
दुर्योधनस्तु प्रथमं वासुदेवमुपाश्रयत् ।
उच्छीर्षतश्च कृष्णस्य निषसाद वरासने ॥ ५-७-८ (३१८३१)
ततः किरीटी तस्यानु प्रविवेश महामनाः ।
पश्चार्धे तु स कृष्णस्य प्रह्वोऽतिष्ठत्कृताञ्जलिः ॥ ५-७-९ (३१८३२)
प्रतिबुद्धः स वार्ष्णेयो ददर्शाग्रे किरीटिनाम् ।
सिंहासनगतं पश्चात्परिवृत्य च दृष्टवान् ॥ ५-७-१० (३१८३३)
स तयोः स्वागतं कृत्वा यथावत्प्रतिपूज्य तौ ।
तदागमनजं हेतुं पप्रच्छ मधुसूदनः ॥ ५-७-११ (३१८३४)
ततो दुर्योधनः कृष्णामुवाच प्रहसन्निव ।
विग्रहेऽस्मिन्भवान्साह्यं मम दातुमिहार्हति ॥ ५-७-१२ (३१८३५)
समं हि भवतः सख्यं मम चैवार्जुनेऽपि च ।
तथा संबन्धकं तुल्यमस्माकं त्वयि माधव ॥ ५-७-१३ (३१८३६)
अहं चाभिगतं सन्तो भजन्ते पूर्वसारिणः ॥
त्वं च श्रेष्ठतमो लोके सतामद्य जनार्दन । ५-७-१४ (३१८३७)
सततं संमतश्चैव सद्वृत्तमनुपालय ॥ ५-७-१५ (३१८३८)
कृष्ण उवाच। ५-७-१६क्ष् (३३३८)
भवानभिगतः पूर्वमत्र मे नास्ति संशयः ।
दृष्टस्तु प्रथमं राजन्मया पार्थो धनञ्जयः ॥ ५-७-१६ (३१८३९)
तव पूर्वाभिगमनात्पूर्वं चाप्यस्य दर्शनात् ।
साहाय्यमुभयोरेव करिष्यामि सुयोधन ॥ ५-७-१७ (३१८४०)
प्रवारणं तु बालानां पूर्वं कार्यमिति श्रुतिः ।
तस्मात्प्रवारणं पूर्वमर्हः पार्थो धनञ्जयः ॥ ५-७-१८ (३१८४१)
मत्संहननतुल्यानां गोपानामर्बुदं महत् ।
नारायणा इति ख्याताः सर्वे संग्रामयोधिनः ॥ ५-७-१९ (३१८४२)
ते वा युधि दुराधर्षा भवन्त्वेकस्य सैनिकाः ।
अयुध्यमानः संग्रामे न्यस्तशस्त्रोऽहमेकतः ॥ ५-७-२० (३१८४३)
आभ्यामन्यतरं पार्थ यत्ते हृद्यतरं मतम् ।
तद्वृणीतां भवानग्रे प्रवार्यस्त्वं हि धर्मतः ॥ ५-७-२१ (३१८४४)
ग एतद्विदित्वा कौन्तेय विचार्य च पुनः पुनः ।
तान्वा वरय साहाय्ये मां साचिव्येऽथवा पुनः ' ५-७-२२ (३१८४५)
वैशम्पायन उवाच। ५-७-२३क्ष् (३३३९)
एवमुक्तस्तु कृष्णेन कुन्तीपुत्रे धनञ्जयः ।

अयुध्यमानं संग्रामे वरयामास केशवम् ॥ ५-७-२३ (३१८४६)
नारायणममिघ्नं कामाज्जातमजं नृषु ।
सर्वक्षत्रस्य पुरतो देवदानवयोरपि ॥ ५-७-२४ (३१८४७)
दुर्योधनस्तु तत्सैन्यं सर्वमावरयत्तदा ।
सहस्राणां महस्रं तु योधानां प्राप्य भारत ॥ ५-७-२५ (३१८४८)
कृष्णं चापहृतं ज्ञात्वा संप्राप परमां मुदम् ।
दुर्योधनस्तु तत्सैन्यं सर्वमादाय पार्थिवः ॥ ५-७-२६ (३१८४९)
ततोऽभ्ययाद्भीमबलो रौहिणेयं महाबलम् ।
सर्वं चागमने हेतुं स तस्मै संन्यवेदयत् ।
प्रत्युवाच ततः शौरिर्धार्तराष्ट्रमिदं वचः ॥ ५-७-२७ (३१८५०)
बलदेव उवाच। ५-७-२८क्ष् (३३४०)
विदितं ते नरव्याघ्र सर्वं भवितुमर्हति ।
यन्मयोक्तं विराटस्य पुरा वैवाहिके तदा ॥ ५-७-२८ (३१८५१)
निगृह्योक्तो हृषीकेशस्त्वदर्थं कुरुनन्दन ।
मया संबन्धकं तुल्यमिति राजन्पुनःपुनः ॥ ५-७-२९ (३१८५२)
न च तद्वाक्यमुक्तं वै केशवं प्रत्यपद्यत ।
न चाहमुत्सहे कृष्णं विना स्थातुमपि क्षणम् ॥ ५-७-३० (३१८५३)
नाहं सहायः पार्थस्य नापि दुर्योधनस्य वै ।
इति मे निश्चिता बुद्धिर्वासुदेवमवेक्ष्य ह ॥ ५-७-३१ (३१८५४)
जातोऽसि भारते वंशे सर्वपार्थिवपूजिते ।
गच्छ युध्यस्व धर्मेण क्षात्रेण पुरुषर्षभ ॥ ५-७-३२ (३१८५५)
वैशम्पायन उवाच। ५-७-३३क्ष् (३३४१)
इत्येवमुक्तस्तु तदा परिष्वज्य हलायुधम् ।
कृष्णं चापि महाबाहुमामन्त्र्य भरतर्षभ ॥ ५-७-३३ (३१८५६)
सोऽभ्ययात्कृतवर्माणं धृतराष्ट्रसुतो नृपः ।
कृतवर्मा ददौ तस्य सेनामक्षौहिणीं तदा ॥ ५-७-३४ (३१८५७)
स तेन सर्वसैन्येन भीमेन कुरुनन्दनः ।
वृतः परिययौ हृष्टः सुहृदः संप्रहर्षयन् ॥ ५-७-३५ (३१८५८)
ततः पीताम्बरधरो जगत्स्रष्टा जनार्दनः ।
गते दुर्योधने कृष्णः किरीटिनमथाब्रवीत् ॥ ५-७-३६ (३१८५९)
अयुध्यमानः कां बृद्धिमास्थायाहं वृतस्त्वया । ५-७-३७ (३१८६०)
अर्जुन उवाच ।
भवान्समर्थस्तान्सर्वान्निहन्तुं नात्र संशयः ।
निहन्तुमहमष्येकः समर्थः पुरुषर्षभः ॥ ५-७-३७क्ष् (३३४२)
भवांस्तु कीर्तिमाँल्लोके तद्यशस्त्वां गमिष्यति ।
यशसां चाहमप्यर्थी तस्मादसि मया वृतः ॥ ५-७-३८ (३१८६१)

सारथ्यं तु त्वया कार्यमिति मे मानसं सदा ।
चिररात्रेप्सितं कामं तद्भवान्कर्तुमर्हति ॥ ५-७-३९ (३१८६२)
वासुदेव उवाच । ५-७-४०क्ष् (३३४३)
उपपन्नमिदं पार्थ यत्स्पर्धसि मया सह ।
सारथ्यं ते करिष्यामि कामः संपद्यतां तव ॥ ५-७-४० (३१८६३)
वैशम्पायन उवाच । ५-७-४१क्ष् (३३४४)
एवं प्रमुदितः पार्थः कृष्णेन सहितस्तदा ।
वृतो दाशार्हप्रवरैः पुनरायाद्युधिष्ठिरम् ॥ ॥ ५-७-४१ (३१८६४)

इति श्रीमन्महाभारते उद्योगपर्वणि सेनोद्योगपर्वणि सप्तमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-७-१० प्रवारणं ईप्सितसादानम् । पूर्वमर्हः त्वत्तः
कनिष्ठत्वादित्यर्थः ॥
१० ॥

उद्योगपर्व - अध्याय ००८
॥ श्रीः ॥
५.८. अध्यायः ८

Mahabharata - Udyoga Parva - Chapter Topics
पाण्डवान्प्रत्यागच्छतः शल्यस्य मार्गे भ्रमाहुर्योधनसभाप्रवेशः ॥ १ ॥
तद्भृत्यकृतोपचारतुष्टेन तेन पारितोषिकदाने प्रति श्रुते
गूढेनसता दुर्योधनेन प्रकटीभूय साहाय्यवरणम् ॥ २ ॥
पाण्डवानुपगम्य दुर्योधनवञ्चनां कथितवता शल्येन
युधिष्ठिराभ्यर्थनया कर्णस्य सारथ्यकरणेन
तेजोवधकरणप्रतिज्ञानम् ॥ ३ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-८-० (३१८६५)
वैशम्पायन उवाच । ५-८-०क्ष् (३३४५)
शल्यः श्रुत्वा तु दूतानां सैन्येन महता वृतः ।
अभ्यात्पाण्डवान्राजन्सह पुत्रैर्महारथैः ॥ ५-८-१ (३१८६६)
तस्य सेनानिवेशोऽभूदध्वर्धमिव योजनम् ।
तथा हि विपुलां सेनां बिभर्ति स नरर्षभः ॥ ५-८-२ (३१८६७)
अक्षौहिणीपती राजन्महावीर्यपराक्रमाः ।

विचित्रकवचाः शूरा विचित्रध्वजकार्मुकाः ॥ ५-८-३ (३१८६८)
विचित्राभरणाः सर्वे विचित्ररथवाहनाः ।
विचित्रस्रग्धराः सर्वे विविचाम्बरभूषणाः ॥ ५-८-४ (३१८६९)
स्वदेशवेषाभरणा वीराः शतसहस्रशः ।
तस्य सेनाप्रणेतारो बभूवुः क्षत्रियर्षभाः ॥ ५-८-५ (३१८७०)
व्यथयन्निव भूतानि कम्पयन्निव मेदिनीम् ।
शनैर्विश्रामयन्सेनां स ययौ यत्र पाण्डवः ॥ ५-८-६ (३१८७१)
ततो दुर्योधनः श्रुत्वा महात्मानं महारथम् ।
उपायान्तमभिद्रुत्य स्वयमानर्च भरत ॥ ५-८-७ (३१८७२)
कारयामास पूजार्थं तस्य दुर्योधनः सभाः ।
रमणीयेषु देशेषु रत्नचित्राः स्वलङ्कृताः ॥ ५-८-८ (३१८७३)
शिल्पिभिर्विविधैश्चैव क्रीडास्तत्र प्रयोजिताः ।
तत्र माल्यानि मांसानि भक्ष्यं पेयं च सत्कृतम् ॥ ५-८-९ (३१८७४)
कूपाश्च विविधाकारा औदकानि गृहाणि च ॥
स ताः सभाः समासाद्य पूज्यमानो यथाऽमरः । ५-८-१० (३१८७५)
दुर्योधनस्य सचिवैर्देशे देशे समन्ततः ॥
आजगाम सभामन्यां देवावसथवर्चसम् । ५-८-११ (३१८७६)
स तत्र विषयैर्युक्तैः कल्याणैरतिमानुषैः ॥
मेनेऽभ्यधिकमात्मानमवमेने पुरन्दरम्। ५-८-१२ (३१८७७)
पप्रच्छ स ततः प्रेष्यान्प्रहृष्टः क्षत्रियर्षभः ॥
युधिष्ठिरस्य पुरुषाः केऽत्र चक्रुः सभा इमाः । ५-८-१३ (३१८७८)
आनीयन्तां सभाकाराः प्रदेयार्हा हि मे मताः ॥
प्रदेयमेषां दास्यामि कुन्तीपुत्रोऽनुमन्यताम्। ५-८-१५अग ततः
प्रहृष्टं राजानं ज्ञात्वा ते सचिवास्तदा'
दुर्योधनाय तत्सर्वं कथयन्ति स्म विस्मिताः ॥ ५-८-१४ (३१८७९)
संप्रहृष्टो यदा शल्यो दिदित्सुरपि जीवितम् ।
गूढो दुर्योधनस्तत्र दर्शयामास मातुलम् ॥ ५-८-१६ (३१८८०)
तं दृष्ट्वा मद्रराजश्च ज्ञात्वा यत्नं च तस्य तम् ।
परिष्वज्याब्रवीत्प्रीत इष्टोऽर्थो ध्रियतामिति ॥ ५-८-१७ (३१८८१)
दुर्योधन उवाच। ५-८-१८क्ष् (३३४६)
सत्यवाग्भव कल्याण वरो वै मम दीयताम् ।
सर्वसेनाप्रणेता वै भवान्भवितुमर्हति ॥ ५-८-१८ (३१८८२)
यथैव पाण्डवास्तुभ्यं तथैव भवतो ह्यहम् ।
अनुमान्यं च पाल्यं च भक्तं च भज मां विभो ॥ ५-८-१९ (३१८८३)
वैशम्पायन उवाच। ५-८-२०क्ष् (३३४७)
कृतमित्यब्रवीच्छल्यः किमन्यत्क्रियतामिति ।

कृतमित्येव गान्धारिः प्रत्युवाच पुनःपुनः ॥ ५-८-२० (३१८८४)
शल्य उवाच। ५-८-२१क्ष् (३३४८)
गच्छ दुर्योधन पुरं स्वकमेव नरर्षभ ।
अहं गमिष्ये द्रष्टुं वै युधिष्ठिरमरिंदमम् ॥ ५-८-२१ (३१८८५)
दृष्ट्वा युधिष्ठिरं राजन्क्षिप्रमेष्ये नराधिप ।
अवश्यं चापि द्रष्टव्यः पाण्डवः पुरुषर्षभः ॥ ५-८-२२ (३१८८६)
दुर्योधन उवाच। ५-८-२३क्ष् (३३४९)
क्षिप्रामागम्यतां राजन्पाण्डवं वीक्ष्य पार्थिव ।
त्वय्यधीनाः स्म राजेन्द्र वरदानं स्मरस्व नः ॥ ५-८-२३ (३१८८७)
शल्य उवाच। ५-८-२४क्ष् (३३५०)
क्षिप्रमेष्यामि भद्रं ते गच्छस्व स्वपुरं नृप ।
ग दृष्ट्वा तु पाण्डवान्राजन्न मिथ्या कर्तुमुत्सहे ॥ ५-८-२४ (३१८८८)
वैशम्पायन उवाच। ५-८-२५क्ष् (३३५१)
पर्यष्वजेतामन्योन्यं शल्यदुर्योधनावुभौ ॥ ५-८-२५ (३१८८९)
स तथा शल्यमामन्त्र्य पुरायात्स्वकं पुरम् ।
शल्यो जगाम कौन्तेयानाख्यातुं कर्म तस्य तत् ॥ ५-८-२६ (३१८९०)
उपप्लाव्यं स गत्वा तु स्कन्धावारं प्रविश्य च ।
पाण्डवानथ तान्सर्वाञ्शल्यस्तत्र ददर्श ह ॥ ५-८-२७ (३१८९१)
चिरात्तु दृष्ट्वा राजानं मातुलं समितिञ्जयम् ।
आसनेभ्यः समुत्पेतुः सर्वे सहयुधिष्ठिराः ॥ ५-८-२८ (३१८९२)
तथा भीमार्जुनौ हृष्टौ स्वस्त्रीयौ च यमावुभौ ।
द्रौपदी च सुभद्रा च अभिमन्युश्च भारत ॥ ५-८-२९ (३१८९३)
समेत्य च महापाहुं शल्यं पाण्डुसुतस्तदा ।
पाद्यमर्घ्यं च गां चैव प्रतिग्राह्य पुरोधसा ॥ ५-८-३० (३१८९४)
कताञ्जलिरदीनात्मा धर्मात्मा शल्यमब्रवीत् ।
स्वागतं तेऽस्तु वै राजन्नेतदासनमास्यताम् ॥ ५-८-३१ (३१८९५)
ततो न्यषीदच्छल्यश्च काञ्चने परमासने ।
तत्र पाद्यथार्घ्यं च न्यवेदयत पाण्डवः ॥ ५-८-३२ (३१८९६)
शल्य उवाच। ५-८-३३क्ष् (३३५२)
दुःखस्यैतस्य महतो धार्तराष्ट्रकृतस्य वै ।
अवाप्स्यसि फलं राजन्हत्वा शत्रून्परन्तप ॥ ५-८-३३ (३१८९७)
विदितं ते महाराज लोकतन्त्रं नराधिप ।
तस्माल्लोककृतं किञ्चित्तव तात न विद्यते ॥ ५-८-३४ (३१८९८)
वैशम्पायन उवाच। ५-८-३५क्ष् (३३५३)
निवेद्य चार्घ्यं विधिवन्मद्रराजाय भारत ।
कुशलं पाण्डवोऽपृच्छच्छल्यं सर्वसुखावहम् ॥ ५-८-३५ (३१८९९)

स तैः परिवृतः सर्वैः पाण्डवैर्धर्मचारिभिः ।
आसने चोपविष्टः स शल्यः पार्थमथाब्रवीत् ॥ ५-८-३६ (३१९००)
शल्य उवाच। ५-८-३७क्ष् (३३५४)
कुशलं राजशार्दूल सर्वत्र कुरुनन्दन ।
अरण्यवासाद्दिष्ट्याऽसि विमुक्तो जयतां वर ॥ ५-८-३७ (३१९०१)
दुष्करं ते कृतं राजन्निर्जने गहने वने ।
भ्रातृभिः सह कौन्तेय कृष्णाया चानयाऽनघ ॥ ५-८-३८ (३१९०२)
अज्ञातवासं घोरं च वसता दुष्करं कृतम् ।
दुःखमेव कुतः सौख्यं राज्यभ्रष्टस्य भारत ॥ ५-८-३९ (३१९०३)
सत्ये तपसि दाने च तव बुद्धिर्युधिष्ठिर ।
क्षमा दमश्चाहिंसा च सत्यं चैव युधिष्ठिर ॥ ५-८-४० (३१९०४)
अद्भुतश्च पुनर्लोकस्त्वयि राजन्प्रतिष्ठितः ।
मृदुर्वदान्यो ब्रह्मण्यो दान्तो धर्मपरायणः ॥ ५-८-४१ (३१९०५)
धर्मास्ते विदिता राजन्बहवो लोकसाक्षिकाः ।
सर्वं जगदिदं तात विदितं ते परन्तप ॥ ५-८-४२ (३१९०६)
मुदितश्च पुनर्लोकस्त्वयि राजन्प्रतिष्ठिते ।
दिष्ट्या कृच्छ्रमिदं राजन्पारितं भरतर्षभ ॥ ५-८-४३ (३१९०७)
दिष्ट्या पश्यामि राजेन्द्र धर्मात्मानं सहानुगम् ।
निस्तीर्णदुष्करं राजंस्त्वां धर्मनिचयं प्रभो ॥ ५-८-४४ (३१९०८)
वैशम्पायन उवाच। ५-८-४५क्ष् (३३५५)
ततोऽस्याकथयद्राजा दुर्योधनसमागमम् ।
तच्च शुश्रूषितं सर्वं वरदानं च भारत ॥ ५-८-४५ (३१९०९)
युधिष्ठिर उवाच। ५-८-४६क्ष् (३३५६)
सुकृतं ते कृतं राजन्प्रहृष्टेनान्तरात्मना ।
दुर्योधनस्य यद्वीर त्वया वाचा प्रतिश्रुतम् ॥ ५-८-४६ (३१९१०)
एकं त्विच्छामि भद्रं ते क्रियमाणं महीपते ।
राजन्नकर्तव्यमपि कर्तुमर्हसि सत्तम ॥ ५-८-४७ (३१९११)
मम त्ववेक्षया वीर शृणु विज्ञापयामि ते ।
भवानिह महाराज वासुदेवसमो युधि ॥ ५-८-४८ (३१९१२)
कर्णार्जुनाभ्यां संप्राप्ते द्वैरथे राजसत्तम ।
कर्णस्य भवता कार्यं सारथ्यं नात्र संशयः ॥ ५-८-४९ (३१९१३)
तत्र पाल्योऽर्जुनो राजन्यदि मत्प्रियमिच्छसि ।
तेजोवधश्च ते कार्यः सौतेरस्मञ्जयावह्नः ।
अकर्तव्यमपि ह्येतत्कर्मुमर्हसि मातुल ॥ ५-८-५० (३१९१४)
शल्य उवाच। ५-८-५१क्ष् (३३५७)
श्रृणु पाण्डव भद्रं ते यद्ब्रवीषि महात्मनः ।

तेजोवधनिमित्तं मां सूतपुत्रस्य सङ्गमे ॥ ५-८-५१ (३१९१५)
अहं तस्य भविष्यामि सङ्ग्रामे सारथिर्ध्रुवम् ।
वासुदेवेन हि समं नित्यं मां सोऽभिमन्यतो ॥ ५-८-५२ (३१९१६)
तस्याहं कुरुशार्दूल प्रतीपमहितं वचः ।
ध्रुवं संकथयिष्यामि योद्धुकामस्य संयुगे ॥ ५-८-५३ (३१९१७)
यथा स हृतदर्पश्च हततेजाश्च पाण्डव ।
भविष्यति सुखं हन्तुं सत्यमेतद्ब्रवीमि ते ॥ ५-८-५४ (३१९१८)
एवमेतत्करिष्यामि यथा तात त्वमात्थ माम् ।
यच्चान्यदपि शक्ष्यामि तत्करिष्यामि ते प्रियम् ॥ ५-८-५५ (३१९१९)
यच्च दुःखं त्वया प्राप्तं द्यूते वै कृष्णया सह ।
परुषाणि च वाक्यानि सूतपुत्रकृतानि वै ॥ ५-८-५६ (३१९२०)
जटासुरात्परिक्लेशः कीचकाच्च महाद्युते ।
द्रौपद्याऽधिगतं सर्वं दमयन्त्या यथाऽशुभम् ॥ ५-८-५७ (३१९२१)
सर्वं दुःखमिदं वीर सुखोदर्कं भविष्यति ।
नात्र मन्युस्त्वया कार्यो विधिर्हि बलवत्तरः ॥ ५-८-५८ (३१९२२)
दुःखानि हि महात्मानः प्राप्नुवन्ति युधिष्ठिर ।
देवैरपि हि दुःखानि प्राप्तानि जगतीपते ॥ ५-८-५९ (३१९२३)
इन्द्रेण श्रूयते राजन्सभार्येण महात्मना ।
अनुभूतं महद्दुःखं देवराजेन भारत ॥ ॥ ५-८-६० (३१९२४)

इति श्रीमन्महाभारते उद्योगपर्वणि सेनोद्योगपर्वणि अष्टमोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-८-२७ उपप्लाव्यं विराटनगरस्य प्रदेशविशेषम् । स्कन्धावारं सेनानिवेशस्थानम् ॥
५-८-५३ प्रतीपं प्रसङ्गप्रतिकूलम् । अहितं परिणामविरुद्धम् ॥
५-८-५८ मन्युर्दैन्यम् ॥

उद्योगपर्व - अध्याय ००९
॥ श्रीः ॥
५.९. अध्यायः ९

Mahabharata - Udyoga Parva - Chapter Topics
शल्येन इन्द्रस्यापि दुःखानुभवे कथिते युधिष्ठिरपृच्छया तेन विस्तरेण तत्कथनोपक्रमः ॥ १ ॥
इन्द्रजिघांसया त्वष्ट्रा सृष्टस्य त्रिशिरसो विश्वरूपस्य तपोभङ्गाय इन्द्रेण अप्सरसां प्रेषणम् ॥ २ ॥

अप्सरोभिस्तस्याधर्षणीयत्वे ज्ञाते इन्द्रेण वज्रपातनात्तस्य हननम् ॥ ३ ॥
हतेपि तस्मिन् जीवतीव दृश्यमाने भयादिन्द्रप्रार्थनया यदृच्छया
आगतेन तक्ष्णा तच्छिरश्छेदनम् ॥ ४ ॥
विश्वरूपहननकुपितेन त्वष्ट्रा पुनरिन्द्रवधाय वृत्रस्योत्पादनम् ॥ ५ ॥
वृत्रेणेन्द्रे पराजिते सेन्द्राणां देवानां विष्णुं प्रति गमनम् ॥ ६ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-९-० (३१९२५)
युधिष्ठिर उवाच। ५-९-०क्ष् (३३५८)
कथमिन्द्रेण राजेन्द्र सभार्येण महात्मना ।
दुःखं प्राप्तं परं घोरमेतदिच्छामि वेदितुम् ॥ ५-९-१ (३१९२६)
शल्य उवाच। ५-९-२क्ष् (३३५९)
शृणु राजन्पुरावृत्तमितिहासं पुरातनम् ।
सभार्येण यथा प्राप्तं दुःखमिन्द्रेण भारत ॥ ५-९-२ (३१९२७)
त्वष्टा प्रजापतिर्ह्यासीद्देवश्रेष्ठो महातपाः ।
स पुत्रं वै त्रिशिरसमिन्द्रद्रोहात्किलासृजत् ॥ ५-९-३ (३१९२८)
ऐन्द्रं स प्रार्थयत्स्थानं विश्वरूपो महाद्युतिः ।
तैस्त्रिभिर्वदनैर्घोरैः सूर्येन्दुज्वलनोपमैः ॥ ५-९-४ (३१९२९)
वेदानेकेन सोऽधीते सुरामेकेन चापिबत् ।
एकेन च दिशः सर्वाः पिबन्निव निरीक्षते ॥ ५-९-५ (३१९३०)
स तपस्वी मुदुर्दान्तो धर्मे तपसि चोद्यतः ।
तपस्तस्य महत्तीव्रं सुदुश्चरमरिन्दम ॥ ५-९-६ (३१९३१)
तस्य दृष्ट्वा तपोवीर्यं सत्यं चामिततेजसः ।
विषादमगमच्छक्र इन्द्रोऽयं मा भवेदिति ॥ ५-९-७ (३१९३२)
कथं सज्जेच्च भोगेषु न च तप्येन्महत्तपः ।
विवर्धमानस्त्रिशिराः सर्वं हि भुवनं ग्रसेत् ॥ ५-९-८ (३१९३३)
इति संचिन्त्य बहुधा बुद्धिमान्भरतर्षभ ।
आज्ञापयत्सोऽप्सरसस्त्वष्टृपुत्रप्रलोभने ॥ ५-९-९ (३१९३४)
यथा स सज्जेत्रिशिराः कामभोगेषु वै भृशम् ।
क्षिप्रं कुरुत गच्छध्वं प्रलोभयत माचिरम् ॥ ५-९-१० (३१९३५)
शृङ्गारवेषाः सुश्रोण्यो हारैर्युक्ता मनोहरैः ।
हावभावसमायुक्ताः सर्वाः सौन्दर्यशोभिताः ॥ ५-९-११ (३१९३६)
प्रलोभयत भद्रं वः शमयध्वं भयं मम ।
अस्वस्थं ह्यात्मनात्मानं लक्षयामि वराङ्गनाः ॥ ५-९-१२ (३१९३७)
भयं तन्मे महाघोरं क्षिप्रं नाशयताबलाः । ५-९-१३ (३१९३८)

अप्सरस ऊचुः ।
तथा यत्नं करिष्यामः शक्र तस्य प्रलोभने ।
यथा नावाप्स्यसि भयं तस्माद्बलनिषूदन ॥ ५-९-१३क्ष् (३३६०)
निर्दहन्निव चक्षुभ्यां योऽसावास्ते तपोनिधिः ।
तं प्रलोयितुं देव गच्छामः सहिता वयम् ॥ ५-९-१४ (३१९३९)
यतिष्यामो वशे कर्तुं व्यपनेतुं च ते भयम् । ५-९-१५ (३१९४०)
शल्य उवाच ।
इन्द्रेण तास्त्वनुज्ञाता जग्मुस्त्रिशिरसोऽन्तिकम् ।
तत्र ता विविधैर्भावैर्लोभयन्त्यो वराङ्गनाः ॥ ५-९-१५क्ष् (३३६१)
नृत्तं संदर्शयामासुस्तथैवाङ्गेषु सौष्ठवम् ।
नाभ्यगच्छत्प्रहर्षं ताः स पश्यन्सुमहातपाः ॥ ५-९-१६ (३१९४१)
इन्द्रियाणि वशे कृत्वा पूर्णसागरसन्निभः ।
तास्तु यत्नं परं कृत्वा पुनः शक्रमुपस्थिताः ॥ ५-९-१७ (३१९४२)
कृताञ्जलिपुटाः सर्वा देवराजमथाब्रुवन् ।
न स शक्यः सुदुर्धर्षो धैर्याच्चालयितुं प्रभो ॥ ५-९-१८ (३१९४३)
यत्ते कार्यं महाभाग क्रियतां तदनन्तरम् ।
संपूज्याप्सरसः शक्रो विसृज्य च महामतिः ॥ ५-९-१९ (३१९४४)
चिन्तयामास तस्यैव वधोपायं युधिष्ठिर ।
स तूष्णीं चिन्तयन्वीरो देवराजः प्रतापवान् ॥ ५-९-२० (३१९४५)
विनिश्चितमतिर्धीमान्वधे त्रिशिरसोऽभवत् ।
वज्रमस्य क्षिपाम्यद्य स क्षिप्रं नभविष्यति ॥ ५-९-२१ (३१९४६)
शत्रुः प्रवृद्धो नोपेक्ष्यो दुर्बलोऽपि बलीयसा ।
शास्त्रबुद्ध्या विनिश्चित्य कृत्वा बुद्धिं वधे दृढाम् ॥ ५-९-२२ (३१९४७)
अथ वैश्वानरनिभं घोररूपं भयावहम् ।
मुमोच वज्रं संक्रुद्धः शक्रस्त्रिशिरसं प्रति ॥ ५-९-२३ (३१९४८)
स पपात हतस्तेन वज्रेण दृढमाहतः ।
पर्वतस्येव शिखरं प्रणुन्नं मेदिनीतले ॥ ५-९-२४ (३१९४९)
तं तु वज्रहतं दृष्ट्वा शयानमचलोपमम् ।
न शर्म लेभे देवेन्द्रो दीपिततस्तस्य तेजसा ॥ ५-९-२५ (३१९५०)
हतोऽपि दीप्ततेजाः स जीवन्निव हि दृश्यते ।
घातितस्य शिरांस्याजौ जीवन्तीवाद्भुतानि वै ॥ ५-९-२६ (३१९५१)
ग शिरांसि तस्याजायन्त त्रीण्येव शकुनास्त्रयः ।
तित्तिरिः कलविङ्कश्च तथैव च कपिञ्जलः ।
विश्वरूपशिरांस्येव जायन्ते तानि भारत ' ॥ ५-९-२७ (३१९५२)
ततोऽतिभीतगात्रस्तु शक्र आस्ते विचारयन् ।
अथाजगाम परशुं स्कन्धेनादाय वर्धकिः ॥ ५-९-२८ (३१९५३)

तदरण्यं महाराज यत्रास्तेऽसौ निपातितः ।
स भीतस्तत्र तक्षाणं घटमानं शचीपतिः ॥ ५-९-२९ (३१९५४)
अपश्यदब्रवीच्चैनं सत्वरं पाकशासनः ।
क्षिप्रं छिन्धि शिरांस्यस्य कुरुष्व वचनं मम ॥ ५-९-३० (३१९५५)
तक्षोवाच । ५-९-३१क्ष् (३३६२)
महास्कन्धो भृशं ह्येष परशुर्नभविष्यति ।
कर्तुं चाहं न शक्ष्यामि कर्म राज्ञिर्विगर्हितम् ॥ ५-९-३१ (३१९५६)
इन्द्र उवाच । ५-९-३२क्ष् (३३६३)
मा भैस्त्वं शीघ्रमेतद्वै कुरुष्व वचनं मम ।
मत्प्रसादाद्धि ते शस्त्रं वज्रकल्पं भविष्यति ॥ ५-९-३२ (३१९५७)
तक्षोवाच । ५-९-३३क्ष् (३३६४)
कं भवन्तमहं विद्यां घोरकर्माणमद्य वै ।
एतदिच्छाम्यहं श्रोतुं तत्त्वेन कथयस्व मे ॥ ५-९-३३ (३१९५८)
इन्द्र उवाच । ५-९-३४क्ष् (३३६५)
अहमिन्द्रो देवराजस्तक्षन्विदितमस्तु ते ।
कुरुष्वैतद्यथोक्तं मे तक्षन्माऽत्र विचारय ॥ ५-९-३४ (३१९५९)
ग मया हि निहतः शेते त्रिशिरास्त्वं च विद्धि वै। ५-९-३५ (३१९६०)
वैशम्पायन उवाच ।
स प्रह्वः प्राञ्जलिर्भूत्वा इदं वचनमब्रवीत्' ॥ ५-९-३५क्ष् (३३६६)
क्रूरेण नापत्रपसे कथं शक्रेह कर्मणा ।
ऋषिपुत्रमिमं हत्वा ब्रह्महत्याभयं न ते ॥ ५-९-३६ (३१९६१)
शक्र उवाच । ५-९-३७क्ष् (३३६७)
पश्चाद्धर्मं चरिष्यामि पावनार्थं सुदुश्चरम् ।
शत्रुरेष महावीर्यो वज्रेण निहतो मया ॥ ५-९-३७ (३१९६२)
अद्यापि चाहमुद्विग्नस्तक्षन्नस्माद्बिभेमि वै ।
क्षिप्रं छिन्धि शिरांसि त्वं करिष्येऽनुग्रहं तव ॥ ५-९-३८ (३१९६३)
शिरः पशोस्ते दास्यन्ति भागं यज्ञेषु मानवाः ।
एष तेऽनुग्रहस्तक्षन्क्षिप्रं कुरु मम प्रियम् ॥ ५-९-३९ (३१९६४)
शल्य उवाच । ५-९-४०क्ष् (३३६८)
एतच्छ्रुत्वा तु तक्षा स महेन्द्रवचनात्तदा ।
शिरांस्यथ त्रिशिरसः कुठारेणाच्छिनत्तदा ॥ ५-९-४० (३१९६५)
निकृत्तेषु ततस्तेषु निष्क्रामन्नण्डजास्त्वथ ।
कपिञ्जलास्तित्तिराश्च कलविङ्काश्च सर्वशः ॥ ५-९-४१ (३१९६६)
येन वेदानधीते स्म पिबते सोममेव च ।
तस्माद्वक्रार्द्विनिश्चेरुः क्षिप्रं तस्य कपिञ्जलाः ॥ ५-९-४२ (३१९६७)
येन सर्वा दिशो राजन्पिबन्निव नीरीक्षते ।

तस्माद्वृक्राद्विनिश्चेरुस्तित्तिरास्तस्य पाण्डव ॥ ५-९-४३ (३१९६८)
यत्सुरापं तु तस्यासीद्वृकं त्रिशिरसस्तदा ।
कलविङ्काः समुत्पेतुः श्येनाश्च भरतर्षभ ॥ ५-९-४४ (३१९६९)
ततस्तेषु निकृत्तेषु विज्वरो मघवानथ ।
ग्तक्षणे तथा वरं दत्त्वा प्रहृष्टस्त्रिदशेश्वरः ॥' ५-९-४५ (३१९७०)
जगाम त्रिदिवं देवस्तक्षाऽपि स्वगृहान्ययौ ।
मेने कृतार्थमात्मानं हत्वा शत्रुं सुरारिहा ॥ ५-९-४६ (३१९७१)
ग तक्षापि स्वगृहं गत्वा नैव शंसति कस्यचित् ।
अथैनं नाभिजानन्ति वर्षमेकं तथागतम् ॥ ५-९-४७ (३१९७२)
अथ संवत्सरे पूर्णे भूताः पशुपतेः प्रभो ।
तमाक्रोशन्त मघवान्नः प्रभुर्ब्रह्महा इति। ५-९-४८ (३१९७३)
तत इन्द्रो व्रतं घोरमाचरत्पाकशासनः ।
तपसा च सुसंयुक्तः सह देवैर्मरुद्गणैः ॥ ५-९-४९ (३१९७४)
समुद्रेषु पृथिव्यां च वनस्पतिषु स्त्रीषु च ।
विभज्य ब्रह्महत्यां च तान्वरैरप्ययोजयत् ॥ ५-९-५० (३१९७५)
वरदस्तु वरं दत्त्वा पृथिव्यै सागराय च ।
वनस्पतिभ्यः स्त्रीभ्यश्च ब्रह्महत्यां नुनोद ताम् ॥ ५-९-५१ (३१९७६)
ततस्तु शुद्धो भगवान्देवैर्लोकैश्च पूजितः ।
इन्द्रस्थानमुपातिष्ठत्पूज्यमानो महर्षिभिः' ॥ ५-९-५२ (३१९७७)
त्वष्टा प्रजापतिः श्रुत्वा शक्रेणाथ हतं सुतम् ।
क्रोधसंरक्तनयन इदं वचनमब्रवीत् ॥ ५-९-५३ (३१९७८)
त्वष्टोवाच। ५-९-५४क्ष् (३३६९)
तप्यमानं तपो नित्यं क्षान्तं दान्तं जितेन्द्रियम् ।
विनाऽपराधेन यतः पुत्रं हिंसितवान्मम ॥ ५-९-५४ (३१९७९)
तस्माच्छ्रवृकविनाशाय वृत्रमुत्पादयाम्यहम् ।
लोकाः पश्यन्तु मे वीर्यं तपसश्च बलं महम् ।
स च पश्यतु देवेन्द्रो दुरात्मा पापचेतनः ॥ ५-९-५५ (३१९८०)
उपस्पृश्य ततः क्रुद्धस्तपस्वी सुमहायशाः ।
अग्नौ हुत्वा समुत्पाद्य घोरं वृत्रमुवाच ह ॥ ५-९-५६ (३१९८१)
इन्द्रशत्रो विवर्धस्व प्रभावात्तपसो मम ।
सोऽवर्धत दिवं स्तब्ध्वा सूर्यवैश्वानरोपमः ॥ ५-९-५७ (३१९८२)
किं करोमीति चोवाच कालसूर्य इवोदितः ।
शक्रं जहीति चाप्युक्तो जगाम त्रिदिवं ततः ॥ ५-९-५८ (३१९८३)
ततो युद्धं समभवद्वृत्रवासवयोर्महत् ।
संक्रुद्धयोर्महाघोरं प्रसक्तं कुरुसत्तम ॥ ५-९-५९ (३१९८४)
ततो जग्राह देवेन्द्रं वृत्रो वीरः शतक्रतुम् ।

अपावृत्याक्षिपद्वक्त्रे शक्रं कोपसमन्वितः ॥ ५-९-६० (३१९८५)
ग्रस्ते वृत्रेण शक्रे तु संभ्रान्तास्त्रिदिवेश्वराः ।
असृजंस्ते महासत्वा जृम्भिकां वृत्रनाशिनीम् ॥ ५-९-६१ (३१९८६)
विजृम्भमाणस्य ततो वृत्रस्यास्यादपावृतात् ।
स्वान्यङ्गान्यभिसंक्षिप्य निष्क्रान्तो बलनाशनः ॥ ५-९-६२ (३१९८७)
ततः प्रभृति लोकस्य जृम्भिका प्राणिसंश्रिता ।
जह्रुषुश्च सुराः सर्वे शक्रं दृष्ट्वा विनिःसृतम् ॥ ५-९-६३ (३१९८८)
ततः प्रववृते युद्धं वृत्रवासवयोः पुनः ।
संरब्धयोस्तदा घोरं सुचिरं भरतर्षभ ॥ ५-९-६४ (३१९८९)
यदा व्यवर्धत रणे वृत्रो बलसमन्वितः ।
त्वष्टुस्तेजोबलाविद्धस्तदा शक्रो न्यवर्तत। ५-९-६५ (३१९९०)
निवृत्ते च तदा देवा विषादमगमन्परम् ।
समेत्य सह शक्रेण त्वष्टुस्तेजोविमोहिताः ॥ ५-९-६६ (३१९९१)
अमन्त्रयन्त ते सर्वे मुनिभिः सह भारत ।
किं कार्यमिति वै राजन्विचिन्त्य भयमोहिताः ॥ ५-९-६७ (३१९९२)
जग्मुः सर्वे महात्मानं मनोभिर्विष्णुमव्ययम् ।
उपविष्टा मन्दराग्रे सर्वे वृत्रवधेप्सवः ॥ ॥ ५-९-६८ (३१९९३)

इति श्रीमन्महाभारते उद्योगपर्वणि सेनोद्योगपर्वणि नवमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-९-११ हावाः शृङ्गारचेष्टाः । भावाः चित्तविकारा हर्षादयस्तर्युक्ताः ॥
५-९-१६ सौषवं सौन्दर्यम् । प्रहर्ष लब्धभोयोऽस्मीति तोषम् ॥
५-९-२८ वर्धकिः तक्षा ॥
५-९-३१ नभविष्यति नङ्क्ष्यति ॥
५-९-५६ ठपस्पृश्य आचम्य ॥
५-९-६० अपावृत्य मुखं संप्रसार्य ॥

उद्योगपर्व - अध्याय ०१०
॥ श्रीः ॥
५.१०. अध्यायः १०

Mahabharata - Udyoga Parva - Chapter Topics
विष्णवाज्ञया ऋषिभिर्वृत्रस्य आसुधाद्यवध्यत्ववरदानपूर्वकं
इन्द्रवृत्रयोः सन्धिकरणम् ॥ १ ॥
कदाचन समुद्रतीरे वृत्रं दृष्टवता इन्द्रेण वृत्रोपरि सवज्रे
फेने प्रक्षिप्ते तत्प्रविष्टेन विष्णुना वृत्रहननम् ॥ २ ॥

वृत्रवधजन्यब्रह्महत्यापीडितस्येन्द्रस्य स्वर्गात्प्रवासः ॥ ३ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१०-० (३१९९४)
इन्द्र उवाच। ५-१०-०क्ष् (३३७०)
सर्वं व्याप्तमिदं देवा वृत्रेण जगदव्ययम् ।
न ह्यस्य सदृशं किञ्चित्प्रतिघाताय यङ्गवेत् ॥ ५-१०-१ (३१९९५)
समर्थो ह्यभवं पूर्वमसमर्थोऽस्मि सांप्रतम् ।
कथं नु कार्यं भद्रं वो दुर्धर्षः स हि मे मतः ॥ ५-१०-२ (३१९९६)
तेजस्वी च महात्मा च युद्धे चामितविक्रमः ।
ग्रसेत्त्रिभुवनं सर्वं सदेवासुरमानुषम् ॥ ५-१०-३ (३१९९७)
तस्माद्विनिश्चयमिमं शृणुध्वं त्रिदिवौकसः ।
विष्णोः क्षयमुपागम्य समेत्य च महात्मना ॥ ५-१०-४ (३१९९८)
तेन संमन्त्र्य वेत्स्यामो वधोपायं दुरात्मनः । ५-१०-५ (३१९९९)
शल्य उवाच ।
एवमुक्ते मघवता देवाः शर्षिगणास्तदा ।
शरण्यं शरमं देवं जग्मुर्विष्णुं महाबलम् ॥ ५-१०-५क्ष् (३३७१)
ऊचुश्च सर्वे देवेशं विष्णुं वृत्रभयार्दिताः ।
त्रयो लोकास्त्वया क्रान्तास्त्रिभिर्विक्रमणैः पुरा ॥ ५-१०-६ (३२०००)
अमृतं चाहृतं विष्णो दैत्याश्च निहता रणे ।
बलिं बद्ध्वा महादैत्यं शक्रो देवाधिपः कृतः ॥ ५-१०-७ (३२००१)
त्वं प्रभुः सर्वदेवानां त्वया सर्वमिदं ततम् ।
त्वं हि देवो महादेव सर्वलोकनमस्कृतः ॥ ५-१०-८ (३२००२)
गतिर्भव त्वं देवानां सेन्द्राणाममरोत्तम ।
जगद्व्याप्तमिदं सर्वं वृत्रेणासुरसूदन ॥ ५-१०-९ (३२००३)
विष्णुरुवाच। ५-१०-१०क्ष् (३३७२)
अवश्यं करणीयं मे भवतां हितमुत्तमम् ।
तस्मादुपायं वक्ष्यामि यथाऽसौ नभविष्यति ॥ ५-१०-१० (३२००४)
गच्छध्वं सर्षिगन्धर्वा यत्रासौ विश्वरूपधृक् ।
साम तस्य प्रयुञ्जध्वं तत एनं विजेष्यथ ॥ ५-१०-११ (३२००५)
भविष्यति जयो देवाः शक्रस्य मम तेजसा ।
अदृश्यश्च प्रवेक्ष्यामि वज्रे ह्यस्यायुधोत्तमे ॥ ५-१०-१२ (३२००६)
गच्छध्वमृषिभिः सार्धं गन्धर्वैश्च सुरोत्तमाः ।
वृत्रस्य सह शक्रेण सन्धिं कुरुत माचिरम् ॥ ५-१०-१३ (३२००७)
शल्य उवाच। ५-१०-१४क्ष् (३३७३)

एवमुक्ते तु देवेन ऋषयस्त्रिदशास्तथा ।
ययुः समेत्य सहिताः शक्रं कृत्वा पुरःसरम् ॥ ५-१०-१४ (३२००८)
समीपमेत्य च यदा सर्व एव महौजसः ।
तं तेजसा प्रज्वलितं प्रतपन्तं दिशो दश ॥ ५-१०-१५ (३२००९)
ग्रसन्तमिव लोकांस्त्रीन्सूर्याचन्द्रमसौ यथा ।
ददृशुस्ते ततो वृत्रं शक्रेण सह देवताः ॥ ५-१०-१६ (३२०१०)
ऋषयोऽथ ततोऽभ्येत्य वृत्रमूचुः प्रियं वचः ।
व्याप्तं जगदिदं सर्वं तेजसा तव दुर्जय ॥ ५-१०-१७ (३२०११)
न च शक्नोषि निर्जेषुं वासवं बलिनां वर ।
युध्यतोश्चापि वां कालो व्यतीतः सुमहानिह ॥ ५-१०-१८ (३२०१२)
पीड्यन्ते च प्रजाः सर्वाः सदेवासुरमानुषाः ।
सख्यं भवतु ते वृत्र शक्रेण सह नित्यदा ॥ ५-१०-१९ (३२०१३)
अवाप्स्यसि सुखं त्वं च शक्रलोकांश्च शाश्वतान् ।
ऋषिवाक्यं निशम्याथ वृत्रःस तु महाबलः ॥ ५-१०-२० (३२०१४)
उवाच तानृषीन्सर्वान्प्रणम्य शिरसाऽसुरः ।
सर्वे यूयं महाभागा गन्धर्वाश्चैव सर्वशः ॥ ५-१०-२१ (३२०१५)
यद्ब्रूथ तच्छ्रुतं सर्वं ममापि श्रृणुतानघाः ।
सन्धिः कथं वै भविता मम शक्रस्य चोभयोः ।
तेजसोर्हि द्वयोर्देवाः सख्यं वै भविता कथम् ॥ ५-१०-२२ (३२०१६)
ऋषय ऊचुः । ५-१०-२३क्ष् (३३७४)
सकृत्सतां सङ्गतमीप्सितव्यं
ततः परं भविता भव्यमेव ।
नातिक्रामेत्सत्पुरुषेण सङ्गतं
तस्मात्सतां संगतमीप्सितव्यम् ॥ ५-१०-२३ (३२०१७)
दृढं सतां सङ्गतं चापि नित्यं
ब्रूयाच्चार्थं ह्यर्थकृच्छ्रेषु धीराः ।
महार्थवत्सत्पुरुषेण सङ्गतं
तस्मात्सन्तं न जिघांसेत धीरः ॥ ५-१०-२४ (३२०१८)
इन्द्रः सतां संमतश्च निवासश्च महात्मनाम् ।
सत्यवादी ह्यनिन्द्यश्च धर्मवित्सूक्ष्मनिश्चयः ॥ ५-१०-२५ (३२०१९)
तेन ते सह शक्रेण सन्धिर्भवतु नित्यदा ।
एवं विश्वासमागच्छ मा ते भूद्बुद्धिरन्यथा ॥ ५-१०-२६ (३२०२०)
शल्य उवाच । ५-१०-२७क्ष् (३३७५)
महर्षिवचनं श्रुत्वा तानुवाच महाद्युतिः ।
अवश्यं भगवन्तो मे माननीयास्तपस्विनः ॥ ५-१०-२७ (३२०२१)
ब्रवीमि यदहं देवास्तत्सर्वं क्रियते यदि ।

ततः सर्वं करिष्यामि यदूचुर्मां दिवौकसः ॥ ५-१०-२८ (३२०२२)
न शुष्केण न चाद्रेण नाश्मना न च दारुणा ।
न शस्त्रेण न चास्त्रेण न दिवा न तथा निशि ॥ ५-१०-२९ (३२०२३)
वध्यो भवेयं विप्रेन्द्राः शक्रस्य सह दैवतैः ।
एवं मे रोचते सन्धिः शक्रेण सह नित्यदा ॥ ५-१०-३० (३२०२४)
बाढमित्येव ऋषयस्तमूचुर्भरतर्षभ ।
एवं वृत्ते तु सन्धाने वृत्रः प्रमुदितोऽभवत् ॥ ५-१०-३१ (३२०२५)
ग ततः सन्धिं मिथः कृत्वा ऋषयो दीप्ततेजसः ।
शक्रस्य सह वृत्रेण पुनर्जग्मुर्यथागतम् ’॥ ५-१०-३२ (३२०२६)
युक्तः सदाऽभवच्चापि शक्रो हर्षसमन्वितः ।
वृत्रस्य वधसंयुक्तानुपायानन्वचिन्तयत् ॥ ५-१०-३४अग
अभिसन्धिर्महेन्द्रस्य सन्धिकर्मणि यः कृतः ।
ऋषिभिस्त्वीरितं यच्च महेन्द्रस्तदनुस्मरन् ॥’ ५-१०-३३ (३२०२७)
छिद्रान्वेषी समुद्विग्नः सदा वसति देवराट् ।
स कदाचिन्समुद्रान्ते समपश्यन्महासुरम् ॥ ५-१०-३५ (३२०२८)
सन्ध्याकाल उपावृत्ते मुहूर्ते चातिदारुणे ।
ततः संचिन्त्य भगवान्वरदानं महात्मनः ॥ ५-१०-३६ (३२०२९)
सन्ध्येयं वर्तते रौद्रा न रात्रिर्दिवसं न च ।
वृत्रश्चावश्यवध्योऽयं मम सर्वहरो रिपुः ॥ ५-१०-३७ (३२०३०)
यदि वृत्रं न हन्म्यद्य वञ्चयित्वा महासुरम् ।
महाबलं महाकायं न मे श्रेयो भविष्यति ॥ ५-१०-३८ (३२०३१)
एवं संचिन्तयन्नेव शक्रो विष्णुमनुस्मरन् ।
अथ फेनं तदाऽपश्यत् समुद्रे पर्वतोपमप् ॥ ५-१०-३९ (३२०३२)
नायं युष्को न चाद्रोऽयं न च शस्त्रमिदं तथा ।
एनं क्षेप्स्यामि वृत्रस्य क्षणादेव नशिष्यति ॥ ५-१०-४० (३२०३३)
सवज्रमथ फेनं तं क्षिप्रं वृत्रे निसृष्टवान् ।
प्रविश्य फेनं तं विष्णुरथ वृत्रं व्यनाशयत् ॥ ५-१०-४१ (३२०३४)
निहते तु ततो वृत्रे दिशो वितिमिराऽभवन् ।
प्रववौ च शिवो वायुः प्रजाश्च जह्रुषुस्तथा ॥ ५-१०-४२ (३२०३५)
ततो देवाः सगन्धर्वा यक्षरक्षोमहोरगाः ।
ऋषयश्च महेन्द्रं तमस्तुवन्विविधैः स्तवैः ॥ ५-१०-४३ (३२०३६)
नमस्कृतः सर्वभूतैः सर्वभूतान्यसान्त्वयत् ।
हत्वा शत्रुं प्रहृष्टात्मा वासवः सह दैवतैः ॥ ५-१०-४४ (३२०३७)
विष्णुं त्रिभुवनश्रेष्ठं पूजयामास धर्मवित् ।
ततो हते महावीर्ये वृत्रे देवभयङ्करे ॥ ५-१०-४५ (३२०३८)
अनृतेनाभिभूतोऽभूच्छक्रः परमदुर्मनाः ।

त्रैशीर्षयाऽभिभूतश्च स पूर्वं ब्रह्महत्यया ॥ ५-१०-४६ (३२०३९)
ग्र महादेवस्य भूतैश्च स पुनर्ब्रह्महा इति ।
आक्रुष्टो निर्भयैर्भूयो व्रीडितो बलवृत्रहा '॥ ५-१०-४७ (३२०४०)
सोऽन्तमाश्रित्य लोकानां नष्टसंज्ञो विचेतनः ।
न प्राज्ञायत देवेन्द्रस्त्वभिभूतः स्वकर्मभिः ॥ ५-१०-४८ (३२०४१)
प्रतिच्छन्नोऽवसच्चाप्सु चेष्टमान इवोरगः ।
ततः प्रनष्टे देवेन्द्रे ब्रह्महत्या भयार्दिते ॥ ५-१०-४९ (३२०४२)
भूमिः प्रध्वस्तसंकाशा निर्वृक्षा शुष्ककानना ।
विच्छिन्नस्रोतसो नद्यः सरांस्यनुदकानि च ॥ ५-१०-५० (३२०४३)
संक्षोभश्चापि सत्वानामनावृष्टिकृतोऽभवत् ।
देवाश्चापि भृशं त्रस्तास्तथा सर्वे महर्षयः ॥ ५-१०-५१ (३२०४४)
अराजकं जगत्सर्वमभिभूतमुपद्रवैः ।
ततो भीताऽभवन्देवाः को नो राजा भवेदिति ॥ ५-१०-५२ (३२०४५)
दिवि देवर्षयश्चापि देवराजविनाकृताः ।
न स्म कश्चन देवानां राज्ये वै कुरुते मतिम् ॥ ॥ ५-१०-५३ (३२०४६)

इति श्रीमन्महाभारते उद्योगपर्वणि सेनोद्योगपर्वणि दशमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-१०-४ क्षयं गृहम् ॥
४ ॥

उद्योगपर्व - अध्याय ०११
॥ श्रीः ॥
५.११. अध्यायः ११

Mahabharata - Udyoga Parva - Chapter Topics

ऋषिभिर्देवैश्च नहुषस्य वरदानपूर्वकमिन्द्रराज्ये अभिषेचनम् ॥ १ ॥
कदाचन स्वावलीकनेन कलुषितमनसा नहुषेण काम्यमानायै इन्द्राण्यै
बृहस्पतिना अभयप्रदानम् ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-११-० (३२०४७)
शल्य उवाच। ५-११-०क्ष् (३३७६)
ऋषयोऽथाब्रुवन्सर्वे देवाश्च त्रिदिवेश्वराः ।
अयं वै नहुषः श्रीमान्देवराज्येऽभिषिच्यताम् ॥ ५-११-१ (३२०४८)

तेजस्वी च यशस्वी च धार्मिकश्चैव नित्यदा ।
ते गत्वा त्वब्रुवन्सर्वे राजा नो भव पार्थिव ॥ ५-११-२ (३२०४९)
स तानुवाच नहुषो देवानृपिगणांस्तथा ।
पितृभिः सहितान्राजन्परिप्सन्हितमात्मनः ॥ ५-११-३ (३२०५०)
दुर्बलोऽहं न मे शक्तिर्भवतां परिपालने ।
बलवाञ्ज्ञायतां कश्चिद्बलं शक्रे हि नित्यदा ॥ ५-११-४ (३२०५१)
तमब्रुवन्पुनः सर्वे देवा ऋषिपुरोगमाः ।
अस्माकं तपसा युक्तः पाहि राज्यं त्रिविष्टपे ॥ ५-११-५ (३२०५२)
परस्परभयं घोरमस्माकं हि न संशयः ।
अभिषिच्यस्व राजेन्द्र भव राजा त्रिविष्टपे ॥ ५-११-६ (३२०५३)
देवदानवयक्षाणामृषीणां रक्षसां तथा ।
पितृगन्धर्वभूतानां चक्षुर्विषयवर्तिनाम्। ५-११-७ (३२०५४)
तेज आदास्यसे पश्यन्बलवांश्च भविष्यसि ।
धर्मं पुरस्कृत्य सदा सरवलोकाधिपो भव ॥ ५-११-८ (३२०५५)
ब्रह्मर्षीश्चापि देवांश्च गोपायस्व त्रिविष्टपे । ५-११-९ (३२०५६)
शल्य उवाच ।
अभिषिक्तः स राजेन्द्र ततो राजा त्रिविष्टपे ॥ ५-११-९क्ष् (३३७७)
धर्मं पुरस्कृत्य तदा सर्वलोकाधिपोऽभवत् ।
सुदुर्लभं वरं लब्ध्वा प्राप्य राज्यं त्रिविष्टपे ॥ ५-११-१० (३२०५७)
धर्मात्मा सततं भूत्वा कामात्मा समपद्यत ।
देवोद्यानेषु सर्वेषु नन्दनोपवनेषु च ॥ ५-११-११ (३२०५८)
कैलासे हिमवत्पृष्ठे मन्दरे श्वेतपर्वते ।
सह्ये महेन्द्रे मलये समुद्रेषु सरित्सु च ॥ ५-११-१२ (३२०५९)
अप्सरोभिः परिवृतो देवकन्यासमावृतः ।
नहुषो देवराजोऽथ क्रीडन्बहुविधं तदा ॥ ५-११-१३ (३२०६०)
श्रृण्वन्दिव्या बहुविधाः कथाः श्रुतिमनोहराः ।
वादित्राणि च सर्वाणि गीतं च मधुरस्वनम् ॥ ५-११-१४ (३२०६१)
विश्वावसुर्नारदश्च गन्धर्वाप्सरसां गणाः ।
ऋतवः षट्च देवेन्द्रं मूर्तिमन्त उपस्थिताः ॥ ५-११-१५ (३२०६२)
मारुतः सुरभिर्वाति मनोज्ञः सत्वशीतलः ।
एवं विक्रीडतस्तस्य नहुषस्य दुरात्मनः ॥ ५-११-१६ (३२०६३)
संप्राप्ता दर्शनं देवी शक्रस्य महिषी प्रिया ।
स तां संदृश्य दुष्टात्मा प्राह सर्वान्सभासदः ॥ ५-११-१७ (३२०६४)
इन्द्रस्य महिषी देवी कस्मान्मां नोपतिष्ठति ।
अहमिन्द्रोऽस्मि देवानां लोकानां च तथेश्वरः ॥ ५-११-१८ (३२०६५)
आगच्छतु शची मह्यं क्षिप्रमद्य निवेशनम् ।

तच्छ्रुत्वा दुर्मना देवी बृहस्पतिमुवाच ह ॥ ५-११-१९ (३२०६६)
रक्ष मां नहुषाद्ब्रह्मंस्त्वामस्मि शरणं गता ।
सर्वलक्षणसंपन्नां ब्रह्मंस्त्वं मां प्रभाषसे ॥ ५-११-२० (३२०६७)
देवराजस्य दयितामत्यन्तं सुखभागिनीम् ।
अवैधव्येन युक्तां चाप्येकपत्नीं पतिव्रदाम् ॥ ५-११-२१ (३२०६८)
उक्तवानसि मां पूर्वमृतां तां कुरु वै गिरम् ।
नोक्तपूर्वं च भगवन्मृषा ते किंचिदीश्वर ॥ ५-११-२२ (३२०६९)
तस्मादेतद्भवेत्सत्यं त्वयोक्तं द्विजसत्तम ।
बृहस्पतिरथोवाच इन्द्राणीं भयमोहिताम् ॥ ५-११-२३ (३२०७०)
यदुक्तासि मया देवि सत्यं तद्भविता ध्रुवम् ।
द्रक्ष्यसे देवराजं तमिन्द्रं शीघ्रमिहागतम् ॥ ५-११-२४ (३२०७१)
न भेतव्यं च नहुषात्सत्यमेतद्ब्रवीमि ते ।
समानयिष्ये शक्रेण नचिराद्भवतीमहम् ॥ ५-११-२५ (३२०७२)
अथ शुश्राव नहुष इन्द्राणीं शरणीं गताम् ।
बृहस्पतेरङ्गिरसश्चुक्रोध स नृपस्तदा ॥ ॥ ५-११-२६ (३२०७३)

इति श्रीमन्महाभारते उद्योगपर्वणि सेनोद्योगपर्वणि एकादशोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-११-२ नोऽस्माकं राजा भव ॥
२ ॥

उद्योगपर्व - अध्याय ०१२
॥ श्रीः ॥
५.१२. अध्यायः १२

Mahabharata - Udyoga Parva - Chapter Topics
नहु षप्रसादनाय देवादिभिः प्रार्थितेनापि बृहस्पतिना शच्या
अत्याजनम् ॥ १ ॥
बृहस्पत्यनुमत्या समयकरणाय शच्यानहुषसमीपगमनम् ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१२-० (३२०७४)
शल्य उवाच। ५-१२-०क्ष् (३३७८)
क्रुद्धं तु नहुषं दृष्ट्वा देवा ऋषिपुरोगमाः ।
अब्रुवन्देवराजानं नहुषं घोरदर्शनम् ॥ ५-१२-१ (३२०७५)

देवराज जहि क्रोधं त्वयि क्रुद्धे जगद्विभो ।
त्रस्तं सासुरगन्धर्वं सकिंनरमहोरगम् ॥ ५-१२-२ (३२०७६)
जहि क्रोधमिमं साधो न कुप्यन्ति भवद्विधाः ।
परस्य पत्नी सा देवी प्रसीदस्व सुरेश्वर ॥ ५-१२-३ (३२०७७)
निवर्तय मनः पापात्परदाराभिमर्शनात् ।
देवराजोऽसि भद्रं ते प्रजा धर्मेण पालय ॥ ५-१२-४ (३२०७८)
एवमुक्तो न जग्राह तद्वचः काममोहितः ।
अथ देवानुवाचेदमिन्द्रं प्रति सुराधिपः ॥ ५-१२-५ (३२०७९)
अहल्या धर्षिता पूर्वमृषिपत्नी यशस्विनी ।
जीवतो भर्तुरिन्द्रेण स वः किं न निवारितः ॥ ५-१२-६ (३२०८०)
बहूनि च नृशंसानि कृतानीन्द्रेण वै पुरा ।
वैधर्म्याण्युपधाश्चैव स वः किं न निवारितः ॥ ५-१२-७ (३२०८१)
उपतिष्ठतु देवी मामेतदस्या हितं परम् ।
युष्माकं च सदा देवाः शिवमेवं भविष्यति ॥ ५-१२-८ (३२०८२)
देवा ऊचुः । ५-१२-९क्ष् (३३७९)
इन्द्राणीमानयिष्यामो यथेच्छसि दिवस्पते ।
जहि क्रोधमिमं वीर प्रीतो भव सुरेश्वर ॥ ५-१२-९ (३२०८३)
शल्य उवाच । ५-१२-१०क्ष् (३३८०)
इत्युक्त्वा तं तदा देवा ऋषिभिः सह भारत ।
तग्मुर्बृहस्पतिं वक्तुमिन्द्राणीं चाशुभं वचः ॥ ५-१२-१० (३२०८४)
जानीमः शरणं प्राप्तामिन्द्राणीं तव वेश्मनि ।
दत्ताभयां च विप्रेन्द्र त्वया देवर्षिसत्तम ॥ ५-१२-११ (३२०८५)
ते त्वां देवाः सगन्धर्वा ऋषयश्च महाद्युते ।
प्रसादयन्ति चेन्द्राणी नहुषाय प्रदीयताम् ॥ ५-१२-१२ (३२०८६)
इन्द्राद्विशिष्टो नहुषो देवराजो महाद्युतिः ।
वृणोत्विमं वरारोहा भर्तृत्वे वरवर्णिनी ॥ ५-१२-१३ (३२०८७)
एवमुक्ते तु सा देवी बाष्पमुत्सृज्य सस्वनम् ।
उवाच रुदती दीना बृहस्पतिमिदं वचः ॥ ५-१२-१४ (३२०८८)
नाहमिच्छामि नहुषं पतिं देवर्षिसत्तम ।
शरणागतास्मि ते ब्रह्मंस्त्रायस्व महतो भयात् ॥ ५-१२-१५ (३२०८९)
बृहस्पतिरुवाच । ५-१२-१६क्ष् (३३८१)
शरणागतं न त्यजेयमिन्द्राणि मम निश्चयः ।
धर्मज्ञां सत्यशीलां च न त्यजेयमनिन्दिते ॥ ५-१२-१६ (३२०९०)
नाकार्यं कर्तुमिच्छामि ब्राह्मणः सन्विशेषतः ।
श्रुतधर्मा सत्यशीलो जानन्धर्मानुशासनम् ॥ ५-१२-१७ (३२०९१)
नाहमेतत्करिष्यामि गच्छध्वं वै सुरोत्तमाः ।

अस्मिंश्चार्थे पुरा गीतं ब्रह्मणा श्रूयतामिदम् ॥ ५-१२-१८ (३२०९२)
न तस्य बीजं रोहति रोहकाले
न तस्य वर्षं वर्षति वर्षकाले ।
भीतं प्रपन्नं प्रददाति शत्रवे
न स त्रातारं लभते त्राणमिच्छन् ॥ ५-१२-१९ (३२०९३)
मोघमन्नं विन्दति चाप्यचेताः
स्वर्गाल्लोकाद्भ्रश्यति नष्टचेष्टः ।
भीतं प्रपन्नं प्रददाति यो वै
न तस्य हव्यं प्रतिगृह्णन्ति देवाः ॥ ५-१२-२० (३२०९४)
प्रमीयते चास्य प्रजा ह्यकाले
सदा विवासं पितरोऽस्य कुर्वते ।
भीतं प्रपन्नं प्रददाति शत्रवे
सेन्द्रा देवाः प्रहरन्त्यस्य वज्रम् ॥ ५-१२-२१ (३२०९५)
एतदेवं विजानन्वै न दास्यामि शचीमिमाम् ।
इन्द्राणीं विश्रुतां लोके शक्रस्य महिषीं प्रियां ॥ ५-१२-२२ (३२०९६)
अस्या हितं भवेद्यच्च मम चापि हितं भवेत् ।
क्रियतां तत्सुरश्रेष्ठा नहि दास्याम्यहं शचीम् ॥ ५-१२-२३ (३२०९७)
शल्य उवाच। ५-१२-२४क्ष् (३३८२)
अथ देवाः सगन्धर्वा गुरुमाहुरिदं वचः ।
कथं सुनीतं नु भवेन्मन्त्रयस्व बृहस्पते ॥ ५-१२-२४ (३२०९८)
बृहस्पतिरुवाच। ५-१२-२५क्ष् (३३८३)
नहुषं याचतां देवी किंचित्कालान्तरं शुभा ।
इन्द्राणि हितमेतद्धि तथाऽस्माकं भविष्यति ॥ ५-१२-२५ (३२०९९)
बहुविघ्नः सुराः कालः कालः कालं नयिष्यति ।
गर्वितो बलवांश्चापि नहुषो वरसंश्रयात् ॥ ५-१२-२६ (३२१००)
शल्य उवाच। ५-१२-२७क्ष् (३३८४)
ततस्तेन तथोक्ते तु प्रीता देवास्तथाब्रुवन् ।
ब्रह्मन्साध्विदमुक्तं ते हितं सर्वं दिवौकसाम् ॥ ५-१२-२७ (३२१०१)
एवमेतद्द्विजश्रेष्ठ देवी चेयं प्रसाद्यताम् ।
ततः समस्ता इन्द्राणीं देवाश्चाग्निपुरोगमाः ॥ ५-१२-२८ (३२१०२)
ऊचुर्वचनमव्यग्रा लोकानां हितकाम्यया। ५-१२-२९ (३२१०३)
देवा ऊचुः ।
त्वया जगदिदं सर्वं धृतं स्थावरजङ्गमम् ।
एकपत्न्यसि सत्या च गच्छस्व नहुषं प्रति ॥ ५-१२-२९क्ष् (३३८५)
क्षिप्रं त्वामभिकामश्च विनशिष्यति पापकृत् ।
नहुषो देवि शक्रश्च सुरैश्वर्यमवाप्स्यति ॥ ५-१२-३० (३२१०४)

एवं विनिश्चयं कृत्वा इन्द्राणी कार्यसिद्धये ।
अभ्यगच्छत सव्रीडा नहुषं घोरदर्शनम् ॥ ५-१२-३१ (३२१०५)
दृष्ट्वा तां नहुषश्चापि वयोरूपसमन्विताम् ।
समहृष्यत दुष्टात्मा कामोपहतचेतनः ॥ ॥ ५-१२-३२ (३२१०६)

इति श्रीमन्महाभारते उद्योगपर्वणि सेनोद्योगपर्वणि द्वादशोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-१२-७ वैधर्म्याणि त्वाष्ट्रवधादीनि । उपधाः वृत्रसख्यादीनि छलानि ॥
५-१२-२० अचेताः दुर्बलचित्तः ॥
५-१२-२५ कालान्तरं कालावधिम् ॥

उद्योगपर्व - अध्याय ०१३
॥ श्रीः ॥
५.१३. अध्यायः १३

Mahabharata - Udyoga Parva - Chapter Topics
शच्या नहुषंप्रति इन्द्रस्यान्वेषणेऽप्यपरिज्ञाने त्वामुपस्थास्य
इति समयकरणम् ॥ १ ॥
देवैर्विष्ण्वाज्ञया इन्द्रस्य ब्रह्महत्यापनोदनाय अश्वमेधयाजनम् ॥ २ ॥
ध्वस्तपाप्मनोपीन्द्रस्य पुनर्नहुषभयाददर्शने शोचन्त्या शच्या
उपश्रुतिदेवीपूजनम् ॥ ३ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१३-० (३२१०७)
शल्य उवाच । ५-१३-०क्ष् (३३८६)
अथ तामब्रवीद्दृष्ट्वा नहुषो देवराट् तदा ।
त्रयाणामपि लोकानामहमिन्द्रः शुचिस्मिते ॥ ५-१३-१ (३२१०८)
भजस्व मां वरारोहे पतित्वे वरवर्णिनि ।
एवमुक्ता तु सा देवी नहुषेण पतिव्रता ॥ ५-१३-२ (३२१०९)
प्रावेपत भयोद्विग्ना प्रवाते कदली यथा ।
प्रणम्य सा हि ब्रह्माणं शिरसा तु कृताञ्जलिः ॥ ५-१३-३ (३२११०)
देवराजमथोवाच नहुषं घोरदर्शनम् ।
कालमिच्छाम्यहं लब्धुं त्वत्तः कंचित्सुरेश्वर ॥ ५-१३-४ (३२१११)
न हि विज्ञायते शक्रः किं वा प्राप्तः क्व वा गतः ।
तत्त्वमेतत्तु विज्ञाय यदि न ज्ञायते प्रभो ॥ ५-१३-५ (३२११२)

ततोऽहं त्वामुपस्थास्ये सत्यमेतद्ब्रवीमि ते ।
एवमुक्तः स इन्द्राण्या नहुषः प्रीतिमानभूत् ॥ ५-१३-६ (३२११३)
नहुष उवाच। ५-१३-७क्ष् (३३८७)
एवं भवतु सुश्रोणि यथा मामिह भाषसे ।
ज्ञात्वा चागमनं कार्यं सत्यमेतदनुस्मरेः ॥ ५-१३-७ (३२११४)
नहुषेण विसृष्टा च निश्चक्राम ततः शुभा ।
बृहस्पतिनिकेतं च सा जगाम यशस्विनी ॥ ५-१३-८ (३२११५)
तस्याः संश्रुत्य च वचो देवाश्चाग्निपुरोगमाः ।
चिन्तयामासुरेकाग्राः शक्रार्थं राजसत्तम ॥ ५-१३-९ (३२११६)
देवदेवेन शङ्गम्य विष्णुना प्रभविष्णुना ।
ऊचुश्चैनं समुद्विग्ना वाक्यं वाक्यविशारदाः ॥ ५-१३-१० (३२११७)
ब्रह्मवध्याभिभूतो वै शक्रः सुरगणेश्वरः ।
गतिश्च नस्त्वं देवेश पूर्वजो जगतः प्रभुः ॥ ५-१३-११ (३२११८)
रक्षार्थं सर्वभूतानां विष्णुत्वमुपजग्मिवान् ।
त्वद्वीर्यनिहते वृत्रे वासवो ब्रह्महत्यया ॥ ५-१३-१२ (३२११९)
वृतः सुरगणश्रेष्ठ मोक्षं तस्य विनिर्दिश ।
तेषां तद्वचनं श्रुत्वा देवानां विष्णुरब्रवीत् ॥ ५-१३-१३ (३२१२०)
मामेव यजतां शक्रः पावयिष्यामि वज्रिणम् ।
पुण्येन हयमेधेन मामिष्ट्वा पाकशासनः ॥ ५-१३-१४ (३२१२१)
पुनरेष्यति देवानामिन्द्रत्वमकुतोभयः ।
स्वकर्मभिश्च नहुषो नाशं यास्यति दुर्मतिः ॥ ५-१३-१५ (३२१२२)
किंचित्कालमिदं देवा मर्षयध्वमतन्द्रिताः ।
श्रुत्वा विष्णोः शुभां सत्यां वाणीं ताममृतोपमाम्। ५-१३-१६ (३२१२३)
ततः सर्वे सुरगणाः सोपाध्यायाः सहर्षिभिः ।
यत्र शक्रो भयोद्विग्नस्तं देशमुपचक्रमुः ॥ ५-१३-१७ (३२१२४)
तत्राश्वमेधः सुमहान्महेन्द्रस्य महात्मनः ।
ववृते पावनार्थं वै ब्रह्महत्यापहो नृप ॥ ५-१३-१८ (३२१२५)
विभज्य ब्रह्महत्यां तु वृक्षेषु च नदीषु च ।
पर्वतेषु पृथिव्यां च स्त्रीषु चैव युधिष्ठिर ॥ ५-१३-१९ (३२१२६)
संविभज्य च भूतेषु विसृज्य च सुरेश्वरः ।
विज्वरो धूतपाप्मा च वासवोऽभवदात्मवान् ॥ ५-१३-२० (३२१२७)
अकम्प्यं नहुषं स्थानाद्दृष्ट्वा बलनिषूदनः ।
तेजोघ्नं सर्वभूतानां वरदानाच्च दुःसहम् ॥ ५-१३-२१ (३२१२८)
ततः शचीपतिर्देवः पुनरेव व्यनश्यत ।
अदृश्यः सर्वभूतानां कालाकाङ्क्षी चचार ह ॥ ५-१३-२२ (३२१२९)
प्रनष्टे तु ततः शक्रे शची शोकसमन्विता ।

हा शक्रेति तदा देवी विललाप सुदुःखिता ॥ ५-१३-२३ (३२१३०)
यदि दत्तं यदि हुतं गुरवस्तोषिता यदि ।
एकभर्तृत्वमेवास्तु सत्यं यद्यस्ति वा मयि ॥ ५-१३-२४ (३२१३१)
पुण्यां चेमामहं दिव्यां प्रवृत्तामुत्तरायणे ।
देवीं रात्रिं नमस्यामि सिध्यतां मे मनोरथः ॥ ५-१३-२५ (३२१३२)
प्रयता च निशां देवीमुपातिष्ठत तत्र सा ।
पतिव्रतात्वात्सत्येन सोपश्रुतिमथाकरोत् ॥ ५-१३-२६ (३२१३३)
यत्रास्ते देवराजोऽसौ तं देशं दर्शयस्व मे ।
इत्याहोपश्रुतिं देवीं सत्यं सत्येन दृश्यताम् ॥ ॥ ५-१३-२७ (३२१३४)

इति श्रीमन्महाभारते उद्योगपर्वणि सेनोद्योगपर्वणि त्रयोदशोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-१३-१२ विष्णुत्वं व्यापकत्वम् ॥
१२ ॥
५-१३-२६ आकरोत् आकारितवती ॥
२६ ॥

उद्योगपर्व - अध्याय ०१४
॥ श्रीः ॥
५.१४. अध्यायः १४

Mahabharata - Udyoga Parva - Chapter Topics
स्तुत्या प्रत्यक्षीभूतया उपश्रुतिदेव्यासह पद्मनालभेदनेन तद्विवरं
गतया शच्या तत्रस्थेन्द्रदर्शनम् ॥ १ ॥
तथा इन्द्रं स्तुत्वा नहुषवृत्तान्तकथनम् ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१४-० (३२१३५)
शल्य उवाच । ५-१४-०क्ष् (३३८८)
अथैनां रूपिणी साध्वीमुपातिष्ठदुपश्रुतिः ।
तां वयोरूपसंपन्नां दृष्ट्वा देवीमुपस्थिताम् ॥ ५-१४-१ (३२१३६)
इन्द्राणी संप्रहृष्टात्मा संपूज्यैनामथाब्रवीत् ।
इच्छामि त्वामहं ज्ञातुं का त्वं ब्रूहि वरानने ॥ ५-१४-२ (३२१३७)
उपश्रुतिरुवाच । ५-१४-३क्ष् (३३८९)
उपश्रुतिरहं देवि तवान्तिकमुपागता ।

दर्शनं चैव संप्राप्ता तव सत्येन भामिनि ॥ ५-१४-३ (३२१३८)
पतिव्रता च युक्ता च यमेन नियमेन च ।
दर्शयिष्यामि ते शक्रं देवं वृत्रनिषूदनम् ॥ ५-१४-४ (३२१३९)
क्षिप्रमन्वेहि भद्रं ते द्रक्ष्यसे सुरसत्तमम् ।
ततस्तां प्रस्थितां देवीमिन्द्राणी सा समन्वगात् ॥ ५-१४-५ (३२१४०)
देवारण्यान्यतिक्रम्य पर्वतांश्च बहूंस्ततः ।
हिमवन्तमतिक्रम्य उत्तरं पार्श्वमागमत् ॥ ५-१४-६ (३२१४१)
समुद्रं च समासाद्य बहुयोजनविस्तृतम् ।
आससाद महाद्वीपं नानाद्रुमलतावृतम् ॥ ५-१४-७ (३२१४२)
तत्रापश्यत्सरो दिव्यं नानाशकुनिभिर्वृतम् ।
शतयोजनविस्तीर्णं तावदेवायतं शुभम् ॥ ५-१४-८ (३२१४३)
तत्र दिव्यानि पद्मानि पञ्चवर्णानि भारत ।
षट्पदैरुपगीतानि प्रफुल्लानि सहस्रशः ॥ ५-१४-९ (३२१४४)
सरसस्तस्य मध्ये तु पद्मिनी महती शुभा ।
गौरेणोन्नतनालेन पद्मेन महता वृता ॥ ५-१४-१० (३२१४५)
पद्मस्य भित्त्वा नालं च विवेश सहिता तया ।
बिसतन्तुप्रविष्टं च तत्रापश्यच्छतक्रतुम् ॥ ५-१४-११ (३२१४६)
तं दृष्ट्वा च सुसूक्ष्मेण रूपेणावस्थितं प्रभुम् ।
सूक्ष्मरूपधरा देवी बभूवोपश्रुतिश्च सा ॥ ५-१४-१२ (३२१४७)
इन्द्रं तुष्टाव चेन्द्राणी विश्रुतैः पूर्वकर्मभिः ।
स्तूयमानस्ततो देवः शचीमाह पुरन्दरः ॥ ५-१४-१३ (३२१४८)
किमर्थमसि संप्राप्ता विज्ञातश्च कथं त्वहम् ।
ततः सा कथयामास नहुषस्य विचेष्टितम् ॥ ५-१४-१४ (३२१४९)
इन्द्रत्वं त्रिषु लोकेषु प्राप्य वीर्यसमन्वितः ।
दर्पाविष्टश्च दुष्टात्मा मामुवाच शतक्रतो ॥ ५-१४-१५ (३२१५०)
उपतिष्ठेति स क्रूरः कालं च कृतवान्मम ।
यदि न त्रास्यसि विभो करिष्यति स मां वशे ॥ ५-१४-१६ (३२१५१)
एतेन चाहं संप्राप्ता द्रुतं शक्र तवान्तिकम् ।
जहि रौद्रं महाबाहो नहुषं पापनिश्चयम् ॥ ५-१४-१७ (३२१५२)
प्रकाशयस्व चात्मानं दैत्यदानवसूदन ।
तेजः समाप्नुहि विभो देवराज्यं प्रशाधि च ॥ ॥ ५-१४-१८ (३२१५३)

इति श्रीमन्महाभारते उद्योगपर्वणि सेनोद्योगपर्वणि चतुर्दशोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-१४-१६ त्रास्यसि पालयिष्यसि ॥

उद्योगपर्व - अध्याय ०१५
॥ श्रीः ॥
५.१५. अध्यायः १५

Mahabharata - Udyoga Parva - Chapter Topics
इन्द्रबोधितशचीवचनात् नहुषेण अगस्त्यादिसप्तर्षीणां स्वशिबिकायां वाहकतया योजनम् ॥ १ ॥
शचीप्रार्थनया बृहस्पतिना होमेन संतोष्याग्नोरिन्द्रान्वेषणाय प्रेषणम् ॥ २ ॥
अग्निना बृहस्पतिंप्रति जलवर्ज सर्वत्रान्वेषणेपीन्द्रानधिगमकथनम् ॥ ३ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१५-० (३२१५४)
शल्य उवाच। ५-१५-०क्ष् (३३९०)
एवमुक्तः स भगवाञ्शच्या तां पुनरब्रवीत् ।
विक्रमस्य न कालोऽयं नहुषो बलवत्तरः ॥ ५-१५-१ (३२१५५)
विवर्द्धितश्च ऋषिभिर्हव्यकव्यैश्च भामिनि ।
नीतिमत्र विधास्यामि देवि तां कर्तुमर्हसि ॥ ५-१५-२ (३२१५६)
गुह्यं चैतत्त्वया कार्यं नाख्यातव्यं शुभे क्वचित् ।
गत्वा नहुषमेकान्ते ब्रवीहि च सुमध्यमे ॥ ५-१५-३ (३२१५७)
ऋषियानेन दिव्येन मामुपैहि जगत्पते ।
एवं तव वशे प्रीता भविष्यामीति तं वद ॥ ५-१५-४ (३२१५८)
इत्युक्ता देवराजेन पत्नी सा कमलेक्षणा ।
एवमस्त्वित्यथोक्त्वा तु जगाम नहुषं प्रति ॥ ५-१५-५ (३२१५९)
नहुषस्तां ततो दृष्ट्वा सस्मितो वाक्यमब्रवीत् ।
स्वागतं ते वरारोहे किं करोमि शुचिस्मिते ॥ ५-१५-६ (३२१६०)
भक्तं मां भज कल्याणि किमिच्छसि मनस्विनि ।
तव कल्याणि यत्कार्यं तत्करिष्ये सुमध्यमे ॥ ५-१५-७ (३२१६१)
न च व्रीडा त्वया कार्या सुश्रोणि मयि विश्वसेः ।
सत्येन वै पशे देवि करिष्ये वचनं तव ॥ ५-१५-८ (३२१६२)
इन्द्राण्युवाच। ५-१५-९क्ष् (३३९१)
यो मे कृतस्त्वया कालस्तमाकाङ्क्षे जगत्पते ।
ततस्त्वमेव भर्ता मे भविष्यसि सुराधिम ॥ ५-१५-९ (३२१६३)

कार्यं च हृदि मे यत्तद्देवराजावधारय ।
वक्ष्यामि यदि मे राजन्प्रियमेतत्करिष्यसि ॥ ५-१५-१० (३२१६४)
वाक्यं प्रणयसंयुक्तं ततः स्यां वशगा तव ।
इन्द्रस्य वाजिनो वाहा हस्तिनोऽथ रथास्तथा ॥ ५-१५-११ (३२१६५)
इच्छाम्यहमथापूर्वं वाहनं ते सुराधिप ।
यन्न विष्णोर्न रुद्रस्य न सुराणां न रक्षसाम् ॥ ५-१५-१२ (३२१६६)
वहन्तु त्वां महाभागा ऋषयः सङ्गता विभो ।
सर्वे शिबिकया राजन्नेतद्धि मम रोचते ॥ ५-१५-१३ (३२१६७)
नासुरेषु न देवेषु तुल्यो भवितुमर्हसि ।
सर्वेषां तेज आदत्से स्वेन वीर्येण दर्शनात् ॥ ५-१५-१४ (३२१६८)
न ते प्रमुखतः स्थातुं कश्चिच्छक्नोति वीर्यवान् । ५-१५-१५ (३२१६९)
शल्य उवाच ।
एवमुक्तस्तु नहुषः प्राहृष्यत तदा किल ।
उवाच वचनं चापि सुरेन्द्रस्तामनिन्दिताम् ॥ ५-१५-१५क्ष् (३३९२)
नहुष उवाच। ५-१५-१६क्ष् (३३९३)
अपूर्वं वाहनमिदं त्वयोक्तं वरवर्णिनि ।
दृढं मे रुचिरं देवि त्वद्वशोऽस्मि वरानने ॥ ५-१५-१६ (३२१७०)
न ह्यल्पवीर्यो भवति यो वाहान्कुरुते मुनीन् ।
अहं तपस्वी बलवान्भूतभव्यभवत्प्रभुः ॥ ५-१५-१७ (३२१७१)
मयि क्रुद्धे जगन्न स्यान्मयि सर्वं प्रतिष्ठितम् ।
देवदानवगन्धर्वाः किन्नरोरगराक्षसाः ॥ ५-१५-१८ (३२१७२)
न मे क्रुद्धस्य पर्याप्ताः सर्वे लोकाः शुचिस्मिते ।
चक्षुषा यं प्रपश्यामि तस्य तेजो हराम्यहम् ॥ ५-१५-१९ (३२१७३)
ग अहमिन्द्रोऽस्मि देवानां लोकानां च महेश्वरः ।
मयि हव्यं च कव्यं च लोकाश्चैव सनातनाः ।घ
तस्मात्ते वचनं देवि करिष्यामि न संशयः ॥ ५-१५-२० (३२१७४)
सप्तर्षयो मां वक्ष्यन्ति सर्वे ब्रह्मर्षयस्तथा ।
पश्य माहात्म्ययोगं मे ऋद्धिं च वरवर्णिनि ॥ ५-१५-२१ (३२१७५)
शल्य उवाच। ५-१५-२२क्ष् (३३९४)
एवमुक्त्वा तु तां देवीं विसृज्य च वराननाम् । ५-१५-२२ब्ग अथ
संचिन्त्य नहुषो बलवीर्येण भारत ॥ ५-१५-२२ (३२१७६)
विसृज्य सुप्रतीकं च नागमैरावतं तथा ।
हंसयुक्तं विमानं च हरियुक्तं तथा रथम् ॥ ५-१५-२३ (३२१७७)
स तु दर्पेण महता परिभूय महामुनीन्।घ
विमाने योजयित्वा च ऋषीन्नियमामास्थितान् ॥ ५-१५-२४ (३२१७८)
अब्रह्मण्यो बलोपेतो मत्तो मदबलेन च ।

कामवृत्तः स दुष्टात्मा वाहयामास तानृषीन् ॥ ५-१५-२५ (३२१७९)
नहुषेण विसृष्टा च बृहस्पतिमथाब्रवीत् ।
समयोऽल्पावशेषो मे नहुषेणेह यः कृतः ॥ ५-१५-२६ (३२१८०)
शक्रं मृगय शीघ्रं त्वं भक्तायाः कुरु मे दयाम् ।
बाढमित्येव भगवान्बृहस्पतिरुवाच ताम् ॥ ५-१५-२७ (३२१८१)
न भेतव्यं त्वया देवि नहुषाद्दुष्टचेतसः ।
न ह्येष स्थास्यति चिरं गत एष नराधमः ॥ ५-१५-२८ (३२१८२)
अधर्मज्ञो महर्षीणां वाहनाच्च हतः शुभे ।
इष्टिं चाहं करिष्यामि विनाशायास्य दुर्मतेः ॥ ५-१५-२९ (३२१८३)
शक्रं चाधिगमिष्यामि माभैस्त्वं भद्रमस्तु ते ।
ततः प्रज्वाल्य विधिवज्जुहाव परमं हविः ॥ ५-१५-३० (३२१८४)
बृहस्पतिर्महातेजा देवराजोपलब्धये ।
हुत्वाऽग्निं सोब्रवीद्राजञ्छक्र अन्विष्यतामिति ॥ ५-१५-३१ (३२१८५)
तस्माच्च भगवान्देवः स्वयमेव हुताशनः ।
स्त्रीवेषमद्भुतं कृत्वा तत्रैवान्तरधीयत ॥ ५-१५-३२ (३२१८६)
स दिशः प्रदिशश्चैव पर्वतांश्च वनानि च ।
पृथिवीं चान्तरिक्षं च विचित्याथ मनोगतिः ।
निमेषान्तरमात्रेण बृहस्पतिमुपागमत् ॥ ५-१५-३३ (३२१८७)
अग्निरुवाच। ५-१५-३४क्ष् (३३९५)
बृहस्पते न पश्यामि देवराजमिह क्वचित् ।
आपः शेषाः सदा चापः प्रवेष्टुं नोत्सहाम्यहम् ॥ ५-१५-३४ (३२१८८)
न मे तत्र गतिर्ब्रह्मन्किमन्यत्करवाणि ते ।
तमब्रवीद्देवगुरुरपो विश महाद्युते ॥ ५-१५-३५ (३२१८९)
अग्निरुवाच। ५-१५-३६क्ष् (३३९६)
नापः प्रवेष्टुं शक्ष्यामि क्षयो मेऽत्र भविष्यति ।
शरणं त्वां प्रपन्नोऽस्मि स्वस्ति तेस्तु महाद्युते ॥ ५-१५-३६ (३२१९०)
अद्यभोऽग्निर्ब्रह्मतः क्षत्रमश्मनो लोहमुत्थितम् ।
तेषां सर्वत्रगं तेजः स्वासु योनिषु शाम्यति ॥ ॥ ५-१५-३७ (३२१९१)

इति श्रीमन्महाभारते उद्योगपर्वणि सेनोद्योगपर्वणि पञ्चदशोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-१५-२१ मां वक्ष्यन्ति मम वहनं करिष्यन्ति ॥
२१ ॥

उद्योगपर्व - अध्याय ०१६
॥ श्रीः ॥

Mahabharata - Udyoga Parva - Chapter Topics

बृहस्पतिना ब्राह्ममन्त्रसंवर्धितेनाग्निना पद्मनालस्येन्द्रं दृष्ट्वा
बृहस्पतये तन्निवेदनम् ॥ १ ॥
बृहस्पतिना तत्र गत्वा इन्द्रे स्तूयमाने कुबेरादीनां तत्रागमनम् ॥ २ ॥
इन्द्रेण नहुषजये साहाय्यायाग्नेर्भागदानपूर्वकं कुबेरादीनां
तत्तद्दिगाधिपत्येऽभिषेचनम् ॥ ३ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१६-० (३२१९२)
बृहस्पतिरुवाच । ५-१६-०क्ष् (३३९७)
त्वमग्रे सर्वदेवानां मुखं त्वमसि हव्यवाट् ।
त्वमन्तः सर्वभूतानां गूढश्चरसि साक्षिवत् ॥ ५-१६-१ (३२१९३)
त्वामाहुरेकं कवयस्त्वामाहुस्त्रिविधं पुनः ।
त्वया त्यक्तं जगच्चेदं सद्यो नश्येद्धुताशन ॥ ५-१६-२ (३२१९४)
कृत्वा तुभ्यं नमो विप्राः स्वकर्मविजितां गतिम् ।
गच्छन्ति सह पत्नीभिः सुतैरपि च शाश्वतीम् ॥ ५-१६-३ (३२१९५)
त्वमेवाग्ने हव्यवाहस्त्वमेव परमं हविः ।
यजन्ति सत्रैस्त्वामेव यज्ञैश्च परमाध्वरैः ॥ ५-१६-४ (३२१९६)
सृष्ट्वा लोकांस्त्रीमिमान्हव्यवाह
प्राप्ते काले पचसि पुनः समिद्धः ।
त्वं सर्वस्य भुवनस्य प्रसूति-
स्त्वमेवाग्रे भवसि पुनः प्रतिष्ठा ॥ ५-१६-५ (३२१९७)
त्वामग्ने जलदानाहुर्विद्युतश्च मनीषिणः ।
वहन्ति सर्वभूतानि त्वत्तो निष्क्रम्य हेतयः ॥ ५-१६-६ (३२१९८)
त्वय्यापो निहिताः सर्वास्त्वयि सर्वमिदं जगत् ।
न तेऽस्त्यविदितं किंचित्रिषु लोकेषु पावक ॥ ५-१६-७ (३२१९९)
स्वयोनिं भजते सर्वो विशस्वापोऽविशङ्कितः ।
अहं त्वां वर्धयिष्यामि ब्राह्मैर्मन्त्रैः सनातनैः ॥ ५-१६-८ (३२२००)
एवं स्तुतो हव्यवाट् स भगवान्कविरुत्तमः ।
बृहस्पतिमथोवाच प्रीतिमान्वाक्यमुत्तमम् ।
दर्शयिष्यामि ते शक्रं सत्यमेतद्ब्रवीमि ते ॥ ५-१६-९ (३२२०१)
शल्य उवाच । ५-१६-१०क्ष् (३३९८)
प्रविष्यापस्ततो वह्निः ससमुद्राः सपल्वलाः ।

आससाद सरस्तच्च गूढो यत्र शतक्रतुः ॥ ५-१६-१० (३२२०२)
अथ तत्रापि पद्मानि विचिन्वन्भरतर्षभ ।
अपश्यत्स तु देवेन्द्रं बिसमध्यगतं तदा ॥ ५-१६-११ (३२२०३)
आगत्य च ततस्तूर्णं तमाचष्ट बृहस्पतेः ।
अणुमात्रेण वपुषा पद्मतन्त्वाश्रितं प्रभुम् ॥ ५-१६-१२ (३२२०४)
गत्वा देवर्षिगन्धर्वैः सहितोऽथ बृहस्पतिः ।
पुराणैः कर्मभिर्देवं तुष्टाव बलसूदनम् ॥ ५-१६-१३ (३२२०५)
महाऽसुरो हतः शक्र नमुचिर्दारुणस्त्वया ।
शम्बरश्च बलश्चैव तथोभौ घोरविक्रमौ ॥ ५-१६-१४ (३२२०६)
शतक्रतो विवर्धस्व सर्वाञ्शत्रून्निषूदय ।
उत्तिष्ठ शक्र संपश्य देवर्षींश्च समागतान् ॥ ५-१६-१५ (३२२०७)
महेन्द्र दानवान्हत्वा लोकास्त्रातास्त्वया विभो ।
अपां फेनं समासाद्य विष्णुतेजोतिबृंहितम् ।
त्वया वृत्रो हतः पूर्वं देवराज जगत्पते ॥ ५-१६-१६ (३२२०८)
त्वं सर्वभूतेषु शरण्य ईड्य-
स्त्वया समं विद्यते नेह भूतम् ।
त्वया धार्यन्ते सर्वभूतानि शक्र
त्वं देवानां महिमानं चकर्थ ॥ ५-१६-१७ (३२२०९)
पाहि सर्वांश्च लोकांश्च महेन्द्र बलमाप्नुहि ।
एवं संस्तूयमानश्च सोऽवर्धत शनैः शनैः ॥ ५-१६-१८ (३२२१०)
स्वं चैव वपुरास्थाय बभूव स बलान्वितः ।
अब्रवीच्च गुरं देवो बृहस्पतिमवस्थितम् ॥ ५-१६-१९ (३२२११)
किं कार्यमवशिष्टं वो हतस्त्वाष्ट्रो महासुरः ।
वृत्रश्च सुमहाकायो यो वै लोकाननाशयत् ॥ ५-१६-२० (३२२१२)
बृहस्पतिरुवाच। ५-१६-२१क्ष् (३३९९)
मानुषो नहुषो राजा देवर्षिगणतेजसा ।
देवराज्यमनुप्राप्तः सर्वान्नो बाधते भृशम् ॥ ५-१६-२१ (३२२१३)
इन्द्र उवाच। ५-१६-२२क्ष् (३४००)
कथं च नहुषो राज्यं देवानां प्राप दुर्लभम् ।
तपसा केन वा युक्तः किंवीर्यो वा बृहस्पते ।
ग तत्सर्वं कथय त्वं मे यथेन्द्रत्वमुपेयिवान् ॥ ५-१६-२२ (३२२१४)
बृहस्पतिरुवाच। ५-१६-२३क्ष् (३४०१)
त्वयि प्रनष्टे देवेश विश्वं प्रव्यथितं जगत् ।
परस्परभयोद्विग्नं बभूवार्तमराजकम् ॥ ५-१६-२३ (३२२१५)
ततो देवैः सगन्धर्वैः सर्षिसङ्घैः सपावकैः ।
मानुषो नहुषो राजा देवराज्येऽभिषेचितः ॥ ५-१६-२४ (३२२१६)

देवा भीताः शक्रमकामयन्त
त्वया त्यक्तं महदैन्द्रं पदं तत् ।
तदा देवाः पितरोऽथर्षयश्च
गन्धर्वमुख्याश्च समेत्य सर्वे ॥ ५-१६-२५ (३२२१७)
गत्वाऽब्रुवन्नहुषं तत्र शक्र
त्वं नो राजा भव भुवनस्य गोप्ता ।
तानब्रवीन्नहुषो नास्मि शक्त
आप्यायध्वं तपसा तेजसा माम् ॥ ५-१६-२६ (३२२१८)
एवमुक्तैर्वर्द्धितश्चापि देवै
राजाऽभवन्नहुषो घोरवीर्यः ।
त्रैलोक्ये च प्राप्य राज्यं महर्षी-
न्कृत्वा वाहान्याति लोकान्दुरात्मा ॥ ५-१६-२७ (३२२१९)
तेजोहरं दृष्टिविषं सुघोरं
मा त्वं पश्येर्नहुषं वै कदाचित् ।
देवाश्च सर्वे नहुषं भृशार्ता
न पश्यन्ते गूढरूपाश्चरन्तः ॥ ५-१६-२८ (३२२२०)
शल्य उवाच। ५-१६-२९क्ष् (३४०२)
एवं वदत्यङ्गिरसां वरिष्ठे
बृहस्पतौ लोकपालः कुबेरः ।
वैवस्वतश्चैव यमः पुराणो
दवेश्च सोमो वरुणश्चाजगाम ॥ ५-१६-२९ (३२२२१)
ते वै समागम्य महेन्द्रमूचु-
र्दिष्ट्या त्वाष्ट्रो निहतश्चैव वृत्रः ।
दिष्ट्या च त्वां कुशलिनमक्षतं च
पश्यामो वै निहतारिं च शक्र ॥ ५-१६-३० (३२२२२)
स तान्यथावच्च हि लोकपाला-
न्समेत्स वै प्रीतमना महेन्द्रः ।
उवाच चैनान्प्रतिभाष्य शक्रः
संचोदयिष्यन्नहुषस्यान्तरेण ॥ ५-१६-३१ (३२२२३)
राजा देवानां नहुषो घोररूप-
स्तत्र साह्यं दीयतां मे भवद्भिः ।
ते चाब्रुवन्नहुषो घोररूपो
दृष्टीविषस्तस्य बिभीम ईश ॥ ५-१६-३२ (३२२२४)
त्वं चेद्राजानं नहुषं पराजये-
स्ततो वयं भागमर्हाम शक्र ।
इन्द्रोऽब्रवीद्भवतु भवानपां पति-

र्यमः कुबेरश्च मयाभिषेकम् ॥ ५-१६-३३ (३२२२५)
संप्राप्नुवन्त्वद्य सहैव दैवतै
रिपुं जयाम तं नहुषं घोरदृष्टिम् ।
ततः शक्रं ज्वलनोऽप्याह भाग
प्रयच्छ मह्यं तव साह्यं करिष्ये ।
तमाह शक्रो भविताऽग्ने तवापि
चेन्द्राग्न्योर्वै भाग एको महाक्रतौ ॥ ५-१६-३४ (३२२२६)
शल्य उवाच। ५-१६-३५क्ष् (३४०३)
एवं संचिन्त्य भगवान्महेन्द्रः पाकशासनः ।
कुबेरं सर्वयक्षाणां धनानां च प्रभुं तथा ॥ ५-१६-३५ (३२२२७)
वैवस्वतं पितॄणां च वरुणं चाप्यपां तथा ।
आधिपत्यं ददौ शक्रः सत्कृत्य वरदस्तथा ॥ ॥ ५-१६-३६ (३२२२८)

इति श्रीमन्महाभारते उद्योगपर्वणि सेनोद्योगपर्वणि षोडशोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-१६-६ हेतयः ज्वालाः ॥
५-१६-३१ नहुषस्यान्तरेण अन्तरं भेदः । बुद्धिभेदार्थमित्यर्थः ॥

उद्योगपर्व - अध्याय ०१७
॥ श्रीः ॥
५.१७. अध्यायः १७

Mahabharata - Udyoga Parva - Chapter Topics
लोकपालैः सह नहुषनिषूदनोपायं मन्त्रयन्तमिन्द्रमेत्य भगस्त्येन
नहुषस्य देवराज्यात्परिभ्रंशनिवेदनम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१७-० (३२२२९)
शल्य उवाच। ५-१७-०क्ष् (३४०४)
अथ संचिन्तयानस्य देवराजस्य धीमतः ।
नहुषस्य वधोपायं लोकपालैः सदैवतैः ॥ ५-१७-१ (३२२३०)
तपस्वी तत्र भगवानगस्त्यः प्रत्यदृश्यत ।
सोऽब्रवीदर्च्य देवेन्द्रं दिष्ट्या वै वर्धते भवान् ॥ ५-१७-२ (३२२३१)
विश्वरूपविनाशेन वृत्रासुरवधेन च ।

दिष्ट्याद्य नहुषो भ्रष्टो देवराज्यात्पुरन्दर ॥ ५-१७-३ (३२२३२)
दिष्ट्या हतारिं पश्यामि भवन्तं वलसूदन। ५-१७-४ (३२२३३)
इन्द्र उवाच ।
स्वागतं ते महर्षेऽस्तु प्रीतोऽहं दर्शनात्तत ।
पाद्यमाचमनीयं च गामर्घ्यं च प्रतीच्छ मे ॥ ५-१७-४क्ष् (३४०५)
शल्य उवाच। ५-१७-५क्ष् (३४०६)
पूजितं चोपविष्टं तमासेन मुनिसत्तमम् ।
पर्यपृच्छत देवेशः प्रहृष्टो ब्राह्मणर्षभम् ॥ ५-१७-५ (३२२३४)
श्रोतुमिच्छामि भगवन्कथ्यमानं द्विजोत्तम ।
परिभ्रष्टः कथं स्वर्गान्नहुषः पापनिश्चयः ॥ ५-१७-६ (३२२३५)
अगस्त्य उवाच। ५-१७-७क्ष् (३४०७)
शृणु शक्र प्रियं वाक्यं यथा राजा दुरात्मवान् ।
स्वर्गाद्भ्रष्टो दुराचारो नहुषो बलदर्पितः ॥ ५-१७-७ (३२२३६)
श्रमार्ताश्च वहन्तस्तं नहुषं पापकारिणम् ।
देवर्षयो महाभागास्तथा ब्रह्मर्षयोऽमलाः ॥ ५-१७-८ (३२२३७)
पप्रच्छुर्नहुषं देवं संशयं जयतां वर ।
य इमे ब्रह्मणा प्रोक्ता मन्त्रा वै प्रोक्षणे गवाम् ॥ ५-१७-९ (३२२३८)
एते प्रमाणं भवत उताहो नेति वासव ।
नहुषो नेति तानाह तमसा मूढचेतनः ॥ ५-१७-१० (३२२३९)
ऋषय ऊचुः। ५-१७-११क्ष् (३४०८)
अधर्मे संप्रवृत्तस्त्वं धर्मं न प्रतिपद्यसे ।
प्रमाणमेतदस्माकं पूर्वं प्रोक्तं महर्षिभिः ॥ ५-१७-११ (३२२४०)
अगस्त्य उवाच। ५-१७-१२क्ष् (३४०९)
ततो विवदमानः स मुनिभिः सह वासव ।
अथ मामस्पृशन्मूर्ध्नि पादेनाधर्मपीडितः ॥ ५-१७-१२ (३२२४१)
तेनाभूद्धततेजाश्च निःश्रीकश्च महीपतिः ।
ततस्तं तमसा विग्नमवोचं भृशपीडितम् ॥ ५-१७-१३ (३२२४२)
यस्मात्पूर्वैः कृतं राजन्ब्रह्मर्षिभिरनुष्ठितम् ।
अदृष्टं दूषयसि मे यच्च मूर्ध्न्यस्पृशः पदा ॥ ५-१७-१४ (३२२४३)
यच्चापि त्वमृषीन्मूढ ब्रह्मकल्पान्दुरासदान् ॥ ५-१७-१५ (३२२४४)
वाहान्कृत्वा वाहयसि तेन स्वर्गाद्धतप्रभः ।
ध्वंस पाप परिभ्रष्टः क्षीणपुण्यो महीतले ॥ ५-१७-१६ (३२२४५)
दशवर्षसहस्राणि सर्परूपधरो महान् ।
विचरिष्यसि पूर्णेषु पुनः स्वर्गमवाप्स्यसि ॥ ५-१७-१७ (३२२४६)
ग दृष्ट्वा युधिष्ठिरं नाम तव वंशसमुद्भवम् ।
निहतो ब्रह्मशापेन प्रपद्यस्व त्रिविष्टपम् ॥' ५-१७-१८ (३२२४७)

एवं भ्रष्टो दुरात्मा स देवराज्यादरिन्दम ।
दिष्ट्या वर्धामहे शक्र हतो ब्रह्मर्षिकण्टकः ॥ ५-१७-१९ (३२२४८)
त्रिविष्टपं प्रपद्यस्व पाहि लोकाञ्शचीपते ।
जितेन्द्रियो जितामित्रः स्तूयमानो महर्षिभिः ॥ ५-१७-२० (३२२४९)
शल्य उवाच । ५-१७-२१क्ष् (३४१०)
ततो देवा भृशं तुष्टा महर्षिगणसंवृताः ।
पितरश्चैव यक्षाश्च भुजगा राक्षसास्तथा ॥ ५-१७-२१ (३२२५०)
गन्धर्वा देवकन्याश्च सर्वे चाप्सरसां गणाः ।
सरांसि सरितः शैलाः सागराश्च विशांपते ॥ ५-१७-२२ (३२२५१)
उपागम्याब्रुवन्सर्वे दिष्ट्या वर्धसि शक्रुहन् ।
हतश्च नहुषः पापो दिष्ट्यागस्त्येन धीमता ।
दिष्ट्या पापसमाचारः कृतः सर्पो महीतले ॥ ॥ ५-१७-२३ (३२२५२)

इति श्रीमन्महाभाते उद्योगपर्वणि सेनोद्योगपर्वणि सप्तदशोऽध्यायः ॥

उद्योगपर्व - अध्याय ०१८
॥ श्रीः ॥
५.१८. अध्यायः १८

Mahabharata - Udyoga Parva - Chapter Topics
इन्द्रेण पुनर्देवलोकमेत्य त्रैलोक्यराज्यपालनम् ॥ १ ॥
शल्येन इन्द्रवत्तान्तकथनपूर्वकं युधिष्ठिरादीनाश्वास्य
पुनर्दुर्योधनसमीपगमनम् ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१८-० (३२२५३)
शल्य उवाच । ५-१८-०क्ष् (३४११)
ततः शक्रः स्तूयमानो गन्धर्वाप्सरसां गणैः ।
ऐरावतं समारुह्य द्विपेन्द्रं लक्षणैर्युतम् ॥ ५-१८-१ (३२२५४)
पावकः सुमहातेजा महर्षिश्च बृहस्पतिः ।
यमश्च वरुणश्चैव कुबेरश्च धनेश्वरः ॥ ५-१८-२ (३२२५५)
सर्वैर्देवैः परिवृतः शक्रो वृत्रनिषूदनः ।
गन्धर्वैरप्सरोभिश्च यातस्त्रिभुवनं प्रभुः ॥ ५-१८-३ (३२२५६)
स समेत्य महेन्द्राण्या देवराजः शतक्रतुः ।
मुदा परमया युक्तः पालयामास देवराट् ॥ ५-१८-४ (३२२५७)

ततः स भगवांस्तत्र अङ्गिराः समदृश्यत ।
अथर्ववेदमन्त्रैश्च देवेन्द्रं समपूजयत् ॥ ५-१८-५ (३२२५८)
ततस्तु भगवानिन्द्रः संहृष्टः समपद्यत ।
वरं च प्रददौ तस्मै अथर्वाङ्गिरसे तदा ॥ ५-१८-६ (३२२५९)
अथर्वाङ्गिरसं नाम वेदेऽस्मिन्वै भविष्यति ।
उदाहरणमेतद्धि यज्ञभागं च लप्स्यसे। ५-१८-७ (३२२६०)
एवं संपूज्य भगवानथर्वाङ्गिरसं तदा ।
व्यसर्जयन्महाराज देवराजः शतक्रतुः ॥ ५-१८-८ (३२२६१)
संपूज्य सर्वांस्त्रिदशानृषींश्चापि तपोधनान् ।
इन्द्रः प्रमुदितो राजन्धर्मेणापालयत्प्रजाः ॥ ५-१८-९ (३२२६२)
एवं दुःखमनुप्राप्तमिन्द्रेण सह भार्यया ।
अज्ञातवासश्च कृतः शत्रूणां वधकाङ्क्षया ॥ ५-१८-१० (३२२६३)
नात्र मन्युस्त्वया कार्यो यत्क्लिष्टोऽसि महावने ।
द्रौपद्या सह राजेन्द्र भ्रातृभिश्च महात्मभिः ॥ ५-१८-११ (३२२६४)
एवं त्वमपि राजेन्द्र राज्यं प्राप्स्यसि भारत ।
वृत्रं हत्वा यथा प्राप्तः शक्रः कौरवनन्दन ॥ ५-१८-१२ (३२२६५)
दुराचारश्च नहुषो ब्रह्मद्विट् पापचेतनः ।
अगस्त्यशापाभिहतो विनष्टः शाश्वतीः समाः ॥ ५-१८-१३ (३२२६६)
एवं तव दुरात्मानः शत्रवः शत्रुसूदन ।
क्षिप्रं नाशं गमिष्यन्ति कर्णदुर्योधनादयः ॥ ५-१८-१४ (३२२६७)
ततः सागरपर्यन्तां भोक्ष्यसे मेदिनीमिमाम् ।
भ्रातृभिः सहितो वीर द्रौपद्या च सहानया ॥ ५-१८-१५ (३२२६८)
उपाख्यानमिदं शक्रविजयं वेदसंमितम् ।
राज्ञा व्यूढेष्वनीकेषु श्रोतव्यं जयमिच्छता। ५-१८-१६ (३२२६९)
तस्मात्संश्रावयामि त्वां विजयं जयतां वर ।
संस्तूयमाना वर्धन्ते महात्मानो युधिष्ठिर ॥ ५-१८-१७ (३२२७०)
क्षत्रियाणामभावोयं युधिष्ठिर महात्मनाम् ।
दुर्योधनापराधेन भीमार्जुनबलेन च ॥
सङ्ग्रामे संक्षयो घोरो भविष्यत्यचिरादिव ॥ ५-१८-१८ (३२२७१)
आख्यानमिन्द्रविजयं य इदं नियतः पठेत् ।
धूतपाप्मा जितस्वर्गः परत्रेह च मोदते ॥ ५-१८-१९ (३२२७२)
न चारिजं भयं तस्य नापुत्रो वा भवेन्नरः ।
नापदं प्राप्नुयात्कांचिद्दीर्घमायुश्च विन्दति ।
सर्वत्र दयमाप्नोति न कदाचित्पराजयम् ॥ ५-१८-२० (३२२७३)
वैशम्पायन उवाच। ५-१८-२१क्ष् (३४१२)
एवमाश्वासितो राजा शल्येन भरतर्षभ ।

पूजयामास विधिवच्छल्यं धर्मभृतां वरः ॥ ५-१८-२१ (३२२७४)
श्रुत्वा तु शल्यवचनं कुन्तीपुत्रो युधिष्ठिरः ।
प्रत्युवाच महाबाहुर्मद्रराजमिदं वचः ॥ ५-१८-२२ (३२२७५)
भवान्कर्णस्य सारथ्यं करिष्यति न संशयः ।
तत्र तेजोवधः कार्यः कर्णस्यार्जुनसंस्तवैः ॥ ५-१८-२३ (३२२७६)
शल्य उवाच। ५-१८-२४क्ष् (३४१३)
एवमेतत्करिष्यामि यथा मां संप्रभाषसे ।
यच्चान्यदपि शक्ष्यामि तत्करिष्याम्यहं तव ॥ ५-१८-२४ (३२२७७)
वैशम्पायन उवाच। ५-१८-२५क्ष् (३४१४)
ततस्त्वामन्त्र्य कौन्तेयाञ्छल्यो मद्राधिपस्तदा ।
जगाम सबलः श्रीमान्दुर्योधनमरिन्दम ॥ ॥ ५-१८-२५ (३२२७८)

इति श्रीमन्महाभारते उद्योगपर्वणि सेनोद्योगपर्वणि अष्टादशोऽध्यायः ॥

उद्योगपर्व - अध्याय ०१९
॥ श्रीः ॥
५.१९. अध्यायः १९

Mahabharata - Udyoga Parva - Chapter Topics
सात्यकिप्रमुखानां राज्ञां स्वस्वसेनाऽऽनयनपूर्वकं युधिष्ठिरं
प्रत्यागमनम् ॥ १ ॥
भगदत्तादीनां राज्ञां दुर्योधनसाहाय्यकरणाय आगमनम् ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१९-० (३२२७९)
वैशम्पायन उवाच। ५-१९-०क्ष् (३४१५)
युयुधानस्ततो वीरः सात्वतानां महारथः ।
महता चतुरङ्गेण बलेनागाद्युधिष्ठिरम् ॥ ५-१९-१ (३२२८०)
तस्य योधा महावीर्या नानादेशसमागताः ।
नानाप्रहरणा वीराः शोभयांचक्रिरे बलम् ॥ ५-१९-२ (३२२८१)
परश्वधैर्भिण्डिपालैः शूलतोमरमुद्गरैः ।
परिघैर्यष्टिभिः पाशैः करवालैश्च निर्मलैः ॥ ५-१९-३ (३२२८२)
खड्गकार्मुकनिर्यूहैः शरैश्च विविधैरपि ।
तैलधौतैः प्रकाशद्भिस्तदशोभत वै बलम् ॥ ५-१९-४ (३२२८३)
तस्य मेघप्रकाशस्य सौवर्णैः शोभितस्य च ।

बभूव रूपं सैन्यस्य मेघस्येव सविद्युतः ॥ ५-१९-५ (३२२८४)
अक्षौहिणी तु सा सेना तदा यौधिष्ठिरं बलम् ।
प्रविश्यान्तर्दधे राजन्सागरं कुनदी यथा ॥ ५-१९-६ (३२२८५)
तथैवाक्षौहिणीं गृह्य चेदीनामृषभो बली ।
धृष्टकेतुरुपागच्चत्पाण्डवानमितौजसः ॥ ५-१९-७ (३२२८६)
मागधश्च जयत्सेनो जारासन्धिर्महाबलः ।
अक्षौहिण्यैव सैन्यस्य धर्मराजमुपागमत् ॥ ५-१९-८ (३२२८७)
तथैव पाण्ड्यो राजेन्द्र सागरानूपवासिभिः ।
वृतो बहुविधैर्योधैर्युधिष्ठिरमुपागमत् ॥ ५-१९-९ (३२२८८)
तस्य सैन्यमतीवासीत्तस्मिन्बलसमागमे ।
प्रेक्षणीयतरं राजन्सुवेषं बलवत्तदा ॥ ५-१९-१० (३२२८९)
ग केकयाश्च नरव्याघ्राः सोदराः पञ्च पार्थिवाः ।
संहर्षयन्तः कौन्तेयोनक्षौहिण्या समागताः ॥' ५-१९-११ (३२२९०)
द्रुपदस्याप्यभूत्सेना नानादेशसमागतैः ।
शोभिता पुरुषैः शूरैः पुत्रैश्चास्य महारथैः ॥ ५-१९-१२ (३२२९१)
तथैव राजा मत्स्यानां विराटो वाहिनीपतिः ।
पार्वतीयैर्महीपालैः सहितः पाण्डवानयात् ॥ ५-१९-१३ (३२२९२)
इतश्चेतश्च पाण्डूनां समाजग्मुर्महात्मनाम् ।
अक्षौहिण्यस्तु सप्तैव विविधध्वजसङ्कुलाः ॥ ५-१९-१४ (३२२९३)
युयुत्समानाः कुरुभिः पाण्डवान्समहर्षयन् ।
तथैव धार्तराष्ट्रस्य हर्षं समभिर्धयन् ॥ ५-१९-१५ (३२२९४)
भगदत्तो महीपालः सेनामक्षौहिणीं ददौ ।
तस्य चीनैः किरातैश्च काञ्चनैरिव संवृतम् ॥ ५-१९-१६ (३२२९५)
बभौ बलमनाधृष्यं कर्णिकारवनं यथा ।
तथा भूरिश्रवाः शूरः शल्यश्च कुरुनन्दन ॥ ५-१९-१७ (३२२९६)
दुर्योधनमुपायातावक्षौहिण्या पृथक्पृथक् ।
कृतवर्मा च हार्दिक्यो भोजान्धकुकुरैः सह ॥ ५-१९-१८ (३२२९७)
अक्षौहिण्यैव सेनाया दुर्योधनमुपागमत् ।
तस्य तैः पुरुषव्याघ्रैर्वनमालाधरैर्बलम् ॥ ५-१९-१९ (३२२९८)
अशोभत यथा मत्तैर्वनं प्रक्रीडितैर्गजैः ।
जयद्रथमुखाश्चान्ये सिन्धुसौवीरवासिनः ॥ ५-१९-२० (३२२९९)
आजग्मुः पृथिवीपालाः कम्पयन्त इवाचलान् ।
तेषामक्षौहिणी सेना बहुला विबभौ तदा ॥ ५-१९-२१ (३२३००)
विधूयमानो वातेन बहुरूप इवाम्बुदः ।
सुदक्षिणश्च काम्भोजो यवनैश्च शकैस्तथा ॥ ५-१९-२२ (३२३०१)
उपाजगाम कौरव्यमक्षौहिण्या विशांपते ।

तस्य सेनासमावायः शलभानामिवाबभौ ॥ ५-१९-२३ (३२३०२)
स च संप्राप्य कौरव्यं तत्रैवान्तर्दधे तदा ।
तथा महिष्मतीवासी नीलो नीलायुधैः सह ॥ ५-१९-२४ (३२३०३)
महीपालो महावीर्यैर्दक्षिणापथवासिभिः ।
आवन्त्यौ च महीपालौ महाबलसुसंवृतौ ॥ ५-१९-२५ (३२३०४)
पृथगक्षौहिणीभ्यां तावभियातौ सुयोधनम् ।
ततस्ततस्तु सर्वेषां भूमिपानां महात्मनाम् ॥ ५-१९-२६ (३२३०५)
तिस्रोऽन्याः समवर्तन्त वाहिन्यो भरतर्षभ ।
एवमेकादशावृत्ताः सेना दुर्योधनस्य ताः ॥ ५-१९-२७ (३२३०६)
युयुत्समानाः कौन्तेयान्नानाध्वजसमाकुलाः ।
न हास्तिनपुरे राजन्नवकाशोऽभवत्तदा ॥ ५-१९-२८ (३२३०७)
राज्ञां स्वबलमुख्यानां प्राधान्येनापि भारत ।
ततः पञ्चनदं चैव कृत्स्नं च कुरुजाङ्गलम् ॥ ५-१९-२९ (३२३०८)
तथा रोहितकारण्यं मरुभूमिश्च केवला ।
अहिच्छत्रं कालकूटं गङ्गाकूलं च भारत ॥ ५-१९-३० (३२३०९)
वारणं वाटधानं च यामुनश्चैव पर्वतः ।
एष देशः सुविस्तीर्णः प्रभूतधनधान्यवान् ॥ ५-१९-३१ (३२३१०)
बभूव कौरवेयाणां बलेनातीव संवृतः ।
तत्र सैन्यं तथा युक्तं ददर्श स पुरोहितः ॥ ५-१९-३२ (३२३११)
यः स पाञ्चालराजेन प्रेषितः कौरवान्प्रति ॥ ॥ ५-१९-३३ (३२३१२)

इति श्रीमन्महाभारते उद्योगपर्वणि सेनोद्योगपर्वणि एकोनविंशोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-१९-१ युयुधानः सात्यकिः ॥
५-१९-१९ वनमाला आपादलम्बिनी माला ५-१९-२३ समावायः समूहः ॥
५-१९-३० अहिच्छत्रादयः प्रदेशविशेषाः ॥

उद्योगपर्व - अध्याय ०२०
॥ श्रीः ॥
५.२०. अध्यायः २०

Mahabharata - Udyoga Parva - Chapter Topics
हस्तिनपुरंगतेन द्रुपदपुरोहितेन राज्ञां सभामध्ये
द्रुपदवचनकथनम् ॥ १ ॥

५-२०-० (३२३१३)
वैशम्पायन उवाच। ५-२०-०क्ष् (३४१६)
स च कौरव्यमासाद्य द्रुपदस्य पुरोहितः ।
सत्कृतो धृतराष्ट्रेण भीष्मेण विदुरेण च ॥ ५-२०-१ (३२३१४)
सर्वकौशल्यमुक्त्वाऽऽदौ पृष्ट्वा चैवमनामयम् ।
सर्वसेनाप्रणेतॄणां मध्ये वाक्यमुवाच ह ॥ ५-२०-२ (३२३१५)
सर्वैर्भवद्भिर्विदितो राजधर्मः सनातनः ।
वाक्योपादानहेतोस्तु वक्ष्यामि विदिते सति ॥ ५-२०-३ (३२३१६)
धृतराष्ट्रश्च पाण्डुश्च सुतावेकस्य विश्रुतौ ।
तयोः समानं द्रविणं पैतृकं नात्र संशयः ॥ ५-२०-४ (३२३१७)
धृतराष्ट्रस्य ये पुत्राः प्राप्तं तैः पैतृकं वसु ।
पाण्डुपुत्राः कथं नाम न प्राप्ताः पैतृकं वसु ॥ ५-२०-५ (३२३१८)
वनं गतैः पाण्डवेयैर्विदितं वः पुरा यथा ।
न प्राप्तं पैतृकं द्रव्यं धृतराष्ट्रेण यद्धृतम् ॥ ५-२०-६ (३२३१९)
प्राणान्तिकैरप्युपायैः प्रयतद्भिरनेकशः ।
शेषवन्तो न शकिता नेतुं वै यमसादनम् ॥ ५-२०-७ (३२३२०)
पुनश्च वर्धितं राज्यं स्वबलेन महात्मभिः ।
छद्मनाऽपहृतं क्षुद्रैर्धार्तराष्ट्रैः ससौबलैः ॥ ५-२०-८ (३२३२१)
तदप्यनुमतं कर्म यथा युक्तमनेन वै ।
वासिताश्च महारण्ये वर्षाणीह त्रयोदश ॥ ५-२०-९ (३२३२२)
सभायां क्लेशितैर्वीरैः सहभार्यैस्तथा भृशम् ।
अरण्ये विविधाः क्लेशाः संप्राप्तास्तैः सुदारुणाः ॥ ५-२०-१० (३२३२३)
तथा विराटनगरे योन्यन्तरगतैरिव ।
प्राप्तः परमसंक्लेशो यथा पापैर्महात्मभिः ॥ ५-२०-११ (३२३२४)
ते सर्वं पृष्ठतः कृत्वा तत्पूर्वं कर्म किल्विषम् ।
साम्नैव कुरुभिः सन्धिमिच्छन्ति कुरुपुङ्गवाः ॥ ५-२०-१२ (३२३२५)
तेषां च वृत्तमाज्ञाय वृत्तं दुर्योधनस्य च ।
अनुनेतुमिहार्हन्ति धार्तराष्ट्रं सुहृज्जनाः ॥ ५-२०-१३ (३२३२६)
न हि ते विग्रहं वीराः कुर्वन्ति कुरुभिः सह ।
अविनाशेन लोकस्य काङ्क्षन्ते पाण्डवाः स्वकम् ॥ ५-२०-१४ (३२३२७)
यश्चापि धार्तराष्ट्रस्य हेतुः स्याद्विग्रहं प्रति ।
स च हेतुर्न मन्तव्यो बलीयांसस्तथा हि ते ॥ ५-२०-१५ (३२३२८)
अक्षौहिण्यश्च सप्तैव धर्मपुत्रस्य सङ्गताः ।
युयुत्समानाः कुरुभिः प्रतीक्षन्तेऽस्य शासनम् ॥ ५-२०-१६ (३२३२९)

अपरे पुरुषव्याघ्राः सहस्राक्षौहिणीसमाः ।
सात्यकिर्भीमसेनश्च यमौ च सुमहाबलौ ॥ ५-२०-१७ (३२३३०)
एकादशैताः पृतना एकतश्च समागताः ।
एकतश्च महाबाहुर्बहुरूपी धनञ्जयः ॥ ५-२०-१८ (३२३३१)
यथा किरीटी सर्वाभ्यः सेनाभ्यो व्यतिरिच्यते ।
एवमेव महाबाहुर्वासुदेवो महाद्युतिः ॥ ५-२०-१९ (३२३३२)
बहुलत्वं च सेनानां विक्रमं च किरीटिनः ।
बुद्धिमत्त्वं च कृष्णस्य बुद्ध्वा युध्येत को नरः ॥ ५-२०-२० (३२३३३)
ते भवन्तो यथाधर्मं यथासमयमेव च ।
प्रयच्छन्तु प्रदातव्यं मा वः कालोऽत्यगादयम् ॥ ॥ ५-२०-२१ (३२३३४)

इति श्रीमन्महाभारते उद्योगपर्वणि सञ्जययानपर्वणि विंशोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-२०-३ वाक्येति । भवद्भिः किंचिद्वक्तव्यमतो हेतोरित्यर्थः ॥
५-२०-७ शेषवन्तः आयुःशेषयुक्ताः ॥

उद्योगपर्व - अध्याय ०२१
॥ श्रीः ॥
५.२१. अध्यायः २१

Mahabharata - Udyoga Parva - Chapter Topics
भीष्मेण पुरोहितवाक्येऽनुमोदिते कर्णेन तदाक्षेपपूर्वकं
सङ्केतकालस्य सशेषतया पुनर्वनवासादिना तत्समापने राज्यदानोक्तिः
॥ १ ॥
भीष्मेण कर्णाधिक्षेपः ॥ २ ॥
धृतराष्ट्रेण पाण्डवान्प्रति स्वेन सञ्जयप्रेषणकथनपूर्वकं
पुरोहितस्य प्रतियापनम् ॥ ३ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-२१-० (३२३३५)
वैशम्पायन उवाच। ५-२१-०क्ष् (३४१७)
तस्य तद्वचनं श्रुत्वा प्रज्ञावृद्धो महाद्युतिः ।
संपूज्यैनं यथाकालं भीष्मो वचनमब्रवीत् ॥ ५-२१-१ (३२३३६)
दिष्ट्या कुशलिनः सर्वे सह दामोदरेण ते ।
दिष्ट्या सहायवन्तश्च दिष्ट्या धर्मे च ते रताः ॥ ५-२१-२ (३२३३७)

दिष्ट्या च सन्धिकामास्ते भ्रातरः कुरुनन्दनाः ।
दिष्टा न युद्धमनसः पाण्डवाः सह बान्धवैः ॥ ५-२१-३ (३२३३८)
भवता सत्यमुक्तं तु सर्वमेतन्न संशयः ।
अतितीक्ष्णं तु ते वाक्यं ब्राह्मण्यादिति मे मतिः ॥ ५-२१-४ (३२३३९)
असंशयं क्सेशितास्ते वने चेह च पाण्डवाः ।
प्राप्ताश्च धर्मतः सर्वं पितुर्धनमसंशयम् ॥ ५-२१-५ (३२३४०)
किरीटि बलवान्पार्थः कृतास्त्रश्च महारथः ।
को हि पाण्डुसुतं युद्धे विषहेत धनञ्जयम् ॥ ५-२१-६ (३२३४१)
अपि वज्रधरः साक्षात्किमुतान्ये धनुर्भृतः ।
त्रयाणामपि लोकानां समर्थ इति मे मतिः ॥ ५-२१-७ (३२३४२)
वैशम्पायन उवाच। ५-२१-८क्ष् (३४१८)
भीष्मे ब्रुवति तद्वाक्यं धृष्टमाक्षिप्य मन्युना ।
दुर्योधनं समालोक्य कर्णो वचनमब्रवीत् ॥ ५-२१-८ (३२३४३)
न तत्राविदितं ब्रह्मँल्लोके भूतेन केनचित् ।
पुनरुक्तेन किं तेन भाषितेन पुनः पुनः ॥ ५-२१-९ (३२३४४)
दुर्योधनार्थे शकुनिर्द्यूते निर्जितवान्पुरा ।
समयेन गतोऽरण्यं पाण्डुपुत्रो युधिष्ठिरः ॥ ५-२१-१० (३२३४५)
स तं समयमाश्रित्य राज्यं नेच्छति पैतृकम् ।
बलमाश्रित्य मत्स्यानां पाञ्चालानां च मूर्खवत् ॥ ५-२१-११ (३२३४६)
दुर्योधनो भयाद्विद्वन्न दद्यात्पादमन्ततः ।
धर्मतस्तु महीं कृत्स्नां प्रदद्याच्छत्रवेऽपि च ॥ ५-२१-१२ (३२३४७)
यदि काङ्क्षन्ति ते राज्यं पितृपैतामहं पुनः ।
यथाप्रतिज्ञं कालं तं चरन्तु वनमाश्रिताः ॥ ५-२१-१३ (३२३४८)
ततो दुर्योधनस्याङ्के वर्तन्तामकुतोभयाः ।
अधार्मिकीं तु मा बुद्धिं मौर्ख्यात्कुर्वन्तु केवलात् ॥ ५-२१-१४ (३२३४९)
अथ ते धर्ममुत्सृत्य युद्धमिच्छन्ति पाण्डवाः ।
आसाद्येमान्कुरुश्रेष्ठान्स्मरिष्यन्ति वचो मम ॥ ५-२१-१५ (३२३५०)
भीष्म उवाच। ५-२१-१६क्ष् (३४१९)
किं नु राधेय वाचा ते कर्म तत्स्मर्तुमर्हसि ।
एक एव यदा पार्थः षड्रथाञ्जितवान्युधि ॥ ५-२१-१७अग विराटनगरे
धीरः किं त्वं तत्रैव नागतः'।
बहुशो जीयमानस्य कर्म दृष्टं तदैव ते ॥ ५-२१-१६ (३२३५१)
न चेदेवं करिष्यामो यदयं ब्राह्मणोऽब्रवीत् ।
ध्रुवं युधि हतास्तेन भक्षयिष्याम पांसुकान्। ५-२१-१८ (३२३५२)
ग दुर्योधनः सहामात्यो विनङ्क्ष्यति न संशयः ॥ ५-२१-१९ (३२३५३)
वैशम्पायन उवाच ।

धृतराष्ट्रस्ततो भीष्ममनुमान्य प्रसाद्य च ।
अवभर्त्स्य च राधेयमिदं वचनमब्रवीत् ॥ ५-२१-१९क्ष् (३४२०)
अस्मद्धितं वाक्यमिदं भीष्मः शान्तनवोऽब्रवीत् ।
पाण्डवानां हितं चैव सर्वस्य जगतस्तथा ॥ ५-२१-२० (३२३५४)
चिन्तयित्वा तु पार्थेभ्यः प्रेषयिष्यामि सञ्जयम् ।
स भवान्प्रतियात्वद्य पाण्डवानेव माचिरम् ॥ ५-२१-२१ (३२३५५)
स तं सत्कृत्य कौरव्यः प्रेषयामास पाण्डवान् ।
सभामध्ये समाहूय सञ्जयं वाक्यमब्रवीत् ॥ ॥ ५-२१-२२ (३२३५६)

इति श्रीमन्महाभारते उद्योगपर्वणि सञ्जययानपर्वणि एकविंशोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-२१-८ धृष्टं धर्षणायुक्तं यथा स्यात्तथा ॥
८ ।

उद्योगपर्व - अध्याय ०२२
॥ श्रीः ॥
५.२२. अध्यायः २२

Mahabharata - Udyoga Parva - Chapter Topics
धृतराष्ट्रेण यथाक्रमं दुर्योधनपाण्डवनिन्दाप्रशंसनपूर्वकं
पाण्डवान्प्रति सञ्जयप्रेषणम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-२२-० (३२३५७)
धृतराष्ट्र उवाच। ५-२२-०क्ष् (३४२१)
प्राप्तानाहुः सञ्जय पाण्डुपुत्रा-
नुपप्लव्ये तान्विजानीहि गत्वा ।
अजातशत्रुं च सभाजयेथा
दिष्ट्या वनाद्ग्राममुपस्थितस्त्वम् ॥ ५-२२-१ (३२३५८)
सर्वान्वदेः सञ्जय स्वस्तिमन्तः
कृच्छ्रं वासमतदर्हा निरुष्य ।
तेषां शान्तिर्विद्यतेऽस्मासु शीघ्रं
मिथ्यापेतानामुपकारिणां सताम् ॥ ५-२२-२ (३२३५९)
नाहं क्वचित्सञ्जय पाण्डवानां
मिथ्यावृत्तिं कांचन जात्वपश्यम् ।

सर्वां श्रियं ह्यात्मवीर्येण लब्धां
पर्याकार्षुः पाण्डवा मह्यमेव ॥ ५-२२-३ (३२३६०)
दोषं ह्येषां नाध्यगच्छं परीच्छ-
न्सूक्ष्मं कंचिद्येन गर्हेय पार्थान् ।
धर्मार्थाभ्यां कर्म कुर्वन्ति नित्यं
सुखप्रिये नानुरुध्यन्ति कामात् ॥ ५-२२-४ (३२३६१)
धर्मं शीतं क्षुत्पिपासे तथैव
निद्रां तन्द्रीं क्रोधहर्षौ प्रमादम् ।
धृत्या चैव प्रज्ञया चाभिभूय
धर्मार्थयोगान्प्रयतन्ति पार्थाः ॥ ५-२२-५ (३२३६२)
त्यजन्ति मित्रेषु धनानि काले
न संवासाञ्जीर्यति तेषु मैत्री ।
यथार्हमानार्थकरा हि पार्था-
स्तेषां द्वेष्टा नास्त्याजमीढस्य पक्षे ।
अन्यत्र पापाद्विपमान्मन्दबुद्धे-
र्दुर्योधनात्क्षुद्रतराच्च कर्णात् ॥ ५-२२-६ (३२३६३)
ग पुत्रो मह्यं मृत्युवशं जगाम
दुर्योधनः सञ्जय रागबुद्धिः।'
तेषां हीमौ हीनसुखप्रियाणां
महात्मनां संजनयतो हि तेजः ॥ ५-२२-७ (३२३६४)
उत्थानवीर्यः सुखमेधमानो
दुर्योधः सुकृतं मन्यते तत् ।
तेषां भागं यच्च मन्येत बालः
शक्यं हर्तुं जीवतां पाण्डवानाम् ॥ ५-२२-८ (३२३६५)
यस्यार्जुनः पदवीं केशवश्च
वृकोदरः सात्यकोऽजातशत्रोः ।
माद्रीपुत्रौ सृञ्जयाश्चापि यान्ति
पुरा युद्धात्साधु तस्य प्रदानम् ॥ ५-२२-९ (३२३६६)
सह्येवैकः पृथिवीं सव्यसाची
गाण्डीवधन्वा प्रणुदेद्रथस्थः ।
तथा जिष्णुः केशवोऽप्यप्रधृष्यो
लोकत्रयस्याधिपतिर्महात्मा ॥ ५-२२-१० (३२३६७)
तिष्ठेत कस्तस्य मर्त्यः पुरस्ता-
द्यः सर्वलोकेषु वरेण्य एकः ।
पर्जन्यघोषान्प्रवपञ्शरौघा-
न्पतङ्गसङ्घानिव शीघ्रवेगान् ॥ ५-२२-११ (३२३६८)

दिशं ह्युदीचीमपि चोत्तरान्कुरून्
गाण्डीवधन्वैकरथो जिगाय ।
धनं चैपामाहरत्सव्यसाची
सेनानुगान्द्रविडांश्चैव चक्रे ॥ ५-२२-१२ (३२३६९)
यश्चैव देवान्खाण्डवे सव्यसाची
गाण्डीवधन्वा प्रजिगाय सेन्द्रान् ।
उपाहरत्पाण्डवो जातवेदसे
यशो मानं वर्धयन्पाण्डवानाम् ॥ ५-२२-१३ (३२३७०)
गदाभृतां नास्ति समोऽत्र भीमा-
द्बस्त्यारोहो नास्ति समश्च तस्य ।
रथेऽर्जुनादाहुरहीनमेनं
बाह्वोर्बलेनायुतनागवीर्यम् ॥ ५-२२-१४ (३२३७१)
सुशिक्षितः कृतवैरस्तरस्वी
दहेत्क्षुद्रांस्तरसा धार्तराष्ट्रान् ।
सदाऽत्यमर्षी न वलात्स शक्यो
युद्धे जेतुं वासवेनापि साक्षात् ॥ ५-२२-१५ (३२३७२)
सुतेजसौ वलिनौ शीघ्रहस्तौ
सुशिक्षितौ भ्रातरौ फाल्गुनेन ।
श्येनौ यथा पक्षिपूगान्नुजन्तौ
माद्रीपुत्रौ शेपयेतां न शत्रून् ॥ ५-२२-१६ (३२३७३)
एतद्बलं पूर्णमस्माकमेवं
यत्सत्यं तान्प्राप्य नास्तीति मन्ये ।
तेषां मध्ये वर्तमानस्तरस्वी
धृष्टद्युम्नः पाण्डवानामिहैकः ॥ ५-२२-१७ (३२३७४)
सहामात्यः सोमकानां प्रवर्हः
सन्त्यक्तात्मा पाण्डवार्थे श्रुतो मे ।
अजातशत्रुं प्रसहेत कोऽन्यो
येषां स स्यादग्रणीर्वृष्णिसिंह ॥ ५-२२-१८ (३२३७५)
सहोषितश्चरितार्थो वयस्थो
मात्स्येयानामधिपो वै विराटः ।
स वै सपुत्रः पाण्डवार्थे च शश्व-
द्युधिष्ठिरे भक्त इति श्रुतं मे ॥ ५-२२-१९ (३२३७६)
अवरुद्धा रथिनः केकयेभ्यो
महेष्वासा भ्रातरः पञ्च सन्ति ।
केकयेभ्यो राज्यमाकाङ्क्षमाणा
युद्धार्थिनश्चानुवसन्ति पार्थान् ॥ ५-२२-२० (३२३७७)

सर्वांश्च वीरान्पृथिवीपतीनां
समागतान्पाण्डवार्थे निविष्टान् ।
शूरानहं भक्तिमतः शृणोमि
प्रीत्या युक्तान्संश्रितान्धर्मराजन् ॥ ५-२२-२१ (३२३७८)
गिर्याश्रया दुर्गनिवासिनश्च
योधाः पृथिव्यां कुलजातिशुद्धाः ।
म्लेच्छाश्च नानायुधवीर्यवन्तः
समागताः पाण्डवार्थे निविष्टाः ॥ ५-२२-२२ (३२३७९)
पाण्ड्यश्च राजा समितीन्द्रकल्पो
योधप्रवीरैर्बहुभिः समेतः ।
समागतः पाण्डवार्थे महात्मा
लोकप्रवीरोऽप्रतिवीर्यतेजाः ॥ ५-२२-२३ (३२३८०)
अस्त्रं द्रोणादर्जुनाद्वासुदेवा-
त्कृपाङ्गीष्मादद्येन कृतं शृणोमि ।
यं तं कार्ष्णिप्रतिममाहुरेकं
स सात्यकिः पाण्डवार्थे निविष्टः ॥ ५-२२-२४ (३२३८१)
उपाश्रिताश्चेदिकरूशकाश्च
सर्वोद्योगैर्भूमिपालाः समेताः ।
तेषां मध्ये सूर्यमिवातपन्तं
श्रिया वृतं चेदिपतिं ज्वलन्तम् ॥ ५-२२-२५ (३२३८२)
अस्तम्भनीयं युधि मन्यमान्यो
ज्यां कर्षतां श्रेष्ठतमं पृथिव्याम् ।
सर्वोत्साहं क्षत्रियाणां निहत्य
प्रसह्य कृष्णस्तरसा संममर्द ॥ ५-२२-२६ (३२३८३)
यशोमानौ वर्धयन्पाण्डवानां
पुराऽभिनच्छिशुपालं समीक्ष्य ।
यस्य सर्वे वर्धयन्ति स्म मानं
करूशराजप्रमुखा नरेन्द्राः ॥ ५-२२-२७ (३२३८४)
तमसह्यं केशवं तत्र मत्वा
सुग्रीवयुक्तेन रथेन कृष्णम् ।
संप्राद्रवंश्चेदिपतिं विहाय
सिंहं दृष्ट्वा क्षुद्रमृगा इवान्ये ॥ ५-२२-२८ (३२३८५)
यस्तं प्रतीपस्तरसा प्रत्युदीया-
दाशंसमानो द्वैरथे वासुदेवम् ।
सोऽशेत कृष्णेन हतः परासु-
र्वातेनेवोन्मथितः कर्णिकारः ॥ ५-२२-२९ (३२३८६)

पराक्रमं मे यदवेदयन्त
तेषामर्थे सञ्जय केशवस्य ।
अनुस्मरंस्तस्य कर्माणि विष्णो-
र्गावल्गणे नाधिगच्छामि शान्तिम् ॥ ५-२२-३० (३२३८७)
न जातु ताञ्छत्रुरन्यः सहेत
येषां स स्यादग्रणीर्वृष्णिसिंहः ।
प्रवेपते मे हृदयं भयेन
श्रुत्वा कृष्णावेकरथे समेतौ ॥ ५-२२-३१ (३२३८८)
न चेन्नच्छेत्सङ्गरं मन्दबुद्धि-
स्ताभ्यां लभेच्छर्म तदा सुतो मे ।
नो चेत्कुरून्सञ्जय निर्दहेता-
मिन्द्राविष्णू दैत्यसेनां यथैव ॥ ५-२२-३२ (३२३८९)
मते हि मे शक्रसमो धनञ्जयः
सनातनो वृष्णिवीरश्च विष्णुः ।
धर्मारामो ह्रीनिषेवस्तरस्वी
कुन्तीपुत्रः पाण्डवोऽजातशत्रुः ॥ ५-२२-३३ (३२३९०)
दुर्योधनेन निकृतो मनस्वी
नो चेत्क्रुद्धः प्रदहेद्धार्तराष्ट्रान् ।
नाहं तथा ह्यर्जुनाद्वासुदेवा-
द्भीमाद्वाऽहं यमयोर्वा बिभेमि ॥ ५-२२-३४ (३२३९१)
यथा राज्ञः क्रोधदीप्तस्य सूत
मन्योरहं भीततरः सदैव ।
महातपा ब्रह्मचर्येण युक्तः
सङ्कल्पोऽयं मानसस्तस्य सिद्ध्येत् ॥ ५-२२-३५ (३२३९२)
तस्य क्रोधं सञ्जयाहं समीक्ष्य
स्थाने जानन्भृशमस्म्यद्य भीतः ।
स गच्छ शीघ्रं प्रहितो रथेन
पाञ्चालराजस्य चमूनिवेशनम् ॥ ५-२२-३६ (३२३९३)
अजातशत्रुं कुशलं स्म पृच्छेः
पुनः पुनः प्रीतियुक्तं वदेस्त्वम् ।
जनार्दनं चापि समेत्य तात
महामात्रं वीर्यवतामुदारम् ॥ ५-२२-३७ (३२३९४)
अनामयं मद्वचनेन पृच्छे-
र्धृतराष्ट्रः पाण्डवैः शान्तिमीप्सुः ।
न तस्य किंचिद्वचनं न कुर्यात्
कुन्तीपुत्रो वासुदेवस्य सूत ॥ ५-२२-३८ (३२३९५)

प्रियश्चैषामात्मसमश्च कृष्णो
विद्वांश्चैषां कर्मणि नित्ययुक्तः ।
समानीतान्पाण्डवान्सृञ्जयांश्च
जनार्दनं युयुधानं विराटम् ॥ ५-२२-३९ (३२३९६)
अनामयं मद्वचनेन पृच्छेः
सर्वांस्तथा द्रौपदेयांश्च पञ्च ।
यद्यत्तत्र प्राप्तकलं परेभ्य-
स्त्वं मन्येथा भारतानां हितं च
तद्भाषेथाः सञ्जय राजमध्ये ५-२२-४० (३२३९७)
५-२२-४०फ़"
न मूर्च्छयेद्यन्न च युद्धहेतुः ॥ ॥

इति श्रीमन्महाभारते उद्योगपर्वणि सञ्जययानपर्वणि द्वाविंशोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-२२-२ स्वस्तिमन्तो वयमिति सर्वान्वदेः । कृच्छ्रं निरुष्यापि
तेषां शान्तिरक्रोधोऽस्मासु विद्यते। मिथ्यापेतानां निष्कपटानाम् ॥
२ ॥
५-२२-३ मह्यं पर्याकार्षुः मदर्थं परित आनीतवन्तः ॥
५-२२-४ धर्मार्थाभ्यां धर्मार्थं अर्थार्थं ५-२२-७ तेजः क्रोधम् ॥
५-२२-९ तस्य तस्मै । प्रदानं भागप्रदानम् ॥
५-२२-१० जिष्णुर्जयशीलः ॥
५-२२-१३ जातवेदसे उपाहृरत् खाण्डवमिति विपरिणामेनानुषङ्गः ॥
५-२२-२० अवरुद्धाः बहिर्निः सारिताः ॥
५-२२-२४ कार्ष्णिः प्रद्युम्नस्तत्तुल्यम् ॥
५-२२-२५ चेदिपतिं शिशुपालम् । कृष्णो ममर्देत्युत्तरेणान्वयः ॥
५-२२-२९ आशं समानो जयमिति शेषः ॥
५-२२-३० यत् यतः । अवेदयन्त ज्ञापितवन्तः । चारा इति शेषः ॥
५-२२-३१ कृष्णौ वासुदेवार्जुनौ ॥
५-२२-३४ निकृतो वञ्चितः । मनस्वी जितमनाः ॥
५-२२-३६ स्थाने जानन् युक्तं पश्यन् ॥
५-२२-३७ महामात्रं महाभागम् ॥
५-२२-३८ शान्तिमीप्सुरस्तीति वदेत्यध्याहारः ॥
५-२२-४० मूर्च्छयेत् वर्धयेत् । क्रोधमिति शेषः ॥

उद्योगपर्व - अध्याय ०२३
॥ श्रीः ॥

५.२३. अध्यायः २३

Mahabharata - Udyoga Parva - Chapter Topics

सञ्जयेनोपप्लाव्यं गत्वा पाण्डवान्प्रति
धृतराष्ट्रकृतकुशलप्रश्नकथनम् ॥ १ ॥
युधिष्ठिरेण सञ्जयंप्रति धृतराष्ट्रादीनां कुशलादिप्रश्नः ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-२३-० (३२३९८)
वैशम्पायन उवाच। ५-२३-०क्ष् (३४२२)
राज्ञस्तु वचनं श्रुत्वा धृतराष्ट्रस्य सञ्जयः ।
उपप्लाव्यं ययौ द्रष्टुं पाण्डवानमितौजसः ॥ ५-२३-१ (३२३९९)
स तु राजानमासाद्य कुन्तीपुत्रं युधिष्ठिरम् ।
अभिवाद्य ततः पूर्वं सूतपुत्रोऽभ्यभाषत ॥ ५-२३-२ (३२४००)
गवल्गणिः सञ्जयः सूतसूनु-
रजातशत्रुमवदत्प्रतीतः ।
दिष्ट्या राजंस्त्वामरोगं प्रपश्ये
सहायवन्तं च महेन्द्रकल्पम् ॥ ५-२३-३ (३२४०१)
अनामयं पृच्छति त्वाम्बिकेयो
वृद्धो राजा धृतराष्ट्रो मनीषी ।
कच्चिच्चीमः कुशली पाण्डवाग्र्यो
धनञ्जयस्तौ च माद्रीतनूजौ ॥ ५-२३-४ (३२४०२)
कच्चित्कृष्णा द्रौपदी राजपुत्री
सत्यव्रता वीरपत्नी सुपुत्रा ।
मनस्विनी यत्र च वाञ्छसि त्व-
मिष्टान्कामान्भारत स्वस्तिकामः ॥ ५-२३-५ (३२४०३)
युधिष्ठिर उवाच। ५-२३-६क्ष् (३४२३)
गावल्गणे सञ्जय स्वागतं ते
प्रीतात्माऽहं त्वाऽभिनन्दामि सूत ।
अनामयं प्रतिमाने तवाहं
सहानुजैः कुशली चास्मि विद्वन् ॥ ५-२३-६ (३२४०४)
चिरादिदं कुशलं भारतस्य
श्रुत्वा राज्ञः कुरुवृद्धस्य सूत ।
मन्ये साक्षाद्दृष्टमहं नरेन्द्रं
दृष्ट्वैव त्वां सञ्जय प्रीतियोगात् ॥ ५-२३-७ (३२४०५)

पितामहो नः स्थविरो मनस्वी
महाप्राज्ञः सर्वधर्मोपपन्नः ।
सकौरव्यः कुशली तात भीष्मो
यथापूर्वं वृत्तिरस्त्यस्य कच्चित् ॥ ५-२३-८ (३२४०६)
कच्चिद्राजा धृतराष्ट्रः सपुत्रो
वैचित्रवीर्यः कुशली महात्मा ।
महाराजो बाह्लिकः प्रातिपेयः
कच्चिद्विद्वान्कुशली सूतपुत्र ॥ ५-२३-९ (३२४०७)
स सोमदत्तः कुशली तात कच्चि-
द्भूरिश्रवाः सत्यसन्धः शलश्च ।
द्रोणः सपुत्रश्च कृपश्च विप्रो
महेष्वासाः कच्चिदेतेऽप्यरोगाः ॥ ५-२३-१० (३२४०८)
सर्वे कुरुभ्यः स्पृहयन्ति सञ्जय
धनुर्धरा ये पृथिव्यां प्रधानाः ।
महाप्रज्ञाः सर्वशास्त्रावदाता
धनुर्भृतां मुख्यतमाः पृथिव्याम् ॥ ५-२३-११ (३२४०९)
कच्चिन्मानं तात लभन्त एते
धनुर्भृतः कचिदेतेऽप्यरोगाः ।
येषां राष्ट्रे निवसति दर्शनीयो
महेष्वासः शीलवान्द्रोणपुत्रः ॥ ५-२३-१२ (३२४१०)
वैश्यापुत्रः कुशली तात कच्चित्
महाप्राज्ञो राजपुत्रो युयुत्सुः ।
कर्णो मानी कुशली तात कच्चित्
सुयोधनो यस्य मन्दो विधेयः ॥ ५-२३-१३ (३२४११)
स्त्रियो वृद्धा भारतानां जनन्यो
महादास्यो दासभार्याश्च सूत ।
वध्वः पुत्रा भागिनेया भगिन्यो
दौहित्रा वा कच्चिदप्यव्यलीकाः ॥ ५-२३-१४ (३२४१२)
कच्चिद्राजा ब्राह्मणानां यथावत्
प्रवर्तते पूर्ववत्तात वृत्तिम् ।
कच्चिद्दायान्मामकान्धार्तराष्ट्रो
द्विजातीनां सञ्जय नोपहन्ति ॥ ५-२३-१५ (३२४१३)
कच्चिद्राजा धृतराष्ट्रः सपुत्र
उपेक्षते ब्राह्मणातिक्रमान्वै ।
स्वर्गस्य कच्चिन्न तथा वर्त्मभूता-
मुपेक्षते तेषु सदैव वृत्तिम् ॥ ५-२३-१६ (३२४१४)

एतञ्ज्योतिश्चोत्तमं जीवलोके
शुक्लं प्रजानां विहितं विधात्रा ।
ते चेद्दोषं न नियच्छन्ति मन्दाः
कृत्स्नो नाशो भविता कौरवाणाम् ॥ ५-२३-१७ (३२४१५)
कच्चिद्राजा धृतराष्ट्रः सपुत्रो
बुभूषते वृत्तिममात्यवर्गे ।
कच्चिन्न भेदेन जिजीविषन्ति
मुहृद्रूपा दुर्हृदश्चैकमत्यात् ॥ ५-२३-१८ (३२४१६)
कच्चिन्न पापं कथयन्ति तात
ते पाण्डवानां कुरवः सर्व एव ।
द्रोणः सपुत्रश्च कृपश्च वीरो
नास्मासु पापानि वदन्ति कच्चित् ॥ ५-२३-१९ (३२४१७)
कच्चिद्राज्ये धृतराष्ट्रं सपुत्रं
समेत्याहुः कुरवः सर्व एव ।
कच्चिद्दृष्ट्वा दस्युसङ्घान्समेता-
न्स्मरन्ति पार्थस्य युधां प्रणेतुः ॥ ५-२३-२० (३२४१८)
मौर्वीभुजाग्रप्रहितान्स्म तात
दोधूयमानेन धनुर्धरेण ।
गाण्डीवनुन्नांस्तनयित्नुघोषा-
नजिह्मगान्कच्चिदनुस्मरन्ति ॥ ५-२३-२१ (३२४१९)
न चापश्यं कंचिदहं पृथिव्यां
योधं समं वाऽधिकमर्जुनेन ।
यस्यैकषष्टिर्निशितास्तीक्ष्णधाराः
सुवाससः समंतो हस्तवापः ॥ ५-२३-२२ (३२४२०)
गदापाणिर्भीमसेनस्तरस्वी
प्रवेपयञ्छत्रुसङ्घाननीके ।
नागः प्रभिन्न इव नड्वलेषु
चंक्रम्यते कच्चिदेनं स्मरन्ति ॥ ५-२३-२३ (३२४२१)
माद्रीपुत्रः सहदेवः कलिङ्गान्
समागतानजयद्दन्तकूरे ।
वामेनास्यन्दक्षिणेनैव यो वै
महाबलं कच्चिदेनं स्मरन्ति ॥ ५-२३-२४ (३२४२२)
पुरा जेतुं नकुलः प्रेषितोऽयं
शिबींस्त्रिगर्तान्सञ्जय पश्यतस्ते ।
दिशं प्रतीचीं वशमानयन्मे
माद्रीसुतं कच्चिदेनं स्मरन्ति ॥ ५-२३-२५ (३२४२३)

पराभवो द्वैतवने य आसी-
द्दुर्मन्विते घोपयात्रागतानाम् ।
यत्र मन्दाञ्छत्रुवशं प्रयाता-
नमोचयद्भीमसेनो जयश्च ॥ ५-२३-२६ (३२४२४)
अहं पश्चादर्जुनमभ्यरक्षं
माद्रीपुत्रौ भीमसेनोऽप्यरक्षत् ।
गाण्डीवधन्वा शत्रुसङ्घानुदस्य
स्वस्त्यागमत्कच्चिदेनं स्मरन्ति ॥ ५-२३-२७ (३२४२५)
न कर्मणा साधुनैकेन नूनं
सुखं शक्यं वै भवतीह सञ्जय ।
सर्वात्मना परिजेतुं वयं चे-
न्न शक्नुमो धृतराष्ट्रस्य पुत्रम् ॥ ॥ ५-२३-२८ (३२४२६)

इति श्रीमन्महाभारते उद्योगपर्वणि सञ्जययानपर्वणि त्रयोविंशोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-२३-११ कुरुभ्यः स्पृहयन्ति कच्चिदित्यनुषङ्गः ॥
५-२३-१४ अव्यलीकाः निष्कपटाः ॥
५-२३-१५ वृत्तिं जीविकां दातुमिति शेषः । दायान्महत्तान् ग्रामादीन् ॥
५-२३-१७ एतद्ब्रह्मणानां वृत्तः पालनं ज्योतिः परलोकप्रकाशकं
जीवलोके इह शुक्लं यशस्करम् । दोषं लोभं ब्राह्मणवृत्त्युपघातेन
न नियच्छन्ति ॥
५-२३-१८ बुभूपते प्रापयितुमिच्छति ॥
५-२३-२१ मौर्व्याः भुजः कौटिल्यं तस्य अग्रमिवाग्रं शरसंधानदेशः
ततः प्रहितान् प्रेषितान् ॥
५-२३-२२ सुवाससः सुषुङ्गा । हस्तवापो हस्तक्षेपः । एकषष्टिर्वाणा
अस्य एतेन । ॥।
॥॥
इत्यर्थः ॥
५-२३-२३ नड्वलेषु सतृणेषु स्थलेषु ॥
२३ ॥
५-२३-२४ दन्तकूरे संप्रागे ॥
२४ ॥
५-२३-२६ जयः अर्जुनः ॥

उद्योगपर्व - अध्याय ०२४
॥ श्रीः ॥

५.२४. अध्यायः २४

Mahabharata - Udyoga Parva - Chapter Topics

सञ्जयेन युधिष्ठिरप्रश्नानामुत्तरदानपूर्वकं
धृतराष्ट्रसन्देशश्रवणविधानम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-२४-० (३२४२७)
सञ्जय उवाच। ५-२४-०क्ष् (३४२४)
यथाऽऽत्थ मे पाण्डव तत्तथैव
कुरून्कुरुश्रेष्ठ जनं च पृच्छसि ।
अनामयास्तात मनस्विनस्ते
कुरुश्रेष्ठान्पृच्छसि पार्थ यांस्त्वम् ॥ ५-२४-१ (३२४२८)
सन्त्येव वृद्धाः साधवो धार्तराष्ट्रे
सन्त्येव पापाः पाण्डव तस्य विद्धि ।
दद्याद्रिपुभ्योऽपि हि धार्तराष्ट्रः
कुतो दायांल्लोपयेद्ब्राह्मणानाम् ॥ ५-२४-२ (३२४२९)
यद्युष्मासु वर्ततेऽसावधर्म्य-
मद्रुग्धेषु द्रुग्धवत्तन्न साधु ।
मित्रध्रुक् स्याद्धृतराष्ट्रस्य पुत्रो
युष्मान्द्विपन्साधुवृत्तानसाधुः ॥ ५-२४-३ (३२४३०)
स चापि जानाति भृशं च तप्यते
शोचत्यन्तः स्थविरोऽजातशत्रो ।
शृणोति हि ब्राह्मणानां समेत्य
मित्रद्रोहः पातकेभ्यो यरीयान् ॥ ५-२४-४ (३२४३१)
स्मरन्ति तुभ्यं नरदेव सङ्गमे
युद्धे च जिष्णोश्च युधां प्रणेतुः ।
समुद्धुष्टे दुन्दुभिशङ्खशब्दे
गदापाणिं भीमसेनं स्मरन्ति ॥ ५-२४-५ (३२४३२)
माद्रीसुतौ चापि तथाऽऽजिमध्ये
सर्वा दिशः संपतन्तौ स्मरन्ति ।
सेनां वर्षन्तौ शग्वैपरजमं
महारथौ समरे दुष्प्रकम्पौ ॥ ५-२४-६ (३२४३३)
न त्वेव मन्ये पुरुषस्य राज-
न्ननागतं ज्ञायते यज्जविष्यम् ।

त्वं चेत्तथा सर्वधर्मोपपन्नः
प्राप्तः क्लेशं पाण्डव कृच्छ्ररूपम् ।
त्वमेवैतत्कृच्छ्रगतश्च भूयः
समीकुर्याः प्रज्ञयाऽजातशत्रो ॥ ५-२४-७ (३२४३४)
न कामार्थं सन्त्यजेयुर्हि धर्मं
पाण्डोः सुताः सर्व एवेन्द्रकल्पाः ।
त्वमेवैतत्प्रज्ञयाऽजातशत्रो
समीकुर्या येन शर्माप्नुयुस्ते ॥ ५-२४-८ (३२४३५)
धार्तराष्ट्राः पाण्डवाः सृञ्जयाश्च
ये चाप्यन्ते सन्निविष्टा नरेन्द्राः ।
यन्मां ब्रवीद्धृतराष्ट्रो निशाया-
मजातशत्रो वचनं पिता ते ॥ ५-२४-९ (३२४३६)
सहामात्यः सहपुत्रश्च राजन्
समेत्य तां वाचमिमां निबोध ॥ ॥ ५-२४-१० (३२४३७)

इति श्रीमन्महाभारते उद्योगपर्वणि सञ्जययानपर्वणि चतुर्विंशोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-२४-४ गरीयानिति ॥॥॥
५-२४-५ ॥॥॥॥॥
५-२४-७ अनागतं अज्ञातं अदृष्टमित्यर्थः ॥

उद्योगपर्व - अध्याय ०२५
॥ श्रीः ॥
५.२५. अध्यायः २५

Mahabharata - Udyoga Parva - Chapter Topics

सञ्जयेन युद्धनिन्दापूर्वकं पाण्डवैः शमस्वीकारस्य
भीष्मधृतराष्ट्राद्यभिमतत्वकथनम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-२५-० (३२४३८)
युधिष्ठिर उवाच। ५-२५-०क्ष् (३४२५)
समागताः पाण्डवाः सृञ्जयाश्च
जनार्दनो युयुधानो विराटः ।

यत्ते वाक्यं धृतराष्ट्रानुशिष्टं
गावल्गणे ब्रूहि तत्सूतपुत्र ॥ ५-२५-१ (३२४३९)
संजय उवाच। ५-२२-२क्ष् (३४२६)
अजातशत्रुं च वृकोदरं च
धनञ्जयं माद्रवतीसुतौ च ।
आमन्त्रये वासुदेवं च शौरिं
युयुधानं चेकितानं विराटम् ॥ ५-२५-२ (३२४४०)
पञ्चालानामधिपं चैव वृद्धं
धृष्टद्युम्नं पार्षतं याज्ञसेनिम् ।
सर्वे वाचं शृणुतेमां मदीयां
वक्ष्यामि यां भूतिमिच्छन्कुरूणाम् ॥ ५-२५-३ (३२४४१)
शमं राजा धृतराष्ट्रोऽभिनन्द-
न्नयोजयत्त्वरमाणो रथं मे ।
सभ्रातृपुत्रस्वजनस्य राज्ञ-
स्तद्रोचतां पाण्डवानां शमोऽस्तु ॥ ५-२५-४ (३२४४२)
सर्वैर्धर्मैः समुपेतास्तु पार्थाः
संस्थानेन मार्दनेवार्जवेन ।
जाताः कुले ह्यनृशंसा वदान्या
हीनिषेवाः कर्मणां निश्चयज्ञाः ॥ ५-२५-५ (३२४४३)
न युज्यते कर्म युष्मासु हीनं
सत्वं हि वस्तादृशं भीमसेनाः ।
उद्गासते ह्यञ्जनबिन्दुवत्त-
च्छुभ्रे वस्त्रे यद्भवेत्किल्बिषं वः ॥ ५-२५-६ (३२४४४)
सर्वक्षयो दृश्यते यत्र कृत्स्नः
पापोदयो भावसंस्थः कुरूणाम् ।
कस्तत्र कुर्याञ्जातु कर्म प्रजानन्
पराजयो यत्र समो जयश्च ॥ ५-२५-७ (३२४४५)
ते वै धन्या यैः कृतं ज्ञातिकार्यं
ते वै पुत्राः सुहृदो बान्धवाश्च ।
उपक्रुष्टं जीवितं सन्त्यजेयु-
र्यतः कुरूणां नियतो वै भवः स्यात् ॥ ५-२५-८ (३२४४६)
ते चेत्कुरूननुशिष्याथ पार्था
निर्णीय सर्वान्द्विषतो निगृह्य ।
समं वस्तज्जीवितं मृत्युन स्या-
द्यज्जीवध्वं ज्ञातिवधेन साधु ॥ ५-२५-९ (३२४४७)
को ह्येव युष्मान्सह केशवेन

सचेकितानान्पार्षतबाहुगुप्तान् ।
ससात्यकीन्विषहेत प्रजेतुं
लब्ध्वाऽपि देवान्सचिवान्सहेन्द्रान् ॥ ५-२५-१० (३२४४८)
को वा कुरून्द्रोणभीष्माभिगुप्ता-
नश्वत्थाम्ना शल्यकृपादिभिश्च ।
रणे विजेतुं विषहेत राजन्
राधेयगुप्तान्सह भूमिपालैः ॥ ५-२५-११ (३२४४९)
महद्बलं धार्तराष्ट्रस्य राज्ञः
को वै शक्तो हन्तुमक्षीयमाणः ।
सोऽहं जये चैव पराजये च
निःश्रेयसं नाधिगच्छामि किंचित् ॥ ५-२५-१२ (३२४५०)
कथं हि नीचा इव दौष्कुलेया
निर्धर्मार्थं कर्म कुर्युश्च पार्थाः ।
सोऽहं प्रसाद्य प्रणतो वासुदेवं
पञ्चालानामधिपं चैव वृद्धम् ॥ ५-२५-१३ (३२४५१)
कृताञ्जलिः शरणं वः प्रपद्ये
कथं स्वस्ति स्यात्कुरुसृञ्जयानाम् ।
न ह्येवमेवं वचनं वासुदेवो
धनञ्जयो वा जातु किंचिन्न कुर्यात् ॥ ५-२५-१४ (३२४५२)
प्रणान्दद्याद्याचमानः कुतोऽन्य-
देतद्विद्वन्साधनार्थं ब्रवीमि ।
एतद्राज्ञो भीष्मपुरोगमस्य
मतं यद्वः शान्तिरिहोत्तमा स्यात् ॥ ॥ ५-२५-१५ (३२४५३)

इति श्रीमन्महाभारते उद्योगपर्वणि सञ्जययानपर्वणि
पञ्चविंशोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-२५-४ रथमयोजयत् । इह आगन्तुम्। राज्ञः तत् वचनं पाण्डवानां
रोचतां ततश्च शमोऽस्तु ॥
४ ॥
५-२५-५ संस्थानेनाकारेण । मार्दवेन कृपया। आर्जवेन
अकौटिल्येन। अनृशंसाः अनुग्राः । ह्रीनिषेवाः लज्जापरायणाः ॥
५ ॥
५-२५-६ हीनं हिंस्रं सत्त्वं बुद्धिसत्वं साधुत्वं वा । भीमसेनाः
भीषणसैन्याः ॥

६ ॥
५-२५-७ यत्र सङ्ग्रामे भावसंस्थः स इति शेषः ॥
७ ॥
५-२५-८ ज्ञातीनां दुर्योधनादीनां कार्यं घोषयात्रायां गन्धर्वेभ्यो
मोचनादिकं उपक्रुष्टं निन्दितम् ॥
८ ॥
५-२५-९ निर्णीय निश्चयं कृत्वा । निगृह्य हत्वेत्यर्थः ॥
९ ॥
५-२५-१२ निःश्रेयसं निश्चयम् ॥
१२ ॥
५-२५-१३ निर्धर्मार्थं धर्मार्थयोर्विरुद्धं कम कथं कुर्युः
। प्रणतः अस्मीति शेषः ॥
१३ ॥
५-२५-१४ साधनार्थं संधिकार्यस्य सिद्ध्यर्थं ब्रवीमि नतु युष्मान्
भीषयामीत्यर्थः ॥
१५ ॥

उद्योगपर्व - अध्याय ०२६
॥ श्रीः ॥
५.२६. अध्यायः २६

Mahabharata - Udyoga Parva - Chapter Topics
युधिष्ठिरेण स्वपरयोः शुभाशुभाभिसन्धिकथनपूर्वकं
स्वस्याजय्यत्वमभिधाय इन्द्रप्रस्थे राज्यदाने शान्तिकथनम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-२६-० (३२४५४)
युधिष्ठिर उवाच। ५-२६-०क्ष् (३४२७)
कां नु वाचं सञ्जय मे शृणोषि ।
युद्धैषिणीं येन युद्धाद्बिभेषि ।
अयुद्धं वै तात युद्धान्नरीयः
कस्तल्लब्ध्वा जातु युद्ध्येत सूत ॥ ५-२६-१ (३२४५५)
अकुर्वतश्चेत्पुरुषस्य सञ्जय
सिद्ध्येत्सङ्कल्पो मनसा यं यमिच्छेत् ।
न कर्म कुर्याद्विदितं ममैत-
दन्यत्र युद्धाद्बहु यल्लघीयः ॥ ५-२६-२ (३२४५६)

कुतो युद्धं जातु नरोऽवगच्छे-
त्को देवशप्तो हि वृणीत युद्धम् ।
सुखैषिणः कर्म कुर्वन्ति पार्था
धर्मादहीनं यच्च लोकस्य पथ्यम् ॥ ५-२६-३ (३२४५७)
धर्मोदयं सुखमाशंसमानाः
कृच्छ्रोपायं तत्त्वतः कर्म दुःखम् ।
सुखं प्रेप्सुर्विजिघांसुश्च दुःखं
कर्मारभेद्यच्च धर्मानपेतम् ॥ ५-२६-४ (३२४५८)
क इन्द्रियाणां प्रीतिवशानुरानां
कर्माभिज्ञः स्वशरीरं दुनोति ।
यया प्रमुक्तो न करोति दुःखं
तृष्णां त्यजेत्सर्वधर्मादपेताम् ॥ ५-२६-५ (३२४५९)
यथेध्यमानस्य समिद्धतेजसो
भूयो बलं वर्धते पावकस्य ।
कामार्थलाभेन तथैव भूयो
न तृप्यते सर्पिषेवाग्निरिद्धः ।
संपश्येमं भोगचयं महान्तं
सहास्माभिर्धृतराष्ट्रस्य राज्ञः ॥ ५-२६-६ (३२४६०)
नाश्रेयानीश्वरो विग्रहाणां
नाश्रेयान्वै गीतशब्दं श्रृणोति ।
नाश्रेयान्वै सेवते माल्यगन्धा-
न्न चाप्यश्रेयाननुलेपनानि ॥
नाश्रेयान्वै प्रावारान्संविवस्ते
कथं त्वस्मान्संप्रणुदेत्कुरुभ्यः ॥ ५-२६-७ (३२४६१)
अत्रैव स्यादवुधस्यैव कामः ।
प्रायः शरीरे हृदयं दुनोति ॥ ५-२६-८ (३२४६२)
स्वयं राजा विषमस्थः परेषु
सामर्थ्यमन्विच्छति तन्न साधु ।
यथाऽऽत्मनः पश्यति वृत्तमेव
तथा परेतामपि सोऽभ्युपैति ॥ ५-२६-९ (३२४६३)
आसन्नमग्निं तु निदाघकाले
गम्भीरकक्षे गहने विसृज्य ।
यथा विवृद्धं वायुवशेन शोचे-
त्क्षेमं मुमुक्षुः शिशिरव्यपाये ॥ ५-२६-१० (३२४६४)
प्राप्तैश्वर्यो धृतराष्ट्रोऽद्य राजा
लालप्यते सञ्जय कस्य हेतोः ।

प्रगृह्य दुर्बुद्धिमनार्जवे रतं
पुत्रं मन्दं मूढममन्त्रिणं तु ॥ ५-२६-११ (३२४६५)
अनाप्तवच्चाप्ततमस्य वाचः
सुयोधनो विदुरस्यावमत्य ।
सुतस्य राजा धृतराष्ट्रः प्रियैषी
संबुध्यमानो विशतेऽधर्ममेव ॥ ५-२६-१२ (३२४६६)
मेधाविनं ह्यर्थकामं कुरूणां
बहुश्रुतं वाग्मिनं शीलवन्तम् ।
स तं राजा धृतराष्ट्रः कुरुभ्यो
न सस्मार विदुरं पुत्रकाम्यात् ॥ ५-२६-१३ (३२४६७)
मानघ्नस्यासौ मानकामस्य चेर्षोः
संरम्भिणश्चार्थधर्मातिगस्य ।
दुर्भाषिणो मन्युवशानुगस्य
कामात्मनो दौर्हृदैर्भावितस्य ॥ ५-२६-१४ (३२४६८)
अनेयस्याश्रेयसो दीर्घमन्यो-
र्मित्रद्रुहः सञ्जय पापबुद्धेः ।
सुतस्य राजा धृतराष्ट्रः प्रियैषी
प्रपश्यमानः प्राजहाद्धर्मकामौ ॥ ५-२६-१५ (३२४६९)
तदैव मे सञ्जय दीव्यतोऽभू-
न्मतिः कुरूणामागतः स्यादभावः ।
काव्यां वाचं विदुरो भाषमाणो
न विन्दते यद्धार्तराष्ट्रात्प्रशंसाम् ॥ ५-२६-१६ (३२४७०)
क्षत्तुर्यदा नान्ववर्तन्त बुद्धिं
कृच्छ्रं कुरून्सूत तदाऽभ्याजगाम ।
यावत्प्रज्ञामन्ववर्तन्त तस्य
तावत्तेषां राष्ट्रवृद्धिर्बभूव ॥ ५-२६-१७ (३२४७१)
तदर्थलुब्धस्य निबोध मेऽद्य
ये मन्त्रिणो धार्तराष्ट्रस्य सूत ।
दुःशासनः शकुनिः सूतपुत्रो
गावल्गणे पश्य संमोहमस्य ॥ ५-२६-१८ (३२४७२)
सोऽहं न पश्यामि परीक्षमाणः
कथं स्वस्ति स्यात्कुरुसृञ्जयानाम् ।
आत्तैश्वर्यो धृतराष्ट्रः परेभ्यः
प्रव्राजिते विदुरे दीर्घदृष्टौ ॥ ५-२६-१९ (३२४७३)
आशंसते वै धृतराष्ट्रः सपुत्रो
महाराज्यमसपत्नं पृथिव्याम् ।

तस्मिञ्शमः केवलं नोपलभ्यः
सर्वं स्वकं मङ्गते मन्यतेऽर्थम् ॥ ५-२६-२० (३२४७४)
यत्तत्कर्णो मन्यते पारणीयं
युद्धे गृहीतायुधमर्जुनं वै ।
आसंश्च युद्धानि पुरा महान्ति
कथं कर्णो नाभवद्द्वीप एषाम् ॥ ५-२६-२१ (३२४७५)
कर्णश्च जानाति सुयोधनश्च
द्रोणश्च जानाति पितामहश्च ।
अन्ये च ये कुग्वस्तत्र सन्ति
यथाऽर्जुनान्नाम्त्यपरो धनुर्धरः ॥ ५-२६-२२ (३२४७६)
जानन्त्येतन्कुरवः सर्व एव
ये चाप्यन्ये भूमिपालाः समेताः ।
दुर्योधने राज्यमिहाभवद्यथा
अरिन्दमे फाल्गुनेऽविद्यमाने ॥ ५-२६-२३ (३२४७७)
तेनानुबन्धं मन्यते धार्तराष्ट्रः
शक्यं हर्तुं पाण्डवानां ममत्वम् ।
किरीटिना तालमात्रायुधेन
तद्वदिना संयुगं तत्र गत्वा ॥ ५-२६-२४ (३२४७८)
गाण्डीवविष्फारितशब्दमात्रं
श्रुत्वैव ते धार्तराष्ट्रा म्रियन्ते ।
क्रुद्धं न चेदीक्षते भीमसेनं
सुयोधनो मन्यते सिद्धमर्थम् ॥ ५-२६-२५ (३२४७९)
इन्द्रोऽप्येतन्नोत्सहेत्तात हर्तु-
मैश्वर्यं नो जीवति भीमसेने ।
धनञ्जये नकुले चैव सूत
तथा वीरे सहदेवेऽसहिष्णौ ॥ ५-२६-२६ (३२४८०)
सचेदेतां प्रतिपद्येत बुद्धिं
वृद्धो राजा सह पुत्रेण सूत ।
एवं रणे पाण्डवकोपदग्धा
न नश्येयुः सञ्जय धार्तराष्ट्राः ॥ ५-२६-२७ (३२४८१)
जानामि त्वं क्लेशमस्मासु वृत्तं
त्वां पूजयन्मञ्जयाहं क्षमेयम् ।
वच्चास्माकं कौरवैर्भृतपूर्वं
या नो वृत्तिधार्तराष्ट्रे तदाऽऽसीत् ॥ ५-२६-२८ (३२४८२)
अद्यापि सा तत्र तथैव वर्ततां
यान्ति गमिष्यामि यथा न्वमात्थ ।

द्वन्द्वाप्रव्ये भवतु ममैव राज्यं
सूयोधनो यच्छतु भाग्नाग्य्यः ॥ ॥ ५-२६-२९ (३२४८३)

इति श्रीमन्महाभारते उद्योगपर्वणि सञ्जययानपर्वणि षड्विंशोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-२६-३ अहीनं अनपगतम् ॥
३ ॥
५-२६-६ उक्तमर्थं प्रकृते योजयति संपश्येति । अस्माभिरित्यत्र
धार्तराष्ट्रान् अन्तर्भाव्याह । पञ्चाधिकेन पुत्रशतेन सह
धृतराष्ट्रस्य भोगं महान्तं पश्य। अथापि कृत्स्नं स्वस्यैव
भवत्विति बुद्ध्याऽस्मान् राज्याद्दूरीकृत्य ततो भोगात् तृप्तिं न
लभत इति भावः ॥
६ ॥
५-२६-७ पितृव्यनिन्दादोषाद्भीतः पुनराह नाश्रेयानिति । यः
पुण्यवत्तरः स विग्रहाणामीश्वरो भवति परैः सह विरोधं
कृत्वा स्वोत्कर्षं करोति। अन्यस्तु तेनैव नश्यति। अतः स
पुण्यवत्तर एव। अस्मद्दोषात्तु वयं वने दुःखमनुभवामो
नतु परापराधेनेति भावः । प्रावारान् दिव्यवासांसि संविवस्ते
परिधत्ते। अन्यधा अश्रेयांश्चेद्राजा तर्हि अस्मान् कुरुभ्यः कथं
संप्रणुदेत् दूरीकुर्यात्। शत्रूणां राज्याद्भ्रंशनं हि पुण्यवतामेव
कर्म नाश्रेयसामिति भावः ॥
७ ॥
५-२६-८ अत्रेति यद्यप्येवं तथापि अन्तर्दाहकरोऽयं कामः अबुधस्य
दुर्योधनादेरेव उचितो न बुधस्यास्मदादेरित्यर्थः । शरीरे
शरीरमध्ये स्थितं हृदयं दुनोति खेदयति ॥
८ ॥
५-२६-९ अबुधत्वमेवाह स्वयमिति । विषमस्थः संकटस्थः सन् परेषु
कर्णादिषु आत्मनो वृत्तं अशक्तत्वं तथा परेषां कर्णादीनामपि स
दुर्योधनोऽभ्युपैति ॥
९ ॥
५-२६-१० गम्भीरकक्षे बहुतृणे गहने वने । क्षेमं शोचेत्
मम सुखं नास्तीति शोकं कुर्यात्। मुमुक्षुः तस्माद्दाहादात्मानं
मोचयितुमिच्छुः । शिशिरव्यापाये वसन्ते। तत्रापि निदाघकाले दाहकाले
मध्याह्ने ॥
१० ॥

५-२६-११ लालप्यते दीनवद्भाषते । मन्दं अभाग्यम् ॥
५-२६-१२ विदुरस्य वाचोऽवमत्य सुतस्य प्रियैषी अधर्ममेव
संविशते आश्रयते ॥
५-२६-१३ कुरुभ्यः कुरूणां हितार्थम् । न सस्मार
नादृतवान् । पुत्रकाम्यात् पुत्रलोभात् ॥१३ ॥
५-२६-१४ असौ राजा सुतस्य प्रियैषी धर्मकामौ प्राजहात् त्यक्तवानिति
द्वयोः संबन्धः । ईर्षोः परोत्कर्षासहिष्णोः । संरम्भिणः क्रोधिनः
मन्युवशानुगस्य दैन्यभाजां कर्णादीनामनुगस्य । दौर्हृदैः पापैः
भावितस्य पूजितस्य ॥
१४ ॥
५-२६-१५ अनेयस्य अशिक्षणीयस्य । अश्रेय सः अभाग्यस्य प्रपश्यमानः
पश्यन्नपि ॥
१५ ॥
५-२६-२० तस्मिन् लुब्धे शमः न उपलभ्यः यः मद्गते मम वनंप्रति
गमने सति सर्वं स्वकमेवार्थं मन्यते इति योज्यम् ॥
२० ॥
५-२६-२१ पारणीयं जेतुं शक्यम् । युद्धानि गोग्रहदौ आसन् । द्वीपो
द्वीपवत् युद्धप्रवाहेण उह्यमानस्याश्रयः ॥
२१ ॥
५-२६-२४ अनुबन्धं बध्नातीति बन्धो राज्यादिः तमनुमूल्य वर्तमानं
पाण्डवानां ममत्वं धार्तराष्ट्रो हर्तुं शक्यमन्यते । किंकृत्वा
। तेन किरीटिना सह तत्र राज्ये निमित्ते सति संयुगं संग्रामं गत्वा
प्राप्य । तालो हस्तचतुष्टयं तद्वदिना धनुर्विद्यावेदिना ॥
२४ ॥
५-२६-२७ एतां बुद्धिं राज्यस्य अप्रदाने नाशोऽस्तीत्येवंरूपाम् ॥
२७ ॥
५-२६-२८ भूतपूर्वं भीमबन्धनजतुगृहदाहादि ॥
२८ ॥
५-२६- ५-२६- ५-२६- ५-२६- ५-२६-

उद्योगपर्व - अध्याय ०२७
॥ श्रीः ॥
५.२७. अध्यायः २७

Mahabharata - Udyoga Parva - Chapter Topics
सञ्जयेन युधिष्ठिरंप्रति युद्धे दोषोद्भावनपूर्वकं
परैभोगाप्रदानेपि शमाश्रयगम्यैव ॥॥क्थनम् ॥ १ ॥

५-२७-० (३२४८४)
सञ्जय उवाच। ५-२७-०क्ष् (३४२८)
धर्मनित्या पाण्डव ते विचेष्टा
लोके श्रुता दृश्यते चापि पार्थ ।
महाश्रावं जीवित चाप्यनित्यं
संपश्य त्वं पाण्डव मा व्यनीनशः ॥ ५-२७-१ (३२४८५)
नचेद्भागं कुरवोऽन्यत्र युद्धा-
त्प्रयच्छेरंस्तुभ्यमजातशत्रो ।
भैक्षचर्यामन्धकवृष्णिराज्ये
श्रेयो मन्ये न तु युद्धेन राज्यम् ॥ ५-२७-२ (३२४८६)
अल्पकालं जीवितं यन्मनुष्ये
महास्रावं नित्यदुःखं चलं च ।
भूयश्च तद्यशसो नानुरूपं
तस्मात्पापं पाण्डव मा कृथास्त्वम् ॥ ५-२७-३ (३२४८७)
कामा मनुष्यं प्रसजन्त एते
धर्मस्य ये विघ्नमूलं नरेन्द्र ।
पूर्वं नरस्तान्मतिमान्प्रणिघ्नन्
लोके प्रशंसां लभतेऽनवद्याम् ॥ ५-२७-४ (३२४८८)
निबन्धनी ह्यर्थतृष्णेह पार्थ
तामिच्छतां बाध्यते धर्म एव ।
धर्मं तु यः प्रणृणीते स बुद्धः
कामे गृध्नो हीयतेऽर्थानुरोधात् ॥ ५-२७-५ (३२४८९)
धर्मं कृत्वा कर्मणां तात मुख्यं
महाप्रतापः सवितेव भाति ।
हीनो हि धर्मेण महीमपीमां
लब्ध्वा नरः सीदति पापबुद्धिः ॥ ५-२७-६ (३२४९०)
वेदोऽधीतश्चरितं ब्रह्मचर्यं
यज्ञैरिष्टं ब्राह्मणेभ्यश्च दत्तम् ।
परं स्थानं मन्यमानेन भूय
आत्मा दत्तो वर्षपूगं सुखेभ्यः ॥ ५-२७-७ (३२४९१)
सुखप्रिये सेवमानोऽतिवेलं
योगाभ्यासे यो न करोति कर्म ।
वित्तक्षये हीनसुखोऽतिवेलं

दुःखं शेते कामवेगप्रणुन्नः ॥ ५-२७-८ (३२४९२)
एवं पुनर्ब्रह्मचर्याऽप्रसक्तो
हित्वा धर्मं यः प्रकरोत्यधर्मम् ।
अश्रद्दधत्परलोकाय मूढो
हित्वा देहं तप्यते प्रेत्य मन्दः ॥ ५-२७-९ (३२४९३)
न कर्मणां विप्रणाशोऽस्त्यमुत्र
पुण्यानां वाऽप्यथवा पापकानाम् ।
पूर्वं कर्तुर्गच्छति पुण्यपापं
पश्चात्त्वेनमनुयात्येव कर्ता ॥ ५-२७-१० (३२४९४)
न्यायोपेतं ब्राह्मणेभ्योऽथ दत्तं
श्रद्धापूतं गन्धरसोपपन्नम् ।
अन्वाहार्येषूत्तमदक्षिणेषु
तथारूपं कर्म विख्यायते ते ॥ ५-२७-११ (३२४९५)
इह क्षेत्रे क्रियते पार्थ कार्यं
न वै किंचित्क्रियते प्रेत्य कार्यम् ।
कृतं त्वया पारलोक्यं च कर्म
पुण्यं महत्सङ्गिरतिप्रशस्तम् ॥ ५-२७-१२ (३२४९६)
जहाति मृत्युं च जरां भयं च
न क्षुत्पिपासे मनसोऽप्रियाणि ।
न कर्तव्यं विद्यते तत्र किंचि-
दन्यत्र वै चेन्द्रियप्रीणनाद्धि ॥ ५-२७-१३ (३२४९७)
एवंरूपं कर्मफलं नरेन्द्र
मातापित्रोर्हृदयस्याप्रियेण ।
त्यज क्रोधं पाण्डव हर्षजं च
लोकावुभौ मा प्रहासीश्चिराया ॥ ५-२७-१४ (३२४९८)
अन्तं गत्वा कर्मणां या प्रशंसा
सत्यं दमं चार्जवमानृशंस्यम् ।
अश्वमेधं राजसूयं तथेष्ट्वा
पापस्यान्तं कर्मणो मा पुनर्गाः ॥ ५-२७-१५ (३२४९९)
तच्चेदेवं द्वेषरूपेण पार्थाः
करिष्यध्वं कर्म पापं चिराय ।
निवसध्वं वर्षपूगान्वनेषु
दुःखं वासं पाण्डवा धर्म एव ॥ ५-२७-१६ (३२५००)
प्रव्रज्यया यातयित्वा पुरस्ता-
दात्माधीनं यद्बलं ते तदाऽसीत् ।
नित्यं च वश्याः सचिवास्तवेमे

जनार्दनो युयुधाश्च वीरः ॥ ५-२७-१७ (३२५०१)
मत्स्यो राजा रुक्मरथः सपुत्रः
प्रहारिभिः सहपुत्रैर्विराटः ।
राजानस्ते ये विजिताः पुरस्ता-
त्त्वामेव ते संश्रयेयुः समस्ताः ॥ ५-२७-१८ (३२५०२)
महासहायः प्रतपन्बलस्थः
पुरस्कृतो वासुदेवार्जुनाभ्याम् ।
वरान्हनिष्यन्द्विषतो रङ्गमध्ये
व्यनेष्यथा धार्तराष्ट्रस्य दर्पम् ॥ ५-२७-१९ (३२५०३)
बलं कस्माद्धर्षयित्वा परस्य
निजान्कस्मात्कर्शयित्वा सहायान् ।
निरुष्य कस्माद्वर्षपूगान्वनेषु
युयुत्ससे पाण्डव हीनकाले ॥ ५-२७-२० (३२५०४)
अप्राज्ञो वा पाण्डव युद्ध्यमानो-
ऽधर्मज्ञो वा भूतिमथोऽभ्युपैति ।
प्रज्ञावान्वा बुद्ध्यमानोऽपि धर्मं
संस्तम्भाद्वा सोऽपि भूतेरपैति ॥ ५-२७-२१ (३२५०५)
नाधर्मे ते धीयते पार्थ बुद्धि-
र्न संरम्भात्कर्म चकर्थ पापम् ।
आत्थ किं तत्कारणं यस्य हेतोः
प्रज्ञाविरुद्धं कर्म चिकीर्षसीदम् ॥ ५-२७-२२ (३२५०६)
अव्याधिजं कटुकं शीर्षरोगि
यशोमुषं पापफलोदयं वा ।
सतां पेयं यन्न पिबन्त्यसन्तो
मन्युं महाराज पिब प्रशाम्य ॥ ५-२७-२३ (३२५०७)
पापानुबन्धं को नु तं कामयेत
क्षमैव ते ज्यायसी नोत भोगाः ।
यत्र भीष्मः शान्तनवो हतः स्या-
द्यत्र द्रोणः सहपुत्रो हतः स्यात् ॥ ५-२७-२४ (३२५०८)
कृपः शल्यः सौमदत्तिर्विकर्णो
विविंशतिः कर्णदुर्योधनौ च ।
एतान्हत्वा कीदृशं तत्सुखं स्या-
द्यद्विन्देथास्तदनुब्रूहि पार्थ ॥ ५-२७-२५ (३२५०९)
लब्ध्वाऽपीमां पृथिवीं सागरान्तां
जरामृत्यू नैव हि त्वं प्रजह्याः ।
प्रियाप्रिये सुखदुःखे च राज-

न्नैवं विद्वान्नैव युद्धं कुरु त्वम् ॥ ५-२७-२६ (३२५१०)
अमात्यानां यदि कामस्य हेतो-
रेवं युक्तं कर्म चिकीर्षसि त्वम् ।
अपक्रमेः स्वं प्रदायैव तेषां
मागास्त्वं वै देवयानात्पथोऽद्य ॥ ॥ ५-२७-२७ (३२५११)

इति श्रीमन्महाभारते उद्योगपर्वणि सञ्जययानपर्वणि सप्तविंशोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-२७-१ महान् श्रावः श्रवणं यण महाकीर्तीत्यर्थः । मा व्यनीनशः
क्रोधेन धार्तराष्ट्रन् मा नाशय ॥
१ ॥
५-२७-४ प्रसजन्ते स्पृशन्ति ॥
४ ॥
५-२७-५ गृध्नः स्पृहावान् ॥
५ ॥
५-२७-६ कर्मणां अर्थकामाद्यर्थानां मध्ये ॥
६ ॥
५-२७-७ परं स्थानं परलोकं मन्यमानेन मानयता । पर्षपूगं
वर्षगणम् । तत्रत्यसुखेभ्यस्तदर्थं त्वया आत्मापि दत्तः ॥
७ ॥
५-२७-८ सुखप्रिये भोगान् पुत्रादींश्च सेवमानः । योगाभ्यासे
चित्तवृत्तिनिरोधमभ्यसितुं कर्म आसनप्राणायामादिकं न करोति ॥
८ ॥
५-२७-९ धर्मं च यज्ञादिरूपं हित्वा यः अधर्ममेव प्रकरोति संचिनोति ॥
९ ॥
५-२७-१० कृतं कर्म भोगं विना आत्मज्ञानं विना वा न नश्यतीत्यर्थः ॥
१० ॥
५-२७-११ अन्वाहार्येष्वित्यनेन श्रौतमिष्ट्यादिकं लक्ष्यते । तत्रहि
अन्वाहार्यो दक्षिणात्वेन दीयते ॥
११ ॥
५-२७-१२ कार्यं धर्मः । प्रेत्य मृत्वा ॥
१२ ॥
५-२७-१३ परलोके कर्म नास्तीत्याह जहातीति ॥
१३ ॥
५-२७-१४ अत्र कर्म कुर्वन् कामवशादमुत्र फलं न प्रार्थयेतेत्यर्थः

। कर्मजं फलं त्यक्त्वा परेण वैराग्येण संपन्नो मोक्षार्थं
योगाभ्यासमेव कुरुष्व किं राज्येन बन्धुनाशलभ्येनेत्यर्थः ॥
१४ ॥
५-२७-१६ तच्चेदिति । भो पार्थाः भो पाण्डवाः तत्पापं कर्म
गोत्रवधरूपं द्वेषरूपेण चिराय प्रागेव चेत्करिष्यध्वं
तर्हि यद्वने वर्षपूगान् दुःखं वासं निवसध्वं तद्धर्म एवेति
यत्तत्पदाध्याहारेण योज्यम्। राज्यार्थं सर्वलोकनाशमिच्छतां भवतां
दुर्योधनेन यो वनवासः कारितः स धर्म एवेत्यर्थः ॥
१६ ॥
५-२७-१७ पुरस्तात् प्रव्रजनकाले एव यत् यतः पुरस्तादपि
एतद्बलं आत्माधीनमेवासीत् । ज्ञातिवधेनापि राज्यसुखमावश्यकं
चेत्तर्हि पूर्वमेव सहायसत्वात्कुतो न युद्धं कृतमिति
एतदादिश्लोकचतुष्टयर्थः ॥
१७ ॥
५-२७-२० हीनकाले गते काले इत्यर्थः ॥
२० ॥
५-२७-२१ सर्वथापि युद्धं न कर्तव्यं
जयपराजययोरव्यवस्थितत्वादित्याह अप्राह इति । भूतेरपैति दैवादिति
शेषः ॥
२१ ॥
५-२७-२३ अव्याधिजं कटुकं पित्तादिकं विनाप्यरोचकम् । यशोमुषं
यशोहरम्। पेयं गिलनीयम्। मन्युं क्रोधम्। प्रशाम्य शान्तो भव ॥
२३ ॥
५-२७-२७ देवयानात्पथोऽर्चिरादिमार्गादपुनरावृत्तिफलात् गोत्रद्रोहेण
मागा इत्यर्थः ॥
२७ ॥

उद्योगपर्व - अध्याय ०२८
॥ श्रीः ॥
५.२८. अध्यायः २८

Mahabharata - Udyoga Parva - Chapter Topics
युधिष्ठिरेण सञ्जयंप्रति धर्माधर्मनिर्णयस्य इतरासाधारणतया
स्वस्य धर्मरहस्यज्ञश्रीकृष्णवचनानुययित्वकथनम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-२८-० (३२५१२)
युधिष्ठिर उवाच। ५-२८-०क्ष् (३४२९)
असंशयं सञ्जय सत्यमेत-
द्धर्मो वरः कर्मणां यत्त्वमात्थ ।
ज्ञात्वा तु मां सञ्जय गर्हयेस्त्वं
यदि धर्मं यद्यधर्मं चरामि ॥ ५-२८-१ (३२५१३)
यत्राधर्मो धर्मरूपाणि धत्ते
धर्मः कृत्स्नो दृश्यतोऽधर्मरूपः ।
बिभ्रद्धर्मो धर्मरूपं तथा च
विद्वांसस्तं संप्रपश्यन्ति बुद्ध्या ॥ ५-२८-२ (३२५१४)
एवं तथैवापदि लिङ्गमेत-
द्धर्माधर्मौ नित्यवृत्ती भजेताम् ।
आद्यं लिङ्गं यस्य तस्य प्रमाण-
मापद्धर्मं सञ्जय तं निबोध ॥ ५-२८-३ (३२५१५)
लुप्तायां तु प्रकृतौ येन कर्म
निष्पादयेत्तत्परीप्सेद्विहीनः ।
प्रकृतिस्थश्चापदि वर्तमान
उभौ गर्ह्यौ भवतः सञ्जयैतौ ॥ ५-२८-४ (३२५१६)
अविनाशमिच्छतां ब्राह्मणानां
प्रायश्चित्तं विहितं यद्विधात्रा ।
संपश्येथाः कर्मसु वर्तमानान्
विकर्मस्थान्सञ्जय गर्हयेस्त्वम् ॥ ५-२८-५ (३२५१७)
मनीषिणां सत्त्विच्छेदनाय
विधियते सत्सु वृत्तिः सदैव ।
अब्राह्मणाः सन्ति तु ये न वैद्याः
सर्वोत्सङ्गं साधु मन्येत तेभ्यः ॥ ५-२८-६ (३२५१८)
तदध्वानः पितरो ये च पूर्वे
पितामहा ये च तेभ्यः परेऽन्ये ।
यज्ञैषिणो ये च हि कर्म कुर्यु-
र्नान्यं ततो नास्तिकोऽस्मीति मन्ये ॥ ५-२८-७ (३२५१९)
यत्किंचनेदं वित्तमस्यां पृथिव्यां
यद्देवानां त्रिदशानां परं यत् ।
प्राजापत्यं त्रिदिवं ब्रह्मलोकं
नाधर्मतः सञ्जय कामयेयम् ॥ ५-२८-८ (३२५२०)
धर्मेश्वरः कुशलो नीतिमांश्चा-
प्युपासिता ब्राह्मणानां मनीषी ।

नानाविधांश्चैव महाबलांश्च
राजन्यभोजाननुशास्ति कृष्णः ॥ ५-२८-९ (३२५२१)
यदि ह्यहं विसृजत्साम गर्ह्यो
नियुध्यमानो यदि जह्यां स्वधर्मम् ।
महायशाः केशवस्तद्ब्रवीतु
वासुदेवस्तूभयोरर्थकामः ॥ ५-२८-१० (३२५२२)
शैनेयोऽयं चेदयश्चान्धकाश्च
वार्ष्णेयभोजाः कुकुराः सृञ्जयाश्च ।
उपासीना वासुदेवस्य बुद्धिं
निगृह्य शत्रून्सुहृदो नन्दयन्ति ॥ ५-२८-११ (३२५२३)
वृष्ण्यन्धका ह्युग्रसेनादयो वै
कृष्णप्रणीताः सर्व एवेन्द्रकल्पाः ।
मनस्विनः सत्यपरायणाश्च
महाबला यादवा भोगवन्तः ॥ ५-२८-१२ (३२५२४)
काश्यो बभ्रुः श्रियमुत्तमां गतो
लब्ध्वा कृष्णं भ्रातरमीशितारम् ।
यस्मै कामान्वर्षति वासुदेवो
ग्रीष्मात्यये मेघ इव प्रजाऽभ्यः ॥ ५-२८-१३ (३२५२५)
ईदृशोऽयं केशवस्तात विद्वान्
विद्धि ह्येनं कर्मणां निश्चयज्ञम् ।
प्रियश्च नः साधुतमश्च कृष्णो
नातिक्रामे वचनं केशवस्य ॥ ५-२८-१४ (३२५२६)

इति श्रीमन्महाभारते उद्योगपर्वणि सञ्जययानपर्वणि अष्टाविंशोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-२८-२ धर्माधर्मपरीक्षायां त्रैविध्यमाह यत्रेति । यत्र
पुरुषे दम्भादिमति अधर्मः अभिचारार्थं मन्त्रजपादिः धर्म
इत्येवान्ये जानन्ति। तथा प्रच्छन्नयोगिनि दत्तात्रेयादौ धर्मो
रागद्वेषादिशून्यतारूपो योगधर्मोऽपि उन्मत्तवदाचरणादधर्मरूप इव
दृश्यते। यत्र वसिष्ठादौ धर्मः धर्मरूप एव। यद्यपि चाण्डालादौ
अधर्मोऽप्यधर्मरूप एवास्ति तथापि तस्यानुपादेयत्वान्त्रयमेव
विचार्यम्। एतच्च त्वथापि विदुषा मयि विचार्यमित्याशयः ॥
२ ॥
५-२८-३ आपत्कालवशाद्धर्माधर्मयोर्व्यत्यासो जायत इत्याह
एवमिति । एतदेवंरूपं लोकप्रत्यक्षं लिङ्गं ब्राह्मणस्य

स्वाध्यायप्रवचनादि। क्षत्रियस्य शौर्यादि। वैश्यस्य
कृष्यादि । तत्तथैव यथोक्तमेव। तथापि नित्यवृत्ती
नित्यं वर्तेते तौ नित्यवृत्ती धर्माधर्मौ तल्लिङ्गं
भजेताम्। अयं भावः। क्षत्रलिङ्गं ब्राह्मणवैश्ययोरापदि
धर्मः अनापद्यधर्मः । तथा चैकस्यैव लिङ्गस्य वर्णान्तरे
अवस्थाभेदाद्धर्मत्वमधर्मत्वं च नित्यमिति। तत्रापि विशेषमाह
आद्यमिति। आद्यं ब्राह्मणलिङ्गं याजनादि यस्यास्ति ब्राह्मणस्य तस्यैव
तत् प्रमाणं अव्यभिचारि। आपद्यपि क्षत्रियेण याजनाध्यापनादिकं
न कर्तव्यमित्यर्थः। एवं विधं तं आपद्धर्मं शास्त्रान्निबोध
बुध्यस्व ॥
३ ॥
५-२८-४ प्रकृतिः जीविकाहेतुभूतं धनम् । तच्च क्षत्रियस्य
भूमिशस्त्रादिकम्। वैश्यस्य धपश्वादिकम्। तस्मिन्सर्वात्मना नष्टे
सति येन कर्म संध्योपासनादिकं निष्पादयेत् तत् भिक्षाटनादिकमपि
परिप्सेत्कर्तुमिच्छेत्। अन्यथा जीविकाया अभावात्कर्मलोपः
प्राणनाशश्च स्यादतोऽत्यन्तापदि तावान् विप्रधमाऽपीतरैरनुष्ठेय
एव। प्रकृतिस्थश्चेति। आपदि आपद्धर्मे प्रकृतिस्थोऽपि
यद्यापद्धर्ममनुसरेत्स लोभाद्गर्ह्यः। आपत्स्थोऽपि यदि प्राकृतं
धरममनुसरेत्स जीवनलोपात् कुटुम्बहिंसया च गर्ह्य इत्यर्थः। यो
न कर्मेति को डो पाठः ॥
४ ॥
५-२८-५ यत् यस्माद्धेतोः । विधात्रा अविनाशं
ब्राह्मण्यविनाशाभावमिच्छतां ब्राह्मणानां आपदुत्तीर्णानां प्रायश्चित्तं
विहितम्। तस्माद्धएतोरापदि अन्यस्यान्यधर्माश्रयणं प्रसक्तमेवेति
ज्ञायते। अत एव एवचक्रायागस्माभिः कृतं भिक्षाटनं
नानुमितमित्यर्थः। एवमनापदि कर्मसु वर्तमानान् आपदि च
विकर्मस्थान् संपश्येथाः सम्यगेवेदमिति पश्येथाः। अन्यथा तु
आपदि कर्मस्थान् आत्मपरहिंस्रान् अनापदि विकर्मस्थांश्चतिलुब्धान्
विहर्गयेस्त्वम्। आपद्येतान्कर्मसु इति को डो पाठः ॥
५ ॥
५-२८-६ किंच मनीषिणां मनसः निग्रहं नाशं कर्तुमिच्छताम्
। ईष गतिहिंसादर्शनेष्वित्यस्य रूपम्। सत्त्विच्छेदनाय
सत्त्वस्य बुद्धिसत्त्वस्य चिदात्मना सह एकलोलीभूतस्य
विच्छेदनाय मुञ्जेषीकान्यायेन पृथक्करणाय सत्सु सतां
गृहेषु वृत्तिर्जीविका शास्त्रे विधीयते। वेदानिमं लोकममुं
च परित्यज्यात्मनात्मानमन्विच्छेदितिश्रुत्यात्मान्वेषणाय

सर्वसंन्यासपूर्वकं भिक्षाचर्यविधानात्। न ब्राह्मी वृत्तिः
कस्यापि निन्द्या। येतु अब्रह्माणा अपि वैद्याः विद्यानिष्ठाः न भवन्ति
तेषां भिक्षाचर्यस्याविधानात् तेभ्यः तेषामर्थे सर्वोत्सङ्गं
सर्वेषामुत्सङ्गं समीपं स्वधर्मसंयोगं आपदनापदोरुचितं साधु
मन्येत। सर्वोच्छेदमिति को डो पाठे तेभ्यस्तेषामर्थे भिक्षाद्यटनं
सर्वधर्मोच्छेदाय मन्येतेत्यर्थः ॥
६ ।५-२८-७ तदधान इति। पित्रादयः यज्ञैषिणो ये ते सर्वे
तदध्वानः स एव मयोक्तोऽध्वा मार्गो येषां ते तदध्वानोऽभूवन्। हि
प्रसिद्धम्। ये च कर्म न कुर्युः संन्यासिन इत्यर्थः। ते सर्वे
तदध्वानः। अहमपि आस्तिकेऽस्मिति ततोऽन्यं अध्वानं न मन्ये ॥
७ ॥
५-२८-९ धर्मेश्वरः धर्मफलस्य दाता ॥
९ ॥
५-२८-१२ कृष्णप्रणीताः कृष्णेनैव नीतिपथं नीताः ॥
१२ ॥

उद्योगपर्व - अध्याय ०२९
॥ श्रीः ॥
५.२९. अध्यायः २९

Mahabharata - Udyoga Parva - Chapter Topics
श्रीकृष्णेन स्वस्य कुरुपाण्डेषु तुल्यवृत्तित्वकथनपूर्वकं
कर्मणामवश्यानुष्ठेयत्वसमर्थनम् ॥ १ ॥
तथा सञ्जयंप्रति दुर्योधनादिकृत्यनयस्मारणपूर्वकं स्वस्य
सन्ध्यर्थं तत्रागमनकथनम् ॥ २ ॥
तथा पाण्डवानां शमाशमान्यतरपक्षानुसारित्वकथनपूर्वकं
धृतराष्ट्रंप्रति यथाभिलषितकरणकथनचोदनम् ॥ ३ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-२९-० (३२५२७)
वासुदेव उवाच। ५-२९-०क्ष् (३४३०)
अविनाशं सञ्जय पाण्डवाना-
मिच्छाम्यहं भूतिमेषां प्रियं च ।
तथा राज्ञो धृतराष्ट्रस्य सूत
समाशंसे बहुपुत्रस्य वृद्धिम् ॥ ५-२९-१ (३२५२८)
कामो हि मे सञ्जय नित्यमेव

नान्यद्ब्रूयां तान्प्रति शाम्यतेति ।
राज्ञश्च हि प्रियमेतच्छृणोमि
मन्ये चैतत्पाण्डवानां समक्षम् ॥ ५-२९-२ (३२५२९)
सुदुष्करस्तत्र शमो हि नूनं
प्रदर्शितः सञ्जय पाण्डवेन ।
यस्मिन्गृद्धो धृतराष्ट्रः सपुत्रः
कस्मादेषां कलहो नावमूर्च्छेत् ॥ ५-२९-३ (३२५३०)
न त्वं धर्मं विचरं सञ्जयेह
मत्तश्च जानामि युधिष्ठिराच्च
अथो कस्मात्सञ्जय पाण्डवस्य
उत्साहिनः पूरयतः स्वकर्म ॥ ५-२९-४ (३२५३१)
यथाख्यातमावमतः कुटुम्बे
पुरा कस्मान्साधुविलोपमात्थ ।
अस्मिन्विधौ वर्तमाने यथाव-
दुच्चावचा मतयो ब्राह्मणानाम् ॥ ५-२९-५ (३२५३२)
कर्मणाऽऽहुः सिद्धिमेके परत्र
हिन्वा कर्म विद्यया सिद्धिमेके ।
नाभुञ्जानो भक्ष्यभोज्यस्य तृप्ये-
द्विद्वानपीह विहितं ब्राह्मणानाम् ॥ ५-२९-६ (३२५३३)
या वै विद्याः साधयन्तीह कर्म
तासां फलं विद्यते नेतरासाम् ।
तत्रेह वै दृष्टफलं तु कर्म
पीत्वोदकं शाम्यति तृष्णयाऽऽर्तः ॥ ५-२९-७ (३२५३४)
सोऽयं विधिर्विहितः कर्मणैव
संवर्तते सञ्जय तत्र कर्म ।
तत्र योऽन्यत्कर्मणः साधु मन्ये-
न्मोघं तस्यालपितं दुर्बलस्य ॥ ५-२९-८ (३२५३५)
कर्मणाऽमी भान्ति देवाः परत्र
कर्मणैवेह प्लवते मातरिश्वा ।
अहोरात्रे विदधत्कर्मणैव
अतन्द्रितो नित्यमुदेति सूर्यः ॥ ५-२९-९ (३२५३६)
मासार्धमासानथ नक्षत्रयोगा-
नतन्द्रितश्चन्द्रमाश्चाभ्युपैति ।
अतन्द्रितो दहते जातवेदाः
समिद्धयमानः कर्म कुर्वन्प्रजाभ्यः ॥ ५-२९-१० (३२५३७)
अतन्द्रिता भारमिमं महान्तं

बिभर्ति देवी पृथिवी वलेन ।
अतन्द्रिताः शीघ्रसपो वहन्ति
सन्तर्पयन्त्यः सर्वभूतानि नद्यः ॥ ५-२९-११ (३२५३८)
अतन्द्रितो वर्षति भूरितेजाः
सन्नादयन्नन्तरिक्षं दिशश्च ।
अतन्द्रितो ब्रह्मचर्यं चचार
श्रेष्ठत्वमिच्छन्बलभिद्देवतानाम् ॥ ५-२९-१२ (३२५३९)
हित्वा सुखं मनसश्च प्रियाणि
तेन शक्रः कर्मणा श्रैष्ठ्यमाप ।
सत्यं धर्मं पालयन्नप्रमत्तो
दमं तितिक्षां समतां प्रियं च ॥ ५-२९-१३ (३२५४०)
एतानि सर्वाण्युपसेवमानो
यो देवराज्यं मघवान्प्राप मुख्यम् ।
बृहस्पतिर्ब्रह्मचर्यं चचार
समीहितः संशिमात्मा यथावत् ॥ ५-२९-१४ (३२५४१)
हित्वा सुख प्रतिरुध्येन्द्रियाणि
तेन देवानामगमद्गौरवं सः ।
तथा नक्षत्राणि कर्मणाऽमुत्र भान्ति
रुद्रादित्या वसवोऽथापि विश्वे ॥ ५-२९-१५ (३२५४२)
यमो राजा वैश्रवणः कुबेरो
गन्धर्वयक्षाप्सरसश्च सूत ।
ब्रह्मविद्यां ब्रह्मचर्यं क्रियां च
निपेवमाणा ऋषयोऽमुत्र भान्ति ॥ ५-२९-१६ (३२५४३)
जानन्निमं सर्वलोकस्य धर्मं
विप्रेन्द्राणां क्षत्रियाणां विशां च ।
स कस्मात्त्वं जानतां ज्ञानवान्सन्
व्यायच्छसेक सञ्जय कौरवार्थे ॥ ५-२९-१७ (३२५४४)
आम्नायेषु नित्यसंयोगमस्य
तथाऽश्वमेधे राजसूये च विद्धि ।
संयुज्यते धनुपा वर्मणा च
हस्त्यश्वाद्यै रथशस्त्रैश्च भूयः ॥ ५-२९-१८ (३२५४५)
ते चेदिमे कौरवाणाम्रुपाय-
मवगच्छेयुवधेनैव पार्थाः ।
धर्मत्राणं पुण्यमेषां कृतं स्या-
दार्ये वृत्ते भीमसेनं निगृह्य ॥ ५-२९-१९ (३२५४६)
ते चेत्पित्र्ये कर्मणि वर्तमाना

आपद्येरन्दिष्टवशेन मृत्युम् ।
यथाशक्त्यापूरयन्तः स्वकर्म
तदप्येषां निधनं स्यात्प्रशस्तम् ॥ ५-२९-२० (३२५४७)
उताहो त्वं मन्यसे शाम्यमेव
राज्ञां युद्धे वर्तते धर्मतन्त्रम् ।
अयुद्धे वा वर्तते धर्मतन्त्रं
तथैव ते वाचमिमां शृणोमि ॥ ५-२९-२१ (३२५४८)
चातुर्वर्ण्यस्य प्रथमं संविभाग-
मवेक्ष्य त्वं सञ्जय स्वं च कर्म ।
निशम्याथो पाण्डवानां च कर्म
प्रशंस वा निन्द वा या मतिस्ते ॥ ५-२९-२२ (३२५४९)
अधीयीत ब्राह्मणो वै यजेत
ददादीयात्तीर्थमुख्यानि चैव ।
अध्याप्रयेद्याजयेच्चापि याज्यान्
प्रतिग्रहान्वा विहितान्प्रतीच्छेत् ॥ ५-२९-२३ (३२५५०)
ग अधीयीत क्षत्रियोऽथो यजेत
ददाद्धनं न तु याचेत किंचित् ।
न याजयेन्न तु चाध्यापयीत
एवं स्मृतः क्षत्रधर्मः पुराणः ॥' ५-२९-२४ (३२५५१)
तथा राजन्यो रक्षणं वै प्रजानां
कृत्वा धर्मेणाप्रमत्तोऽथ दत्त्वा ।
यज्ञैर्दिष्ट्वा सर्ववेदानधीत्य
दारान्कृवा पुण्यकृदावसेद्गृहान् ॥ ५-२९-२५ (३२५५२)
स धर्मात्मा धर्ममधीत्य पुण्यं
यदृच्छया व्रजति ब्रह्मलोकम् ।
वैश्योऽधीत्य कृषिगोरक्षपण्यै-
र्वित्तं चिन्वन्पालयन्नप्रमत्तः ॥ ५-२९-२६ (३२५५३)
प्रियं कुर्वन्ब्राह्मणक्षत्रियाणां
धर्मशीलः पुण्यकृदावसेद्गृहान् ।
परिचर्या वन्दनं ब्राह्मणानां
नाधीयीत प्रतिषिद्धोऽस्य यज्ञः ।
नित्योत्थितो भूतयेऽतन्द्रितः स्या-
देवं स्मृतः शूद्रधर्मः पुराणः ॥ ५-२९-२७ (३२५५४)
एतान्राजा पालयन्नप्रमत्तो
नियोजयन्सर्ववर्णान्स्वधर्मे ।
अकामात्मा समवृत्तिः प्रजासु

नाधार्मिकाननुरुध्येत कामात् ॥ ५-२९-२८ (३२५५५)
श्रेयांस्तस्माद्यदि विद्येत कश्चि-
दभिज्ञातः सर्वधर्मोपपन्नः ।
स तं द्रष्टुमनुशिष्यन्प्रजानां
न चैतद्बुध्येदिति तस्मिन्नसाधुः ॥ ५-२९-२९ (३२५५६)
यदा गृध्येत्परभूतौ नृशंसो
विधिप्रकोपाद्बलमाददानः ।
ततो राज्ञामभवद्युद्धमेत-
त्तत्र जातं वर्म शस्त्रं धनुश्च ।
इन्द्रेणैतद्दस्युवधाय कर्म
उत्पादितं वर्म शस्त्रं धनुश्च ॥ ५-२९-३० (३२५५७)
तत्र पुण्यं दस्युवधेन लभ्यते
सोऽयं दोषः कुरुभिस्तीव्ररूपः ।
अधर्मज्ञैर्धर्ममबुध्यमानैः
प्रादुर्भूतः सञ्जय साधु तन्न ॥ ५-२९-३१ (३२५५८)
तत्र राजा धृतराष्ट्रः सपुत्रो
धर्म्यं हरेत्पाण्डवानामकस्मात् ।
नावेक्षन्ते राजधर्मं पुराणं
तदन्वयाः कुरवः सर्व एव ॥ ५-२९-३२ (३२५५९)
स्तेनो हरेद्यत्र धनं ह्यदृष्टः
प्रसह्य वा यत्र हरेत दृष्टः ।
उभौ गर्ह्यौ भवतः सञ्जयैतौ
किं वै पृथत्कं धृतराष्ट्रस्य पुत्रे ॥ ५-२९-३३ (३२५६०)
सोऽयं लोभान्मन्यते धर्ममेतं
यमिच्छति क्रोधवशानुगामी ।
भागः पुनः पाण्डवानां निविष्ट-
स्तं नः कस्मादाददीरन्परे वै ॥ ५-२९-३४ (३२५६१)
अस्मिन्पदे युध्यतां नो वधोऽपि
श्लाघ्यः पित्र्यं पपराज्याद्विशिष्टम् ।
एतान्धर्मान्कौरवाणां पुराणा-
नाचक्षीथाः सञ्जय राजमध्ये ॥ ५-२९-३५ (३२५६२)
एते मदान्मृत्युवशाभिपन्नाः
समानीता धार्तराष्ट्रेण मूढाः ।
इदं पुनः कर्म पापीय एव
सभामध्ये पश्य वर्त्तं कुरूणाम् ॥ ५-२९-३६ (३२५६३)
प्रियं भार्यां द्रौपदीं पाण्डवानां

यशस्विनीं शीलवृत्तोपपन्नाम् ।
यदुपैक्षन्त कुरवो भीष्ममुख्याः
कामानिगेनोपरुद्धां व्रजन्तीम् ॥ ५-२९-३७ (३२५६४)
तां चेत्तदा ते सकुमारवृद्धा
अवारयिष्यन्कुरवः समेताः ।
मम प्रियं धृतराष्ट्रोऽकरिष्यत्
पुत्राणां च कृतमस्याभविष्यत् ॥ ५-२९-३८ (३२५६५)
दुःशासनः प्रतिलोम्यान्निनाय
सभामध्ये श्वशुराणां च कृष्णाम् ।
सा तत्र नीता करुणं व्यपेक्ष्य
नान्यं क्षत्तुर्नाथमवाप किंचित् ॥ ५-२९-३९ (३२५६६)
कार्पण्यादेव सहितास्तत्र भूपा
नाशक्नुवन्प्रतिवक्तुं सभायाम् ।
एकः क्षत्ता धर्म्यमर्थं ब्रुवाणो
धर्मबुद्ध्या प्रत्युवाचाल्पबुद्धिम् ॥ ५-२९-४० (३२५६७)
अबुद्ध्वा त्वं धर्ममेतं सभाया-
अथेच्छसे पाण्डवस्योपदेष्टुम् ।
कृष्णा त्वेतत्कर्म चकार शुद्धं
सुदुष्करं तत्र सभां समेत्य ॥ ५-२९-४१ (३२५६८)
येन कृच्छ्रात्पाण्डवानुज्जहार
तथाऽऽत्मानं नौरिव सागरौघात् ।
यत्राब्रवीत्सूतपुत्रः सभायां
कृष्णां स्थितां श्वशुराणां समीपे ॥ ५-२९-४२ (३२५६९)
न ते गतिर्विद्यते याज्ञसेनि
प्रपद्येथा धार्तराष्ट्रस्य वेश्म ।
पराजितास्ते पतयो न सन्ति
पतिं चान्यं भामिनि त्वं वृणीष्व ॥ ५-२९-४३ (३२५७०)
यो बीभत्सोर्हृदये प्रोत आसी-
दस्थि छिन्दन्मर्मघाती सुघोरः ।
कर्णाच्छरो वाङ्भयस्तिग्मतेजाः
प्रतिष्ठितो हृदये फाल्गुनस्य ॥ ५-२९-४४ (३२५७१)
कृष्णाजिनानि परिधित्समानान्
दुःशासनः कटुकान्यभ्यभाषत् ।
एते सर्वे षण्डतिला विनष्टाः
क्षयं गता नरकं दीर्घकालम् ॥ ५-२९-४५ (३२५७२)
गान्धारराजः शकुनिर्निकृत्या

यदब्रवीद्द्यूतकाले स पार्थम् ।
पराजितो नकुलः किं तवास्ति
कृष्णया त्वं दीव्य वै याज्ञसेन्या ।
जानासि त्वं सञ्जय सर्वमेतत्
द्यूते वाक्यं गर्ह्यमेवं यथोक्तम् ॥ ५-२९-४६ (३२५७३)
स्वयं त्वहं प्रार्थये तत्र गन्तुं
समाधातुं कार्यमेतद्विपन्नम् ।
ग जानासि त्वं धार्तराष्ट्रस्य मोहं
दुरात्मनः पापवशानुगस्य ' ॥ ५-२९-४७ (३२५७४)
अहापयित्वा यदि पाण्डवार्थं
शमं कुरूणामपि चेच्छकेयम् ।
पुण्यं च मे स्याच्चरितं महोदयं
मुच्येरंश्च कुरवो मृत्युपाशात् ॥ ५-२९-४८ (३२५७५)
अपि मे वाचं भाषमाणस्य काव्यां
धर्मारामामर्थवतीमहिंस्राम् ।
अवेक्षेरन्धार्तराष्ट्राः समक्षं
मां च प्राप्तं कुरवः पूजयेयुः ॥ ५-२९-४९ (३२५७६)
अतोऽन्यथा रथिना फाल्गुनेन
भीमेन चैवाहवदंशितेन ।
बलोत्सिक्तान्धार्तराष्ट्रांश्च विद्धि
प्रदह्यमानान्कर्मणा स्वेन पापान् ॥ ५-२९-५० (३२५७७)
पराजितान्पाण्डवेयांस्तु वाचो
रौद्रा रूक्षा भाषते धार्तराष्ट्रः ।
गदाहस्तो भीमसेनोऽप्रमत्तो
दुर्योधनं स्मारयिता हि काले ॥ ५-२९-५१ (३२५७८)
सुयोधनो मन्युमयो महाद्रुमः
स्कन्धः कर्णः शकुनिस्तस्य शाखाः ।
दुःशासनः पुष्कफले समृद्धे
मूलं राजा धृतराष्ट्रोऽमनीषी ॥ ५-२९-५२ (३२५७९)
युधिष्ठिरो धर्ममयो महाद्रुमः
स्कन्धोऽर्जुनो भीमसेनोऽस्य शाखाः ।
माद्रीपुत्रौ पुष्पफले समृद्धे
मूलं त्वहं ब्रह्म च ब्राह्मणाश्च ॥ ५-२९-५३ (३२५८०)
ग वनं राजा धृतराष्ट्रः सपुत्रः
सिंहा वने सञ्जय पाण्डवेयाः ।
सिंहाभिगुप्तं न वनं विनश्येत्

सिंहो न नश्येत वनाभिगुप्तः ॥ ५-२९-५४ (३२५८१)
निर्वनो वध्यते सिंहो निःसिंहं वध्यते वनम् ।
तस्मात्सिंहो वनं रक्षेद्वनं सिंहं च पालयेत् ॥' ५-२९-५५ (३२५८२)
वनं राजा धृतराष्ट्रः वने व्याघ्राश्च पाण्डवाः ।
मा वनं छिन्धि सव्याघ्रं व्याघ्रा नेशुर्वनं विना ॥ ५-२९-५६ (३२५८३)
निर्वनो वध्यते व्याघ्रो निर्व्याघ्रं छिद्यते वनम् ।
तस्माद्व्याघ्रो वनं रक्षेद्वयं व्याघ्रं च पालयेत् ॥ ५-२९-५७ (३२५८४)
लताधर्मा धार्तराष्ट्राः सालाः सञ्जय पाण्डवाः ।
न लता वर्धते जातु महाद्रुममनाश्रिता ॥ ५-२९-५८ (३२५८५)
स्थिताः शुश्रूषितुं पार्थाः स्थिता योद्धुमरिन्दमाः ।
यत्कृत्यं धृतराष्ट्रस्य तत्करोतु नराधिपः ॥ ५-२९-५९ (३२५८६)
स्थिताः शमे महात्मानः पाण्डवा धर्मचारिणः ।
योधाः समर्थास्तद्विद्वन्नाचक्षीथा यथातथम् ॥ ॥ ५-२९-६० (३२५८७)

इति श्रीमन्महाभारते उद्योगपर्वणि सञ्जययानपर्वणि
एकोनत्रिंशोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-२९-२ शाम्यतेति वचनादन्यत्तान्प्रति न ब्रूयाम् । पाण्डवानां
समक्षं राज्ञो युधिष्ठिराच्च एतदेव शृणोमि। अहं च एतन्मन्ये
मानयामि ॥
२ ॥
५-२९-३ तत्र राज्ये निमित्ते । गृद्धः लिप्सावान् । एवं सति एषां
कौरवाणां कस्माद्धेतोः कलहः नावमूर्च्छेत् ॥
३ ॥
५-२९-४ विचरं विचलितम् । पूरयतः पालयतः ॥
४ ॥
५-२९-५ यथाख्यातं प्रसिद्धिमनतिक्रम्य आवसतः अधितिष्टतः
साधुविलोपं धर्मलोपं युधिष्ठिरे कस्माद्धेतोः आत्थ उक्तवान् त्वम्
। अस्मिन्विधौ ॥
५ ॥
५-२९-१७ व्यायच्छसे निग्रहं करोषि ॥
१७ ॥
५-२९-१८ विद्या धर्मः शौर्यं च युधिष्ठिरे पुष्कलमस्तीति
नायमन्येन शिक्षणीयो जेतुं वा शक्य इत्यर्थः ॥
१८ ॥

५-२९-१९ कौरवाणां अवधेन उपायम् । राज्यप्राप्ताविति शेषः। एषां एतैः। भीमसेनं आर्ये वृत्ते अहिंसायां निगृह्य पुण्यमेव कृतं स्यात् ॥
१९ ॥
५-२९-२१ शाम्यमेव शमः कार्यएवेति मन्यसे तर्हि धर्ममन्त्रं धर्मानुष्ठानं युद्धपक्षेऽस्ति उत अयुद्धपक्षे । तयोर्मध्ये यदेव वक्ष्यसि तथैव ते वाचं श्रृणोमि करिष्यामीत्यर्थः ॥
२१ ॥
५-२९-२६ सः क्षत्रियः अधीत्य प्राप्य ॥
२६ ॥
५-२९-२९ तस्मात् राज्ञः श्रेयान् प्रशस्ततरः अभिज्ञातः ज्ञानतः धर्मतश्च यदि कश्चिदस्ति स तं युधिष्ठिरं प्रजानां कर्मणि षष्ठी । प्रजाः द्रष्टुं राज्यं प्राप्तुमित्यर्थः। अनुशिष्यन् अनुशासितुमिच्छत् एतन्मदुक्तं धर्मजातं युधिष्ठिरेऽस्तीति बुध्येत्। नच तस्मिन्नसाधुः युधिष्ठिरेऽसाधुरधर्मो न चास्तीत्यपि बुध्येत् ॥
२९ ॥
५-२९-३० परभूतौ परैश्वर्ये नृशंसश्चोरकल्पो राजा विधिप्रकोषात् दैवप्रातकूल्यात् गृद्धयेत् । ततो हेतोः राज्ञां परस्परं युद्धं समभवत् । कर्म युद्धम्। वर्म कवचम्। शस्त्रं खड्गादि धनुश्चेति ॥
३० ॥
५-२९-३१ कुरुभिर्निमित्तभूतैरयं दोषः वञ्जनारूपः प्रादुर्भूतः ॥
३१ ॥
५-२९-३२ धर्म्यं धर्मादागतं पित्र्यं राज्यम् । तदन्वयास्तदनुसारिणः ॥
३२ ॥
५-२९-३३ पृथत्क्वं स्तेनादन्यत्वम् ॥
३३ ॥
५-२९-३४ एतं छलेन राज्यापहारम् । निविष्टः वनवासादूर्ध्वं राज्यं ग्राह्यमिति कौरवेषु न्यासरूपेण स्थितः तं भागं नः अस्माकं परे कस्मात् आददीरन् गृहीतवन्तः ॥
३४ ॥
५-२९-३५ पदे पदनीये अवश्यग्राह्ये भागे निमित्ते ॥
३५ ॥
५-२९-३७ कामानुगेन रजसा । उपरुद्धां गृहकर्मतो निरुद्धाम् ॥
३७ ॥

५-२९-३९ प्रातिलोम्यात् अक्रमेण ॥
३९ ॥
५-२९-४० कार्पण्यात् दैन्यात् ॥
४० ॥
५-२९-४१ पाण्डवस्य धर्मं उपदेष्टुं इच्छसे ॥
४१ ॥
५-२९-४७ विपन्नं नष्टं समाधातं समीकर्तुम् ॥
४७ ॥
५-२९-४८ शकेयं शक्तश्चेत्स्याम् ॥
४८ ॥
५-२९-४९ काव्यां शोक्रीम् ॥
४९ ॥
५-२९-५१ रौद्राः मर्मच्छिदः । रूक्षाः निःस्नेहाः । भाषते
द्यूतावसानेऽभाषत ॥
५१ ॥
५-२९-५३ ब्रह्म वेदः ॥
५३ ॥

उद्योगपर्व - अध्याय ०३०
॥ श्रीः ॥
५.३०. अध्यायः ३०

Mahabharata - Udyoga Parva - Chapter Topics
सञ्जयेन गमनाय युधिष्ठिराद्यामन्त्रणम् ॥ १ ॥
युधिष्ठिरेण सञ्जयंप्रति आभीष्मं आखञ्जकुब्जं सर्वेषु
यथायोग्यं वन्दनादिपूर्वकं स्वस्य कुशलनिवेदनचोदनम् ॥ २ ॥
तथा दुर्योधनंप्रति
सन्धिविग्रहान्यतरपक्षस्वीकरणाभ्यनुज्ञानकथनचोदनम् ॥ ३ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-३०-० (३२५८८)
सञ्जय उवाच । ५-३०-०क्ष् (३४३१)
आमन्त्रये त्वां नरदेवदेव
गच्छाम्यहं पाण्डव स्वस्ति तेऽस्तु ।
कच्चिन्न वाचा वृजिनं हि किंचि-
दुच्चारितं मे मनसोऽभिषङ्गात् ॥ ५-३०-१ (३२५८९)

जनार्दनं भीमसेनार्जुनौ च
माद्रीसुतौ सात्यकिं चेकितानम् ।
आमन्त्र्य गच्छामि शिवं सुखं वः
सौम्येन मां पश्यत चक्षुषा नृपाः ॥ ५-३०-२ (३२५९०)
युधिष्ठिर उवाच। ५-३०-३क्ष् (३४३२)
अनुज्ञातः सञ्जय स्वस्ति गच्छ
न नः स्मरस्यप्रियं जातु विद्वन् ।
विद्मश्च त्वां ते च वयं च सर्वे
शुद्धात्मानं मध्यगतं सभास्थम् ॥ ५-३०-३ (३२५९१)
आप्तो दूतः सञ्जय सुप्रियोऽसि
कल्याणवाक् शीलवांस्तृप्तिमांश्च ।
न मुह्येस्त्वं सञ्जय जातु मत्या
न च क्रुद्ध्येरुच्यमानोऽपि तत्त्वम् ॥ ५-३०-४ (३२५९२)
न मर्मगां जातु वक्ताऽसि रूक्षां
नोपश्रुतिं कटुकां नोति शुष्काम् ।
धर्मारामामर्थवतीमहिंस्रा-
मेतां वाचं तव जानीम सूत ॥ ५-३०-५ (३२५९३)
त्वमेव नः प्रियतमोऽसि दूत
इहागच्छेद्विदुरो वा द्वितीयः ।
अभीक्ष्णदृष्टोऽसि पुरातनस्त्वं
धनञ्जयस्यात्मसमः सखाऽसि ॥ ५-३०-६ (३२५९४)
इतो गत्वा सञ्जय क्षिप्रमेव
उपातिष्ठेथा ब्राह्मणान्ये तदर्हाः ।
विशुद्धवीर्याश्चरणोपपन्नाः
कुले जाताः सर्वधर्मोपपन्नाः ॥ ५-३०-७ (३२५९५)
स्वाध्यायिनो ब्राह्मणा भिक्षवश्च
तपस्विनो ये च नित्या वनेषु ।
अभिवाद्य तान्मद्वचनेन वृद्धां-
स्तथैव तान्कुशलं तात पृच्छेः ॥ ५-३०-८ (३२५९६)
पुरोहितं धृतराष्ट्रस्य राज्ञ-
स्तथाचार्यानृत्विजो ये च तस्य ।
तांश्चैवत्वं सहितान्वै यथावत्
सङ्गच्छेथाः कुशलेनैव सूत ॥ ५-३०-९ (३२५९७)
अश्रोत्रिया ये च वसन्ति वृद्धा
मनस्विनः शीलबलोपपन्नाः ।
आशंसन्तोऽस्माकमनुस्मरन्तो

यथाशक्ति धर्ममात्रां चरन्तः ॥ ५-३०-१० (३२५९८)
श्लाघस्व मां कुशलिनं स्म तेभ्यो
ह्यनामयं तात पृच्छेर्जघन्यम् ।
ये जीव्ति व्यवहारेण राष्ट्रे
पशूंश्च ये पालयन्तो वसन्ति ।
ग कृषीवला बिभ्रति ये च लोकं
तेषां सर्वषां कुशलं स्म पृच्छेः ॥' ५-३०-११ (३२५९९)
आचार्य इष्टो नयगो विधेयो
वेदानभीप्सन्ब्रह्मचर्यं चचार ।
योऽस्त्रं चतुष्पात्पुनरेव चक्रे
द्रोणः प्रसन्नोऽभिवाद्यस्त्वयासौ ॥ ५-३०-१२ (३२६००)
अधीतविद्यश्चरणोपपन्नो
योऽस्त्रं चतुष्पात्पुनरेव चक्रे ।
गन्धर्वपुत्रप्रतिमं तरस्विनं
तमश्वत्थामानं कुशलं स्म पृच्छेः ॥ ५-३०-१३ (३२६०१)
शारद्वतस्यावसथं स्म गत्वा
महारथस्यात्मविदां वरस्य ।
त्वं मामभीक्ष्णं परिकीर्तयन्वै
कृपस्य पादौ सञ्जय पाणिना स्पृशेः ॥ ५-३०-१४ (३२६०२)
यस्मिन्शौर्यमानृशंस्यं तपश्च
प्रज्ञा शीलं श्रुतरूपे धृतिश्च ।
पादौ गृहीत्वा कुरुसत्तमस्य
भीष्मस्य मां तत्र निवेदयेथाः ॥ ५-३०-१५ (३२६०३)
प्रज्ञाचक्षुर्यः प्रणेता कुरूणां
बहुश्रुतो वृद्धसेवी मनीषी ।
तस्मै राज्ञे स्थविरायाभिवाद्य
आचक्षीथाः सञ्जय मामरोगम् ॥ ५-३०-१६ (३२६०४)
ज्येष्ठः पुत्रो धृतराष्ट्रस्य मन्दो
मूर्खः शठः सञ्जय पापशीलः ।
यस्यापवादः पृथिवीं याति सर्वां
सुयोधनं कुशलं तात पृच्छेः ॥ ५-३०-१७ (३२६०५)
भ्राता कनीयानपि तस्य मन्द-
स्तथाशीलः सञ्जय सोपि शश्वत् ।
महेष्वासः शूरतमः कुरूणां
दुःशासनः कुशलं तात वाच्यः ॥ ५-३०-१८ (३२६०६)
यस्य कामो वर्तते नित्यमेव

नान्यः शमाङ्गारतानामिति स्म ।
स बाह्लिकानामृषभो मनीषी
पुनर्यथा माऽभिवदेत्प्रसन्नः ॥ ५-३०-१९ (३२६०७)
ग भूरिश्रवास्तात निपातयोधी
महेष्वासो रथिनामुत्तमोऽग्र्यः ।
गत्वा स्म तं मद्वचनेन ब्रूयाः
शल्यं तथा मद्वचनात्प्रतीतः ॥ ५-३०-२० (३२६०८)
महेष्वासो रथिनामुत्तमोऽग्र्यः
समः शलो रक्षिता पृष्ठमस्य ।
हीनिषेवो देविता यो मताक्षः
सत्यव्रतः पुरुमित्रो जयश्च ।
ये प्रस्थानं तत्र मे नाभ्यनन्दं-
स्तेषां सर्वेषां कुशलं तात पृच्छेः ॥' ५-३०-२१ (३२६०९)
गुणैरनेकैः प्रवरैश्च युक्तो
विज्ञानवान्नैव च निष्ठुरो यः ।
स्नेहादमर्षं सहते सदैव
स सोमदत्तः पूजनीयो मतो मे ॥ ५-३०-२२ (३२६१०)
अर्हत्तमः कुरुषु सौमदत्तिः
स नो भ्राता संजय मत्सखा च ।
महेष्वासो रथिनामुत्तमोऽर्हः
सहामात्यः कुशलं तस्य पृच्छेः ॥ ५-३०-२३ (३२६११)
ये चैवान्ये कुरुमुख्या युवानः
पुत्राः पौत्रा भ्रातरश्चैव ये नः ।
यंयमेषां मन्यसे येन योग्यं
तत्तत्प्रोच्यानामयं सूत वाच्याः ॥ ५-३०-२४ (३२६१२)
ये राजानः पाण्डवायोधनाय
समानीता धार्तराष्ट्रेण केचित् ।
वशातयः साल्वकाः केकयाश्च
तथाम्बष्ठा ये त्रिगर्ताश्च मुख्याः ॥ ५-३०-२५ (३२६१३)
प्राच्योदीच्या दाक्षिण्यात्याश्च शूरा-
स्तथा प्रतीच्याः पार्वतीयाश्च सर्वे ।
अनृशंसाः शीलवृत्तोपुन्ना-
स्तेषां सर्वेषां कुशलं सूत पृच्छेः ॥ ५-३०-२६ (३२६१४)
हस्त्यारोहा रथिनः सादिनश्च
पदातयश्चार्यसङ्घा महान्तः ।
आख्याय मां कुशलिनं स्म नित्य-

मनामयं परिपृच्छेः समग्रान् ॥ ५-३०-२७ (३२६१५)
तथा राज्ञो ह्यर्थयुक्तानमात्यान्
दौवारिकान्ये च सेनां नयन्ति ।
आयव्ययं ये गमयन्ति नित्य-
मर्थांश्च ये महतश्चिन्तयन्ति ॥ ५-३०-२८ (३२६१६)
वृन्दारकं कुरुमध्येष्वमूढं
महाप्रज्ञं सर्वधर्मोपपन्नम् ।
न तस्य युद्धं रोचते वै कदाचि-
द्वैश्यापुत्रं कुशलं तात पृच्छेः ॥ ५-३०-२९ (३२६१७)
निकर्तने देवने योऽद्वितीय-
श्छन्नोपधः साधुदेवी मताक्षः ।
यो दुर्जयो देवरथेन सङ्ख्ये
स चित्रसेनः कुशलं तात वाच्यः ॥ ५-३०-३० (३२६१८)
गान्धारराजः शकुनिः पार्वतीयो
निकर्तने योऽद्वितीयोऽक्षदेवी ।
मानं कुर्वन्धार्तराष्ट्रस्य सूत
मिथ्याबुद्धेः कुशलं तात पृच्छेः ॥ ५-३०-३१ (३२६१९)
यः पाण्डवानेकरथेन वीरः
समुत्सहत्यप्रधृष्यान्विजेतुम् ।
यो मुह्यतां मोहयिताऽद्वितीयो
वैकर्तनः कुशलं तस्य पृच्छेः ॥ ५-३०-३२ (३२६२०)
स एव भक्तः स गुरुः स भर्ता
स वै पिता स च माता सुहृच्च ।
अगाधबुद्धिर्विदुरो दीर्घदर्शी
स नो मन्त्री कुशलं तं स्म पृच्छेः ॥ ५-३०-३३ (३२६२१)
वृद्धाः स्त्रियो याश्च गुणोपपन्ना
ज्ञायन्ते नः सञ्जय मातरस्ताः ।
ताभिः सर्वाभिः सहिताभिः समेत्य
स्त्रीभिः सवृद्धाभिरभिवादं वदेथाः ॥ ५-३०-३४ (३२६२२)
कच्चित्पुत्रा जीवपुत्राः सुसम्य-
ग्वर्तन्ते वो वृत्तिमनृशंसरूपाः ।
इति स्मोत्का सञ्जय ब्रूहि पश्चा-
दजातशत्रुः कुशली सपुत्रः ॥ ५-३०-३५ (३२६२३)
राज्ञो भार्याः सञ्जय वेत्थ तत्र
तासां सर्वासां कुशलं तात पृच्छेः ।
सुसंगुप्ताः सुरभयोऽनवद्याः

कच्चिद्गृहानावसथाप्रमत्ताः ॥ ५-३०-३६ (३२६२४)
कच्चिद्वृत्तिं श्वशुरेषु भद्राः
कल्याणीं वर्तध्वमनृशंसरूपाम् ।
यथा च वः स्युः पतयोऽनुकूला-
स्तथा वृत्तिमात्मनः स्थापयध्वम् ॥ ५-३०-३७ (३२६२५)
या नः स्नुषाः सञ्जय वेत्थ तत्र
प्राप्ताः कुलेभ्यश्च गुणोपपन्नाः ।
प्रजावत्यो ब्रूहि समेत्य ताश्च
युधिष्ठिरो वोऽभ्यवदत्प्रसन्नः ॥ ५-३०-३८ (३२६२६)
कन्याः स्वजेथाः सदनेषु सञ्जय
अनामयं मद्वचनेन पृष्ट्वा ।
कल्याणा वः सन्तु पतयोऽनुकूला
यूयं पतीनां भवतानुकूलाः ॥ ५-३०-३९ (३२६२७)
अलङ्कृता वस्त्रवत्यः सुगन्धा
अबीभत्साः सुखिता भोगवत्यः ।
लघु यासां दर्शनं वाक्व लघ्वी
वेशस्त्रियः कुशलं तात पृच्छेः ॥ ५-३०-४० (३२६२८)
दास्यः स्युर्या ये च दासाः कुरूणां
तदाश्रया बहवः कुब्जखञ्जाः ।
आख्याय मां कुशलिनं स्म तेभ्यो-
ऽप्यनामयं परिपृच्छेर्जघन्यम् । ५-३०-४१ (३२६२९)
कच्चिद्वृत्तिं वर्तते वै पुराणीं
कच्चिद्भोगान्दार्तराष्ट्रो ददाति ।
अङ्गहीनान्कृपणान्वामनान्वा
यानानृशंस्याद्बार्तराष्ट्रो बिभर्ति ॥ ५-३०-४२ (३२६३०)
अन्धाश्च सर्वे बधिरास्तथैव
हस्ताजीवा बहवो येऽत्र सन्ति ।
आख्याय मां कुशलिनं स्म तेभ्यो-
ऽप्यनामयं परिपृच्छेर्जघन्यम् ॥ ५-३०-४३ (३२६३१)
मा भैष्ट दुःखेन कुजीवितेन
नूनं कृतं परलोकेषु पापम् ।
निगृह्य शत्रून्सुहृदोऽनुगृह्य
वासोभिरन्नेन च वो भरिष्ये ॥ ५-३०-४४ (३२६३२)
ग न चाप्येतच्छक्यमेकेन वक्तुं
नानादेशा बहवो जातिसङ्घाः ।
विप्रोषितो बालवद्द्रष्टुमिच्छ-

न्नमस्येऽहं सञ्जय भैमसेनान् ।
ते मे यथा वाचमिमां यथोक्तां
त्वयोच्यमानां शृणुयुक्तथा कुरु ॥ ५-३०-४५ (३२६३३)
सन्त्येव मे ब्राह्मणेभ्यः कृतानि
भावीन्यथो नो बत वर्तयन्ति ।
तान्पश्यामि युक्तरूपांस्तथैव
तामेव सिद्धिं श्रावयेथा नृपं तम् ॥ ५-३०-४६ (३२६३४)
ये चानाथा दुर्बलाः सर्वकाल-
मात्मन्येव प्रयतन्तेऽथ मूढाः ।
तांश्चापि त्वं कृपणान्सर्वथैव
ह्यस्मद्वाक्यात्कुशलं तात पृच्छेः ॥ ५-३०-४७ (३२६३५)
ये चाप्यन्ये संश्रिता धार्तराष्ट्रा-
न्नानादिग्भ्योऽभ्यागताः सूतपुत्र ।
दृष्ट्वा तांश्चैवार्हतश्चापि सर्वा-
न्संपृच्छेथाः कुशलं चाव्ययं च ॥ ५-३०-४८ (३२६३६)
एवं सर्वानागताभ्यागतांश्च
राज्ञो दूतान्सर्वदिग्भ्योभ्युपेतान् ।
पृष्ट्वा सर्वान्कुशलं तांश्च सूत
पश्चादहं कुशली तेषु वाच्यः ॥ ५-३०-४९ (३२६३७)
न हीदृशाः सन्त्यपरे पृथिव्यां
ये योधका धार्तराष्ट्रेण लब्धाः ।
धर्मस्तु नित्यो मम धर्म एव
महाबलः शत्रुनिबर्हणाय ॥ ५-३०-५० (३२६३८)
इदं पुनर्वचनं धार्तराष्ट्रं
सुयोधनं सञ्जय श्रावयेथाः ।
यस्ते शरीरे हृदयं दुनोति
कामः कुरूनसपत्नोऽनुशिष्याम् ॥ ५-३०-५१ (३२६३९)
न विद्यते युक्तिरेतस्य काचि-
न्नैवं विधास्यामि यथा प्रियं ते ।
ददस्व वा शक्रपुरीं ममैव
युध्वस्व वा भारतमुख्यवीर ॥ ॥ ५-३०-५२ (३२६४०)

इति श्रीमन्महाभारते उद्योगपर्वणि सञ्जयानपर्वणि त्रिंशोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-३०-१ अभिषङ्गात् आवेशात् ॥

५-३०-५ उपश्रुतिं वार्ताम् । रूक्षां मर्मगाम्। कटुकां नीरसाम् ॥
५ ॥
५-३०-७ चरणं ब्रह्मचर्येणाध्ययनम् ॥
५-३०-१० अश्रोत्रियाः अत्रैवर्णिकाः शूद्रादयः । धर्ममात्रां
धर्मलेशं जरन्तः ॥
५-३०-११ श्लाघ्यस्व स्तुहि । जघन्यं पश्चातेभ्यस्तेषां अनामयं
पृच्छेः। व्यवहारेण वाणिज्यादिना पालयन्तः स्थानाधिकारिणः ॥
५-३०-१२ चतुष्पात् मन्त्र उपचारः प्रयोगः संहारश्चेति चत्वारः
पादा अस्येति अस्त्रम् ॥
५-३०-१३ गन्धर्वेति सौन्दर्यं संगीतं च तस्मिन् द्योतितम् ॥
५-३०-२५ पाण्डवायोधनाय पाण्डवैः सह युद्धाय ॥
५-३०-२९ वृन्दारकं श्रेष्ठम् ॥
५-३०-३० निकर्तनेऽर्थापहारे । छन्नोपधो गुप्तछलः ॥
५-३०-३२ मुह्यतां धार्तराष्ट्राणाम् ॥
५-३०-४० शीघ्रहारि । वेशस्त्रियो वेश्याः ॥
५-३०-४४ शत्रून् धार्तराष्ट्रान् निगृह्य वः युष्मान् भरिष्ये
पोषयिष्ये इति ब्रूया इति शेषः ॥
४४ । ५-३०-४६ मे मया कृतानि वत्सरदेयानि नो वर्तयन्ति न
चालयन्ति। त्वदीया अधिकारिणः तान्यहं यथा यथावत्पश्यमि तथैव
तां सिद्धिं त्वद्दत्तं सम्यक् परिपालयामीति दूतद्वारा मां श्रावयेथा
इति तं नृपं दुर्योधनं ब्रूहीति शेषः ॥
४६ ॥
५-३०-४७ आत्मन्येव प्रयतन्ते न तु कर्तुं शक्नुवन्ति ॥
५-३०-५० नित्यः अविनाशिफलः ॥
५० ॥
५-३०-५२ युक्तिः संभावना एतस्यार्थस्य न विद्यते । शक्रपुरीं
इन्द्रप्रस्थम् ॥
५२ ॥

उद्योगपर्व - अध्याय ०३१
॥ श्रीः ॥
५.३१. अध्यायः ३१

Mahabharata - Udyoga Parva - Chapter Topics
युधिष्ठिरेण सञ्जयंप्रति धृतराष्ट्रभीष्मयोरभिवादनपूर्वकं
सन्धिकरणविज्ञापननिवेदनचोदनम् ॥ १ ॥
तथा दुर्योधनंप्रति तत्कृतानयोपेक्षणकथनपूर्वकं

ग्रामपञ्चकदानेन सन्धिकरणसन्देशः ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-३१-० (३२६४१)
युधिष्ठिर उवाच। ५-३१-०क्ष् (३४३३)
उत सन्तमसन्तं वा बालं वृद्धं च सञ्जय ।
उताबलं बलीयांसं धाता प्रकुरुते वशे ॥ ५-३१-१ (३२६४२)
उत बालाय पाण्डित्यं पण्डितायोत बालताम् ।
ददाति सर्वमीशानः पुरस्ताच्छुक्रमुच्चरन् ॥ ५-३१-२ (३२६४३)
बलं जिज्ञासमानस्य आचक्षीथा यथातथम् ।
अथ मन्त्र मन्त्रयित्वा याथातथ्येन हृष्टवत् ॥ ५-३१-३ (३२६४४)
गावल्गणे कुरून्गत्वा धृतराष्ट्रं महाबलम् ।
अभिवाद्योपसंगृह्य ततः पृच्छेरनामयम् ॥ ५-३१-४ (३२६४५)
ब्रूयाश्चैनं त्वमासीनं कुरुभिः परिवारितम् ।
तवैव राजन्वीर्येण सुखं जीवन्ति पाण्डवाः ॥ ५-३१-५ (३२६४६)
तव प्रसादाद्बालास्ते प्राप्ता राज्यमरिन्दम ।
राज्ये तान्स्थापयित्वाऽग्रे नोपेक्षस्व विनश्यतः ॥ ५-३१-६ (३२६४७)
सर्वमप्येतदेकस्य नालं सञ्जय कस्यचित् ।
तात संहत्य जीवामो द्विषतां मा वशं गमः ॥ ५-३१-७ (३२६४८)
तथा भीष्मं शान्तनवं भारतानां पितामहम् ।
शिरसाऽभिवदेथास्त्वं मम नाम प्रकीर्तयन् ॥ ५-३१-८ (३२६४९)
अभिवाद्य च वक्तव्यस्ततोऽस्माकं पितामहः ।
भवता शन्तनोर्वंशो निमग्नः पुनरुद्धृतः ॥ ५-३१-९ (३२६५०)
स त्वं कुरु तथा तात स्वमतेन पितामह ।
यथा जीवन्ति ते पौत्राः प्रीतिमन्तः परस्परम् ॥ ५-३१-१० (३२६५१)
तथैव विदुरं ब्रूयाः कुरूणां मन्त्रधारिणम् ।
अयुद्धं सौम्य भाषस्व हितकामो युधिष्ठिरे ॥ ५-३१-११ (३२६५२)
अथ दुर्योधनं ब्रूया राजपुत्रममर्षणम् ।
मध्ये कुरूणामासीनमनुनीय पुनः पुनः ॥ ५-३१-१२ (३२६५३)
अपापां यदुपैक्षस्त्वं कृष्णामेतां सभागताम् ।
तद्दुःखमतितिक्षाम मा वधीष्म कुरूनिति ॥ ५-३१-१३ (३२६५४)
एवं पूर्वापरान्क्लेशानतितिक्षन्त पाण्डवाः ।
बलीयांसोऽपि सन्तो यत्तत्सर्वं कुरवो विदुः ॥ ५-३१-१४ (३२६५५)
यन्नः प्रव्राजयेः सौम्य अजिनैः प्रतिवासितान् ।
तद्दुःखमतितिक्षाम मा वधीषय कुरूनिति ॥ ५-३१-१५ (३२६५६)

यत्कुन्तीं समतिक्रम्य कृष्णां केशेष्वधर्षयत् ।
दुःशासनस्तेऽनुमते तच्चास्माभिरुपेक्षितम् ॥ ५-३१-१६ (३२६५७)
अथोचितं स्वकं भागं लभेमहि परन्तप ।
निवर्तय परद्रव्याद्बुद्धिं गृद्धां नरर्षभ ॥ ५-३१-१७ (३२६५८)
शान्तिरेवं भवेद्राजन्प्रीतिश्चैव परस्परम् ।
राज्यैकदेशमपि नः प्रयच्छ शममिच्छताम् ॥ ५-३१-१८ (३२६५९)
अविस्थलं वृकस्थलं माकन्दीं वारणावतम् ।
अवसानं भवत्वत्र किंचिदेकं च पञ्चमम् ॥ ५-३१-१९ (३२६६०)
भ्रातॄणां देहि पञ्चानां पञ्च ग्रामान्सुयोधन ।
शान्तिर्नोस्तु महाप्राज्ञ ज्ञातिभिः सह सञ्जय ॥ ५-३१-२० (३२६६१)
भ्राता भ्रातरमन्वेतु पिता पुत्रेण युज्यताम् ।
स्मयमानाः समायान्तु पाञ्चालाः कुरुभिः सह ॥ ५-३१-२१ (३२६६२)
अक्षतान्कुरु पाञ्चालान्पश्येयमिति कामये ।
सर्वे सुमनसस्तात शाम्याय भरतर्षभ ॥ ५-३१-२२ (३२६६३)
अलमेव शमायास्मि तथा युद्धाय सञ्जय ।
धर्मार्थयोरलं चाहं मृदवे दारुणाय च ॥ ॥ ५-३१-२३ (३२६६४)

इति श्रीमन्महाभारते उद्योगपर्वणि सञ्जययानपर्वणि एकत्रिंशोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-३१-१ सन्तं साधुम् । असन्तं दुष्टम् । धाता ईश्वरः ॥
१ ॥
५-३१-२ शुक्रं बीजभूतं प्राचीनं कर्म उच्चरन् उद्दीपयन् ॥
२ ॥
५-३१-७ सर्वं ब्रह्माण्डम् । संहत्य एकीभूय ॥
७ ॥
५-३१-१३ अतितिक्षाम क्षान्तवन्तो वयम् तत्र हेतुः मां वधीष्मेति ॥
१३ ॥
५-३१-१७ गृद्धां लुब्धाम् ॥
१७ ॥
५-३१-१८ अवसानं वसतिस्थानम् ॥

उद्योगपर्व - अध्याय ०३२
॥ श्रीः ॥
५.३२. अध्यायः ३२

Mahabharata - Udyoga Parva - Chapter Topics

पाण्डवानुज्ञातेन सञ्जयेन रात्रौ धृतराष्ट्रमुपगम्य
अभिवादनपूर्वकं युधिष्ठिरकृतकुशलप्रश्नादिकथनम् ॥ १ ॥
तथा धृतराष्ट्रं विगर्ह्य युधिष्ठिरवत्तनस्य
स्वःकथनकथनपूर्वकं स्वभवनगमनम् ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

वैशम्पायन उवाच ।
ग धर्मराजस्य वचनं श्रुत्वा पार्थो धनञ्जयः ।
उवाच सञ्जयं तत्र वासुदेवस्य शृण्वतः ॥ ५-३२-१ (३२६६५)
पितामहं शान्तनवं धृतराष्ट्रं च सञ्जय ।
द्रोणं सपुत्रं शल्यं च महाराजं च बाह्लिकम् ॥ ५-३२-२ (३२६६६)
विकर्णं सोमदत्तं च शकुनिं चैव सौबलम् ।
विविंशतिं चित्रसेनं जयत्सेनं च सञ्जय ।
भगदत्तं तथा चैव शूरं रणकृतां वरम् ॥ ५-३२-३ (३२६६७)
ये चाप्यन्ये कुरवस्तत्र सन्ति
राजानश्चेङ्भूमिपालाः समेताः ।
युयुत्सवः सैन्धवाः पार्थिवाश्च
समानीता धार्तराष्ट्रेण सूत ॥ ५-३२-४ (३२६६८)
यथान्यायं कुशलं वन्दनं च
समागमे मद्वचनेन वाच्याः ।
ततो ब्रूयाः सञ्जय राजमध्ये
दुर्योधनं पापकृतां प्रधानम् ॥ ५-३२-५ (३२६६९)
एवं प्रतिष्ठाप्य धनञ्जयस्तं
ततोऽर्थवद्धर्मवच्चापि पार्थः ।
उवाच वाक्यं स्कवजनप्रहर्षं
वित्रासनं धृतराष्ट्रात्मजानाम् ॥ ५-३२-६ (३२६७०)
अर्जुनेन समादिष्टस्तथेत्सुक्त्वा तु सञ्जयः ।
पार्थानामन्त्रयामास केशवं च यशस्विनम् ॥' ५-३२-७ (३२६७१)
अनुज्ञातः पाण्डवेन प्रययौ सञ्जयस्तदा ।
शासनं धृतराष्ट्रस्यक सर्वं कृत्वा महात्मनः ॥ ५-३२-८ (३२६७२)
ग तदा तु सञ्जयः क्षिप्रमेकाहेन परन्तपः ।
याति स्म हास्तिनपुरं निशाकाले परन्तप ॥' ५-३२-९ (३२६७३)
संप्राप्य हास्तिनपुरं शीघ्रमश्वैर्महाजवैः ।
अन्तःपुरं समास्थाय द्वाःस्थं वचनमब्रवीत् ॥ ५-३२-१० (३२६७४)
आचक्ष्व धृतराष्ट्रास्य द्वाऽस्थ मां समुपागतम् ।

सकाशात्पाण्डुपुत्राणां सञ्जयं माचिरं कृथाः ॥ ५-३२-११ (३२६७५)
॥॥ति चेदभिवदेस्त्वं हि द्वाःस्थ
॥॥विशेयं विदितो भूमिपस्य ।
॥॥द्यमत्रात्ययिकं हि मेऽस्ति
॥॥। स्थोऽथ श्रुत्वा नृपतिं जगाद ॥ ५-३२-१२ (३२६७६)
द्वाःस्थ उवाच। ५-३२-१३क्ष् (३४३४)
सञ्जयोऽयं भूमिपते नमस्ते
दिदृक्षया द्वारमुपागतस्ते ।
प्राप्तो दूतः पाण्डवानां सकाशात्
प्रशाधि राजन्किमयं करोतु ॥ ५-३२-१३ (३२६७७)
धृतराष्ट्र उवाच। ५-२३-१४क्ष् (३४३५)
आचक्ष्व मां कुशलिनं कल्पमस्मै
प्रवेश्यतां स्वागतं सञ्जयाय
न चाहमेतस्य भवाम्यकल्पः
स मे कस्माद्द्वारि तेष्ठेच्च सक्तः ॥ ५-३२-१४ (३२६७८)
वैशम्पायन उवाच। ५-२३-१५क्ष् (३४३६)
ततः प्रविश्यानुमते नृपस्य
महद्वेश्म प्राज्ञशूरार्यगुप्तम् ।
सिंहासनस्थं पार्थिवमाससाद
वैचित्रवीर्यं प्राञ्जलिः सूतपुत्रः ॥ ५-३२-१५ (३२६७९)
संजय उवाच। ५-३२-१६क्ष् (३४३७)
सञ्जयोऽहं भूमिपते नमस्ते
प्राप्तोऽस्मि गत्वा नरदेव पाण्डवान् ।
अभिवाद्य त्वां पाण्डुपुत्रो मनस्वी
युधिष्ठिरः कुशलं चान्वपृच्छत् ॥ ५-३२-१६ (३२६८०)
स ते पुत्रान्पृच्छति प्रीयमाणः
कच्चित्पुत्रैः प्रीयसे नप्तृभिश्च ।
तथा सुहृद्भिः सचिवैश्च राजन्
ये चापि त्वामुपजीवन्ति तैश्च ॥ ५-३२-१७ (३२६८१)
धृतराष्ट्र उवाच। ५-३२-१८क्ष् (३४३८)
अभिनन्द्य त्वां तात वदामि सञ्जय
अजातशत्रुं च सुखेन पार्थम् ।
कच्चित्स राजा कुशली सपुत्रः
सहामात्यः सानुजः कौरवाणाम् ॥ ५-३२-१८ (३२६८२)
सञ्जय उवाच। ५-३२-१९क्ष् (३४३९)
सहामात्य कुशली पाण्डुपुत्रो

बुभूषते यच्च तेऽग्रे त्मनाऽभूत्
निर्णीक्तधर्मार्थकरो मनस्वी
बहुश्रुतो दृष्टिमाञ्शीलवांश्च ॥ ५-३२-१९ (३२६८३)
परो धर्मः पाण्डवस्यानृशंस्यं
धर्मः परो वित्तचयान्मतोऽस्य ।
सुखप्रियेऽधर्महीनेऽनपार्थे
नु रुध्यते भारत तस्य बुद्धिः ॥ ५-३२-२० (३२६८४)
परप्रयुक्तः पुरषो विचेष्टते
सूत्रप्रोता दारुमयीव योषा ।
इमं दृष्ट्वा नियमं पाण्डवस्य
मन्ये परं कर्म दैवं मनुष्यात् ॥ ५-३२-२१ (३२६८५)
इमं च दृष्ट्वा तव कर्म दोषं
पापोदर्कं घोरमवर्णरूपम् ।
यावत्परः कामयतेऽतिवेलं
तावन्नरोऽयं लभते प्रशंसाम् ॥ ५-३२-२२ (३२६८६)
अजातशत्रुस्तु विहाय पापं
जीर्णां त्वचं सर्प इवासमर्थाम् ।
विरोचते ह्यार्यवृत्तेन वीरो
युधिष्ठिरस्त्वयि पापं विसृज्य ॥ ५-३२-२३ (३२६८७)
हन्तात्मनः कर्म निबोध राजन्
धर्मार्थयुक्तादार्यवृत्तादपेतम् ।
उपक्रोशं चेह गतोऽसि राजन्
भूयश्च पापं प्रसजेदमुत्र ॥ ५-३२-२४ (३२६८८)
स त्वमर्थं संशयितं विना तै-
राशंससे पुत्रवशानुगोऽस्य ।
अधर्मशब्दश्च महान्पृथिव्यां
नेदं कर्म त्वत्समं भारताग्र्य ॥ ५-३२-२५ (३२६८९)
हीनप्रज्ञो दौष्कुलेयो नृशंसो
दीर्घं वैरी क्षत्रविद्यास्वधीरः ।
एवंधर्मानापदः संश्रयेयु-
र्हीनवीर्यो यश्च भवेदशिष्टः ॥ ५-३२-२६ (३२६९०)
कुले जातो बलवान्यो यशस्वी ।
बहुश्रुतः सुखजीवी यतात्मा ।
धर्माधर्मौ ग्रथितौ यो बिभर्ति
स ह्यस्य दिष्टस्य वशादुपैति ॥ ५-३२-२७ (३२६९१)
कथं हि मन्त्राग्र्यधरो मनीषी

धर्मार्थयोरापदि संप्रणेता ।
एवमुक्तः सर्वमन्त्रैरहीनो
नरो नृशंसं कर्म कुर्यादमूढः ॥ ५-३२-२८ (३२६९२)
तव ह्यमी मन्त्रविदः समेत्य
समासते कर्मसु नित्ययुक्ताः ।
तेषांमयं बलवान्निश्चयश्च
कुरुक्षये नियमेनोदपादि ॥ ५-३२-२९ (३२६९३)
अकालिकं कुरवो नाभविष्यन्
पापेन चेत्पापमजातशत्रुः
इच्छेञ्जातु त्वयि पापं विसृज्य
निन्दा चेयं तव लोकेऽभविष्यत् ॥ ५-३२-३० (३२६९४)
किमन्यत्र विषयादीश्वराणां
यत्र पार्थः परलोकं स्म द्रष्टुम् ।
अत्यक्रामत्स तथा संमतः स्या-
न्न संशयो नास्ति मनुष्यकारः ॥ ५-३२-३१ (३२६९५)
एतान्गुणान्कर्मकृतानवेक्ष्य
भावाभावौ वर्तमानावनित्यौ ।
बलिर्हि राजा पारमविन्दमानो
नान्यत्कालात्कारणं तत्र मेने ॥ ५-३२-३२ (३२६९६)
चक्षुःश्रोत्रे नासिका त्वक् च जिह्वा
ज्ञानस्यैतान्यायतनानि जन्तोः ।
तानि प्रीतान्येव तृष्णाक्षयान्ते
तान्यव्यथो दुःखहीनः प्रणुद्यात् ॥ ५-३२-३३ (३२६९७)
नत्वेव मन्ये पुरुषस्य कर्म
सवर्तते सुप्रयुक्तं यथावत् ।
मातुः पितुः कर्मणाभिप्रसूतः
संवर्धते विधिवज्जोजनेन ॥ ५-३२-३४ (३२६९८)
प्रियाप्रिये सुखदुःखे च राज-
न्निन्दाप्रशंसे च भजन्त एव ।
परस्त्वेनं गर्हयतेऽपराधे
प्रशंसते साधुवृत्तं तमेव ॥ ५-३२-३५ (३२६९९)
स त्वां गर्हे भारतानां विरोधा-
दन्तो नूनं भविताऽयं प्रजानाम् ।
नोचेदिदं तव कर्मापराधात्
कुरून्दहेत्कृष्णवर्त्सेव कक्षम् ॥ ५-३२-३६ (३२७००)
त्वमेवैको जातु पुत्रस्य राजन्

वशं गत्वा सर्वलोके नेरन्द्र ।
कामात्मनः श्लाघनो द्यूतकाले
नागाः शमं पश्य विपाकमस्य ॥ ५-३२-३७ (३२७०१)
अनाप्तानां सङ्ग्रहात्त्वं नरेन्द्र
तथाऽऽप्तानां निग्रहाच्चैव राजन् ।
भूमिं स्फीतां दुर्बलत्वादनन्ता-
मशक्तस्त्वं रक्षितुं कौरवेय ॥ ५-३२-३८ (३२७०२)
अनुज्ञातो रथवेगावधूतः
श्रान्तोऽभिपद्ये शयनं नृसिंह ।
प्रातः श्रोतारः कुरवः सभाया-
मजातशत्रोर्वचनं समेताः ॥ ५-३२-३९ (३२७०३)
धृतराष्ट्र उवाच। ५-३२-४०क्ष (३४४०)
अनुज्ञातोऽस्यावसथं परेहि
प्रपद्यस्व शयनं सूतपुत्र ।
प्रातः श्रोतारः कुरवः सभाया-
मजातशत्रोर्वचनं त्वयोक्तम् ॥ ॥ ५-३२-४० (३२७०४)

इति श्रीमन्महाभारते उद्योगपर्वणि सञ्जययानपर्वणि
द्वात्रिंशोऽध्यायः ॥ ॥ समाप्तं चेदं सञ्जययानपर्व ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-३२-८ ॥॥॥
गच्छेत्युक्तः ॥
८ ॥
५-३२-१२ आत्ययिकं आवश्यकम् ॥
१२ ॥
५-३२-१४ कल्पं दृढम् । अकल्पः दर्शने असमर्थः । सक्तः निरुद्धः ॥
५-३२-१५ प्राज्ञाः शूराः आर्याः साधवश्च तैर्गुप्तम् ॥
५-३२-१७ नप्तृभिः पुत्रस्य पुत्रैः ॥
५-३२-१८ अजातशत्रुं सुखेन अभिनन्द्य त्वां प्रति वदामि ॥
५-३२-१९ ते तव अग्रे यत् त्मनः आत्मनः राज्यधनादिकं अभूत् तत्
बुभूषते प्राप्तुमिच्छति । निर्णिक्तौ दोषमलहीनौ धर्मार्थौ करोतीति
स तथा। मनस्वी उदारः । दृष्टिमान् क्रान्तदर्शी ॥
५-३२-२० परो मुख्यः । आनृशंस्यं दया ततः रोषऽमुख्यः
वित्तचयात् जात इति शेषः। वित्तसाध्यः सज्ञदानादिः। किंच
तस्य बुद्धिः अनपार्थे न अपार्थे निष्प्रयोजने सप्रयोजने

सुखप्रिये। संधिरार्षः। नु निश्चितं । रुध्यते अनुरुध्यते। अन्नादिजं देहपुष्टिसुखं पुत्रादि प्रियं च स परोपकारार्थमेवानुरुध्यते न कामकारेणेत्यर्थः ॥
५-३२-२१ परेण ईश्वरेण प्रयुक्तः । नियमं निग्रहं मनुष्यात् मनुष्याकारात् दैवं ऐश्वरं कर्म परं श्रेष्ठं मन्ये ॥
५-३२-२२ अवर्णरूपं अवर्णनीयरूपं अवाच्यमित्यर्थः । यावत्परः उत्कृष्टः शत्रुः कामयते तिष्ठत्वयं कंचित्कालमितीच्छति तावदपरो नरः प्रशंसा लभते ॥
५-३२-२५ तैर्विना एकाकिना संशयितं दुर्लभमपि आशंससे प्राप्तुम् । अस्य तव महान् पृथिव्यां अधर्मशब्दोऽकीर्तिर्भवेत्। त्वत्समं तव युक्तम् ॥
५-३२-२६ एवंधर्मान् ईदृशधर्मयुक्तान् पुरुषान् ॥
५-३२-२७ सहि स एव दिष्टस्य वशात् भाग्यवशात् अस्य कुलेजातत्वादिगुणजातस्य । कर्मणि षष्टी। इदं गुणषड्कमुपैति प्राप्नोति । त्वं तु कुले जातोपि केवलं अनृतोपजीवित्वात् गुणानत्रहीनोऽसीति भावः ॥
५-३२-२८ मन्त्र एव अग्र्यः श्रेष्ठो येषां ते मन्त्राग्र्यः भीष्मादयः तेषां धरो धर्ता । तैरेवं उक्तरीत्या द्यूतं मा कुर्वित्युक्तः कथं नृशंसं कर्म पाण्डवप्रव्राजनं कुर्यान्न कथमपीत्यर्थः ॥
५-३२-२९ अमी कर्णादयः । तेषां कुरुक्षये कुरुक्षयनिमित्तं अयं राज्यं न देयमिति निश्चयः नियमेन उदपादि उत्पन्नः ॥
५-३२-३० अकालिकं अकस्मादेव कुरवो नाभविष्यन् नष्टाःस्युः । तव पापेन कर्मणा प्रेरितोऽजातशत्रुः त्वयि पापं इच्छेच्चेत्। नन्वेवं तर्हि तस्य गोत्रवधदोषः स्यादित्याशङ्क्याह त्वयीति। स्वनाशहेतुं अधर्मं कुर्वति त्वयि चोरे इव पापं विसृज्य रादा निष्पापोऽनिन्द्यश्च स्यादित्यर्थः ॥
५-३२-३१ ईश्वराणां देवानां विषयादन्यत्र किम् । सर्वं देवाधीनमित्यर्थः। यत्र यतः पार्थोऽर्जुनः परलोकं द्रष्टुं अत्यक्रामत्। इमं लोकं सशरीर एव त्यक्तवान्। स तादृशः नारदादिवदुभयलोकसंचारयोग्यत्वेन साधूनां संमतोऽपि यदि तथा वनवसेन क्लेशसहः स्यात् तदा मनुष्यकारो नास्तीत्यस्मिन्नर्थे संशयो न ॥
५-३२-३२ एतानिति । एतान् शौर्यादीन् गुणान् कर्मकृतान्कर्मानुसारेण वृद्धिह्राययुक्तान् अवेक्ष्य अत एव भावाभावौ ऐश्वर्यानैश्वर्ये अनित्यौ आगमापायिनौ च अवेक्ष्य बलिराजा पूर्वपूर्वकर्मकारणपारं अन्तं अविन्दमानः सन् कालात् ईश्वरादन्यत्कारणं

अभ्युदयादिहेतुरन्यत्किंचिन्नास्तीति मेने ॥
३२ ॥
५-३२-३३ अतः सर्वस्य देवायत्तत्वात् तृष्णाक्षयेणैव इन्द्रियप्रीतिः
संपादनीया नतु नानायत्नसाध्यतत्तद्वीषयसमर्पणेनेत्याह चक्षुरिति
। ननु स्वस्वविषयालाभे तेषां कथं प्रीतिः स्यादित्याशङ्क्य तानि
निरोधान्येवेत्याह तानीति। अव्यथः लाभालाभादौ वैषम्यहीनः प्रणुद्यात्
स्वस्वगोचरेभ्यो निवर्तयेत् ॥
५-३२-३४ एतद्दूषयति नत्विति । एव प्राप्ते सति अन्ये आहुः। तदेवाह
पुरुषस्येति। संवर्तते सम्यक् फलवत् वर्तते। तदेवाह
मातुरिति। कर्माभावे जन्मबृद्धी न स्यातामित्यर्थः ५-३२-३६ किंच
नोचेदिति। इयं मया उच्यमानं कर्म पाण्डवेभ्यो राज्यांशप्रदानात्मकं
तव नोचेत् संमतमिति शेषः। तर्हि तवापराधात कृष्णवर्त्मांग्निः
कक्षं यथा दहति एवं कृष्णवर्त्मा कृष्ण एव मार्ग इव
सुखप्रापको यस्य स कृष्णवर्त्माऽर्जुनः कुरून् दहेदित्यावृत्त्या
योज्यम् ॥
५-३२-३७ श्लाघनः आत्मानं कृतार्थं मन्वानः । नागाः न गतवानसि ॥
५-३२-३८ अनाप्तानां कर्णादीनाम् । आप्तानां विदुरादीनाम्। निग्रहात् दूरीकरणात् ॥
५-३२-३९ अवधूतस्तिरस्कृतः । अत एव श्रान्तः। प्रपद्ये प्राप्नुयाम् ॥
५-३२-४० आवसथं गृहम् । परेहि गच्छ। प्रपद्यस्व सेवस्व ॥

उद्योगपर्व - अध्याय ०३३
॥ श्रीः ॥
५.३३. अध्यायः ३३

Mahabharata - Udyoga Parva - Chapter Topics
धृतराष्ट्रेण रात्रौ विदुरानयनम् ॥ १ ॥
चिन्तया प्रजागरंगतेन धृतराष्ट्रेण दुर्योधनादिसुखोपायप्रश्ने
विदुरेण नीतिकथन पूर्वकं पाण्डवेभ्यो राज्यदानस्य तदुपायत्वकथनम्
॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-३३-० (३२७०५)
वैशंपानय उवाच। ५-३३-०क्ष् (३४४१)
द्वाःस्थं प्राह महाप्राज्ञो धृतराष्ट्रो महीपतिः ।
विदुरं द्रष्टुमिच्छामि तमिहानय मा चिरम् ॥ ५-३३-१ (३२७०६)

प्रहितो धृतराष्ट्रेण दूतः क्षत्तारमब्रवीत् ।
ईश्वरस्त्वां महाराजो महाप्राज्ञ दिदृक्षति ॥ ५-३३-२ (३२७०७)
एवमुक्तस्तु विदुरः प्राप्य राजनिवेशनम् ।
अब्रवीद्धृतराष्ट्राय द्वाःस्थं मां प्रतिवेदय ॥ ५-३३-३ (३२७०८)
द्वाःस्थ उवाच। ५-३३-४क्ष् (३४४२)
विदुरोऽयमनुप्राप्तो राजेन्द्र तव शासनात् ।
द्रष्टुमिच्छति ते पादौ किं करोतु प्रशाधि माम् ॥ ५-३३-४ (३२७०९)
धृतराष्ट्र उवाच। ५-३३-५क्ष् (३४४३)
प्रवेशय महाप्रज्ञं विदुरं दीर्घदर्शिनम् ।
अहं हि विदुरस्यास्य नाकल्पो जातु दर्शने ॥ ५-३३-५ (३२७१०)
द्वाःस्थ उवाच। ५-३३-६क्ष् (३४४४)
प्रविशान्तःपुरं क्षत्तर्महारादजस्य धीमतः ।
न हि ते दर्शनेऽकल्पो जातु राजाऽब्रवीद्धि माम् ॥ ५-३३-६ (३२७११)
वैशम्पायन उवाच। ५-३३-७क्ष् (३४४५)
ततः प्रविश्य विदुरो धृतराष्ट्रनिवेशनम् ।
अब्रवीत्प्राञ्जलिर्वाक्यं चिन्तयानं नराधिपम् ॥ ५-३३-७ (३२७१२)
विदुरोऽहं महाप्राज्ञ संप्राप्तस्तव शासनात् ।
यदि किंचन कर्तव्यमयमस्मि प्रशाधि माम् ॥ ५-३३-८ (३२७१३)
धृतराष्ट्र उवाच। ५-३३-९क्ष् (३४४६)
सञ्जयो विदुर प्राप्तो गर्हयित्वा च मां गतः ।
अजातशत्रोः श्वो वाक्यं सभामध्ये स वक्ष्यति ॥ ५-३३-९ (३२७१४)
तस्याद्य कुरुवीरस्य न विज्ञातं वचो मया ।
तन्मे दहति गात्राणि तदकार्षीत्प्रजागरम् ॥ ५-३३-१० (३२७१५)
आग्रतो दह्यमानस्य श्रेयो यदनुपश्यसि ।
तद्ब्रूहि त्वं हि नस्तात धर्मार्थकुशलो ह्यसि ॥ ५-३३-११ (३२७१६)
यतः प्राप्तः सञ्जयः पाण्डवेभ्यो
न मे यथावन्मनसः प्रशान्तिः ।
सर्वेन्द्रियाण्यप्रकृतिं गतानि
किं वक्ष्यतीत्येव मेऽद्य प्रचिन्ता ॥ ५-३३-१२ (३२७१७)
ग तन्मे ब्रूहि विदुर त्वं यथाव-
न्मनीषितं सर्वमजातशत्रोः ।
यथा न नस्तात हितं भवेच्च
प्रजाश्च सर्वाः सुखिता भवेयुः ॥' ५-३३-१३ (३२७१८)
विदुर उवाच। ५-३३-१४क्ष् (३४४७)
अभियुक्तं बलवता दुर्बलं हीनसाधनम् ।
हृतस्वं कामिनं चोरमाविशन्ति प्रजागराः ॥ ५-३३-१४ (३२७१९)

कच्चिदेतैर्महादोषैर्न स्पृष्टोऽसि नराधिप ।
कच्चिच्च परवित्तेषु गृद्ध्यन्न परितप्यसे ॥ ५-३३-१५ (३२७२०)
धृतराष्ट्र उवाच। ५-३३-१६क्ष् (३४४८)
श्रोतुमिच्छामि ते धर्म्यं परं नैश्रेयसं वचः ।
अस्मिन्नादर्षिवंशे हि त्वमेकः प्राज्ञसंमतः ॥ ५-३३-१६ (३२७२१)
विदुर उवाच। ५-३३-१७क्ष् (३४४९)
राजा लक्षणसंपन्नस्त्रैलोक्यस्याधिपो भवेत् ।
प्रेष्यस्ते प्रेषितश्चैव धृतराष्ट्र युधिष्ठिरः ॥ ५-३३-१७ (३२७२२)
विपरीततरश्च त्वं भागधेये न संमतः ।
अर्चिषां प्रक्षयाच्चैव धर्मात्मा धर्मकोविदः ॥ ५-३३-१८ (३२७२३)
आनृशंस्यादनुक्रोशाद्धर्मात्सत्यात्पराक्रमात् ।
गुरुत्वात्त्वयि संप्रेक्ष्य बहून्क्लेशांस्तितिक्षते ॥ ५-३३-१९ (३२७२४)
दुर्योधने सौबले च कर्णे दुःशासने तथा ।
एतेष्वैश्वर्यमाधाय कथं त्वं भूतिमिच्छसि ॥ ५-३३-२० (३२७२५)
आत्मज्ञानं समारम्भस्तितिक्षा धर्मनित्यता ।
यमर्थान्नापकर्षन्ति स वै पण्डित उच्यते ॥ ५-३३-२१ (३२७२६)
ग एकस्माद्बृक्षाद्यज्ञपात्राणि राज-
न्स्रुक्व द्रोणी पेठनीपीडने च ।
एतस्माद्राजन्ब्रुवतो मे निबोध
एकस्माद्वै जायतेऽसच्च सच्च ॥ ५-३३-२२ (३२७२७)
निषेवते प्रशस्तानि निन्दितानि न सेवते ।
अनास्तिकः श्रद्दधान एतत्पण्डितलक्षणम् ॥ ५-३३-२३ (३२७२८)
क्रोधो हर्षश्च दर्पश्च ह्रीः स्तम्भो मान्यमानिता ।
यमर्थान्नापकर्षन्ति स वै पण्डित उच्यते ॥ ५-३३-२४ (३२७२९)
यस्य कृत्यं न जानन्ति मन्त्रं वा मन्त्रितं परे ।
कृतमेवास्य जानन्ति स वै पण्डित उच्यते ॥ ५-३३-२५ (३२७३०)
यस्य कृत्यं न विघ्नन्ति शीतमुष्णं भयं रतिः ।
समृद्धिरसमृद्धिर्वा स वै पण्डित उच्यते ॥ ५-३३-२६ (३२७३१)
यस्य संसारिणी प्रज्ञा धर्मार्थावनुवर्तते ।
कामादर्थं वृणीते यः स वै पण्डित उच्यते ॥ ५-३३-२७ (३२७३२)
यथाशक्ति चिकीर्षन्ति यथाशक्ति च कुर्वते ।
किंचिदवमन्यन्ते नराः पण्डितबुद्धयः ॥ ५-३३-२८ (३२७३३)
क्षिप्रं विजानाति चिरं शृणोति
विज्ञाय चार्यं भजते न कामात् ।
नासंपृष्टो व्युपयुङ्क्ते परार्थे
तत्प्रज्ञानं प्रथमं पण्डितस्य ॥ ५-३३-२९ (३२७३४)

नाप्राप्यमभिवाञ्छन्ति नष्टं नेच्छन्ति शोचितुम् ।
आपत्सु च न मुह्यन्ति नराः पण्डितबुद्धयः ॥ ५-३३-३० (३२७३५)
निश्चित्य यः प्रक्रमते नान्तर्वसति कर्मणः ।
अवन्ध्यकालो वश्यात्मा स वै पण्डित उच्यते ५-३३-३१ (३२७३६)
आर्यकर्मणि रज्यन्ते भूतिकर्माणि कुर्वते
हितं च नाभ्यसूयन्ति पण्डिता भरतर्षभ ॥ ५-३३-३२ (३२७३७)
न हृष्यत्यात्मसंमाने नावमानेन तप्यते ।
गाङ्गो ह्रद इवाक्षोभ्यो यः स पण्डित उच्यते ॥ ५-३३-३३ (३२७३८)
तत्त्वज्ञः सर्वभूतानां योगज्ञः सर्वकर्मणाम् ।
उपायज्ञो मनुष्याणां नरः पण्डित उच्यते ॥ ५-३३-३४ (३२७३९)
प्रवृत्तवाक् चित्रकथ ऊहवान्प्रतिभानवान् ।
आशु ग्रन्थस्य वक्ता च यः स पण्डित उच्यते ॥ ५-३३-३५ (३२७४०)
श्रुतं प्रज्ञानुगं यस्य प्रज्ञा चैव श्रुतानुगा ।
असंभिन्नार्यमर्यादः पण्डिताख्यां लभेत सः ॥ ५-३३-३६ (३२७४१)
ग अर्थं महान्तमासाद्य विद्यामेश्वर्यमेव च ।
विचरत्यसमुन्नद्धो यः स पण्डित उच्यते ’॥ ५-३३-३७ (३२७४२)
अश्रुतश्च समुन्नद्धो दरिद्रश्च महामनाः ।
अर्थांश्चाकर्मणा प्रेप्सुर्मूढ इत्युच्यते बुधैः ॥ ५-३३-३८ (३२७४३)
स्वमर्थं यः परित्यज्य परार्थमनुतिष्ठति ।
मिथ्या चरति मित्रार्थे यश्च मूढः स उच्यते ॥ ५-३३-३९ (३२७४४)
अकामान्कामयति यः कामयानान्परित्यजेत् ।
बलवन्तं च यो द्वेष्टि तमाहुर्मूढचेतसम् ॥ ५-३३-४० (३२७४५)
अमित्रं कुरुते मित्रं मित्रं द्वेष्टि हिनस्ति च ।
कर्म चारभते दुष्टं तमाहुर्मूढचेतसम् ॥ ५-३३-४१ (३२७४६)
संसारयति कृत्यानि सर्वत्र विचिकित्सते ।
चिरं करोति क्षिप्रार्थे स मूढो भरतर्षभ ॥ ५-३३-४२ (३२७४७)
श्राद्धं पितृभ्यो न ददाति दैवतानि न चार्चति ।
सुहृन्मित्रं न लभते तमाहुर्मूढचेतसम् ॥ ५-३३-४३ (३२७४८)
अनाहूतः प्रविशति अपृष्टो बहु भाषते ।
अविश्वस्ते विश्वसिति मूढचेता नराधमः ॥ ५-३३-४४ (३२७४९)
परं क्षिपति दोषेण वर्तमानः स्वयं तथा ।
यश्च क्रुध्यत्यनीशानः स च मूढतमो नरः ॥ ५-३३-४५ (३२७५०)
आत्मनो बलमाज्ञाय धर्मार्थपरिवर्जितम् ।
अलभ्यमिच्छन्नैष्कर्म्यान्मूढबुद्धिरिहोच्यते ॥ ५-३३-४६ (३२७५१)
अशिष्यं शास्ति यो राजन्यश्च शिष्यं न शास्ति च ।
कदर्यं भजते यश्च तमाहुर्मूढचेतसम् ॥ ५-३३-४७ (३२७५२)

एकः संपन्नमाश्नाति वस्ते वासश्च शोभनम् ।
योऽसंविभज्य भृत्येभ्यः को नृशंसतरस्ततः ॥ ५-३३-४८ (३२७५३)
एकः पापानि कुरुते फलं भुङ्क्ते महाजनः ।
भोक्तारो विप्रमुच्यन्ते कर्ता दोषेण लिप्यते ॥ ५-३३-४९ (३२७५४)
एकं हन्यान्न वा हन्यादिषुर्मुक्तो धनुष्मता ।
बुद्धिर्बुद्धिमतोत्सृष्टा हन्याद्राष्ट्रं सराजकम् ॥ ५-३३-५० (३२७५५)
एकया द्वे विनिश्चित्य त्रींश्चतुर्भिर्वशे कुरु ।
पञ्च जित्वा विदित्वा षट् सप्त हित्वा सुखी भवा ॥ ५-३३-५१ (३२७५६)
एकं विषरसो हन्ति शस्त्रेणैकश्च वध्यते ।
सराष्ट्रं सप्रजं हन्ति राजानं मन्त्रपिप्लवः ॥ ५-३३-५२ (३२७५७)
एकः स्वादु न भुञ्जीत एकश्चार्थान्न चिन्तयेत् ।
एको न गच्छेदध्वानं नैकः सुप्तेषु जागृयात् ॥ ५-३३-५३ (३२७५८)
एकमेवाद्वितीयं तद्यद्राजन्नावबुध्यसे ।
सत्यं स्वगस्य सोपानं पारावारस्य नौरिव ॥ ५-३३-५४ (३२७५९)
एकः क्षमावतां दोषो द्वितीयो नोपपद्यते ।
यदेनं क्षमया युक्तमशक्तं मन्यते जनः ॥ ५-३३-५५ (३२७६०)
सोऽस्य दोषो न मन्तव्यः क्षमा हि परमं बलम् ।
क्षमा गुणो ह्यशक्तानां शक्तानां भूषणं क्षमा ॥ ५-३३-५६ (३२७६१)
क्षमा वशीकृतीर्लोके क्षमया किं न साध्यते ।
शान्तिखड्गः करे यस्य किं करिष्यति दुर्जनः ॥ ५-३३-५७ (३२७६२)
अतृणे पतितो वह्निः स्वयमेवोपशाम्यति ।
अक्षमावान्परं दोषैरात्मानं चैव योजयेत् ॥ ५-३३-५८ (३२७६३)
एको धर्मः परं श्रेयः क्षमैका शान्तिरुत्तमा ।
विद्यैका परमा तृप्तिरहिंसैका सुखावहा ॥ ५-३३-५९ (३२७६४)
द्वाविमौ ग्रसते भूमिः सर्पो बलिशयानिव ।
राजानं चाविरोद्धारं ब्राह्मणं चाप्रवासिनम् ॥ ५-३३-६० (३२७६५)
द्वे कर्मणी नरः कुर्वन्नस्मिँल्लोके विरोचते ।
अब्रुवन्परुषं किंचिदसतोऽनर्चयंस्तथा ॥ ५-३३-६१ (३२७६६)
द्वाविमौ पुरुषव्याघ्र परप्रत्ययकारिणौ ।
स्त्रियः कामितकामिन्यो मूर्खाः पूजितपूजकाः ॥ ५-३३-६२ (३२७६७)
द्वाविमौ कण्टकौ तीक्ष्णौ शरीरपरिशोषिणौ ।
यश्चाधनः कामयते यश्च कुप्यत्यनीश्वरः ॥ ५-३३-६३ (३२७६८)
द्वावेव न विराजेते विपरीतेन कर्मणा ।
गृहस्थश्च निरारम्भः कार्यवांश्चैव भिक्षुकः ॥ ५-३३-६४ (३२७६९)
द्वाविमौ पुरुषौ राजन्स्वर्गस्योपरि तिष्ठतः ।
प्रभुश्च क्षमया युक्तो दरिद्रश्च प्रदानवान् ॥ ५-३३-६५ (३२७७०)

न्यायागतस्य द्रव्यस्य बोद्धव्यौ द्वावतिक्रमौ ।
अपात्रे प्रतिपत्तिश्च पात्रे चात्प्रतिपादनम् ॥ ५-३३-६६ (३२७७१)
द्वावभ्यसि निवेष्टव्यौ गले बध्वा दृढां शिलाम् ।
धनवन्तमदातारं दरिद्रं चातपस्विनम् ॥ ५-३३-६७ (३२७७२)
द्वाविमौ पुरुषव्याघ्र सूर्यमण्डलभेदिनौ ।
परिव्राड्योगयुक्तश्च रणे चाभिमुखो हतः ॥ ५-३३-६८ (३२७७३)
त्रयो न्याया मनुष्याणां श्रूयन्ते भरतर्षभ ।
कनीयान्मध्यमः श्रेष्ठ इति वेदविदो विदुः ॥ ५-३३-६९ (३२७७४)
त्रिविधाः पुरुषा राजन्नुत्तमाधममध्यमाः ।
नियोजयेद्यथावत्तांस्त्रिविधेष्वेव कर्मसु ॥ ५-३३-७० (३२७७५)
त्रय एवाधना राजन्भार्या दासस्तथा सुतः ।
यत्ते समधिगच्छन्ति यस्यैते तस्य तद्धनम् ॥ ५-३३-७१ (३२७७६)
हरणं च परस्वानां परदाराभिमर्शनम् ।
सुहृदश्च परित्यागस्त्रयो दोषाः क्षयावहाः ॥ ५-३३-७२ (३२७७७)
त्रिविधं नरकस्येदं द्वारं नाशनमात्मनः ।
कामः क्रोधस्तथा लोभस्तस्मादेतत्त्रयं त्यजेत् ॥ ५-३३-७३ (३२७७८)
वरप्रदानं राज्यं च पुत्रजन्म च भारत ।
शत्रोश्च मोक्षणं कृच्छ्रात्रीणि चैकं च तत्समम् ॥ ५-३३-७४ (३२७७९)
भक्तं च भजमानं च तवास्मीति च वादिनम् ।
त्रीनेताञ्छरणं प्राप्तान्विषमेऽपि कन सन्त्यजेत् ॥ ५-३३-७५ (३२७८०)
चत्वारि राज्ञा तु महाबलेन
वर्ज्यान्याहुः पण्डितस्तानि विद्यात् ।
अल्पप्रज्ञैः सह मन्त्रं न कुर्या-
न्न दीर्घसूत्रैरलसैश्चारणैश्च ॥ ५-३३-७६ (३२७८१)
चतवारि ते तात गृहे वसन्तु
श्रियाऽभिजुष्टस्य गृहस्थधर्मे ।
वृद्धो ज्ञातिरवसन्नः कुलीनः
सखा दरिद्रो भगिनी चानपत्या ॥ ५-३३-७७ (३२७८२)
चत्वार्याह महाराज साद्यस्कानि बृहस्पतिः ।
पृच्छते त्रिदशेन्द्राय तानीमानि निबोध मे ॥ ५-३३-७८ (३२७८३)
देवतानां च सङ्कल्पमनुभावं च धीमताम् ।
विनयं कृतविद्यानां विनाशं पापकर्मणाम् ॥ ५-३३-७९ (३२७८४)
चत्वारि कर्माण्यभयंकराणि
भयं प्रयच्छन्त्ययथाकृतानि ।
मानाग्निहोत्रमुत मानमौनं
मानेनाधीतमुत मानयज्ञः ॥ ५-३३-८० (३२७८५)

पञ्चाग्नयो मनुष्येण परिचर्याः प्रयत्नतः ।
पिता माताग्निरात्मा च गुरुश्च भरतर्षभ ॥ ५-३३-८१ (३२७८६)
पञ्चैव पूजयँल्लोके यशः प्राप्नोति केवलम् ।
देवान्पितॄन्मनुष्यांश्च भिक्षूनतिथिपञ्चमान् ॥ ५-३३-८२ (३२७८७)
पञ्च त्वाऽनुगमिष्यन्ति यत्र यत्र गमिष्यसि ।
मित्राण्यमित्रा मध्यस्था उपजीव्योपजीविनः । ५-३३-८३ (३२७८८)
पञ्चेन्द्रियस्य मर्त्यस्य छिद्रं चेदेकमिन्द्रियम् ।
ततोऽस्य स्रवति प्रज्ञा दृतेः पात्रादिवोदकम् ॥ ५-३३-८४ (३२७८९)
षड्दोषाः पुरुषेणेह हातव्या भूतिमिच्छता ।
निद्रा तन्द्री भयं क्रोध आलस्यं दीर्घसूत्रता । ५-३३-८५ (३२७९०)
षडिमान्पुरुषो जह्याद्विन्नां नावमिवार्णवे ।
अप्रवक्तारमाचार्यमनधीयानमृत्विजम् ॥ ५-३३-८६ (३२७९१)
अरक्षितारं राजानं भार्यां चाप्रियवादिनीम् ।
ग्रामकामं च गोपालं वनकामं च नापितम् ॥ ५-३३-८७ (३२७९२)
षडेव तु गुणाः पुंसा न हातव्याः कदाचन ।
सत्यं दानमनालस्यमनसूया क्षमा धृतिः ॥ ५-३३-८८ (३२७९३)
अर्थागमो नित्यमरोगिता च
प्रिया च भार्या प्रियवादिनी च ।
वश्यश्च पुत्रोऽर्थकरी च विद्या
षड्जीवलोकस्य सुखानि राजन् ॥ ५-३३-८९ (३२७९४)
षण्णामात्मनि नित्यानामैश्वर्यं योऽधिगच्छति ।
न स पापैः कुतोऽनर्थैर्युज्यते विजितेन्द्रियः ॥ ५-३३-९० (३२७९५)
षडिमे षट्सु जीवन्ति सप्तमो नोपलभ्यते ।
चोराः प्रमत्ते जीवन्ति व्याधितेषु चिकित्सकाः ॥ ५-३३-९१ (३२७९६)
प्रमदाः कामयानेषु यजमानेषु याजकाः ।
राजा विवदमानेषु नित्यं मूर्खेषु पण्डिताः ॥ ५-३३-९२ (३२७९७)
षडिमानि विनश्यन्ति मुहूर्तमनवेक्षणात् ।
गावः सेवा कृषिर्भार्या विद्या वृषलसङ्गतिः ॥ ५-३३-९३ (३२७९८)
षडेते ह्यवमन्यन्ते नित्यं पूर्वोपकारिणम् ।
आचार्यं शिक्षिताः शिष्याः कृतदाराश्च मातरं ॥ ५-३३-९४ (३२७९९)
नारीं विगतकामास्तु कृतार्थाश्च प्रयोजकम् ।
नावं निस्तीर्णकान्तारा नातुराश्च चिकित्सकं ॥ ५-३३-९५ (३२८००)
आरोग्यमानृण्यमविप्रवासः
सद्भिर्मनुष्यैः सह संप्रयोगः ।
स्वप्रत्यया वृत्तिरभीतवासः
षट् जीवलोकस्य सुखानि राजन् ॥ ५-३३-९६ (३२८०१)

ईर्षुर्धृणी नसन्तुष्टः क्रोधनो नित्यशङ्कितः ।
परभाग्योपजीवी च षडेते नित्यदुःखिताः ॥ ५-३३-९७ (३२८०२)
सप्त दोषाः सदा राज्ञा हातव्या व्यसनोदयाः ।
प्रायशो यैर्विनश्यन्ति कृतमूला अपीश्वराः ॥ ५-३३-९८ (३२८०३)
स्त्रियोऽक्षा मृगया पानं वाक्पारुष्यं च पञ्चमम् ।
महच्च दण्डपारुष्यमर्थदूषणमेव च ॥ ५-३३-९९ (३२८०४)
अष्टौ पूर्वनिमित्तानि नरस्य विनशिष्यतः ।
ब्राह्मणान्प्रथमं द्वेष्टि ब्राह्मणैश्च विरुध्यते ॥ ५-३३-१०० (३२८०५)
ब्राह्मणस्वानि चादत्ते ब्राह्मणांश्च जिघांसति ।
रमते निन्दया चैषां प्रशंसां नाभिनन्दति ॥ ५-३३-१०१ (३२८०६)
नैनान्स्मरति कृत्येषु याचितश्चाभ्यसूयति ।
एतान्दोषान्नरः प्राज्ञो बुद्ध्या बुध्वा विसर्जयेत् ॥ ५-३३-१०२ (३२८०७)
अष्टाविमानि हर्षस्य नवनीतानि भारत ।
वर्तमानानि दृश्यन्ते तान्येव स्वसुखान्यपि ॥ ५-३३-१०३ (३२८०८)
समागमश्च सखिभिर्महांश्चैव धनागमः ।
पुत्रेण च परिष्वङ्गः सन्निपातश्च मैथुने ॥ ५-३३-१०४ (३२८०९)
समये च प्रियालापः स्वयूथ्येषु समुन्नतिः ।
अभिप्रेतस्य लाभश्च पूजा च जनसंसदि ॥ ५-३३-१०५ (३२८१०)
अष्टौ गुमाः पुरुषं दीपयन्ति
प्रज्ञा च कौल्यं च दमः श्रुतं च ।
पराक्रमश्चाबहुभाषिता च
दानं यथाशक्ति कृतज्ञता च ॥ ५-३३-१०६ (३२८११)
नवद्वारमिदं वेश्म त्रिस्थूणं पञ्चसाक्षिकम् ।
क्षेत्रज्ञाधिष्ठितं विद्वान्यो वेद स परः कविः ॥ ५-३३-१०७ (३२८१२)
दश धर्मं न जानन्ति धृतराष्ट्र निबोध तान् ।
मत्तः प्रमत्त उन्मत्तः श्रान्तः क्रुद्धो बुभुक्षितः ॥ ५-३३-१०८ (३२८१३)
त्वरमाणश्च लुब्धश्च भीतः कामी च ते दश ।
तस्मादेतेषु भावेषु न प्रसज्जेत पण्डितः ॥ ५-३३-१०९ (३२८१४)
अत्रैवोदाहरन्तीममितिहासं पुरातनम् ।
पुत्रार्थमसुरेन्द्रेण गीतं चैव सुधन्वना ॥ ५-३३-११० (३२८१५)
यः काममन्यू प्रजहाति राजा
पात्रे प्रतिष्ठापयते धनं च ।
विशेषविच्छ्रुतवान्क्षिप्रकारी
तं सर्वलोकः कुरुते प्रमाणम् ॥ ५-३३-१११ (३२८१६)
जानाति विश्वासयितुं मनुष्यान्
विज्ञातदोषेषु दधाति दण्डम् ।

जानाति मात्रां च तथा क्षमां च
तं तादृशं श्रीर्जुषते समग्रा ॥ ५-३३-११२ (३२८१७)
सुदुर्बलं नावजानाति कंचि-
द्युक्तो रिपुं सेवते बुद्धिपूर्वम् ।
न विग्रहं रोचयते बलस्थैः
काले च यो विक्रमते स धीरः ॥ ५-३३-११३ (३२८१८)
प्राप्याप ॥ न व्यथते कदाचि-
दुद्योगमान्वच्छति चाप्रमत्तः ।
दुःखं च काले सहते महात्मा
धुरन्धरस्तस्य जिताः सपत्नाः ॥ ५-३३-११४ (३२८१९)
अनर्थकं विप्रवासं गृहेभ्यः
पापैः सन्धिं परदाराभिमर्शम् ।
दम्भं स्तैन्यं पैशुनं मद्यमानं
न सेवते यः स सुखी सदैव ॥ ५-३३-११५ (३२८२०)
न संरम्भेणारभते त्रिवर्ग-
माकारितः शंसति तत्त्वमेव ।
न मित्रार्थे रोचयते विवादं
नापूजितः कुप्यति चाप्यमूढः ॥ ५-३३-११६ (३२८२१)
न योऽभ्यसूयत्सयनुकम्पते च
न दुर्बलः प्रातिभाव्यं करोति ।
नात्याह किंचित्क्षमते विवादं
सर्वत्र तादृग्लभते प्रशंसाम् ॥ ५-३३-११७ (३२८२२)
यो नोद्धतं कुरुते जातु वेषं
न पौरुषेणापि विकत्थतेऽन्यान् ।
न मूर्च्छितः कटुकान्याह किंचि-
त्प्रियं सदा तं कुरुते जनो हि ॥ ५-३३-११८ (३२८२३)
न वैरमुद्दिपयति प्रशान्तं
न दर्पमारोहति शान्तिमेति ।
न दुर्गतोऽस्मीति करोत्यकार्यं
तमार्यशीलं परमाहुरार्याः ॥ ५-३३-११९ (३२८२४)
न स्वे सुखे वै कुरुते प्रहर्षं
नान्यस्य दुःखे भवति प्रहृष्टः ।
दत्त्वा न पश्चात्कुरुतेऽनुतापं
स कथ्यते सत्पुरुषार्यशीलः ॥ ५-३३-१२० (३२८२५)
देशाचारान्समयाञ्जातिधर्मान्
बुभूषते यः स परावरज्ञः ।

स यत्र तत्राभिगतः सदैव
महाजनस्याधिपत्यं करोति ॥ ५-३३-१२१ (३२८२६)
दम्भं मोहं मत्सरं पापकृत्यं
राजद्विष्टं पैशुनं पूगवैरम् ।
मत्तोन्मत्तैर्दुर्जनैश्चापि वादं
यः प्रज्ञावान्वर्जयेत्स प्रधानः ॥ ५-३३-१२२ (३२८२७)
दमं शौचं दैविकं मङ्गलानि
प्रायश्चित्तान्विविधाँल्लोकवादान् ।
एतानि यः कुरुते नैत्यकानि
तस्योत्थानं देवता राधयन्ति ॥ ५-३३-१२३ (३२८२८)
समैर्विवाहं कुरुते न हीनैः
समैः सख्यं व्यवहारं कथां च ।
गुणैर्विशिष्टांश्च पुरो दधाति
विपश्चितस्तस्य नयाः सुनीताः ॥ ५-३३-१२४ (३२८२९)
मितं भुङ्क्ते संविभज्याश्रितेभ्यो
मितं स्वपित्यमितं कर्म कृत्वा ।
ददात्यमित्रेष्वपि याचितः सं-
स्तमात्मवन्तं प्रजहत्यनर्थाः ॥ ५-३३-१२५ (३२८३०)
चिकीर्षितं विप्रकृतं च यस्य
नान्ये जनाः कर्म जानन्ति किंचित् ।
मन्त्रे गुप्ते सम्यगनुष्ठिते च
नाल्पोऽप्यस्य च्यवते कश्चिदर्थः ॥ ५-३३-१२६ (३२८३१)
यः सर्वभूतप्रशमे निविष्टः
सत्यो मृदुर्मानकृच्छुद्धभावः
अतीव स ज्ञायते ज्ञातिमध्ये
महामणिर्जात्य इव सप्रन्नः ॥ ५-३३-१२७ (३२८३२)
य आत्मनाऽपत्रपते भृशं नरः
स सर्वलोकस्य गुरुर्भवत्युत
अनन्तजेजाः सुमनाः समाहितः
स तेजसा सूर्य इवावभासते ॥ ५-३३-१२८ (३२८३३)
वने जाताः शापदग्धस्य राज्ञः
पाण्डोः पुत्राः पञ्च पञ्चेन्द्रकल्पाः ।
त्वयैव बाला वर्धिताः शिक्षिताश्च
तवादेशं पालयन्त्याम्बिकेय ॥ ५-३३-१२९ (३२८३४)
प्रदायैषामुचितं तातराज्यं
सुखी पुत्रैः सहितो मोदमानः ।

न देवानां नापि च मानुषाणां
भविष्यसि त्वं गर्हणीयो नरेन्द्र ॥ ॥ ५-३३-१३० (३२८३५)

इति श्रीमन्महाभारते उद्योगपर्वणि प्रजागरपर्वणि त्रयस्त्रिंशोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-३३-५ अकल्पो न किंतु कल्पः समर्थ एव । सर्वदा विदुरसंदर्शनं
मय अप्रत्याख्येयमित्यर्थः ॥
५-३३-१० प्रजागरं निद्राया अभावम् ॥
५-३३-१२ यतः यदा प्राप्तः सञ्जयस्तदारभ्येत्यर्थः । प्रचिन्ता
प्रकृष्टा चिन्ता ॥
५-३३-१४ अभियुक्तमित्यर्धोपात् एकः त्रयोऽन्ये च प्रदागरावेशभाजनानि ॥
५-३३-१५ गृद्धयन् लिप्सावान् ॥
५-३३-१७ प्रेष्यः प्रकर्षेण एषणीयः प्रार्थ्य इतियावत् । ते त्वया
प्रेषितो वनमिति शेषः ॥
५-३३-१८ विपरीतः राजलक्षणहीनः सर्वेषां द्वेष्यः । भागधेये
राज्यांशे । अर्चिषां नेत्ररश्मीनां प्रक्षयात्। न संमतस्त्वं
धर्मात्मापि सन्निति उपहासः ॥
५-३३-१९ आनृशंस्यात् क्रूरत्वाभावात् । अनुक्रोशात् दयालुत्वात्। तितिक्षते
युधिष्ठिर इति शेषः ॥
५-३३-२० एतेष्विति । एतेषामधीनो भूत्वेत्यर्थः ॥
५-३३-२१ एतेषु पाण्डित्यं नास्तीति वक्तुं पाण्डितलक्षणान्याह
आत्मज्ञानमित्यादिना । आत्मज्ञानं शास्त्रीयापेक्षम्। समारम्भः
शक्त्यपेक्षः । तितिक्षा वैराग्यापेक्षा। धर्मनित्यता
श्रद्धापेक्षा। एतानि अयथाभूतानि मूढान् पुरुषार्थात् भ्रंशयन्ति
नतु पण्डितानित्यर्थः ॥
५-३३-२३ अनास्तिकः परलोकाद्यस्तीति जानन् । श्रद्दधानः श्रद्धा
गुरुवेदवाक्यादिषु फलावश्यंभावनिश्चयस्तद्वान् ॥
५-३३-२४ दर्पः परावज्ञानम् । स्तम्भः असन्नतिः। मान्यमानिता मान्यं
मानार्हं आत्मानं मन्यत इति मान्यमानी तस्य भावस्तत्ता ॥
५-३३-२७ संसारिणी स्वभावतोऽनवस्तितापि कामात् ऐहिक सुखात्
उभयलोकसुखावहं धर्ममर्थं वृणीते स पण्डितः । कामो
धर्मार्थापेक्षया निकृष्ट इत्यर्थः। कामादिति। यस्तु कामं त्यक्त्वा
अर्थं वृणीते सः अर्थार्थी मोक्षादेव सर्वं अर्थं विन्दति ज्ञानफले
मोक्षे कृत्स्नस्यार्थस्यान्तर्भावात् स जनकादितुल्यः अतः पण्डित
उच्यते ॥

५-३३-२९ चिरं शृणोति ज्ञानदार्ढ्याय असंपृष्टः
यथावदपृष्टः । व्युपयुङ्क्ते वाग्व्ययं करोति। परार्थे विषये
प्रज्ञानं चिह्नम् ॥
५-३३-३१ निश्चित्य स्वयत्नमाध्यत्वम् । कर्मणः अन्तर्मध्ये न वसति
नोपरमते किंतु समापयत्येव । अवन्ध्यकालः सर्वदा सप्रयोजनमेव
कर्माचरन् ॥
५-३३-३२ आर्याः शिष्टाःक तद्योग्यकर्मणि । भूरितैश्वर्य
तत्प्राप्त्यर्थं कर्माणि ॥
५-३३-३४ योगो रचनाप्रकारः । उपायस्तदर्थसाग्री। मनुष्याणां मध्ये
स नरः पण्डितः ॥
५-३३-३५ प्रवृत्तवाक् अकुण्ठितवचनः । चित्रकथो लोककथाभिज्ञः
। ऊहस्तर्कः। प्रतिभानं तत्कालस्फूर्तिः ॥
५-३३-३६ प्रज्ञानुगं बुद्धिवश्यम् । श्रुतानुगा शास्त्रानुसारिणी ॥
५-३३-३८ महामनाः अधिकेच्छावान् । अकर्मणा हीनकर्मणा दूतादिनेत्यर्थः ॥
५-३३-४२ संसारयति भृत्यादिद्वारा प्रवर्तयति ॥
५-३३-४६ नैष्कर्म्यात् अयत्नतः ॥
५-३३-४७ कदर्यं अदातारम् ॥
५-३३-५१ एकया बुद्ध्या । द्वे कार्याकार्ये विनिश्चित्य सम्यगवधार्य। त्रीन्
मित्रोदासीनशत्रून्। चतुर्भिः सामदानभेददण्डैः। मित्रं
साम्नैव दानभेदाभ्यामुदासीनम् सर्वैः शत्रुं वशीकुरु । पञ्च
इन्द्रियाणि जित्वा। षड्विदित्वा संधिविग्रहादीन् ज्ञात्वा। सप्त
हित्वा-स्त्रियोऽक्षा मृगया पानं वाक्पारुष्यं च पञ्चमम्। महच्च
दण्डपारुष्यमर्थदूषणमेव चेति सप्त हेयानि त्यक्त्वा सुखी भव ॥
५-३३-५४ सत्यं यथार्थभाषणम् । पारावारस्य समुद्रस्य ॥
५-३३-६९ यद्धं कनीयान् । भेददाने मध्यमः। साम उत्तमः ५-३३-७१
त्वयिसति त्वत्पुत्रोऽधनोऽतस्त्वमेव पाण्डवानां राज्यं दातुं
प्रभुरसीत्यर्थः ॥
५-३३-७५ शरणं गृहम् । विषमेपि संकटेपि ॥
५-३३-७६ दीर्घसूत्रैः क्षिप्रसाध्ये कार्ये चिरं कुर्वद्भिः । अलसैः
करिष्यामीति कालगमकैः। चारणैः स्तावकैः। अरणैरितिच्छेदो
कवा। रणविरोधिभिर्द्यूताद्यासक्तैरित्यर्थः ॥
५-३३-७७ वृद्धः कुलधर्मानुपदिशति । कुलीनः शिशून् आचारं
ग्राहयति। सखा हितं वदति। भगिनी धनं रक्षति ॥
५-३३-७८ साद्यस्कानि सद्यःफलानि ॥
५-३३-७९ देवताः स्वर्गभाजः । स्वर्गपदार्थश्च- यन्न
दुःखेन संभिन्नं न च ग्रस्तमनन्तरम्। अभिलाषोपनीतं

च तत्सुखं स्वःपदास्पदम् इत्येवंरूपः। अतस्ते
सत्यसंकल्पाः। धीमतामगस्त्यादीनामनुभावं
समुद्रपानादिप्रभावम्। तेपि देवतुल्या इत्यर्थः। विनयोपि
गुरुप्रसादकरत्वेन सद्यःफलः। विनाशहेतुः कर्मापि चौर्यादिकं
तच्च त्वय्येवास्ति। तव सर्वं कर्म मानार्थमेवेति भाः। पापकर्मणां
विनाशनं विनाशयितुः सद्यःफलम् ॥
५-३३-८२ पितॄन् अग्निष्वात्तादीन् गोत्रप्रवर्तकानृषींश्च । मनुष्यान्
पित्रादीन् ॥
५-३३-८३ त्वा त्वाम् । उपजीव्याः गुरवः । इह लोके साधिता मित्रादयाः। इह
परलोके जन्मान्तरे वा स्वं स्वं कार्यं कुर्वन्तीत्यर्तः ॥
५-३३-८४ दृतेश्चर्ममयाज्जलपात्रात् ५-३३-८८ गोपालस्य ग्रामे
वासे वनवाससाध्यस्य गोरक्षणस्याभावः । नापितस्य वने वासे ग्रामे
तत्कार्याभाव इति भावः ॥
५-३३-९० षण्णामिति । आत्मनि चित्ते नित्यानां षण्णाम्- कामक्रोधौ
शोकमोहौ मदमानौ च षट्पदीत्युक्तानाम्। ऐश्वर्यं वशित्वम् ॥
५-३३-९५ नातुराः अरोगाः ॥
५-३३-९६ स्वप्रत्यया स्वनिश्चयपूर्विका वृत्तिवर्तनं नतु
गतानुगतिकयेत्यर्थः ॥
५-३३-१०० द्वेष्टि मनसानिष्टं चिन्तयति । विरुध्यते कर्मणा ॥
५-३३-१०४ सन्निपातः समरतं (न्नगर्भः) ॥
५-३३-१०७ त्रिस्थूणं वातपित्तश्लेष्माणः स्थूणायरू ॥॥
पञ्च साक्षिवदुदासीनाः शब्दादयो ग्राह्या यस्मिन् । क्षेत्रज्ञाधि ॥॥॥।
वीवाधिष्ठितम् ॥
१०७ ॥
५-३३-१०८ मत्ते मद्यादिना । प्रमत्तो
विषयान्तरासक्तयाऽनवहितः। उन्मत्ते धातुदोषात् ॥
५-३३-११२ मात्रा उपराधानुसारेण दण्डप्रमाणम् । ब्राह्मणादौ अपराधस्य
क्षगां च ज ॥ति ॥
५-३३-११३ युक्तः छि ॥पेक्षणि हितः ॥
११३ ॥
५-३३-११४ संभ्य ॥क्रोध न च स्त्रियोऽर्थे यतते विवादं इति
को पाठः । ५-३३-११६ न ॥॥॥॥इति । खो पाठः। मात्रार्थे अल्पार्थे
इति ॥॥॥॥॥
५-३३-११. प्रातिभाव्यं प्रतिकूलो भावः चित्ताभिप्राया ॥॥॥॥।
प्रातिभाव्यं विरोधम् । अत्याह अतिकम्य ब्रवीति ॥
५-३३-१२२ दम्भं परवच्चनेच्छया धर्मानुष्ठानम् ॥

५-३३-१२७ जात्य अभिजातः उत्तमे आकरे जातः ॥
५-३३-१२८ आत्मना अपत्रपते परैरज्ञातेऽपि स्वव्यलीके स्वयमेव लज्जते ॥

उद्योगपर्व - अध्याय ०३४
॥ श्रीः ॥
५.३४. अध्यायः ३४

Mahabharata - Udyoga Parva - Chapter Topics
धृतराष्ट्रेण दुर्योधनादिश्रेयस्साधनप्रश्ने विदुरेण
नीतिकथनपूर्वकं युधिष्ठिराय राज्यदानस्य तत्साधनत्वकथनम्
॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-३४-० (३२८३६)
धृतराष्ट्र उवाच। ५-३४-०क्ष् (३४५०)
जाग्रतो दह्यमानस्य यत्कार्यमनुपश्यसि ।
तद्ब्रूहि त्वं हि नस्तात धर्मार्थकुशलः शुचिः ॥ ५-३४-१ (३२८३७)
तस्माद्यथावद्विदुर प्रशाधि
प्रज्ञापूर्वं सर्वमजातशत्रोः ।
यन्मन्यसे पथ्यमदीनसत्व
श्रेयस्करं ब्रूहि तद्वै कुरूणाम् ॥ ५-३४-२ (३२८३८)
पापाशङ्की पापमेवानुपश्यन्
पृच्छामि त्वां व्याकुलेनात्मनाहम् ।
कजे तन्मे ब्रूहि तत्पं यथाव-
न्मनीषितं सर्वमजातशत्रोः ॥ ५-३४-३ (३२८३९)
विदुर उवाच। ५-३४-४क्ष् (३४५१)
शुभं वा यदि वा पापं द्वेष्यं वा यदि वा प्रियम् ।
नापृष्टः कस्यचिद्ब्रूयाद्यः स नेच्छेत्पराभवम् ॥ ५-३४-४ (३२८४०)
तस्माद्वक्ष्यामि ते राजन्हितं यत्स्यान्कुरून्प्रति ।
वचः श्रेयस्करं धर्म्यं ब्रुवतस्तन्निबोध मे ॥ ५-३४-५ (३२८४१)
मिथ्योपेतानि कर्माणि सिद्ध्येतादीनि भारत ।
अनुपायप्रयुक्तानि मा स्म ते ॥मनः कृथाः ॥ ५-३४-६ (३२८४२)
तथैव योगविहितं यत्तु कर्म न सिध्यति ।
उपाययुक्तं मेधावी न तत्र ग्लपयेन्मनः ॥ ५-३४-७ (३२८४३)
अनुबन्धानवेक्षेत सानुबन्धेषु कर्मसु ।

संप्रधार्य च कुर्वीत सहसा न समाचरेत् ॥ ५-३४-८ (३२८४४)
अनुबन्धं च संप्रेक्ष्य विपाकं चैव कर्मणाम् ।
उत्थानमात्मनश्चैव धीरः कुर्वीत वा न वा ॥ ५-३४-९ (३२८४५)
यः प्रमाणं न जानाति स्थाने वृद्धौ तथा क्षये ।
कोशे जनपदे दण्डे न स राज्येऽवतिष्ठते ॥ ५-३४-१० (३२८४६)
यस्त्वेतानि प्रमाणानि यथोक्तान्यनुपश्यति ।
युक्तो धर्मार्थयोर्ज्ञाने स राज्यमधिगच्छति ॥ ५-३४-११ (३२८४७)
न राज्यं प्राप्तमित्येव वर्तितव्यमसांप्रतम् ।
श्रियं ह्यविनयो हन्ति जरा रूपमिवोत्तमम् ॥ ५-३४-१२ (३२८४८)
भक्ष्योत्तमप्रतिच्छन्नं मत्स्यो बडिशमायसम् ।
अन्नाभिलाषी ग्रसते नानुबन्धमवेक्षते ॥ ५-३४-१३ (३२८४९)
यच्छक्यं ग्रसितुं ग्रस्यं ग्रस्तं परिणमेच्च यत् ।
हितं च परिणामे यत्तदाद्यं भूतिमिच्छता ॥ ५-३४-१४ (३२८५०)
वनस्पतेरपक्वानि फलानि प्रचिनोति यः ।
स नाप्नोति रसं तेभ्यो बीजं चास्य विनश्यति ॥ ५-३४-१५ (३२८५१)
यस्तु पक्वमुपादत्ते काले परिणतं फलम् ।
फलाद्रसं स लभते बीजाच्चैव फलं पुनः ॥ ५-३४-१६ (३२८५२)
यथा मधु समादत्ते रक्षन्पुष्पाणि षट्पदः ।
तद्वदर्थान्मनुष्येभ्य आदद्यादविहिंसया ॥ ५-३४-१७ (३२८५३)
पुष्पं पुष्पं विचिन्वीत मूलच्छेदं न कारयेत् ।
मालाकार इवारामे न यथाङ्गारकारकः ॥ ५-३४-१८ (३२८५४)
किं नु मे स्यादिदं कृत्वा किं नु मे स्यादकुर्वतः ।
इति कर्माणि सञ्चिन्त्य कुर्याद्वा पुरुषो न वा ॥ ५-३४-१९ (३२८५५)
अनारभ्या भवन्त्यर्थाः केचिन्नित्यं यथाऽगताः ।
कृतः पुरुषकारोऽहि भवेद्येषु निरर्थकः ॥ ५-३४-२० (३२८५६)
ग अनर्थे चैव निरतमर्थे चैव पराङ्मुखम् ।
न तं भर्तारमिच्छन्ति षण्ढं पतिमिव स्त्रियः ॥ ५-३४-२१ (३२८५७)
प्रसादो निष्फलो यस्य क्रोधश्चापि निरर्थकः ।
न तं भर्तारमिच्छन्ति षण्ढं पतिमिव स्त्रियः ॥ ५-३४-२२ (३२८५८)
कांश्चिदर्थान्नरः प्राज्ञो लघुमूलान्महाफलान् ।
क्षिप्रमारभते कर्तुं न दीर्घयति तादृशान् ॥ ५-३४-२३ (३२८५९)
ऋजु पश्यति यः सर्वं चक्षुषा नु पिबन्निव ।
आसीनमपि तूष्णीकमनुरज्यन्ति तं प्रजाः ॥ ५-३४-२४ (३२८६०)
सुपुष्पितः स्यादफलः फलितः स्याद्दुरारुहः ।
अपक्वः पक्वसङ्काशो न तु शीर्येत कर्हिचित् ॥ ५-३४-२५ (३२८६१)
चक्षुषा मनसा वाचा कर्मणा च चतुर्विधम् ।

प्रसादयति यो लोकं तं लोकोऽनुप्रसीदति ॥ ५-३४-२६ (३२८६२)
यस्मात्रस्यन्ति भूतानि मृगव्याधान्मृगा इव ।
सागरान्तामपि महीं लब्ध्वा स परिहीयते ॥ ५-३४-२७ (३२८६३)
पितृपैतामहं राज्यं प्राप्यापि स्वेन कर्मणा ।
वायुरभ्रमिवासाद्य भ्रंशयत्यनये स्थितः ॥ ५-३४-२८ (३२८६४)
धर्ममाचरतो राज्ञः सद्भिश्चरितमादितः ।
वसुधा वसुसंपूर्णा वर्धते भूतिवर्धनी ॥ ५-३४-२९ (३२८६५)
अथ संत्यजतो धर्ममधर्मं चानुतिष्ठतः ।
प्रतिसंवेष्टते भूमिरग्नौ चर्माहितं यथा। ५-३४-३० (३२८६६)
य एव यत्नः क्रियते परराष्ट्रविमर्दने ।
स एव यत्नः कर्तव्यः स्वराष्ट्रपरिपालने । ५-३४-३१ (३२८६७)
धर्मेण राज्यं विन्देत धर्मेण परिपालयेत् ।
धर्ममूलां श्रियं प्राप्य न जहाति न हीयते ॥ ५-३४-३२ (३२८६८)
अप्युन्मत्तात्प्रलपतो बालाच्च परिजल्पतः ।
सर्वतः सारमादद्यादश्मभ्य इव काञ्चनम् ॥ ५-३४-३३ (३२८६९)
सुव्याहृतानि महतां सुकृतानि ततस्ततः ।
सञ्चिन्वन्धीर आसीत शिलाहारी शिलं यथा ॥ ५-३४-३४ (३२८७०)
गन्धेन गावः पश्यन्ति वेदैः पश्यन्ति ब्राह्मणाः ।
चारैः पश्यन्ति राजानश्चक्षुर्भ्यामितरे जनाः ॥ ५-३४-३५ (३२८७१)
भूयांसं लभते क्लेशं या गौर्भवति दुर्दुहा ।
अथ या सुदुघा राजन्नैव तां वितुदन्त्यपि ॥ ५-३४-३६ (३२८७२)
यदतप्तं प्रणमति न तत्सन्तापमर्हति ।
यच्च स्वयं नतं दारु न तत्संनामयेद्बुधः ॥ ५-३४-३७ (३२८७३)
एतयोपमया धीरः सन्नमेत बलीयसे ।
इन्द्राय स प्रणमते नमते यो बलीयसे ॥ ५-३४-३८ (३२८७४)
पर्जन्यनाथाः पशवो राजानो मन्त्रिबान्धवाः ।
पतयो बान्धवाः स्त्रीणां ब्राह्मणा वेदबान्धवाः ॥ ५-३४-३९ (३२८७५)
सत्येन रक्ष्यते धर्मो विद्या योगेन रक्ष्यते ।
मृजया रक्ष्यते रूपं कुलं वृत्तेन रक्ष्यते ॥ ५-३४-४० (३२८७६)
मानेन रक्ष्यते धान्यमश्वान्रक्षेदनुक्रमात् ।
अभीक्ष्णदर्शनाद्गावः स्त्रियो रक्ष्याः कुचेलतः ॥ ५-३४-४१ (३२८७७)
न कुलं वृत्तहीनस्य प्रमाणमिति मे मतिः ।
अन्तेष्वपि हि जातानां वृत्तमेव विशिष्यते ॥ ५-३४-४२ (३२८७८)
य ईर्षुः परवित्तेषु रूपे वीर्ये कुलान्वये ।
सुखसौभाग्यसत्कारे तस्य व्याधिरनन्तकः ॥ ५-३४-४३ (३२८७९)
अकार्यकरणाद्भीतः कार्याणां च विवर्जनात् ।

अकाले मन्त्रभेदाच्च येन माद्येन्न तत्पिबेत् ॥ ५-३४-४४ (३२८८०)
विद्यामदो धनमदस्तृतीयोऽभिजनो मदः ।
मदा एतेऽवलिप्तानामेत एव सतां दमाः ॥ ५-३४-४५ (३२८८१)
असन्तोऽभ्यर्थिताः सद्भिः क्वचित्कार्ये कदाचन ।
मन्यन्ते सन्तमात्मानमसन्तमपि विश्रुतम् ॥ ५-३४-४६ (३२८८२)
गतिरात्मवतां सन्तः सन्त एव सतां गतिः ।
असतां च गतिः सन्तो न त्वसन्तः सतां गतिः ॥ ५-३४-४७ (३२८८३)
जिता सभा वस्त्रवता मिष्टाशा गोमता जिता ।
अध्वा जितो यानवता सर्वं शीलवता जितम् ॥ ५-३४-४८ (३२८८४)
शीलं प्रधानं पुरुषे तद्यस्येह प्रणश्यति ।
न तस्य जीवितेनार्थो न धनेन न बन्धुभिः ॥ ५-३४-४९ (३२८८५)
आद्यानां मांसपरमं मध्यानां गोरसोत्तरम् ।
तैलोत्तरं दरिद्राणां भोजनं भरतर्षभ ॥ ५-३४-५० (३२८८६)
संपन्नतरमेवान्नं दरिद्रा भुञ्जते सदा ।
श्रुत्स्वादुतां जनयति सा चाढ्येषु सुदुर्लभा ॥ ५-३४-५१ (३२८८७)
प्रायेण श्रीमतां लोके भोक्तुं शक्तिर्न विद्यते ।
जीर्यन्त्यपि हि काष्ठानि दरिद्राणां महीपते ॥ ५-३४-५२ (३२८८८)
अवृत्तिर्भयमन्त्यानां मध्यानां मरणाद्भयम् ।
उत्तमानां तु मर्त्यानामवमानात्परं भयम् ॥ ५-३४-५३ (३२८८९)
ऐश्वर्यमदपापिष्ठा मदाः पानमदादयः ।
ऐश्वर्यमदमत्तो हि नो पतित्वाऽवबुध्यते ॥ ५-३४-५४ (३२८९०)
इन्द्रियौरिन्द्रियार्थेषु वर्तमानैरनिग्रहैः ।
तैरयं ताप्यते लोको नक्षत्राणि ग्रहैरिव ॥ ५-३४-५५ (३२८९१)
यो जितः पञ्चवर्गेण सहजेनात्मकर्षिणा ।
आपदस्तस्य वर्धन्ते शुक्लपक्ष इवोडुराट् ॥ ५-३४-५६ (३२८९२)
अविजित्य य आत्मानममात्यान्विजिगीषते ।
अमित्रान्वा जितामात्यः सोऽवशः परिहीयते ॥ ५-३४-५७ (३२८९३)
आत्मानमेव प्रथमं द्वेष्यरूपेण योजयेत् ।
ततोऽमात्यानमित्रांश्च न मोघं विजिगीषते ॥ ५-३४-५८ (३२८९४)
वश्येन्द्रियं जितामात्यं धृतदण्डं विकारिषु ।
परीक्ष्यकारिणं धीरमत्यन्तं श्रीर्निषेवते ॥ ५-३४-५९ (३२८९५)
रथः शरीरं पुरुषस्य राज-
न्नात्मा नियन्तेन्द्रियाण्यस्य चाश्वाः ।
तैरप्रमत्तः कुशली सदश्वै-
र्दान्तैः सुखं याति रथीव धीरः ॥ ५-३४-६० (३२८९६)
एतान्यनिगृहीतानि व्यापादयितुमप्यलम् ।

अविधेया इवादान्ताः सरथं सारथिं हयम् ॥ ५-३४-६१ (३२८९७)
अनर्थमर्थतः पश्यन्नर्थं चैवाप्यनर्थतः ।
इन्द्रियैरजितैर्बालः सुदुःखं मन्यते सुखम् ॥ ५-३४-६२ (३२८९८)
धर्मार्थौ यः परित्यज्य स्यादिन्द्रियवशानुगः ।
श्रीप्राणधनदारेभ्यः क्षिप्रं स परिहीयते ॥ ५-३४-६३ (३२८९९)
अर्थानामीश्वरो यः स्यादिन्द्रियाणामनीश्वरः ।
इन्द्रियाणामनैश्वर्यादैश्वार्याद्भ्रश्यते हि सः ॥ ५-३४-६४ (३२९००)
आत्मनात्मानमन्विच्छेन्मनोबुद्धीन्द्रियैर्यतैः ।
आत्मा ह्येवात्मनो बन्धुरात्मैव रिपुरात्मनः ॥ ५-३४-६५ (३२९०१)
बन्धुरात्मात्मनस्तस्य येनैवात्मात्मना जितः ।
स एव नियतो बन्धुः स एव नियतो रिपुः ॥ ५-३४-६६ (३२९०२)
क्षुद्राक्षेणेव जालेन झषावपिहितावुरू ।
कामश्च राजन्क्रोधश्च तौ प्रज्ञानं विलुम्पतः ॥ ५-३४-६७ (३२९०३)
समवेक्ष्येह धर्मार्थौ संभारान्योऽधिगच्छति ।
स वै संभृतसंभारः सततं सुखमेधते ॥ ५-३४-६८ (३२९०४)
यः पञ्चाभ्यन्तराञ्शत्रूनविजित्य मनोमयान् ।
जिगीषति रिपूनन्यान्निपवोऽभिभवन्ति तम् ॥ ५-३४-६९ (३२९०५)
दृश्यन्ते हि महात्मानो बध्यमानाः स्वकर्मभिः ।
इन्द्रियाणामनीशत्वाद्राजानो राज्यविभ्रमैः ॥ ५-३४-७० (३२९०६)
असंत्यागात्पापकृतामपापां-
स्तुल्यो दण्डः स्पृशते मिश्रभावात् ।
शुष्केणार्द्रं दह्यते मिश्रभावा-
त्तस्मात्पापैः सह सन्धिं न कुर्यात् ॥ ५-३४-७१ (३२९०७)
निजानुत्पततः शत्रूनपश्च पञ्चप्रयोजनान् ।
यो मोहान्न निगृह्णाति तमापद्ग्रसते नरम् ॥ ५-३४-७२ (३२९०८)
अनसूयार्जवं शौचं सन्तोषः प्रियवादिता ।
दमः सत्यमनायासो न भवन्ति दुरात्मनाम् ॥ ५-३४-७३ (३२९०९)
आत्मज्ञानमानायासस्तितिक्षा धर्मनित्यता ।
वाक्चैव गुप्ता दानं च नैतान्यन्त्येषु भारत ॥ ५-३४-७४ (३२९१०)
आक्रोशपरिवादाभ्यां विहिंसन्त्यबुधा बुधान् ।
वक्ता पापमुपादत्ते क्षममाणो विमुच्यते ॥ ५-३४-७५ (३२९११)
हिंसा बलमसाधूनां राज्ञां दण्डविधिर्बलम् ।
शुश्रूषा तु बलं स्त्रीणां क्षमा गुणवतां बलम् ॥ ५-३४-७६ (३२९१२)
वाक्संयमो हि नृपते सुदुष्करतमो मतः ।
अर्थवच्च विचित्रं च न शक्यं बहु भाषितुम् ॥ ५-३४-७७ (३२९१३)
अभ्यावहति कल्याणं विविधं वाक् सुभाषिता ।

सैव दुर्भाषिता राजन्ननर्थायोपपद्यते ॥ ५-३४-७८ (३२९१४)
रोहते सायकैर्विद्धं वनं परशुना हतम् ।
वाचा दुरुक्तं बीभत्सं न संरोहति वाक्क्षतम् ॥ ५-३४-७९ (३२९१५)
कर्णिनालीकनाराचान्निर्हरन्ति शरीरतः ।
वाक्छल्यस्तु न निर्हर्तुं शक्यो हृदिशयो हि सः ॥ ५-३४-८० (३२९१६)
वाक्सायका वदनान्निष्पतन्ति
यैराहतः शोचति रात्र्यहानि ।
परस्य नामर्मसु ते पतन्ति
तान्पण्डितो नावसृजेत्परेभ्यः ॥ ५-३४-८१ (३२९१७)
यस्मै देवाः प्रयच्छन्ति पुरुषाय पराभवम् ।
बुद्धिं तस्यापकर्षन्ति सोऽवाचीनानि पश्यति ॥ ५-३४-८२ (३२९१८)
बुद्धौ कलुषभूतायां विनाशे प्रत्युपस्थिते ।
अनयो नयसङ्काशो हृदयान्नापसर्पति ॥ ५-३४-८३ (३२९१९)
सेयं बुद्धिः परीता ते पुत्राणां भरतर्षभ ।
पाण्डवानां विरोधेन न चैनानवबुध्यसे ॥ ५-३४-८४ (३२९२०)
राजा लक्षणसंपन्नस्त्रैलोक्यस्यापि यो भवेत् ।
शिष्यस्ते शासिता सोऽस्तु धृतराष्ट्र युधिष्ठिरः ॥ ५-३४-८५ (३२९२१)
अतीव सर्वान्पुत्रांस्ते भागधेयपुरस्कृतः ।
तेजसा प्रज्ञया चैव युक्तो धर्मर्थतत्त्ववित् ॥ ५-३४-८६ (३२९२२)
अनुक्रोशादानृशंस्याद्योऽसौ धर्मभृतां वरः ।
गौरवात्तव राजेन्द्र बहून्क्लेशांस्तितिक्षति ॥ ॥ ५-३४-८७ (३२९२३)

इति श्रीमन्महाभारते उद्योगपर्वणि प्रजागरपर्वणि चतुस्त्रिंशोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-३४-१ दह्यमानस्य चिन्ताग्निनेति ॥॥॥
॥
५-३४-२ अजातशत्रोः पध्ये कुरूणां च श्रेयस्करम् ॥
५-३४-३ पापाशङ्की भाविदुःखादुद्विजन् । पापं स्वकृतं पर्वापराधं
पश्यन् ॥
५-३४-६ मिथ्योपेतानि कपटद्युतादीनि । अनुपप्यैः असदपायैः प्रयुक्तानि
दुःखफलानीत्यर्थः ॥
५-३४-८ अनुबन्धान् प्रयोजनानि ॥
५-३४-१२ असांप्रतं अयुक्तं यथा स्यात्तथा न वर्तितव्यम् ॥
५-३४-१३ मुखे मुष्टिमन्ते मृत्युदं कर्म न कर्तव्यमित्यर्थः
। अनुबन्धे पश्चाद्बन्धम् ॥

५-३४-१४ आद्यं भक्षणीयम् ॥
५-३४-१८ अङ्गारकारको हि मूलत उत्कृत्य काष्ठं दहति । अङ्गार इङ्गालः ॥
५-३४-२० अनारभ्याः प्रबलैः सह वैरादयः । अगताः कदाचिदप्यप्राप्ताः ॥
५-३४- २३ लघुमूलान् अल्पोपायनान् ॥
५-३४- २५ सुपुष्पितः वाचा चक्षुषा चानुग्रहं दर्शयन्नपि अफलः स्यात् । भृत्ये न धनेन वर्धयेत्। सफलोपि सन् दुरारुहः भृत्यवश्यो न भवेत्। अपक्व इति। अन्तर्बलहीनोऽपि बलवत्तां बहिः प्रकाशयेदेवेत्यर्थः ॥
५-३४-२६ कर्मणा दानेन । लोकं भृत्यवर्गम् ॥
५-३४-२९ आदितः आदिकालात् सद्भिराचरितं धर्ममाचरत इत्यन्वयः ॥
५-३४-३० प्रतिसंवेष्टते संकुचति । बहुफलं न प्रयच्छतीत्यर्थः ॥
५-३४-३२ न जहाति श्रियम् ॥
५-३४-३४ सुव्याहृतानि पाण्डित्यवचनानि सुकृतानि तदुपदिष्टकर्माणि । शिलं कणिशाद्यर्जनम् ॥
५-३४-४० योगेन अभ्यासेन । मृजया उद्वर्तनेन ॥
५-३४-४१ अनुक्रमः व्यायामशिक्षादिः । मानं द्रोणादि ॥
५-३४-४२ प्रमाणं धर्मस्य कारणम् ॥
५-३४-४४ अकाले इष्टसिद्धए प्राक् भीतः स्यात् । येन मादेत् लोभादिना तन्न पिबेत् नाश्रयेत् ॥
५-३४-४५ अभिजनः सहायः ॥
५-३४-५१ संपन्नं मिष्टम् ॥
५-३४-५३ शीलाभावे सत्सु अवमानो महान् क्लेश इत्याह अवृत्तीति ॥
५-३४-५४ ऐश्वर्यमदः पापिष्ठो निन्दिततमो येभ्यस्ते पानमदादयो मदाः ॥
५-३४-५५ इन्द्रियार्थेषु शब्दादिषु ग्रहैः सूर्यादिभिः ॥
५-३४-५६ पञ्चवर्गः श्रोत्रादिगणः ॥
५-३४-५८ आत्मानं मनः ॥
५-३४-६१ व्यापादयितुं नाशयितुम् । अविधेयाः अवशाः ॥
५-३४-६२ अर्थतोऽर्थहेतोः । अनर्थतः अन्यायतः ॥
५-३४-६७ क्षुद्राक्षेण सूक्ष्मच्छिद्रेण प्रज्ञानं तौ नाशयतः । जालमिव महामीनावित्यर्थः ॥
५-३४-६८ समवेक्ष्य अनुरुध्य । संभारान् जयसाधनानि ॥
५-३४-७० राजानो रावणादयः । राज्यविभ्रमैः ऐश्वर्यविलासैः । स्वकर्मभिः सीताहरणादिभिः ॥
५-३४-७२ पञ्च इन्द्रियाणि पञ्चप्रयोजनानि शब्दश्रवणादीनि येषां तान् । उत्पततः उत्पथेन गच्छतः ॥

५-३४-७३ अनायासः अचाञ्चल्यम् ॥
५-३४-७४ तितिक्षा द्वन्द्वसहनशीलता । वाक्गुप्ता
असंबद्धप्रलापाद्रक्षिता। अन्त्येषु नीचेषु ॥
५-३४-७५ आक्रोशो रूक्षभाषणम् । परिवादो निन्दा ॥
५-३४-७७ वाक्यसंयमो नियतं वचनम् । विचित्रं चमत्कारयुक्तम् ॥
५-३४-७९ बीभत्सं निन्दितं यतो न संरोहति ॥
५-३४-८० कर्णी कर्णाकृतिफलको बाणः । नालीकः नलिकया प्रक्षेप्यो
बाणः। निर्हरन्ति निःसारयन्ति ॥
५-३४-८१ नामर्मसु किंतु मर्मस्येव ॥
५-३४-८२ अवाचीनानि नीचकर्माणि ॥
५-३४-८५ शिष्यस्ते त्वदाज्ञकारी । शासिता पृथिव्याः ॥
५-३४-८६ भागधेये राज्यांशे पुरस्कृतः ५-३४-८७ अनुक्रोशात्
दयालुत्वात् । आनृशंस्यात् अक्रौर्यात् ॥

उद्योगपर्व - अध्याय ०३५
॥ श्रीः ॥
५.३५. अध्यायः ३५

Mahabharata - Udyoga Parva - Chapter Topics
विदुरेण धृतराष्ट्रंप्रति सुधन्वविरोचनसंवादादिकथनपूर्वकं
पाण्डवेषु पुत्रतौल्येन वृत्तिविधानम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-३५-० (३२९२४)
धृतराष्ट्र उवाच। ५-३५-०क्ष् (३४५२)
ब्रूहि भूयो महाबुद्धे धर्मार्थसहितं वचः ।
श्रृण्वतो नास्ति मे तृप्तिर्विचित्राणीह भाषसे ॥ ५-३५-१ (३२९२५)
विदुर उवाच। ५-३५-२क्ष् (३४५३)
सर्वतीर्थेषु वा स्नानं सर्वभूतेषु चार्जवम् ।
उभे त्वेते समे स्यातामार्जवं वा विशिष्यते। ५-३५-२ (३२९२६)
आर्जवं प्रतिपद्यस्व पुत्रेषु सततं विभो ।
इह कीर्तिं परां प्राप्य प्रेत्य स्वर्गमवाप्स्यसि ॥ ५-३५-३ (३२९२७)
यावत्कीर्तिर्मनुष्यस्य पुण्या लोके प्रगीयते ।
तावत्स पुरुषव्याघ्र स्वर्गलोके महीयते ॥ ५-३५-४ (३२९२८)
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
विरोचनस्य संवादं केशिन्यर्थे सुधन्वना ॥ ५-३५-५ (३२९२९)

स्वयंवरे स्थिता कन्या केशिनी नाम नामतः ।
रूपेणाप्रतिमा राजन्विशिष्टपतिकाम्यया ॥ ५-३५-६ (३२९३०)
विरोचनोऽथ दैतेयस्तदा तत्राजगाम ह ।
प्राप्तुमिच्छंस्ततस्तत्र दैत्येन्द्रं प्राह केशिनी ॥ ५-३५-७ (३२९३१)
केशिन्युवाच। ५-३५-८क्ष् (३४५४)
किं ब्राह्मणाः स्विच्छ्रेयांसो दितिजाः स्विद्विरोचन
अथ केन स्म पर्यङ्कं सुधन्वा नाधिरोहति ॥ ५-३५-८ (३२९३२)
विरोचन उवाच। ५-३५-९क्ष् (३४५५)
प्राजापत्यास्तु वै श्रेष्ठा वयं केशिनि सत्तमाः ।
अस्माकं खल्विमे लोकाः के देवाः के द्विजातयः ५-३५-९ (३२९३३)
केशिन्युवाच। ५-३५-१०क्ष् (३४५६)
इहैवावां प्रतीक्षाव उपस्थाने विरोचन ।
सुधन्वा प्रातरागन्ता पश्येयं वां समागतौ ॥ ५-३५-१० (३२९३४)
विरोचन उवाच। ५-३५-११क्ष् (३४५७)
तथा भद्रे करिष्यामि यथा त्वं भीरु भाषसे ।
सुधन्वानं च मां चैव प्रातर्द्रष्टासि सङ्गतौ ॥ ५-३५-११ (३२९३५)
विदुर उवाच। ५-३५-१२क्ष् (३४५८)
अतीतायां च शर्वर्यामुदिते सूर्यमण्डले ।
अथाजगाम तं देशं सुधन्वा राजसत्तम ।
विरोचनो यत्र विभो केशिन्या सहितः स्थितः ॥ ५-३५-१२ (३२९३६)
सुधन्वा च समागच्छत्प्राह्लादिं केशिनीं तथा ।
समागतं द्विजं दृष्ट्वा केशिनी भरतर्षभ ।
प्रत्युत्थायासनं तस्मै पाद्यमर्घ्यं ददौ पुनः ॥ ५-३५-१४अग इति
होवाच वचनं विरोचनमनुत्तमम् ।
आस्स्व तल्पे हि सौवर्णे प्राह्लादे ब्राह्मणस्त्वहम् ॥' ५-३५-१३ (३२९३७)
अन्वालभे हिरण्मयं प्राह्लादे ते वरासनम् ।
एकत्वमुपसंपन्नो नत्वासोऽहं त्वया सह ॥ ५-३५-१५ (३२९३८)
विरोचन उवाच। ५-३५-१६क्ष् (३४५९)
तवार्हते तु फलकं कूर्चं वाप्यथवा बृसी ।
सुधन्वन्न त्वमर्होऽसि मया सह समासनम् ॥ ५-३५-१६ (३२९३९)
सुधन्वोवाच। ५-३५-१७क्ष् (३४६०)
पितापुत्रौ सहासीतां द्वौ विप्रौ क्षत्रियावपि ।
वृद्धौ वैश्यौ च शूद्रौ च न त्वन्यावितरेतरम् ॥ ५-३५-१७ (३२९४०)
पिता हि ते समासीनमुपासीतैव मामधः ।
बालः सुखैधितो गेहे न त्वं किञ्चन बुध्यसे ॥ ५-३५-१८ (३२९४१)
विरोचन उवाच। ५-३५-१९क्ष् (३४६१)

हिरण्यं च गवाश्वं च यद्वित्तमसुरेषु नः ।
सुधन्वन्विपणे तेन प्रश्नं पृच्छाव ये वुदुः ॥ ५-३५-१९ (३२९४२)
सुधन्वोवाच। ५-३५-२०क्ष् (३४६२)
हिरण्यं च गवाश्वं च तवैवास्तु विरोचन ।
प्राणयोस्तु पणं कृत्वा प्रश्नं पृच्छाव ये विदुः ॥ ५-३५-२० (३२९४३)
विरोचन उवाच। ५-३५-२१क्ष् (३४६३)
आवां कुत्र गमिष्यावः प्राणयोर्विपणे कृते ।
न तु देवेष्वहं स्थाता न मनुष्येषु कर्हिचित् ॥ ५-३५-२१ (३२९४४)
सुधन्वोवाच। ५-३५-२२क्ष् (३४६४)
पितरं ते गमिष्यावः प्राणयोर्विपणे कृपे ।
पुत्रस्यापि स हेतोर्हि प्रह्लादो नानृतं वदेत् ॥ ५-३५-२२ (३२९४५)
विदुर उवाच। ५-३५-२३क्ष् (३४६५)
एवं कृतपणौ क्रुद्धौ तत्राभिजग्मतुस्तदा ।
विरोचनसुधन्वानौ प्रह्लादौ यत्र तिष्ठति ॥ ५-३५-२३ (३२९४६)
प्रह्लाद उवाच। ५-३५-२४क्ष् (३४६६)
इमौ तौ संप्रदृश्येते याभ्यां न चरितं सह ।
आशीविषाविव क्रुद्धावेकमार्गाविहागतौ ॥ ५-३५-२४ (३२९४७)
किं वै सहैवं चरथो न पुरा चरथः सह ।
विरोचनैतत्पृच्छामि किं ते सख्यं सुधन्वना ॥ ५-३५-२५ (३२९४८)
विरोचन उवाच। ५-३५-२६क्ष् (३४६७)
न मे सुधन्वना सख्यं प्राणयोर्विपणावहे ।
प्रह्लाद तत्त्वं पृच्छामि मा प्रश्नमनृतं वदेः ॥ ५-३५-२६ (३२९४९)
प्रह्लाद उवाच। ५-३५-२७क्ष् (३४६८)
उदकं मधुपर्कं चाप्यानयन्तु सुधन्वने ।
ब्रह्मन्नभ्यर्चनीयोऽसि श्वेता गौः पीवरी कृता ॥ ५-३५-२७ (३२९५०)
सुधन्वोवाच। ५-३५-२८क्ष् (३४६९)
उदकं मधुपर्कं च प्रश्नवाचार्पितं मम ।
प्रह्लद त्वं तु मे तथ्यं प्रश्नं प्रब्रूहि पृच्छतः ।
किं ब्राह्मणाः स्विच्छ्रेयांस उताहो स्विद्विरोचनः ५-३५-२८ (३२९५१)
प्रह्लाद उवाच। ५-३५-२९क्ष् (३४७०)
ग न कल्माषो न कपिलो न कृष्णो न च लोहितः ।
अणीयान्क्षुरधारायाः को धर्मं वक्तुमर्हिति ॥ ५-३५-२९ (३२९५२)
अभिवाद्यो भवान्ब्रह्मन्साक्ष्ये चैव नियोजितः ।'
पुत्र एको मम ब्रह्मंस्त्वं च साक्षादिहास्थितः ।
तयोर्विवदतोः प्रश्नं कथमस्मद्विधो वदेत् ॥ ५-३५-३० (३२९५३)
सुधन्वोवाच। ५-३५-३१क्ष् (३४७१)

ग यदेतत्त्वं न वक्ष्यसि यदि वापि विवक्ष्यसि ।
प्रह्लाद प्रश्नमतुलं मूर्धा ते विफलिष्यति ॥ ५-३५-३१ (३२९५४)
विदुर उवाच। ५-३५-३२क्ष् (३४७२)
आदित्येन सहायान्तं प्रह्लादो हंसमब्रवीत् ।
धृतराष्ट्र महाप्राज्ञ सर्वज्ञं सर्वदर्शिनम् ॥ ५-३५-३२ (३२९५५)
प्रह्लाद उवाच। ५-३५-३३क्ष् (३४७३)
पुत्रो वाऽन्यो भवेद्ब्रह्मन्साक्ष्ये चापि भवेत्स्थितः ।
तयोर्विवदतोर्हंस कथं धर्मः प्रवर्तते ॥ ५-३५-३३ (३२९५६)
हंस उवाच।' ५-३५-३४क्ष् (३४७४)
गां प्रदद्यादौरसाय यद्वान्यत्स्यात्प्रियं धनम् ।
द्वयोर्विवदतो राजन्प्रश्नं सत्यं यथा वदेत् ॥ ५-३५-३४ (३२९५७)
प्रह्लाद उवाच। ५-३५-३५क्ष् (३४७५)
अथ यो नैव प्रब्रूयात्सत्यं वा यदि वाऽनृतम् ।
हंस तत्वं च पृच्छामि कियदेनः करोति सः ॥ ५-३५-३५ (३२९५८)
ग्हंस उवाच ५-३५-३६क्ष् (३४७६)
पृष्टो धर्मं न विब्रूयान्नोकर्णशिथिलं चरन् ।
धर्माद्भ्रश्यति राजंस्तु नास्य लोकोऽस्ति न प्रजाः । ५-३५-३६ (३२९५९)
धर्म एतान्संरुजति यथा नद्यस्तु कूलजान् ।
ये धर्ममनुपश्यन्तस्तूष्णीं ध्यायन्त आसते ॥ ५-३५-३७ (३२९६०)
श्रेष्ठोऽर्धं तु हरेत्तत्र भवेत्पादश्च कर्तरि ।
पादस्तेषु सभासत्सु यत्र निन्द्यो न निन्द्यते ॥ ५-३५-३८ (३२९६१)
अनेना भवति श्रेष्ठो मुच्यन्तेऽपि सभासदः ।
कर्तारमेनो गच्छेद्वा निन्द्यो यत्र हि निन्द्यते ॥ ५-३५-३९ (३२९६२)
प्रह्लाद उवाच। ५-३५-४०क्ष् (३४७७)
मोहाद्वा चैव कामाद्वा मिथ्यावादं यदि ब्रुवन् ।
धृतराष्ट्र तत्वं पृच्छामि दुर्विवक्ता तु किं वसेत् ॥ ५-३५-४० (३२९६३)
हंस उवाच।' ५-३५-४१क्ष् (३४७८)
यां रात्रिमधिविन्ना स्त्री यां चैवाक्षपराजितः ।
यां च भाराभितप्ताङ्गो दुर्विवक्ता तु तां वसेत् ॥ ५-३५-४१ (३२९६४)
नगरे प्रतिरुद्धः सन्बहिर्द्वारे बुभुक्षितः ।
अमित्रान्भूयसः पश्यन्दुर्विवक्ता तु तां वसेत् ॥ ५-३५-४२ (३२९६५)
यां च रात्रिमभिद्रुग्धो यां च मित्रे प्रियेऽनृते ।
सर्वस्वेन च हीनो यो दुर्विवक्ता तु तां वसेत् ॥ ५-३५-४३ (३२९६६)
पञ्च पश्वनृते हन्ति दश हन्ति गवानृते ।
शतमश्वानृते हन्ति सहस्रं पुरुषानृते ॥ ५-३५-४४ (३२९६७)
हन्ति जातानजातांश्च हिरण्यार्थेऽनृतं वदन् ।

सर्वं भूम्यनृते हन्ति मा स्म भूम्यनृतं वदेः ॥ ५-३५-४५ (३२९६८)
प्रह्लाद उवाच। ५-३५-४६क्ष् (३४७९)
मत्तः श्रेयानङ्गिरा वै सुधन्वा त्विद्वरोचन ।
मातास्य श्रेयसी मातुस्तस्मात्त्वं तेन वै जितः ॥ ५-३५-४६ (३२९६९)
विरोचन सुधन्वाऽयं प्राणानामीश्वरस्तव ।
सुधन्वन्पुनरिच्छामि त्वया दत्तं विरोचनम् ॥ ५-३५-४७ (३२९७०)
सुधन्वोवाच। ५-३५-४८क्ष् (३४८०)
यद्धर्ममवृणीथास्त्वं न कामादनृतं वदीः ।
पुनर्ददामि ते पुत्रं तस्मात्प्रह्लाद दुर्लभम् ॥ ५-३५-४८ (३२९७१)
एष प्रह्लाद पुत्रस्ते मया दत्तो विरोचनः ।
पादप्रक्षालनं कुर्यात्कुमार्याः सन्निधौ मम ॥ ५-३५-४९ (३२९७२)
विदुर उवाच। ५-३५-५०क्ष् (३४८१)
तस्माद्राजेन्द्र भूम्यर्थे नानृतं वक्तुमर्हसि ।
मा गमः ससुतामात्यो नाशं पुत्रार्थमब्रुवन् ॥ ५-३५-५० (३२९७३)
न देवा यष्टिमादाय रक्षन्ति पशुपालवत् ।
यं तु रक्षितुमिच्छन्ति बुद्ध्या संयोजयन्ति तम् ॥ ५-३५-५१ (३२९७४)
यथायथा हि पुरुषः कल्याणे कुरुते मनः ।
तथातथाऽस्य सर्वार्थाः सिद्ध्यन्ते नात्र संशयः ॥ ५-३५-५२ (३२९७५)
नैनं छन्दांसि वृजिनात्तारयन्ति
मायाविनं मायया वर्तमानम् ।
नीडं शकुन्ता इव जातपक्षा-
श्छन्दांस्येनं प्रजहत्यन्तकाले ॥ ५-३५-५३ (३२९७६)
मद्यपानं कलहं पूगवैरं
भार्यापत्योरन्तरं ज्ञातिभेदम् ।
राजद्विष्टं स्त्रीपुंसयोर्विवादं
वर्ज्यान्याहुर्यश्च पन्थाः प्रदुष्टः ॥ ५-३५-५४ (३२९७७)
सामुद्रिकं वणिजं चोरपूर्वं
शलाकधूर्तं च चिकित्सकं च ।
अरिं च मित्रं च कुशीलवं च
नैतान्साक्ष्ये त्वधिकुर्वीत सप्त ॥ ५-३५-५५ (३२९७८)
मानाग्निहोत्रमुत मानमौनं
मानेनाधीतमुत मानयज्ञः ।
एतानि चत्वार्यभयङ्कराणि
भयं प्रयच्छन्त्ययथाकृतानि ॥ ५-३५-५६ (३२९७९)
अगारदाही गरदः कुण्डाशी सोमविक्रयी ।
पर्वकारश्च सूची च मित्रध्रुक्पारदारिकः ॥ ५-३५-५७ (३२९८०)

भ्रूणहा गुरुतल्पी च यश्च स्यात्पानपो द्विजः ।
अतितीक्ष्णश्च कारुश्च नास्तिको वेदनिन्दकः ॥ ५-३५-५८ (३२९८१)
स्रुवप्रग्रहणो व्रात्यः कीनाशश्चात्मवानपि ।
रक्षेत्युक्तश्च यो हिंस्यात्सर्वे ब्रह्महभिः समाः ॥ ५-३५-५९ (३२९८२)
तृणोल्कया ज्ञायते जातरूपं
वृत्तेन भद्रो व्यवहारेण साधुः ।
शूरो भयेष्वर्थकृच्छ्रेषु धीरः
कृच्छ्रेष्वापत्सु सुहृदश्चारयश्च ॥ ५-३५-६० (३२९८३)
जरा रूपं हरति हि धैर्यमाशा
मृत्युः प्राणान्धर्मचर्यामसूया ।
क्रोधः श्रियं शीलमनार्यसेवा
ह्रियं कामः सर्वमेवाभिमानः । ५-३५-६१ (३२९८४)
न क्रोधिनोऽर्थो न नृशंसस्य मित्रं
कृगस्य न स्त्री सुखिनो न विद्या ।
न कामिनो ह्रीरलसस्य न श्रीः
सर्वं तु न स्यादनवस्थितस्य ॥ ५-३५-६२ (३२९८५)
श्रीर्मङ्गलान्प्रभवति प्रागल्भ्यात्संप्रवर्धते ।
दाक्ष्यात्तु कुरुते मूलं संयमान्प्रतितिष्ठति ॥ ५-३५-६३ (३२९८६)
अष्टौ गुणाः पुरुषं दीपयन्ति
प्रज्ञा च कौल्यं च दमः श्रुतं च ।
पराक्रमश्चाबहुभाषिता च
दानं यथाशक्ति कृतज्ञता च ॥ ५-३५-६४ (३२९८७)
एतान्गुणांस्तत महानुभावा-
नेको गुणः संश्रयते प्रसह्य
राजा यदा सत्कुरुते मनुष्यं
सर्वान्गुणानेप गुणोतिभाति ॥ ५-३५-६५ (३२९८८)
अष्टौ नृपेमानि मनुष्यलोके
स्वर्गस्य लोकस्य निदर्शनानि ।
चत्वार्येपामन्ववेतानि सद्भि-
श्चत्वारि चैपामनुयान्ति सन्तः ॥ ५-३५-६६ (३२९८९)
यज्ञो दानमध्ययनं तपश्च
चत्वार्येतान्यन्ववेतानि सद्भिः ।
दमः सत्यमार्जवमानृशंस्यं
चत्वार्येतान्यनुयान्ति सन्तः ॥ ५-३५-६७ (३२९९०)
इज्याध्ययनदानानि तपः सत्यं क्षमा घृणा ।
अलोभ इति मार्गोऽयं धर्मस्याष्टविधः स्मृतः ॥ ५-३५-६८ (३२९९१)

तत्र पूर्वचतुर्वर्गो दम्भार्थमपि सेव्यते ।
उत्तरश्च चतुर्वर्गो नामहात्मसु तिष्ठति ॥ ५-३५-६९ (३२९९२)
न सा सभा यत्र न सन्ति वृद्धा
न ते वृद्धा ये न वदन्ति धर्मम् ।
नासौ धर्मो यत्र न सत्यमस्ति
न तत्सत्यं यच्छलेनानुविद्धम् ॥ ५-३५-७० (३२९९३)
सत्यं रूपं श्रुतं विद्या कौल्यं शीलं बलं धनम् ।
शौर्यं च चित्रभाष्यं च दशेमे स्वर्गयोनयः ॥ ५-३५-७१ (३२९९४)
पापं कुर्वन्पापकीर्तिः पापमेवाश्नुते फलम् ।
पुण्यं कुर्वन्पापकीर्तिः पुण्यमत्यन्तमश्नुते ॥ ५-३५-७२ (३२९९५)
तस्मात्पापं न कुर्वीत पुरुषः शंसितव्रतः ।
पापं प्रज्ञां नाशयति क्रियमाणं पुःन पुःनः ॥ ५-३५-७३ (३२९९६)
वृद्धप्रज्ञः पापमेव नित्यमारभते नरः ।
पुण्यं प्रज्ञां वर्धयति क्रियमाणं पुनः पुनः ॥ ५-३५-७४ (३२९९७)
वृद्धप्रज्ञः पुण्यमेव नित्यमारभते नरः ।
पुण्यं कुर्वन्पुण्यकीर्तिः पुण्यं स्थानं स्म गच्छति ।
तस्मात्पुण्यं निषेवेत पुरुषः सुसमाहितः ॥ ५-३५-७५ (३२९९८)
असूयको दन्दशूको निष्ठुरो वैरकृच्छठः ।
स कृच्छ्रं महदाप्नोति नचिरात्पापमाचरन् ॥ ५-३५-७६ (३२९९९)
अनसूयुः कृतप्रज्ञः शोभनान्याचरन्सदा ।
नकृच्छ्रं महदाप्नोति सर्वत्र च विरोचते ॥ ५-३५-७७ (३३०००)
प्रज्ञामेवागमयति यः प्राज्ञेभ्यः स पण्डितः ।
प्राज्ञो ह्यवाप्य धर्मार्थौ शक्नोति सुखमेधितुम् ॥ ५-३५-७८ (३३००१)
दिवसेनैव तत्कुर्याद्येन रात्रौ सुखं वसेत् ।
अष्टमासेन तत्कुर्याद्येन वर्षाः सुखं वसेत् ॥ ५-३५-७९ (३३००२)
पूर्वे वयसि तत्कुर्याद्येन वृद्धः सुखं वसेत् ।
यावज्जीवं तु तत्कुर्याद्येन प्रेत्य सुखं वसेत् ॥ ५-३५-८० (३३००३)
जीर्णमन्नं प्रशंसन्ति भार्यां च गतयौवनाम् ।
शूरं विजितसङ्ग्रामं गतपारं तपस्विनम् ॥ ५-३५-८१ (३३००४)
धनेनाधर्मलब्धेन यच्छिद्रमपिधीयते ।
असंवृतं तद्भवति ततोऽन्यदवदीर्यते ॥ ५-३५-८२ (३३००५)
गुरुरात्मवतां शास्ता शास्ता राजा दुरात्मनाम् ।
अन्तः प्रच्छन्नपापानां शास्ता वैवस्वतो यमः ॥ ५-३५-८३ (३३००६)
ऋषीणां च नदीनां च कुलानां च महात्मनाम् ।
प्रभवो नाधिगन्तव्यः स्त्रीणां दुश्चरितस्य च ॥ ५-३५-८४ (३३००७)
द्विजातिपूजाभिरतो दाता ज्ञातिषु चार्जवी ।

क्षत्रियः शीलभाग्राजंश्चिरं पालयते महीम् ॥ ५-३५-८५ (३३००८)
सुवर्णपुष्पां पृथिवीं चिन्वन्ति पुरुषास्त्रयः ।
शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम् ॥ ५-३५-८६ (३३००९)
बुद्धिश्रेष्ठानि कर्माणि बाहुमध्यानि भारत ।
तानि जङ्घाजघन्यानि भारप्रत्यवराणि च ॥ ५-३५-८७ (३३०१०)
दुर्योधनेऽथ शकुनौ मूढे दुःशासने तथा ।
कर्मे चैश्वर्यमाधाय कथं त्वं भूतिमिच्छसि ॥ ५-३५-८८ (३३०११)
सर्वैर्गुणैरुपेतास्तु पाण्डवा भरतर्षभ ।
पितृवत्त्वयि वर्तन्ते तेषु वर्तस्व पुत्रवत् ॥ ॥ ५-३५-८९ (३३०१२)

इति श्रीमन्महाभारते उद्योगपर्वणि प्रजागरपर्वणि पञ्चत्रिंशोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-३५-२ आर्जवं अवैषम्यम् ॥
५-३५-१० इहस्थाने उपस्थाने मामुपस्थातुम् । वां दैत्यब्राह्मणौ अहं पश्येयम् ॥
५-३५-१३ समागच्छत् उभयोः संमुखं अगच्छत् ॥
५-३५-१४ विरोचनेन सौवर्णे पीठे मया सह उपवेश्यतामिति प्रार्थितः सुधन्वा उवाच ॥
५-३५-१५ अन्वालभे स्पृशाम्येव ॥
५-३५-१६ फलकं काष्ठपीठं । कूर्चं । बृसी वर्तितदर्भमयं पीठं वा । तव अर्हते योग्यं भवति ॥
५-३५-१८ उपासीत सेवते । अधः स्थित्वेति शेषः ॥
५-३५-१९ प्रश्नं आवयोः कः श्रेष्ठ इति प्रश्नम् । ये विदुस्तान् पृच्छाव ॥
५-३५-२४ सह न चरितं वैरात् ॥
५-३५-२७ पीवरी पुष्टा । कुता मधुपर्कार्थं उपकल्पिता ॥
५-३५-३० नियोजितः अहमिति शेषः ॥
५-३५-३९ पगच्छेदिति डो पाठः ॥
५-३५-४० किं वसेत् कथं वसेत् ॥
५-३५-४१ अधिविन्ना कृतसपत्नीका स्त्री तां रात्रिं वसेत्तद्दुःखं प्राप्नुयात् ५-३५-४४ पञ्च पूर्वजान् पश्वनृते अजादिपशुहिंसार्थमनृते उक्ते सति हन्ति नाशयति परलोकात् च्यावयति । एवमुत्तरत्र ॥
५-३५-४६ अङ्गिराः सुधन्वनः पिता । त्वत् त्वत्तः ॥
५-३५-४९ पादप्रक्षालनं हरिद्रया पादधावनम् । कुमार्याः केशिन्याः

। विवाहे दंपत्योः परस्परं हरिद्रया पादधावनं कुर्वन्तीति
प्रसिद्धम्। अस्यैव भार्या केशिनी भवत्वित्यर्थः ॥
५-३५-५० अब्रुवन्सत्यमिति शेषः ॥
५-३५-५३ छन्दांसि वेदाः ५-३५-५४ अन्तरं वियोगम् । विवादं
वैरप्रवर्तनम् ॥
५-३५- ५५ सामुद्रिकं हस्तरेखादिपरीक्षकम् । वणिजं चोरपूर्वं
पूर्वं चोरः पश्चाद्वणिक्रभूतः तं कूटतुलावन्तं वा। शलाकधूर्तं
शलाकया पाशादिना वा शकुनादिकमुक्त्वा योऽन्यान् वञ्चयति तम्। अरिं
विपरीतसाक्ष्यभयात्। मित्रं परीक्षकाणमविश्वासात्। कुशीवलं कुत्सितं
शीलं वाति अनुसरतीति तम्। नर्तकीदासं विटोन्मत्तादिकं वा । ५-३५-५३
सत्कर्मद्वारापि तस्य साधुत्वं न मन्तव्यमित्याह मानेति। मानः लोकेषु
उत्कर्षः तदर्थान्यग्निहोत्रादीनि भयदानीत्यर्थः। मौनं ध्यानम् ॥
५-३५-५७ कुण्डाशी भगभक्षः । जीवति भर्तरि जाराज्जातः
कुण्डस्तदन्नाशी। सोमविक्रयी प्रसिद्धः। पर्वकारः शरकृत्
आयुधमात्रकर्तेत्यर्थः। सूची सूचको नक्षत्रादीनां परदोषाणां
च। ज्यौतिषिकः पिशुनो वा । ५-३५-५८ कारुः अशुचिः। नास्तिकः
परलोकादिद्वेषी ॥
५-३५-५९ स्रुवप्रग्रहणो ग्रामपुरोहितः । व्रात्यः अतीतोपनयनकालः
पतितसावित्रीको वा। कीनाशः कर्षकः। आत्मवान्समर्थोपि यो रक्षेत्युक्तो
हिंस्यात् ॥
५-३५-६० तृणोल्कया तृणज्वालया जातरूपं रूपवद्वस्त
ज्ञायतेऽन्धकारे सति । भद्रे वृषः धर्म इतियावत्। वृत्तेन
शीलेन सोस्ति नास्तीति ज्ञायते। व्यवहारेण अहिंसादिप्रधानेन
। कृच्छ्रेषु दुर्भिक्षादिसंकटेषु ॥
५-३५-६३ श्रीरिति । दाक्ष्यं शीघ्रकारित्वम् ॥
५-३५-६५ एष गुणो राजसत्कारः ॥
५-३५-६६ इमानि वक्ष्यमाणानि । अन्ववेतानि नित्यसंवद्धानि। अनुयान्ति
यत्नेन भजन्ति ॥
५-३५-७१ रूपं विनयमुद्रा । श्रुतं अध्ययनम्। विद्या
देवताद्युपासनम्। चित्रभाष्यं युक्तियुक्तं वचनम् ॥
५-३५-७६ दन्दशूको मर्मच्छेत्ता । निष्ठुरः अप्रियवाक्। नचिरात् शीघ्रम् ॥
५-३५-७७ नकृच्छ्रं सुखम् ॥
५-३५-७८ आगमयति आनयति ॥
५-३५-७९ वर्षा इत्यत्यन्तसंयोगे द्वितीया ॥
५-३५-८१ गतपारं प्राप्ततत्त्वम् ॥
५-३५-८२ परिपाकसुखं कर्म त्वत्पुत्रा न कुर्वन्ति अन्यायेन च सुखं

लिप्सन्ति तत्तु विपरीतमेवेत्याह धनेनेति ॥
५-३५-८३ आत्मवतां जितचित्तानाम् । प्रच्छन्नपापो दुर्योधनः ।

उद्योगपर्व - अध्याय ०३६
॥ श्रीः ॥
५.३६. अध्यायः ३६

Mahabharata - Udyoga Parva - Chapter Topics
विदुरेण धृतराष्ट्रंप्रति आत्रेयेण साध्यान्प्रत्युपदिष्टनीतिकथनम् ॥ १ ॥
तथा महाकुललक्षणाद्यभिधानपूर्वकं पाण्डवैः सह
सन्धिकरणविधानम् ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

विदुर उवाच ।
अत्रैवोदाहरन्तीममितिहासं पुरातनम् ।
आत्रेयस्य च संवादं साध्यानां चेति नः श्रुतम् ॥ ५-३६-१ (३३०१३)
चरन्तं हंसरूपेण महर्षिं संशितव्रतम् ।
साध्या देवा महाप्राज्ञं पर्यपृच्छन्त वै पुरा ॥ ५-३६-२ (३३०१४)
साध्या ऊचुः । ५-३६-३क्ष् (३४८२)
साध्या देवा वयमेते महर्षे
दृष्ट्वा भवन्तं न शक्नुमोऽनुमातुम् ।
श्रुतेन धीरो बुद्धिमांस्त्वं मतो नः
काव्यां वाचं वक्तुमर्हस्युदाराम् ॥ ५-३६-३ (३३०१५)
हंस उवाच । ५-३६-४क्ष् (३४८३)
एतत्कार्यममराः संश्रुतं मे
धृतिः शमः सत्यधर्मानुवृत्तिः ।
ग्रन्थिं विनीय हृदयस्य सर्वं
प्रियाप्रिये चात्मसमं नयीत ॥ ५-३६-४ (३३०१६)
आक्रुश्यमानो नाक्रोशेन्मन्युरेव तितिक्षतः ।
आक्रोष्टारं निर्दहति सुकृतं चास्य विन्दति ॥ ५-३६-५ (३३०१७)
नाक्रोशी स्यान्नावमानी परस्य
मित्रद्रोही नोत नीचोपसेवी ।
न चाभिमानी न च हीनवृत्तो
रूक्षां वाचं रुशतीं वर्जयीत ॥ ५-३६-६ (३३०१८)
मर्माण्यस्थीनि हृदयं तथासू-
न्रूक्षा वाचो निर्दहन्तीह पुंसाम् ।

तस्माद्वाचमुशतीं रूक्षरूपां
धर्मारामो नित्यशो वर्जयीत ॥ ५-३६-७ (३३०१९)
अरुन्तुदं परुषं रूक्षवाचं
वाक्कण्टकैर्वितुदन्तं मनुष्यान् ।
विद्यादलक्ष्मीकतमं जननां
मुखे निबद्धां निर्ऋतिं वै वहन्तम् ॥ ५-३६-८ (३३०२०)
परश्चेदेनमभिविद्ध्येत बाणै-
र्भृशं सुतीक्ष्णैरनलार्कदीप्तैः ।
विरिच्यमानोऽप्यतिरिच्यमानो
विद्यात्कविः सुकृतं मे दधाति ॥ ५-३६-९ (३३०२१)
यदि सन्तं सेवति यद्यसन्तं
तपस्विनं यदि वा स्तेनमेव ।
वासो यथा रङ्गवशं प्रयाति
तथा स तेषां वशमभ्युपैति ॥ ५-३६-१० (३३०२२)
अतिवादं न प्रवदेन्न वादये-
द्यो नाहतः प्रतिहन्यान्न घातयेत् ।
हन्तुं च यो नेच्छति पापकं वै
तस्मै देवाः स्पृहयन्त्यागताय ॥ ५-३६-११ (३३०२३)
अव्याहृतं व्याहृताच्छ्रेय आहुः
सत्यं वदेद्व्याहृतं तद्द्वितीयम् ।
प्रियं वदेद्व्याहृतं तत्तृतीयं
धर्म्यं वदेद्व्याहृतं तच्चतुर्थम् ॥ ५-३६-१२ (३३०२४)
यादृशैः सन्निविशते यादृशांश्चोपसेवते ।
यादृगिच्छेच्च भवितुं तादृग्भवति पूरुषः ॥ ५-३६-१३ (३३०२५)
यतो यतो निवर्तते ततस्ततो विमुच्यते ।
निवर्तनाद्धि सर्वतो न वेत्ति दुःखमण्वपि ॥
न जीयते चानुजिगीषतेऽन्या-
न्न वैरकृच्चाप्रतिघातकश्च। ५-३६-१४ (३३०२६)
निन्दाप्रशंसासु समस्वभावो
न शोचते हृष्यति नैव चायम् ॥ ५-३६-१५ (३३०२७)
भावमिच्छति सर्वस्य नाभावे कुरुते मनः ।
सत्यवादी मृदुर्दान्तो यः स उत्तमपूरुषः ॥ ५-३६-१६ (३३०२८)
नानर्थकं सान्त्वयति प्रतिज्ञाय ददाति च ।
रन्ध्रं परस्य जानाति यः स मध्यमपूरुषः ॥ ५-३६-१७ (३३०२९)
दुःशासनस्तूपहतोऽभिशस्तो
नावर्तते मन्युवशात्कृतघ्नः ।

न स्यचिन्मित्रमथो दुरात्मा
कलाश्चैता अधमस्येह पुंसः ॥
न श्रद्दधाति कल्याणं परेभ्योऽप्यात्मशङ्कितः ।
निराकरोति मित्राणि यो वै सोऽधमपूरुषः ॥ ५-३६-१८ (३३०३०)
उत्तमानेव सेवेत प्राप्तकाले तु मध्यमान् ।
अधमांस्तु न सेवेत य इच्छेद्भूतिमात्मनः ॥ ५-३६-२० (३३०३१)
प्राग्नोति वै वित्तमसद्बलेन
नित्योत्थानात्प्रज्ञया पौरुषेण ।
न त्वेव सम्यग्लभते प्रशंसां
न वृत्तमाप्नोति महाकुलानाम् ॥ ५-३६-२१ (३३०३२)
धृतराष्ट्र उवाच। ५-३६-२२क्ष् (३४८४)
महाकुलेभ्यः स्पृहयन्ति देवा
धर्मार्थनित्याश्च बहुश्रुताश्च ।
पृच्छामि त्वां विदुरं प्रश्नमेतं
भवन्ति वै कानि महाकुलानि ॥ ५-३६-२२ (३३०३३)
विदुर उवाच। ५-३६-२३क्ष् (३४८५)
तपो दमो ब्रह्मवित्त्वं तितिक्षा ।
इज्या विवाहाः सान्त्वनं चान्नदानम् ।
अष्टावेते नित्यमेवं भवन्ति
सतां गुणास्तानि महाकुलानि ॥ ५-३६-२३ (३३०३४)
येषां न वृत्तं व्यथते न योनि-
श्चित्तप्रसादेन चरन्ति धर्मम् ।
ये कीर्तिमिच्छन्ति कुले विशिष्टां
त्यक्तानृतास्तानि महाकुलानि ॥ ५-३६-२४ (३३०३५)
अनिज्यया कुविवाहैर्वेदस्योत्सादनेन च ।
कुलान्यकुलतां यान्ति ब्राह्मणातिक्रमेण च ॥ ५-३६-२५ (३३०३६)
देवद्रव्यनिनाशेन ब्रह्मस्वहरणेन च ।
कुलान्यकुलतां यान्ति ब्राह्मणातिक्रमेण च ॥ ५-३६-२६ (३३०३७)
ब्राह्मणानां परिभवात्परिवादाच्च भारत ।
कुलान्यकुलतां यान्ति न्यासापहरणेन च ॥ ५-३६-२७ (३३०३८)
कुलानि समुपेताननि गोभिः पुरुषतोऽर्थतः ।
कुलसंख्यां न गच्छन्ति यानि हीनानि वृत्ततः ॥ ५-३६-२८ (३३०३९)
वृत्ततस्त्वविहीनानि कुलान्यल्पधनान्यपि ।
कुलसङ्ख्यां च गच्छन्ति कर्षन्ति च महद्यशः ॥ ५-३६-२९ (३३०४०)
वृत्तं यत्नेन संरक्षेद्वित्तमेति च याति च ।
अक्षीणो वित्ततः क्षीणो वृत्ततस्तु हतो हतः ॥ ५-३६-३० (३३०४१)

गोभिः पशुभिरश्वैश्च कृष्या च सुसमृद्धया ।
कुलानि न प्ररोहन्ति यानि हीनानि वृत्ततः ॥ ५-३६-३१ (३३०४२)
मा नः कुले वैरकृत्कश्चिदस्तु
राजा बद्धो मा परस्वापहारी ।
मित्रद्रोही नैकृतिकोऽनृती वा
पूर्वाशी वा पितृदेवातिथिभ्यः ॥ ५-३६-३२ (३३०४३)
यश्च नो ब्राह्मणान्हन्याद्यश्च नो ब्राह्मणान् द्विषेत् ।
न नः स समितिं गच्छेद्यश्च नो निर्वपेत्कृषिम् ॥ ५-३६-३३ (३३०४४)
तृणानि भूमिरुदकं वाक्चतुर्थी च सूनृता ।
सतामेतानि गेहेषु नोच्छिद्यन्ते कदाचन ॥ ५-३६-३४ (३३०४५)
श्रद्धया परया राजन्नुपनीतानि सत्कृतिम् ।
प्रवृत्तानि महाप्राज्ञ धर्मिणां पुण्यकर्मिणाम् ॥ ५-३६-३५ (३३०४६)
सूक्ष्मोऽपि भारं नृपते स्यन्दनो वै
शक्तो वोढुं न तथाऽन्ये महीजाः ।
एवं युक्ता भारसहा भवन्ति
महाकुलीना न तथान्ये मनुष्याः ॥ ५-३६-३६ (३३०४७)
न तन्मित्रं यस्य कोपाद्बिभेति
यद्वा मित्रं शङ्कितेनोपचर्यम् ।
यस्मिन्मित्रे पितरीवाश्वसीत
तद्वै मित्रं सङ्गतानीतराणि ॥ ५-३६-३७ (३३०४८)
यः कश्चिदप्यसंबद्धो मित्रसावेन वर्तते ।
स एव बन्धुस्तन्मित्रं सा गतिस्तत्परायणम् ॥ ५-३६-३८ (३३०४९)
चलचित्तस्य वै पुंसो वृद्धाननुपसेवतः ।
पारिप्लवमतेर्नित्यमध्रुवो मित्रसङ्ग्रहः ॥ ५-३६-३९ (३३०५०)
चलचित्तमनात्मानमिन्द्रियाणां वशानुगम् ।
अर्थाः समभिवर्तते हंसाः शुष्कं सरो यथा ॥ ५-३६-४० (३३०५१)
अकस्मादेव कुप्यन्ति प्रसीदन्त्यनिमित्ततः ।
शीलमेतदसाधूनामभ्रं पारिप्लवं यथा ॥ ५-३६-४१ (३३०५२)
सत्कृताश्च कृतार्थाश्च मित्राणां न भवन्ति ये ।
तान्मृतानपि क्रव्यादाः कृतघ्नान्नोपभुञ्जते ॥ ५-३६-४२ (३३०५३)
अर्थयेदेव मित्राणि सति वाऽसति वा धने ।
नानर्थयन्प्रजानाति मित्राणां सारफल्गुताम् ॥ ५-३६-४३ (३३०५४)
सन्तापाद्भ्रश्यते रूपं सन्तापाद्भ्रश्यते बलम् ।
सन्तापाद्भ्रश्यते ज्ञानं सन्तापाद्व्याधिमृच्छति ॥ ५-३६-४४ (३३०५५)
अनवाप्यं च शोकेन शरीरं चोपतप्यते ।
अमित्राश्च प्रहृष्यन्ति मा स्म शोके मनः कृथाः ॥ ५-३६-४५ (३३०५६)

पुनर्नरो म्रियते जायते च
पुनर्नरो हीयते वर्धते च ।
पुनर्नरो याचति याच्यते च
पुनर्नरः शोचति शोच्यते च ॥ ५-३६-४६ (३३०५७)
सुखं च दुःखं च भवाभवौ च
लाभालाभौ मरणं जीवितं च ।
पर्यायशः सर्वमेते स्पृशन्ति
तस्माद्धीरो न च हृष्येन्न सोचेत् ॥ ५-३६-४७ (३३०५८)
चलानि हीमानि षडिन्द्रियाणि
तेषां यद्यद्वर्धते यत्रयत्र ।
ततस्ततः स्रवते बुद्धिरस्य
च्छिद्रोदकुम्भादिव नित्यमम्भः ॥ ५-३६-४८ (३३०५९)
धृतराष्ट्र उवाच। ५-३६-४९क्ष् (३४८६)
तनुरुद्धः शिखी राजा मिथ्योपचरितो मया ।
मन्दानां मम पुत्राणां युद्धेनान्तं करिष्यति ॥ ५-३६-४९ (३३०६०)
नित्योद्विग्नमिदं सर्वं नित्योद्विग्रमिदं मनः ।
यत्तत्पदमनुद्विग्नं तन्मे वद महामते ॥ ५-३६-५० (३३०६१)
विदुर उवाच। ५-३६-५१क्ष् (३४८७)
नान्यत्र विद्यातपसो नान्यत्रेन्द्रियनिग्रहात् ।
नान्यत्र लोभसन्त्यागाच्छान्तिं पश्यामि तेऽनघ ॥ ५-३६-५१ (३३०६२)
बुद्ध्या भयं प्रणुदति तपसा विन्दते महत् ।
गुरुशुश्रूषया ज्ञानं शान्तिं भोगेन विन्दति ॥ ५-३६-५२ (३३०६३)
अनाश्रिता दानपुण्यं वेदपुण्यमनाश्रिताः ।
रागद्वेषविनिर्मुक्ता विचरन्तीह मोक्षिणः ॥ ५-३६-५३ (३३०६४)
स्वधीतस्य सुयुद्धस्य सुकृतस्य च कर्मणः ।
तपसश्च सुतप्तस्य तस्यान्ते सुखमेधते ॥ ५-३६-५४ (३३०६५)
स्वास्तीर्णानि शयनानि प्रपन्ना
न वै भिन्ना जातु निद्रां लभन्ते ।
न स्त्रीषु राजन्रतिमाप्नुवन्ति
न मागधैः स्तूयमाना न सूतैः ॥ ५-३६-५५ (३३०६६)
न वै भिन्ना जातु चरन्ति धर्मं
न वै सुखं प्राप्नुवन्तीह भिन्नाः ।
न वै भिन्ना गौरवं प्राप्नुवन्ति
न वै भिन्नाः प्रशमं रोचयन्ति ॥ ५-३६-५६ (३३०६७)
न वै तेषां स्वदते पथ्यमुक्तं
योगक्षेमं कल्पते नैव तेषाम् ।

भिन्नानां वै मनुजेन्द्र परायणं
न विद्यते किञ्चिदन्यद्विनाशात् ॥ ५-३६-५७ (३३०६८)
संपन्नं गोषु संभाव्यं संभाव्यं ब्राह्मणे तपः ।
संभाव्यं चापलं स्त्रीषु संभाव्यं ज्ञातितो भयं ॥ ५-३६-५८ (३३०६९)
तन्तवोऽप्यायता नित्यं तनवो बहुलाः समाः ।
बहून्बहुत्वादायासान्सहन्तीत्सुपमा सताम् ॥ ५-३६-६९ (३३०७०)
धूमायन्ते व्यपेतानि ज्वलन्ति सहितानि च ।
धृतराष्ट्रोल्मुकानीव ज्ञातयो भरतर्षभ ॥ ५-३६-६० (३३०७१)
ब्राह्मणेषु च ये शूराः स्त्रीषु ज्ञातिषु गोषु च ।
वृन्तादिव फलं पक्वं धृतराष्ट्र पतन्ति ते ॥ ५-३६-६१ (३३०७२)
महानप्येकजो वृक्षो बलवान्सुप्रतिष्ठितः ।
प्रसह्य एव वातेन सस्कन्धो मर्दितुं क्षणात् ॥ ५-३६-६२ (३३०७३)
अथ ये सहिता वृक्षाः सङ्घशः सुप्रतिष्ठिताः ।
ते हि शीघ्रतमान्वातान्सहन्तेन्योन्यसंश्रयात् ॥ ५-३६-६३ (३३०७४)
एवं मनुष्यमप्येकं गुणैरपि समन्वितम् ।
शक्यं द्विषन्तो मन्यन्ते वायुर्द्रुममिवैकजम् ॥ ५-३६-६४ (३३०७५)
अन्योन्यसमुपष्टम्भादन्योन्यापाश्रयेण च ।
ज्ञातयः संप्रवर्धन्ते सरसीवोत्पलान्युत ॥ ५-३६-६५ (३३०७६)
अवध्या ब्राह्मणा गावो ज्ञातयः शिशिवः स्त्रियः ।
येषां चान्नानि भुञ्जीत ये च स्युःक शरणागताः ।
महत्यप्यपराधेऽपि तेषां दण्डो विसर्जनम् ॥ ५-३६-६६ (३३०७७)
न मनुष्ये गुणः कश्चिद्राजन्सधनतामृते ।
अनातुरत्वाद्भद्रं ते मृतकल्पा हि रोगिणः ॥ ५-३६-६७ (३३०७८)
अव्याधिजं कटुकं शीर्षरोगि
पापानुबन्धं परुषं तीक्ष्णमुष्णम् ।
सतां पेयं यन्न पिबन्त्यसन्तो
मन्युं महाराज पिब प्रशाम्य ॥ ५-३६-६८ (३३०७९)
रोगार्दिता न फलान्याद्रियन्ते
न वै लभन्ते विषयेषु तत्त्वम् ।
दुःखोपेता रोगिणो नित्यमेव
न बुध्यन्ते धनभोगान्नसौख्यम् ॥ ५-३६-६९ (३३०८०)
पुरा ह्युक्तं नाकरोस्त्वं वचो मे
द्यूते जितां द्रौपदीं प्रेक्ष्य राजन् ।
दुर्योधनं वारयेत्यक्षवत्यां
कितवत्वं पण्डिता वर्जयन्ति ॥ ५-३६-७० (३३०८१)
न तद्बलं यन्मृदुना विरुध्यते

सूक्ष्मो धर्मस्तरसा सेवितव्यः ।
प्रध्वंसिनी क्रूरसमाहिता श्री-
र्मृदुप्रौढा गच्छति पुत्रपौत्रान् ॥ ५-३६-७१ (३३०८२)
धार्तराष्ट्राः पाण्डवान्पालयन्तु
पाण्डोः सुतास्तव पुत्रांश्च पान्तु ।
एकारिमित्राः कुरवो ह्येककार्या
जीवन्तु राजन्सुखिनः समृद्धाः ॥ ५-३६-७२ (३३०८३)
मेढीभूतः कौरवाणां त्वमद्य
त्वय्याधीनं कुरुकुलमाजमीढ ।
पार्थान्बालान्वनवासप्रतप्ता-
न्गोपायस्व स्वं यशस्तात रक्षन् ॥ ५-३६-७३ (३३०८४)
सन्धत्स्व त्वं कौरव पाण्डुपुत्रै-
र्मा नेऽन्तरं रिपवः प्रार्थयन्तु ।
सत्ये स्थितास्ते नरदेव सर्वे
दुर्योधनं स्थापय त्वं नरेन्द्र ॥ ॥ ५-३६-७४ (३३०८५)

इति श्रीमन्महाभारते उद्योगपर्वणि प्रजागरपर्वणि षट्त्रिंशोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-३६-२ हंसरूपेण परिव्राजकरूपेण ॥
५-३६-३ अनुमातुं लिङ्गेन ज्ञातम् । काव्यां विद्वल्लक्षणाभिधायिनीम् ॥
५-३६-४ मे मया संश्रुतम् । गुरुभ्य इति शेषः । तदेवाह धृतिरिति ॥
५-३६-५ नाक्रोशेत् न शपेत् । यतस्तितिक्षतो मन्युः क्रोध एव
आक्रोष्टारं दहति ॥
५-३६-८ निर्ऋतिं अलक्ष्मीं मृत्युं वा ॥
५-३६-९ बाणैः वाग्बाणैः विरिव्यमानः तनूक्रियमाणः । दधाति पुष्णाति ॥
५-३६-१० रङ्गस्य नीलादेर्वशं नीलतादिकम् ॥
५-३६-११ अतिप्रोक्तोपि न वदेत् वादयेद्वा । अनाहतो नैव
प्रतिहन्यात् । आहतोपि पापकं हन्तारं यदि हन्तुं नेच्छेत् स देवानामपि
प्रेष्ठो भवतीत्यर्थः ॥
५-३६-१२ अव्याहृतं मौनम् । ततोपि श्रेयः सत्यवचनम् । सत्यमपि
प्रियं चेत् ततोऽपि श्रेयः । तदपि धर्मादनपेतं चेत्
श्रेष्ठतममित्यर्थः ॥
५-३६-१५ अस्यामवरथायां पुरुषस्य न किंचिद्दुःखादिकमस्तीत्याह न
जीयते चेति ॥
५-३६-१६ भावं कल्याणम् । अभावे अकल्याणे ॥

५-३६-१७ अनर्थकं मिथ्या न सांत्वयति ॥
५-३६-१८ दुःशासनः दुष्टं शासनं यस्य । एताः कलाः चित्तस्य
अधमस्यैव ॥
५-३६-१९ परेभ्यः गरुभ्यः । आत्मन्येव शङ्कितः विश्वासहीनः ॥
५-३६-२३ तपः कृच्छ्रचान्दायणादि । दम इन्द्रियजयः । तानि
महाकुलानि विद्धि ॥
५-३६-२४ न व्यथते न चलति । योनिः पित्रादयोपि ॥
५-३६-२८ गोभिर्वांग्भिर्विद्ययेत्यर्थः । पुरुषतः सत्पुरुषैः अर्थतः
धनैश्च कुलानि कुलसंख्यां कुलेषु गणनां समुपेतानि भवन्ति ॥
५-३६-२९ वृत्ततः धर्मेण । कर्षन्ति आहरन्ति ॥
५-३६-३१ गोभिर्विद्याभिः ॥
५-३६-३२ नैकृतिकः कपटी । वैरकृदादयः कुलघ्ना इत्यर्थः ॥
५-३६-३३ निर्वपेत् कुर्यात् ॥
५-३६-३५ सत्कृतिं सत्कारं कर्तुं प्रवृत्तानि तृणादीनि ॥
५-३६-३६ स्यान्दनः रथयोग्यो वृक्षः । युक्ताः स्यन्दनवदविकलाः ॥
५-३६-३७ सङ्गतानि संबन्धमात्राणि ॥
५-३६-३८ बन्धुः संबन्धी । मित्रं उपकारकृत् ॥
५-३६-३९ पारिप्लवमतेः भ्रान्तस्य ॥
५-३६-४१ अभ्रं मेघः ॥
५-३६-४२ मित्राणां हितायेति शेषः ॥
५-३६-४३ अनर्थयन्प्रार्थनाशून्यः ॥
५-३६-४५ अनवाप्यं न प्राप्यम् । शोकेन शोकमात्रेण । इष्टमिति शेषः ॥
५-३६-४७ सर्वं पुरुषम् ॥
५-३६-४९ तनुः शरीरमभिव्यक्तिस्थानं काष्ठं तत्र
रुद्धोऽनभिव्यक्तः शिखी अग्निस्तथायं राजा धर्मेण रुद्धः । तनुना
सूक्ष्मेण धर्मेण वा रुद्धः ॥
५-३६-५२ विन्दते महत्सद्गुरुशास्त्रादिकं लभते । ततो गुरुशुश्रूषया
ज्ञानं ग्रन्थजम् । योगेन सर्वचित्तवृत्तिनिरोधेन शान्तिम् ॥
५-३६-५३ दानपुण्यं दानजं पुण्यं । वेदपुण्यं
वेदोक्तयागाद्यनुष्ठानजं पुण्यं तत्तत्फलमित्यर्थः ॥
५-३६-५४ तस्यान्ते स्वधीतादीनां कर्मणामन्ते ॥
५-३६-५७ योगः अलब्धलाभः । क्षेमं लब्धपरिपालनम् । तदुभयम् ॥
५-३६-५८ संपन्नं क्षीरादिसंपत्तिः ॥
५-३६-६२ एकजः एकाकी । प्रसह्यः शक्यः ॥
५-३६-६७ सधनतां ऋते विना । अनातुरत्वात् ऋते च ॥
५-३६-६८ प्रशाम्य शान्तिं क्षमां प्राप्नुहि ॥

५-३६-६९ फलानि पुत्रपश्वादीनि । तत्त्वमिष्टानिष्टविवेकं
पित्तोपहतरसनत्वात्। एवं सर्वत्र। भोगः स्त्र्यादिसङ्गः। धनादिजं
सुखं लब्धमपि न बुध्यन्ते। अतः संतापं जागरादिद्वारा रोगोत्पादकं
त्यजेत्यर्थः ॥
५-३६-७० कितवत्वं द्यूतप्रियत्वम् ॥
५-३६-७३ मेढीभूतः खलस्तम्भीभूतः स्वयं निर्व्यापारोपि परितः
संचरमाणानां बलीवर्दानामिव पुत्राणां यथेष्टप्रचारनिरोधकः ॥
५-३६-७४ अन्तरं भेदम् । स्थापय युद्धान्निवर्तयस्व ॥

उद्योगपर्व - अध्याय ०३७
॥ श्रीः ॥
५.३७. अध्यायः ३७

Mahabharata - Udyoga Parva - Chapter Topics
धृतराष्ट्रेण अल्पायुष्टवकारणप्रश्ने विदुरेण तदभिधाय
नीतिकथनपूर्वकं कुरुपाण्डवसन्धिकरणविधानम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-३७-० (३३०८६)
विदुर उवाच। ५-३७-०क्ष् (३४८८)
सप्तदशेमान्राजेन्द्र मनुः स्वायंभुवोऽब्रवीत् ।
वैचित्रवीर्य पुरुषानाकाशं मुष्टिभिर्घ्नतः ॥ ५-३७-१ (३३०८७)
तानेवेन्द्रस्य च धनुरनाम्यं नमतो ब्रवीत् ।
अथो मरीचिनः पादानग्राह्यान्गृह्णतस्तथा ॥ ५-३७-२ (३३०८८)
यश्चाशिष्यं शास्ति वै यश्च तुष्ये-
द्यश्चातिवेलं भजते द्विषन्तम् ।
स्त्रियश्च यो रक्षति भद्रमश्नुते
यश्चायाच्यं याचते कत्थते वा ॥ ५-३७-३ (३३०८९)
यश्चाभिजातः प्रकरोत्यकार्यं
यश्चाबलो बलिना नित्यवैरी ।
अश्रद्दधानाय च यो ब्रवीति
यश्चाकाम्यं कामयते नरेन्द्र । ५-३७-४ (३३०९०)
वध्वाऽवहासं श्वशुरो मन्यते यो
वध्वाऽवसन्नभयो मानकामः ।
परक्षेत्रे निर्वपति यश्च बीजं
स्त्रियं च यः परिवदतेऽतिवेलम् ॥ ५-३७-५ (३३०९१)

यश्चापि लब्ध्वा न स्मरामीति वादी
दत्त्वा च यः कत्थति याच्यमानः ।
यश्चासतः सान्त्वमुपानयीत
एतान्नयन्ति निरयं पाशहस्ताः ॥ ५-३७-६ (३३०९२)
यस्मिन्यथा वर्तते यो मनुष्य-
स्तस्मिंस्तथा वर्तितव्यं स धर्मः ।
मायाचारो मायया वर्तितव्यः
साध्वाचारः साधुना प्रत्युपेयः ॥ ५-३७-७ (३३०९३)
जरा रूपं हरति हि धैर्यमाशा
मृत्युः प्राणान्धर्मचर्यामसूया
कामो ह्रियं वृत्तमनार्यसेवा
क्रोधः श्रियं सर्वमेवाभिमानः ॥ ५-३७-८ (३३०९४)
धृतराष्ट्र उवाच। ५-३७-९क्ष् (३४८९)
शतायुरुक्तः पुरुषः सर्ववेदेषु वै यदा ।
नाप्नोत्यथ च तत्सर्वमायुः केनेह हेतुना ॥ ५-३७-९ (३३०९५)
विदुर उवाच। ५-३७-१०क्ष् (३४९०)
अतिमानोऽतिवादश्च तथाऽत्यागो नराधिप ।
क्रोधश्चात्मविधित्सा च मित्रद्रोहश्च तानि षट् ॥ ५-३७-१० (३३०९६)
एत एवासयस्तीक्ष्णाः कृन्तन्त्यायूंषि देहिनाम् ।
एतानि मानवान्घ्नन्ति न मृत्युर्भद्रमस्तु ते ॥ ५-३७-११ (३३०९७)
विश्वस्तस्यैति यो दारान्यश्चापि गुरुतल्पगः ।
वृषलीपतिर्द्विजो यश्च पानपश्चैव भारत ॥ ५-३७-१२ (३३०९८)
आदेशकृद्वृत्तिहन्ता द्विजानां प्रेषकश्च यः ।
शरणागतहा चैव सर्वे ब्रह्महणः समाः ।
एतैः समेत्य कर्तव्यं प्रायश्चित्तमिति श्रुतिः ॥ ५-३७-१३ (३३०९९)
गृहीतवाक्यो नयविद्वदान्यः
शेषान्नभोक्ता ह्यविहिंसकश्च ।
नानर्थकृत्याकुलितः कृतज्ञः
सत्यो मृदुः स्वर्गमुपैति विद्वान् ॥ ५-३७-१४ (३३१००)
सुलभाः पुरुषा राजन्सततं प्रियवादिनः ।
अप्रियस्य तु पथ्यस्य वक्ता श्रोता च दुर्लभः ॥ ५-३७-१५ (३३१०१)
यो हि धर्मं समाश्रित्य हित्वा भर्तुः प्रियाप्रिये ।
अप्रियाण्याह पथ्यानि तेन राजा सहायवान् ॥ ५-३७-१६ (३३१०२)
त्यजेत्कुलार्थे पुरुषं ग्रामस्यार्थे कुलं त्यजेत् ।
ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत् ॥ ५-३७-१७ (३३१०३)
आपदर्थे धनं रक्षेद्दारान्रक्षेद्धनैरपि ।

आत्मानं सततं रक्षेद्दारैरपि धनैरपि ॥ ५-३७-१८ (३३१०४)
द्यूतमेतत्पुरा कल्पे दृष्टं वैरकरं नृणाम् ।
तस्माद्द्यूतं न सेवेत हास्यार्थमपि बुद्धिमान् ॥ ५-३७-१९ (३३१०५)
उक्तं मया द्यूतकालेऽपि राज-
न्नेदं युक्तं वचनं प्रातिपेय ।
तदौषधं पथ्यमिवातुरस्य
न रोचते तव वैचित्रवीर्य ॥ ५-३७-२० (३३१०६)
काकैरिमांश्चित्रबर्हान्मयूरान्
पराजयेथाः पाण्डवान्धार्तराष्ट्रैः ।
हित्वा सिंहान्क्रोष्टुकान्गूहमानः
प्राप्ते काले शोचिता त्वं नरेन्द्रः ॥ ५-३७-२१ (३३१०७)
यस्तात न क्रुध्यति सर्वकालं
भृत्यस्य भक्तस्य हिते रतस्य ।
तस्मिन्भृत्या भर्तरि विश्वसन्ति
न चैनमापत्सु परित्यजन्ति ॥ ५-३७-२२ (३३१०८)
न भृत्यानां वृत्तिसंरोधनेन
राज्यं धनं सञ्जिघृक्षेदपूर्वम् ।
त्यजन्ति ह्येनं वञ्चिता वै विरुद्धाः
स्निग्धा ह्यमात्या परिहीनभोगाः ॥ ५-३७-२३ (३३१०९)
कृत्यानि पूर्वं परिसङ्ख्याय सर्वा-
ण्यायव्यये चानुरूपां च वृत्तिम् ।
सङ्गृह्णीयादनुरूपान्सहायान्
सहायसाध्यानि हि दुष्कराणि ॥ ५-३७-२४ (३३११०)
अभिप्रायं यो विदित्वा तु भर्तुः
सर्वाणि कार्याणि करोत्यतन्द्री ।
वक्ता हितानामनुरक्त आर्यः
शक्तिज्ञ आत्मेव हि सोऽनुकम्प्यः ॥ ५-३७-२५ (३३१११)
वाक्यं तु यो नाद्रियतेऽनुशिष्टः
प्रत्याह यश्चापि नियुज्यमानः ।
प्रज्ञाभिमानी प्रतिकूलवादी
त्याज्यः स तादृक् त्वरयैव भृत्यः ॥ ५-३७-२६ (३३११२)
अस्तब्धमक्लीबमदीर्घसूत्रं
सानुक्रोशं श्लक्ष्णमहार्यमन्यैः ।
अरोगजातीयमुदारवाक्यं
दूतं वदन्त्यष्टगुणोपपन्नम् ॥ ५-३७-२७ (३३११३)
न विश्वासाञ्जातु परस्य गेहे

गच्छेन्नरश्चेतयानो विकाले ।
न चत्वरे निशि तिष्ठेन्निगूढो
न राजकाम्यां योषितं प्रार्थयीत ॥ ५-३७-२८ (३३११४)
न निह्नवं मन्त्रगतस्य गच्छे-
त्संसृष्टमन्त्रस्य कुसङ्गतस्य ।
न च ब्रूयान्नाश्वसिमि त्वयीति
सकारणं व्यपदेशं तु कुर्यात् ॥ ५-३७-२९ (३३११५)
घृणी राजा पुंश्चली राजभृत्यः
पुत्रो भ्राता विधवा बालपुत्रा ।
सेनाजीवी चोद्धृतभूरिरेव
व्यवहारेषु वर्जनीयाः स्युरेते ॥ ५-३७-३० (३३११६)
अष्टौ गुणाः पुरुषं दीपयन्ति
प्रज्ञा च कौल्यं च श्रुतं दमश्च ।
पराक्रमश्चाबहुभाषिता च
दानं यथाशक्ति कृतज्ञता च ॥ ५-३७-३१ (३३११७)
एतान्गुणांस्तात महानुभावा-
नेको गुणः संश्रयते प्रसह्य ।
राजा यदा सत्कुरुते मनुष्यं
सर्वान्गुणनेष गुणो बिभर्ति ॥ ५-३७-३२ (३३११८)
गुणा दश स्नानशीलं भजन्ते
बलं रूपं स्वरवर्णप्रशुद्धिः ।
स्पर्शश्च गन्धश्च विशुद्धता च
श्रीः सौकुमार्यं प्रवराश्च नार्यः ॥ ५-३७-३३ (३३११९)
गुणाश्च षण्मितभुक्तं भजन्ते
आरोग्यमायुश्च बलं सुखं च ।
अनाविलं चास्य भवत्यपत्यं
न चैनमाद्यून इति क्षिपन्ति ॥ ५-३७-३४ (३३१२०)
अकर्मशीलं च महाशनं च
लोकद्विष्टं बहुमायं नृशंसम् ।
अदेशकालज्ञममिष्टवेष-
मेतान्गृहे न प्रतिवासयेत ॥ ५-३७-३५ (३३१२१)
कदर्यमाक्रोशकमश्रुतं च
वनौकसं धूर्तममान्यमानिनम् ।
निष्ठूरिणं कृतवैरं कृतघ्न-
मेतान्भृशार्तोपि न जातु याचेत् ॥ ५-३७-३६ (३३१२२)
संक्लिष्टकर्माणमतिप्रमादं

नित्यानृतं चादृढभक्तिकं च ।
विसृष्टरागं पटुमानिनं चा-
प्येतान्न सेवेत नराधमान्षट् ॥ ५-३७-३७ (३३१२३)
सहायबन्धना ह्यर्थाः सहायाश्चार्थबन्धनाः । ५-३७-३८
अन्योन्यबन्धनावेतौ विनान्योन्यं न सिद्ध्यतः ॥ ५-३७-३८ (३३१२४)
उत्पाद्य पुत्राननृणांश्च कृत्वा
वृत्तिं च तेभ्योऽनुविधाय कांचित् ।
स्थाने कुमारीः प्रतिपाद्य सर्वा
अरण्यसंस्थोऽथ मुनिर्बुभूषेत् ॥ ५-३७-३९ (३३१२५)
हितं यत्सर्वभूतानामात्मनश्च सुखावहम् ।
तत्कुर्यादीश्वरो ह्येतन्मूलं सर्वार्थसिद्धये ॥ ५-३७-४० (३३१२६)
वृद्धिः प्रभावस्तेजश्च सत्वमुत्थानमेव च ।
व्यवसायश्च यस्य स्यात्तस्यावृत्तिभयं कुतः ॥ ५-३७-४१ (३३१२७)
पश्य दोषान्पाण्डवैर्विग्रहे त्वं
यत्र व्यथेयुरपि देवाः सशक्रा ।
पुत्रैर्वैरं नित्यमुद्विग्नवासो
यशःप्रणाशो द्विषतश्च हर्षः ॥ ५-३७-४२ (३३१२८)
भीष्मस्य कोपस्तव चैवेन्द्रकल्प
द्रोणस्य राज्ञश्च युधिष्ठिरस्य ।
उत्सादयेल्लोकमिमं प्रवृद्धः
श्वेतो ग्रहस्तिर्यगिवापतन्खे ॥ ५-३७-४३ (३३१२९)
तव पुत्रशतं चैव कर्णः पञ्च च पाण्डवाः ।
पृथिवीमनुशासेयुरखिलां सागराम्बराम् ॥ ५-३७-४४ (३३१३०)
धार्तराष्ट्रा वनं राजन्व्याघ्राः पाण्डुसुता मताः ।
मा वनं छिन्धि सव्याघ्रं मा व्याघ्रा नीनशन्वनात् ॥ ५-३७-४५ (३३१३१)
न स्याद्वनमृते व्याघ्रान्व्याघ्रा न स्युर्ऋते वनम् ।
वनं हि रक्ष्यते व्याघ्रैर्व्याघ्रान्रक्षति काननम् ॥ ५-३७-४६ (३३१३२)
न तथेच्छन्ति कल्याणान्परेषां वेदितुं गुणान् ।
यथेषां ज्ञातुमिच्छन्ति नैर्गुण्यं पापचेतसः ॥ ५-३७-४७ (३३१३३)
अर्थसिद्धिं परामिच्छन्धर्ममेवादितश्चरेत् ।
नहि धर्मादपैत्यर्थः स्वर्गलोकादिवामृतम् ॥ ५-३७-४८ (३३१३४)
यस्यात्मा विरतः पापात्कल्याणे च निवेशितः ।
तेन सर्वमिदं बुद्धं प्रकृतिर्विकृतिश्च या ॥ ५-३७-४९ (३३१३५)
यो धर्ममर्थं कामं च यथाकालं निषेवते ।
धर्मार्थकामसंयोगं सोऽमुत्रेह च विन्दति ॥ ५-३७-५० (३३१३६)
सन्नियच्छति यो वेगमुत्थितं क्रोधहर्षयोः ।

स श्रियो भाजनं राजन्यश्चापत्सु न मुह्यति ॥ ५-३७-५१ (३३१३७)
बलं पञ्चविधं नित्यं पुरुषाणां निबोध मे ।
यत्तु बाहुबलं नाम प्रथमं वलमुच्यते ॥ ५-३७-५२ (३३१३८)
अमात्यलाभो भद्रं ते द्वितीयं बलमुच्यते ।
तृतीयं धनलाभं तु बलमाहुर्मनीषिणः ॥ ५-३७-५३ (३३१३९)
यत्त्वस्य सहजं राजन्पितृपैतामहं बलम् ।
अभिजातबलं नाम तच्चतुर्थं बलं स्मृतम् ॥ ५-३७-५४ (३३१४०)
येन त्वेतानि सर्वाणि सङ्गृहीतानि भारत ।
यद्बलानां बलं श्रेष्ठं तत्प्रज्ञाबलमुच्यते ॥ ५-३७-५५ (३३१४१)
महते योऽपकाराय नरस्य प्रभवेन्नरः ।
तेन वैरं समासज्य दूरस्थोऽस्मीति नाश्वसेत् ॥ ५-३७-५६ (३३१४२)
स्त्रीषु राजसु सर्पेषु स्वाध्यायप्रभुशत्रुषु ।
भोगेष्वायुषि विश्वासं कः प्राज्ञः कर्तुमर्हति ॥ ५-३७-५७ (३३१४३)
प्रज्ञाशरेणाभिहतस्य जन्तो-
श्चिकित्सकाः सन्ति न चौषधानि ।
न होममन्त्रा न च मङ्गलानि
नाथर्वणा नाप्यगदाः सुसिद्धाः ॥ ५-३७-५८ (३३१४४)
सर्पश्चाग्निश्च सिंहश्च कुलपुत्रश्च भारत ।
नावज्ञेया मनुष्येण सर्वे ह्येतेऽतितेजसः ॥ ५-३७-५९ (३३१४५)
अग्निस्तेजो महल्लोके गूढस्तिष्ठति दारुषु ।
न चोपयुङ्क्ते तद्दारु यावन्नोद्दीप्यते परैः ॥ ५-३७-६० (३३१४६)
स एव खलु दारुभ्यो यदा निर्मथ्य दीप्यते ।
तद्दारु च वनं चान्यन्निर्दहत्याशु तेजसा ॥ ५-३७-६१ (३३१४७)
एवमेव कुले जाताः पावकोपमतेजसः ।
क्षमावन्तो निराकाराः काष्ठेऽग्निरिव शेरते ॥ ५-३७-६२ (३३१४८)
लताधर्मा त्वं सपुत्रः सालः पाण्डुसुता मताः ।
न लता वर्धते जातु महद्वममनाश्रिता ॥ ५-३७-६३ (३३१४९)
वनं राजंस्तव पुत्रोऽम्बिकेय
सिंहान्वने पाण्डवांस्तात विद्धि ।
सिंहैर्विहीनं हि वनं विनश्येत्
सिंहा विनश्येयुर्ऋते वनेन ॥ ॥ ५-३७-६४ (३३१५०)

इति श्रीमन्महाभारते उद्योगपर्वणि प्रजागरपर्वणि सप्तत्रिंशोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-३७-२ नमतः नामयतः । मरीचिनः मरीचिमतः

सूर्यचन्द्रादेः। व्रीह्यादित्वान्मत्वर्थीय इनिः। पादान् रश्मीन् ॥
५-३७-३ अशिष्यं शासनानर्हम् । तुष्येत् अल्पलाभेनेति
शेषः। भद्रमश्नुत इति। शत्रुसेवया स्त्रीरक्षया च यो
भद्रमश्नुते तौ द्वौ मूर्खावित्यर्थः। नो रक्षतीति ङ पाठः ॥
३ ॥
५-३७-४ अभिजातः कुलीनः ॥
५-३७-५ श्वशुरः सन् यो वध्वा पुत्रभार्यया सह अवहासं परिहासं
तत्पित्रादिभिरिव मन्यते स एकादशः । वध्वा स्नुषया भूतया
अवसन्नभयो नष्टभयः वधूपित्रादिभिरापदि त्रातोपि तत्रैव मानं
कामयते यः स द्वादशो मूर्खः। वध्वावासमिति ङो पाठः ॥
५-३७-१० अत्यागः अतिशयितमागोऽपराधः । आत्मविधित्सोति पोषणार्थस्य
धाञः सनि रूपम्। आत्मपोषणेच्छा शिश्नोदरपरायणतेत्यर्थः ॥
५-३७-११ असयः खड्गाः । भद्रमस्तु ते एतेषां षण्णांत्यागेन तव
पुत्राः शतायुषो भवन्त्वित्यर्थः ॥
५-३७-१२ वृषली शूद्रा । द्विजश्त्रैवर्णिकः। पानपः मद्यपः ॥
५-३७-१३ आदेशकृत् ग्रामणीः । प्रेषकः द्विजान् दास्ये
नियोजयन्। समेत्य संसृज्य ५-३७-२४ परिसङ्ख्याय
साध्यासाध्यनिश्चयं कृत्वा। तथा वृत्तिं भृत्यजीविकां
आयव्ययानुरूपां कृत्वेत्यर्थः ॥
५-३७-२७ अदीर्घसूत्रं क्षिप्रकारिणम् ॥
५-३७-२९ किंतु मम किंचित्कार्यमस्तीति । तथा व्यपदेशं व्याजं
कृत्वा तादृशान्मन्त्रादपसरेदेवेत्यर्थः ॥
५-३७-३० एते व्यवहरे धनदानादौ वर्जनीयाः द्रव्यनाशभयात
। एतेभ्यो न ग्राह्यं च। अधमर्णो घृणी लज्जावांश्चेदतिनिर्बन्धेन
याच्यमानः प्राणानेव जह्यात् ॥
५-३७-३४ मितभुक्तं मितभोजिनम् । आद्यूनो बहुभोजी ॥
५-३७-३६ कदर्यं अदातारम् ॥
५-३७-३७ संक्लिष्टकर्माणं आततायिनम् ॥
५-३७-४१ अवृत्तिर्जीविकाया अभावः ॥
५-३७-४३ श्वेतो ग्रहः धूमकेतुः ॥
५-३७-५४ अभिजातबलं कुलबलम् ॥
५-३७-५९ कुलपुत्रो ज्ञातिः ॥
५-३७-६२ कुले जाताः पाण्डवाः ॥
५-३७-६३ सालाः महावृक्षः ॥

॥ श्रीः ॥
५.३८. अध्यायः ३८

Mahabharata - Udyoga Parva - Chapter Topics
विदुरेण धृतराष्ट्रंप्रति नीतिकथनपूर्वकं पाण्डवेभ्यो राज्याप्रदाने
दुर्योधनस्य राज्यभ्रंशकथनम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-३८-० (३३१५१)
विदुर उवाच। ५-३८-०क्ष् (३४९१)
ऊर्ध्वं प्राणा ह्युत्क्रामन्ति यूनः स्थविर आयति ।
प्रत्युत्थानाभिवादाभ्यां पुनस्तान्प्रतिपद्यते ॥ ५-३८-१ (३३१५२)
पीठं दत्त्वा साधवेऽभ्यागताय
आनीयापः परिनिर्णिज्य पादौ ।
सुखं पृष्ट्वा प्रतिवेद्यात्मसंस्थां
ततो दद्यादन्नमवेक्ष्य धीरः ॥ ५-३८-२ (३३१५३)
यस्योदकं मधुपर्कं च गां च
न मन्त्रवित्प्रतिगृह्णाति गेहे ।
लोभाद्भयादथ कार्पण्यतो वा
तस्यानर्थं जीवितमाहुरर्याः ॥ ५-३८-३ (३३१५४)
चिकित्सकः शल्यकर्तावकीर्णी
स्तेनः क्रूरो मद्यपो भ्रूणहा च ।
सेनाजीवी श्रुतिविक्रायकश्च
भृशं प्रियोऽप्यतिथिर्नोदकार्हः ॥ ५-३८-४ (३३१५५)
अविक्रेयं लवणं पक्वमन्नं
दधि क्षीरं मधु तैलं घृतं च ।
तिला मांसं फलमूलानि शाकं
रक्तं वासः सर्वगन्धा गुडाश्च ॥ ५-३८-५ (३३१५६)
अरोषणो यः समलोष्टाश्मकाञ्चनः
प्रहीणशोको गतसन्धिविग्रहः ।
निन्दाप्रशंसोपरतः प्रियाप्रिये
त्यजन्नुदासीनवदेष भिक्षुकः ॥ ५-३८-६ (३३१५७)
नीवारमूलेङ्गुदशाकवृत्तिः
सुसंयतात्माग्निकार्येषु चोद्यः ।
वने वसन्नतिथिष्वप्रमत्तो

धुरन्धरः पुण्यकृदेष तापसः ॥ ५-३८-७ (३३१५८)
अपकृत्य बुद्धिमतो दूरस्थोऽस्मीति नाश्वसेत् ।
दीर्घौ बुद्धिमतो बाहू याभ्यां हिंसति हिंसितः ॥ ५-३८-८ (३३१५९)
न विश्वसेदविश्वस्ते विश्वस्ते नातिविश्वसेत् ।
विश्वासाद्भयमुत्पन्नं मूलान्यपि निकृन्तति ॥ ५-३८-९ (३३१६०)
अनीर्षुर्गुप्तदारश्च संविभागी प्रियंवदः ।
श्लक्ष्णो मधुरवाक्स्त्रीणां न चासां वशगो भवेत् ॥ ५-३८-१० (३३१६१)
पूजनीया महाभागाः पुण्याश्च गृहदीप्तयः ।
स्त्रियः श्रियो गृहस्योक्तास्तस्माद्रक्ष्या विशेषतः ॥ ५-३८-११ (३३१६२)
पितुरन्तःपुरं दद्यान्मातुर्दद्यान्महानसम् ।
गोषु चात्मसमं दद्यात्स्वयमेव कृषिं व्रजेत् ।
भृत्यैर्वाणिज्यचारं च पुत्रैः सेवेत च द्विजान् ॥ ५-३८-१२ (३३१६३)
अङ्गयोऽग्निर्ब्रह्मतः क्षत्रमश्मनो लोहमुत्थितम् ।
तेषां सर्वत्रगं तेजः स्वासु योनिषु शाम्यति ॥ ५-३८-१३ (३३१६४)
नित्यं सन्तं कुले जाताः पावकोपमतेजसः ।
क्षमावन्तो निराकाराः काष्ठेऽग्निरिव शेरते ॥ ५-३८-१४ (३३१६५)
यस्य मन्त्रं न जानन्ति बाह्याश्चाभ्यन्तराश्च ये ।
स राजा सर्वतश्चक्षुश्चिरमैश्वर्यमश्नुते ॥ ५-३८-१५ (३३१६६)
करिष्यन्न प्रभाषेत कृतान्येव तु दर्शयेत् ।
धर्मकामार्थकार्याणि तथा मन्त्रो न भिद्यते ॥ ५-३८-१६ (३३१६७)
गिरिपृष्ठमुपारुह्य प्रासादं वा रहोगतः ।
अरण्ये निःशलाके वा तत्र मन्त्रोऽभिधीयते ॥ ५-३८-१७ (३३१६८)
नासुहृत्परमं मन्त्रं भारतार्हति वेदितुम् ।
अपण्डितो वापि सुहृत्पण्डितो वाप्यनात्मवान् ॥ ५-३८-१८ (३३१६९)
नापरीक्ष्य महीपालः कुर्यात्सचिवमात्मनः ।
अमात्ये ह्यर्थलिप्सा च मन्त्ररक्षणमेव च ॥ ५-३८-१९ (३३१७०)
कृतानि सर्वकार्याणि यस्य पारिषदा विदुः ।
धर्मे चार्थे च कामे च स राजा राजसत्तमः। ५-३८-२० (३३१७१)
गूढमन्त्रस्य नृपतेस्तस्य सिद्धिरसंशयम् ॥
अप्रशस्तानि कार्याणि यो मोहादनुतिष्ठति। ५-३८-२१ (३३१७२)
स तेषां विपरिभ्रंशाद्भ्रश्यते जीवितादपि ॥
कर्मणां तु प्रशस्तानामनुष्ठानं सुखावहम्। ५-३८-२२ (३३१७३)
तेषामेवाननुष्ठानं पश्चात्तापकरं मतम् ॥
अनधीत्य यथा वेदान्न विप्रः श्राद्धमर्हति । ५-३८-२३ (३३१७४)
एवमश्रुतषाड्गुण्यो न मन्त्रं श्रोतुमर्हति ॥
स्थानवृद्धिक्षयज्ञस्य षाड्गुण्यविदितात्मनः। ५-३८-२४ (३३१७५)

अनवज्ञातशीलस्य स्वाधीना पृथिवी नृप ॥
अमोघक्रोधहर्षस्य स्वयं कृत्वान्ववेक्षिणः। ५-३८-२५ (३३१७६)
आत्मप्रत्ययकोशस्य वसुदैव वसुन्धरा ॥
नाममात्रेणा तुष्येत छत्रेण च महीपतिः। ५-३८-२६ (३३१७७)
भृत्येभ्यो विसृजेदर्थान्नैकः सर्वहरो भवेत् ॥
ब्राह्मणं ब्राह्मणो वेद भर्ता वेद स्त्रियं तथा। ५-३८-२७ (३३१७८)
अमात्यं नृपतिर्वेद राजा राजानमेव च ॥
न शत्रुर्वशमापन्नो मोक्तव्यो वध्यतां गतः। ५-३८-२८ (३३१७९)
न्यग्भूत्वा पर्युपासीत वध्वं हन्याद्बले सति ॥
अहताद्धि भयं तस्माज्जायते नचिरादिव ॥ ५-३८-२९ (३३१८०)
दैवतेषु प्रयत्नेन राजसु ब्राह्मणेषु च ।
नियन्तव्यः सदा क्रोधो वृद्धबालातुरेषु च ॥ ५-३८-३० (३३१८१)
निरर्थं कलहं प्राज्ञो वर्जयेन्मूढसेवितम् ।
कीर्तिं च लभते लोके न चानर्थेन युज्यते ॥ ५-३८-३१ (३३१८२)
प्रसादो निष्फलो यस्य क्रोधश्चापि निरर्थकः ।
न तं भर्तारमिच्छन्ति षण्ढं पतिमिव स्त्रियः ॥ ५-३८-३२ (३३१८३)
न बुद्धिर्धनलाभाय न जाड्यमसमृद्धये ।
लोकपर्यायवृत्तान्तं प्राज्ञो जानाति नेतरः ॥ ५-३८-३३ (३३१८४)
विद्याशीलवयोवृद्धान्बुद्धिवृद्धांश्च भारत ।
धनाभिजातवृद्धांश्च नित्यं मूढोऽवमन्यते ॥ ५-३८-३४ (३३१८५)
अनार्यवृत्तमप्राज्ञमसूयकमधार्मिकम् ।
अनर्थाः क्षिप्रमायान्ति वाग्दुष्टं क्रोधनं तथा ॥ ५-३८-३५ (३३१८६)
अविसंवादनं दानं समयस्याव्यतिक्रमः ।
आवर्तयन्ति भूतानि सम्यक्प्रणिहिता च वाक् ॥ ५-३८-३६ (३३१८७)
अविसंवादको दक्षः कृतज्ञो मतिमानृजुः ।
अपि संक्षीणकोशोऽपि लभते परिवारणम् ॥ ५-३८-३७ (३३१८८)
धृतिः शमो दमः शौचं कारुण्यं वागनिष्ठुरा ।
मित्राणां चानभिद्रोहः सप्तैताः समिधः श्रियः ॥ ५-३८-३८ (३३१८९)
असंविभागी दुष्टात्मा कृतघ्नो निरपत्रपः ।
तादृङ्नराधिपो लोके वर्जनीयो नराधिप ॥ ५-३८-३९ (३३१९०)
न च रात्रौ सुखं शेते ससर्प इव वेश्मनि ।
यः कोपयति निर्दोषं सदोषोऽभ्यन्तरं जनम् ॥ ५-३८-४० (३३१९१)
येषु दुष्टेषु दोषः स्याद्योगक्षेमस्य भारत ।
सदा प्रसादनं तेषां देवतानामिवाचरेत् ॥ ५-३८-४१ (३३१९२)
येऽर्थाः स्त्रीषु समायुक्ताः प्रमत्तपतितेषु च ।
ये चानार्ये समासक्ताः सर्वे ते संशयं गताः ॥ ५-३८-४२ (३३१९३)

यत्र स्त्री यत्र कितवो बालो यत्रानुशासिता ।
मज्जन्ति तेऽवशा राजन्नद्यामश्मप्लवा इव ॥ ५-३८-४३ (३३१९४)
प्रयोजनेषु ये सक्ता न विशेषेषु भारत ।
तानहं पण्डितान्मन्ये विशेषा हि प्रसङ्गिनः ॥ ५-३८-४४ (३३१९५)
यं प्रशंसन्ति कितवा यं प्रशंसन्ति चारणाः ।
यं प्रशंसन्ति बन्धक्यो न स जीवति मानवः ॥ ५-३८-४५ (३३१९६)
हित्वा तान्परमेष्वासान्पाण्डवानमितौजसः ।
आहितं भारतैश्वर्यं त्वया दुर्योधने महत् ॥ ५-३८-४६ (३३१९७)
तं द्रक्ष्यसि परिभ्रष्टं तस्मात्त्वमचिरादिव ।
ऐश्वर्यमदसंमूढं बलिं लोकत्रयादिव ॥ ॥ ५-३८-४७ (३३१९८)

इति श्रीमन्महाभारते उद्योगपर्वणि प्रजागरपर्वणि अष्टत्रिंशोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-३८-१ आयति आगच्छति ॥
५-३८-२ निर्णिज्य प्रक्षाल्य । आत्मसंस्थां स्वस्थितिम् ॥
५-३८-४ अवकीर्णी नष्टब्रह्मचर्यः । नोदकार्ह उदकमात्रानर्होऽपि
अतिथिः भृशं प्रियः ॥
५-३८-१५ सर्वतश्चक्षुश्चारेः परमन्त्रं जानन् ॥
५-३८-१७ निःशलाके रहसि ॥
५-३८-२० पारिषादः सभासदः ॥
५-३८-२३ षाड्गुण्यं षण्णां
संधिविग्रहयानासनद्वैधीभावसमाश्रयाणां समूहः न श्रुतो येन
सः ॥
५-३८-२५ आत्मनैव प्रत्ययो ज्ञानं यस्य स्वयमेव ज्ञातकोशस्य ॥
५-३८-२६ नाममात्रेणैव राजा भवेत् । भोगांस्तु भृत्यैः समानानेव
भुञ्जीत ॥
५-३८-३६ आवर्तयन्ति शत्रूनपि स्वीयान्कुर्वन्ति । प्रणिहिता प्रयुक्ता ॥
५-३८-३७ परिवारणं परिवारान् भृत्यमित्रादीन् ॥
५-३८-३८ समिधः उद्दीपिकाः ॥
५-३८-३९ असंविभागी पोष्येभ्योऽदत्त्वा स्वयं भुञ्जानः ॥
५-३८-४४ ये भृत्याः विशेषा आधिक्यानि । प्रसङ्गिनः प्रसङ्गः
संघर्षस्तत्कारिणः ॥

उद्योगपर्व - अध्याय ०३९
॥ श्रीः ॥
५.३९. अध्यायः ३९

Mahabharata - Udyoga Parva - Chapter Topics

विदुरेण धृतराष्ट्रंप्रति ज्ञातिसंग्रहे गुणवर्णनपूर्वकं पुनः
कुरुपाण्डवेषु साम्येन वर्तनविधानम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-३९-० (३३१९९)
धृतराष्ट्र उवाच। ५-३९-०क्ष् (३४९२)
अनीश्वरोऽयं पुरुषो भवाभवे
सूत्रप्रोता दारुमयीव योषा ।
धात्रा तु दिष्टस्य वशे कृतोऽयं
तस्माद्वद त्वं श्रवणे धृतोऽहम् ॥ ५-३९-१ (३३२००)
विदुर उवाच। ५-३९-२क्ष् (३४९३)
अप्राप्तकालं वचनं बृहस्पतिरपि ब्रुवन् ।
लभते बुध्यवज्ञानमवमानं च भारत ॥ ५-३९-२ (३३२०१)
प्रियो भवति दानेन प्रियवादेन चापरः ।
मन्त्रमूलबलेनान्यो यः प्रियः प्रिय एव सः ॥ ५-३९-३ (३३२०२)
द्वेष्यो न साधुर्भवति न मेधावी न पण्डितः ।
प्रिये शुभानि कार्याणि द्वेष्ये पापानि चैव ह ॥ ५-३९-४ (३३२०३)
उक्तं मया जातमात्रेऽपि राजन्
दुर्योधनं त्यज पुत्रं त्वमेकम् ।
तस्य त्यागात्पुत्रशतस्य वृद्धि-
रस्यात्यागात्पुत्रशतस्य नाशः ॥ ५-३९-५ (३३२०४)
न वृद्धिर्बहुमन्तव्या या वृद्धिः क्षयमावहेत् ।
क्षयोऽपि बहुमन्तव्यो यः क्षयो वृद्धिमावहेत् ॥ ५-३९-६ (३३२०५)
न स क्षयो महाराज यः क्षयो वृद्धिमावहेत् ।
क्षयः स त्विह मन्तव्यो यं लब्ध्वा बहु नाशयेत् ॥ ५-३९-७ (३३२०६)
समृद्धा गुणतः केचिद्भवन्ति धनतोऽपरे ।
धनवृद्धान्गुणैर्हीनान्धृतराष्ट्र विवर्जय ॥ ५-३९-८ (३३२०७)
धृतराष्ट्र उवाच। ५-३९-९क्ष् (३४९४)
सर्वं त्वमायतीयुक्तं भाषसे प्राज्ञसंमतम् ।
न चोत्सहे सुतं त्यक्तुं यतो धर्मस्ततो जयः ॥ ५-३९-९ (३३२०८)
विदुर उवाच। ५-३९-१०क्ष् (३४९५)
अतीव गुणसंपन्नो न जातुः विनयान्वितः ।
सुसूक्ष्ममपि भूतानामुपमर्दमुपेक्षते ॥ ५-३९-१० (३३२०९)

परापवादनिरताः परदुःखोदयेषु च ।
परस्परविरोधे च यतन्ते सततोत्थिताः ॥ ५-३९-११ (३३२१०)
सदोषं दर्शनं येषां संवासे सुमहद्भयम् ।
अर्थादाने महान्दोषः प्रदाने च महद्भयम् ॥ ५-३९-१२ (३३२११)
ये वै भेदनशीलास्तु सकामा निस्त्रपाः शठाः ।
ये पापा इति विख्याताः संवासे पिरिगर्हिताः ॥ ५-३९-१३ (३३२१२)
युक्ताश्चान्यैर्महादोषैर्ये नरास्तान्विवर्जयेत् ।
निवर्तमाने सौहार्दे प्रीतिर्नीचे प्रणश्यति ॥ ५-३९-१४ (३३२१३)
या चैव फलनिर्वृतिः सौहृदे चैव यत्सुखम् ।
यतते चापवादाय यत्नमारभते क्षये ॥ ५-३९-१५ (३३२१४)
अल्पेऽप्यपकृते मोहान्न शान्तिमधिगच्छति ।
तादृशैः सङ्गतं नीचैर्नृशंसैरकृतात्मभिः ।
निशाम्य निपुणं बुद्ध्या विद्वान्दूराद्विवर्जयेत् ॥ ५-३९-१६ (३३२१५)
यो ज्ञातिमनुगृह्णाति दरिद्रं दीनमातुरम् ।
स पुत्रपशुभिर्वृद्धिं श्रेयश्चानन्त्यमश्नुते ॥ ५-३९-१७ (३३२१६)
ज्ञातयो वर्धनीयास्तैर्य इच्छन्त्यात्मनः शुभम् ॥ ५-३९-१८ (३३२१७)
कुलवृद्धिं च राजेन्द्र तस्मात्साधु समाचरं ।
श्रेयसा योक्ष्यते राजन्कुर्वाणो ज्ञातिसत्क्रियां ॥ ५-३९-१९ (३३२१८)
विगुणा ह्यपि संरक्ष्या ज्ञातयो भरतर्षभ ।
किंपुनर्गुणवन्तस्ते त्वत्प्रसादाभिकाङ्क्षिणः ॥ ५-३९-२० (३३२१९)
प्रसादं कुरु वीराणां पाण्डवानां विशांपते ।
दीयतां ग्रामकाः केचित्तेषां वृत्त्यर्थमीश्वर ॥ ५-३९-२१ (३३२२०)
एवं लोके यशः प्राप्तं भविष्यति नराधिप ।
वृद्धेन हि त्वया कार्यं पुत्राणां तात शासनम् ॥ ५-३९-२२ (३३२२१)
मया चापि हितं वाच्यं विद्धि मां त्वद्धितैषिणम् ।
ज्ञातिभिर्विग्रहस्तात न कर्तव्यः शुभार्थिना ।
सुखानि सह भोज्यानि ज्ञातिभिर्भरतर्षभ ॥ ५-३९-२३ (३३२२२)
संभोजनं संकथनं संप्रीतिश्च परस्परम् ।
ज्ञातिभिः सह कार्याणि न विरोधः कदाचन ॥ ५-३९-२४ (३३२२३)
ज्ञातयस्तारयन्तीह ज्ञातयो मज्जयन्ति च ।
सुवृत्तास्तारयन्तीह दुर्वृत्ता मज्जयन्ति च ॥ ५-३९-२५ (३३२२४)
सुवृत्तो भव राजेन्द्र पाण्डवान्प्रति मानद ।
अधर्षणीयः शत्रूणां तैर्वृतस्त्वं भविष्यति ॥ ५-३९-२६ (३३२२५)
श्रीमन्तं ज्ञातिमासाद्य यो ज्ञातिरवसीदति ।
दिग्धहस्तं मृग इव स एनस्तस्य विन्दति ॥ ५-३९-२७ (३३२२६)
पश्चादपि नरश्रेष्ठ तव तापो भविष्यति ।

तान्वा हतान्सुतान्वापि श्रुत्वा तदनुचिन्तय ॥ ५-३९-२८ (३३२२७)
येन खट्वां समारूढः परितप्येत कर्मणा ।
आदावेन न तत्कुर्यादध्रुवे जीविते सति ॥ ५-३९-२९ (३३२२८)
न कश्चिन्नापनयते पुमानन्यत्र भार्गवात् ।
शेषसंप्रतिपत्तिस्तु बुद्धिमत्स्वेव तिष्ठति ॥ ५-३९-३० (३३२२९)
दुर्योधनेन यद्येतत्पापं तेषु पुरा कृतम् ।
त्वया तत्कुलवृद्धेन प्रत्यानेयं नरेश्वर ॥ ५-३९-३१ (३३२३०)
तांस्त्वं पदे प्रतिष्ठाप्य लोके विगतकल्मषः ।
भविष्यसि नरश्रेष्ठ पूजनीयो मनीषिणाम् ॥ ५-३९-३२ (३३२३१)
सुव्याहृतानि धीराणां फलतः परिचिन्त्य यः ।
अध्यवस्यति कार्येषु चिरं यशसि तिष्ठति ॥ ५-३९-३३ (३३२३२)
असम्यगुपयुक्तं हि ज्ञानं सुकुशलैरपि ।
उपलभ्यं चाविदितं विदितं चाननुष्ठितम् ॥ ५-३९-३४ (३३२३३)
पापोदयफलं विद्वान्यो नारभति वर्धते ॥ ५-३९-३५ (३३२३४)
यस्तु पूर्वकृतं पापमविमृश्यानुवर्तते ।
अगाधपङ्के दुर्मेधा विषमे विनिपात्यते ॥ ५-३९-३६ (३३२३५)
मन्त्रभेदस्य षट् प्राज्ञो द्वाराणीमानि लक्षयेत् ।
अर्थसन्ततिकामश्च रक्षेदेतानि नित्यशः ॥ ५-३९-३७ (३३२३६)
मदं स्वप्नपविज्ञानमाकारं चात्मसंभवम् ।
दुष्टामात्येषु विश्रम्भं दूताच्चाकुशलादपि ॥ ५-३९-३८ (३३२३७)
द्वाराण्येतानि यो ज्ञात्वा संवृणोति सदा नृप ।
त्रिवर्गाचरणे युक्तः स शत्रूनधितिष्ठति ॥ ५-३९-३९ (३३२३८)
नवै श्रुतमविज्ञाय वृद्धाननुपसेव्य वा ।
धर्मार्थौ वेदुतुं शक्यौ बृहस्पतिसमैरपि ॥ ५-३९-४० (३३२३९)
नष्टं समुद्रे पतितं नष्टं वाक्यमशृण्वति ।
अनात्मनि श्रुतं नष्टं नष्टं हुतमनग्निकम् ॥ ५-३९-४१ (३३२४०)
मत्या परीक्ष्य मेधावी बुद्ध्या संपाद्य चासकृत् ।
श्रुत्वा दृष्ट्वाथ विज्ञाय प्राज्ञैर्मैत्रीं समाचरेत् ॥ ५-३९-४२ (३३२४१)
अकीर्तिं विनयो हन्ति हन्त्यनर्थं पराक्रमः ।
हन्ति नित्यं क्षमा क्रोधमाचारो हन्त्यलक्षणम् ॥ ५-३९-४३ (३३२४२)
परिच्छदेन क्षेत्रेण वेश्मना परिचर्यया ।
परीक्षेत कुलं राजन्भोजनाच्छादनेन च ॥ ५-३९-४४ (३३२४३)
उपस्थितसय कामस्य प्रतिवादो न विद्यते ।
अपि निर्मुक्तदेहस्य कामरक्तस्य किं पुनः ॥ ५-३९-४५ (३३२४४)
प्राज्ञोपसेविनं वैद्यं धार्मिकं प्रियदर्शनम् ।
मित्रवन्तं सुवाक्यं च सुहृदं परिपालयेत् ॥ ५-३९-४६ (३३२४५)

दुष्कुलीनः कुलीनो वा मर्यादां यो न लङ्घयेत् ।
धर्मापेक्षी मृदुर्ह्रीमान्स कुलीनशताद्वरः ॥ ५-३९-४७ (३३२४६)
ययोश्चित्तेन वा चित्तं निभृतं निभृतेन वा ।
समेति प्रज्ञया प्रज्ञा तयोर्मैत्री न जीर्यति ॥ ५-३९-४८ (३३२४७)
दुर्बुद्धिमकृतप्रज्ञं छन्नं कूपं तृणैरिव ।
विवर्जयीत मेधावी तस्मिन्मैत्री प्रणश्यति ॥ ५-३९-४९ (३३२४८)
अवलिप्तेषु मूर्खेषु रौद्रसाहसिकेषु च ।
तथैवापेतधर्मेषु न मैत्रीमाचरेद्बुधः ॥ ५-३९-५० (३३२४९)
कृतज्ञं धार्मिकं सत्यमक्षुद्रं दृढभक्तिकम् ।
जितेन्द्रियं स्थितं स्थित्यां मित्रमित्यभिवाञ्छति ॥ ५-३९-५१ (३३२५०)
इन्द्रियाणामनुत्सर्गो मृत्युनापि विशिष्यते ।
अत्यर्थं पुनरुत्सर्गः सादयेद्दैवतानपि ॥ ५-३९-५२ (३३२५१)
मार्दवं सर्वभूतानामनसूया क्षमा धृतिः ।
आयुष्याणि बुधाः प्राहुर्मित्राणां चाविमानना ॥ ५-३९-५३ (३३२५२)
अपनीतं सुनीतेन योऽर्थं प्रत्यानिनीपते ।
मतिमास्थाय सुदृढां तदकापुरुषव्रतम् ॥ ५-३९-५४ (३३२५३)
आयत्यां प्रतिकारज्ञस्तदात्वे दृढनिश्चयः ।
अतीते कार्यशेषज्ञो नरोऽर्थैर्न प्रहीयते ॥ ५-३९-५५ (३३२५४)
कर्मणा मनसा वाचा यदभीक्ष्णं निषेवते ।
तदेवापहरत्येनं तस्मात्कल्याणमाचरेत् ॥ ५-३९-५६ (३३२५५)
मङ्गलालम्भनं योगः श्रुतमुत्थानमार्जवम् ।
भूतिमेतानि कुर्वन्ति सतां चाभीक्ष्णदर्शनम् ॥ ५-३९-५७ (३३२५६)
अनिर्वेदः श्रियो मूलं लाभस्य च शुभस्य च ।
महान्भवत्यनिर्विण्णः सुखं चानन्त्यमश्नुते ॥ ५-३९-५८ (३३२५७)
नातः श्रीमत्तरं किंचिदन्यत्पथ्यतमं मतम् ।
प्रभविष्णोर्यथा तात क्षमा सर्वत्र सर्वदा ॥ ५-३९-५९ (३३२५८)
क्षमेदशक्तः सर्वस्य शक्तिमान्धर्मकारणात् ।
अर्थानर्थौ समौ यस्य तस्य नित्यं क्षमा हिता ॥ ५-३९-६० (३३२५९)
यत्सुखं सेवमानोऽपि धर्मार्थाभ्यां न हीयते ।
कामं तदुपसेवेत न मूढव्रतमाचरेत् ॥ ५-३९-६१ (३३२६०)
दुःखार्तेषु प्रमत्तेषु नास्तिकेष्वलसेषु च ।
न श्रीर्वसत्यदान्तेषु ये चोत्साहविवर्जिताः ॥ ५-३९-६२ (३३२६१)
आर्जवेन नरं युक्तमार्जवात्सव्यपत्रपम् ।
अशक्तं मन्यमानास्तु धर्षयन्ति कुबुद्धयः ॥ ५-३९-६३ (३३२६२)
अत्यार्यमतिदातारमतिशूरमतिव्रतम् ।
प्रज्ञाभिमानिनं चैव श्रीर्भयान्नोपसर्पति ॥ ५-३९-६४ (३३२६३)

न चातिगुणवत्स्वेषा नात्यन्तं निर्गुणेषु च ।
नेषा गुणान्कामयते नैर्गुण्यान्नानुरज्यते ।
उन्मत्ता गौरिवान्धा श्रीः क्वचिदेवावतिष्ठते ॥ ५-३९-६५ (३३२६४)
अग्निहोत्रफला वेदाः शीलवृत्तफलं श्रुतम् ।
रतिपुत्रफला नारी दत्तभुक्तफलं धनम् ॥ ५-३९-६६ (३३२६५)
अधर्मोपार्जितैरर्थैर्यः करोत्यौर्ध्वदेहिकम् ।
न स तस्य फलं प्रेत्य भुङ्क्तेऽर्थस्य दुरागमात् ॥ ५-३९-६७ (३३२६६)
कान्तारे वनदुर्गेषु कृच्छ्रास्वापत्सु संभ्रमे ।
उद्यतेषु च शस्त्रेषु नास्ति सत्ववतां भयम् ॥ ५-३९-६८ (३३२६७)
उत्थानं संयमो दाक्ष्यमप्रमादो धृतिः स्मृतिः ।
समीक्ष्य च समारम्भो विद्धि मूलं भवस्य तु ॥ ५-३९-६९ (३३२६८)
तपो बलं तापमानां ब्रह्म ब्रह्मविदां बलम् ।
हिंसा बलमसाधूनां क्षमा गुणवतां बलम् ॥ ५-३९-७० (३३२६९)
अष्टौ तान्यव्रतघ्नानि आपो मूलं फलं पयः ।
हविर्ब्राह्मणकाम्या च गुरोर्वचनमौषधम् ॥ ५-३९-७१ (३३२७०)
न तत्परस्य सन्दध्यात्प्रतिकूलं यदात्मनः ।
सङ्ग्रहेणैव धर्मः स्यात्कामादन्यः प्रवर्तते ॥ ५-३९-७२ (३३२७१)
अक्रोधेन जयेत्क्रोधमसाधुं नाधुना जयेत् ।
जयेत्कदर्यं दानेन जयेन्मत्येन चानृतम् ॥ ५-३९-७३ (३३२७२)
स्त्रीधूर्तकेऽलसे भीरौ चण्डे पुरुषमानिनि ।
चोरे कृतघ्ने विश्वासो न कार्यो न च नास्तिके ॥ ५-३९-७४ (३३२७३)
अभिवादनशीलप्य नित्यं वृद्धोपसेविनः ।
चत्वारि संप्रवर्धन्ते कीर्तिरापुर्यशो बलम् ॥ ५-३९-७५ (३३२७४)
अतिक्लेशेन येऽथोः स्वधर्मस्यानिक्रमेण वा ।
अरेर्वा प्रणिपातेन मा ॥ तेषु मनः कृथाः ॥ ५-३९-७६ (३३२७५)
अविद्यः पुरुषः शोच्यः शोच्यं मैथुनमप्रजम् ।
निराहाराः प्रजाः शोच्याः शोच्यं राष्ट्रमराजकं ॥ ५-३९-७७ (३३२७६)
अध्वा जरा देहवतां पर्वतानां जलं जरा ।
असंभोगो जरा स्त्रीणां वाक्छल्यं मनसो जरा ॥ ५-३९-७८ (३३२७७)
अनाम्नायमला वेदा ब्राह्मणस्याव्रतं मलम् ।
मलं पृथिव्या वाह्लीकाः पुरुषस्यानृतं मलम् ॥ ५-३९-७९ (३३२७८)
कौतूहलमला साध्वी विप्रवासमलाः स्त्रियः ॥ ५-३९-८० (३३२७९)
सुवर्णस्य मलं रूप्यं रूप्यस्यापि मलं त्रपु ।
ज्ञेयं त्रपुमलं सीमं सीसस्यापि मलं मलम् ॥ ५-३९-८१ (३३२८०)
न स्वप्नेन जयेन्निद्रां न कामेन जयेत्स्त्रियः ।
नेन्धनेन जयेदग्निं न पानेन सुरां जयेत् ॥ ५-३९-८२ (३३२८१)

यस्य दानजितं मित्रं शत्रवो युधि निर्जिताः ।
अन्नपानजिता दाराः सफलं तस्य जीवितम् ॥ ५-३९-८३ (३३२८२)
सहस्रिणोऽपि जीवन्ति जीवन्ति शतिनस्तथा ।
धृतराष्ट्र विमुञ्चेच्छां न कथञ्चिन्न जीव्यते ॥ ५-३९-८४ (३३२८३)
यत्पृथिव्यां व्रीहियवं हिरण्यं पशवः स्त्रियः ।
नालमेकस्य तत्सर्वमिति पश्यन्न मुह्यति ॥ ५-३९-८५ (३३२८४)
राजन्भूयो ब्रवीमि त्वां पुत्रेषु सममाचर ।
समता यदि ते राजन्स्वेषु पाण्डुसुतेषु वा ॥ ॥ ५-३९-८६ (३३२८५)

इति श्रीमन्महाभारते उद्योगपर्वणि प्रजागरपर्वणि
एकोनचत्वारिंशोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-३९-१ भवाभवे ऐश्वर्यानैश्वर्ये । दिष्टस्य दैवस्य। वदैव
नतु म दूषयेति भावः। धृतः धृतिमान् ॥
५-३९-२ बुद्ध्यवज्ञानं अवज्ञातबुद्धित्वम् ॥
५-३९-९ आयतीयुक्तं उदर्के हितम् ॥
५-३९-१५ फलनिर्वृत्तिः सुखं च प्रणश्यति । आरभते नीच इति
शेषः ॥
५-३९-१६ सङ्गतं संबन्धम् । निशाम्य विचार्य ॥
५-३९-२७ दिग्धहस्तं विषाक्तबाणहस्तम् । स श्रीमान् एनस्तस्य
ज्ञातेरवसादजं पापं विन्दति। मृगवधजं पापं व्याध इवेत्यर्थः
॥
५-३९-२९ खट्वां समारूढश्चिन्तागारं प्रविष्टः ॥
५-३९-३० भार्गवात् शुक्रादन्यत्र नीतिशास्त्रकर्तारं शुक्रं विहाय
अन्यः कश्चिदपि न अपनयते इति न अपितु सर्वोऽप्यपनयते अनीतिं
करोति । अतः यत् अतीतं तत् अतीतमेव। शेषस्य तत्कालोचितस्य अर्थस्य
प्रतिपत्तिः विचारः कर्तव्य इत्यर्थः ॥
५-३९-३१ प्रत्यानेयं प्रतिकर्तव्यम् ॥
५-३९-३३ अध्यवस्यति निश्चयं करोति ॥
५-३९-३४ सुकुशलैरप्युपयुक्तं उपदिष्टं तत् ज्ञानं असम्यगेव
। यतः उपलभ्यं ज्ञेयं तेन अविदितं न ज्ञातं । ज्ञातं वा तत्
नानुष्ठितम्। मदुक्तं त्वयि निष्फलमेवेति भावः ॥
५-३९-३५ पापोदयफलं पापहेतुभूतप्रयोजनकं कर्म यो नारभते
स वर्धते ॥
५-३९-३६ पापमेवानुवर्तते सततं करोति । पङ्के नारके ॥

५-३९-३८ अविज्ञानं परकीयगुप्तचारादेरज्ञानम् । आत्मसंभवं आकारं
नेत्रवक्त्रविकारादिकम् ॥
५-३९-३९ मन्त्रभेदस्य द्वाराणि संवृणोति पिदधाति ॥
५-३९-४० श्रुतं शास्त्रम् ॥
५-३९-४४ परिच्छदः भोग्यवस्तुसामग्री । क्षेत्रेण
जन्मस्थानेन। कुग्रामवासिषु प्रायेण विवेकाभावात्। परिचर्यया
आचारेण ॥
५-३९-४६ वैद्यं विद्यावन्तम् ॥
५-३९-५२ इन्द्रियाणां उत्सर्गो विषयेषु प्रवृत्तिः । अनुत्सर्गो
विषयेभ्यो निवृत्तिः। सा मृत्युतुल्या दुरनुष्ठेयेत्यर्थः ॥
५-३९-५३ आयुष्याणि आयुष्कराणि ॥
५-३९-५४ अपनीतं नाशितम् ॥
५-३९-५५ आयत्यां आगामिति काले दुःखस्य प्रतीकारज्ञः तदात्वे वर्तमाने
दृढनिश्चयः ॥
५-३९-५७ मङ्गलानां दधिदूर्वागवादीनां आलम्भनं स्पर्शः । योगः
सहायसंपत। उत्थानं उद्यमःक ॥
५-३९-५८ अनिर्वेदः उद्योगात् अनुपरमः ॥
५-३९-६१ मूढव्रतं आहारादौ अतिनिर्बन्धम् ॥
५-३९-६२ अदान्तेषु लिप्साहीनेषु ॥
५-३९-६७ और्ध्वदेहिकं परलोकसाधनं यज्ञदानादि ॥
५-३९-६९ संयमः इन्द्रियाणां निग्रहः । भवस्य ऐश्वर्यस्य ॥
५-३९-७१ ब्राह्मणकाम्या ब्राह्मणस्य इच्छा इत्येत्यर्थः ॥
५-३९-७३ संदध्यात् कुर्यात् ॥
५-३९-७३ साधुना ॥।
५-३९-७८ स्त्रीधूर्तके स्त्रियां धुते चेत्येकवद्भावः ॥
५-३९-७९ वाह्लीकाः पञ्चानां सिन्धुषष्टानां नदीनां यत्र संगमः
वाह्लीका नाम ते देशाः ॥
५-३९-८० विप्रवासः प्रवासः ॥
५-३९-८२ स्वप्नेन शयनेन ॥
५-३९-८६ यदि ते स्वेषु पुत्रेषु पाण्डवेषु च समतास्ति तर्हि सर्वेषु
सममेवाचर ॥

उद्योगपर्व - अध्याय ०४०
॥ श्रीः ॥
५.४०. अध्यायः ४०

विदुरेण धृतराष्ट्रं प्रति तत्तद्वर्णवर्मणां
तैस्तैश्चश्यानुष्ठेयत्वकथनपूर्वकं युधिष्ठिरस्य राज्यं प्रदाय
क्षात्रधर्मे नियोजनचोदनम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-४०-० (३३२८६)
विदुर उवाच। ५-४०-०क्ष् (३४९६)
योऽभ्यर्चितः मङ्गिरसञ्जमानः
करोत्यर्थं शक्तिमहापयित्वा ।
क्षिप्रं यशस्तं समुपैति मन्त-
मलं प्रसन्ना हि सुखाय सन्तः ॥ ५-४०-१ (३३२८७)
महान्तमप्यर्थमधर्मयुक्तं
यः मन्त्यजत्यनपाकृष्ट एव ।
सुखं सुदुःखान्यवमुच्य शेते
जीर्णां त्वचं सर्प इवावमुच्य ॥ ५-४०-२ (३३२८८)
अनृते च समुत्कर्षो राजगामि च पैशुनम् ।
गुरोश्चालीकनिर्बन्धः समानि ब्रह्महत्यया ॥ ५-४०-३ (३३२८९)
असूयैकपदं मृत्युरतिवादः श्रियो वधः ।
अशुश्रूषा त्वरा श्लाघा विद्यायाः शत्रवस्त्रः ॥ ५-४०-४ (३३२९०)
आलस्यं मदमोहौ च चापलं गोष्ठिरेव च ।
स्तब्धता चाभिमानित्वं तथा त्यागित्वमेव च ॥ ५-४०-५ (३३२९१)
एते वै सप्त दोषाः स्युः सदा विद्यार्थिनां मताः ।
सुखार्थिनः कुतो विद्या नास्ति विद्यार्थिनः सुखं ।
सुखार्थी वा त्यजेद्विद्यां विद्यार्थी वा त्यजेत्सुखम् ॥ ५-४०-६ (३३२९२)
नाग्निस्तृप्यति काष्ठानां नापगानां महोदधिः ।
नान्तकः सर्वभूतानां न पुंसां वामलोचना ॥ ५-४०-७ (३३२९३)
आशा धृतिं हन्ति समृद्धिमन्तकः
क्रोधः श्रियं हन्ति यशः कदर्यता ।
अपालनं हन्ति पशूंश्च राज-
न्नेकः क्रुद्धो ब्राह्मणो हन्ति राष्ट्रम् ॥ ५-४०-८ (३३२९४)
अजाश्च कांस्यं रजतं च नित्यं
मध्वाकर्षः शकुनिः श्रोत्रियश्च ।
वृद्धो ज्ञातिरवसन्नः कुलीन
एतानि ते सन्तु गृहे सदैव ॥ ५-४०-९ (३३२९५)
अजोक्षा चन्दनं वीणा आदर्शो मधुसर्पिषी ।

विषमौदुम्बरं शङ्खः स्वर्णनाभोऽथ रोचना ॥ ५-४०-१० (३३२९६)
गृहे स्थापयितव्यानि धन्यानि मनुरब्रवीत् ।
देवब्राह्मणपूजार्थमतिथीनां च भारत ॥ ५-४०-११ (३३२९७)
इदं च त्वां सर्वपरं ब्रवीमि
पुण्यं पदं तात महाविशिष्टम् ।
न जातु कामान्न भयान्न लोभा-
द्धर्मं जह्याज्जीविस्यापि हेतोः ॥ ५-४०-१२ (३३२९८)
नित्यो धर्मः सुखदुःखे त्वनित्ये
जीवो नित्यो धातुरस्य त्वनित्यः ।
त्यक्त्वाऽनित्यं प्रतितिष्ठस्व नित्ये
संतुष्य सन्तोषपरा हि सन्तः ॥ ५-४०-१३ (३३२९९)
महाबलान्पश्य महानुभावान्
प्रशास्य भूमिं धनधान्यपूर्णाम् ।
राज्यानि हित्वा विपुलांश्च भोगान् ।
गतान्नरेन्द्रान्वशमन्तकस्य ॥ ५-४०-१४ (३३३००)
मृतं पुत्रं दुःखपुष्टं मनुष्या
उत्क्षिप्य राजन्स्वगृहान्निर्हरन्ति ।
तं मुक्तकेशाः करुणं रुदन्ति
चितामध्ये काष्ठमिव क्षिपन्ति ॥ ५-४०-१५ (३३३०१)
अन्यो धनं प्रेतगतस्य भुङ्क्ते
वयांसि चाग्निश्च शरीरधातून् ।
द्वाभ्यामयं सह गच्छत्यमुत्र
पुण्येन पापेन च वेष्ट्यमानः ॥ ५-४०-१६ (३३३०२)
उसृज्य विनिवर्तन्ते ज्ञातयः सुहृदः सुताः ।
अपुष्पानफलान्वृक्षान्यथा तात पतत्रिणः ॥ ५-४०-१७ (३३३०३)
अग्नौ प्रास्तं तु पुरुषं कर्मान्वेति स्वयं कृतम् ।
तस्मात्तु पुरुषो यत्नाद्धर्मं सञ्चिनुयाच्छनैः ॥ ५-४०-१८ (३३३०४)
अस्माल्लोकादूर्ध्वममुष्य चाधो
महत्तमस्तिष्ठति ह्यन्धकारम् ।
तद्वै महामोहनमिन्द्रियाणां
बुद्ध्यस्व मा त्वां प्रलभेत राजन् ॥ ५-४०-१९ (३३३०५)
इदं वचः शक्ष्यसि चेद्यथाव-
न्निशम्य सर्वं प्रतिपत्तुमेव ।
यशः परं प्राप्स्यसि जीवलोके
भयं नचामुत्र नचेह तेऽस्ति ॥ ५-४०-२० (३३३०६)
आत्मा नदी भारत पुण्यतीर्था

सत्योदया धृतिकूला दयोर्मिः ।
तस्यां स्नातः पूयते पुण्यकर्मा
पुण्यो ह्यात्मा नित्यमलोभ एव ॥ ५-४०-२१ (३३३०७)
कामक्रोधग्राहवतीं पञ्चेन्द्रियजलां नदीम् ।
नावं धृतिमयीं कृत्वा जन्मदुर्गाणि संतर ॥ ५-४०-२२ (३३३०८)
प्रज्ञावृद्धं धर्मवृद्धं स्वबन्धुं
विद्यावृद्धं वयसा चापि वृद्धम् ।
कार्याकार्ये पूजयित्वा प्रसाद्य
यः संपृच्छेन्न स मुह्येत्कदाचित् ॥ ५-४०-२३ (३३३०९)
धृत्या शिश्नोदरं रक्षेत्पाणिपादं च चक्षुषा ।
चक्षुःश्रोत्रे च मनसा मनो वाचं च कर्मणा ॥ ५-४०-२४ (३३३१०)
नित्योदकी नित्ययज्ञोपवीती
नित्यस्वाध्यायी पतितान्नवर्जी ।
सत्यं ब्रुवन्गुरवे कर्म कुर्व-
न्न ब्राह्मणश्च्यवते ब्रह्मलोकात् ॥ ५-४०-२५ (३३३११)
अधीत्य वेदान्परिसंस्तीर्य चाग्नी-
निष्टवा यज्ञैः पालयित्वा प्रजाश्च ।
गोब्रह्मणार्थं शस्त्रपूतान्तरात्मा
हतः सङ्ग्रामे क्षत्रियः स्वर्गमेति ॥ ५-४०-२६ (३३३१२)
वैश्योऽधीत्य ब्राह्मणान्क्षत्रियांश्च
धनैः काले संविभज्याश्रितांश्च ।
त्रेतापूतं धूममाघ्राय पुण्यं
प्रेत्य स्वर्गे दिव्यसुखानि भुङ्क्ते ॥ ५-४०-२७ (३३३१३)
ब्रह्म क्षत्रं वैश्यवर्णं च शूद्रः
क्रमेणैतान्न्यायतः पूजयानः ।
तुष्टेष्वेतेष्वव्यथो दग्धपाप-
स्त्यक्त्वा देहं स्वर्गसुखानि भुङ्क्ते ॥ ५-४०-२८ (३३३१४)
चातुर्वर्ण्यस्यैष धर्मस्तवोक्तो
हेतुं चानुब्रुवतो मे निबोध ।
क्षात्राद्धर्माद्धीयते पाण्डुपुत्र-
स्तं त्वं राजन्राजधर्मे नियुङ्क्ष ॥ ५-४०-२९ (३३३१५)
धृतराष्ट्र उवाच। ५-४०-३०क्ष् (३४९७)
एवमेतद्यथा त्वं मामनुशासनि नित्यदा ।
ममापि च मतिः सौम्य भवत्येवं यथात्थ माम् ॥ ५-४०-३० (३३३१६)
सा तु बुद्धिः कृताप्येवं पाण्डवान्प्रति मे सदा ।
दुर्योधनं समासाद्य पुनर्विपरिवर्तते ॥ ५-४०-३१ (३३३१७)

न दिष्टमभ्यतिक्रान्तुं शक्यं भूतेन केनचित् ।
दिष्टमेव ध्रुवं मन्ये पौरुषं तु निरर्थकम् ॥ ॥ ५-४०-३२ (३३३१८)

इति श्रीमन्महाभारते उद्योगपर्वणि प्रजागरपर्वणि
चत्वारिंशोऽध्यायः ॥ ॥ समाप्तमिदं प्रजागरपर्व ॥ -------
Mahabharata - Udyoga Parva - Chapter Footnotes

५-४०-१ प्रमन्नः सन्तः साधवः सुखाय अलं सुखं दातुं पर्याप्ताः ॥
५-४०-४ एकपदं सर्वात्मना ॥
५-४०-५ मदमोहौ एकीकृत्य सप्त ॥
५-४०-९ आकर्षः विषादीनाम् ॥
५-४०-१० अजेन सहितः उक्षा अजोक्षा । औदुम्बरं ताम्रमयं
पात्रजातम्। विषं लोहमिति सर्वज्ञः। स्वर्णनाभः शालग्रामः
। दक्षिणावर्तः शङ्खः । ५-४०-११ धन्यानि मङ्गलावहानि ॥
५-४०-१२ महाविशिष्टं महेन उत्सवेन अविशिष्टं समानं
माङ्गलिकमित्यर्थः ॥
५-४०-१९ अस्माल्लोकादूर्ध्वं स्वर्गे । अमुष्य अमुष्मात् स्वर्गात्। प्रलभेत
स्पृशेत् ॥
५-४०-२० प्रतिपत्तुं ज्ञातुं शक्ष्यसि चेदिति संबन्धः ॥
५-४०-२१ पुण्यमपि किं नित्य मलोभ एव । वैराग्यात्र परं पुण्यमित्यर्थः ॥
५-४०-२४ मनो वाचं च विद्ययेति ङ पाठः ॥
५-४०-२५ नित्योदकी यथाकालं स्नानाचमनपरः ॥

उद्योगपर्व - अध्याय ०४१
॥ श्रीः ॥
५.४१. अध्यायः ४१

Mahabharata - Udyoga Parva - Chapter Topics
धृतराष्ट्रेण पुनर्धर्मरहस्यकथनं चोदितेन विदुरेण स्वस्य
शूद्रयोनिजातत्वेन तत्कथनानौचित्यकथनम् ॥ १ ॥
तथा स्मरण मात्रसंनिहितं सनत्सुजातंप्रति धृतराष्ट्राय
तत्वोपदेशप्रार्थना ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-४१-० (३३३१९)
धृतराष्ट्र उवाच। ५-४१-०क्ष् (३४९८)

अनुक्तं यदि ते किञ्चिद्वाचा विदुर विद्यते ।
तन्मे शुश्रूषतो ब्रूहि विचित्राणि हि भाषसे ॥ ५-४१-१ (३३३२०)
विदुर उवाच। ५-४१-२क्ष् (३४९९)
धृतराष्ट्र कुमारो वै यः पुराणः सनातनः ।
तनत्सुजातः प्रोवाच मृत्युर्नास्तीति भारत ॥ ५-४१-२ (३३३२१)
स ते गुह्यान्प्रकाशांश्च सर्वान्हृदयसंश्रयान् ।
प्रवक्ष्यति महाराज सर्वबुद्धिमतां वरः ॥ ५-४१-३ (३३३२२)
धृतराष्ट्र उवाच। ५-४१-४क्ष् (३५००)
किं त्वं न वेद तद्ब्रूयो यन्मे ब्रूयात्सनातनः ।
त्वमेव विदुर ब्रूहि प्रज्ञाशेषोऽस्ति चेत्तव ॥ ५-४१-४ (३३३२३)
विदुर उवाच। ५-४१-५क्ष् (३५०१)
शूद्रयोनावहं जातो नातोऽन्यद्वक्तुमुत्सहे ।
कुमारस्य तु याबुद्धिर्वेद तां शाश्वतीमहम् ॥ ५-४१-५ (३३३२४)
ब्राह्मीं हि योनिमापन्नः सगुह्यमपि यो वदेत् ।
न तेन गर्ह्यो देवानां तस्मादेतद्ब्रवीमि ते ॥ ५-४१-६ (३३३२५)
धृतराष्ट्र उवाच। ५-४१-७क्ष् (३५०२)
ब्रवीहि विदुर त्वं मे पुराणं तं सनातनम् ।
कथमेतेन देहेन स्यादिहैव समागमः ॥ ५-४१-७ (३३३२६)
वैशम्पायन उवाच। ५-४१-८क्ष् (३५०३)
चिन्तयामास विदुरस्तभृषिं शंसितव्रतम् ।
स च तच्चिन्तितं ज्ञात्वा दर्शयामास भारत ॥ ५-४१-८ (३३३२७)
स चैनं प्रतिजग्राह विधिदृष्टेन कर्मणा ।
सुखोपविष्टं विश्रान्तमथैनं विदुरोऽब्रवीत् ॥ ५-४१-९ (३३३२८)
भगवन्संशयः कश्चिद्धृतराष्ट्रस्य मानसः ।
यो न शक्यो मया वक्तुं त्वमस्मै वक्तुमर्हसि ॥ ५-४१-१० (३३३२९)
यं श्रत्वाऽयं मनुष्येन्द्रः सर्वदुःखातिगो भवेत् ॥ ५-४१-११ (३३३३०)
लाभालाभौ प्रियद्वेष्यौ यथैनं न जरान्तकौ ।
विषहेरन्भयामर्षौ श्रुत्पिपासे मदोद्भवौ ।
अरतिश्चैव तन्द्री च कामक्रोधौ क्षयोदयौ ॥ ॥ ५-४१-१२ (३३३३१)

इति श्रीमन्महाभारते उद्योगपर्वणि सनत्सुजातपर्वणि
एकचत्वारिंशोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-४१-२ सनुत्कुम्मरः प्रोवाचेति को पाठः ॥
५-४१-४ तमहं नाभिजानामि तत्वतो वै सनातनमिति को पाठो ॥

५-४१-१२ विषहेरन् बाधेरन् । अमर्षः असहिष्णुता । उद्भव उत्कृष्टैश्वर्य ॥

उद्योगपर्व - अध्याय ०४२
॥ श्रीः ॥
५.४२. अध्यायः ४२

Mahabharata - Udyoga Parva - Chapter Topics
सनत्सुजातेन धृतराष्ट्रंप्रति तत्त्वोपदेशः ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-४२-० (३३३३२)
वैशम्पायन उवाच। ५-४२-०क्ष् (३५०४)
ततो राजा धृतराष्ट्रो मनीषी
संपूज्य वाक्यं विदुरेरितं तत् ।
सनत्सुजातं रहिते महात्मा
पप्रच्छ बुद्धिं परमां बुभूषन् ॥ ५-४२-१ (३३३३३)
धृतराष्ट्र उवाच। ५-४२-२क्ष् (३५०५)
सनत्सुजात यदिमं शृणोमि
न मृत्युरस्तीति तवोपदेशम् ।
देवासुरा ह्याचरन्ब्रह्मचर्य-
ममृत्यवे तत्कतरन्नु सत्यम् ॥ ५-४२-२ (३३३३४)
सनत्सुजात उवाच। ५-४२-३क्ष् (३५०६)
अमृत्युं कर्मणा केचिन्मृत्युर्नास्तीति चापरे ।
शृणु मे ब्रुवतो राजन्यथैतन्मा विशङ्किथाः ॥ ५-४२-३ (३३३३५)
उभे सत्ये क्षत्रियाद्य प्रवृत्ते
मोहो मृत्युः संमतोऽयं कवीनाम् ।
प्रमादं वै मृत्युमहं ब्रवीमि
तथाऽप्रमादममृतत्वं ब्रवीमि ॥ ५-४२-४ (३३३३६)
प्रमादाद्वै असुराः पराभव-
न्नप्रमादाद्ब्रह्मभूताः सुराश्च ।
नैव मृत्युर्व्याघ्र इवात्ति जन्तू-
न्न ह्यस्य रूपमुपलभ्यते हि ॥ ५-४२-५ (३३३३७)
यमं त्वेके मृत्युमतोऽन्यमाहु-
रात्मावासममृतं ब्रह्मचर्यम् ।
पितृलोके राज्यमनुशास्ति देवः

शिवः शिवानामशिवोऽशिवानाम् ॥ ५-४२-६ (३३३३८)
अस्यादेशान्निःसरते नराणां
क्रोधः प्रमादो लोभरूपश्च मृत्युः ।
अहं गतेनैव चरन्विमार्गा-
न्न चात्मनो योगमुपैति कश्चित् ॥ ५-४२-७ (३३३३९)
ते मोहितास्तद्वशे वर्तमाना
इतः प्रेतास्तत्र पुनः पतन्ति ।
ततस्तान्देवा अनुविप्लवन्ते
अतो मृत्युर्मरणादभ्युपैति ॥ ५-४२-८ (३३३४०)
कर्मोदये कर्मफलानुरागा-
स्तत्रानु ते यान्ति न तरन्ति मृत्युम् ।
सदर्थयोगानवगमात्समन्ता-
त्प्रवर्तते भोगभोगेन देही ॥ ५-४२-९ (३३३४१)
तद्वै महामोहनमिन्द्रियाणां
मिथ्यार्थयोगस्य गतिर्हि नित्या ।
मिथ्यार्थयोगाभिहतान्तरात्मा
स्मरन्नुपास्ते विषयान्समन्तात् ॥ ५-४२-१० (३३३४२)
अभिध्या वै प्रथमं हन्ति लोकान्
कामक्रोधावनुगृह्याशु पश्चात् ।
एते बालान्मृत्यवे प्रापयन्ति
धीरास्तु धैर्येण तरन्ति मृत्युम् ॥ ५-४२-११ (३३३४३)
सोऽभिध्यायन्नुत्पतिष्णन्निहन्या-
दनादरेणाप्रतिबुध्यमानः ।
नैनं मृत्युर्मृत्युरिवात्ति भूत्वा
एवं विद्वान्यो विनिहन्ति कामान् ॥ ५-४२-१२ (३३३४४)
कामानुसारी पुरुषः कामाननु विनश्यति ।
कामान्व्युदस्य धुनुते यत्किञ्चित्पुरुषो रजः ॥ ५-४२-१३ (३३३४५)
तमोप्रकाशो भूतानां नरकोऽयं प्रदृश्यते ।
मुह्यन्त इव धावन्ति गच्छन्तः स्वभ्रमुन्मुखाः ॥ ५-४२-१४ (३३३४६)
अमूढवृत्तेः पुरुषस्येह कुर्या-
त्किं वै मृत्युस्तार्ण इवास्य व्याघ्रः ।
अमन्यमानः क्षत्रिय किञ्चिदन्य-
न्नाधीयते तार्ण इवास्य सर्पः ॥ ५-४२-१५ (३३३४७)
क्रोधाल्लोभान्मोहभयान्तरात्मा
स वै मृत्युस्त्वच्छरिरे य एषः ।
एवं मृत्युं जायमानं विदित्वा

ज्ञाने तिष्ठन्न बिभेतीह मृत्योः ।
विनश्यते विषये तस्य मृत्यु-
र्मृत्योर्यथा विषयं प्राप्य मर्त्यः ॥ ५-४२-१६ (३३३४८)
धृतराष्ट्र उवाच। ५-४२-१७क्ष् (३५०७)
यानेवाहुरिज्यया साधुलोकान्
द्विजातीनां पुण्यतमान्सनातनात् ।
तेषां परार्धं कथयन्तीह वेदा
एतद्विद्वान्नैति कथं नु कर्म ॥ ५-४२-१७ (३३३४९)
सनत्सुजात उवाच। ५-४२-१८क्ष् (३५०८)
एवं ह्यविद्वानुपयाति तत्र
तत्रार्थजातं च वदन्ति वेदाः ।
सवेह आयाति परं परात्मा
प्रयाति मार्गेण निहत्य मार्गान् ॥ ५-४२-१८ (३३३५०)
धृतराष्ट्र उवाच। ५-४२-१९क्ष् (३५०९)
कोऽसौ नियुङ्क्ते तमजं पुराणं
स चेदिदं सर्वमनुक्रमेण ।
किं वास्य कार्यमथवा सुखं च
तन्मे विद्वन्ब्रूहि सर्वं यथावत् ॥ ५-४२-१९ (३३३५१)
सनत्सुजात उवाच। ५-४२-२०क्ष् (३५१०)
दोषो महानत्र विभेदयोगे
ह्यनादियोगेन भवन्ति नित्याः ।
तथास्य नाधिक्यमपैति किञ्च-
दनादियोगेन भवन्ति पुंसः ॥ ५-४२-२० (३३३५२)
य एतद्वा भगवान्स नित्यो
विकारयोगेन करोति विश्वम् ।
तथाच तच्छक्तिरिति स्म मन्यते ।
तथार्थयोगेन भवन्ति वेदाः ॥ ५-४२-२१ (३३३५३)
धृतराष्ट्र उवाच। ५-४२-२२क्ष् (३५११)
यस्माद्धर्मान्नाचरन्तीह केचि-
त्तथा धर्मान्केचिदिहाचरन्ति ।
धर्मः पापेन प्रतिहन्यते स्वि-
दुताहो धर्मः प्रतिहन्ति पापम् ॥ ५-४२-२२ (३३३५४)
सनत्सुजात उवाच। ५-४२-२३क्ष् (३५१२)
तस्मिन्स्थितौ वाप्युभयं हि नित्यं
ज्ञानेन विद्वान्प्रतिहन्ति सिद्धम् ।
तथान्यथा पुण्यमुपैति देही

तथागतं पापमुपैति सिद्धम् ॥ ५-४२-२३ (३३३५५)
गत्वोभयं कर्मणा युज्यते स्थिरं
शुभस्य पापस्य स चापि कर्मणा ।
धर्मेण पापं प्रणुदतीह विद्वान्
धर्मो बलीयानिति तत्र विद्धिः ॥ ५-४२-२४ (३३३५६)
धृतराष्ट्र उवाच। ५-४२-२५क्ष् (३५१३)
यानिहाहुः स्वस्य धर्मस्य लोका-
न्द्विजातीनां पुण्यकृतां सनातनान् ।
तेषां क्रमान्कथय ततोऽपि चान्या-
न्नैतद्विद्वन्वेत्तुमिच्छामि कर्म ॥ ५-४२-२५ (३३३५७)
सनत्सुजात उवाच। ५-४२-२६क्ष् (३५१४)
येषां व्रतेऽथ विस्पर्धा बले बलवतामिव ।
ते ब्राह्मणा इतः प्रेत्य स्वर्गे यान्ति प्रकाशताम् ॥ ५-४२-२६ (३३३५८)
येषां धर्मे च विस्पर्धा तेषां जज्ञानसाधनम् ।
ते ब्राह्मणा इतो मुक्ताः स्वर्गं यान्ति त्रिविष्टपम् ॥ ५-४२-२७ (३३३५९)
तस्य सम्यक्समाचारमाहुर्वेदविदो जनाः ।
नैनं मन्येत भूयिष्ठं बाह्यमाभ्यन्तरं जनम् ॥ ५-४२-२८ (३३३६०)
यत्र मन्येत भूयिष्ठं प्रावृषीव तृणोदकम् ।
अन्नं पानं ब्राह्मणस्य तञ्जीवोन्नानुसंज्वरेत् ॥ ५-४२-२९ (३३३६१)
यत्राकथयमानस्य प्रयच्छत्यशिवं भयम् ।
अतिरिक्तमिवाकुर्वन्स श्रेयान्नेतरो जनः ॥ ५-४२-३० (३३३६२)
यो वा कथयमानस्य ह्यात्मानं नानुसंज्वरेत् ।
ब्रह्मस्वं नोपभुञ्जीत तदन्नं संमतं सताम् ।
कुशवल्कलचेलाद्यं ब्रह्मस्वं योगिनो विदुः ॥ ५-४२-३१ (३३३६३)
यथा खं वान्तमश्नाति श्वा वै नित्यमभूतये ।
एवं ते वान्तमश्नन्ति स्ववीर्यस्योपसेवनात् ॥ ५-४२-३२ (३३३६४)
नित्यमज्ञातचर्या मे इति मन्येत ब्राह्मणः ।
ज्ञातीनां तु वसन्मध्ये नैवं विन्देत किञ्चन ॥ ५-४२-३३ (३३३६५)
कोह्येवमन्तरात्मानं ब्राह्मणो हन्तुमर्हति ।
निर्लिङ्गमचलं शुद्धं सर्वद्वन्द्वविवर्जितम् ॥ ५-४२-३४ (३३३६६)
योऽन्यथा सन्तमात्मानमन्यथा प्रतिपद्यते ।
किं तेन न कृतं पापं चोरेणात्मापहारिणा ॥ ५-४२-३५ (३३३६७)
अश्रान्तः स्यादनादाता संमतो निरुपद्रवः ।
शिष्टो न शिष्टवत्स स्याद्ब्राह्मणो ब्रह्मवित्कविः ॥ ५-४२-३६ (३३३६८)
अनाढ्या मानुषे वित्ते आढ्या दैवे तथा क्रतौ ।
ते दुर्धर्षा दुष्प्रकम्प्यास्तान्विद्याद्ब्रह्मणस्तनुम् ॥ ५-४२-३७ (३३३६९)

सर्वान्खिष्टकृतो देवान्विद्याद्य इह कश्चन ।
न स मानो ब्राह्मणस्य तस्मिन्प्रयतते स्वयम् ॥ ५-४२-३८ (३३३७०)
यमप्रयतमानं तु मानयन्ति समाहिताः ।
न मान्यमानो मन्येत नावमानेऽतिसंज्वरेत् ॥ ५-४२-३९ (३३३७१)
लोकः स्वभाववृत्तिर्हि निमेषोन्मषवत्सदा ।
विद्वांसो मानयन्तीह इति मन्येत मानितः ॥ ५-४२-४० (३३३७२)
अधर्मनिपुणा मुढा लोके मायाविशारदाः ।
न मान्यं मानयिष्यन्ति एवं मन्येत मानितः ॥ ५-४२-४१ (३३३७३)
न वै मानं च मौनं च सहितौ वसतः सदा ।
अयं हि लोको मानस्य असौ मौनस्य तद्विदुः ॥ ५-४२-४२ (३३३७४)
श्रीर्हि मानार्थसंवासा सा चापि परिपन्थिनी ।
ब्राह्मी सुदुर्लभा श्रीर्हि प्रज्ञाहीनेन क्षत्रिय ॥ ५-४२-४३ (३३३७५)
द्वाराणि तस्येह वदन्ति सन्तो
बहुप्रकाराणि दुराधराणि ।
सत्यार्जवे ह्रीर्दमशौचविद्या
षण्मानमोहप्रतिबन्धनानि ॥ ॥ ५-४२-४४ (३३३७६)

इति श्रीमन्महाभारते उद्योगपर्वणि सनत्सुजातपर्वणि
द्विचत्वारिंशोऽध्यायः ॥

उद्योगपर्व - अध्याय ०४३
॥ श्रीः ॥
५.४३. अध्यायः ४३

Mahabharata - Udyoga Parva - Chapter Topics
सनत्सुजातेन धृतराष्ट्रंप्रति तत्त्वोपदेशः ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-४३-० (३३३७७)
धृतराष्ट्र उवाच। ५-४३-०क्ष् (३५१५)
कस्यैष मौनः कतरन्नु मौनं
प्रब्रूहि विद्वन्निह मौनभावम् ।
मौनेन विद्वानुत याति मौनं
कथं मुने मौनमिहाचरन्ति ॥ ५-४३-१ (३३३७८)
सनत्सुजात उवाच। ५-४३-२क्ष् (३५१६)
यतो न वेदा मनसा सहैन-

मनुप्रविशन्ति ततोऽथ मौनम् ।
यत्रोत्थितो वेदशब्दस्तथायं
स तन्मयत्वेन विभाति राजन् ॥ ५-४३-२ (३३३७९)
धृतराष्ट्र उवाच। ५-४३-३क्ष् (३५१७)
ऋचो यजूंषि यो वेद सामवेदं च वेद यः ।
पापानि कुर्वन्पापेन लिप्यते किं न लिप्यते ॥ ५-४३-३ (३३३८०)
सनत्सुजात उवाच। ५-४३-४क्ष् (३५१८)
नैनं सामान्यृचो वापि न यजूंष्यविचक्षणम् ।
त्रायन्ते कर्मणः पापान्न ते मिथ्या ब्रवीम्यहम् ॥ ५-४३-४ (३३३८१)
न च्छन्दांसि वृजिनात्तारयन्ति
मायाविनं मायया सर्वमानम् ।
नीडं शकुन्ता इव जातपक्षा-
श्छन्दांस्येनं प्रजहत्यन्तकाले ॥ ५-४३-५ (३३३८२)
धृतराष्ट्र उवाच। ५-४३-६क्ष् (३५१९)
न चेद्वदा वेदविदं त्रातुं शक्ता विचक्षण ।
अथ कस्मात्प्रलापोऽयं ब्राह्मणानां सनातनः ॥ ५-४३-६ (३३३८३)
सनत्सुजात उवाच। ५-४३-७क्ष् (३५२०)
तस्यैव नामादिविशेषरूपै-
रिदं जगद्भाति महानुभाव ।
निर्दिश्य सम्यक्प्रवदन्ति वेदा-
स्तद्विश्ववैरूप्यमुदाहरन्ति ॥ ५-४३-७ (३३३८४)
तदर्थयुक्तं तप एतदिज्या
ताभ्यामसौ पुण्यमुपैति विद्वान् ।
पुण्येन पापं विनिहत्य पश्चा-
त्संजायते ज्ञानविदीपितात्मा ॥ ५-४३-८ (३३३८५)
ज्ञानेन चात्मानमुपैति विद्वा-
नथान्यथा वर्गफलानुकाङ्क्षी ।
अस्मिन्कृतं तत्परिगृह्य सर्व-
ममुत्र भुङ्क्ते पुनरेति मार्गम् ॥ ५-४३-९ (३३३८६)
अस्मिँल्लोके तपस्तप्तं फलमन्यत्र भुज्यते ।
ब्राह्मणानामिमे लोका वृद्धे तपसि संयताः ॥ ५-४३-१० (३३३८७)
ग ब्राह्मणानां तपः स्वृद्धमन्येषां तावदेव तत् ।
एतत्समृद्धमत्यृद्धं तपो भवति केवलम् ॥' ५-४३-११ (३३३८८)
धृतराष्ट्र उवाच। ५-४३-१२क्ष् (३५२१)
कथं समृद्धमप्यृद्धं तपो भवति केवलम् ।
सनत्सुजात तद्ब्रूहि यथा विद्याम तद्वयम् ॥ ५-४३-१२ (३३३८९)

सनत्सुजात उवाच। ५-४३-१३क्ष् (३५२२)
निष्कल्मषं तपस्त्वेतत्केवलं परिचक्षते ।
एतत्समृद्धमप्यृद्धं तपो भवति केवलम् ॥ ५-४३-१३ (३३३९०)
तपोमूलमिदं सर्वं यन्मां पृच्छसि क्षत्रिय ।
तपसा वेदविद्वांसः परं त्वमृतमाप्नुयुः ॥ ५-४३-१४ (३३३९१)
धृतराष्ट्र उवाच। ५-४३-१५क्ष् (३५२३)
कल्मषं तपसो ब्रूहि श्रुतं निष्कल्मषं तपः ।
सनत्सुजात येनेदं विद्यां गुह्यं सनातनम् ॥ ५-४३-१५ (३३३९२)
सनत्सुजात उवाच। ५-४३-१६क्ष् (३५२४)
क्रोधादयो द्वादश यस्य दोषा-
स्तथा नृशंसानि दश त्रि राजन् ।
धर्मादयो द्वादशैते पितॄणां
शास्त्रे गुणा ये विदिता द्विजानाम् ॥ ५-४३-१६ (३३३९३)
क्रोधः कामो लोभमोहौ विधित्सा-
ऽकृपाऽसूये मानशोकौ स्पृहा च ।
ईर्ष्या जुगुप्सा च मनुष्यदोषा
वर्ज्याः सदा द्वादशैते नराणाम् ॥ ५-४३-१७ (३३३९४)
एकैकमेते राजेन्द्र मनुष्यान्पर्युपासते ।
लिप्समानोन्तरं तेषां मृगाणामिव लुब्धकः ॥ ५-४३-१८ (३३३९५)
विकत्थनः स्पृहयालुर्मनस्वी
बिभ्रत्कोषं चपलो रोषणश्च ।
एतान्पापाः षण्णराः पापधर्मान्
प्रकुर्वते नो त्रसन्तः सुदुर्गे ॥ ५-४३-१९ (३३३९६)
संभोगसंविद्विषमोऽतिमानी
दत्तानुतापी कृपणो बलीयान् ।
वर्गप्रशंसी वनितासु द्वेष्टा
एते परे सप्त नृशंसवर्गाः ॥ ५-४३-२० (३३३९७)
धर्मश्च सत्यं च दमस्तपश्च
आमात्सर्यं ह्रीस्तितिक्षानसूया ।
यज्ञश्च दानं च धृतिः श्रुतं च
व्रतानि वै द्वादश ब्राह्मणस्य ॥ ५-४३-२१ (३३३९८)
यस्त्वेतेभ्यः प्रभवेद्द्वादशभ्यः
सर्वामपीमां पृथिवीं स शिष्यात् ।
त्रिभिर्द्वाभ्यामेकतो वार्थितो य-
स्तस्य स्वमस्तीति स वेदितव्यः ॥ ५-४३-२२ (३३३९९)
दमस्त्यागोऽप्रमादश्च एतेष्वमृतमाहितम् ।

तानि सत्यमुखान्याहुर्ब्राह्मणा ये मनीषिणः ॥ ५-४३-२३ (३३४००)
दमोऽष्टादशदोषः स्यात्प्रातिकूल्यं कृते भवेत् ।
अनृतं चाभ्यसूया च कामार्थौ च तथा स्पृहा ॥ ५-४३-२४ (३३४०१)
क्रोधः शोकस्तथा तृष्णा लोभः पैशून्यमेव च ।
मत्सरश्च विहिंसा च परितापस्तथाऽरतिः ॥ ५-४३-२५ (३३४०२)
अपस्मारश्चातिवादस्तथा संभावनात्मनि ।
एतैर्विमुक्तो दोषैर्यः स दान्तः सद्भिरुच्यते ॥ ५-४३-२६ (३३४०३)
मदोऽष्टादशदोषः स्यात्त्यागो भवति षड्विधः ।
विपर्ययाः स्मृता एते मददोषा उदाहृताः ।
दोषा दमस्य ये प्रोक्तास्तान्दोषान्परिवर्जयेत् ॥ ५-४३-२७ (३३४०४)
श्रेयांस्तु षड्विधस्त्यागस्तृतीयो दुष्करो भवेत् ।
तेन दुःखं तरत्येव भिन्नं तस्मिञ्जितं कृते ॥ ५-४३-२८ (३३४०५)
श्रेयांस्तु षड्विधस्त्यागः श्रियं प्राप्य न हृष्यति ।
इष्टापूर्ते द्वितीयं स्यान्नित्यवैराग्ययोगतः ॥ ५-४३-२९ (३३४०६)
कामत्यागश्च राजेन्द्र स तृतीय इति स्मृतः ॥
अप्यवाच्यं वदन्त्येतं स तृतीयो गुणः स्मृतः ॥ ५-४३-३० (३३४०७)
त्यक्तैर्द्रव्यैर्यद्भवति नोपयुक्तैश्च कामतः ।
न च द्रव्यैस्तद्भवति नोपयुक्तैश्च कामतः ॥ ५-४३-३१ (३३४०८)
न च कर्मस्वसिद्धेषु दुःखं ते न च न ग्लपेत् ।
सर्वैरेव गुणैर्युक्तो द्रव्यवानपि यो भवेत् ॥ ५-४३-३२ (३३४०९)
अप्रिये च समुत्पन्ने व्यथां जातु न गच्छति ।
इष्टान्पुत्रांश्च दारांश्च न याचेत कदाचन ॥ ५-४३-३३ (३३४१०)
अर्हते याचमानाय प्रदेयं तच्छुभं भवेत् ।
अप्रमादी भवेदेतैः स चाप्यष्टगुणो भवेत् ॥ ५-४३-३४ (३३४११)
सत्यं ध्यानं समाधानं चोद्यं वैराग्यमेव च ।
अस्तेयं ब्रह्मचर्यं च तथाऽसंग्रहमेव च ॥ ५-४३-३५ (३३४१२)
एवं दोषा मदस्योक्तास्तान्दोषान्परिवर्जयेत् ।
तथा त्यागोऽप्रमादश्च स चाप्यष्टगुणो मतः ॥ ५-४३-३६ (३३४१३)
अष्टौ दोषाः प्रमादस्य तान्दोषान्परिवर्जयेत् ।
इन्द्रियेभ्यश्च पञ्चभ्यो मनसश्चैव भारत ।
अतीतानागतेभ्यश्च मुक्त्युपेतः सुखी भवेत् ॥ ५-४३-३७ (३३४१४)
सत्यात्मा भव राजेन्द्र सत्ये लोकाः प्रतिष्ठिताः ।
तांस्तु सत्यमुखानाहुः सत्ये ह्यमृतमाहितम् ॥ ५-४३-३८ (३३४१५)
निवृत्तेनैव दोषेण तपो व्रतमिहाचरेत् ।
एतद्धातृकृतं वृत्तं सत्यमेव सतां व्रतम् ॥ ५-४३-३९ (३३४१६)
दोषैरेतैर्वियुक्तस्तु गुणैरेतैः समन्वितः ।

एतत्समृद्धमत्यर्थं तपो भवति केवलम् ॥ ५-४३-४० (३३४१७)
यन्मां पृच्छसि राजेन्द्र संक्षेपात्प्रब्रवीमि ते ।
एतत्पापहरं पुण्यं जन्ममृत्युजरापहम् ॥ ५-४३-४१ (३३४१८)
धृतराष्ट्र उवाच। ५-४३-४२क्ष् (३५२५)
आख्यानपञ्चमैर्वेदैर्भूयिष्ठं कथ्यते जनः ।
तथा चान्ये चतुर्वेदास्त्रिधेदाश्च तथा परे ॥ ५-४३-४२ (३३४१९)
द्विवेदाश्चैकवेदाश्चाप्यनृचश्च तथा परे ।
तेषां तु कतरः स स्याद्यमहं वेद वै द्विजम् ॥ ५-४३-४३ (३३४२०)
सनत्सुजात उवाच। ५-४३-४४क्ष् (३५२६)
एकस्य वेस्याज्ञानाद्वेदास्ते बहवः कृताः ।
सत्यस्यैकस्य राजेन्द्र सत्ये कश्चिदवस्थितः ॥ ५-४३-४४ (३३४२१)
एवं वेदमविज्ञाय प्राज्ञोऽहमिति मन्यते ।
दानमध्ययनं यज्ञो लोभादेतत्प्रवर्तते ॥ ५-४३-४५ (३३४२२)
सत्यात्प्रच्यवमानानां सङ्कल्पो वितथो भवेत् ।
ततो यज्ञः प्रतायेत सत्यस्यानवधारणात् ॥ ५-४३-४६ (३३४२३)
मनसान्यस्य भवति वाचान्यस्याथ कर्मणा ।
सङ्कल्पसिद्धः पुरुषः सङ्कल्पानधितिष्ठति ॥ ५-४३-४७ (३३४२४)
अनैभृत्येन चैतस्य दीक्षितव्रतमाचरेत् ।
नामैतद्धातुनिर्वृत्तं सत्यमेव सतां परम् ॥ ५-४३-४८ (३३४२५)
ज्ञानं वै नाम प्रत्यक्षं परोक्षं जायते तपः ।
विद्याद्बहु पठन्तं तु द्विजं वै बहुपाठिनम् ॥ ५-४३-४९ (३३४२६)
तस्मात्क्षत्रिय मा मंस्था जल्पितेनैव वै द्विजम् ।
य एव सत्यान्नापैति स ज्ञेयो ब्राह्मणस्त्वया ॥ ५-४३-५० (३३४२७)
छन्दांसि नाम क्षत्रिय तान्यथर्वा
पुरा जगौ महर्षिसङ्घ एषः
छन्दोविदस्ते य उत नाधीतवेदा
न वेदवेद्यस्य विदुर्हि तत्त्वम् ॥ ५-४३-५१ (३३४२८)
छन्दांसि नाम द्विपदां वरिष्ठ
स्वच्छन्दयोगेन भवन्ति तत्र ।
छन्दोविदस्ते न च तानधीत्य
गता न वेदस्य न वेद्यमार्याः ॥ ५-४३-५२ (३३४२९)
न वेदानां वेदिता कश्चिदस्ति
कश्चित्त्वेतान्बुद्ध्यते वापि राजन् ।
यो वेद वेदान्न स वेद वेद्यं
सत्ये स्थितो यस्तु स वेद वेद्यम् ॥ ५-४३-५३ (३३४३०)
न वेदानां वेदिता कश्चिदस्ति

वेद्येन वेदं न विदुर्न वेद्यम् ।
यो वेद वेदं स च वेद वेद्यं
यो वेद वेद्यं न स वेद सत्यम् ॥ ५-४३-५४ (३३४३१)
यो वेद वेदान्स च वेद वेद्यं
न तं विदुर्वेदविदो न वेदाः ।
तथापि वेदेन विदन्ति वेदं
ये ब्राह्मणा वेदविदो भवन्ति ॥ ५-४३-५५ (३३४३२)
धामांशभागस्य तथा हि वेदा
यथा च शाखा हि महीरुहस्य ।
संवेदने चैव यथामनन्ति
तस्मिन्हि सत्ये परमात्मनोऽर्थे ॥ ५-४३-५६ (३३४३३)
अभिजानामि ब्राह्मणं व्याख्यातारं विचक्षणम् ।
यश्छिन्नविचिकित्सः स व्याचष्टे सर्वसंशयान् ॥ ५-४३-५७ (३३४३४)
नास्य पर्येषणं गच्छेत्प्रचीनं नोत दक्षिणम् ।
नार्वाचीनं कुतस्तिर्यङ्नादिशन्तु कथञ्चन ॥ ५-४३-५८ (३३४३५)
तस्य पर्येषणं गच्छेत्प्रत्यर्थिषु कथञ्चन ।
अविचिन्वन्निमं वेदे तपः पश्यति तं प्रभुम् ॥ ५-४३-५९ (३३४३६)
तूष्णींभूत उपासीत न चेष्टेन्मनसापि च ।
उपावर्तस्व तद्ब्रह्म अन्तरात्मनि विश्रुतम् ॥ ५-४३-६० (३३४३७)
मौनान्न स मुनिर्भवति नारण्यवसनान्मुनिः ।
स्वलक्षणं तु यो वेद स मुनिः श्रेष्ठ उच्यते ॥ ५-४३-६१ (३३४३८)
सर्वार्थानां व्याकरणाद्व्याकरण उच्यते ।
तन्मूलतो व्याकरणं व्याकरोतीति तत्तथा ॥ ५-४३-६२ (३३४३९)
प्रत्यक्षदर्शी लोकानां सर्वदर्शी भवेन्नरः ।
सत्ये वै ब्राह्मणस्तिष्ठंस्तद्विद्वान्सर्वविद्भवेत् ॥ ५-४३-६३ (३३४४०)
धर्मादिषु स्थितोऽप्येवं क्षत्रिय ब्रह्म पश्यति ।
वेदानां चानुपूर्व्येण एतद्बुद्ध्या ब्रवीमि ते ॥ ५-४३-६४ (३३४४१)
॥इति श्रीमन्महाभारते उद्योगपर्वणि सनत्सुजातपर्वणि
त्रिचत्वारिंशोऽध्यायः ॥

उद्योगपर्व - अध्याय ०४४
॥ श्रीः ॥
५.४४. अध्यायः ४४

Mahabharata - Udyoga Parva - Chapter Topics
सनत्सुजातेन धृतराष्ट्रंप्रति सत्त्वोपदेशः ॥ १ ॥

५-४४-० (३३४४२)
धृतराष्ट्र उवाच। ५-४४-०क्ष् (३५२७)
सनत्सुजात यामिमां परां त्वं
ब्राह्मीं वाचं वदसे विश्वरूपाम् ।
परां हि कामेन सुदुर्लभां कथां
प्रब्रूहि मे वाक्यमिदं कुमार । ५-४४-१ (३३४४३)
सनत्सुजात उवाच। ५-४४-२क्ष् (३५२८)
नैतद्ब्रह्म त्वरमाणेन लभ्यं
यन्मां पृच्छन्नतिहृष्यस्यतीव ।
बुद्धौ विलीने मनसि प्रचिन्त्य
विद्या हि सा ब्रह्मचर्येण लभ्या ॥ ५-४४-२ (३३४४४)
धृतराष्ट्र उवाच। ५-४४-३क्ष् (३५२९)
अत्यन्तविद्यामिति यत्सनातनीं
ब्रवीषि त्वं ब्रह्मचर्येण सिद्धाम् ।
अनारभ्यां वसतीह कार्यकाले
कथं ब्राह्मण्यममृतत्वं लभेत ॥ ५-४४-३ (३३४४५)
सनत्सुजात उवाच। ५-४४-४क्ष् (३५३०)
अव्यक्तविद्यामभिधास्ये पराणीं
बुद्ध्या च तेषां ब्रह्मचर्येण सिद्धाम् ।
यां प्राप्यैनं मर्त्यलोकं त्यजन्ति
या वै विद्या गुरुवृद्धेषु नित्या ॥ ५-४४-४ (३३४४६)
धृतराष्ट्र उवाच। ५-४४-५क्ष् (३५३१)
ब्रह्मचर्येण या विद्या शक्या वेदितुमञ्चसा ।
तत्कथं ब्रह्मचर्यं स्यादेतद्ब्रह्मन्ब्रवीहि मे ॥ ५-४४-५ (३३४४७)
सनत्सुजात उवाच। ५-४४-६क्ष् (३५३२)
आचार्ययोनिमिह ये प्रविश्य
भूत्वा गर्भे ब्रह्मचर्यं चरन्ति ।
इहैव ते शास्त्रकारा भवन्ति
प्रहाय देहं परमं यान्ति योगम् ॥ ५-४४-६ (३३४४८)
अस्मिँल्लोके वै जयन्तीह कामा-
न्ब्राह्मीं स्थितिं ह्यनुतितिक्षमाणाः ।
त आत्मानं निर्हरन्तीह देहा-
न्मुञ्जादिषीकामिव सत्वसंस्थाः ॥ ५-४४-७ (३३४४९)
शरीरमेतौ कुरुतः पिता माता च भारत ।

आचार्यशास्ता या जातिः सा पुण्या साऽऽजराऽमम ५-४४-८ (३३४५०)
यः प्रावृणोत्यवितथेन वर्णा-
नृतं कुर्वन्नमृतं संप्रयच्छम् ।
तं मन्येत पितरं मातरं च
तस्मै न द्रुह्येत्कतमस्य जानन् ॥ ५-४४-९ (३३४५१)
गुरुं शिष्यो नित्यमभिवादयीत
स्वाध्यायमिच्छेच्छुचिरप्रमत्तः ।
मानं न कुर्यान्नादधीत रोप-
मेप प्रथमो ब्रह्मचर्यस्य पादः ॥ ५-४४-१० (३३४५२)
शिष्यवृत्तिक्रमेणैव विद्यामाप्नोति यः शुचिः ।
ब्रह्मचर्यव्रतस्यास्य प्रथमः पाद उच्यते ॥ ५-४४-११ (३३४५३)
आचार्यस्य प्रियं कुर्यात्प्राणैरपि धनैरपि ।
कर्मणा मनसा वाचा द्वितीयः पाद उच्यते ॥ ५-४४-१२ (३३४५४)
समा गुरौ यथा वृत्तिर्गरुपत्न्यां तथा चरेत् ।
तत्पुत्रे च तथा कुर्वन्द्वितीयः पाद उच्यते ॥ ५-४४-१३ (३३४५५)
आचार्येणात्मकृतं विजानन्
ज्ञात्वा चार्थं भावितोऽस्मीत्यनेन ।
यन्मन्यते तं प्रति हृष्टबुद्धिः
स वै तृतीयो ब्रह्मचर्यस्य पादः ॥ ५-४४-१४ (३३४५६)
नाचार्यस्यानपाकृत्य प्रवासं
प्राज्ञः कुर्वीत नैतदहं करोमि ।
इतीव मन्येत न भाषयेत
स वै चतुर्थो ब्रह्मचर्यस्य पादः ॥ ५-४४-१५ (३३४५७)
कालेन पादं लभते तथार्थं
ततश्च पादं गुरुयोगतश्च ।
उत्साहयोगेन च पादमृच्छे-
च्छास्त्रेण पादं च ततोऽभियाति ॥ ५-४४-१६ (३३४५८)
धर्मादयो द्वादश यस्य रूप-
मन्यानि चाङ्गानि तथा बलं च ।
आचार्ययोगे फलतीति चाहु-
र्ब्रह्मार्थयोगेन च ब्रह्मचर्यम् ॥ ५-४४-१७ (३३४५९)
एवं प्रवृत्तो यदुपालभेत वै
धनमाचार्याय तदनुप्रयच्छेत् ।
स तां वृत्तिं बहुगुणामेवमेति
गुरोः पुत्रे भवति च वृत्तिरेषा ॥ ५-४४-१८ (३३४६०)
एवं वसन्सर्वतो वर्धतीह

बहून्पुत्रांल्लभते च प्रतिष्ठाम् ।
वर्षन्ति चास्मै प्रदिशो दिशश्च
वसत्यस्मिन्ब्रह्मचर्ये जनाश्च ॥ ५-४४-१९ (३३४६१)
एतेन ब्रह्मंचर्येण देवा देवत्वमाप्नुवन् ।
ऋषयश्च महाभागा ब्रह्मलोकं मनीषिणः ॥ ५-४४-२० (३३४६२)
गन्धर्वाणामनेनैव रूपमप्सरसमभूत् ।
एतेन ब्रह्मचर्येण सूर्योऽप्यह्नाय जायते ॥ ५-४४-२१ (३३४६३)
आकाङ्क्ष्यार्थस्य संयोगाद्रसभेदार्थिनामिव ।
एवं ह्येते समाज्ञाय तादृग्भावं गता इमे ॥ ५-४४-२२ (३३४६४)
य आश्रयेत्पावयेच्चापि राज-
न्सर्वं शरीरं तपसा तप्यमानः ।
एतेन वै बाल्यमभ्येति विद्वान्
मृत्युं तथा स जयत्यन्तकाले ॥ ५-४४-२३ (३३४६५)
अन्तवतः क्षत्रिय ते जयन्ति
लोकाञ्जनाः कर्मणा निर्मलेन ।
ब्रह्मैव विद्वांस्तेन चाभ्येति सर्वं
नान्यः पन्था अयनाय विद्यते ॥ ५-४४-२४ (३३४६६)
धृतराष्ट्र उवाच। ५-४४-२५क्ष् (३५३३)
आभाति शुक्लमिव लोहितमि-
वाथो कृष्णमथाञ्जनं काद्रवं वा ।
सद्ब्रह्मणः पश्यति योऽत्र विद्वा-
न्कथं रूपं तदमृतमक्षरं पदम् ॥ ५-४४-२५ (३३४६७)
सनत्सुजात उवाच। ५-४४-२६क्ष् (३५३४)
आभाति शुक्लमिव लोहितमि-
वाथो कृष्णमायसमर्कवर्णम् ।
न पृथिव्यां तिष्ठति नान्तरिक्षे
नैतत्समुद्रे सलिलं बिभर्ति ॥ ५-४४-२६ (३३४६८)
न तारकासु न च विद्युदाश्रितं
न चाभ्रेषु दृश्यते रूपमस्य ।
न चापि वायौ न च देवतासु
नैतच्चन्द्रे दृश्यते नोत सूर्ये ॥ ५-४४-२७ (३३४६९)
नैवर्क्षु तन्न यजुष्षु नाप्यथर्वसु
न दृश्यते वै विमलेषु सामसु ।
रथन्तरे बार्हद्रथे वापि राज-
न्महाव्रते नैव दृश्येद्ध्रुवं तत् ॥ ५-४४-२८ (३३४७०)
अपारणीयं तमसः परस्ता-

त्तदन्तकोऽप्येति विनाशकाले ।
अणीयो रूपं क्षुरधारया समं
महच्च रूपं तद्वै पर्वतेभ्यः ॥ ५-४४-२९ (३३४७१)
सा प्रतिष्ठा तदमृतं लोकास्तद्ब्रह्म तद्यशः ।
भूतानि जज्ञिरे तस्मात्प्रलयं यान्ति तत्र हि ॥ ५-४४-३० (३३४७२)
अनामयं तन्महदुद्यतं यशो
वाचो विकारं कवयो वदन्ति ।
यस्मिञ्जगत्सर्वमिदं प्रतिष्ठितं
ये तद्विदुरमृतास्ते भवन्ति ॥ ५-४४-३१ (३३४७३)
ग्ं तदेतदह्ना संस्थितं भाति सर्वं
तदात्मवित्पश्यति ज्ञानयोगात् ।
तस्मिञ्जगत्सर्वमिदं प्रतिष्ठितं
ये तद्विदुरमृतास्ते भवन्ति ॥' ॥ ५-४४-३२ (३३४७४)

इति श्रीमन्महाभारते उद्योगपर्वणि सनुत्सुजातपर्वणि
चतुश्चत्वारिंशोऽध्यायः ॥

उद्योगपर्व - अध्याय ०४५
॥ श्रीः ॥
५.४५. अध्यायः ४५

Mahabharata - Udyoga Parva - Chapter Topics
सनत्सुजातेन धृतराष्ट्रंप्रति तत्वोपदेशः ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-४५-० (३३४७५)
सनत्सुजात उवाच। ५-४५-०क्ष् (३५३५)
शोकः क्रोधश्च लोभश्च कामो मानः परासुता ।
ईर्ष्या मोहो विचित्सा च कृपाऽसूया जुगुप्सुता ॥ ५-४५-१ (३३४७६)
द्वादशैते महादोषा मनुष्यप्राणनाशनाः ।
एकैकमेते राजेन्द्र मनुष्यान्पर्युपासते ।
यौराविष्टो नरः पापं मूढसंज्ञो व्यवस्यति ॥ ५-४५-२ (३३४७७)
स्पृहयालुरुग्रः परुषो वा वदान्यः
क्रोधं बिभ्रन्मनसा वै विकत्थी ।
नृशंसधर्माः षडिमे जना वै
प्राप्याप्यर्थं नोत सभाजयन्ते ॥ ५-४५-३ (३३४७८)

संभोगसंविद्विषमोऽतिमानी
दत्त्वा विकत्थी कृपणो दुर्बलश्च ।
बहुप्रशंकसी वनिताद्विट् सदैव
सप्तैवोक्ताः पापशीला नृशंसाः ॥ ५-४५-४ (३३४७९)
धर्मश्च सत्यं च तपो दमश्च
अमात्सर्यं ह्रीस्तितिक्षानसूया ।
दानं श्रुतं चैव धृतिः क्षमा च
महाव्रता द्वादश ब्राह्मणस्य ॥ ५-४५-५ (३३४८०)
यो नैतेभ्यः प्रच्यवेद्द्वादशभ्यः
सर्वामपीमां पृथिवीं स शिष्यात् ।
त्रिभिर्द्वाभ्यामेकतो वार्थितो यो
नास्य स्वमस्तीति च वेदितव्यम् ॥ ५-४५-६ (३३४८१)
दमस्त्यागोऽथाप्रमाद इत्येतेष्वमृतं स्थितम् ।
एतानि ब्रह्ममुख्यानां ब्राह्मणानां मनीषिणाम् ॥ ५-४५-७ (३३४८२)
सद्वाऽसद्वा परीवादे ब्राह्मणस्य न शस्यते ।
नरकप्रतिष्ठास्ते स्युर्य एवं कुरुते जनाः ॥ ५-४५-८ (३३४८३)
मदोऽष्टादशदोषः स स्यात्पुरा योऽप्रकीर्तितः ।
लोकद्वेष्यं प्रतिकूल्यमभ्यसूया मृषावचः ॥ ५-४५-९ (३३४८४)
कामक्रोधौ पारतन्त्र्यं परिवादोऽथ पैशुनम् ।
अर्थहानिर्विवादश्च मात्सर्यं प्राणिपीडनम् ॥ ५-४५-१० (३३४८५)
ईर्ष्या मोदोऽतिवादश्च संज्ञानाशोऽभ्यसूयिता ।
तस्मात्प्राज्ञो न माद्येत सदा ह्येतद्विगर्हितम् ॥ ५-४५-११ (३३४८६)
सौहृदे वै षड्गुणा वेदितव्यः
प्रिये हृष्यन्त्यप्रिये च व्यथन्ते ।
स्यादात्मनः सुचिरं याचते यो
ददात्ययाच्यमपि देयं खलु स्यात् ।
इष्टान्पुत्रान्विभवान्स्वांश्च दारा-
नभ्यर्थितश्चार्हति शुद्धभावः ॥ ५-४५-१२ (३३४८७)
त्यक्तद्रव्यः संवसेन्नेह कामा-
ञ्जिङ्क्ते कर्मस्वाशिषं बाधते च ॥ ५-४५-१३ (३३४८८)
द्रव्यवान्गुणवानेवं त्यागी भवति सात्विकः ।
पञ्चभूतानि पञ्चभ्यो निवर्तयति तादृशः ॥ ५-४५-१४ (३३४८९)
एतत्समृद्धमप्यृद्धं तपो भवति केवलम् ।
सत्वात्प्रच्यवमानानां सङ्कल्पेन समाहितम् ॥ ५-४५-१५ (३३४९०)
यतो यज्ञः प्रवर्धन्ते मत्यस्यैवावरोधनात् ।
मनसान्यस्य भवति वाच्यन्यस्याथ कर्मणा ॥ ५-४५-१६ (३३४९१)

सङ्कल्पसिद्धं पुरुषमसङ्कल्पोऽधितिष्ठति ।
ब्राह्मणस्य विशेषेण किञ्चान्यदपि मे शृणु ॥ ५-४५-१७ (३३४९२)
अध्यापयेन्महदेतद्यशस्यं
वाचो विकराः कवयो वदन्ति ।
अस्मिन्योगे सर्वमिदं प्रतिष्ठितं
ये तद्विदुरमृतास्ते भवन्ति ॥ ५-४५-१८ (३३४९३)
न कर्मणा सुकृतेनैव राजन्
सत्यं जयेज्जुहुयाद्वा यजेद्वा ।
नैतेन वालोऽमृत्युमभ्येति राजन्
रतिं चासौ न लभत्यन्तकाले ॥ ५-४५-१९ (३३४९४)
तूष्णीमेक उपासीत चेष्टेत मनसापि न ।
तथा संस्तुतिनिन्दाभ्यां प्रीतिरोषौ विवर्जयेत् ॥ ५-४५-२० (३३४९५)
अत्रैव तिष्ठन्क्षत्रिय ब्रह्माविशति पश्यति ।
वेदेषु चानुपूर्व्येण एतद्विद्वन्ब्रवीमि ते ॥ ॥ ५-४५-२१ (३३४९६)

इति श्रीमन्महाभारते उद्योगपर्वणि सनत्सुजातपर्वणि
पञ्चचत्वारिंशोऽध्यायः ॥

उद्योगपर्व - अध्याय ०४६
॥ श्रीः ॥
५.४६. अध्यायः ४६

Mahabharata - Udyoga Parva - Chapter Topics
सनत्सुजातेन धृतराष्ट्रंप्रति तत्वोपदेशः ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-४६-० (३३४९७)
सनत्सुजात उवाच। ५-४६-०क्ष् (३५३६)
यत्तच्छुक्रं महज्ज्योतिर्दीप्यमानं महद्यशः ।
तद्वै देवा उपासते तस्मात्सूर्यो विराजते ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ ५-४६-१ (३३४९८)
शुक्राद्ब्रह्म प्रभवति ब्रह्म शुक्रेण वर्धते ।
तच्छुकं ज्योतिषां मध्येऽतप्तं तपति तापनम् ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ ५-४५-२ (३३४९९)
आपोऽथाङ्गयः सलिलस्य मध्ये
उभौ देवौ शिश्रियातेऽन्तरिक्षे ।

अतन्द्रितः सवितुर्विवस्वा-
नुभौ बिभर्ति पृथिवीं दिवं च ॥
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ ५-४६-३ (३३५००)
उभौ च देवौ पृथिवीं दिवं च
दिशः शुक्रो भुवनं बिभर्ति ।
तस्माद्दिशः सरितश्च स्रवन्ति
तस्मात्समुद्रा विहिता महान्ताः ॥
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ ५-४६-४ (३३५०१)
चक्रे रथस्य तिष्ठन्तोऽध्रुवस्याव्ययकर्मणः ।
केतुमन्तं वहन्त्यश्वास्तं दिव्यमजरं दिवि ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ ५-४६-५ (३३५०२)
न सादृश्ये तिष्ठति रूपमस्य
न चक्षुपा पश्यति कश्चिदेनम् ।
मनीषयाथो मनसा हृदा च
य एनं विदुरमृतास्ते भवन्ति ॥
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ ५-४६-६ (३३५०३)
द्वादशपूगां सरितं पिबन्तो देवरक्षिताम् ।
मध्वीक्षन्तश्च ते तस्याः संचरन्तीह घोराम् ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ ५-४६-७ (३३५०४)
तदर्धमासं पिबति संचितं भ्रमरो मधु ।
ईशानः सर्वभूतेषु हविर्भूतमकल्पयत् ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ ५-४६-८ (३३५०५)
हिरण्यपर्णमश्वत्थमभिपद्य ह्यपक्षकाः ।
ते तत्र पक्षिणो भूत्वा प्रपतन्ति यथादिशम् ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ ५-४६-९ (३३५०६)
पूर्णात्पूर्णान्युद्धरन्ति पूर्णात्पूर्णानि चक्रिरे ।
हरन्ति पूर्णात्पूर्णानि पूर्णमेवावशिष्यते ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ ५-४६-१० (३३५०७)
तस्माद्वै वायुरायातस्तस्मिंश्च प्रयतः सदा ।
तस्मादग्निश्च सोमश्च तस्मिंश्च प्राण आततः ॥ ५-४६-११ (३३५०८)
सर्वमेव ततो विद्यात्तत्तद्वक्तुं न शक्नुमः ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ ५-४६-१२ (३३५०९)
अपानं गिरपि प्राणः प्राणं गिरति चन्द्रमाः ।
आदित्यो गिरते चन्द्रमादित्यं गिरते परः ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ ५-४६-१३ (३३५१०)
एकं पादं नोत्क्षिपति सलिलाद्धंस उच्चरन् ।

तं चेत्सन्ततमूर्ध्वाय न मृत्युर्नामृतं भवेत् ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ ५-४६-१४ (३३५११)
अङ्गुष्ठमात्रः पुरुषोऽन्तरात्मा
लिङ्गस्य योगेन स याति नित्यम् ।
तमीशमीड्यमनुकल्पमाद्यं
पश्यन्ति मूढा न विराजमानम् ॥
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ ५-४६-१५ (३३५१२)
असाधना वापि ससाधना वा
समानमेतद्दृश्यते मानुषेषु ।
समानमेतदमृतस्येतरस्य
मुक्तास्तत्र मध्व उत्सं समापुः ॥
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ ५-४६-१६ (३३५१३)
उभौ लोकौ विद्यया व्याप्य याति
तदा हुतं चाहुतमग्निहोत्रम् ।
मा ते ब्राह्मी लघुतामादधीत
प्रज्ञानं स्यान्नाम धीरा लभन्ते ॥
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ ५-४६-१७ (३३५१४)
एवंरूपो महात्मा स पावकं पुरुषो गिरन् ।
यो वै तं पुरुषं वेद तस्येहार्थो न रिष्यते ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ ५-४६-१८ (३३५१५)
यः सहस्रं सहस्राणां पक्षान्संतत्य संपतेत् ।
मध्यमे मध्य आगच्छेदपिचेत्स्यान्मनोजवः ।
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ ५-४६-१९ (३३५१६)
न दर्शने तिष्ठति रूपमस्य
पश्यन्ति चैनं सुविशुद्धसत्वाः ।
हितो मनीषी मनसा न तप्यते
ये प्रव्रजेयुरमृतास्ते भवन्ति ॥
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ ५-४६-२० (३३५१७)
गूहन्ति सर्पा इव गह्वराणि
स्वशिक्षया स्वेन वृत्तेन मर्त्याः ।
तेषु प्रमुह्यन्ति जना विमूढा
यथाध्वानं मोहयन्ते भयाय ॥
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ ५-४६-२१ (३३५१८)
नाहं सदाऽसत्कृतः स्यां न मृत्यु-
र्न चामृत्युरमृतं मे कुतः स्यात् ।
सत्यानृते सत्यसमानबन्धे

सतश्च योनिरतसतश्चैक एव ॥
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ ५-४६-२२ (३३५१९)
न साधुना नोत असाधुना वा-
ऽसमानमेतद्दृश्यते मानुषेषु ।
समानमेतदमृतस्य विद्या-
देवं युक्तो मधु तद्वै परीप्सेत् ॥
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ ५-४६-२३ (३३५२०)
नास्यातिवादा हृदयं तापयन्ति
नानधीतं नाहुतमग्निहोत्रम् ।
मनो ब्राह्मी लघुतामादधीत
प्रज्ञां चास्मै नाम धीरा लभन्ते ॥
योगिनस्तं प्रपश्यन्ति भगवन्तं सनातनम् ॥ ५-४६-२४ (३३५२१)
एवं यः सर्वभूतेषु आत्मानमनुपश्यति ।
अन्यत्रान्यत्र युक्तेषु किं स शोचेत्ततः परम् । ५-४६-२५ (३३५२२)
यथोदपाने महति सर्वतः संप्लुतोदके ।
एवं सर्वेषु वेदेषु आत्मानमनुजानतः ॥ ५-४६-२६ (३३५२३)
अङ्गुष्ठमात्रः पुरुषो महात्मा
न दृश्यतेऽसौ हृदि संनिविष्टः ।
अजश्वरो दिवारात्रमतन्द्रितश्च
स तं मत्वा कविरास्ते प्रसन्नः ॥ ५-४६-२७ (३३५२४)
अहमेव स्मृतो माता पिता पुत्रोऽस्म्यहं पुनः ।
आत्माहमपि सर्वस्य यच्च नास्ति यदस्ति च ॥ ५-४६-२८ (३३५२५)
पितामहोऽस्मि स्थविरः पिता पुत्रश्च भारत ।
ममैव यूयमात्मस्था न मे यूयं न वो ह्यहम् ॥ ५-४६-२९ (३३५२६)
आत्मैव स्थानं मम जन्म चात्मा
ओतप्रोतोऽहमजरप्रतिष्ठः ।
अजश्वरो दिवारात्रमतन्द्रितोऽहं
मां विज्ञाय कविरास्ते प्रसन्नः ॥ ५-४६-३० (३३५२७)
अणोरणीयान्सुमनाः सर्वभूतेषु जाग्रति ।
पितरं सर्वभूतेषु पुष्करे निहितं विदुः ॥ ॥ ५-४६-३१ (३३५२८)

इति श्रीमन्महाभारते उद्यगपर्वणि सनत्सुदजातपर्वणि
षट्चत्वारिंशोऽध्यायः ॥ ॥ समाप्तमिदं सनत्सुजातपर्व ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

॥ श्रीः ॥
५.४७. अध्यायः ४७

Mahabharata - Udyoga Parva - Chapter Topics
पाण्डववचनशुश्रूषया धृतराष्ट्रादीनां सभाप्रवेशः ॥ १ ॥
सञ्जयेन धृतराष्ट्राय पाण्डवान्प्रति तत्सन्देशकथनम् ॥ २ ॥
श्रीकृष्णवाक्यकथनं चोदितेन सञ्जयेन स्वस्य
कृष्णार्जुनान्तःपुरप्रवेशकथनपूर्वकं तत्कथनम् ॥ ३ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-४७-० (३३५२९)
वैशम्पायन उवाच। ५-४७-०क्ष् (३५३७)
एवं सनत्सुजातेन विदुरेण च धीमता ।
सार्धं कथयतो राज्ञः सा व्यतीयय सर्वरी ॥ ५-४७-१ (३३५३०)
तस्यां रजन्यां व्युष्टायां राजानः सर्व एव ते ।
सभामाविविशुर्हृष्टाःक सूतस्योपदिदृक्षया ॥ ५-४७-२ (३३५३१)
शुश्रूषमाणाः पार्थानां वाचो धर्मार्थसंहिताः ।
धृतराष्ट्रमुखाः सर्वे ययू राजन्सभां शुभाम् ॥ ५-४७-३ (३३५३२)
सुधावदातां विस्तीर्णां कनकाजिरभूषिताम् ।
चन्द्रप्रभां सुरुचिरां सिक्तां चिन्दनवारिणा ॥ ५-४७-४ (३३५३३)
रुचिरैरासनैः स्तीर्णां काञ्चनैर्दारवैरपि ।
अश्मसारमयैर्दान्तैःक स्वास्तीर्णैः सोत्तरच्छदैः ॥ ५-४७-५ (३३५३४)
भीष्मो द्रोणः कृपः शल्यः कृतवर्मा जयद्रथः ।
अश्वत्थामा विकर्णश्च सोमदत्तश्च बाह्लिकः । ५-४७-६ (३३५३५)
विदुरश्च महाप्राज्ञो युयुत्सुश्च महारथः ।
सर्वे च सहिताः शूराः पार्थिवा भरतर्षभ ।
धृतराष्ट्रं पुरस्कृत्य विविशुस्तां सभां शुभाम् ॥ ५-४७-७ (३३५३६)
दुःशासनश्चित्रसेनः शकुनिश्चापि सौबलः ।
दुर्मुखो दुःसहः कर्ण उलूकोऽथ विविंशतिः ॥ ५-४७-८ (३३५३७)
कुरुराजं पुरस्कृत्य दुर्योधनममर्षणम् ।
विविशुस्तां सभां राजन्सुराः शक्रसदो यथा ॥ ५-४७-९ (३३५३८)
आविशद्भिस्तदा राजञ्शूरैः परिघबाहुभिः ।
शुशुभे सा सभा रजन्सिंहैरिव गिरेर्गुहा ॥ ५-४७-१० (३३५३९)
ते प्रविश्य महेष्वासाः सभां सर्वे महौजसः ।
आसनानि विचित्राणि भेजिरे सूर्यवर्चसः ॥ ५-४७-११ (३३५४०)

आसनस्थेषु सर्वेषु तेषु राजसु भारत ।
द्वाःस्थो निवेदयामास सूतपुत्रमुपस्थितम् ॥ ५-४७-१२ (३३५४१)
अयं सरथ आयाति योऽयासीत्पाण्डवान्प्रति ।
दूतो नस्तूर्णमायाति सैन्धवैः साधुवाहिभिः ॥ ५-४७-१३ (३३५४२)
ापेयाय स तु क्षिप्रं रथात्प्रस्कन्द्य कुण्डली ।
प्रविवेश सभां पूर्णां महीपालैर्महात्मभिः ॥ ५-४७-१४ (३३५४३)
सञ्जय उवाच। ५-४७-१५क्ष् (३५३८)
प्राप्तोऽस्मि पाण्डवान्गत्वा तं विजानीत कौरवाः ।
यथावयः कुरून्सर्वान्प्रतिनन्दन्ति पाण्डवाः ॥ ५-४७-१५ (३३५४४)
अभिवादयन्ति वृद्धांश्च वयस्यांश्च वयस्यवत् ।
पुनश्चाभ्यवदन्पार्थाः प्रतिपूज्य यथावयः ॥ ५-४७-१६ (३३५४५)
यथाहं धृतराष्ट्रेण शिष्टः पूर्वमितो गतः ।
अब्रवं पाण्डवान्गत्वा नात्र किञ्चन हापितम् ॥ ५-४७-१७ (३३५४६)
ग धृतराष्ट्र उवाच। ५-४७-१८क्ष् (३५३९)
पृच्छामि त्वां सञ्जय राजमध्ये
यदब्रवीद्वाक्यमदीनसत्वः ।
जनार्दनस्तात युधां प्रणेता
दुरात्मनां जीवितच्छिन्महात्मा ॥ ५-४७-१८ (३३५४७)
सञ्जय उवाच। ५-४७-१९क्ष् (३५४०)
आगुल्फेभ्योऽभिसंवीतः प्रयतोऽहं कृताञ्जलिः ।
शुद्धान्तं प्राविशं राजन्नाख्यातो नरसिंहयोः ॥ ५-४७-१९ (३३५४८)
न चाभिमन्युर्न यमौ तं देशमभिजग्मतुः ।
यत्र कृष्णौ च कृष्णा च सत्यभामा च भामिनी ॥ ५-४७-२० (३३५४९)
उभौ मध्वासवक्षीबौ वरचन्दनरूषितौ ।
स्त्रग्विणौ वरवस्त्राङ्गौ वराभरणभूषितौ ॥ ५-४७-२१ (३३५५०)
नैकरत्नविचित्रं च काञ्चनं च वरासनम् ।
नानास्तरणसंस्तीर्णं यत्रासाते नरर्षभौ ॥ ५-४७-२२ (३३५५१)
सत्याङ्कमुपधानं तु कृत्वा शेते जनार्दनः ।
अर्जुनाङ्कगतौ पादौ केशवस्योपलक्षये ।
अर्जुनस्य च कृष्णायाः शुभायाश्चाङ्कगावुभौ ॥ ५-४७-२३ (३३५५२)
काञ्चनं पादपीठं तु पार्थो वै प्रादिशन्मुदा ।
दासीभ्यामाहृतं मह्यं स्पृष्ट्वा भूमावुपाविशम् ॥ ५-४७-२४ (३३५५३)
ऊर्ध्वरेखाङ्कितौ पादौ पार्थस्य शुभलक्षणौ ।
पादपीठादपहृतौ धारयेतां वरस्त्रियौ ॥ ५-४७-२५ (३३५५४)
न नूनं कल्मषं किञ्चिन्मम कर्मसु विद्यते ।
स्त्रीरत्नाभ्यां समेतौ यन्मिथो मामभ्यभाषताम् ॥ ५-४७-२६ (३३५५५)

विस्मयो मे महानासीदास्त्रं मे बहुसङ्गतम् ।
हृष्टानि चैव रोमाणि दृष्ट्वा तौ सहितावुभौ ॥ ५-४७-२७ (३३५५६)
श्यामौ बृहन्तौ तरुणौ नागाविव समुच्छ्रितौ ।
एकशय्यागतौ दृष्ट्वा भयं मे महदाविशत् ॥ ५-४७-२८ (३३५५७)
ततोऽभ्यचिन्तयं तत्र दृष्ट्वा तौ पुरुषर्षभौ ।
सङ्कल्पो धर्मराजस्य नानवाप्योऽस्ति कश्चन ।
निदेशगाविमौ यस्य नरनारायणावुभौ ॥ ५-४७-२९ (३३५५८)
सत्कृतश्चान्नपानाभ्यामाच्छन्नो लब्धसत्क्रियः ।
अञ्जलिं मूर्ध्नि सन्धाय सन्देशं चाभ्यचोदयम् ॥ ५-४७-३० (३३५५९)
धनुर्धरोचितेनाथ पाणिनैकं सलक्षणम् ।
पादमानाययत्पार्थः केशवस्य यशस्विनः ॥ ५-४७-३१ (३३५६०)
इन्द्रकेतुरिवोत्थाय दिव्याभरणभूषितः ।
इन्द्रवीर्योपमः कृष्णः संविष्टो माऽभ्यभाषत ॥ ५-४७-३२ (३३५६१)
स वाचं वदतां श्रेष्ठ आददे वचनक्षमाम् ।
दीपनीं धार्तराष्ट्राणां मृदुपूर्वां सुदारुणाम् ॥ ५-४७-३३ (३३५६२)
बहिश्चरस्य प्राणस्य प्रियस्य प्रियकारिणः ।
मतिमान्मतिमास्थाय केशवः सन्दधे वचः ॥ ५-४७-३४ (३३५६३)
वचनं वचनज्ञस्य शिक्षाक्षरसमन्वितम् ।
मनःप्रह्लादनं श्रेष्ठं पश्चाद्धृदयतापनम् ॥ ५-४७-३५ (३३५६४)
श्रीभगवानुवाच। ५-४७-३६क्ष् (३५४१)
सञ्जयैतद्वचो ब्रूयाः प्राप्य क्षत्रियसंसदम् ।
शृण्वतः कुरुवृद्धस्य आचार्यस्य च धीमतः ॥ ५-४७-३६ (३३५६५)
अर्थांस्त्यजत पार्थेषु सुखमाप्नुत कामजम् ।
प्रियं प्रियेभ्यश्चरत राजा हि त्वरते जये ॥ ५-४७-३७ (३३५६६)
यजध्वं विविधैर्यज्ञैर्दक्षिणाश्च प्रयच्छत ।
पुत्रेदारैश्च मोदध्वमागतं वो महज्जयम् ॥ ५-४७-३८ (३३५६७)
ऋणं प्रवृद्धमिव मे हृदयान्नापसर्पति ।
गोविन्देति यदाक्रन्दत्कृष्णा मां दूरवासिनम् ॥ ५-४७-३९ (३३५६८)
तेजोमयं दुराधर्षं बिभ्रता गाण्डिवं धनुः ।
मद्द्वितीयेन पार्थेन वैरं वः प्रत्युपस्थितम् ॥ ५-४७-४० (३३५६९)
कृष्णस्यैतद्वचः श्रुत्वा महन्मे भयमाविशत् ।
तव पुत्रस्य लोभं च वर्धमानं प्रपश्यतः ॥ ५-४७-४१ (३३५७०)
सोमेन्द्रसदृशौ वीरौ तौ मन्दो नावबुध्यते ।
भीष्मद्रोणाश्रयाच्चैव कर्णस्य च विकत्थनात् '॥ ॥ ५-४७-४२ (३३५७१)

इति श्रीमन्महाभारते उद्योगपर्वणि यानसन्धिपर्वणि

उद्योगपर्व - अध्याय ०४८
॥ श्रीः ॥
५.४८. अध्यायः ४८

Mahabharata - Udyoga Parva - Chapter Topics
सञ्जयेन धृतराष्ट्रंप्रति
श्रीकृष्णमहिमादिप्रतिपादकानामर्जुनवचसां विस्तरेण कथनम्
॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-४८-० (३३५७२)
धृतराष्ट्र उवाच। ५-४८-०क्ष् (३५४२)
पृच्छामि त्वां सञ्जय राजमध्ये
किमब्रवीद्वाक्यमदीनसत्वः ।
धनञ्जयस्तात युधां प्रेणता
दुरात्मनां जीवितच्छिन्महात्मा ॥ ५-४८-१ (३३५७३)
सञ्जय उवाच। ५-४८-२क्ष् (३५४३)
दुर्योधनो वाचमिमां शृणोतु
यदब्रवीदर्जुनो योत्स्यमानः ।
युधिष्ठिरस्यानुमते महात्मा
धनञ्जयः श्रृण्वतः केशवस्य ॥ ५-४८-२ (३३५७४)
अवित्रस्तो बाहुवीर्यं विजान-
न्नुपह्वरे वासुदेवस्य धीरः ।
अवोचन्मां योत्स्यमानः किरीटी
मध्ये ब्रूया धार्तराष्ट्रं कुरूणाम् ॥ ५-४८-३ (३३५७५)
संश्रृण्वतस्तस्य दुर्भाषिणो वै
दुरात्मनः सूतपुत्रस्य सूत ।
यो योद्धुमाशंसति मां सदैव
मन्दप्रज्ञः कालपक्वोऽतिमूढः ॥ ५-४८-४ (३३५७६)
ये वै राजानः पाण्डवायोधनाय
समानीताः श्रृण्वतां चापि तेषाम् ।
यथा समग्रं वचनं मयोक्तं
सहामात्यं श्रावयेथा नृपं तत ॥ ५-४८-५ (३३५७७)
यथा नूनं देवराजस्य देवाः

शुश्रूषन्ते वज्रहस्तस्य सर्वे ।
तथाऽश्रृण्वन्पाण्डवाः सृञ्जयाश्च
किरीटिना वाचमुक्तां समर्थाम् ॥ ५-४८-६ (३३५७८)
इत्यब्रवीदर्जुनो योत्स्यमानो
गाण्डीवधन्वा लोहितपद्मनेत्रः ।
न चेद्राज्यं मुञ्चति धार्तराष्ट्रो
यधिष्ठिरस्याजमीढस्य राज्ञः ॥ ५-४८-७ (३३५७९)
अस्ति नूनं कर्म कृतं पुरस्ता-
दनिर्विष्टं पापकं धार्तराष्ट्रैः ।
येषां युद्धं भीमसेनार्जुनाभ्यां
तथाश्विभ्यां वासुदेवेन चैव ॥ ५-४८-८ (३३५८०)
शैनयेन ध्रुवमात्तायुधेन
धृष्टद्युम्नेनाथ शिखण्डिना च ।
युधिष्ठिरेणेन्द्रकल्पेन चैव
योऽपध्यानान्निर्दहेद्गां दिवं च ॥ ५-४८-९ (३३५८१)
तैश्चेद्योद्धुं मन्यते धार्तराष्ट्रो
निर्वृत्तोऽर्थः सकलः पाण्डवानाम् ।
मा तत्कार्षीः पाण्डवस्यार्थहेतो-
रुपैहि युद्धं यदि मन्यसे त्वम् ॥ ५-४८-१० (३३५८२)
यां तां वने दुःखशय्यामवात्सी-
त्प्रव्राजितः पाण्डवो धर्मचारी ।
आप्नोतु तां दुःखतरामनर्था-
मन्त्यां शय्यां धार्तराष्ट्रः पराशुः ॥ ५-४८-११ (३३५८३)
ह्रिया ज्ञानेन तपसा दमेन
शौर्येणाथो धर्मगुप्त्या धनेन ।
अन्यायवृत्तिः कुरु पाण्डवे या-
नध्यातिष्ठद्धार्तराष्ट्रो दुरात्मा ॥ ५-४८-१२ (३३५८४)
मायोपधं प्रतिधानार्जवाभ्यां
तपोदमाभ्यां धर्मगुप्त्या बलेन ।
सत्यं ब्रुवन्प्रतिपन्नो नृपो न-
स्तितिक्षमाणः क्लिश्यमानोऽतिवेलम् ॥ ५-४८-१३ (३३५८५)
यदा ज्येष्ठः पाण्डवः संशितात्मा
क्रोधं यत्तं वर्षपूगान्सुघोरम् ।
अवस्त्रष्टा कुरुपूद्वृत्तचेता-
स्तदा युद्धं धार्तराष्ट्रोऽन्वतप्स्यत् ॥ ५-४८-१४ (३३५८६)
कृष्णवर्त्मेव ज्वलितः समिद्धो

यथा दहेत्कक्षमग्निर्निदाघे ।
एवं दग्धा धार्तराष्ट्रस्य सेनां
युधिष्ठिरः क्रोधदीप्तोन्ववेक्ष्य ॥ ५-४८-१५ (३३५८७)
यदा द्रष्टा भीमसेनं रथस्यं
गदाहस्तं क्रोधविषं वमन्तम् ।
अमर्षणं पाण्डवं भीमवेगं
तदा युद्धं धार्तराष्ट्रोऽन्वतप्स्यत् ॥ ५-४८-१६ (३३५८८)
सेनागगं दंशितं भीमसेनं
सुलक्षणं वीरहणं परेषाम् ।
घ्नन्तं चमूमन्तकसन्निकाशं
तदा स्मर्ता वचनस्यातिमानी ॥ ५-४८-१७ (३३५८९)
यदा द्रष्टा भीमसेनेन नागा-
न्निपातितान्गिरिकूटप्रकाशान् ।
किम्भैरिवासृग्वमतो भिन्नकुम्भां-
स्तदा युद्धं धार्तराष्ट्रोऽन्वतप्स्यत् ॥ ५-४८-१८ (३३५९०)
महासिंहो गा इव संप्रविश्य
गदापाणिर्धार्तराष्ट्रानुपेत्य ।
यदा भीमो भीमरूपो निहन्ता
तदा युद्धं धार्तराष्ट्रोऽन्वतप्स्यत् ॥ ५-४८-१९ (३३५९१)
महाभये वीतभयः कृतास्त्रः
समागमे शत्रुबलावमर्दी ।
सकृद्रथेनाप्रतिमान्रथौघा-
न्पदातिसङ्घान्गदयाभिनिघ्नन् ॥ ५-४८-२० (३३५९२)
सैन्याननेकांस्तरसा विगृह्ण-
न्यदा छेत्ता धार्तराष्ट्रस्य सैन्यम् ।
छिन्दन्वनं परशुनेव शूर-
स्तदा युद्धं धार्तराष्ट्रोऽन्वतप्स्यत् ॥ ५-४८-२१ (३३५९३)
तृणप्रायं ज्वलनेनेव दग्धं
ग्रामं यथा धार्तराष्ट्रान्समीक्ष्य ।
पक्वं सस्यं वैद्युतेनेव दग्धं
परासिक्तं विपुलं स्वं बलौघम् ॥ ५-४८-२२ (३३५९४)
हतप्रवीरं विमुखं भयार्तं
पराङ्मुखं प्रायशोऽनष्टयोधम् ।
शस्त्रार्चिषा भिमसेनेन दग्धं
तदा युद्धं धार्तराष्ट्रोऽन्वतप्त्सत् ॥ ५-४८-२३ (३३५९५)
उपासङ्गानाचरेद्दक्षिणेन

वराङ्गानां नकुलश्चित्रयोधी ।
यदा रथाग्र्यो रथिनः प्रचेता
तदा युद्धं धार्तराष्ट्रोऽन्वतप्स्यत् ॥ ५-४८-२४ (३३५९६)
सुखोचितो दुःखशय्यां वनेषु
दीर्घं कालं नकुलो यामशेत ।
आशीविषः क्रुद्ध इवोद्वमन्विषं
तदा युद्धं धार्तराष्ट्रोऽन्वतप्स्यत् ॥ ५-४८-२५ (३३५९७)
त्यक्तात्मानः पार्थिवायोधनाय
समादिष्टा धर्मराजेन सूत ।
रथैः शुभ्रैः सैन्यमभिद्रवन्तो
दृष्ट्वा पश्चात्तप्स्यते धार्तराष्ट्रः ॥ ५-४८-२६ (३३५९८)
शिशून्कृतास्त्रानशिशुप्रकाशान्
यदा द्रष्टा कौरवः पञ्च शूरान् ।
त्यक्त्वा प्राणान्कौरवानाद्रवन्त-
स्तदा युद्धं धार्तराष्ट्रोऽन्वतप्स्यत् ॥ ५-४८-२७ (३३५९९)
यथा शक्रो दानवनाशनार्थं
सुवर्णतारं रथमुत्तमाश्वैः ।
दान्तैर्युक्तं सहदेवोऽधिरूढः
शिरांसि राज्ञां क्षेप्स्यते मार्गणौघैः ॥ ५-४८-२८ (३३६००)
महाभये संप्रवृत्ते रथस्थं
विवर्तमानं समरे कृतास्त्रम् ।
सर्वा दिशः सपतन्तं समीक्ष्य
तदा युद्धं धार्तराष्ट्रोऽन्वतप्स्यत् ॥ ५-४८-२९ (३३६०१)
ह्रीनिषेवो निपुणः सत्यवादी
महाबलः सर्वधर्मोपपन्नः ।
गान्धारिमार्च्छस्तुमुले क्षिप्रकारी
क्षेप्ता जनान्सहदेवस्तरस्वी ॥ ५-४८-३० (३३६०२)
यदा द्रष्टा द्रौपदेयान्महेषून्
शूरान्कृतास्त्रान्रथयुद्धकोविदान् ।
आशीविषान्घोरविषानिवायत-
स्तदा युद्धं धार्तराष्ट्रोऽन्वतप्स्यत् ॥ ५-४८-३१ (३३६०३)
यदाभिमन्युः परवीरघाती
शरैः परान्मेघ इवाभिवर्षन् ।
विगाहिता कृष्णसमः कृतास्त्र-
स्तदा युद्धं धार्तराष्ट्रोऽन्वतप्स्यत् ॥ ५-४८-३२ (३३६०४)
यदा द्रष्टा बालमबालवीर्यं

द्विषच्चमूं मृत्युमिवोत्पतन्तम् ।
सौभद्रमिन्द्रप्रतिमं कृतास्त्रं
तदा युद्धं धार्तराष्ट्रोऽन्वतप्स्यत् ॥ ५-४८-३३ (३३६०५)
प्रभद्रकाः शीघ्रतरा युवानो
विशारदाः सिंहसमानवीर्याः ।
यदा क्षेप्तारो धार्तराष्ट्रान्ससैन्यां-
स्तदा युद्धं धार्तराष्ट्रोऽन्वतप्स्यत् ॥ ५-४८-३४ (३३६०६)
वृद्धौ विराटद्रुपदौ महारथौ
पथक्कमूभ्यामभिवर्तमानौ ।
यदा द्रष्टारौ धार्तराष्ट्रान्ससैन्यां-
स्तदा युद्धं धार्तराष्ट्रोऽन्वतप्स्यत् ॥ ५-४८-३५ (३३६०७)
यदा कृतास्त्रो द्रुपदः प्रचिन्वन्
शिरांसि यूनां समरे रथस्थः ।
क्रूद्धः शरैश्छेत्स्यति चापमुक्तै-
स्तदा युद्धं धार्तराष्ट्रोऽन्वतप्स्यत् ॥ ५-४८-३६ (३३६०८)
यदा विराटः परवीरघाती
रथान्तरे शत्रुचमूं प्रवेष्टा ।
मात्स्यैः सार्धमनृशंसरूपै-
स्तदा युद्धं धार्तराष्ट्रोऽन्वतप्स्यत् ॥ ५-४८-३७ (३३६०९)
ज्येष्ठं मात्स्यमनृसंसार्यरूपं
विराटपुत्रं रथिनं पुरस्तात् ।
यदा द्रष्टा दंशतिं पाण्डवार्थे
तदा युद्धं धार्तराष्ट्रोऽन्वतप्स्यत् ॥ ५-४८-३८ (३३६१०)
रणे हते कौरवाणां प्रवीरे
शिखण्डिना शन्तनोर्वै तनूजे ।
न जातु नः शत्रवो धारयेयु-
रशंशयं सत्यमेतद्ब्रवीति ॥ ५-४८-३९ (३३६११)
यदा शिखण्डी रथिनः प्रचिन्वन्
भीष्मं रथेनाभियाता वरूथी ।
दिव्यैर्हयैरवमृद्नन् रथौघां-
स्तदा युद्धं धार्तराष्ट्रोऽन्वतप्स्यत् ॥ ५-४८-४० (३३६१२)
यदा द्रष्टा सृञ्जयानामनीके
धृष्टद्नुम्नं प्रमुखे रोचमानम् ।
अस्त्रं यस्मै गुह्यमुवाच धीमा-
न्द्रोणस्तदा तप्स्यति धार्तराष्ट्रः ॥ ५-४८-४१ (३३६१३)
यदा स सेनापतिरप्रमेयः

परामृद्नन्निषुभिर्धार्तराष्ट्रान् ।
द्रोणं रणे शत्रुसहोभियाता
तदा युद्धं धार्ताराष्ट्रोऽन्वतप्स्यत् ॥ ५-४८-४२ (३३६१४)
ह्रीमान्मनीषी बलवान्मनस्वी
स लक्ष्मीवान्सोमकानां प्रबर्हः ।
न जातु तं शत्रवोऽन्ये सहेर-
न्योपां स स्यादग्रणीर्वृष्णिसिंहः ॥ ५-४८-४३ (३३६१५)
इदं च ब्रूया मा वृणीष्वेति लोके
युद्धेऽद्वितीयं सचिवं रथस्थम् ।
शिनेर्नप्तारं प्रवृणीम सात्यकिं
महाबलं वीतभयं कृतास्त्रम् ॥ ५-४८-४४ (३३६१६)
महोरस्को दीर्घबाहुः प्रमाथी
युद्धेऽद्वितीयः परमास्त्रवेदी ।
शिनेर्नप्ता तालमात्रायधोऽयं
महारथो वीतभयः कृतास्त्रः ॥ ५-४८-४५ (३३६१७)
यदा शिनीनामधिपो मयोक्तः
शरैः परान्मेघ इव प्रवर्षन् ।
प्रच्छादयिष्यत्यरिहा योधमुख्यां-
स्तदा युद्धं धार्तराष्ट्रोऽन्वतप्स्यत् ॥ ५-४८-४६ (३३६१८)
यदा धृतिं कुरुते योत्स्यमानः
स दीर्घबाहुर्दृढधन्वा महात्मा ।
सिंहस्येव गन्धमाघ्राय गावः
संचेष्टन्ते शत्रवोऽस्माद्रणाग्रे ॥ ५-४८-४७ (३३६१९)
स दीर्घबाहुर्दृढधन्वा महात्मा
भिन्द्याद्गिरीन्संहरेत्सर्वलोकान् ।
अस्त्रे कृती निपुणः क्षिप्रहस्तो
दिवि स्थितः सूर्य इवाभिभाति ॥ ५-४८-४८ (३३६२०)
चित्रः सूक्ष्मः सुकृतो यादवस्य
अस्त्रे योगो वृष्णिसिंहस्य भूयान् ।
यथाविधं योगमाहुः प्रशस्तं
सर्वैर्गुणैः सात्यकिस्तैरुपेतः ॥ ५-४८-४९ (३३६२१)
हिरण्मयं श्वेतहयैश्चतुर्भि-
र्यदा युक्तं स्यन्दनं माधवस्य ।
द्रष्टा युद्धे सात्यकेर्धार्तराष्ट्र-
स्तदा तप्स्यत्यकृतात्मा स मन्दः ॥ ५-४८-५० (३३६२२)
यदा रथं हेममणिप्रकाशं

श्वेताश्वयुक्तं वानरकेतुमुग्रम् ।
दृष्ट्वा ममाप्यास्थितं केशवेन
तदा तप्स्यत्यकृतात्मा स मन्दः ॥ ५-४८-५१ (३३६२३)
यदा मौर्व्यास्तलनिष्पेपमुग्रं
महाशब्दं वज्रनिष्पेपतुल्यम् ।
विद्यूयमानस्य महारणे मया
स गाण्डिवस्य श्रोष्यति मन्दबुद्धिः ॥ ५-४८-५२ (३३६२४)
तदा मूढो धृतराष्ट्रस्य पुत्र-
स्तप्ता युद्धे दुर्मतिर्दुःसहायः ।
दृष्ट्वा सैन्यं बाणवर्षान्धकारे
प्रभज्यन्तं गोकुलवद्रणाग्रे ॥ ५-४८-५३ (३३६२५)
बलाहकादुच्चरतः सुभीमा-
न्विद्युत्स्फुलिङ्गानिव घोररूपान् ।
सहस्रघ्नान्द्विषतां सङ्गरेषु
अस्थिच्छिदो मर्मभिदः सुपुङ्खान् ॥ ५-४८-५४ (३३६२६)
यदा द्रष्टा ज्यामुखाद्बाणसङ्घान्
गाण्डीवमुक्तानापततः शिताग्रान् ।
हयान्गजान्वर्मिणश्चाददानां-
स्तदा युद्धं धार्तराष्ट्रोऽन्वतप्स्यत् ॥ ५-४८-५५ (३३६२७)
यदा मन्दः परबाणान्विमुक्ता-
न्ममेषुभिर्हियमाणान्प्रतीपम् ।
तिर्यग्विध्य च्छिद्यमानान्पृषत्कै-
स्तदा युद्धं धार्तराष्ट्रोऽन्वतप्स्यत् ॥ ५-४८-५६ (३३६२८)
यदा विपाठा मङ्गुजविप्रमुक्ता
द्विजाः फलानीव महीरुहाग्रात् ।
प्रचेतार उत्तमाङ्गानि यूनां
तदा युद्धं धार्तराष्ट्रोऽन्वतप्स्यत् ॥ ५-४८-५७ (३३६२९)
यदा द्रष्टा पततः स्यन्दनेभ्यो
महागजेभ्योऽश्वगतान्सुयोधनान् ।
शरैर्हतान्पातितांश्चैव रङ्गे
तदा युद्धं धार्तराष्ट्रोऽन्वतप्स्यत् ॥ ५-४८-५८ (३३६३०)
असंप्राप्तानस्त्रपथं परस्य
यदा द्रष्टा नश्यतो धार्तराष्ट्रान् ।
अकुर्वतः कर्म युद्धे समन्ता-
त्तदा युद्धं धार्तराष्ट्रोऽन्वतप्स्यत् ॥ ५-४८-५९ (३३६३१)
पदातिसङ्घान्रथसङ्घान्समन्ता-

द्व्यात्ताननः काल इवाततेषुः ।
प्रणोत्स्यामि ज्वलितैर्बाणवर्षैः
शत्रूंस्तदा तप्स्यति मन्दबुद्धिः ॥ ५-४८-६० (३३६३२)
सर्वा दिशः संपतता रथेन
रजोध्वस्तं गाण्डिवेन प्रकृत्तम् ।
यदा द्रष्टा स्वबलं संप्रमूढं
तदा पश्चात्तप्स्यति मन्दबुद्धिः ॥ ५-४८-६१ (३३६३३)
कान्दिग्भूतं छिन्नगात्रं विसंज्ञं
दुर्योधनो द्रक्ष्यति सर्वसैन्यम् ।
हताश्ववीराग्र्यनरेन्द्रनागं
पिपासितं श्रान्तपत्रं भयार्तम् ॥ ५-४८-६२ (३३६३४)
आर्तस्वरं हन्यमानं हतं च
विकीर्णकेशास्थिकपालसङ्घम् ।
प्रजापतेः कर्म यथार्थनिष्ठितं
तदा दृष्ट्वा तप्स्यति मन्दबुद्धिः ॥ ५-४८-६३ (३३६३५)
यदा रथे गाण्डिवं वासुदेवं
दिव्यं शङ्खं पाञ्चजन्यं हयांश्च ।
तूणावक्षय्यौ देवदत्तं च मां च
दृष्ट्वा युद्धे धार्तराष्ट्रोऽन्वतप्स्यत् ॥ ५-४८-६४ (३३६३६)
उद्वर्तयन्दस्युसङ्घान्समेतान्
प्रवर्तयन्युगमन्यद्युगान्ते ।
यदा धक्ष्याम्यग्निवत्कौरवेयां-
स्तदा तप्ता धृतराष्ट्रः सपुत्रः ॥ ५-४८-६५ (३३६३७)
सभ्राता वै सहसैन्यः सभृत्यो
भ्रष्टैश्वर्यः क्रोधवशोऽल्पचेताः ।
दर्पस्यान्ते निहतो वेपमानः
पश्चान्मन्दस्तप्स्यति धार्तराष्ट्रः ॥ ५-४८-६६ (३३६३८)
पूर्वाह्णे मां कृतजप्यं कदाचि-
द्विप्रः प्रोवाचोदकान्ते मनोज्ञम् ।
कर्तव्यं ते दुष्करं कर्म पार्थ
योद्धव्यं कते शत्रुभिः सव्यसाचिन् ॥ ५-४८-६७ (३३६३९)
इन्द्रो वा ते हरिवान्वज्रहस्तः
पुरस्ताद्यातु समरेऽरीन्विनिघ्नन् ।
सुग्रीवयुक्तेन रथेन वा ते
पश्चात्कृष्णो रक्षतु वासुदेवः ॥ ५-४८-६८ (३३६४०)
वज्रे चाहं वज्रहस्तान्महेन्द्रा-

दस्मिन्युद्धे वासुदेवं सहायम् ।
स मे लब्धो दस्युवधाय कृष्णो
मन्ये चेतद्विहितं दैवतेर्मे ॥ ५-४८-६९ (३३६४१)
अयुद्ध्यमानो मनसापि यस्य
जयं कृष्णः पुरुषस्याभिनन्देत् ।
एवं सर्वान्स व्यतीयादमित्रान्
सेन्द्रान्देवान्मानुषे नास्ति चिन्ता ॥ ५-४८-७० (३३६४२)
स बाहुभ्यां सागरमुत्तितीर्षे-
न्महोदधिं सलिलस्याप्रमेयम् ।
तेजस्विनं कृष्णमत्यन्तशूरं
युद्धेन यो वासुदेवं जिगीषेत् ॥ ५-४८-७१ (३३६४३)
गिरिं य इच्छेत्तु तलेन भेत्तुं
शिलोच्चयं श्वेतमतिप्रमाणम् ।
तस्यैव पाणिः सनखो विशीर्ये-
न्न चापि किञ्चित्स गिरेस्तु कुर्यात् ॥ ५-४८-७२ (३३६४४)
अग्निं समिद्धं शमयेद्भुजाभ्यां
चन्द्रं च सूर्यं च निवारयेत ।
हरेद्देवानाममृतं प्रसह्य
युद्धेन यो वासुदेवं जिगीषेत् ॥ ५-४८-७३ (३३६४५)
यो रुक्मिणीमेकरथेन भोज-
नुत्साद्य राज्ञः समरे प्रसह्य ।
उवाह भार्यां यशसा ज्वलन्तीं
यस्यां जज्ञे रौक्मिणेयो महात्मा ॥ ५-४८-७४ (३३६४६)
अयं गान्धारांस्तरसा संप्रमथ्य
जित्वा पुत्रान्नग्नजितः समग्रान्
बद्धं मुमोच विनदन्तं प्रसह्य
सुदर्शनं वै देवतानां ललामम् ॥ ५-४८-७५ (३३६४७)
अयं कवाटे निजघान पाण्ड्यं
तथा कलिङ्गान्दन्तवक्रं ममर्द ।
अनेन दग्धा वर्षपूगान्विनाथा
वाराणसी नगरी संबभूव ॥ ५-४८-७६ (३३६४८)
अयं स्म युद्धे मन्यतेऽन्यैरजेयं
तमेकलव्यं नाम निषादराजम् ।
वेगेनैव शैलमभिहत्य जम्भः
शेते स कृष्णेन हतः परासुः ॥ ५-४८-७७ (३३६४९)
तथोग्रसेनस्य सुतं सुदुष्टं

वृष्ण्यन्धकानां मध्यगतं सभास्थम् ।
अपातयद्बलदेवद्वितीयो
हत्वा ददौ चोग्रसेनाय राज्यम् ॥ ५-४८-७८ (३३६५०)
अयं सौभं योधयामास स्वस्थं
विभीषणं मायया साल्वराजम् ।
सौभद्वारि प्रत्यगृह्णाच्छतघ्नीं
दोर्भ्यां क एनं विषहेत मर्त्यः ॥ ५-४८-७९ (३३६५१)
प्राग्ज्योतिषं नाम बभूव दुर्गं
पुरं घोरमसुराणामसह्यम् ।
महाबलो नरकस्तत्र भौमो
जहारादित्या मणिकुण्डले शुभे ॥ ५-४८-८० (३३६५२)
न तं देवाः सह शक्रेण शेकुः
समागता युधि मृत्योरभीताः ।
दृष्ट्वा च तं विक्रमं केशवस्य
बलं तथैवास्त्रमवारणीयम् ॥ ५-४८-८१ (३३६५३)
जानन्तोऽस्य प्रकृतिं केशवस्य
न्ययोजयन्दस्युवधाय कृष्णम् ।
स तत्कर्म प्रतिशुश्राव दुष्कर-
मैश्वर्यवान्सिद्धिषु वासुदेवः ॥ ५-४८-८२ (३३६५४)
निर्मोचने षट्सहस्राणि हत्वा
संच्छिद्य पाशान्सहसा क्षुरान्तान् ।
मुरं हत्वा विनिहत्यौघरक्षो
निर्मोचनं चापि जगाम वीरः ॥ ५-४८-८३ (३३६५५)
तत्रैव तेनास्य बभूव युद्धं
महाबलेनातिबलस्य विष्णोः ।
शेते स कृष्णेन हतः परासु-
र्वातेनेव मथितः कर्णिकारः ॥ ५-४८-८४ (३३६५६)
आहृत्य कृष्णो मणिकुण्डले ते
हत्वा च भौमं नरकं मुरं च ।
श्रिया वृतो यशसा चैव विद्वा-
न्प्रत्याजगामाप्रतिमप्रभावः ॥ ५-४८-८५ (३३६५७)
अस्मै वराण्यददंस्तत्र देवा
दृष्ट्वा भीमं कर्म कृतं रणे तत् ।
श्रमश्च ते युध्यमानस्य न स्या-
दाकाशे चाप्सु च ते क्रमः स्यात् ॥ ५-४८-८६ (३३६५८)
शस्त्राणि गात्रे न च ते क्रमेर-

न्नित्येव कृष्णश्च ततः कृतार्थः ।
एवं रूपे वासुदेवेऽप्रमेये
महाबले गुणसंपत्सदैव ॥ ५-४८-८७ (३३६५९)
तमसह्यं विष्णुमनन्तवीर्य-
माशंसते धार्तराष्ट्रो विजेतुम् ।
सदा ह्येनं तर्कयते दुरात्मा
तच्चाप्ययं सहतेऽस्मान्समीक्ष्य ॥ ५-४८-८८ (३३६६०)
पर्यागतं मम कृष्णस्य चैव
यो मन्यते कलहं संप्रसह्य ।
शक्यं हर्तुं पाण्डवानां ममत्वं
तद्वदिता संयुगं तत्र गत्वा ॥ ५-४८-८९ (३३६६१)
नमस्कृत्वा शान्तनवाय राज्ञे
द्रोणायाथो सहपुत्राय चैव ।
शारद्वतायाप्रतिद्वन्द्विने च
योत्स्याम्यहं राज्यमभीप्समानः ॥ ५-४८-९० (३३६६२)
धर्मेणाप्तं निधनं तस्य मन्ये
यो योत्स्यते पाण्डवैर्धर्मचारी ।
मिथ्या ग्लहे निर्जिता वै नृशंसैः
संवत्सरान्वै द्वादश राजपुत्राः ॥ ५-४८-९१ (३३६६३)
वासः कृच्छ्रो विहितश्चाप्यरण्ये
दीर्घं कालं चैकमज्ञातवर्षम् ।
ते हि कस्माज्जीवतां पाण्डवानां
नन्दिष्यन्ते धार्तराष्ट्राः पदस्थाः ॥ ५-४८-९२ (३३६६४)
ते चेदस्मान्युध्यमानाञ्जयेयु-
र्देवैर्महेन्द्रप्रमुखैः सहायैः ।
धर्मादधर्मश्चरितो गरीयां-
स्ततो ध्रुवं नास्ति कृतं च साधु ॥ ५-४८-९३ (३३६६५)
न चेदिदं पौरुषं कर्मबद्धं
न चेदस्मान्मन्यतेऽसौ विशिष्टान् ।
आशंसेऽहं वासुदेवद्वितीयो
दुर्योधनं सानुबन्धं निहन्तुम् ॥ ५-४८-९४ (३३६६६)
न चेदिदं कर्म नरेन्द्र वन्ध्यं
न चेज्ञवेत्सुकृतं निष्फलं वा ।
इदं च तच्चाभिसमीक्ष्य नूनं
पराजयो धार्तराष्ट्रस्य साधुः ॥ ५-४८-९५ (३३६६७)
प्रत्यक्षं वः कुरवो यद्ब्रवीमि

युद्धयमाना धार्तराष्ट्रा न सन्ति ।
अन्यत्र युद्धात्कुरवो यदि स्यु-
र्न युद्धे वै शेष इहास्ति कश्चित् ॥ ५-४८-९६ (३३६६८)
हत्वा त्वहं धार्तराष्ट्रान्सकर्णा-
न्राज्यं कुरूणामवजेता समग्रम् ।
यद्वः कार्यं तत्कुरुध्वं यथास्व-
मिष्टान्दरानात्मभोगान्भजध्वम् ॥ ५-४८-९७ (३३६६९)
अप्येवं नो ब्राह्मणाः सन्ति वृद्धा
बहुश्रुताः शीलवन्तः कुलीनाः ।
सांवत्सरा ज्योतिषि चाभियुक्ता
नक्षत्रयोगेषु च निश्चयज्ञाः ॥ ५-४८-९८ (३३६७०)
उच्चावचं दैवयुक्तं रहस्यं
दिव्याः प्रश्ना मृगचक्रा मुहूर्ताः ।
क्षयं महान्तं कुरुसृञ्जयानां
निवेदयन्ते पाण्डवानां जयं च ॥ ५-४८-९९ (३३६७१)
यथा हि नो मन्यतेऽजातशत्रुः
संसिद्धार्थो द्विपतां निग्रहाय ।
जनार्दनश्चाप्यपरोक्षविद्यो
न संशयं पश्यति वृष्णिसिंहः ॥ ५-४८-१०० (३३६७२)
अहं तथैनं खलु भाविरूपं
पश्यामि बुद्धया स्वयमप्रमत्तः ।
दृष्टिश्च मे न व्यथते पुराणी
संयुध्यमाना धार्तराष्ट्रा न सन्ति ॥ ५-४८-१०१ (३३६७३)
अनालब्धं जृम्भति गाण्डिवं धनु-
रनाहता कम्पति मे धनुर्ज्या ।
बाणाश्च मे तूणमुखाद्विसृत्य
मुहुर्मुहुर्गन्तुमुशन्ति चैव ॥ ५-४८-१०२ (३३६७४)
खड्गः कोशान्निःसरति प्रसन्नो
हित्वेव जीर्णासुरगस्त्वचं स्वाम् ।
ध्वजे वाचो रौद्ररूपा भवन्ति
कदा रथो योक्ष्यते ते किरीटिन् ॥ ५-४८-१०३ (३३६७५)
गोमायुसङ्घाश्च नदन्ति रात्रौ
रक्षांस्यथो निष्पतन्त्यन्तरिक्षात् ।
मृगाः श्वृगालाः शितिकण्ठाश्च काका
गृध्रा बकाश्चैव तरक्षवश्च ॥ ५-४८-१०४ (३३६७६)
सुवर्णपत्राश्च पतन्ति पञ्चा-

दृष्ट्वा रथं श्वेतहयप्रयुक्तम् ।
अहं ह्येकः पार्थिवान्सर्वयोधान्
शरान्वर्षन्मृत्युलोकं नयेयम् ॥ ५-४८-१०५ (३३६७७)
समादेदानः पृथगस्त्रमार्गा-
न्यथाप्रिरिद्धो गहनं निदाघे ।
स्थूणाकर्णं पाशुपतं महास्त्रं
ब्राह्मं चास्त्रं यच्च शक्रोऽप्यदान्मे ॥ ५-४८-१०६ (३३६७८)
वधे धृतो वेगवतः प्रमुञ्च-
न्नाहं प्रजाः किञ्चिदिहावशिष्ये ।
शान्तिं लप्स्ये परमो ह्येष भावः
स्थिरो मम ब्रूहि गावल्गणे तान् ॥ ५-४८-१०७ (३३६७९)
ये वैजय्याः समरे सूत लब्ध्वा
देवानपीन्द्रग्रमुखान्समेतात् ।
तैर्मन्मते कलहं संप्रसह्य
स धार्तराष्ट्रः पश्यत मोहमस्य ॥ ५-४८-१०८ (३३६८०)
वृद्धो भीष्मः शान्तनवः कृपश्च
द्रोणः सपुत्रो विदुरश्च धीमान् ।
एते सर्वे यद्वदन्ते तदस्तु
आयुष्मन्तः कुरवः सन्तु सर्वे ॥ ॥ ५-४८-१०९ (३३६८१)

इति श्रीमन्महाभारते उद्योगपर्वणि यानसन्धिपर्वणि
अष्टचत्वारिंशोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-४८-८ कर्म पापम् । अनिर्विष्टं अनुपभुक्तम् । अश्विभ्यां अश्विपुत्राभ्याम् ॥
५-४८-९ अपध्यानात अपकारचिन्तनमात्रात् । गां पृथ्वीम् ॥
५-४८-१२ त्वं एतावत्कुर्वित्याह ह्रियेति । यान्
लोकान् अन्यायवृत्तिर्धार्तराष्ट्रोऽध्यतिष्ठत् तान्
ह्रीप्रभृतिनिर्गुणैरुपलक्षिते पाण्डवे अनुरक्तान् कुरु ॥
५-४८-१३ मायया कपटेन उपधीयन्ते उपस्थाप्यन्ते इति
मायोपधश्चलवादः तम् । प्रतिपन्नः प्राप्तः प्रणिधानादिभिरुपेतः
सत्यं ब्रुवंश्च नः नृपः अतिवेलं क्लिश्यमानोपि तितिक्षमाण एवास्ते
इति शेषः ॥
५-४८-१४ क्रोध अवस्त्रष्टा उत्स्रक्ष्यति । अन्वतप्त्यत्
शोचिष्यति । आर्षोलकारव्यत्ययः ॥
५-४८-१५ कृष्णवर्त्मा दाहेन कृष्णीकृतभूभाग इति प्राञ्चः

। दग्धा धक्ष्यति ॥
५-४८-२२ तृणप्रायं तृणगृहमयं ग्रामम् । परासिक्तं दूरे निरस्तम् ॥
५-४८-२४ वराङ्गानां शिरसाम् । उपासङ्गान् उच्चयान् । दक्षिणेन
कुशलेन अनायासेनेति यावत्। आचरेत् कुर्यात्। रथिनः योधान्। प्रचेता
कूटीकरिष्यति ॥
५-४८-२५ दुःखशय्यां अशेतेत्युत्तरं तां यदा स्मरिष्यतीति शेषः ॥
५-४८-२८ सुवर्णस्य तारो दीर्घतन्तुः तम्
। अतिवेगादलातचक्रवत्सुवर्णरेखातुल्यमित्यर्थ- ॥
५-४८-३१ आयतः आगच्छतः ॥
५-४८-३४ क्षेप्तारः क्षेप्स्यन्ति ॥
५-४८-३९ धारयेयुः जीवेयुः ॥
५-४८-४० वरूथी रथगुप्तिमान् ॥
५-४८-४३ स वृष्णिसिंहः कृष्णाः येषामग्रणीः स्यात् तेभ्योऽन्ये
तं न सहेरन् ॥
५-४८-४४ राज्यं च मा वृणीष्व मा प्रार्थयस्व इति ब्रूयाः
। दुर्योधनं प्रतीत्यर्थात्। यतः वयं युद्धेऽद्वितयं सहायं सत्यकिं
प्रवृणीम वृतवन्त- ॥
५-४८-४९ वृष्णिसिंहस्य कृष्णस्य यथाविधं यादृक्प्रकारं
योगमाहुः तैः सर्वैर्गुणैः सात्यकिरुपेतः ॥
५-४८-५५ आददानान् ग्रसमानान् ॥
५-४८-५७ प्रचेतारः राशीकरिष्यन्ति ॥
५-४८-५९ अस्त्रपथं असंप्राप्तान् । अस्त्रं दृष्ट्वैव नश्यत इत्यर्थः
५-४८-६० प्रणोत्स्यामि दूरीकरिष्यामि ॥
५-४८-६२ कान्दिग्भूतं भयेन पलायितम् । श्रान्तपत्रं श्रान्तवाहनम् ॥
५-४८-६३ यथा वाजपेये प्रजापतिदैवत्याः सप्तदश पशवो विशस्यन्ते
तद्वद्बहूनामिहापि विशसनं कृतम् ॥
५-४८-६४ देवदत्तं अर्जुनस्य शङ्खम् ॥
५-४८-६७ उदूकान्ते संध्यावन्दनाचमनान्ते ॥
५-४८-७१ सागरं सगरैर्वर्धितम् । सलिलस्य महोदधिं जलसमुद्रम् ॥
५-४८-७५ सुदर्शनं नाम राजानम् । ललामं ललामभूतः कृष्णः ॥
५-४८-७६ कवाटे नगरभेदे ॥
५-४८-७७ अयं सुयोधनः । यथा जम्भो दैत्यः शैलं वेगेन अभिहत्य
हतः शेते तद्वत् ॥
५-४८-८० भौमो भूमिपुत्रः ॥
५-४८-८३ निर्मिचने नगरे । क्षुरान्तान् तीक्ष्णधारान् लोहमयानित्यर्थः ॥
५-४८-९३ साधु कृतं सत्कर्म नास्ति । निष्पलत्वात् वृथैव धर्म

इत्यर्थः ॥
५-४८-१४ कर्मबद्धं न मन्यते चेदित्योकृष्य योज्यम् ॥
५-४८-१५ इदं राज्यस्याप्रदानं इदानींतनम् । तच्च राज्यात् निःसारणं तदार्नीतनं अभिसमीक्ष्य आलोच्य। पापवशात्पराजय एव तस्येत्यर्थः ॥
५-४८-१९ मृगचक्रा मृगसमूहाः ॥
५-४८-१०८ विजयः कर्म येषां ते वैजय्याः । देवानपि लब्ध्वा विजयवन्त एवेत्यर्थः ॥

उद्योगपर्व - अध्याय ०४९
॥ श्रीः ॥
५.४९. अध्यायः ४९

Mahabharata - Udyoga Parva - Chapter Topics
भीष्मेण दुर्योधनंप्रति कृष्णार्जुनयोः नरनारायणतादात्म्यकथनपूर्वकं तद्विरोधे कुरूणां विनाशकथनम् ॥ १ ॥
तथा मर्मोद्घाटनपूर्वकं कर्णगर्हणम् ॥ २ ॥
धृतराष्ट्रेण भीष्मद्रोणवचनानादरणे सर्वकुरूणां स्वजीवितनैराश्याधिगमः ॥ ३ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-४९-० (३३६८२)
वैशम्पायन उवाच। ५-४९-०क्ष् (३५४४)
समवेतेषु सर्वेषु तेषु राजसु भारत ।
दुर्योधनमिदं वाक्यं भीष्मः शान्तनवोऽब्रवीत् ॥ ५-४९-१ (३३६८३)
बृहस्पतिश्चोशना च ब्रह्माणं पर्युपस्थितौ ।
मरुतश्च सहेन्द्रेण वसवश्चाग्निना सह ॥ ५-४९-२ (३३६८४)
आदित्याश्चैव साध्याश्च ये च सप्तर्पयो दिवि ।
विश्वावसुश्च गन्धर्वः शुभाश्चाप्सरसां गणाः ॥ ५-४९-३ (३३६८५)
नमस्कृत्योपजग्मुस्ते लोकवृद्धं पितामहम् ।
परिवार्य च विश्वेशं पर्यासत दिवौकसः ॥ ५-४९-४ (३३६८६)
तेषां मनश्च तेजश्चाप्याददानाविवौजसा ।
पूर्वदेवौ व्यतिक्रान्तौ नरनारायणावृषी ॥ ५-४९-५ (३३६८७)
बृहस्पतिस्तु पप्रच्छ ब्रह्माणं काविमाविति ।
भवन्तं नोपतिष्ठेते तौ नः शंस पितामह ॥ ५-४९-६ (३३६८८)

ब्रह्मोवाच। ५-४९-७क्ष् (३५४५)
यावेतौ पृथिवीं द्यां च भासयन्तौ तपस्विनौ ।
ज्वलन्तौ रोचमानौ च व्याप्यातीतौ महाबलौ ॥ ५-४९-७ (३३६८९)
नरनारायणावेतौ लोकाल्लोकं समास्थितौ ।
ऊर्जितौ स्वेन तपसा महासत्वपराक्रमौ ॥ ५-४९-८ (३३६९०)
एतौ हि कर्मणा लोकं नन्दयामासतुर्ध्रुवम् ।
द्विधाभूतौ महाप्राज्ञौ विद्धि ब्रह्मन्परन्तपौ ।
असुराणां विनाशाय देवगन्धर्वपूजितौ ॥ ५-४९-९ (३३६९१)
वैशम्पायन उवाच। ५-४९-१०क्ष् (३५४६)
जगाम शक्रस्तच्छ्रुत्वा यत्र तौ तेपतुस्तपः ।
सार्धं देवगणैः सर्वैर्बृहस्पतिपुरोगमैः ॥ ५-४९-१० (३३६९२)
तदा देवासुरे युद्धे भये जाते दिवौकसाम् ।
अयाचत महात्मानौ नरनारायणौ वरम् ॥ ५-४९-११ (३३६९३)
तावब्रूतां वृणीष्वेति तदा भरतसत्तम ।
अथैतावब्रवीच्छकः साह्यं नः क्रियतामिति ॥ ५-४९-१२ (३३६९४)
ततस्तौ शक्रमब्रूतां करिष्यावो यदिच्छसि ।
ताभ्यां च सहितः शक्रो विजिग्ये दैत्यदानवान् ॥ ५-४९-१३ (३३६९५)
नर इन्द्रस्य संग्रामे हत्वा शत्रून्परन्तपः ।
पौलोमान्कालखञ्जांश्च सहस्राणि शतानि च ॥ ५-४९-१४ (३३६९६)
एष भ्रान्ते रथे तिष्ठन्भल्लेनापाहरच्छिरः ।
जम्भस्य ग्रसमानस्य तदा ह्यर्जुन आहवे ॥ ५-४९-१५ (३३६९७)
एष पारे समुद्रस्य हिरण्यपुरमारुजत् ।
हत्वा षष्टिं सहस्राणि निवातकवचान्रणे ॥ ५-४९-१६ (३३६९८)
एष देवान्सहेन्द्रेण जित्वा परपुरञ्जयः ।
अतर्पयन्महाबाहुरर्जुनो जातवेदसम् ॥ ५-४९-१७ (३३६९९)
नारायणस्तथैवात्र भूयसोऽन्याञ्जघान ह ।
एवमेतौ महावीर्यौ तौ पश्यत समागतौ ॥ ५-४९-१८ (३३७००)
वासुदेवार्जुनौ वीरौ समवेतौ महारथौ ।
नरनारायणौ देवौ पूर्वदेवाविति श्रुतिः ॥ ५-४९-१९ (३३७०१)
अजेयौ मानुषे लोके सेन्द्रैरपि सुरासुरैः ।
एष नारायणः कृष्णः फाल्गुनश्च नरः स्मृतः ।
नारायणो नरश्चैव सत्त्वमेकं द्विधा कृतम् ॥ ५-४९-२० (३३७०२)
एतौ हि कर्मणा लोकानश्नुवातेऽक्षयान्ध्रुवान् ।
तत्रतत्रैव जायेते युद्धकाले पुनःपुनः ॥ ५-४९-२१ (३३७०३)
तस्मात्कर्मैव कर्तव्यमिति होवाच नारदः ।
एतद्धि सर्वमाचष्ट वृष्णिचक्रस्य वेदवित् ॥ ५-४९-२२ (३३७०४)

शङ्खचक्रगदाहस्तं यदा द्रक्ष्यसि केशवम् ।
पर्याददानं चास्त्राणि भीमधन्वानमर्जुनम् ॥ ५-४९-२३ (३३७०५)
सनातनौ महात्मानौ कृष्णावेकरथे स्थितौ ।
दुर्योधन तदा तात स्मर्तासि वचनं मम ॥ ५-४९-२४ (३३७०६)
नोचेदयमभावः स्यात्कुरूणां प्रत्युपस्थितः ।
अर्थाच्च तात धर्माच्च तव बुद्धिरुपप्लुता ॥ ५-४९-२५ (३३७०७)
न चेद्ग्रहीष्यसे वाक्यं श्रोतामि सुबहून्हतान् ।
तवैव हि मतं सर्वे कुरवः पर्युपासते ॥ ५-४९-२६ (३३७०८)
त्रयाणामेव च मतं तत्त्वमेकोऽनुमन्यसे ।
रामेण चैव शप्तस्य कर्णस्य भरतर्षभ ॥ ५-४९-२७ (३३७०९)
दुर्जातेः सुतपुत्रस्य शकुनेः सौबलस्य च ।
तथा क्षुद्रस्य पापस्य भ्रातुर्दुःशासनस्य च ॥ ५-४९-२८ (३३७१०)
कर्ण उवाच। ५-४९-२९क्ष् (३५४७)
नैवमायुष्मता वाच्यं यन्मामात्थ पितामह ।
क्षत्रधर्मे स्थितो ह्यस्मि स्वधर्मादनपेयिवान् ॥ ५-४९-२९ (३३७११)
किञ्चान्यन्मयि दुर्वृत्तं येन मां परिगर्हसे ।
न हि मे वृजिनं किञ्चिद्धार्तराष्ट्रा विदुः क्वचित् ॥ ५-४९-३० (३३७१२)
नाचरं वृजिनं किञ्चिद्धार्तराष्ट्रस्य नित्यशः ।
अहं हि पाण्डवान्सर्वान्हनिष्यामि रणे स्थितान् ॥ ५-४९-३१ (३३७१३)
प्राग्विरुद्धैः शमं सद्भिः कथं वा क्रियते पुनः ।
राज्ञो हि धृतराष्ट्रस्य सर्वं कार्यं प्रियं मया ।
तथा दुर्योधनस्यापि स हि राज्ये समाहितः ॥ ५-४९-३२ (३३७१४)
वैशम्पायन उवाच। ५-४९-३३क्ष् (३५४८)
कर्णस्य तु वचः श्रुत्वा भीष्मः शान्तनवः पुनः ।
धृतराष्ट्रं महाराजमाभाष्येदं वचोऽब्रवीत् ॥ ५-४९-३३ (३३७१५)
यदयं कत्थते नित्यं हन्ताहं पाण्डवानिति ।
नायं कलापि संपूर्णा पाण्डवानां महात्मनाम् ॥ ५-४९-३४ (३३७१६)
अनयो योयमागन्ता पुत्राणां ते दुरात्मनाम् ।
तदस्य कर्म जानीहि सूतपुत्रस्य दुर्मतेः ॥ ५-४९-३५ (३३७१७)
एतमाश्रित्य पुत्रस्ते मन्दबुद्धिः सुयोधनः ।
अवामन्यत तान्वीरान्देवपुत्रानरिन्दमान् ॥ ५-४९-३६ (३३७१८)
किञ्चाप्येतेन तत्कर्म कृतपूर्वं सुदुष्करम् ।
तैर्यथा पाण्डवैः सर्वैरेकैकेन कृतं पुरा ॥ ५-४९-३७ (३३७१९)
दृष्ट्वा विराटनगरे भ्रातरं निहतं प्रियम् ।
धनञ्जयेन विक्रम्य किमनेन तदा कृतम् ॥ ५-४९-३८ (३३७२०)
ग सर्वे ह्यस्त्रविदः शूराः सर्वे प्राप्ता महद्यशः ।

अपि सर्वामरैश्वर्यं त्यजेयुर्न पुनर्जयम् ॥' ५-४९-३९ (३३७२१)
सहितान्हि कुरून्सर्वानभियातो धनञ्जयः ।
प्रमथ्य चाच्छिनद्वासः किमयं प्रोषितस्तदा ॥ ५-४९-४० (३३७२२)
गन्धर्वैर्घोषयात्रायां ह्रियते यत्सुतस्तव ।
क्व तदा सूतपुत्रोऽभूद्य इदानीं वृषायते ॥ ५-४९-४१ (३३७२३)
ननु तत्रापि भीमेन पार्थेन च महात्मना ।
यमाभ्यामेव संगम्य गन्धर्वास्ते पराजिताः ॥ ५-४९-४२ (३३७२४)
एतान्यस्य मृषोक्तानि बहूनि भरतर्षभ ।
विकत्थनस्य भद्रं ते सदा धर्मार्थलोपिनः ॥ ५-४९-४३ (३३७२५)
वैशम्पायन उवाच। ५-४९-४४क्ष् (३५४९)
भीष्मस्य तु वचः श्रुत्वा भारद्वाजो महामताः ।
धृतराष्ट्रमुवाचेदं राजमध्येऽभिपूजयन् ॥ ५-४९-४४ (३३७२६)
यदाह भरतश्रेष्ठो भीष्मस्तत्क्रियतां नृप ।
न काममवलिप्तानां वचनं कर्तुमर्हसि ॥ ५-४९-४५ (३३७२७)
पुरा युद्धात्साधु मन्ये पाण्डवैः सह सङ्गतम् ।
यद्वाक्यमर्जुनेनोक्तं सञ्जयेन निवेदितम् ॥ ५-४९-४६ (३३७२८)
सर्वं तदभिजानामि करिष्यति च पाण्डवः ।
न ह्यस्य त्रिषु लोकेषु सदृशोऽस्ति धनुर्धरः ॥ ५-४९-४७ (३३७२९)
वैशम्पायन उवाच। ५-४९-४८क्ष् (३५५०)
अनादृत्य तु तद्वाक्यमर्थवद्द्रोणभीष्मयोः ।
ततः स सञ्जयं राजा पर्यपृच्छत पाण्डवान् ॥ ५-४९-४८ (३३७३०)
तदैव कुरवः सर्वे निराशा जीवितेऽभवन् ।
भीष्मद्रोणौ यदा राजा न सम्यगनुभाषते ॥ ॥ ५-४९-४९ (३३७३१)

इति श्रीमन्महाभारते उद्योगपर्वणि यानसन्धिपर्वणि
एकोनपञ्चाशोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-४९-१६ आरुजत् पीडितवान् ॥
५-४९-४१ वृषायते कर्णो भवति ॥

उद्योगपर्व - अध्याय ०५०
॥ श्रीः ॥
५.५०. अध्यायः ५०

Mahabharata - Udyoga Parva - Chapter Topics
धृतराष्ट्रेण पाण्डवानां किमुपजीवनेन रणोद्योग इति पृष्टस्य

सञ्जयस्य पाण्डवप्रभावानुस्मरणेन मूर्छा ॥ १ ॥
लब्धसंज्ञेन सञ्जयेन पाण्डवानां कृष्णानुगृहीतस्वसामर्थ्येन
राज्ञां साहाय्येन च समरोद्यम इति कथनम् ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-५०-० (३३७३२)
धृतराष्ट्र उवाच। ५-५०-०क्ष् (३५५१)
किमसौ पाण्डवो राजा धर्मपुत्रोऽभ्यभाषत ।
श्रुत्वेह बहुलाः सेनाः प्रीत्यर्थं नः समागताः ॥ ५-५०-१ (३३७३३)
किमसौ चेष्टते सूत योत्स्यमानो युधिष्ठिरः ।
के वास्य भ्रातृपुत्राणां पश्यन्त्याज्ञेप्सवो सुखम् ॥ ५-५०-२ (३३७३४)
के स्विदेनं वारयन्ति युद्धाच्छाम्येति वा पुनः ।
निकृत्या कोपितं मन्दैर्धर्मज्ञं धर्मचारिणम् ॥ ५-५०-३ (३३७३५)
सञ्जय उवाच। ५-५०-४क्ष् (३५५२)
राज्ञो मुखमुदीक्षन्ते पाञ्चालाः पाण्डवैः सह ।
युधिष्ठिरस्य भद्रं ते स सर्वाननुशास्ति च ॥ ५-५०-४ (३३७३६)
पृथग्भूताः पाण्डवानां पाञ्चालानां रथव्रजाः ।
आयान्तमभिनन्दन्ति कुन्तीपुत्रं युधिष्ठिरम् ॥ ५-५०-५ (३३७३७)
नभः सूर्यमिवोद्यन्तं कौन्तेयं दीप्ततेजसम् ।
पाञ्चालाः प्रतिनन्दन्ति तेजोराशिमिवोदितम् ॥ ५-५०-६ (३३७३८)
आगोपालाविपालाश्च नन्दमाना युधिष्ठिरम् ।
पाञ्चालाः केकया मत्स्याः प्रतिनन्दति पाण्डवम् ॥ ५-५०-७ (३३७३९)
ब्राह्मण्यो राजपुत्र्यश्च विशां दुहितरश्च याः ।
क्रीडन्त्योभिसमायान्ति पार्थं सन्नद्धमीक्षितुम् ॥ ५-५०-८ (३३७४०)
धृतराष्ट्र उवाच। ५-५०-९क्ष् (३५५३)
सञ्जयाचक्ष्व येनास्मान्पाडवा अभ्ययुञ्जत ।
धृष्टद्युम्नस्य सैन्येन सोमकानां बलेन च ॥ ५-५०-९ (३३७४१)
वैशम्पायन उवाच। ५-५०-१०क्ष् (३५५४)
गवल्गणिस्तु तत्पुष्टः सभायां कुरुसंसदि ।
निःश्वस्य सुभृशं दीर्घं मुहुः सञ्चिन्तयन्निव ॥ ५-५०-१० (३३७४२)
तत्रानिमित्ततो वैवात्सुतं कश्मलमाविशत् ।
तदाचचक्षे विदुरः सभायां राजसंसदि ॥ ५-५०-११ (३३७४३)
सञ्जयोऽयं महाराज मूर्छितः पतितो भुवि ।
वाचं न सृजते कांचिद्धीनप्रज्ञोऽल्पचेतनः ॥ ५-५०-१२ (३३७४४)
धृतराष्ट्र उवाच। ५-५०-१३क्ष् (३५५५)

अपश्यत्सञ्जयो नूनं कुन्तीपुत्रान्महारथान् ।
तैरस्य पुरुषव्याघ्रैर्भृशमुद्वेजितं मनः ॥ ५-५०-१३ (३३७४५)
वैशम्पायन उवाच। ५-५०-१४क्ष् (३५५६)
सञ्जयश्चेतनां लब्ध्वा प्रत्याश्वस्येदमब्रवीत् ।
धृतराष्ट्रं महाराज सभायां कुरुसंसदि ॥ ५-५०-१४ (३३७४६)
सञ्जय उवाच। ५-५०-१५क्ष् (३५५७)
दृष्टवानस्मि राजेन्द्र कुन्तीपुत्रान्महारथान् ।
मत्स्यराजगृहावासनिरोधेनावकर्शितान् ॥ ५-५०-१५ (३३७४७)
श्रृणु यैर्हि महाराज पाण्डवा अभ्ययुञ्जत ।
धृष्टद्युम्नेन वीरेण युद्धे वस्तेऽभ्ययुञ्जत ॥ ५-५०-१६ (३३७४८)
यो नैव रोषान्न भयान्न लोभान्नार्थकारणात् ।
न हेतुवादाद्धर्मात्मा सत्यं जाह्यात्कदाचन ॥ ५-५०-१७ (३३७४९)
यः प्रमाणं महाराज धर्मे धर्मभृतां वरः ।
अजातशत्रुणा तेन पाण्डवा अभ्ययुञ्जत ॥ ५-५०-१८ (३३७५०)
यस्य बाहुबले तुल्यः पृथिव्यां नास्ति कश्चन ।
यो वै सर्वान्महीपालान्वशे चक्रे धनुर्धरः ।
यः काशीनङ्गमगधान्कलिङ्गांश्च युधाजयत् ॥ ५-५०-१९ (३३७५१)
तेन वो भीमसेनेन पाण्डवा अभ्ययुञ्जत ।
यस्य वीर्येण सहसा चत्वारो भुवि पाण्डवाः ॥ ५-५०-२० (३३७५२)
निःसृत्य जतुगेहाद्वै हिडिम्बात्पुरुषादकात् ।
यश्चैपामभवद्द्वीपः कुन्तीपुत्रो वृकोदरः ॥ ५-५०-२१ (३३७५३)
याज्ञसेनीमथो यत्र सिन्धुराजोपकृष्टवान् ।
तत्रैषामभवद्द्वीपः कुन्तीपुत्रो वृकोदरः ॥ ५-५०-२२ (३३७५४)
यश्च तान्सङ्गतान्सर्वान्पाण्डवान्वारणावते ।
दह्यतो मोचयामास तेन वस्तेऽभ्ययुञ्जत ॥ ५-५०-२३ (३३७५५)
कृष्णायां चरता प्रीतिं येन क्रोधवशा हताः ।
प्रविश्य विषयं घोरं पर्वतं गन्धमादनम् ॥ ५-५०-२४ (३३७५६)
यस्य नागायुतैर्वीर्यं भुजयोः सारमर्पितम् ।
तेन वो भीमसेनेन पाण्डवा अभ्ययुञ्जत ॥ ५-५०-२५ (३३७५७)
कृष्णद्वितीयो विक्रम्य तुष्ट्यर्थं जातवेदसः ।
अजयद्यः पुरा वीरो युध्यमानं पुरन्दरम् ॥ ५-५०-२६ (३३७५८)
यः स साक्षान्महादेवं गिरिशं शूलपाणिनम् ।
तोपयामास युद्धेन देवदेवमुपामपिम् ॥ ५-५०-२७ (३३७५९)
यश्च सर्वान्वशे चक्रे लोकपालान्धनुर्धरः ।
तेन वो विजयेनाजौ पाण्डवा अभ्ययुञ्जत ॥ ५-५०-२८ (३३७६०)
यः प्रतीचीं दिशं चक्रे वशे म्लेच्छगणायुताम् ।

स तत्र नकुलो योद्धा चित्रयोधी व्यवस्थितः ॥ ५-५०-२९ (३३७६१)
तेन वो दर्शनीयेन वीरेणातिधनुर्भृता ।
माद्रीपुत्रेण कौरव्य पाण्डवा अभ्ययुञ्जत ॥ ५-५०-३० (३३७६२)
यः काशीनङ्गमगधान्कलिङ्गांश्च युधाजयत् ।
तेन वः सहदेवेन पाण्डवा अभ्ययुञ्जत ॥ ५-५०-३१ (३३७६३)
यस्य वीर्येण सदृशाश्चत्वारो भुवि मानवाः ।
अश्वत्थामा धृष्टकेतू रुक्मी प्रद्युम्न एव च ॥ ५-५०-३२ (३३७६४)
तेन वः सहदेवेन युद्धं राजन्महात्ययमा ।
यवीयसा नृवीरेण माद्रीनन्दिकरेण च ॥ ५-५०-३३ (३३७६५)
तपश्चचार या घोरं काशिकन्या पुरा सती ।
भीष्मस्य वधमिच्छन्ती प्रेत्यापि भरतर्षभ ॥ ५-५०-३४ (३३७६६)
पाञ्चालस्य सुता जज्ञे दैवाच्च स पुनः पुमान् ।
स्त्रीपुंसीः पुरुषव्याघ्र यः स वेद गुणागुणान् ॥ ५-५०-३५ (३३७६७)
॥ कलिङ्गान्समापेदे पाञ्चाल्यो युद्धदुर्मदः ।
शिखण्डिना वः कुरवः कृतास्त्रेणाभ्ययुञ्जत ॥ ५-५०-३६ (३३७६८)
यं यक्षः पुरुषं चक्रे भीष्मस्य निधनेच्छया ।
महेष्वासेन रौद्रेण पाण्डवा अभ्ययुञ्जत ॥ ५-५०-३७ (३३७६९)
महेष्वासा राजपुत्रा भ्रातरः पञ्च केकयाः ।
आमुक्तवचाः शूरास्तैश्च वस्तेऽभ्ययुञ्जत ॥ ५-५०-३८ (३३७७०)
यो दीर्घबाहुः क्षिप्रास्त्रो धृतिमान्सत्यविक्रमः ।
तेन वो वृष्णिवीरेण युयुधानेन सङ्गरः ॥ ५-५०-३९ (३३७७१)
य आसीच्छरणं काले पाण्डवानां महात्मनाम् ।
रणे तेन विराटेन भविता वः समागमः ॥ ५-५०-४० (३३७७२)
यः स काशिपती राजा वाराणस्यां महारथः ।
स तेषामभवद्योद्धा तेन वस्तेऽभ्ययुञ्जत ॥ ५-५०-४१ (३३७७३)
शिशुभिर्दुर्जयैः सङ्ख्ये द्रौपदेयैर्महात्मभिः ।
आशीविषसमस्पर्शैः पाण्डवा अभ्ययञ्जत ॥ ५-५०-४२ (३३७७४)
यः कृष्णासदृशो वीर्ये युधिष्ठिरसमो दमे ।
तेनाभिमन्युना सङ्ख्ये पाण्डवा अभ्ययुञ्जत ॥ ५-५०-४३ (३३७७५)
यश्चैवाप्रतिमो वीर्ये धृष्टकेतुर्महायशाः ।
दुःसहः समरे क्रुद्धः शैशुपालिर्महारथः ॥ ५-५०-४४ (३३७७६)
तेन वश्चेदिराजेन पाण्डवा अभ्ययुञ्जत ।
अक्षौहिण्या परिवृतः पाण्डवान्योभिसंश्रितः ॥ ५-५०-४५ (३३७७७)
यः संश्रयः पाण्डवानां देवानामिव वासवः ।
तेन वो वासुदेवेन पाण्डवा अभ्ययुञ्जत ॥ ५-५०-४६ (३३७७८)
यथा चेदिपतेर्भ्राता शरभो भरतर्षभ ।

करकर्षेण सहितस्ताभ्यां वस्तेऽभ्ययुञ्जत ॥ ५-५०-४७ (३३७७९)
तारासन्धिः सहदेवो जयत्सेनश्च तावुभौ ।
युद्धे प्रतिरथे वीरौ पाण्डवार्थे व्यवस्थितौ ॥ ५-५०-४८ (३३७८०)
द्रुपदश्च महातेजा बलेन महता वृतः ।
त्यक्तात्मा पाण्डवार्थाय सोत्स्यमानो व्यवस्थितः ॥ ५-५०-४९ (३३७८१)
एते चान्ये च बहवः प्राच्योदीच्या महीक्षितः ।
शतशो यानुपाश्रिता धर्मराजो व्यवस्थितः ॥ ॥ ५-५०-५० (३३७८२)

इति श्रीमन्महाभारते उद्योगपर्वणि यानसन्धिपर्वणि पञ्चशोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-५०-४७ करकर्षेण करकर्षसंज्ञेन भ्रात्रा ॥

उद्योगपर्व - अध्याय ०५१
॥ श्रीः ॥
५.५१. अध्यायः ५१

Mahabharata - Udyoga Parva - Chapter Topics
धृतराष्ट्रस्य सञ्जयाग्रे भीमसेनप्रतापानुस्मरणेन परिशोचनम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-५१-० (३३७८३)
धृतराष्ट्र उवाच। ५-५१-०क्ष् (३५५८)
सर्व एते महोत्साहा ये त्वया परिकीर्तिताः ।
एकतस्त्वेव ते सर्वे समेता भीम एकतः ॥ ५-५१-१ (३३७८४)
भीमसेनाद्धि मे भूयो भयं सञ्जायते महत् ।
क्रुद्धादमर्षणात्तात व्याघ्रादिव महारुरोः ॥ ५-५१-२ (३३७८५)
जागर्मि रात्रयः सर्वा दीर्घमुष्णं च निःश्वसन् ।
भीतो वृकोदरात्तात सिंहात्पशुरिवापरः ॥ ५-५१-३ (३३७८६)
न हि तस्य महाबाहोः शक्रप्रतिमतेजसः ।
सैन्येऽस्मिन्प्रतिपश्यामि य एनं विषहेद्युधि ॥ ५-५१-४ (३३७८७)
अमर्षणश्च कौन्तेयो दृढवैरश्च पाण्डवः ।
अनर्महासी सोन्मादस्तिर्यक्प्रेक्षी महास्वनः ॥ ५-५१-५ (३३७८८)
महावेगो महोत्साहो महाबाहुर्महाबलः ।
मन्दानां मम पुत्राणां युद्धेनान्तं करिष्यति ॥ ५-५१-६ (३३७८९)

उरुग्राहगृहीतानां गदां बिभ्रद्वृकोदरः ।
कुरूणामृषभो युद्धे दण्डपाणिरिवान्तकः ॥ ५-५१-७ (३३७९०)
अष्टाश्रिमायसीं घोरां गदां काञ्चनभूषणाम् ।
मनसाहं प्रपश्यामि ब्रह्मदण्डमिवोद्यतम् ॥ ५-५१-८ (३३७९१)
यथा मृगाणां यूथेषु सिंहो जातबलश्चरेत् ।
मामकेषु तथा भीमो बलेषु विचरिष्यति ॥ ५-५१-९ (३३७९२)
सर्वेषां मम पुत्राणां स एकः क्रूरविक्रमः ।
बह्वाशी विप्रतीपश्च बाल्येपि रभसः सदा ॥ ५-५१-१० (३३७९३)
उद्वेपते मे हृदयं ये मे दुर्योधनादयः ।
बाल्येऽपि तेन युद्ध्यन्तो वारणेनेव मर्दिताः ॥ ५-५१-११ (३३७९४)
तस्य वीर्येण संक्लिष्टा नित्यमेव सुता मम ।
स एव हेतुर्भेदस्य भीमो भीमपराक्रमः ॥ ५-५१-१२ (३३७९५)
ग्रसमानमनीकानि नरवारणवाजिनाम् ।
पश्यामीवाग्रतो भीमं क्रोधमूर्छितमाहवे ॥ ५-५१-१३ (३३७९६)
अस्त्रे द्रोणार्जुनसमं वायुवेगसमं जवे ।
महेश्वरसमं क्रोधे को हन्याद्भीममाहवे ॥ ५-५१-१४ (३३७९७)
सञ्जयाचक्ष्व मे शूरं भीमसेनममर्षणम् । ५-५१-१५ब्
॥॥॥॥॥ येऽहं यत्तेन रिपुघातिना ।
॥॥। सर्वे पुत्राः मम मनस्विना ॥ ५-५१-१५ (३३७९८)
येन भीमबला यक्षा राक्षसाश्च पुरा हताः ।
कथं तस्य रणे वेगं मानुषः प्रसहिष्यति ॥ ५-५१-१६ (३३७९९)
न स जातु वशे तस्थौ मम बाल्येऽपि सञ्जय ।
किं पुनर्मम दुष्पुत्रैः क्लिष्टः संप्रति पाण्डवः ॥ ५-५१-१७ (३३८००)
निष्ठुरो रोषणोऽत्यर्थं भज्येतापि न संनमेत् ।
तिर्यक्प्रेक्षी संहतभ्रूः कथं शाम्येद्वृकोदरः ॥ ५-५१-१८ (३३८०१)
शूरस्तथाऽप्रतिबलो गौरस्ताल इवोन्नतः ।
प्रमाणतो भीमसेनः प्रादेशेनाधिकोऽर्जुनात् ॥ ५-५१-१९ (३३८०२)
जवेन वाजिनोऽत्येति बलेनान्त्येति कुञ्जरान् ।
अव्यक्तजल्पी मध्वक्षो मध्यमः पाण्डवो बली ॥ ५-५१-२० (३३८०३)
इति बाल्ये श्रुतः पूर्वं मया व्यासमुखात्पुरा ।
रूपतो वीर्यतश्चैव याथातथ्येन पाण्डवः ॥ ५-५१-२१ (३३८०४)
आयसेन स दण्डेन रथन्नागान्नरान्हयान् ।
हनिष्यति रणे क्रुद्धो रौद्रः क्रूरपराक्रमः ॥ ५-५१-२२ (३३८०५)
अमर्षी नित्यसंरब्धो भीमः प्रहरतां वरः ।
मया तात प्रतीपानि कुर्वन्पूर्वं विमानितः ॥ ५-५१-२३ (३३८०६)
निष्कर्णामायसीं स्थूलां सुपार्श्वां काञ्चनीं गदाम् ।

शतघ्नीं शतनिर्हादां कथं शक्ष्यन्ति मे सुताः ॥ ५-५१-२४ (३३८०७)
अपारमप्लवागाधं समुद्रं शरवेधनम् ।
भीमसेनमयं दुर्गं तात मन्दास्तितीर्षवः ॥ ५-५१-२५ (३३८०८)
क्रोशतो मे न शृण्वन्ति बालाः पण्डितमानिनः ।
विषमं न हि मन्यन्ते प्रापतं मधुदर्शिनः ॥ ५-५१-२६ (३३८०९)
संयुगे ये गमिष्यन्ति नररूपेण मृत्युना ।
नियतं चोदिता धात्रा सिंहेनेव महामृगाः ॥ ५-५१-२७ (३३८१०)
शैक्यां तात चतुष्किष्कुं षडश्रिममितौजसम् ।
प्रहितां दुःखसंस्पर्शां कथं शक्ष्यन्ति मे सुताः ॥ ५-५१-२८ (३३८११)
गदां भ्रामयतस्तस्य भिन्दतो हस्तिमस्तकान् ।
सृक्किणी लेलिहानस्य बाष्पमुत्सृजतो मुहुः ॥ ५-५१-२९ (३३८१२)
उद्दिश्य नागान्पततः कुर्वतो भैरवान्रवान् ।
प्रतीपं पततो मत्तान्कुञ्जरान्प्रति गर्जतः ॥ ५-५१-३० (३३८१३)
विगाह्य रथमार्गेषु वरानुद्दिश्य निघ्नतः ।
अग्नेः प्रज्वलितस्येव अपि मुच्येत मे प्रजा ॥ ५-५१-३१ (३३८१४)
वीथीं कुर्वन्महाबाहुर्द्रावयन्मम वाहिनीम् ।
नृत्यन्निव गदापाणिर्युगान्तं दर्शयिष्यति ॥ ५-५१-३२ (३३८१५)
प्रभिन्न इव मातङ्गः प्रभञ्जन्पुष्पितान्द्रुमान् ।
प्रवेक्ष्यति रणे सेनां पुत्राणां मे वृकोदरः ॥ ५-५१-३३ (३३८१६)
कुर्वन्रथान्विपुरुषान्विसारथिहयध्वजान् ।
आरुजन्पुरुषव्याघ्रो रथिनः सादिनस्तथा ॥ ५-५१-३४ (३३८१७)
गङ्गावेग इवानूपांस्तीरजान्विविधान्द्रुमान् ।
प्रभङ्क्ष्यति रणे सेनां पुत्राणां मम सञ्जय ॥ ५-५१-३५ (३३८१८)
वधं नूनं गमिष्यन्ति भीमसेनभयार्दिताः ।
मम पुत्राश्च भृत्याश्च राजानश्चैव सञ्जय ॥ ५-५१-३६ (३३८१९)
येन राजा महावीर्यः प्रविश्यान्तःपुरं पुरा ।
वासुदेवसहायेन जरासन्धो निपातितः ॥ ५-५१-३७ (३३८२०)
कृत्स्नेयं पृथिवी देवी जरासन्धेन धीमता ।
मागधेन्द्रेण बलिना वशे कृत्वा प्रतापिता ॥ ५-५१-३८ (३३८२१)
भीष्मप्रतापात्कुरवो नयेनान्धकवृष्णयः ।
यन्न तस्य वशे जग्मुः केवलं दैवमेव तत् ॥ ५-५१-३९ (३३८२२)
स गत्वा पाण्डुपुत्रेण तरसा बाहुशालिना ।
अनायुधेन वीरेण निहतः किं ततोऽधिकम् ॥ ५-५१-४० (३३८२३)
दीर्घकालसमासक्तं विशमाशीविषो यथा ।
स मोक्ष्यति रणे तेजः पुत्रेषु मम सञ्जय ॥ ५-५१-४१ (३३८२४)
महेन्द्र इव वज्रेण दानवान्देवसत्तमः ।

भीमसेनो गदापाणिः सूदयिष्यति मे सुतान् ॥ ५-५१-४२ (३३८२५)
अविषह्यमनावार्यं तीव्रवेगपराक्रमम् ।
पश्यामीवातिताम्राक्षमापतन्तं वृकोदरम् ॥ ५-५१-४३ (३३८२६)
अगदस्याप्यधनुषो विरथस्य विवर्मणः ।
बाहुभ्यां युध्यमानस्य कस्तिष्ठेदग्रतः पुमान् ॥ ५-५१-४४ (३३८२७)
भीष्मो द्रोणश्च विप्रोऽयं कृपः शारद्वतस्तथा ।
जान्त्येते यथैवहं वीर्यज्ञस्तस्य धीमतः ॥ ५-५१-४५ (३३८२८)
आर्यव्रतं तु जानन्तः सङ्गरान्तं विधित्सवः ।
सेनामुखेषु स्थास्यन्ति मामकानां नरर्षभाः ॥ ५-५१-४६ (३३८२९)
बलीयः सर्वतो दिष्टं पुरुषस्य विशेषतः ।
पश्यन्नपि जयं तेषां न नियच्छामि यत्सुतान् ॥ ५-५१-४७ (३३८३०)
ते पुराणं महेष्वासा मार्गमैन्द्रं समास्थिताः ।
त्यक्ष्यन्ति तुमुले प्राणान्नक्षन्तः पार्थिवं यशः ॥ ५-५१-४८ (३३८३१)
यथैषां मामकास्तात तथैषां पाण्डवा अपि ।
पौत्रा भीष्मस्य शिष्याश्च द्रोणस्य च कृपस्य च ॥ ५-५१-४९ (३३८३२)
ये त्वस्मदाश्रयं किञ्चिद्दत्तमिष्टं च सञ्जय ।
तस्यापचितिमार्यत्वात्कर्तारः स्थविरास्त्रयः ॥ ५-५१-५० (३३८३३)
आददानस्य शस्त्रं हि क्षत्रधर्मं परीप्सतः ।
निधनं क्षत्रियस्याजौ वरमेवाद्युरुत्तमम् ॥ ५-५१-५१ (३३८३४)
स वै शोचामि सर्वान्वै ये युयुत्सन्ति पाण्डवैः ।
विक्रुष्टं विदुरोणादौ तदेतज्जयमागतम् ॥ ५-५१-५२ (३३८३५)
न तु मन्ये विघाताय ज्ञानं दुःखस्य सञ्जय ।
भवत्यतिबलं ह्येतज्ज्ञानस्याप्युपघातकम् ॥ ५-५१-५३ (३३८३६)
ऋषयो ह्यपि निर्मुक्ताः पश्यन्तो लोकसङ्ग्रहान् ।
सुखैर्भवन्ति सुखिनस्तथा दुःखेन दुःखिताः ॥ ५-५१-५४ (३३८३७)
किं पुनर्मोहमासक्तस्तत्र तत्र सहस्रधा ।
पुत्रेषु राज्यदारेषु पौत्रेष्वपि च बन्धुषु ॥ ५-५१-५५ (३३८३८)
संशये तु महत्यस्मिन्किं नु मे क्षममुत्तरम् ।
विनाशं ह्येव पश्यामि कुरूणामनुचिन्ततयन् ॥ ५-५१-५६ (३३८३९)
द्यूतप्रमुखमाभाति कुरूणां व्यसनं महत् ।
मन्देनैश्वर्यकामेन लोभात्पापमिदं कृतम् ॥ ५-५१-५७ (३३८४०)
मन्ये पर्यायधर्मोऽयं कालस्यात्यन्तगामिनः ।
चक्रे प्रधिरिवासक्तो नास्य शक्यं पलायितुम् ॥ ५-५१-५८ (३३८४१)
किं नु कुर्यां कथं कुर्यां क्व नु गच्छामि सञ्जय ।
एते नश्यन्ति कुरवो मन्दाः कालवशं गताः ॥ ५-५१-५९ (३३८४२)
अवशोऽहं तदा तात पुत्राणां निहते शते ।

श्रोष्यामि निनदं स्त्रीणां कथं मां मरणं स्पृशेत् ॥ ५-५१-६० (३३८४३)
यथा निदाघे ज्वलनः समद्धो
दहेत्कक्षं वायुना चोद्यमानः ।
गदाहस्तः पाण्डवो वै तथैव
हन्ता मदीयान्सहितोऽर्जुनेन ॥ ॥ ५-५१-६१ (३३८४४)

इति श्रीमन्महाभारते उद्योगपर्वणि यानसन्धिपर्वणि एकपञ्चाशोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-५१-७ उरुग्राहः महानिर्बन्धस्तेन गृहीतानां वशीकृतानाम् ॥
५-५१-१० रभसः वेगवान् ॥
५-५१-२१ पुरा पुराणम् ॥
५-५१-२४ निष्कर्णां अवक्राम् । शतनिर्ह्रादां महाशब्दवतीम् ॥
५-५१-२८ शैक्यां शिक्यस्थाम् ॥
५-५१-३५ अनूपान् सजलदेशे स्थितान् ॥
५-५१-४४ अगदस्य गदाहीनस्य ॥
५-५१-५८ पर्यायधर्मः विपरीतधर्मः । प्रधिर्नेमिः । अस्य कालवशस्य
। तृतीयार्थे षष्ठी ॥

उद्योगपर्व - अध्याय ०५२
॥ श्रीः ॥
५.५२. अध्यायः ५२

Mahabharata - Udyoga Parva - Chapter Topics
धृतराष्ट्रेण अर्जुनप्रतापानुवर्णनपूर्वकं परिशोचनम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-५२-० (३३८४५)
धृतराष्ट्र उवाच । ५-५२-०क्ष् (३५५१)
यस्य वै नानृता वाचः कदाचिदनुशुश्रुम ।
त्रैलोक्यमपि तस्य स्याद्योद्धा यस्य धनञ्जयः ॥ ५-५२-१ (३३८४६)
तस्यैव च न पश्यामि युधि गाण्डीवधन्वनः ।
अनिशं चिन्तयानोऽपि यः प्रतीयाद्रथेन तम् ॥ ५-५२-२ (३३८४७)
अस्यतः कर्णिनालीकान्मार्गणान्हृदयच्छिदः ।
प्रत्येता न समः कश्चिद्युधि गाण्डीवधन्वनः ॥ ५-५२-३ (३३८४८)
द्रोणाकर्णौ प्रतीयातां यदि वीरौ नरर्षभौ ।

कृतास्त्रौ बलिनां श्रेष्ठौ समरेष्वपराजितौ ॥ ५-५२-४ (३३८४९)
महान्स्यात्संशयो लोके न त्वस्ति विजयो मम ।
घृणी कर्णः प्रमादी च आचार्यः स्थविरो गुरुः ॥ ५-५२-५ (३३८५०)
समर्थो बलवान्पार्थो दृढधन्वा जितक्लमः ।
भवेत्सुतुमुलं युद्धं सर्वशोऽप्यपराजयः ॥ ५-५२-६ (३३८५१)
सर्वे ह्यस्त्रविदः शूराः सर्वे प्राप्ता महद्यशः ।
अपि सर्वामरैश्वर्यं त्यजेयुर्न पुनर्जयम् ॥ ५-५२-७ (३३८५२)
वधे नूनं भवेच्छान्तिस्तयोर्वा फाल्गुनस्य च ।
न तु हन्तार्जुनस्यास्ति जेता चास्य न विद्यते ॥ ५-५२-८ (३३८५३)
मन्युस्तस्य कथं शाम्येन्मन्दान्प्रति य उत्थितः ।
अन्येऽप्यस्त्राणि जानन्ति जीयन्ते च जयन्ति च ।
एकान्तविजयस्त्वेव श्रूयते फाल्गुनस्य ह ॥ ५-५२-९ (३३८५४)
त्रयस्त्रिंशत्समाहूय खाण्डवेऽग्निमतर्पयत् ।
जिगाय च सुरान्सर्वान्नास्य विघ्नः पराजयम् ॥ ५-५२-१० (३३८५५)
यस्य यन्ता हृषीकेशः शीलवृत्तसमो युधि ।
ध्रुवस्तस्य जयस्तात यथेन्द्रस्य जयस्तथा ॥ ५-५२-११ (३३८५६)
कृष्णावेकरथे यत्तावधिज्यं गाण्डिवं धनुः ।
युगपत्त्रीणि तेजांसि समेतान्यनुशुश्रुम ॥ ५-५२-१२ (३३८५७)
नैवास्ति नो धनुस्तादृङ्व योद्धा न च सारथिः ।
तच्च मन्दा न जानन्ति दुर्योधनवशानुगाः । ५-५२-१३ (३३८५८)
शेषयेदशनिर्दीप्तो विपतन्मूर्ध्नि सञ्जय ।
न तु शेषं शरास्तात कुर्युरस्ताः किरीटिना ॥ ५-५२-१४ (३३८५९)
अपि चास्यन्निवाभाति निघ्नन्निव धनञ्जयः ।
उद्धरन्निव कायेभ्यः शिरांसि शरवृष्टिभिः ॥ ५-५२-१५ (३३८६०)
अपि बाणमयं तेजः प्रदीप्तमिव सर्वतः ।
गाण्डीवोत्थं दहेताजौ पुत्राणां मम वाहिनी ॥ ५-५२-१६ (३३८६१)
अपि सा रथघोषेण भयार्ता सव्यसाचिनः ।
वित्रस्ता बहुधा सेना भारती प्रतिभाति मे ॥ ५-५२-१७ (३३८६२)
यथा कक्षं महानग्निः प्रदहेत्सर्वतश्चरन् ।
महार्चिरनिलोद्धूतस्तद्वद्धक्ष्यति मामकान् ॥ ५-५२-१८ (३३८६३)
यदोद्वमन्निशितान्बाणसङ्घां-
स्तानाततायी समरे किरीटी ।
सृष्टोऽन्तकः सर्वहरो विधात्रा
यथा भवेत्तद्वदपारणीयः ॥ ५-५२-१९ (३३८६४)
यदा हयभीक्ष्णं सुबहून्प्रकारान्
श्रोतास्मि तानावसथे कुरूणाम् ।

तेषां समन्ताच्च तथा रणाग्रे
क्षयः किलायं भरतानुपैति ॥ ॥ ५-५२-२० (३३८६५)

इति श्रीमन्महाभारते उद्योगपर्वणि यानसन्धिपर्वणि द्विपञ्चाशोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-५२-५ प्रमादी अन्ते विद्यां न स्मरिष्यतीति भावः ॥
५-५२-१४ अस्ताः क्षिप्ताः ॥

उद्योगपर्व - अध्याय ०५३
॥ श्रीः ॥
५.५३. अध्यायः ५३

Mahabharata - Udyoga Parva - Chapter Topics
धृतराष्ट्रेण कुरून्प्रति पाण्डवानां
बलवत्सहायसंपन्नत्वादिगुणसमृद्धिकथनपूर्वकं शान्त्यर्थं
स्वेन प्रयतनाभिधानम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-५३-० (३३८६६)
धृतराष्ट्र उवाच। ५-५३-०क्ष् (३५६०)
यथैव पाण्डवाः सर्वे पराक्रान्ता जिगीषवः ।
तथौभिसरास्तेषां त्यक्तात्मानो जये धृताः ॥ ५-५३-१ (३३८६७)
॥॥इ पराक्रान्तानाचक्षीथाः परान्मम ।
पाञ्चालान्केकयान्मत्स्यान्मागधान्वत्सभूमिपान् ॥ ५-५३-२ (३३८६८)
यश्च सेन्द्रानिमाँल्लोकानिच्छन्कुर्याद्वशे बली ।
स स्रष्टा जगतः कृष्णः पाण्डवानां जये धृतः ॥ ५-५३-३ (३३८६९)
समस्तामर्जुनाद्विद्यां सात्यकिः क्षिप्रमाप्तवान् ।
शैनेयः समरे स्थाता बीजवत्प्रवपञ्शरान् ॥ ५-५३-४ (३३८७०)
धृष्टद्युम्नश्च पाञ्चाल्यः क्रूरकर्मा महारथः ।
मामकेषु रणं कर्ता बलेषु परमास्त्रवित् ॥ ५-५३-५ (३३८७१)
युधिष्ठिरस्य च क्रोधादर्जुनस्य च विक्रमात् ।
मयाभ्यां भीमसेनाच्च भयं मे तात जायते ॥ ५-५३-६ (३३८७२)
अमानुषं मनुष्येन्द्रैर्जालं विततमन्तरा ।
न मे सैन्यास्तरिष्यन्ति ततः क्रोशामि सञ्जय ॥ ५-५३-७ (३३८७३)
दर्शनीयो मनस्वी च लक्ष्मीवान्ब्रह्मवर्चसी ।

मेधावी सुकृतप्रज्ञो धर्मात्मा पाण्डुनन्दनः ॥ ५-५३-८ (३३८७४)
मित्रामात्यैः सुसंपन्नः संपन्नो युद्धयोजकैः ।
भ्रातृभिः श्वशुरैर्वीरैरुपपन्नो महारथैः ॥ ५-५३-९ (३३८७५)
धृत्या च पुरुषव्याघ्रो नैभृत्येन च पाण्डवः ।
अनुशंसो वदान्यश्च ह्रीमान्सत्यपराक्रमः ॥ ५-५३-१० (३३८७६)
बहुश्रुतः कृतात्मा च वृद्धसेवी जितेन्द्रियः ।
तं सर्वगुणसंपन्नं समिद्धमिव पावकम् ॥ ५-५३-११ (३३८७७)
तपन्तमभि को मन्दः पतिष्यति पतङ्गवत् ।
पाण्डवाग्निमनावार्यं मुमूर्षुर्नष्टचेतनः ॥ ५-५३-१२ (३३८७८)
तनुरुच्चः शिखी राजा मिथ्योपचरितो मया ।
मन्दानां मम पुत्राणां युद्धेनान्तं करिष्यति ॥ ५-५३-१३ (३३८७९)
तैरयुद्धं साधु मन्ये कुरवस्तन्निबोधत ।
युद्धे विनाशः कृत्स्नस्य कुलस्य भविता ध्रुवम् ॥ ५-५३-१४ (३३८८०)
एषा मे परमा बुद्धिर्यया शाम्यति मे मनः ।
यदि त्वयुद्धमिष्टं वो वयं शान्त्यै यतामहे ॥ ५-५३-१५ (३३८८१)
न तु नः क्लिश्यमानानामुपेक्षेत युधिष्ठिरः ।
जुगुप्सति ह्यधर्मेण मामेवोद्दिश्य कारणम् ॥ ॥ ५-५३-१६ (३३८८२)

इति श्रीमन्महाभारते उद्योगपर्वणि यानसन्धिपर्वणि त्रिपञ्चाशोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-५३-१ अभिसराः पुरोगाः ॥
५-५३-१० नैभृत्येन मन्त्रगुप्त्या ॥

उद्योगपर्व - अध्याय ०५४
॥ श्रीः ॥
५.५४. अध्यायः ५४

Mahabharata - Udyoga Parva - Chapter Topics
सञ्जयेन पाण्डवेषु जयसाधनसामग्रीमभिधाय तेषु
धार्तराष्ट्रकृतापकारनुस्मारणपूर्वकं धृतराष्ट्रगर्हणम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-५४-० (३३८८३)
सञ्जय उवाच। ५-५४-०क्ष् (३५६१)
एवमेतन्महाराज यथावदसि भारत ।

युद्धे विनाशः क्षत्रस्य गाण्डीवेन प्रदृश्यते ॥ ५-५४-१ (३३८८४)
इदं तु नाभिजानामि तव धीरस्य नित्यशः ।
यत्पुत्रवशमागच्छेस्तत्त्वज्ञः सव्यसाचिनः ॥ ५-५४-२ (३३८८५)
नैष कालो महाराज तव शश्वत्कृतागसः ।
त्वया ह्येवादितः पार्था निकृता भरतर्षभ ॥ ५-५४-३ (३३८८६)
पिता श्रेष्ठः सुहृद्यश्च सम्यक्प्रणिहितात्मवान् ।
आस्थेयं हि हितं तेन न द्रोग्धा गुरुरुच्यते ॥ ५-५४-४ (३३८८७)
इदं जितमिदं लब्धमिति श्रुत्वा पराजितान् ।
द्यूतकाले महाराज स्मरसे स्म कुमारवत् ॥ ५-५४-५ (३३८८८)
परुषाण्युच्यमानांश्च पुरा पार्थानुपेक्षसे ।
कृत्स्नं राज्यं जयन्तीति प्रपातं नानुपश्यसि ॥ ५-५४-६ (३३८८९)
पित्र्यं राज्यं महाराज कुरवस्ते सजाङ्गलाः ।
अथ वीरैर्जितामुर्वीमखिलां प्रत्यपद्यथाः ॥ ५-५४-७ (३३८९०)
बाहुवीर्यार्जिता भूमिस्तव पार्थैर्निवेदिता ।
मयेदं कृतमित्येव मन्यसे राजसत्तम ॥ ५-५४-८ (३३८९१)
ग्रस्तान्गन्धर्वराजेन मज्जतो ह्यप्लवेऽम्भसि ।
आनिनाय पुनः पार्थः पुत्रांस्ते राजसत्तम ॥ ५-५४-९ (३३८९२)
कुमारवच्च स्मयसे द्यूते विनिकृतेषु यत् ।
पाण्डवेषु वने राजन्प्रव्रजत्सु पुनःपुनः ॥ ५-५४-१० (३३८९३)
प्रवर्षतः शरव्रातानर्जुनस्य शितान्बहून् ।
अप्यर्णवा विशुष्येयुः किं पुनर्मासयोनयः ॥ ५-५४-११ (३३८९४)
अस्यतां फाल्गुनः श्रेष्ठो गाण्डीवं धनुषां वरम् ।
केशवः सर्वभूतानामायुधानां सुदर्शनम् ।
वानरो रोचमानश्च केतुः केतुमतां वरः ॥ ५-५४-१२ (३३८९५)
एवमेतानि स रथो वहते सह यो रणे ।
क्षपयिष्यति नो राजन्कालचक्रमिवोद्यतम् ॥ ५-५४-१३ (३३८९६)
तस्याद्य वसुधा राजन्निखिला भरतर्षभ ।
यस्य भीमार्जिनौ योधौ स राजा राजसत्तम ॥ ५-५४-१४ (३३८९७)
तथा भीमहतप्रायां मज्जन्तीं तव वाहिनीम् ।
दुर्योधनमुखा दृष्ट्वा क्षयं यास्यन्ति कौरवाः ॥ ५-५४-१५ (३३८९८)
न भीमार्जुनयोर्भीता लप्स्यन्ते विजयं विभो ।
तव पुत्रा महाराज राजानश्चानुसारिणः ॥ ५-५४-१६ (३३८९९)
मत्स्यास्त्वामद्य नार्चन्ति पञ्चालाश्च सकेकयाः ।
साल्वेयाः शूरसेनाश्च सर्वे त्वामवजानते ॥ ५-५४-१७ (३३९००)
पार्थं ह्येते गताः सर्वे वीर्यज्ञास्तस्य धीमतः ।
भक्त्या ह्यस्य विरुध्यन्ते तव पुत्रैः सदैव ते ॥ ५-५४-१८ (३३९०१)

अनर्हानेव तु वधे धर्मयुक्तान्विकर्मणा ।
योऽक्लेशयत्पाण्डुपुत्रान्यो विद्वेष्ट्यधुनापि वै ॥ ५-५४-१९ (३३९०२)
सर्वोपायैर्नियन्तव्यः सानुगः पापपुरुषः ।
तव पुत्रो महाराज नानुशोचितुमर्हसि ॥ ५-५४-२० (३३९०३)
अपरोहं महाराज साक्षाच्चैनं ब्रवीम्यहम् ।
द्यूतकाले मया चोक्तं विदुरेण च धीमता ॥ ५-५४-२१ (३३९०४)
यदिदं ते विलपितं पाण्डवान्प्रति भारत ।
अनीशेनैव राजेन्द्र सर्वमेतन्निरर्थकम् ॥ ॥ ५-५४-२२ (३३९०५)

इति श्रीमन्महाभारते उद्योगपर्वणि यानसन्धिपर्वणि
चतुःपञ्चाशोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-५४-३ एष कालः कलनावुद्धिस्तव नैव स्थास्यति ॥
३ ।

उद्योगपर्व - अध्याय ०५५
॥ श्रीः ॥
५.५५. अध्यायः ५५

Mahabharata - Udyoga Parva - Chapter Topics
दुर्योधनेन धृतराष्ट्रंप्रति कृष्णादिभिः
कुरुसमुच्छेदप्रतिज्ञापूर्वकपाण्डवसमाश्वासनश्रवणचकिताय
स्वस्मै भीष्मादिभिरभयप्रदानकथनम् ॥ १ ॥
तथा स्वपरपक्षयोः बलाबलनिरूपणपूर्वकं धृतराष्ट्रंप्रति
समाश्वासनम् ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-५५-० (३३९०६)
दुर्योधन उवाच। ५-५५-०क्ष् (३५६२)
न भेतव्यं महाराज न शोच्या भवतां वयम् ।
समर्थाः स्म पराञ्जेतुं बलिनः समरे विभो ॥ ५-५५-१ (३३९०७)
वने प्रव्राजितान्पार्थान्यदायान्मधुसूदनः ।
महता बलचक्रेण परराष्ट्रावमर्दिना ॥ ५-५५-२ (३३९०८)
केकया धृष्टकेतुश्च धृष्टद्युम्नश्च पार्षत ।
राजानश्चान्वयुः पार्थान्बहवोऽन्येऽनुयायिनः ॥ ५-५५-३ (३३९०९)

इन्द्रप्रस्थस्य चादूरात्समाजग्मुर्महारथाः ।
व्यगर्हयंश्च संगम्य भवन्तं कुरुभिः सह ॥ ५-५५-४ (३३९१०)
ते युधिष्ठिरमासीनमजिनैः प्रतिवासितम् ।
कृष्णप्रधानाः संहत्य पर्युपासन्त भारत ॥ ५-५५-५ (३३९११)
प्रत्यादनं च राज्यस्य कार्यमूचुर्नराधिपाः ।
भवतः सानुबन्धस्य समुच्छेदं चिकीर्षवः ॥ ५-५५-६ (३३९१२)
श्रुत्वा चैवं मयोस्तास्तु भीष्मद्रोणकृपास्तदा ।
ज्ञातिक्षयभयाद्राजन्भीतेन भरतर्षभ ॥ ५-५५-७ (३३९१३)
ततः स्थास्यन्ति समये पाण्डवा इति मे मतिः ।
समुच्छेदं हि नः कृत्स्नं वासुदेवश्चिकीर्षति ॥ ५-५५-८ (३३९१४)
ऋते च विदुरात्सर्वे यूयं वध्या मता मम ।
धृतराष्ट्रस्तु धर्मज्ञो न वध्यः कुरुसत्तमः ॥ ५-५५-९ (३३९१५)
समुच्छेदं च कृत्स्नं नः कृत्वा तात जनार्दनः ।
एकराज्यं कुरूणां स्म चिकीर्षति युधिष्ठिरे ॥ ५-५५-१० (३३९१६)
तत्र किं प्राप्तकालं नः प्रणिपातः पलायनम् ।
प्राणान्वा संपरित्यज्य प्रतियुध्यामाहे परान् ॥ ५-५५-११ (३३९१७)
प्रतियुद्धे तु नियतः स्यादस्माकं पराजयः ।
युधिष्ठिरस्य सर्वे हि पार्थिवा वशवर्तिनः ॥ ५-५५-१२ (३३९१८)
विरक्तराष्ट्राश्च वयं मित्राणि कुपितानि नः ।
धिक्कृताः पार्थिवैः सर्वैः स्वजनेन च सर्वशः ॥ ५-५५-१३ (३३९१९)
प्रणिपाते न दोषोस्ति सन्धिर्नः शाश्वतीः समाः ।
पितरं त्वेव शोचामि प्रज्ञानेत्रं जनाधिपम् ॥ ५-५५-१४ (३३९२०)
मत्कृते दुःखमापन्नं क्लेशं प्राप्तमनन्तकम् ।
कृतं हि तव पुत्रैश्च परेषामवरोधनम् ।
मत्प्रयार्थं पुरैवैतद्विदितं ते नरोत्तम ॥ ५-५५-१५ (३३९२१)
ते राज्ञो धृतराष्ट्रस्य सामात्यस्य महारथाः ।
वैरं प्रतिकरिष्यन्ति कुलोच्छेदेन पाण्डवाः ॥ ५-५५-१६ (३३९२२)
ततो द्रोणोऽब्रवीद्भीष्मः कृपो द्रौणिश्च भारत ।
मत्वा मां महतीं चिन्तामास्थितंव्यथितेन्द्रियं ॥ ५-५५-१७ (३३९२३)
अभिद्रुग्धाः परे चेन्नो न भेतव्यं परन्तप ।
असमर्थाः परे जेतुमस्मान्युधि समास्थितान् ॥ ५-५५-१८ (३३९२४)
एकैकशः समर्थाः स्मो विजेतुं सर्वपार्थिवान् ।
आगच्छन्तु विनेष्यामो दर्पमेषां शितैः शरैः ॥ ५-५५-१९ (३३९२५)
पुरैकेन हि भीष्मेण विजिताः सर्वपार्थिवाः ।
मृते पितर्यतिक्रुद्धो रथेनैकेन भारत ॥ ५-५५-२० (३३९२६)
जघान सुबहूंस्तेषां संरब्धः कुरुसत्तमः ।

ततस्ते शरणं जग्मुर्देवव्रतमिमं भयात् ॥ ५-५५-२१ (३३९२७)
स भीष्मः सुसमर्थोऽयमस्माभिः सहितो रणे ।
परान्विजेतुं तस्मात्ते व्येतु भीर्भरतर्षभ ॥ ५-५५-२२ (३३९२८)
इत्येषां निश्चयो ह्यासीत्तत्कालेऽमिततेजसाम् ।
पुरा तेषां पृथिवी कृत्स्नासीद्वशवर्तिनी ॥ ५-५५-२३ (३३९२९)
अस्मान्पुनरमी नाद्य समर्था जेतुमाहवे ।
छिन्नपक्षाः परे ह्यद्य वीर्यहीनाश्च पाण्डवाः ॥ ५-५५-२४ (३३९३०)
अस्मत्संस्था च पृथिवी वर्तते भरतर्षभ ।
एकार्थाः सुखदुःखेषु समानीताश्च पार्थिवाः ॥ ५-५५-२५ (३३९३१)
अप्यग्निं प्रविशेयुस्ते समुद्रं वा परन्तप ।
मदर्थं पार्थिवाः सर्वे तद्विद्धि कुरुसत्तम ॥ ५-५५-२६ (३३९३२)
उन्मत्तमिव चापि त्वां प्रहसन्तीह दुःखितम् ।
विलपन्तं बहुविधं भीतं परविकत्थने ॥ ५-५५-२७ (३३९३३)
एषां ह्येकैकशो राज्ञां समर्थ पाण्डवान्प्रति ।
आत्मानं मन्यते सर्वो व्येतु ते भयमागतम् ॥ ५-५५-२८ (३३९३४)
जेतुं समग्रां सेनां मे वासवोऽपि न शक्नुयात् ।
हन्तुमक्षय्यरूपेयं ब्रह्मणोऽपि स्वयंभुवः ॥ ५-५५-२९ (३३९३५)
युधिष्ठिरः पुरं हित्वा पञ्चग्रामान्स याचते ।
भीतो हि मामकात्सैन्यात्प्रभावाच्चैव मे विभो ॥ ५-५५-३० (३३९३६)
समर्थं मन्यसे यच्च कुन्तीपुत्रं वृकोदरम् ।
तन्मिथ्या न हि मे कृत्स्नं प्रभावं वेत्सि भारत ॥ ५-५५-३१ (३३९३७)
मत्समो हि गदायुद्धे पृथिव्यां नास्ति कश्चन ।
नासीत्कश्चिदतिक्रान्तो भविता न च कश्चन ॥ ५-५५-३२ (३३९३८)
युक्तो दुःखोषितश्चाहं विद्यापारगतस्तथा ।
तस्मान्न भीमान्नान्येभ्यो भयं मे विद्यते क्वचित् ॥ ५-५५-३३ (३३९३९)
दुर्योधनसमो नास्ति गदायामिति निश्चयः ।
सङ्कर्षणस्य भवने यत्तदैनमुपावसम्। ५-५५-३४ (३३९४०)
युद्धे सङ्कर्षणसमो बलेनाभ्यधिको भुवि ।
गदाप्रहारं भीमो मे न जातु विषहेद्युधि ॥ ५-५५-३५ (३३९४१)
एकं प्रहारं यं दद्यां भीमाय रुषितो नृप ।
स एवैनं नयोद्घोरः क्षिप्रं वैवस्वतक्षयम् ॥ ५-५५-३६ (३३९४२)
इच्छेयं च गदाहस्तं राजन्द्रष्टुं वृकोदरम् ।
सुचिरं प्रार्थितो ह्येष मम नित्यं मनोरथः ॥ ५-५५-३७ (३३९४३)
गदया निहतो ह्याजौ मया पार्थो वृकोदरः ।
विशीर्णगावः पृथिवीं परासुः प्रपतिष्यति ॥ ५-५५-३८ (३३९४४)
गदाप्रहाराभिहतो हिमवानपि पर्वतः ।

सकृन्मया विदीर्येत गिरिः शतसहस्रधा ॥ ५-५५-३९ (३३९४५)
स चाप्येतद्विजानाति वासुदेवार्जुनौ तथा ।
दुर्योधनसमो नास्ति गदायामिति निश्चयः ॥ ५-५५-४० (३३९४६)
तत्ते वृकोदरमयं भयं व्येतु महाहवे ।
व्यपनेष्याम्यहं ह्येनं मा राजन्विमना भव ॥ ५-५५-४१ (३३९४७)
तस्मिन्मया हते क्षिप्रमर्जुनं बहवो रथाः ।
तुल्यरूपा विशिष्टाश्च क्षेप्स्यन्ति भरतर्षभ ॥ ५-५५-४२ (३३९४८)
भीष्मो द्रोणः कृपो द्रौणिः कर्णो भूरिश्रवास्तथा ।
प्राग्ज्योतिषाधिपः शल्यः सिन्धुराजो जयद्रथः ॥ ५-५५-४३ (३३९४९)
एकैक एषां शक्तस्तु हन्तुं भारत पाण्डवान् ।
समेतास्तु क्षणेनैतान्नेष्यन्ति यमसादनम् ॥ ५-५५-४४ (३३९५०)
समग्रा पार्थिवी सेना पार्थमेकं धनञ्जयम् ।
कस्मादशक्ता निर्जेतुमिति हेतुर्न विद्यते ॥ ५-५५-४५ (३३९५१)
शरव्रातैस्तु भीष्मेण शतशो निचितोऽवशः ।
द्रोणद्रौणिकृपैश्चैव गन्ता पार्थो यमक्षयम् ॥ ५-५५-४६ (३३९५२)
पितामहोऽपि गाङ्गेयः शान्तनोरधि भारत ।
ब्रह्मर्षिसदृशो जज्ञे देवैरपि सुदुःसहः ॥ ५-५५-४७ (३३९५३)
न हन्ता विद्यते चापि राजन्भीष्मस्य कश्चन ।
पित्रा ह्युक्तः प्रसन्नेन नाकामस्त्वं मरिष्यसि ॥ ५-५५-४८ (३३९५४)
ब्रह्मर्षेश्च भरद्वाजाद्द्रोणो द्रोण्यामजायत ।
द्रोणाज्जज्ञे महाराज द्रौणिश्च परमास्त्रवित् ॥ ५-५५-४९ (३३९५५)
कृपश्चाचार्यमुख्योयं महर्षेर्गौतमादपि ।
शरस्तम्बोद्भवः श्रीमानवध्य इति मे मतिः ॥ ५-५५-५० (३३९५६)
अयोनिजास्त्रयो ह्येते पिता माता च मातुलः ।
अश्वत्थाम्नो महारात स च शूरः स्थितो मम ॥ ५-५५-५१ (३३९५७)
सर्व एते महाराज देवकल्पा महारथाः ।
शक्रस्यापि व्यथां कुर्युः संयुगे भरतर्षभ ॥ ५-५५-५२ (३३९५८)
नैतेषामर्जुनः शक्त एकैकं प्रतिवीक्षितुम् ।
सहितास्तु नरव्याघ्रा हनिष्यन्ति धनञ्जयम् ॥ ५-५५-५३ (३३९५९)
भीष्माद्रोणकृपाणां च तुल्यः कर्णो मतो मम ।
अनुज्ञातश्च रामेण मत्समोऽसीति भारत ॥ ५-५५-५४ (३३९६०)
कुण्डले रुचिरे चास्तां कर्णस्य सहजे शुभे ।
ते शच्यर्थं महेन्द्रेण याचितः स परन्तपः ॥ ५-५५-५५ (३३९६१)
अमोघया महाराज शक्त्या परमभीमया ।
तस्य शक्त्योपगूढस्य कस्माज्जीवेद्धनञ्जयः ॥ ५-५५-५६ (३३९६२)
विजयो मे ध्रुवं राजन्फलं पाणाविवाहितम् ।

अभिव्यक्तः परेषां च कृत्स्नो भुवि पराजयः । ५-५५-५७ (३३९६३)
अह्ना ह्येकेन भीष्मोयं प्रयुतं हन्ति भारत ।
तत्समाश्च महेष्वासा द्रोणद्रौणिकृपा अपि ॥ ५-५५-५८ (३३९६४)
संशप्तकानां वृन्दानि क्षत्रियाणां परन्तप ।
अर्जुनं वयमस्मान्वा निहन्यात्कपिकेतनः ॥ ५-५५-५९ (३३९६५)
तांश्चालमिति मन्यन्ते सव्यसाचिवधे धृताः ।
पार्थिवाः स भवांस्तेभ्यो ह्यकस्माद्व्यथते कथम् ॥ ५-५५-६० (३३९६६)
भीमसेने च निहते कोऽन्यो युध्येत भारत ।
परेषां तन्ममाचक्ष्व यदि वेत्थ परन्तप ॥ ५-५५-६१ (३३९६७)
पञ्च ते भ्रातरः सर्वे धृष्टद्युम्नोऽथ सात्यकिः ।
परेषां सप्त ये राजन्योधाः सारं बलं मतम् ॥ ५-५५-६२ (३३९६८)
अस्माकं तु विशिष्टा ये भीष्मद्रोणकृपादयः ।
द्रौणिर्विकर्तनः कर्णः सोमदत्तोथ बाह्लिकः ॥ ५-५५-६३ (३३९६९)
प्राग्ज्योतिषाधिपः शल्य आवन्त्यौ च जयद्रथः ।
दुःशासनो दुर्मखश्च दुःसहश्च विशांपते ॥ ५-५५-६४ (३३९७०)
श्रुतायुश्चित्रसेनश्च पुरुमित्रो विविंशतिः ।
शलो भूरिश्रवाश्चैव विकर्णश्च तवात्मजः ॥ ५-५५-६५ (३३९७१)
अक्षौहिण्यो हि मे राजन्दशैका च समाहृताः ।
न्यूना परेषां सप्तैव कस्मान्मे स्यात्पराजयः ॥ ५-५५-६६ (३३९७२)
बलं त्रिगुणतो हीनं योध्यं प्राह बृहस्पतिः ।
परेभ्यस्त्रिगुणा चेयं मम राजन्ननीकिनी ॥ ५-५५-६७ (३३९७३)
गुणहीनं परेषां च बहु पश्यामि भारत ।
गुणोदयं बहुगुणमात्मनश्च विशांपते ॥ ५-५५-६८ (३३९७४)
एतत्सर्वं समाज्ञाय बलाग्र्यं मम भारत ।
न्यूनतां पाण्डवानां च न मोहं गन्तुमर्हसि ॥ ५-५५-६९ (३३९७५)
इत्युक्त्वा सञ्जयं भूयः पर्यपृच्छत भारत ।
विवित्सुः प्राप्तकालानि ज्ञात्वा परपुरञ्जयः ॥ ॥ ५-५५-७० (३३९७६)

इति श्रीमन्महाभारते उद्योगपर्वणि यानसन्धिपर्वणि
पञ्चपञ्चाशत्तमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-५५-१८ नः अस्माभिः परेचेत् यद्यपि अभिद्रुग्धाः द्रोहविषयं नीताः
तथापि न भेतव्यम् ॥
५-५५-३३ युक्तोऽभियोगवान् । दुःखोषित गुरुकुले ॥
५-५५-३४ उपावसं शिष्यत्वेन पर्यचरम् । ५-५५-५९ हन्यामेति

वदन्तीति शेषः ॥
५-५५-६० तान् संशप्तकान् अलं अर्जुनवधे पर्याप्ता इति मन्यन्ते ॥
५-५५-६७ त्रिगुणतस्त्र्यंशेन हीनम् । त्रिगुणा त्र्यंशेनाधिका ॥
५-५५-७० विवित्सुः विज्ञातुमिच्छुः । प्राप्तकालानि कर्माणि ॥
५-५५- ५-५५- ५-५५- ५-५५-

उद्योगपर्व - अध्याय ०५६
॥ श्रीः ॥
५.५६. अध्यायः ५६

Mahabharata - Udyoga Parva - Chapter Topics
सञ्जयेन पाण्डवभावं बुभुत्सुं दुर्योधनंप्रति तेषां
युद्धोत्कण्ठाकथनपूर्वकं तद्रथाश्ववर्णनम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-५६-० (३३९७७)
दुर्योधन उवाच। ५-५६-०क्ष् (३५६३)
अक्षौहिणीः सप्त लब्ध्वा राजभिः सह सञ्जय ।
किंस्विदिच्छति कौन्तेयो युद्धप्रेप्सुर्युधिष्ठिरः ॥ ५-५६-१ (३३९७८)
सञ्जय उवाच। ५-५६-२क्ष् (३५६४)
अतीव मुदितो राजन्युद्धप्रेप्युर्युधिष्ठिरः ।
भीमसेनार्जुनौ चोभौ यमावपि न बिभ्यतः ॥ ५-५६-२ (३३९७९)
रथं तु दिव्यं कौन्तेयः सर्वा विभ्राजयन्दिशः ।
मन्त्रं जिज्ञासमानः सन्बीभत्सुः समयोजयत् ॥ ५-५६-३ (३३९८०)
तमपश्याम सन्नद्धं मेघं विद्युद्युतं यथा ।
समन्तात्समभिध्या हृष्यमाणोऽभ्यभाषत ।
पूर्वरूपमिदं पश्य वयं जेष्याम सञ्जय ॥ ५-५६-४ (३३९८१)
बीभत्सुर्मां यथोवाच तथाऽवैम्यहमप्युत ॥ ५-५६-५ (३३९८२)
दुर्योधन उवाच। ५-५६-६क्ष् (३५६५)
प्रशंसस्यभिनन्दंस्तान्पार्थानक्षपराजितान् ।
अर्जुनस्य रथे ब्रूहि कथमश्वाः कथं ध्वजाः ॥ ५-५६-६ (३३९८३)
सञ्जय उवाच। ५-५६-७क्ष् (३५६६)
भौमनः सह शक्रेण बहुचित्रं विशांपते ।
रूपाणि कल्पयामास त्वष्टा धाता सदा विभो ॥ ५-५६-७ (३३९८४)
ध्वजे हि तस्मिन्नूपाणि चक्रुस्ते देवमायया ।
महाधनानि दिव्यानि महान्ति च लघूनि च ॥ ५-५६-८ (३३९८५)

भीमसेनानुरोधायक हनूमान्मारुतात्मजः ।
आत्मप्रतिकृतिं तस्मिन्ध्वज आरोपयिष्यति ॥ ५-५६-९ (३३९८६)
सर्वा दिशो योजनमात्रमन्तरं
सतिर्यगूर्ध्वं च रुरोध वै ध्वजः ।
न संसञ्जेत्तरुभिः संवृतोऽपि
तथा हि माया विहिता भौमनेन ॥ ५-५६-१० (३३९८७)
यथाऽऽकाशे शक्रधनुः प्रकाशते
न चैकवर्णं न च वेद्मि किं नु तत् ।
तथा ध्वजो विहितो भौमनेन
बह्वाकारं दृश्यते रूपमस्य ॥ ५-५६-११ (३३९८८)
यथाऽग्निधूमो दिवमेति रुद्धवा ।
वर्णान्बिभ्रत्तैजसांश्चित्ररूपान् ।
तथा ध्वजो विहितो भौमनेन
न चेङ्गारो भविता नोत रोधः ॥ ५-५६-१२ (३३९८९)
श्वेतास्तस्मिन्वातवेगाः सदश्वा
दिव्या युक्ताश्चित्ररथेन दत्ताः ।
भुव्यन्तरिक्षे दिवि वा नरेन्द्र
येषां गतिर्हीयते नात्र सर्वा ।
शतं यत्तत्पूर्यते नित्यकालं
हतंहतं दत्तवरं पुरस्तात् ५-५६-१३ (३३९९०)
तथा राज्ञो दन्तवर्णा बृहन्तो
रथे युक्ता भान्ति तद्वीर्यतुल्याः ।
ऋक्षप्रख्या भीमसेनस्य वाहा
रथे वायोस्तुल्यवेग बभूवुः ॥ ५-५६-१४ (३३९९१)
कल्माषाङ्गास्तित्तिरिचित्रपृष्ठा
भ्रात्रा दत्ताः प्रीयता फाल्गुनेन ।
भ्रातुर्बीरस्य स्वैस्तुरङ्गैर्विशिष्टा
मुदा युक्ताः सहदेवं वहन्ति ॥ ५-५६-१५ (३३९९२)
माद्रीपुत्रं नकुलं त्वाजमीढं
महेन्द्रदत्ता हरयो वाजिमुख्याः ।
समा वायोर्बलवन्तस्तरस्विनो
वहन्ति वीरं वृत्रशत्रुं यथेन्द्रम् । ५-५६-१६ (३३९९३)
तुल्याश्चैभिर्वयसा विक्रमेण
महाजवाश्चित्ररूपाः सदश्वाः ।
सौभद्रादीन्द्रौपदेयान्कुमारान्
वहन्त्यश्वा देवदत्ता बृहन्तः ॥ ॥ ५-५६-१७ (३३९९४)

इति श्रीमन्महाभारते उद्योगपर्वणि यानसन्धिपर्वणि
षट्पञ्चाशोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-५६-३ मन्त्रं अस्त्रप्रयोजकं जिज्ञासमानः परीक्षितुमिच्छन् ॥
५-५६-७ भौमनो विश्वकर्मा । धाता प्रजापतिः ॥
५-५६-८ ते त्वष्टृशक्रधातारः रूपाणि चक्रुः ॥
५-५६-१० रुरोध स्वतेजसेति शेषः ॥
५-५६-१२ भारो रथे रोधुः द्वारादौ द्वयमपि न भवेत् ॥
५-५६-१३ यत्तत् अश्वानां शतं हतंहतं पुनःपुनः
कतिपयाश्वहननेपि भावात् शतं पूर्यते । यतः पुरस्ताद्दत्तवरम् ॥
५-५६-१७ देवदत्ताः चित्ररथेन दत्ताः ॥

उद्योगपर्व - अध्याय ०५७
॥ श्रीः ॥
५.५७. अध्यायः ५७

Mahabharata - Udyoga Parva - Chapter Topics
पृष्टेन सञ्जयेन धृतराष्ट्रं प्रति पाण्डवसहायानां
राज्ञां नामनिर्देशपूर्वकं तैः कुरुसेनागतानां स्वस्वदध्यतया
विभजनकथनम् ॥ १ ॥
दुर्योधनेन सञ्जयवचनश्रवणेन क्रोशन्तं धृतराष्ट्रमाक्षिप्य
स्वपक्षीयाणां प्रतापप्रशंसनम् ॥ २ ॥
पुनस्सञ्जयेन धृष्टद्युम्नदन्त्रोवचनपूर्वकं युद्धनिषेधनम् ॥ ३ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-५७-० (३३९९५)
धृतराष्ट्र उवाच। ५-५७-०क्ष् (३५६७)
कांस्तत्र सञ्जयापश्यः प्रीत्यर्थेन समागतान् ।
ये योत्स्यन्ते पाण्डवार्थे पुत्रस्य मम वाहिनीम् ॥ ५-५७-१ (३३९९६)
सञ्जय उवाच। ५-५७-२क्ष् (३५६८)
मुख्यमन्धकवृष्णीनामपश्यं कृष्णमागतम् ।
चेकितानं च तत्रैव युयुधानं च सात्यकिम् ॥ ५-५७-२ (३३९९७)
पृथगक्षौहिणीभ्यां तु पाण्डवानभिसंश्रितौ ।
महारथौ समाख्यातावुभौ पुरुषमानिनौ ॥ ५-५७-३ (३३९९८)

अक्षौहिण्याऽथ पाञ्चाल्यो दशभिस्तनयैर्वृतः ।
सत्यजित्प्रमुखैर्वीरैर्धृष्टद्युम्नपुरोगमैः । ५-५७-४ (३३९९९)
द्रुपदो वर्धयन्मानं शिखण्डिपरिपालितः ।
उपायात्सर्वसैन्यानां प्रतिच्छाद्य तदा वपुः ॥ ५-५७-५ (३४०००)
विराटः सह पुत्राभ्यां शङ्खेनैवोत्तरेण च ।
सूर्यदत्तादिभिर्वीरैर्मदिराक्षपुरोगमैः ॥ ५-५७-६ (३४००१)
सहितः पृथिवीपालो भ्रातृभिस्तनयैस्तथा ।
अक्षौहिण्यैव सैन्यानां वृतः पार्थं समाश्रितः ॥ ५-५७-७ (३४००२)
जारासन्धिर्मागधश्च धृष्टकेतुश्च चेदिराट् ।
पृथक्पृथगनुप्राप्तौ पृथगक्षौहिणीवृतौ ॥ ५-५७-८ (३४००३)
केकया भ्रातरः पञ्च सर्वे लोहितकध्वजाः ।
अक्षौहिणीपरिवृताः पाण्डवानभिसंश्रिताः ॥ ५-५७-९ (३४००४)
एतानेतावतस्तत्र तानपश्यं समागतान् ।
ये पाण्डवार्थे योत्स्यन्ति धार्तराष्ट्रस्य वाहिनीम् ॥ ५-५७-१० (३४००५)
यो वेद ग्मानुषं व्यूहं दैवं गान्धर्वमासुरम् ।
स तत्र सेनाप्रमुखे धृषटद्युम्नो महारथः ॥ ५-५७-११ (३४००६)
भीष्मः शान्तनवो राजन्भागः क्लृप्तः शिखण्डिनः
तं विराटोऽनुसंयाता सार्धं मत्स्यैः प्रहारिभिः ॥ ५-५७-१२ (३४००७)
ज्येष्ठस्य पाण्डुपुत्रस्य भागो मद्राधिपो बली ।
तौ तु तत्राब्रुवन्केचिद्विषमौ नो मताविति ॥ ५-५७-१३ (३४००८)
दुर्योधनः सहसुतः सार्धं भ्रातृशतेन च ।
प्राच्याश्च दाक्षिणात्याश्च भीमसेनस्य भागतः ॥ ५-५७-१४ (३४००९)
अर्जुनस्य तु भागेन कर्णे वैकर्तनो मतः ।
अश्वत्थामा विकर्णश्च सैन्धवश्च जयद्रथः ॥ ५-५७-१५ (३४०१०)
अशक्याश्चैव ये केचित्पृथिव्यां शूरमानिनः ।
सर्वांस्तानर्जुनः पार्थः कल्पयामास भागतः ॥ ५-५७-१६ (३४०११)
महेष्वांसा राजपुत्रा भ्रातरः पञ्च केकयाः ।
केकयानेव भागेन कृत्वा योत्स्यन्ति संयुगे ॥ ५-५७-१७ (३४०१२)
तेषामेव कृतो भागो मालवाः साल्वकास्तथा ।
त्रिगर्तानां च वै मुख्यौ यौ तौ संशप्तकाविति ॥ ५-५७-१८ (३४०१३)
दुर्योधनसुताः सर्वे तथा दुःशासनस्य च ।
सौभद्रेण कृतो भागो राजा चैव बृहद्बलः ॥ ५-५७-१९ (३४०१४)
द्रौपदेया महेष्वासाः सुवर्णविकृतध्वजाः ।
धृष्टद्युम्नमुखा द्रोणमभियास्यन्ति भारत ॥ ५-५७-२० (३४०१५)
चेकितानः सोमदत्तं द्वैरथे योद्धुमिच्छति ।
भोजं तु कृतवर्माणं युयुधानो युयुत्सति ॥ ५-५७-२१ (३४०१६)

सहदेवस्तु माद्रेयः शूरः संक्रन्दनो युधि ।
स्वमंशं कल्पयामास श्यालं ते सुबलात्मजम् ॥ ५-५७-२२ (३४०१७)
उलूकं चैव कैतव्यं ये च सारस्वता गणाः ।
नकुलः कल्पयामास भागं माद्रवतीसुतः ॥ ५-५७-२३ (३४०१८)
ये चान्ये पार्थिवा राजन्प्रत्युद्यास्यन्ति सङ्गरे ।
समाह्वानेन तांश्चापि पाण्डुपुत्रा अकल्पयन् ॥ ५-५७-२४ (३४०१९)
एवमेषामनीकानि प्रविभक्तानि भागशः ।
यत्ते कार्यं सपुत्रस्य क्रियतां तदकालिकम् ॥ ५-५७-२५ (३४०२०)
धृतराष्ट्र उवाच। ५-५७-२६क्ष (३५६९)
न सन्ति सर्वे पुत्रा मे मूढा दुर्द्यूतदेविनः ।
येषां युद्धं बलवता भीमेन रणमूर्धनि ॥ ५-५७-२६ (३४०२१)
राजानः पार्थिवाः सर्वे प्रोक्षिताः कालधर्मणा ।
गाण्डीवाग्निं प्रवेक्ष्यन्ति पतङ्गा इव पावकम् ॥ ५-५७-२७ (३४०२२)
विद्रुतां वाहिनीं मन्ये कृतवैरैर्महात्मभिः ।
तां रणे केऽनुयास्यन्ति प्रभग्नां पाण्डवैर्युधि ॥ ५-५७-२८ (३४०२३)
सर्वे ह्यतिरथाः शूराः कीर्तिमन्तः प्रतापिनः ।
सूर्यपावकयोस्तुल्यास्तेजसा समितिंजयाः ॥ ५-५७-२९ (३४०२४)
येषां युधिष्ठिरो नेता गोप्ता च मधुसूदनः ।
योधौ च पाण्डवौ वीरौ सव्यसाचिवृकोदरौ ॥ ५-५७-३० (३४०२५)
नकुलः सहदेवश्च धृष्टद्युम्नश्च पार्षतः ।
सात्यकिर्द्रुपदश्चैव धृष्टकेतुश्च सानुजः ॥ ५-५७-३१ (३४०२६)
उत्तमौजाश्च पाञ्चाल्यो युधामन्युश्च दुर्जयः ।
शिखण्डी क्षत्रदेवश्च तथा वैराटिरुत्तरः ॥ ५-५७-३२ (३४०२७)
काशयश्चेदयश्चैव मत्स्याः सर्वे च सृञ्जयाः ।
विराटपुत्रो बभ्रुश्च पाञ्चालाश्च प्रभद्रकाः ॥ ५-५७-३३ (३४०२८)
येषांमिन्द्रोऽप्यकामानां न हरेत्पृथिवीमिमाम् ।
वीराणां रणधीराणां ये भिन्द्युः पर्वतानपि ॥ ५-५७-३४ (३४०२९)
तान्सर्वगुणसंपन्नानमनुष्यप्रतापिनः ।
क्रोशतो मम दुष्पुत्रो योद्धुमिच्छति सञ्जय ॥ ५-५७-३५ (३४०३०)
दुर्योधन उवाच। ५-५७-३६क्ष (३५७०)
उभौ स्व एकजातीयौ तथोभौ भूमिगोचरौ ।
अथ कस्मात्पाण्डवानामेकतो मन्यसे जयम् ॥ ५-५७-३६ (३४०३१)
पितामहं च द्रोणं च कृपं कर्णं च दुर्जयम् ।
जयद्रथं सोमदत्तमश्वत्थामानमेव च ॥ ५-५७-३७ (३४०३२)
सुतेजसो महेष्वासानिन्द्रोऽपि सहितोऽमरैः ।
अशक्तः समरे जेतुं किं पुनस्तात पाण्डवाः ॥ ५-५७-३८ (३४०३३)

सर्वे च पृथिवीपाला मदर्थे तात पाण्डवान् ।
आर्याः शस्त्रभृतः शूराः समर्थाः प्रतिबाधितुं ॥ ५-५७-३९ (३४०३४)
न मामकान्पाण्डवास्ते समर्थाः प्रतिवीक्षितुम् ।
पराक्रान्तो ह्यहं पाण्डून्सपुत्रान्योद्धुमाहवे ॥ ५-५७-४० (३४०३५)
मत्प्रियं पार्थिवाः सर्वे ये चिकीर्षन्ति भारत ।
ते तानावारयिष्यन्ति ऐणेयानिव तन्तुना ॥ ५-५७-४१ (३४०३६)
महता रथवंशेन शरजालैश्च मामकैः ।
अभिद्रुता भविष्यन्ति पाञ्चालाः पाण्डवैः सह ॥ ५-५७-४२ (३४०३७)
धृतराष्ट्र उवाच। ५-५७-४३क्ष् (३५७१)
उन्मत्त इव मे पुत्रो विलपत्येष सञ्जय ।
न हि शक्तो रमे जेतुं धर्मराजं युधिष्ठिरम् ॥ ५-५७-४३ (३४०३८)
जानाति हि यथा भीष्मः पाण्डवानां यशस्विनाम् ।
बलवत्तां सपुत्राणां धर्मज्ञानां महात्मनाम् ॥ ५-५७-४४ (३४०३९)
यतो नारोचयदयं विग्रहं तैर्महात्मभिः ।
किं तु सञ्जय मे ब्रूहि पुनस्तेषां विचेष्टितम् ॥ ५-५७-४५ (३४०४०)
कस्तांस्तरस्विनो भूयः सन्दीपयति पाण्डवान् ।
अर्चिष्मतो महेष्वासान्हविषा पावकानिव ॥ ५-५७-४६ (३४०४१)
सञ्जय उवाच। ५-५७-४७क्ष् (३५७२)
धृष्टद्युम्नः सदैवैतान्सन्दीपयति भारत ।
युद्ध्यध्वमिति माभैष्ट युद्धाङ्गरतसत्तमाः ॥ ५-५७-४७ (३४०४२)
ये केचित्पार्थिवास्तत्र धार्तराष्ट्रेण संवृताः ।
युद्धे समागमिष्यन्ति तुमुले शस्त्रसङ्कुले ॥ ५-५७-४८ (३४०४३)
तान्सर्वानाहवे क्रुद्धान्सानुबन्धान्समागतान् ।
अहमेकः समादास्ये तिमिर्यत्स्यानिवोदकात् ॥ ५-५७-४९ (३४०४४)
भीष्मं द्रोणं कृपं कर्णं द्रौणिं शल्यं सुयोधनम् ।
एतांश्चापि निरोत्स्यामि वेलेव मकरालयम् ॥ ५-५७-५० (३४०४५)
तथा ब्रुवन्तं धर्मात्मा प्राह राजा युधिष्ठिरः ।
तव धैर्यं च वीर्यं च पाञ्चालः पाण्डवैः सह ॥ ५-५७-५१ (३४०४६)
सर्वे समधिरूढाः स्म सङ्ग्रामान्नः समुद्धर ।
जानामि त्वां महाबाहो क्षत्रधर्मे व्यवस्थितम् ॥ ५-५७-५२ (३४०४७)
समर्थमेकं पर्याप्तं कौरवाणां विनिग्रहे ।
पुरस्तादुपयातानां कौरवाणां युयुत्सताम् ॥ ५-५७-५३ (३४०४८)
भवत्ता यद्विधातव्यं तन्नः श्रेयः परंतप ।
सङ्ग्रामादपयातानां भग्नानां शरणैषिणाम् ॥ ५-५७-५४ (३४०४९)
पौरुषं दर्शयञ्शूरो यस्तिष्ठेदग्रतः पुमान् ।
क्रीणीयात्तं सहस्रेण इति नीतिमतां मतम् ॥ ५-५७-५५ (३४०५०)

स त्वं शूरश्च वीरश्च विक्रान्तश्च नरर्षभ ।
भयार्तानां परित्राता संयुगेषु न संशयः ॥ ५-५७-५६ (३४०५१)
एवं ब्रुवति कौन्तेये धर्मात्मनि युधिष्ठिरे ।
धृष्टद्युम्न उवाचेदं मां वचो गतसाध्वसम् ।
सर्वाञ्जनपदान्सूत योधा दुर्योधनस्य ये ॥ ५-५७-५७ (३४०५२)
सबाह्लिकान्कुरून्ब्रूयाः प्रातिपेयाञ्शरद्वतः ।
सूतपुत्रं तथा द्रोणं सहपुत्रं जयद्रथम् ॥ ५-५७-५८ (३४०५३)
दुःशासनं विकर्णं च तथा दुर्योधनं नृपम्
भीष्मं च ब्रूहि गत्वा त्वमाशु गच्छ च माचिरम् ॥ ५-५७-५९ (३४०५४)
युधिष्ठिरः साधुनैवाभ्युपेयो
मा वोऽवधीदर्जुनो देवगुप्तः ।
राज्यं दद्धवं धर्मराजस्य तूर्णं
याचध्वं वै पाण्डवं लोकवीरम् ॥ ५-५७-६० (३४०५५)
नैतादृशो हि योधोऽस्ति पृथिव्यामिह कश्चन ।
यथाविधः सव्यसाची पाण्डवः सत्यविक्रमः ॥ ५-५७-६१ (३४०५६)
देवैर्हि संभृतो दिव्यो रथो गाण्डीवधन्वनः ।
न सजेयोमनुष्येण मा स्म कृद्धवं मनो युधि ॥ ॥ ५-५७-६२ (३४०५७)

इति श्रीमन्महाभारते उद्योगपर्वणि यानसन्धिपर्वणि
सप्तपञ्चाशत्तमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-५७-२५ अकालिकं कालबिलम्बं विना ॥
५-५७-२७ प्रोक्षिताः पशुवद्वधार्थं संस्कृताः ॥
५-५७-४१ ऐणेयान् हरिणशावान् । तन्तुनापाशेन ॥
५-५७-५८ शरद्वतः आयुष्मतः विरुद्वलक्षणया गतायुष इत्यर्थः ॥
५-५७-६० दद्धं ददत ॥
५-५७-६२ कृद्धवं कुरुध्वम् ॥

उद्योगपर्व - अध्याय ०५८
॥ श्रीः ॥
५.५८. अध्यायः ५८

Mahabharata - Udyoga Parva - Chapter Topics
धृतराष्ट्रेण युद्धस्य भीष्माद्यनभिमतत्वाभिधाने
दुर्योधनेन भीष्माद्यनपेक्षणेन कर्णदुश्शासनसहायेन स्वेनैव
पाण्डवहननप्रतिज्ञा ॥ १ ॥

पुनर्धृतराष्ट्रेण दुर्योधनगर्हणम् ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-५८-० (३४०५८)
धृतराष्ट्र उवाच। ५-५८-०क्ष् (३५७३)
क्षत्रतेजा ब्रह्मचारी कौमारादपि पाण्डवः ।
तेन संयुगमेष्यन्ति मन्दा विलपतो मम ॥ ५-५८-१ (३४०५९)
दुर्योधन निवर्तस्व युद्धाद्भरतसत्तम ।
न हि युद्धं प्रशंसन्ति सर्वावस्थमरिन्दम ॥ ५-५८-२ (३४०६०)
अलमर्धं पृथिव्यास्ते सहामात्यस्य जीवितुम् ।
प्रयच्छ पाण्डुपुत्राणां यथोचितमरिन्दम ॥ ५-५८-३ (३४०६१)
एतद्धि कुरवः सर्वे मन्यन्ते धर्मसंहितम् ।
यत्त्वं प्रशान्तिं मन्येथाः पाण्डुपुत्रैर्महात्मभिः ॥ ५-५८-४ (३४०६२)
अङ्गेमां समवेक्षस्व पुत्र स्वामेव वाहिनीम् ।
जात एष तवाभावस्त्वं तु मोहान्न बुद्ध्यसे ॥ ५-५८-५ (३४०६३)
न त्वहं युद्धमिच्छामि नैतदिच्छति बाह्लिकः ।
न च भीष्मो न च द्रोणो नाश्वत्थामा न सञ्जयः ॥ ५-५८-६ (३४०६४)
न सोमदत्तो न शलो न कृपो युद्धमिच्छति ।
सत्यव्रतः पुरुमित्रो जयो भूरिश्रवास्तथा ॥ ५-५८-७ (३४०६५)
येषु संप्रतितिष्ठेयुः कुरवः पीडिताः परैः ।
ते युद्धं नाभिनन्दन्ति तत्तुभ्यं तात रोचताम् ॥ ५-५८-८ (३४०६६)
न त्वं करोषि कामेन कर्णः कारयिता तव ।
दुःशासनश्च पापात्मा शकुनिश्चापि सौबलः ॥ ५-५८-९ (३४०६७)
दुर्योधन उवाच। ५-५८-१०क्ष् (३५७४)
नाहं भवति न द्रोणे नाश्वत्थाम्नि न सञ्जये ।
न भीष्मे न काम्भोजे न कृपे न च बाह्लिके ॥ ५-५८-१० (३४०६८)
सत्यव्रते पुरुमित्रे भूरिश्रवसि वा पुनः ।
अन्येषु वा तावकेषु भारं कुत्वा समाह्वयम् ॥ ५-५८-११ (३४०६९)
अहं च तात कर्णश्च रणयज्ञं वितत्य वै ।
युधिष्ठिरं पशुं कृत्वा दीक्षितौ भरतर्षभ ॥ ५-५८-१२ (३४०७०)
रथो वेदी स्रुवः खड्गो गदा स्रुक् कवचोऽजिनम् ।
चातुर्होत्रं च धुर्या मे शरा दर्भा हविर्यशः ॥ ५-५८-१३ (३४०७१)
आत्मयज्ञेन नृपते इष्ट्वा वैवस्वतं रणे ।
विजित्य च समेष्यावो हतामित्रौ श्रिया वृतौ ॥ ५-५८-१४ (३४०७२)
अहं च तात कर्णश्च भ्राता दुःशासनश्च मे ।

एते वयं हनिष्यामः पाण्डवान्समरे त्रयः ॥ ५-५८-१५ (३४०७३)
अहं हि पाण्डवान्हत्वा प्रशास्ता पृथिवीमिमाम् ।
मां वा हत्वा पाण्डुपुत्रा भोक्तारः पृथिवीमिमां ॥ ५-५८-१६ (३४०७४)
त्यक्तं मे जीवितं राज्यं धनं सर्वं च पार्थिव ।
न जातु पाण्डवैः सार्धं वसेयमहमच्युत ॥ ५-५८-१७ (३४०७५)
यावद्धि सूच्यास्तीक्ष्णाया विध्येदग्रेण मारिष ।
तावदप्यपरित्याज्यं भूमेर्नः पाण्डवान्प्रति ॥ ५-५८-१८ (३४०७६)
धृतराष्ट्र उवाच। ५-५८-१९क्ष् (३५७५)
सर्वान्वस्तात शोचामि त्यक्तो दुर्योधनो मया ।
ये मन्दमनुयास्यध्वं यान्तं वैवस्वतक्षयम् ॥ ५-५८-१९ (३४०७७)
रुरूणामिव यूथेषु व्याघ्राः प्रहरतां वराः ।
वरान्वरान्हनिष्यन्ति समेता युधि पाण्डवाः ॥ ५-५८-२० (३४०७८)
प्रतीपमिव मे भाति युयुधानेन भारती ।
व्यस्ता सीमन्तिनी ग्रस्ता प्रमृष्टा दीर्घबाहुना ॥ ५-५८-२१ (३४०७९)
संपूर्मं पूरयन्भूयो धनं पार्थस्य माधवः ।
शैनेयः समरे स्थाता बीजवत्प्रवपञ्शरान् ॥ ५-५८-२२ (३४०८०)
सेनामुखे प्रयुद्धानां भीमसेनो भविष्यति ।
तं सर्वे संश्रयिष्यन्ति प्राकारमकुतोभयम् ॥ ५-५८-२३ (३४०८१)
यदा द्रक्ष्यसि भीमेन कुञ्जरान्विनिपातितान् ।
विशीर्णदन्तान्गिर्याभान्भिन्नकुम्भान्सशोणितान् ॥ ५-५८-२४ (३४०८२)
तानभिप्रेक्ष्य सङ्ग्रामे विशीर्णानिव पर्वतान् ।
भीतो भीमस्य संस्पर्शात्स्मर्तासि वचनस्य मे ॥ ५-५८-२५ (३४०८३)
निर्दग्धं भीमसेनेन सैन्यं रथहयद्विपम् ।
गतिमग्नेरिव प्रेक्ष्य स्मर्तासि वचनस्य मे ॥ ५-५८-२६ (३४०८४)
महद्वो भयमागामि न चेच्छाम्यथ पाण्डवैः ।
गदया भीमसेनेन हताः शममुपैष्यथ ॥ ५-५८-२७ (३४०८५)
महावनमिव च्छिन्नं यदा द्रक्ष्यसि पातितम् ।
बलं कुरूणां भीमेन तदा स्मर्तासि मे वचः ॥ ५-५८-२८ (३४०८६)
वैशम्पायन उवाच। ५-५८-२९क्ष् (३५७६)
एतावदुक्त्वा राजा तु सर्वांस्तान्पृथिवीपतीन् ।
अनुभाष्य महाराज पुनः पप्रच्छ सञ्जयम् ॥ ॥ ५-५८-२९ (३४०८७)

इति श्रीमन्महाभारते उद्योगपर्वणि यानसन्धिपर्वणि
अष्टपञ्चाशत्तमोऽध्यायः ॥

५-५८-१३ चाचुर्होत्रं चतुर्णां होतॄणां ऋत्विजां समाहारः ॥
५-५८-२१ भारती सेना प्रतीपं व्यस्ता सीमन्तिनीव भाति ॥

उद्योगपर्व - अध्याय ०५९
॥ श्रीः ॥
५.५९. अध्यायः ५९

Mahabharata - Udyoga Parva - Chapter Topics
पुनः पृष्टेन सञ्जयेन धृतराष्ट्रंप्रति अर्जुनवाक्यकथनम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-५९-० (३४०८८)
धृतराष्ट्र उवाच। ५-५९-०क्ष् (३५७७)
ब्रूहि सञ्जय यच्छेषं वासुदेवादनन्तरम् ।
यजर्जुन उवाच त्वां परं कौतूहलं हि मे ॥ ५-५९-१ (३४०८९)
सञ्जय उवाच। ५-५९-२क्ष् (३५७८)
वासुदेववचः श्रुत्वा कुन्तीपुत्रो धनञ्जयः ।
उवाच काले दुर्धर्षो वासुदेवस्य शृण्वतः ॥ ५-५९-२ (३४०९०)
पितामहं शान्तनवं धृतराष्ट्रं च सञ्जय ।
द्रोणं कृपं च शल्यं च महाराजं च बाह्लिकम् ॥ ५-५९-३ (३४०९१)
द्रौणिं च सौमदत्तिं च शकुनिं चापि सौबलम् ।
दुश्शासनं शलं चैव पुरुमित्रं विविंशतिम् ॥ ५-५९-४ (३४०९२)
विकर्णं चित्रसेनं च जयत्सेनं च पार्थिवम् ।
विन्दानुविन्दावावन्त्यौ दुर्मुखं चापि पौरवम् ॥ ५-५९-५ (३४०९३)
सैन्धवं दुस्सहं चैव भूरिश्रवसमेव च ।
भगदत्तं च राजानं जलसन्धं च पौरवम् ॥ ५-५९-६ (३४०९४)
ये चाप्यन्ये पार्थिवास्तत्र योद्धुं
समागताः कौरवाणां प्रियार्थम् ।
मुमूर्षवः पाण्डवाग्नौ प्रदीप्ते
समानीता धार्तराष्ट्रेण सूत ॥ ५-५९-७ (३४०९५)
यथान्यायं कुशलं वन्दनं च
समागता मद्वचनेन वाच्याः ॥ ५-५९-८ (३४०९६)
इदं ब्रूवाः सञ्जय राजमध्ये
दुर्योधनं पापकृतां प्रधानम् ।
अमर्षणं दुर्मतिं राजपुत्रं
पापात्मानं धार्तराष्ट्रं सुलुब्धम् ।

सर्वं ममैतद्वचनं समग्रं
सहामात्यं सञ्जय श्रावयेथाः ॥ ५-५९-९ (३४०९७)
एवं परिष्वज्य धनञ्जयो मां
ततोऽर्थवद्धर्मवच्चापि वाक्यम् ।
प्रोवाचेदं वासुदेवं समीक्ष्य
पार्थो धीमाँल्लोहितान्तायताक्षः ॥ ५-५९-१० (३४०९८)
यथाश्रुतं ते वदतो महात्मनो
यदुप्रवीरस्य वचः समाहितम् ।
तथैव वाच्यं भवतापि मद्वचः
समागतेषु क्षितिपेषु सर्वशः ॥ ५-५९-११ (३४०९९)
शराग्निधूमे रथनेमिनादिते
धनुस्स्त्रुवेणास्त्रबलापहारिणा ।
यथा न होमः क्रियते महामृधे
तथा समेत्य प्रयतध्वमादृताः ॥ ५-५९-१२ (३४१००)
न चेत्प्रयच्छध्वममित्रघातिनो
युधिष्ठिरस्यार्धमभीप्सितं स्वकम् ।
नयामि वः साश्वपदातिकुञ्जरा-
न्दिशं पितॄणामशिवां शितैः शरैः ॥ ५-५९-१३ (३४१०१)
ततोऽहमामन्त्र्य चतुर्भुजं हरिं
धनञ्जयं चैव नमस्य सत्वरम् ।
जवेन संप्राप्त इहामरद्युते
तवान्तिकं प्रापयितुं वचो महत् ॥ ॥ ५-५९-१४ (३४१०२)

इति श्रीमन्महाभारते उद्योगपर्वणि यानसन्धिपर्वणि
एकोनषष्टितमोऽध्यायः ॥

उद्योगपर्व - अध्याय ०६०
॥ श्रीः ॥
५.६०. अध्यायः ६०

Mahabharata - Udyoga Parva - Chapter Topics
धृतराष्ट्रेण दुर्योधनं प्रति स्वपरपक्षयोः बलाबलविमर्शनेन
पाण्डवेषु पुत्रप्रेम्णा धर्मादिदेवानां साहाय्यकरमाभिधानपूर्वकं
स्वस्य शमाभिरोचनवचनम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-६०-० (३४१०३)
वैशम्पायन उवाच। ५-६०-०क्ष् (३५७९)
सञ्जयस्य वचः श्रुत्वा प्रज्ञाचक्षुर्जनेश्वरः ।
ततः सङ्ख्यातुमारेभे तद्वचो गुणदोषतः ॥ ५-६०-१ (३४१०४)
प्रसङ्ख्याय च सौक्ष्म्येण गुणदोषान्विचक्षणः ।
यथावन्मतितत्त्वेन जयकामः सुतान्प्रति ॥ ५-६०-२ (३४१०५)
बलाबलं विनिश्चित्य याथातथ्येन बुद्धिमान् ।
ग्यदा तु मेने भूयिष्ठं तद्वचो गुणदोषतः ॥ ५-६०-३ (३४१०६)
पुनरेव कुरूणां च पाण्डवानां च बुद्धिमान् ।'
शक्तिं शङ्ख्यातुमारेभे तदा वै मनुजाधिपः ॥ ५-६०-४ (३४१०७)
देवमानुषयोः शक्त्या तेजसा चैव पाण्डवान् ।
कुरूञ्शक्त्याऽल्पतरया दुर्योधनमथाब्रवीत् ॥ ५-६०-५ (३४१०८)
दुर्योधनेयं चिन्ता मे शश्वन्न व्युपशाम्यति ।
सत्यं ह्येतदहं मन्ये प्रत्यक्षं नानुमानतः ॥ ५-६०-६ (३४१०९)
आत्मजेषु परं स्नेहं सर्वभातिनि कुर्वते ।
प्रियामि चैषां कुर्वन्ति यथाशक्ति हितानि च ॥ ५-६०-७ (३४११०)
एवमेवोपकर्तॄणां प्रायशो लक्षयामहे ।
इच्छन्ति बहुलं सन्तः प्रतिकर्तुं महत्प्रियम् ॥ ५-६०-८ (३४१११)
अग्निः साचिव्यर्ता स्यात्खाण्डवे तत्कृतं स्मरन् ।
अर्जुनस्यापि भीमेऽस्मिन्कुरुपाण्डुसमागमे ॥ ५-६०-९ (३४११२)
जातिगृद्ध्याऽभिपन्नाश्च पाण्डवानामनेकशः ।
धर्मादयः समेष्यन्ति समाहूता दिवौकसः ॥ ५-६०-१० (३४११३)
भीष्मद्रोणकृपादीनां भयादशनिसन्निभम् ।
रिरक्षिषन्तः संरभ्यं गमिष्यन्तीति मे मतिः ॥ ५-६०-११ (३४११४)
ते देवैः सहिताः पार्था न शक्याः प्रतिवीक्षितुम् ।
मानुषेण नरव्याघ्रा वीर्यवन्तोऽस्त्रपारगाः ॥ ५-६०-१२ (३४११५)
दुरासदं यस्य दिव्यं गाण्डीवं धनुरुत्तमम् ।
वारुणौ चाक्षयौ दिव्यौ शरपूर्णौ महेषुधी ॥ ५-६०-१३ (३४११६)
वानरश्च ध्वजे दिव्यो निःसङ्गे धूमवद्गतिः ।
रथश्च चतुरन्तायां यस्य नास्ति समः क्षितौ ॥ ५-६०-१४ (३४११७)
महामेघनिभश्चापि निर्घोषः श्रूयते जनैः ।
महाशनिसमः शब्दःत शात्रवाणां भयंकरः ॥ ५-६०-१५ (३४११८)
यं चातिमानुषं वीर्ये कृत्स्नो लोको व्यवस्यति ।
देवानामपि जेतारं यं विदुः पार्थिवा रणे ॥ ५-६०-१६ (३४११९)
शतानि पञ्च चैवेषून्यो गृह्णन्नैव दृश्यते ।
निमेषान्तरमात्रेण मुञ्चन्दूरं च पातयन् ॥ ५-६०-१७ (३४१२०)

यमाह भीष्मो द्रोणश्च कृपो द्रौणिस्तथैव च ।
मद्रराजस्तथा शल्यो मध्यस्था ये च मानवाः ॥ ५-६०-१८ (३४१२१)
युद्धायावस्थितं पार्थं पार्थिवैरतिमानुषैः ।
अशक्यं रथशार्दूलं पराजेतुमरिंदमम् ॥ ५-६०-१९ (३४१२२)
क्षिपत्येकेन वेगेन पञ्चबाणशतानि यः ।
सदृशं बाहुवीर्येण कार्तवीर्यस्य पाण्डवम् ॥ ५-६०-२० (३४१२३)
तमर्जुनं महेष्वासं महेन्द्रोपेन्द्रविक्रमम् ।
निघ्नन्तमिव पश्याभि विमर्देऽस्मिन्महाहवे ॥ ५-६०-२१ (३४१२४)
इत्येवं चिन्तयन्कृत्स्नमहोरात्राणि भारत ।
अनिद्रो निःसुखश्चास्मि कुरूणां शमचिन्तया ॥ ५-६०-२२ (३४१२५)
क्षयोदयोऽयं सुमहान्कुरूणां प्रत्युपस्थितः ।
अस्य चेत्कलहन्यान्तः शमादन्यो न विद्यते ॥ ५-६०-२३ (३४१२६)
शमो मे रोचते नित्यं पार्थैस्तात न विग्रहः ।
कुरुभ्यो हि सदा मन्ये पाण्डवाञ्शक्तिमत्तरान् ॥ ॥ ५-६०-२४ (३४१२७)

इति श्रीमन्महाभारते उद्योगपर्वणि यानसन्धिपर्वणि षष्टितमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-६०-५ शक्त्या परिच्छिद्येति शेष्टः ॥
५-६०-९ भीमे भयंकरे ॥
५-६०-१० जातिगृद्ध्या जन्मग्रहणाद्धेतोः युधिष्ठिरादीनां पितरो
धर्मादयोपि तेषां सहायाः सन्ति ॥

उद्योगपर्व - अध्याय ०६१
॥ श्रीः ॥
५.६१. अध्यायः ६१

Mahabharata - Udyoga Parva - Chapter Topics
दुर्योधनेन सहेतुकं पाण्डवानां देवैः साहाय्यकरणपक्षप्रतिक्षेपः ॥ १ ॥
तथा जलस्तम्भनादिस्वसामर्थ्यभिधानपूर्वकं स्वेन
पाण्डवपराजयकरणाभिधानम् ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-६१-० (३४१२८)
वैशम्पायन उवाच। ५-६१-०क्ष् (३५८०)

पितुरेतद्वचः श्रुत्वा धार्तराष्ट्रोऽत्यमर्षणः ।
आधाय विपुलं क्रोधं पुनरेवेदमब्रवीत् ॥ ५-६१-१ (३४१२९)
अशक्या देवसचिवाः पार्थाः स्युरिति यज्ञवान् ।
मन्यते तद्भयं व्येतु भवतो राजसत्तम ॥ ५-६१-२ (३४१३०)
अकामद्वेषसंयोगाल्लोभद्रोहाच्च भारत ।
उपेक्षया च भावानां देवा देवत्वमाप्नुवन् ॥ ५-६१-३ (३४१३१)
इति द्वैपायेनो व्यासो नारदश्च महातपाः ।
जामदग्न्यश्च रामो नः कथामकथयत्पुरा ॥ ५-६१-४ (३४१३२)
नैव मानुषवद्देवाः प्रवर्तन्ते कदाचन ।
कामात्क्रोधात्तथा लोभाद्द्वेषाच्च भरतर्षभ ॥ ५-६१-५ (३४१३३)
यदा ह्यग्निश्च वायुश्च धर्म इन्द्रोऽश्विनावपि ।
कामयोगात्प्रवर्तेरन्न पार्था दुःखमाप्नुयुः ॥ ५-६१-६ (३४१३४)
तस्मान्न भवता चिन्ता कार्यैषा स्यात्कथंचन ।
दैवेष्वपेक्षका ह्येते शश्वद्भावेषु भारत ॥ ५-६१-७ (३४१३५)
अथ चेत्कामसंयोगाद्द्वेषो लोभश्च लक्ष्यते ।
देवेषु दैवप्रामाण्यान्नैषां तद्विक्रमिष्यति ॥ ५-६१-८ (३४१३६)
मयाऽभिमन्त्रतः शश्वज्जातवेदाः प्रशाम्यति ।
दिधक्षुः सकलाँल्लोकान्परिक्षिप्य समन्ततः ॥ ५-६१-९ (३४१३७)
यद्वा परमकं तेजो येन युक्ता दिवौकसः ।
ममाप्यनुपमं भूयो देवेभ्यो विद्धि भारत ॥ ५-६१-१० (३४१३८)
विदीर्यमाणां वसुधां गिरीणां शिखराणि च ।
लोकस्य पश्यतो राजन्स्थापयाम्यभिमन्त्रणात् ॥ ५-६१-११ (३४१३९)
चेतनाचेतनस्यास्य जङ्गमस्थावरस्य च ।
विनाशाय समुत्पन्नमहं घोरं महास्वनम् ॥ ५-६१-१२ (३४१४०)
अश्मवर्षं च वायुं च शमयामीह नित्यशः ।
जगतः पश्यतोऽभीक्ष्णं भूतानामनुकम्पया ॥ ५-६१-१३ (३४१४१)
स्तम्भितास्वप्सु गच्छन्ति मया रथपदातयः ।
देवासुराणां भावानामहमेकः प्रवर्तिता ॥ ५-६१-१४ (३४१४२)
अक्षौहिणीभिर्यान्देशान्यामि कार्येण केनचित् ।
तत्रापो मे प्रवर्तन्ते यत्र यत्राभिकामये ॥ ५-६१-१५ (३४१४३)
भयानकानि विषये व्यालादीनि न सन्ति मे ।
मन्त्रगुप्तानि भूतानि न हिंसन्ति यंकराः ॥ ५-६१-१६ (३४१४४)
निकामवर्षी पर्जन्यो राजन्विषयवासिनाम् ।
धर्मिष्ठाश्च प्रजाः सर्वा ईतयश्च न सन्ति मे ॥ ५-६१-१७ (३४१४५)
अश्विनावथ वाय्वग्नी मरुद्भिः सह वृत्रहा ।
धर्मश्चैव मया द्विष्टान्नोत्सहन्तेऽभिरक्षितुम् ॥ ५-६१-१८ (३४१४६)

यदि ह्येते समर्थाः स्युर्मद्द्विषस्त्रातुमञ्जसा ।
न स्म त्रयोदश समाः पार्था दुःखभवाप्नुयुः ॥ ५-६१-१९ (३४१४७)
नैव देवा न गन्धर्वा नासुरा न च राक्षसाः ।
शक्तास्त्रातुं मया द्विष्टं सत्यमेतद्ब्रवीमि ते ॥ ५-६१-२० (३४१४८)
दयभिध्याम्यहं शश्वच्छुभं वा यदि वाऽशुभम् ।
नैतद्विपन्नपूर्वं मे मित्रेष्वरिषु चोभयोः ॥ ५-६१-२१ (३४१४९)
भविष्यतीदमिति वा यद्ब्रवीमि परन्तप ।
नान्यथा भूतपूर्वं च सत्यवागिति मां विदुः ॥ ५-६१-२२ (३४१५०)
लोकसाक्षिकमेतन्मे माहात्म्यं दिक्षु विश्रुतम् ।
आश्वासनार्थं भवतः प्रोक्तं न श्लाघया नृप ॥ ५-६१-२३ (३४१५१)
न ह्यहं श्लाघनो राजन्भूतपूर्वः कदाचन ।
असदाचरितं ह्येतद्यदात्मानं प्रशंसति ॥ ५-६१-२४ (३४१५२)
पाण्डवांश्चैव मत्स्यांश्च पाञ्चालान्केकयैः सह ।
सात्यकिं वासुदेवं च श्रोतासि विजितान्मया ॥ ५-६१-२५ (३४१५३)
सरितः सागरं प्राप्य यथा नश्यन्ति सर्वशः ।
तथैव ते विनङ्क्ष्यन्ति मामासाद्य सहान्वयाः ॥ ५-६१-२६ (३४१५४)
परा बुद्धिः परं तेजो वीर्यं च परमं मम ।
परा विद्या परो योगो मम तेभ्यो विशिष्यते ॥ ५-६१-२७ (३४१५५)
पितामहश्च द्रोणश्च कृपः शल्यः शलस्तथा ।
अस्त्रेषु यत्प्रजानन्ति सर्वं तन्मयि विद्यते ॥ ५-६१-२८ (३४१५६)
इत्युक्ते सञ्जयं भूयः पर्यपृच्छत भारत ।
ज्ञात्वा युयुत्सोः कार्याणि प्राप्तकालमरिन्दमः ॥ ॥ ५-६१-२९ (३४१५७)

इति श्रीमन्महाभारते उद्योगपर्वणि यानसन्धिपर्वणि
एकषष्टितमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-६१-३ अकामेति कामद्वेषयोरसंयोगात् । लोभद्रोहात् लोभे द्रोहकरणात्,
लोभत्यागादित्यर्थः ॥
५-६१-७ एते देवाः दैवेषु भावेषु शमदमादिषु शश्वदपेक्षका
उपक्षेमाणः नत्वासुरेषु कामक्रोधादिषु ॥
५-६१-८ कामादिमता कृतमपि निष्फलं भविष्यतीत्यर्थः ॥
५-६१-२९ अभिध्यामि चिन्तयामि ॥

उद्योगपर्व - अध्याय ०६२
॥ श्रीः ॥
५.६२. अध्यायः ६२

Mahabharata - Udyoga Parva - Chapter Topics

कर्णेन धृतराष्ट्रमनादृत्य पाण्डवहननप्रतिज्ञानम् ॥ १ ॥
तथा भीष्माधिक्षिप्तेन तेन युद्धे भीष्मशमनावधि शस्त्रन्यासं
प्रतिज्ञाय स्वभवनगमनम् ॥ २ ॥
भीष्मेण प्रत्यहं अयुतयोधवधप्रतिज्ञा ॥ ३ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-६२-० (३४१५८)
वैशम्पायन उवाच। ५-६२-०क्ष् (३५८१)
तथा तु पृच्छन्तमतीव पार्थं
वैचित्रवीर्यं तमचिन्तयित्वा ।
उवाच कर्णो धृतराष्ट्रपुत्रं
प्रहर्षयन्संसदि कौरवाणाम् ॥ ५-६२-१ (३४१५९)
मिथ्या प्रतिज्ञाय मया यदस्त्रं
रामात्कृतं ब्रह्ममयं पुरस्तात् ।
विज्ञाय तेनास्मि तदैवमुक्त-
स्ते नान्तकाले प्रतिभास्यतीति ॥ ५-६२-२ (३४१६०)
महापराधे ह्यपि यन्न तेन
महर्षिणाऽहं गुरुणा च शप्तः ।
शक्तः प्रदग्धुं ह्यपि तिग्मतेजाः
ससागरामप्यवनिं महर्षिः ॥ ५-६२-३ (३४१६१)
प्रसादितं ह्यस्य मया मनोऽभू-
च्छुश्रूषया स्वेन च पौरुषेण
तदस्ति चास्त्रं मम सावशेषं
तस्मात्समर्थोऽस्मि ममैष भारः ॥ ५-६२-४ (३४१६२)
निमेषमात्रात्तमृषेः प्रसाद-
मवाप्य पाञ्चालकरूशमत्स्यान् ।
निहत्य पार्थान्सह पुत्रपौत्रै-
र्लोकानहं शस्त्रजितान्प्रपत्स्ये ॥ ५-६२-५ (३४१६३)
पितामहस्तिष्ठतु ते समीपे
द्रोणश्च सर्वे च नरेन्द्रमुख्याः ।
ऋषिप्रसादेन बलेन गत्वा
पार्थान्हनिष्यामि ममैष भारः ॥ ५-६२-६ (३४१६४)
एवं ब्रुवन्तं तमुवाच भीष्मः

किं कत्थसे कालपरीतबुद्धे ।
न कर्ण जानासि यथा प्रधाने
हते हताः स्युर्धृतराष्ट्रपुत्राः ॥ ५-६२-७ (३४१६५)
यत्खाण्डवं दाहयता कृतं हि
कृष्णद्वितीयेन धनञ्जयेन ।
श्रुत्वैव तत्कर्म नियन्तुमात्मा
युक्तस्त्वया वै सहबान्धवेन ॥ ५-६२-८ (३४१६६)
यां चापि शक्तिं त्रिदशाधिपस्ते
ददौ महात्मा भगवान्महेन्द्रः ।
भस्मीकृतां तां समरे विशीर्णां
चक्राहतां द्रक्ष्यसि केशवेन ॥ ५-६२-९ (३४१६७)
यस्ते शरः सर्पमुखो विभाति
सदाऽग्र्यमाल्यैर्महितः प्रयत्नात् ।
स पाण्डुपुत्राभिहतः शरौघैः
सह त्वया यास्यति कर्ण नाशम् ॥ ५-६२-१० (३४१६८)
बाणस्य भौमस्य च कर्ण हन्ता
किरीटिनं रक्षति वासुदेवः ।
यस्त्वादृशानां च वरीयसां च
हन्ता रिपूणां तुमुले प्रगाढे ॥ ५-६२-११ (३४१६९)
कर्ण उवाच। ५-६२-१२क्ष् (३५८२)
असंशयं वृष्णिपतिर्यथोक्त-
स्तथा च भूयांश्च ततो महात्मा ।
अहं यदुक्तः परुषं तु किंचि-
त्पितामहस्तस्य फलं शृणोतु ॥ ५-६२-१२ (३४१७०)
न्यस्यामि शस्त्राणि न जातु सङ्ख्ये
पितामहो द्रक्ष्यति मां सभायाम् ।
त्वयि प्रशान्ते तु मम प्रभावं
द्रक्ष्यन्ति सर्वे भुवि भूमिपालाः ॥ ५-६२-१३ (३४१७१)
वैशम्पायन उवाच। ५-६२-१४क्ष् (३५८३)
इत्येवमुक्त्वा स महाधनुष्मान्
हित्वा सभां स्वं भवनं जगाम ।
भीष्मस्तु दुर्योधनमेव राजन्
मध्ये कुरूणां प्रहसन्नुवाच ॥ ५-६२-१४ (३४१७२)
सत्यप्रतिज्ञः किल सूतपुत्र-
स्तथा कस भारं विषहेत कस्मात् ।
व्यूहं प्रतिव्यूह्य शिरांसि भित्त्वा

लोकक्षयं पश्यत भीमसेनात् ॥ ५-६२-१५ (३४१७३)
आवन्त्यकालिङ्गजयद्रथेषु
चेदिध्वजे तिष्ठति बाह्लिके च ।
अहं हनिष्यामि सदा परेषां
सहस्रशश्चायुतशश्च योधान् ॥ ५-६२-१६ (३४१७४)
यदैव रामे भगवत्यनिन्द्ये
ब्रह्मब्रुवाणः कृतवांस्तदस्त्रम् ।
तदैव धर्मश्च तपश्च नष्टं
वैकर्तनस्याधमपूरुषस्य ॥ ५-६२-१७ (३४१७५)
वैशम्पायन उवाच। ५-६२-१८क्ष् (३५८४)
तथोक्तवाक्ये नृपतीन्द्र भीष्मे
निक्षिप्य शस्त्राणि गते च कर्णे ।
वैचित्रवीर्यस्य सुतोऽल्पबुद्धि-
र्दुर्योधनः शान्तनवं बभाषे ॥ ॥ ५-६२-१८ (३४१७६)

इति श्रीमन्महाभारते उद्योगपर्वणि यानसन्धिपर्वणि
द्विषष्टितमोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-६२-१ तथेति पार्थं पृच्छन्तं वैचित्रवीर्यं अचिन्तयित्वेति
संबन्धः ॥
५-६२-४ सावशेषं मम आयुरस्ति
। अतोऽन्तकालस्यानुपस्थितत्वात्तदस्त्रं ममास्तीति अहं समर्थोऽस्मि
अर्जुनं जेतुमित्यर्थः ॥
५-६२-५ प्रपत्स्ये प्रापयिष्ये ॥
५-६२-७ प्रधाने त्वयि हते सति सर्वे हताः स्युरत आत्मानं
गोपायेत्युपहासः ॥
५-६२-१७ ब्रह्मब्रुवाणः ब्राह्मणोऽहमिति वदन् ॥

उद्योगपर्व - अध्याय ०६३
॥ श्रीः ॥
५.६३. अध्यायः ६३

Mahabharata - Udyoga Parva - Chapter Topics
दुर्योधनेन भीष्माभिमतपाण्डवजयपक्षप्रतिक्षेपः ॥ १ ॥
तथा भीष्मादिनैरपेक्ष्येण कर्णादुश्शासनसङ्गतेन आत्मनैव

पाण्डवनिधनप्रतिज्ञा ॥ २ ॥
विदुरेण दमप्रशंसनम् ॥ ३ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-६३-० (३४१७७)
दुर्योधन उवाच। ५-६३-०क्ष् (३५८५)
सदृशानां मनुष्येषु सर्वेषां तुल्यजन्मनाम् ।
कथमेकान्ततस्तेषां पार्थानां मन्यसे जयम् ॥ ५-६३-१ (३४१७८)
वयं च तेऽपि तुल्या वै वीर्येण च पराक्रमैः ।
समेन वयसा चैव प्रातिभेन श्रुतेन च ॥ ५-६३-२ (३४१७९)
अस्त्रेण योधयुग्या च शीघ्रत्वे कौशले तथा ।
सर्वे स्म समजातीयाः सर्वे मानुषयोनयः ॥ ५-६३-३ (३४१८०)
पितामह विजानीषे पार्थेषु विजयं कथम् ।
नाहं भवति न द्रोणे न कृपे न च बाह्लिके ॥ ५-६३-४ (३४१८१)
अन्येषु च नरेन्द्रेषु पराक्रम्य समारभे ।
अहं वैकर्तनः कर्णो भ्राता दुःशासनश्च मे ॥ ५-६३-५ (३४१८२)
पाण्डवान्समरे पञ्च हनिष्यामः शितैः शरैः ।
ततो राजन्महायज्ञैर्विविधैर्भूरिदक्षिणैः ॥ ५-६३-६ (३४१८३)
ब्राह्मणांस्तर्पयिष्यामि गोभिरश्वैर्धनेन च ।
यदा परिकरिष्यन्ति ऐणेयानिव तन्तुना ।
अतरित्रानिव जले बाहुभिर्मामका रणे ॥ ५-६३-७ (३४१८४)
पश्यन्तस्ते परांस्तत्र रथनागसमाकुलान् ।
तदा दर्पं विमोक्ष्यन्ति पाण्डवाः स च केशवः ॥ ५-६३-८ (३४१८५)
ग्सुखान्यवाप्य सहिताः कृत्वा कर्म सुदुस्तरम् ।
विस्रब्धास्तु भविष्यामः प्राप्ते काले गतज्वराः ॥ ५-६३-९ (३४१८६)
वैशम्पायन उवाच। ५-६३-१०क्ष् (३५८६)
अथाब्रवीन्महाराजो धृतराष्ट्रः सुदुर्मनाः ।
विदुरं विदुषां श्रेष्ठं सर्वपार्थिवसंनिधौ ॥ ५-६३-१० (३४१८७)
धृतराष्ट्र उवाच। ५-६३-११क्ष् (३५८७)
मोहितो मृत्युपाशेन कालस्य वशमागतः ।
तात कर्णेन सहितः पुत्रो दुर्योधनो मम ॥' ५-६३-११ (३४१८८)
विदुर उवाच। ५-६३-१२क्ष् (३५८८)
इह निःश्रेयसं प्राहुर्वृद्धा निश्चितदर्शिनः ।
ब्राह्मणस्य विशेषेण दमो धर्मः सनातनः ॥ ५-६३-१२ (३४१८९)
तस्य दानं क्षमा सिद्धिर्यथावदुपपद्यते ।

दमो दानं तपो ज्ञानमधीतं चानुवर्तते ॥ ५-६३-१३ (३४१९०)
दमस्तेजो वर्धयति पवित्रं दम उत्तमम् ।
विपाप्मा वृद्धतेजास्तु पुरुषो विन्दते महत् ॥ ५-६३-१४ (३४१९१)
क्रव्याङ्नय इव भूतानामदान्तेभ्यः सदा भयम् ।
येषां च प्रतिषेधार्थं क्षत्रं सृष्टं स्वयंभुवा ॥ ५-६३-१५ (३४१९२)
आश्रमेषु चतुर्ष्वाहुर्दममेवोत्तमं व्रतम् ।
तस्य लिङ्गं प्रवक्ष्यामि येषां समुदयो दमः ॥ ५-६३-१६ (३४१९३)
क्षमा धृतिरहिंसा च समता सत्यमार्जवम् ।
इन्द्रियाभिजयो धैर्यं मार्दवं ह्रीरचापलम् ॥ ५-६३-१७ (३४१९४)
अकार्पण्यमसंरम्भः सन्तोषं श्रद्दधानता ।
एतानि यस्य राजेन्द्र स दान्तः पुरुषः स्मृतः ॥ ५-६३-१८ (३४१९५)
कामो लोभश्च दर्पश्च मन्युर्निद्रा विकत्थनम् ।
मान ईर्ष्या च शोकश्च नैतद्दान्तो निषेवते ।
अजिह्ममशठं शुद्धमेतद्दान्तस्य लक्षणम् ॥ ५-६३-१९ (३४१९६)
अलोलुपस्तथाऽल्पेप्सुः कामानामविचिन्तिता ।
समुद्रकल्पः परुषः स दान्तः परिकीर्तितः ॥ ५-६३-२० (३४१९७)
सुवृत्तः शीलसंपन्नः प्रसन्नात्माऽत्मविद्बुधः ।
प्राप्येह लोके संमानं सुगतिं प्रेत्य गच्छति ॥ ५-६३-२१ (३४१९८)
अभयं यस्य भूतेभ्यः सर्वेषामभयं यतः ।
स वै परिणतप्रज्ञः प्रख्यातो मनुजोत्तमः ॥ ५-६३-२२ (३४१९९)
सर्वभूतहितो मैत्रस्तस्मान्नोद्विजते जनः ।
समुद्र इव गम्भीरः प्रज्ञातृप्तः प्रशाम्यति ॥ ५-६३-२३ (३४२००)
कर्मणाऽचरितं पूर्वं सद्भिराचरितं च यत् ।
तदेवास्थाय मोदन्ते दान्ताः शमपरायणाः ॥ ५-६३-२४ (३४२०१)
नैष्कर्म्यं वा समास्थाय ज्ञानतृप्तो जितेन्द्रियः ।
कालाकाङ्क्षी चरँल्लोके ब्रह्मभूयाय कल्पते ॥ ५-६३-२५ (३४२०२)
शकुनीनामिवाकाशे पदं नैवोपलभ्यते ।
एवं प्रज्ञानतृप्तस्य मुनेर्वर्त्म न दृश्यते ॥ ५-६३-२६ (३४२०३)
उत्सृज्यैव गृहान्यस्तु मोक्षमेवाभिमन्यते ।
लोकास्तेजोमयास्तस्य कल्पन्ते शाश्वता दिवि ॥ ॥ ५-६३-२७ (३४२०४)

इति श्रीमन्महाभारते उद्योगपर्वणि यानसन्धिपर्वणि
त्रिषष्टितमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-६३-२ प्रातिभेन समयस्फूर्त्या ॥

५-६३-३ योधयुग्या शूरसमृद्ध्या ॥
५-६३-७ तरित्रा नौरक्षकाः कर्णधारादयः तद्रहितान् तद्वत् मामकास्तान्
रणे बाहुभ्यां परिहरिष्यन्ति ॥
५-६३-१६ समुदयः उदयहेतु ॥

उद्योगपर्व - अध्याय ०६४
॥ श्रीः ॥
५.६४. अध्यायः ६४

Mahabharata - Udyoga Parva - Chapter Topics
विदुरेण शकुनिदृष्टान्तेन ज्ञातिभिर्विरोधस्यानर्थहेतुत्वकथनम् ॥ १ ॥
तथा किरातदृष्टान्तप्रदर्शनेन अत्याशाया अनर्थहेतुताकथनम् ॥ २ ॥
तथा युद्धे जयपराजययोरव्यवस्थितत्वाभिधानम् ॥ ३ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-६४-० (३४२०५)
विदुर उवाच। ५-६४-०क्ष् (३५८९)
शकुनीनामिहार्थाय पाशं भूमावयोजयत् ।
कश्चिच्छाकुनिकस्तात पूर्वेषामिति शुश्रुम् ॥ ५-६४-१ (३४२०६)
तस्मिंस्तौ शकुनौ बद्धौ युगपत्सहचारिणौ ।
तावुपादाय तं पाशं जग्मतुः खचरावुभौ ॥ ५-६४-२ (३४२०७)
तौ विहायसमाक्रान्तौ दृष्ट्वा शाकुनिकस्तदा ।
अन्वधावदनिर्विण्णो येन येन स्म गच्छतः ॥ ५-६४-३ (३४२०८)
तथा तमनुधावन्तमृगयुं शकुनार्थिनम् ।
आश्रमस्थो मुनिः कश्चिद्ददर्शाथ कृताह्निकः ॥ ५-६४-४ (३४२०९)
तावन्तरिक्षगौ शीघ्रमनुयान्तं महीचरम् ।
श्लोकेनानेन कौरव्य पप्च्छ स मुनिस्तदा ॥ ५-६४-५ (३४२१०)
विचित्रमिदमाश्चर्यं मृगहन्प्रतिभाति मे ।
प्लवमानौ हि खचरौ पदातिरनुधावसि ॥ ५-६४-६ (३४२११)
शाकुनिक उवाच। ५-६४-७क्ष् (३५९०)
पाशमेकमुभावेतौ सहितौ हरतो मम ।
यत्र वै विवदिष्येते तत्र मे वशमेष्यतः ॥ ५-६४-७ (३४२१२)
विदुर उवाच। ५-६४-८क्ष् (३५९१)
तौ विवादमनुप्राप्तौ शकुनौ मृत्युसन्धितौ ।
विगृह्य च सुदुर्बुद्धी पृथिव्यां संनिपेततुः ॥ ५-६४-८ (३४२१३)

तौ युध्यमानौ संरब्धौ मृत्युपाशवशानुगौ ।
उपसृत्य प्रमत्तौ तौ जग्राह मृगहा तदा ॥ ५-६४-९ (३४२१४)
एवं ये ज्ञातयोऽर्थेषु मिथो गच्छन्ति विग्रहम् ।
ते मृत्युवशमायान्ति शकुनाविव विग्रहात् ॥ ५-६४-१० (३४२१५)
संभोजनं संकथनं संप्रश्नोऽथ समागमः ।
एतानि ज्ञातिकार्याणि न विरोधः कदाचन ॥ ५-६४-११ (३४२१६)
ये स्म काले सुमनसः सर्वे वृद्धानुपासते ।
सिंहगुप्तमिवारण्यमप्रधृष्या भवन्ति ते ॥ ५-६४-१२ (३४२१७)
येऽर्थं सन्ततमासाद्य दीना इव समासते ।
श्रियं ते संप्रयच्छन्ति द्विषद्भ्यो भरतर्षभ ॥ ५-६४-१३ (३४२१८)
धूमायन्ते व्यपेतानि ज्वलन्ति सहितानि च ।
धृतराष्ट्रोल्मुकानीव ज्ञातयो भरतर्षभ ॥ ५-६४-१४ (३४२१९)
इदमन्यत्प्रवक्ष्यामि यथा दृष्टं गिरौ मया ।
श्रुत्वा तदपि कौरव्य यथा श्रेयस्तथा कुरु ॥ ५-६४-१५ (३४२२०)
वयं किरातैः सहिता गच्छामो गिरिमुत्तरम् ।
ब्राह्मणैर्देवकल्पैश्च विद्याजम्भकवार्तिकैः ॥ ५-६४-१६ (३४२२१)
कुञ्चभूतं गिरिं सर्वमभितो गन्धमादनम् ।
दीप्यमानौषधिगणं सिद्धगन्धर्वसेवितम् ॥ ५-६४-१७ (३४२२२)
तत्रापश्याम वै सर्वे मधु पीतकमाक्षिकम् ।
मरुप्रपाते विषमे निविष्टं कुम्भसंमितम् ॥ ५-६४-१८ (३४२२३)
आशीविषै रक्ष्यमाणं कुबेरदयितं भृशम् ।
यत्प्राप्य पुरुषो मर्त्योऽप्यमरत्वं नियच्छति ॥ ५-६४-१९ (३४२२४)
अचक्षुर्लभते चक्षुर्वृद्धो भवति वै युवा ।
इति ते कथयन्तिस्म ब्राह्मणा जम्भसाधकाः ॥ ५-६४-२० (३४२२५)
ततः किरातास्तद्दृष्ट्वा प्रार्थयन्तो महीपते ।
विनेशुर्विषमे तस्मिन्ससर्पे गिरिगह्वरे ॥ ५-६४-२१ (३४२२६)
तथैव तव पुत्रोऽयं पृथिवीमेक इच्छति ।
मधु पश्यति संमोहात्प्रपातं नानुपश्यति ॥ ५-६४-२२ (३४२२७)
दुर्योधनो योद्धुमनाः समरे सव्यसाचिना ।
न च पश्यामि तेजोस्य विक्रमं वा तथाविधम् ॥ ५-६४-२३ (३४२२८)
एकेन रथमास्थाय पृथिवी येन निर्जिता ।
भीष्मद्रोणप्रभृतयः सन्त्रस्ताः साधुयायिनः ॥ ५-६४-२४ (३४२२९)
विराटनगरे भग्नाः किं तत्र तव दृश्यताम् ।
प्रतीक्षमाणो यो वीरः क्षमते वीक्षितं तव ॥ ५-६४-२५ (३४२३०)
द्रुपदो मत्स्यराजश्च सङ्क्रुद्धश्च धनञ्जयः ।
न शेषयेयुः समरे वायुयुक्ता इवाग्नयः ॥ ५-६४-२६ (३४२३१)

अङ्के कुरुष्व राजानं धृतराष्ट्र युधिष्ठिरम् ।
युध्यतोर्हि द्वयोर्युद्धे नैकान्तेन भवेज्जयः ॥ ॥ ५-६४-२७ (३४२३२)

इति श्रीमन्महाभारते उद्योगपर्वणि यानसन्धिपर्वणि
चतुःषष्टितमोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-६४-१६ विद्याजम्भकवार्तिकाः । विद्या मन्त्रयन्त्रादिरूपा। जम्भक
औषधसाधनानि तद्वार्तांप्रियाः ॥
५-६४-१७ कुञ्जभूतं सर्वतो लताभिः परिवृतम् ॥

उद्योगपर्व - अध्याय ०६५
॥ श्रीः ॥
५.६५. अध्यायः ६५

Mahabharata - Udyoga Parva - Chapter Topics
धृतराष्ट्रेण दुर्योधनंप्रति अर्जुनस्य
श्रीकृष्णपरमप्रेमास्पदतया दुर्जयत्वभिधानपूर्वकं पाण्डवैः
सह सन्धिविधानम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-६५-० (३४२३३)
धृतराष्ट्र उवाच। ५-६५-०क्ष् (३५१२)
दुर्योधन विजानीहि यत्त्वां वक्ष्यामि पुत्रक ।
उत्पथं मन्यसे मार्गमनभिज्ञ इवाध्वगः ॥ ५-६५-१ (३४२३४)
पञ्चानां पाण्डुपुत्राणां यत्तेजः प्रजिहीर्षसि ।
पञ्चानामिव भूतानां महतां लोकधारिणाम् ॥ ५-६५-२ (३४२३५)
युधिष्ठिरं हि कौन्तेयं परं धर्ममिहास्थितम् ।
परां गतिमसंप्रेत्य न त्वं जेतुमिहार्हसि ॥ ५-६५-३ (३४२३६)
भीमसेनं च कौन्तेयं यस्य नास्ति समो बले ।
रणान्तकं तर्जयसे महावातमिव द्रुमः ॥ ५-६५-४ (३४२३७)
सर्वशस्त्रभृतां श्रेष्ठं मेरुं सिखरिणामिव ।
युधि गाण्डिवधन्वानं को नु युध्येत बुद्धिमान् ॥ ५-६५-५ (३४२३८)
धृष्टद्युम्नश्च पाञ्चाल्यः कमिवाद्य न शातयेत् ।
शत्रुमध्ये शरान्मुञ्चन्देवराडशनीमिव ॥ ५-६५-६ (३४२३९)
सात्यकिश्चापि दुर्धर्षः संमतोऽन्धकवृष्णिषु ।

ध्वंसयिष्यति ते सेनां पाण्डवेयहिते रतः ॥ ५-६५-७ (३४२४०)
यः पुनः प्रतिमानेन त्रील्लोकानतिरिच्यते ।
तं कृष्णं पुण्डरीकाक्षं को नु युद्ध्येत बुद्धिमान् ॥ ५-६५-८ (३४२४१)
एकतो ह्यस्य दाराश्च ज्ञातयश्च सबान्धवाः ।
आत्मा च पृथिवी चेयमेकतश्च धनञ्जयः ॥ ५-६५-९ (३४२४२)
वासुदेवोऽपि दुर्धर्षो यतात्मा यत्र पाण्डवः ।
अविषह्यं पृथिव्यापि तद्बलं यत्र केशवः ॥ ५-६५-१० (३४२४३)
तिष्ठ तात सतां वाक्ये सुहृदामर्थवादिनाम् ।
वृद्धं शान्तनवं भीष्मं तितिक्षस्व पितामहम् ॥ ५-६५-११ (३४२४४)
मां च ब्रुवाणं शुश्रूष कुरूणामर्थदर्शिनम् ।
द्रोणं कृपं विकर्णं च महाराजं च बाह्लिकम् ॥ ५-६५-१२ (३४२४५)
एते ह्यपि यतैवाहं मन्तुमर्हसि तांस्तथा ।
सर्वे धर्मविदो ह्येते तुल्यस्नेहाश्च भारत ॥ ५-६५-१३ (३४२४६)
यत्तद्विराटनगरे सह भ्रातृभिरग्रतः ।
उत्सृज्य गाः सुसन्त्रस्तं बलं ते समशीर्यत ॥ ५-६५-१४ (३४२४७)
यच्चैव नगरे तस्मिञ्श्रूयते महदद्भुतम् ।
एकस्य च बहूनां च पर्याप्तं तन्निदर्शनम् ॥ ५-६५-१५ (३४२४८)
अर्जुनस्तत्तथाकार्षीत्किं पुनः सर्व एव ते ।
स भ्रातॄनभिजानीहि वृत्त्या तं प्रतिपादय ॥ ॥ ५-६५-१६ (३४२४९)

इति श्रीमन्महाभारते उद्योगपर्वणि यानसन्धिपर्वणि
पञ्चषष्टितमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-६५-१ उत्पथं अमार्गमेव मार्गं त्वन्यसे ॥
५-६५-६ न शातयेत् न छिन्द्यात् ॥
५-६५-८ प्रतिमानेन तुल्यत्वेन ॥
५-६५-११ भीष्मं तितिक्षस्य तद्वाक्यं गृहाणेत्यर्थः ॥
५-६५-१६ वृत्त्या राज्यार्धदानेन प्रतिपादय संभावय ॥

उद्योगपर्व - अध्याय ०६६
॥ श्रीः ॥
५.६६. अध्यायः ६६

Mahabharata - Udyoga Parva - Chapter Topics
दुर्योधनेन धृतराष्ट्रवत्तनानभिनन्दने राज्ञां निर्गमनम् ॥ १ ॥
धृतराष्ट्रेण स्वपरसेनयोः सारासारकथनचोदितेन सञ्जयेन

व्यासगान्धारीसन्निधौ कथनकथनम् ॥ २ । श्रीव्यासेन सञ्जयंप्रति
धृतराष्ट्रप्रश्नस्योत्तरदानाभ्यनुज्ञानम् ॥ ३ ।

५-६६-० (३४२५०)
वैशंपायान उवाच। ५-६६-०क्ष् (३५९३)
दुर्योधने धार्तराष्ट्रे तद्वचो नाभिनन्दति ।
तूष्णींभूतेषु सर्वेषु समुत्तस्थुर्नरर्षभाः ॥ ५-६६-१ (३४२५१)
उत्थितेषु महाराज पृथिव्यां सर्वराजसु ।
रहिते सञ्जयं राजा परिप्रष्टुं प्रचक्रमे ॥ ५-६६-२ (३४२५२)
आशंसमानो विजयं तेषां पुत्रवशानुगः ।
आत्मनश्च परेषां च पाण्डवानां च निश्चयम् ॥ ५-६६-३ (३४२५३)
धृतराष्ट्र उवाच। ५-६६-४क्ष् (३५९४)
गावल्गणे ब्रूहि नः सारफल्गु
स्वेसनायं यावदिहास्ति किंचित् ।
त्वं पाण्डवानां निपुणं वेत्थ सर्वं
किमेषां ज्यायः किमु तेषां कनीयः ॥ ५-६६-४ (३४२५४)
त्वमेतयोः सारवित्सर्वदर्शी
धर्मार्थयोर्निपुणो निश्चयज्ञः ।
स मे पृष्टः सञ्जय ब्रूहि सर्वं
युध्यमानाः कतरेऽस्मिन्न सन्ति ॥ ५-६६-५ (३४२५५)
सञ्जय उवाच। ५-६६-६क्ष् (३५९५)
न त्वां ब्रूयां रहिते जातु किंचि-
दसूया हि त्वां प्रविशेत राजन् ।
आनयस्व पितरं महाव्रतं
गान्धारीं च महिषीमाजमीढ ॥ ५-६६-६ (३४२५६)
तो तेऽसूयां विनयेतां नरेन्द्र
धर्मज्ञौ तौ निपुणौ निश्चयज्ञौ ।
तयोस्तु त्वां सन्निधौ तद्वदेयं
कृत्स्नं मतं केशवपार्थयोर्यत् ॥ ५-६६-७ (३४२५७)
वैशम्पायन उवाच। ५-६६-८क्ष् (३५९६)
इत्युक्तेन च गान्धारी व्यासश्चात्राजगामह ।
आनीतौ विदुरेणेह सभां शीघ्रं प्रवेशितौ ॥ ५-६६-८ (३४२५८)
ततस्तन्मतमाज्ञाय सञ्जयस्यात्मजस्य च ।
अभ्युपेत्य महाप्राज्ञः कृष्णद्वैपायनोऽब्रवीत् ॥ ५-६६-९ (३४२५९)
व्यास उवाच। ५-६६-१०क्ष् (३५९७)

संपृच्छते धृतराष्ट्र्य सञ्जय
आचक्ष्व सर्वं यावदेषोऽनुयुङ्क्ते ।
सर्वं यावद्वेत्थ तस्मिन्यथाव-
द्याथातथ्यं वासुदेवेऽर्जुने च ॥ ॥ ५-६६-१० (३४२६०)

इति श्रीमन्महाभारतो उद्योगपर्वणि यानसन्धिपर्वणि
षट्षष्टितमोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-६६-३ परेषां तटस्थानाम् ॥
५-६६-५ युध्यमाना न सन्ति उदासीना इत्यर्थः ॥
५-६६-६ पितरं व्यासम् ॥

उद्योगपर्व - अध्याय ०६७
॥ श्रीः ॥
५.६७. अध्यायः ६७

Mahabharata - Udyoga Parva - Chapter Topics
सञ्जयेन धृतराष्ट्रंप्रति सारभूतात्सर्वस्मादपि श्रीकृष्णस्य
सारतरत्वकथनम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-६७-० (३४२६१)
सञ्जय उवाच। ५-६७-०क्ष् (३५१८)
अर्जुनो वासुदेवश्च धन्विनौ परमार्थितौ ।
कामादन्यत्र संभूतौ सर्वभावाय संमितौ ॥ ५-६७-१ (३४२६२)
व्यामान्तरं समास्थय यथामुक्तं मनस्विनः ।
चक्रं तद्वासुदेवस्य मायया वर्तते विभो ॥ ५-६७-२ (३४२६३)
सापह्नवं कौरवेषु पाण्डवानां सुसंमतम् ।
सारासारबलं ज्ञातुं तेजःपुञ्जावभासितम् ॥ ५-६७-३ (३४२६४)
नरकं शम्बरं चैव कंसं चैद्यं च माधवः ।
जितवान्घोरसङ्काशान्क्रीडन्निव महाबलः ॥ ५-६७-४ (३४२६५)
पृथिवीं चान्तरिक्षं च द्यां चैव पुरुषोत्तमः ।
मनसैव विशिष्टात्मा नयत्यात्मवशं वशी ॥ ५-६७-५ (३४२६६)
भूयो भूयो हि यद्राजन्पृच्छसे पाण्डवान्प्रति ।
सारासारबलं ज्ञातुं तत्समासेन मे शृणु ॥ ५-६७-६ (३४२६७)

एकतो वा जगत्कृत्स्नमेकतो वा जनार्दनः ।
सारतो जगतः कृत्स्नादतिरिक्तो जनार्दनः ॥ ५-६७-७ (३४२६८)
भस्म कुर्याज्जगदिदं मनसैव जनार्दनः ।
न तु कृत्स्नं जगच्छक्तं किञ्चित्कर्तुं जनार्दने ॥ ५-६७-८ (३४२६९)
यतः सत्यं यतो धर्मो यतो ह्रीरार्जवं यतः ।
ततो भवति गोविन्दो यतः कृष्णस्ततो जयः ॥ ५-६७-९ (३४२७०)
पृथिवीं चान्तरिक्षं च दिवं च पुरुषोत्तमः ।
विचेष्टयति भूतात्मा क्रीडन्निव जनार्दनः ॥ ५-६७-१० (३४२७१)
स कृत्वा पाण्डवान्सत्रं लोकं संमोहयन्निव ।
अधर्मनिरतान्मूढान्दग्धुमिच्छति ते सुतान् ॥ ५-६७-११ (३४२७२)
कालचक्रं जगच्चक्रं युगचक्रं च केशवः ।
आत्मयोगेन भगवान्परिवर्तयतेऽनिशम् ॥ ५-६७-१२ (३४२७३)
कालस्य च हि मृत्योश्च जङ्गमस्थावरस्य च ।
ईष्टे हि भगवानेकः सत्यमेतद्ब्रवीमि ते ॥ ५-६७-१३ (३४२७४)
ईशन्नपि महायोगी सर्वस्य जगतो हरिः ।
कर्माण्यारभते कर्तुं कीनाश इव दुर्बलः ॥ ५-६७-१४ (३४२७५)
तेन वञ्चयते लोकान्मायायोगेन केशवः ।
ये तमेव प्रपद्यन्ते न ते मुह्यन्ति मानवाः ॥ ॥ ५-६७-१५ (३४२७६)

इति श्रीमन्महाभारते उद्योगपर्वणि यानसन्धिपर्वणि
सप्तषष्टितमोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-६७-२ व्यामान्तरं प्रसारितयोर्हस्तयोर्यावान्विस्तारः पञ्चहस्तमितः
तावत् अन्तरं मध्यप्रमाणं यस्य तद्व्यामान्तरम् । यथामुक्तं यथा
यथारूपं यावत्प्रमाणं चिन्तितं तावत्प्रमाणं भूत्वा यत् मुक्तं
भवति। मायया दुर्लक्ष्यरूपेणेत्यर्थः ॥
५-६७-३ सापह्नवं ससंहारम् । अत एव पाण्डवानां सुसंमतम् ॥
५-६७-११ सत्रं व्याजम् । सत्रमाच्छादने यज्ञे सदादाने च कैतवे
इति विश्वः ॥
५-६७-१४ ईसन्नपि ईशानोपि । कीनाश कर्षकः ॥

उद्योगपर्व - अध्याय ०६८
॥ श्रीः ॥
५.६८. अध्यायः ६८

Mahabharata - Udyoga Parva - Chapter Topics

भगवद्वेदनसाधनं पृष्टेन सञ्जयेन धृतराष्ट्रंप्रति
तत्कथनम् ॥ १ ॥
श्रीव्यासेन धृतराष्ट्रंप्रति सञ्जयाङ्गवेदनाभ्यनुज्ञा ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-६८-० (३४२७७)
धृतराष्ट्र उवाच। ५-६८-०क्ष् (३५१९)
कथं त्वं माधवं वेत्थ सर्वलोकमहेश्वरम् ।
कथमेनं न वेदाहं तन्ममाचक्ष्व सञ्जय ॥ ५-६८-१ (३४२७८)
सञ्जय उवाच। ५-६८-२क्ष् (३६००)
श्रृणु राजन्न ते विद्या मम विद्या न हीयते ।
विद्याहीनस्तमोध्वस्तो नाभिजानाति केशवम् ॥ ५-६८-२ (३४२७९)
विद्यया तात जानामि त्रियुगं मधुसूदनम् ।
कर्तारमकृतं देवं भूतानां प्रभवाप्ययम् ॥ ५-६८-३ (३४२८०)
धृतराष्ट्र उवाच। ५-६८-४क्ष् (३६०१)
गावल्गणेऽत्र का भक्तिर्या ते नित्या जनार्दने ।
यया त्वमभिजानासि त्रियुगं मधुसूदनम् ॥ ५-६८-४ (३४२८१)
सञ्जय उवाच। ५-६८-५क्ष् (३६०२)
मायां न सेवे भद्रं ते न वृथाधर्ममाचरे ।
शुद्धभावं गतो भक्त्या शास्त्रेद्वेद्मि जनार्दनम् ॥ ५-६८-५ (३४२८२)
धृतराष्ट्र उवाच। ५-६८-६क्ष् (३६०३)
दुर्योधन हृषीकेशं प्रपद्यस्व जनार्दनम् ।
आप्तो नः सञ्जयस्तात शरणं गच्छ केशवम् ॥ ५-६८-६ (३४२८३)
दुर्योधन उवाच। ५-६८-७क्ष् (३६०४)
भगवान्देवकीपुत्रो लोकांश्चेन्निहनिष्यति ।
प्रवदन्नर्जुने सख्यं नाहं गच्छेऽद्य केशवम् ॥ ५-६८-७ (३४२८४)
धृतराष्ट्र उवाच। ५-६८-८क्ष् (३६०५)
अवाग्गान्धारि पुत्रस्ते गच्छत्येष सुदुर्मतिः ।
ईर्षुर्दुरात्मा मानी च श्रेयसां वचनातिगः ॥ ५-६८-८ (३४२८५)
गान्धार्युवाच। ५-६८-९क्ष् (३६०६)
ऐश्वर्यकाम दुष्टात्मन्वृद्धानां शासनातिग ।
ऐश्वर्यजीतिते हित्वा पितरं मां च बालिश ॥ ५-६८-९ (३४२८६)
वर्धयन्दुर्हृदां प्रीतिं मां च शोकेन वर्धयन् ।
निहतो भीमसेनेन स्मर्तासि वचनं पितुः ॥ ५-६८-१० (३४२८७)
व्यास उवाच। ५-६८-११क्ष् (३६०७)

प्रियोऽसि राजन्कृष्णस्य धृतराष्ट्र निबोध मे ।
यस्य ते सञ्जयो दूतो यस्त्वां श्रेयसि योक्ष्यते ॥ ५-६८-११ (३४२८८)
जानात्येष हृषीकेशं पुराणं यच्च वै परम् ।
शुश्रूषमाणमैकाग्र्यं मोक्ष्यते महतो भयात् ॥ ५-६८-१२ (३४२८९)
वैचित्रवीर्य पुरुषाः क्रोधहर्षसमावृताः ।
सिता बहुविधैः पाशैर्ये न तुष्टाः स्वकैर्धनैः ॥ ५-६८-१३ (३४२९०)
यमस्य वशमायान्ति काममूढाः पुनः पुनः ।
अन्धनेत्रा यथैवान्धा नीयमानाः स्वकर्मभिः ॥ ५-६८-१४ (३४२९१)
एष एकायनः पन्था येन यान्ति मनीषिणः ।
तं दृष्ट्वा मृत्युमत्येति महांस्तत्र न सज्जति ॥ ५-६८-१५ (३४२९२)
धृतराष्ट्र उवाच। ५-६८-१६क्ष् (३६०८)
अङ्ग सञ्जय मे शंस पन्थानमकुतोभयम् ।
येन गत्वा हृषीकेशं प्राप्नुयां सिद्धिमुत्तमाम् ॥ ५-६८-१६ (३४२९३)
सञ्जय उवाच। ५-६८-१७क्ष् (३६०९)
नाकृतात्मा कृतात्मानं जातु विद्याज्जनार्दनम् ।
आत्मनस्तु क्रियोपायो नान्यत्रेन्द्रियनिग्रहात् ॥ ५-६८-१७ (३४२९४)
इन्द्रियाणामुदीर्णानां कामत्यागोऽप्रमादतः ।
अप्रमादोऽविहिंसा च ज्ञानयोनिरसंशयम् ॥ ५-६८-१८ (३४२९५)
इन्द्रियाणां यमे यत्तो भव राजन्नतन्द्रितः ।
बुद्धिश्च ते मा च्युवतु नियच्छैनां यतस्ततः ॥ ५-६८-१९ (३४२९६)
एतज्ज्ञानं विदुर्विप्रा ध्रुवमिन्द्रियधारणम् ।
एतज्ज्ञानं च पन्थाश्च येन यान्ति मनीषिणः ॥ ५-६८-२० (३४२९७)
अप्राप्यः केशवो राजन्निन्द्रियैरजितैर्नृभिः ।
आगमाधिगमाद्योगाद्वशी तत्त्वे प्रसीदति ॥ ॥ ५-६८-२१ (३४२९८)

इति श्रीमन्महाभारते उद्योगपर्वणि यानसन्धिपर्वणि
अष्टषष्टितमोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-६८-४ भक्तिः आराध्यत्वेन ज्ञानं एच्च कीदृशम् ॥
५-६८-५ वृथाधर्मं भगवदर्पणं विना न चरामि । शुद्धभावं
मनसः कामक्रोधादिराहित्येन नैर्मल्यम् ॥
५-६८-१२ ऐकाग्र्यं शुश्रूषमाणं सेवमानं त्वां मोक्ष्यते मोचयिष्यति ॥
५-६८-१३ सिताः बद्धाः । पाशैः कामादिभिः ॥
५-६८-१४ अन्धनेत्रा अन्धश्चासौ नेता च तेन ॥
५-६८-१७ आत्मनः स्वस्य इन्द्रियनिग्रहादन्यत्र इन्द्रियनिग्रहंविना

क्रियायागादिरूपा उपायः प्राप्त्युपायो नास्ति ॥
५-६८-२१ योगात् चित्तवृत्तिनिरोधात् । वशी ईश्वरः। तत्त्वे
स्वयाथात्म्ये विषये। प्रसीदति ज्ञानदानेन अनुगृह्णाति ॥

उद्योगपर्व - अध्याय ०६९
॥ श्रीः ॥
५.६९. अध्यायः ६९

Mahabharata - Udyoga Parva - Chapter Topics
सञ्जयेन धृतराष्ट्रंप्रति वासुदेवादिभगवन्नामनिर्वचनम् ॥ १ ॥
तथा सन्ध्यर्थं श्रीकृष्णागमनकथनम् ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-६९-० (३४२९९)
धृतराष्ट्र उवाच। ५-६९-०क्ष् (३६१०)
भूयो मे पुण्डरीकाक्षं सञ्जयाचक्ष्व पृच्छतः ।
नामकर्मार्थवित्तात प्राप्नुयां पुरुषोत्तमम् ॥ ५-६९-१ (३४३००)
सञ्जय उवाच। ५-६९-२क्ष् (३६११)
श्रुतं मे वासुदेवस्य नामनिर्वचनं शुभम् ।
यावत्तत्राभिजानेऽहमप्रमेयो हि केशवः ॥ ५-६९-२ (३४३०१)
वसनात्सर्वभूतानां वसुत्वाद्देवयोनितः ।
वासुदेवस्ततो वेद्यो बृहत्त्वाद्विष्णुरुच्यते ॥ ५-६९-३ (३४३०२)
मौनाद्ध्यानाच्च योगाच्च विद्धि भारत माधवम् ।
सर्वतत्त्वलयाच्चैव मधुहा मधुसूदनः ॥ ५-६९-४ (३४३०३)
कृषिर्भूवाचकः शब्दो गश्च निर्वृतिवाचकः ।
विष्णुस्तद्भावयोगाच्च कृष्णो भवति सात्वतः ॥ ५-६९-५ (३४३०४)
पुण्डरीकं परं धाम नित्यमक्षयमव्ययम् ।
तद्भावात्पुण्डरीकाक्षो दस्युत्रासाज्जानार्दनः ॥ ५-६९-६ (३४३०५)
यतः सत्वं न च्यवते यच्च यत्वान्न हीयते ।
सात्वतः सात्वतस्तस्मादार्षभाद्वृषभेक्षणः ॥ ५-६९-७ (३४३०६)
न जायते जनित्राऽयमजस्तस्मादनीकजित् ।
देवानां स्वप्रकाशत्वाद्महाद्दामोदरो विभुः ॥ ५-६९-८ (३४३०७)
हर्षात्सुखात्सुखैश्वर्याद्धृषीकेशत्वमश्नुते ।
बाहुभ्यां रोदसी बिभ्रन्महाबाहुरिति स्मृतः ॥ ५-६९-९ (३४३०८)
अधो न क्षीयते जातु यस्मात्तस्मादधोक्षजः ।

नराणामयनाच्चापि ततो नारायणः स्मृतः ॥ ५-६९-१० (३४३०९)
पूरणात्सदनाच्चापि ततोऽसौपुरुषोत्तमः ।
असतश्च सतश्चैव सर्वस्य प्रभवाप्ययात् ।
सर्वस्य च सदा ज्ञानात्सर्वमेतं प्रचक्षते ॥ ५-६९-११ (३४३१०)
सत्ये प्रतिष्ठितः कृष्णः सत्यमत्र प्रतिष्ठितम् ।
सत्यात्सत्यं तु गोविन्दस्तस्मात्सत्योपि नामतः ॥ ५-६९-१२ (३४३११)
विष्णुर्विक्रमणाद्देवो जयनाज्जिष्णुरुच्यते ।
शाश्वतत्वादनन्तश्च गोविन्दो वेदनाङ्गवाम् ॥ ५-६९-१३ (३४३१२)
अतत्त्वं कुरुते तत्त्वं तेन मोहयते प्रजाः ॥ ५-६९-१४ (३४३१३)
एवंविधो धर्मनित्यो भगवान्मधुसूदनः ।
आगन्ता हि महाबाहुरानृशंस्यार्थमच्युतः ॥ ॥ ५-६९-१५ (३४३१४)

इति श्रीमन्महाभारते उद्योगपर्वणि तयानसन्धिपर्वणि
ऊनसप्ततितमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-६९-२ यावदभिजाने तावत् । वदामीति शेषः । वस्तुतस्तु सः अप्रमेयः ॥
५-६९-३ वसत्यस्मिन् भुवनमिति वासुः दीर्घश्छान्दसः । स चासौ
देवश्च वासुदेवः । बृहत्त्वाद्व्यापकत्वात् वेवेष्टि व्याप्नोति सर्वमिति
विष्णुः । वृषत्वादिष्णुरपच्यते इति खो पाठः । वृषत्वात्
अभीष्टसेन्नकत्वात् इति रत्नगर्भः ॥
५-६९-४ मौनं मुनेः कर्म मननं । मौनं च ध्यानं च ताभ्यां
विषयतया युक्तो माधवः । सर्वतत्तवानि पृथिव्यादयो विषयाः । तेच
सुखसाधनतया मधुशब्देनोक्ताः । तेषां लयात् संहर्तृत्वात् मधुहा
मधुसूदनश्चेति नामद्वयम् ॥
५-६९-५ कृषिरितिशब्दो भूवाचकः कृष्यते सस्यार्थमिति व्युत्पत्त्या
। भूमिलोकस्थाप्राणिसुखस्य यो भाव उत्पादनं तत्कर्तृत्वात्कृष्णो
भवति ॥
५-६९-६ पुण्डरीकं हृदयकमलं धाम वासस्थानं तत्र
सन्नपि अक्षो न क्षीयते हन्यते वेति पुण्डरीकाक्षः
। तथाच श्रुतिर्नाच जरयैतज्जीर्यति न
वधेनास्य हन्यत इति हृत्पद्म । दोषैर्जरानाशादिभिः
परमात्मनोऽस्पृष्टत्वमाह । दस्युत्रासात् जनं दस्युजनं अर्दयति
पीडयतीति जनार्दन इत्यर्थः ॥
५-६९-७ सत्त्वं बलं । आर्षं वेदस्तेन भातीत्यार्षभ औपनिषदः
पुरुषः । उपनिषद्वेद्यत्वाद्योगात् वृषभेक्षणः । तथाचायं योगः

वृषं धर्मं भासयतीति वृषभो वेदस्तदेव ईक्षणं चक्षुरिव
ज्ञापकं यस्य सः वृषभेक्षण इति ॥
५-६९-८ जनित्रा पित्रा न जायत इत्यजः । अनीकजित्सेनाजित्
कृष्णः। देवानां स्वप्रकाशत्वात्। ऋगताविंत्यस्मादुत्पूर्वात् अप्। उत्
उत्कर्षेण ऋच्छति प्रकाशत इति उदरः। दमोस्यास्तीति दामः
दामश्चासावुदरश्चेति दामोदरः ॥
५-६९-९ हर्षात् हृषिः सुखात्कं सुखैश्वर्यादीशः
। महीति च्छान्दसं रोदस्योर्नाम। मह्यौ बाह्योर्यस्य स
तथा। ईकाराकारश्छान्दसः ॥
५-६९-१० जातुशब्दार्थे जकारः ॥
५-६९-११ पुरयतीति पुरुः । सीदन्त्यस्मिन्निति सः तस्मात्पुरुषः
स चासावुत्तमश्च पुरुषोत्तमः । असतःक कारणस्म
सतः कार्यस्य प्रभवाप्ययात् उत्पत्तिप्रलयस्थानचात्
सर्वशब्दस्तत्प्रभवाप्ययहेतावुपचारात्प्रवर्तते ॥
५-६९-१२ सत्ये धर्मे ॥
५-६९-१३ विशेषेण क्रमणात् व्यापनान् । एवं जयतीति जिष्णुः
शाश्वतत्वात् शश्वङ्गवत्वात्। गवामिन्द्रियाणां वेदनात् प्रकाशात्
गोविन्दः ॥
५-६९-१५ धर्मे नित्यं सन्निधानात् धर्मनित्यः आगन्ता आगमिष्यति
। आनृशंस्यमहिंसा कुरुपाण्डवयोः तदर्थम् ॥

उद्योगपर्व - अध्याय ०७०
॥ श्रीः ॥
५.७०. अध्यायः ७०

Mahabharata - Udyoga Parva - Chapter Topics
श्रीकृष्णागमनश्रवणहृष्टेन धृतराष्ट्रेण
चक्षुष्मत्प्रशंसनपूर्वकं श्रीकृष्णनुणानुवर्णनम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-७०-० (३४३१५)
धृतराष्ट्र उवाच। ५-७०-०क्ष् (३६१२)
चक्षुष्मतां वै स्पृहयामि सञ्जय
द्रक्ष्यन्ति ये वासुदेवं समीपे ।
विभ्राजमानं वपुषा परेण

प्रकाशयन्तं प्रदिशो दिशश्च ॥ ५-७०-१ (३४३१६)
ईरयन्तं भारतीं भारताना-
मभ्यर्चनीयां शङ्करीं सृञ्जयानाम् ।
बुभूषद्भिर्गर्हणीयामनिन्द्यां
परासूनामग्रहणीयरूपाम् ॥ ५-७०-२ (३४३१७)
समुद्यन्तं सात्वतमेकवीरं
प्रणेतारमृषभं यादवानाम् ।
निहन्तारं क्षोभणं शात्रवाणां
मुञ्चन्तं च द्विषतां वै यशांसि ॥ ५-७०-३ (३४३१८)
द्रष्टारो हि कुरवस्तं समेता
महात्मानं शब्रुहणं वरेण्यम् ।
ब्रुवन्तं वाचमनृशंसरूपां
वृष्णिश्रेष्ठं मोहयन्तं मदीयान् ॥ ५-७०-४ (३४३१९)
ऋषिं सनातनतमं विपश्चितं
वाचःसमुद्रं कलशं यतीनाम् ।
अरिष्टनेमिं गरुडं सुपर्णं
हरिं प्रजानां भुवनस्य धाम ॥ ५-७०-५ (३४३२०)
सहस्रशीर्षं पुरुषं पुराण-
मनादिमध्यान्तमनन्तकीर्तिम् ।
शुक्रस्य धातारमजं च नित्यं
परं परेषां शरणं प्रपद्ये ॥ ५-७०-६ (३४३२१)
त्रैलोक्यनिर्माणकरं जनित्रं
देवासुराणामथ नागरक्षसाम् ।
नराधिपानां विदुषां प्रधान-
मिन्द्रानुजं तं शरणं प्रपद्ये ॥ ॥ ५-७०-७ (३४३२२)

इति श्रीमन्महाभारते उद्योगपर्वणि यानसन्धिपर्वणि सप्ततितमोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-७०-१ चक्षुष्मतां भाग्याय स्पृहयामि ॥
५-७०-५ अरिष्टः अहिंसितः नेमिः पादो यस्य सः अरिष्टनेमिः ॥
५-७०-७ निर्माणं रचना । जनित्रं जनयितारम् ॥
५-७०-

उद्योगपर्व - अध्याय ०७१
॥ श्रीः ॥
५.७१. अध्यायः ७१

Mahabharata - Udyoga Parva - Chapter Topics

युधिष्ठिरेण श्रीकृष्णंप्रति सन्ध्यर्थं
हास्तिनपुरगामनप्रार्थनासूचकवचनोपन्यासः ॥ १ ॥
श्रीकृष्णेन तत्र स्वस्य गमनकथनम् ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-७१-० (३४३२३)
ग जनमेजय उवच। ५-७१-०क्ष् (३६१३)
प्रयाते सञ्जये साधौ कौरवान्प्रति वै तदा ।
किं चक्रुः पाण्डवास्तत्र मम पूर्वपितामहाः ॥ ५-७१-१ (३४३२४)
एतत्सर्वं द्विजश्रेष्ठ विस्तरं मम सत्तम ।
कथयस्व प्रयत्नेन श्रोतुमिच्छामि पण्डित ॥ ५-७१-२ (३४३२५)
वैशम्पायन उवाच। ५-७१-३क्ष् (३६१४)
सञ्जये प्रतियाते तु धर्मराजो युधिष्ठिरः ।
अर्जुनं भीमसेनं च माद्रीपुत्रौ च भारत ॥ ५-७१-३ (३४३२६)
विराटं द्रुपदं चैव केकयानां महारथान् ।
अब्रुवीदुपसङ्गम्य शङ्खचक्रगदाधरम् ।
अभियाचामहे गत्वा प्रयातुं कुरुसंसदम् ॥ ५-७१-४ (३४३२७)
यथा भीष्मेण द्रोणेन बाह्लीकेन च धीमता ।
अन्यैश्च कुरुभिः सार्धं न युध्येमहि संयुगे ॥ ५-७१-५ (३४३२८)
एष नः प्रथमः कल्प एतन्निश्रेय उत्तमम् ।
एवमुक्ताः सुमनसस्तेऽभिजग्मुर्जनार्दनम् ॥ ५-७१-६ (३४३२९)
पाण्डवैः सह राजानो मरुत्वन्त इवामराः ।
तदा च दुःसहाः सर्वे सदस्यास्ते नरर्षभाः ॥ ५-७१-७ (३४३३०)
जनार्दनं समासाद्य कुन्तीपुत्रो युधिष्ठिरः ।
अब्रवीत्परवीरघ्नं दाशार्हं पाण्डुनन्दनः ॥' ५-७१-८ (३४३३१)
अयं स कालः संप्राप्तो मित्राणां मित्रवत्सल ।
न च त्वदन्यं पश्यामि यो न आपत्सु तारयेत् ॥ ५-७१-९ (३४३३२)
त्वां हि माधवमाश्रित्य निर्भया मोघदर्पितम् ।
धार्तराष्ट्रं सहामात्यं स्वयं समनुयुङ्क्ष्महे ॥ ५-७१-१० (३४३३३)
यथा हि सर्वास्वापत्सु पासि वृष्णीनरिन्दम् ।
तथा ते पाण्डवा रक्ष्याः पाह्यस्मान्महतो भयात् ॥ ५-७१-११ (३४३३४)
श्रीभगवानुवाच। ५-७१-१२क्ष् (३६१५)
अयमस्मि महाबाहो ब्रूहि यत्ते विवक्षितम् ।

करिष्यामि हि तत्सर्वं यत्त्वं वक्ष्यसि भारत ॥ ५-७१-१२ (३४३३५)
युधिष्ठिर उवाच। ५-७१-१३क्ष् (३६१६)
श्रुतं ते धृतराष्ट्रस्य सपुत्रस्य चिकीर्षितम् ।
एतद्धि सकलं कृष्ण सञ्जयो मां यदब्रवीत् ॥ ५-७१-१४अग
मृदुपूर्वं साममिश्रं सममुग्रं च माधव ।
न कतृं न्यायमास्थाय गर्हिताश्च ततो वयम् ॥' ५-७१-१३ (३४३३६)
तन्मतं धृतराष्ट्रस्य सोऽस्यात्मा विवृतान्तरः ।
यथोक्तं दूत आचष्टे वध्यः स्यादन्यथा ब्रुवन् ॥ ५-७१-१५ (३४३३७)
अप्रदानेन राज्यस्य शान्तिमस्मासु मार्गति ।
लुब्धः पापेन मनसा चरन्नसममात्मनः ॥ ५-७१-१६ (३४३३८)
यत्तद्द्वादशवर्षाणि वनेषु ह्युषिता वयम् ।
छद्मना शरदं चैकां धृतराष्ट्रस्य शासनात् ॥ ५-७१-१७ (३४३३९)
स्थाता नः समये तस्मिन्धृतराष्ट्र इति प्रभो ।
नाहास्म समयं कृष्ण तद्धि नो ब्राह्मणा विदुः ॥ ५-७१-१८ (३४३४०)
गृद्धो राजा धृतराष्ट्रः स्वधर्मं नानुपश्यति ।
वश्यत्वात्पुत्रगृद्धित्वान्मन्दस्यान्वेति शासनं ॥ ५-७१-१९ (३४३४१)
सुयोधनमते तिष्ठन्राजाऽस्मासु जनार्दन ।
मिथ्याचरति लुब्धः संश्चरन्हि प्रियमात्मनः ॥ ५-७१-२० (३४३४२)
इतो दुःखतरं किं नु यदहं मातरं ततः ।
संविधातुं न शक्नोमि मित्राणां वा जनार्दन ॥ ५-७१-२१ (३४३४३)
काशिभिश्चेदिपाञ्चालैर्मत्स्यैश्च मधुसूदन ।
भवता चैव नाथेन पञ्च ग्रामा वृता मया ॥ ५-७१-२२ (३४३४४)
अविस्थलं वृकस्थलं माकन्दी वारणावतम् ।
अवसानं च गोविन्द कंचिदेवात्र पञ्चम् ॥ ५-७१-२३ (३४३४५)
पञ्च नस्तात दीयन्तां ग्रामा वा नगराणि वा ।
वसेम सहिता येषु मा च नो भरता नशन् ॥ ५-७१-२४ (३४३४६)
न च तानपि दुष्टात्मा धार्तराष्ट्रोऽनुमन्यते ।
स्वाम्यमात्मनि मत्वाऽसावतो दुःखतरं नु किं ॥ ५-७१-२५ (३४३४७)
कुले जातस्य वृद्धस्य परवित्तेषु गृद्ध्यतः ।
लोभः प्रज्ञानमाहन्ति प्रज्ञा हन्ति हता ह्रियं ॥ ५-७१-२६ (३४३४८)
ह्रीर्हता बाधते धर्मं धर्मो हन्ति हतः श्रियम् ।
श्रीर्हता पुरुषं हन्ति पुरुषस्याधं वधः ॥ ५-७१-२७ (३४३४९)
अधनाद्धि निवर्तन्ते ज्ञातयः सुहृदो द्विजाः ।
अपुष्पादफलाद्वृक्षाद्यथा कृष्ण पतत्रिणः ॥ ५-७१-२८ (३४३५०)
एतच्च मरणं तात उन्मत्तपतितादिव ।
ज्ञातयो विनिवर्तन्ते प्रेतसत्वादिवासवः ॥ ५-७१-२९ (३४३५१)

नातः पापीयसीं कांचिदवस्थां शम्बरोऽब्रवीत् ।
यत्र नैवाऽद्य न प्रातर्भोजनं प्रतिदृश्यते ॥ ५-७१-३० (३४३५२)
धनमाहुः परं धर्मं धने सर्वं प्रतिष्ठितम् ।
जीवन्ति धनिनो लोके मृता ये त्वधना नराः ॥ ५-७१-३१ (३४३५३)
ये धनादपकर्षन्ति नरं स्वबलमास्थिताः ।
ते धर्ममर्थं कामं च प्रमथ्नन्ति नरं च तम् ॥ ५-७१-३२ (३४३५४)
एतामवस्थां प्राप्यैके मरणं वव्रिरे जनाः ।
ग्रामायैके वनायैके नाशायैके प्रवव्रजुः ॥ ५-७१-३३ (३४३५५)
उन्मादमेके पुष्यन्ति यान्त्यन्ये द्विषतां वशम् ।
दास्यमेके च गच्छन्ति परेषामर्थहेतुना ॥ ५-७१-३४ (३४३५६)
आपदेवास्य मरणात्पुरुषस्य गरीयसी ।
श्रियो विनाशस्तद्ध्रुयस्य निमित्तं धर्मकामयोः ॥ ५-७१-३५ (३४३५७)
यदस्य धर्म्यं मरणं शाश्वतं लोकवर्त्मवत् ।
समन्तात्सर्वभूतानां न तदत्येति कश्चन ॥ ५-७१-३६ (३४३५८)
न तथा बाध्यते कृष्ण प्रकृत्या निर्धनो जनः ।
यथा भद्रां श्रियं प्राप्य तया हीनः सुखैधितः ॥ ५-७१-३७ (३४३५९)
स तदाऽऽत्मापराधेन संप्राप्तो व्यसनं महत् ।
सेन्द्रान्गर्हयते देवान्नात्मानं च कथंचन ॥ ५-७१-३८ (३४३६०)
न चास्य सर्वशास्त्राणि प्रभवन्ति निबर्हणे ।
सोऽभिक्रुध्याति भृत्यानां सुहृदश्चाभ्यसूयति ॥ ५-७१-३९ (३४३६१)
तत्तदा मन्युरेवैति स भूयः संप्रमुह्यति ।
स मोहवशमापन्नः क्रूरं कर्म निषेवते ॥ ५-७१-४० (३४३६२)
पापकर्मतया चैव सङ्करं तेन पुष्यति ।
सङ्करो नरकायैव सा काष्ठा पापकर्मणाम् ॥ ५-७१-४१ (३४३६३)
न चेत्प्रबुध्यते कृष्ण नरकायैव गच्छति ।
तस्य प्रबोधः प्रज्ञैव प्रज्ञाचक्षुस्तरिष्यति ॥ ५-७१-४२ (३४३६४)
प्रज्ञालाभे हि पुरुषः शास्त्राण्येवान्ववेक्षते ।
शास्त्रनिष्ठः पुनर्धर्मं तस्य ह्रीरङ्गमुत्तमम् ॥ ५-७१-४३ (३४३६५)
ह्रीमान्हि पापं प्रद्वेष्टि तस्य श्रीरभिवर्धते ।
श्रीमान्स यावद्भवति तावद्भवति पूरुषः ॥ ५-७१-४४ (३४३६६)
धर्मनित्यः प्रशान्तात्मा कार्ययोगवहः सदा ।
नाधर्मे कुरुते बुद्धिं न च पापे प्रवर्तते ॥ ५-७१-४५ (३४३६७)
अह्रीको वा विमूढो वा नैव स्त्री न पुनः पुमान् ।
नास्याधिकारो धर्मेऽस्ति यथा शूद्रस्तथैव सः ॥ ५-७१-४६ (३४३६८)
ह्रीमानवति देवांश्च पितॄनात्मानमेव च ।
तेनामृतत्वं व्रजति सा काष्ठा पुण्यकर्मणाम् ॥ ५-७१-४७ (३४३६९)

तदिदं मयि ते दृष्टं प्रत्यक्षं मधुसूदन ।
यथा राज्यात्परिभ्रष्टो वसामि वसतीरिमाः ॥ ५-७१-४८ (३४३७०)
ते वयं न श्रियं हातुमलं न्यायेन केनचित् ।
अत्र नो यतमानानां वधश्चेदपि साधु तत् ॥ ५-७१-४९ (३४३७१)
तत्र नः प्रथमः कल्पो यद्वयं ते च माधव ।
प्रशान्ताः समभूताश्च श्रियं तामश्नुवीमहि ॥ ५-७१-५० (३४३७२)
तत्रैषा परमा काष्ठा रौद्रकर्मक्षयोदया ।
यद्वयं कौरवान्हत्वा तानि राष्ट्राण्यवाप्नुमः ॥ ५-७१-५१ (३४३७३)
ये पुनः स्युरसंबद्धा अनार्याः कृष्ण शत्रवः ।
तेषामप्यवधः कार्यः किंपुनर्ये स्युरीदृशाः ॥ ५-७१-५२ (३४३७४)
ज्ञातयश्चैव भूयिष्ठाः सहाया गुरवश्च नः ।
तेषां वधोऽतिपापीयान्किं नु युद्धेऽस्ति शोभनम् ॥ ५-७१-५३ (३४३७५)
पापः क्षत्रियधर्मोऽयं वयं च क्षत्रबन्धवः ।
स नः स्वधर्मोऽधर्मो वा वृत्तिरन्या विगर्हिता ॥ ५-७१-५४ (३४३७६)
शूद्रः करोति शुश्रूषां वैश्मा वै पण्यजीविकाः ।
वयं वधेन जीवामः कपालं ब्राह्मणैर्वृतम् ॥ ५-७१-५५ (३४३७७)
क्षत्रियः क्षत्रियं हन्ति मत्स्यो मत्स्येन जीवति ।
श्वा श्वानं हन्ति दाशार्ह पश्य धर्मो यथागतः ॥ ५-७१-५६ (३४३७८)
युद्धे कृष्ण कलिर्नित्यं प्राणाः सीदन्ति संयुगे ।
बलं तु नीतिमाधाय युध्ये जयपराजयौ ॥ ५-७१-५७ (३४३७९)
नात्मच्छन्देन भूतानां जीवितं मरणं तथा ।
नाप्यकाले सुखं प्राप्यं दुःखं वाऽपि यदूत्तम ॥ ५-७१-५८ (३४३८०)
एको ह्यपि बहून्हन्ति घ्नन्त्येकं बहवोऽप्युत ।
शूरं कापुरुषो हन्ति अयशस्वी यशस्विनम् ॥ ५-७१-५९ (३४३८१)
जयो नैवोभयोर्दृष्टो नोभयोश्च पराजयः ।
तथैवापचयो दृष्टो व्यपयाने क्षयव्ययौ ॥ ५-७१-६० (३४३८२)
सर्वथा वृजिनं युद्धं को ध्रुव प्रतिहन्यते ।
हतस्य च हृषीकेश समौ जयपराजयौ ॥ ५-७१-६१ (३४३८३)
पराजयश्च मरणान्मन्ये नैव विशिष्यते ।
यस्य स्याद्विजयः कृष्ण तस्यप्यपचयो ध्रुवम् ॥ ५-७१-६२ (३४३८४)
अन्ततो दयितं ध्रुन्ति केचिदप्यपरे जनाः ।
तस्याङ्गबलहीनस्य पुत्रान्भ्रातॄनपश्यतः ॥ ५-७१-६३ (३४३८५)
निर्वेदो जीविते कृष्ण सर्वतश्चोपजायते ।
ये ह्येव धीरा ह्रीमन्त आर्याः करुणवेदिनः ॥ ५-७१-६४ (३४३८६)
त एव युद्धे हन्यन्ते यवीयान्मुच्यते जनः ।
हत्वाऽप्यनुशयो नित्यं परानपि जनार्दन ॥ ५-७१-६५ (३४३८७)

अनुबद्धश्च पापोऽत्र शेषश्चाप्यवशिष्यते ।
शेषो हि बलमासाद्य न शेषमनुशेषयेत् ॥ ५-७१-६६ (३४३८८)
सर्वोच्छेदे च यतते वैरस्यान्तविधित्सया ।
जयो वैरं प्रसृजति दुःखमास्ते पराजितः ॥ ५-७१-६७ (३४३८९)
सुखं प्रशान्तः स्वपिति हित्वा जयपराजयौ ।
जातवैरश्च पुरुषो दुःखं स्वपिति नित्यदा ॥ ५-७१-६८ (३४३९०)
अनिर्वृत्तेन मनसा ससर्प इव वेश्मनि ।
उत्सादयति यः सर्वं यशसा स विमुच्यते ॥ ५-७१-६९ (३४३९१)
अकीर्तिं सर्वभूतेषु शाश्वतीं स नियच्छति ।
न हि वैराणि शाम्यन्ति दीर्घकालधृतान्यपि ॥ ५-७१-७० (३४३९२)
आख्यातारश्च विद्यन्ते पुमांश्चेद्विद्यते कुले ।
न चापि वैरं वैरेण केशव व्युपशाम्यति ॥ ५-७१-७१ (३४३९३)
हविषाऽग्निर्यथा कृष्ण भूय एवाभिवर्धते ।
अतोऽन्यथा नास्ति शान्तिर्नित्यमन्तरमन्ततः ॥ ५-७१-७२ (३४३९४)
अन्तरं लिप्समानानामयं दोषो निरन्तरः ।
पौरुषे यो हि बलवानाधिर्हृदयबाधनः ।
तस्य त्यागेन वा शान्तिर्मरणेनापि वा भवेत् ॥ ५-७१-७३ (३४३९५)
अथवा मूलघातेन द्विषतां मधुसूदन ।
फलनिर्वृत्तिरिद्धा स्यात्तन्नृशंसतरं भवेत् ॥ ५-७१-७४ (३४३९६)
या तु त्यागेन शान्तिः स्यात्तदृते वध एव सः ।
संशयाच्च समुच्छेदाद्द्विषतामात्मनस्तथा ॥ ५-७१-७५ (३४३९७)
न च त्यक्तुं तदिच्छामो न चेच्छामः कुलक्षयम् ।
अत्र या प्रणिपातेन शान्तिः सैव गरीयसी ॥ ५-७१-७६ (३४३९८)
सर्वथा यतमानानामयुद्धमभिकाङ्क्षताम् ।
सान्त्वे प्रतिहते युद्धं प्रसिद्धं नापराक्रमः ॥ ५-७१-७७ (३४३९९)
प्रतिघातेन सान्त्वस्य दारुणं संप्रवर्तते ।
तच्छ्वनामिव संपाते पण्डितैरुपलक्षितम् ॥ ५-७१-७८ (३४४००)
लाङ्गूलचालनं क्ष्वेडा प्रतिवाचो विवर्तनम् ।
दन्तदर्शनमारावस्ततो युद्धं प्रवर्तते ॥ ५-७१-७९ (३४४०१)
तत्र यो बलवान्कृष्ण जित्वा सोत्ति तदामिषम् ।
एवमेव मनुष्येषु विशेषो नास्ति कश्चन ॥ ५-७१-८० (३४४०२)
सर्वथा त्वेतदुचितं दुर्बलेषु बलीयसाम् ।
अनादरो विरोधश्च प्रणिपाती हि दुर्बलः ॥ ५-७१-८१ (३४४०३)
पिता राजा च वृद्धश्च सर्वथा मानमर्हति ।
तस्मान्मान्यश्च पूज्यश्च धृतराष्ट्रो जनार्दन ॥ ५-७१-८२ (३४४०४)
पुत्रस्नेहश्च बलवान्धृतराष्ट्रस्य माधव ।

स पुत्रवशमापन्नः प्रणिपातं प्रहास्यति ॥ ५-७१-८३ (३४४०५)
तत्र किं मन्यसे कृष्ण प्राप्तकालमनन्तरम् ।
कथमर्थाच्च धर्माच्च न हीयेमहि माधव ॥ ५-७१-८४ (३४४०६)
ईदृशेऽत्यर्थकृच्छ्रेऽस्मिन्कमन्यं मधुसूदन ।
उपसंप्रष्टुमर्हामि त्वामृते पुरुषोत्तम ॥ ५-७१-८५ (३४४०७)
प्रियश्च प्रियकामश्च गतिज्ञः सर्वकर्मणाम् ।
को हि कृष्णास्ति नस्त्वादृक्सर्वनिश्चयवित्सुहृत् ॥ ५-७१-८६ (३४४०८)
वैशम्पायन उवाच। ५-७१-८७क्ष् (३६१७)
एवमुक्तः प्रत्युवाच धर्मराजं जनार्दनः ।
उभयोरेव वामर्थे यास्यामि कुरुसंसदम् ॥ ५-७१-८७ (३४४०९)
शमं तत्र लभेयं चेद्युष्मदर्थमहापयन् ।
पुण्यं मे सुमहद्राजंश्चरितं स्यान्महाफलम् ॥ ५-७१-८८ (३४४१०)
मोचयेयं मृत्युपाशात्संरब्धान्कुरुसृञ्जयान् ।
पाण्डवान्धार्तराष्ट्रांश्च सर्वां च पृथिवीमिमाम् ॥ ५-७१-८९ (३४४११)
युधिष्ठिर उवाच। ५-७१-९०क्ष् (३६१८)
न ममैतन्मतं कृष्ण यत्त्वं यायाः कुरून्प्रति ।
सुयोधनः सूक्तमपि न करिष्यति ते वचः ॥ ५-७१-९० (३४४१२)
समेतं पार्थिवं क्षत्रं दुर्योधनवशानुगम् ।
तेषां मध्यावतरणं तव कृष्ण न रोचये ॥ ५-७१-९१ (३४४१३)
न हि नः प्रीणयेद्द्रव्यं न देवत्वं कुतः सुखम् ।
न च सर्वामरैश्वर्यं तव द्रोहेण माधव ॥ ५-७१-९२ (३४४१४)
श्रीभगवानुवाच। ५-७१-९३क्ष् (३६१९)
जानाम्येतां महाराज धार्तराष्ट्रस्य पापताम् ।
अवाच्यास्तु भविष्यामः सर्वलोके महीक्षितां ॥ ५-७१-९३ (३४४१५)
न चापि मम पर्याप्ताः सहिताः सर्वपार्थिवाः ।
क्रुद्धस्य संयुगे स्थातुं सिंहस्येवेतरे मृगाः । ५-७१-९४ (३४४१६)
अथ चेत्ते प्रवर्तेरन्मयि किंचिदसांप्रतम् ।
निर्दहेयं कुरून्सर्वानिति मे धीयते मतिः ॥ ५-७१-९५ (३४४१७)
न जातु गमनं पार्थ भवेत्तत्र निरर्थकम् ।
अर्थप्राप्तिः कदाचित्स्यादन्ततो वाप्यवाच्यता ५-७१-९६ (३४४१८)
ग एवमुक्तः प्रत्युवाच धर्मराजो जनार्दनम् ।
भातॄणां समवेतानां सकाशे पुरुषोत्तमम् ' ॥ ५-७१-९७ (३४४१९)
युधिष्ठिर उवाच। ५-७१-९८क्ष् (३६२०)
यत्तुभ्यं रोचते कृष्ण स्वस्ति प्राप्नुहि कौरवान् ।
कृतार्थं स्वस्तिमन्तं त्वां द्रक्ष्यामि पुनरागतम् ॥ ५-७१-९८ (३४४२०)
विष्वक्सेन कुरून्गात्वा भरताञ्शमयन्प्रभो ।

यथा सर्वे सुमनसः सह स्याम सुचेतसः ॥ ५-७१-९९ (३४४२१)
भ्राता चासि सखा चासि बीभत्सोर्मम च प्रियः ।
सौहृदेनाविशङ्क्यो ऽसि स्वस्ति प्राप्नुहि भूतये ॥ ५-७१-१०० (३४४२२)
अस्मान्वेत्थ परान्वेत्थ वेत्थार्थान्वेत्थ भाषितुम् ।
यद्यदस्मद्धितं कृष्ण तत्तद्वाच्यः सुयोधनः ॥ ५-७१-१०१ (३४४२३)
यद्यद्धर्मेण संयुक्तमुपपद्येद्धितं वचः ।
तत्तत्केशव भाषेथाः सान्त्वं वा यदि वेतरत् ॥ ॥ ५-७१-१०२ (३४४२४)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
एकसप्ततितमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-७१-१० अनुयुह्क्ष्महे प्रार्थयामहे ॥
५-७१-१५ विवृतान्तरः प्रकाशितभावः ॥
५-७१-१७ छद्मनः अज्ञातचर्यया ॥
५-७१-१८ स्थातास्थास्यति । नः अस्माकम्। तस्मिन् चतुर्दशे दर्षे स्वं
राज्यं गृह्णीतेत्यस्मिन्। न अहास्म न त्यक्तवन्तो वयम् ॥
५-७१-२१ मातरं संविधातुं सम्यक् पोषयितुम् । मित्राणां कर्मणिषष्ठी ॥
५-७१-२३ अवसीयते संस्थीयतेऽस्मिन्नित्यवसानम् यावज्जीवकं वासस्थानम् ॥
५-७१-२४ नः अस्माकं कृते भरताः भरतवंश्या भीष्मादयः मानशन्
मानश्यन्तु ॥
५-७१-२८ द्विजाः अर्थिनः ॥
५-७१-२९ प्रेतसत्वात् प्रगतबुद्धेर्मृतादित्यर्थः ॥
५-७१-३१ धर्मं धर्मकारणम् । सर्वं यज्ञदानादि ॥
५-७१-३५ आपत्पदार्थमाह श्रियो विनाश इति । तद्धि श्रीर्हि ॥
५-७१-४० तत्तदा सर्वदेत्यर्थः ॥
५-७१-४८ इदं ह्रीमन्तं । ते त्वया ॥
५-७१-५५ कपालं भिक्षापात्रम् ॥
५-७१-५७ नीतिमेव बलं कृत्वा युध्ये योत्स्ये । जयपराजयौ तु
आत्मच्छन्देन स्वेच्छया न भवतः। तथा तद्वत् भूतानां जीवितं
मरणं च स्वेच्छया न स्तः ॥
५-७१-५८ नीतिमेव बलं कृत्वा युध्ये योत्स्ये । जयपराजयौ तु
आत्मच्छन्देन स्वेच्छया न भवतः। तथा तद्वत् भूतानां जीवितं
मरणं च स्वेच्छया न स्तः ॥
५-७१-६५ अनुशयः पश्चात्तापः ॥
५-७१-६६ शेषः शत्रोः । शेषं स्वस्य ॥

५-७१-६९ अनिर्वृत्तेन अस्वस्थेन ॥
५-७१-७२ अत इति । यतः अन्तरं छिद्रं नित्यं अपरिहार्थं अतो हेतोः
अन्ततोऽन्यथा स्वस्य शत्रोर्वा नाशं विना शान्तिर्नास्ति ॥
५-७१-७३ अयं दोषः नाशाख्यः ॥
५-७१-७४ इद्धा प्रदीप्ता ॥
५-७१-७५ त्यागेन राज्यस्येतिः शेषः । तदृते राज्यं विना। द्विषतां
संशयात् किं शत्रवश्छिद्रे भ्रष्टश्छिद्रे प्रहरिष्यन्ति उत
उपेक्षां करिष्यन्तीत्येवंरूपात् । आत्मनः भ्रष्टश्रीकस्य सद्यः
समुच्छेदात् नाशसंभवात्। अतो राज्यत्यागो न युक्त इति भावः ॥
५-७१-७८ दारुणं युद्धम् तच्छुनामिव निन्द्यमित्यर्थः ॥
५-७१-७९ क्ष्वेडा ध्विकौटिल्यम् । विवर्तनं भूमौ
लुष्ठनम्। दन्तदर्शनं मुखस्य व्यादानेन ॥
५-७१-८३ प्रहास्यति न स्वीकरिष्यति ॥
५-७१-९९ तथा वदेति शेषः ॥

उद्योगपर्व - अध्याय ०७२
॥ श्रीः ॥
५.७२. अध्यायः ७२

Mahabharata - Udyoga Parva - Chapter Topics
श्रीकृष्णेन युधिष्ठिरंप्रति युद्धपक्षस्थिरीकरणपूर्वकं
लोकसंशयनिरासाय शमार्थं प्रयतनकथनम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-७२-० (३४४२५)
श्रीभगवानुवाच। ५-७२-०क्ष् (३६२१)
सञ्जयस्य श्रुतं वाक्यं भवतश्च श्रुतं मया ।
सर्वं जानाम्यभिप्रायं तेषां च भवतश्च यः ॥ ५-७२-१ (३४४२६)
तव धर्माश्रिता बुद्धिस्तेषां वैराश्रया मतिः ।
यदयुद्धेन लभ्येत तत्ते बहुमतं भवेत् ॥ ५-७२-२ (३४४२७)
न चैवं नैष्ठिकं कर्म क्षत्रियस्य विशांपते ।
आहुराश्रमिणः सर्वे न भैक्षं क्षत्रियश्चरेत् ॥ ५-७२-३ (३४४२८)
जयो वधो वा सङ्ग्रामे धात्राऽऽदिष्टः सनातनः ।
स्वधर्मः क्षत्रियस्यैष कार्पण्यं न प्रशत्यते ॥ ५-७२-४ (३४४२९)
न हि कार्पण्यमास्थाय शक्या वृत्तिर्युधिष्ठिर ।
विक्रमस्व महाबाहो जहि शत्रून्परन्तप ॥ ५-७२-५ (३४४३०)

अतिगृद्धाः कृतस्नेहा दीर्घकालं सहोषिताः ।
कृतमित्राः कृतबला धार्तराष्ट्राः परन्तप ॥ ५-७२-६ (३४४३१)
न पर्यायोऽस्ति यत्साम्यं त्वयि कुर्युर्विशांपते ।
बलवत्तां हि मन्यन्ते भीष्मद्रोणकृपादिभिः ॥ ५-७२-७ (३४४३२)
यावच्च मार्दवेनैतान्राजन्नुपचरिष्यसि ।
तावदेते हरिष्यन्ति तव राज्यमरिन्दम ॥ ५-७२-८ (३४४३३)
नानुक्रोशान्न कार्पण्यान्न च धर्मार्थकारणात् ।
अलं कर्तुं धार्तराष्ट्रस्तव काममरिन्दम ॥ ५-७२-९ (३४४३४)
एतदेव निमित्तं ते धार्तराष्ट्रो यथा त्वयि ।
नान्वतप्यत कोपेन तव कृत्वाऽपि दुष्करम् ॥ ५-७२-१० (३४४३५)
पितामहस्य द्रोणस्य विदुरस्य च धीमतः ।
ब्राह्मणानां च साधूनां राज्ञश्च नगरस्य च ॥ ५-७२-११ (३४४३६)
पश्यतां कुरुमुख्यानां सर्वेषामेव तत्त्वतः ।
दानशीलं मृदुं दान्तं धर्मशीलमनुव्रतम् ॥ ५-७२-१२ (३४४३७)
यत्त्वामुपधिना राजन्द्यूते वञ्चितवांस्तदा ।
न चापत्रपते तेन नृशंसः स्वेन कर्मणा ॥ ५-७२-१३ (३४४३८)
तथाशीलसमाचरे राजन्मा प्रणयं कृथाः ।
वध्यास्ते सर्वलोकस्य किं पुनस्तव भारत ॥ ५-७२-१४ (३४४३९)
वाग्भिस्त्वप्रतिरूपाभिरतुदत्त्वां सहानुजम् ।
श्लाघमानः प्रहृष्टः सन्भ्रातृभिः सह भाषते ॥ ५-७२-१५ (३४४४०)
एतावत्पाण्डवानां हि नास्ति किंचिदिह स्वकम् ।
नामधेयं च गोत्रं च तदप्येषां न शिष्यते ॥ ५-७२-१६ (३४४४१)
कालेन महता चैषां भविष्यति पराभवः ।
प्रकृतिं ते भजिष्यन्ति नष्टप्रकृतयो मयि ॥ ५-७२-१७ (३४४४२)
दुःशासनेन पापेन तदा द्यूते प्रवर्तिते ।
अनाथवत्तदा देवी द्रौपदी सुदुरात्मना ॥ ५-७२-१८ (३४४४३)
आकृष्य केशे रुदती सभायां राजसंसदि ।
भीष्मद्रोणप्रमुखतो गौरिति व्याहृता मुहुः ॥ ५-७२-१९ (३४४४४)
भवता वारिताः सर्वे भ्रातरो भीमविक्रमाः ।
धर्मपाशनिबद्धाश्च न किंचित्प्रतिपेदिरे ॥ ५-७२-२० (३४४४५)
एताश्चान्याश्च परुषा वाचः स समुदीरयन् ।
श्लाघते ज्ञातिमध्ये स्म त्वयि प्रव्रजिते वनम् ॥ ५-७२-२१ (३४४४६)
ये तत्रासन्समानीतास्ते दृष्ट्वा त्वामनागसम् ।
अश्रुकण्ठा रुदन्तश्च सभायामासते सदा ॥ ५-७२-२२ (३४४४७)
न चैनमभ्यनन्दंस्ते राजानो ब्राह्मणैः सह ।
सर्वे दुर्योधनं तत्र निन्दन्ति स्म सभासदः ॥ ५-७२-२३ (३४४४८)

कुलीनस्य च या निन्दा वधो वाऽमित्रकर्शन ।
महागुणो वधो राजन्नु तु निन्दा कुजीविका ॥ ५-७२-२४ (३४४४९)
तदैव निहतो राजन्यदैव निरपत्रपः ।
निन्दितश्च महाराज पृथिव्यां सर्वराजभिः ॥ ५-७२-२५ (३४४५०)
ईषत्करो वधस्तस्य यस्य चारित्रमीदृशम् ।
प्रस्कुन्देन प्रतिस्तब्धश्छिन्नमूल इव द्रुमः ॥ ५-७२-२६ (३४४५१)
वध्यः सर्प इवानार्यः सर्वलोकस्य दुर्मतिः ।
जह्येन त्वममित्रघ्न मा राजन्विचिकित्सिथाः ॥ ५-७२-२७ (३४४५२)
सर्वथा त्वत्क्षमं चैतद्रोचते च ममानघ ।
यत्त्वं पितरि भीष्मे च प्रणिपातं समाचरेः ॥ ५-७२-२८ (३४४५३)
अहं तु सर्वलोकस्य गत्वा छेत्स्यामि संशयम् ।
येषामस्ति द्विधाभावो राजन्दुर्योधनं प्रति ॥ ५-७२-२९ (३४४५४)
मध्ये राज्ञामहं तत्र प्रातिपौरुषिकान्गुणान् ।
तव सङ्कीर्तयिष्यामि ये च तस्य व्यतिक्रमाः ॥ ५-७२-३० (३४४५५)
ब्रुवतस्तत्र मे वाक्यं धर्मार्थसहितं हितम् ।
निशम्य पार्थिवाः सर्वे नानाजनपदेश्वराः ॥ ५-७२-३१ (३४४५६)
त्वयि संप्रतिपत्स्यन्ते धर्मात्मा सत्यवागिति ।
तस्मिंश्चाधिगमिष्यन्ति यथा लोभादवर्तत ॥ ५-७२-३२ (३४४५७)
गर्हयिष्यामि चैवैनं पौरजानपदेष्वपि ।
वृद्धबालानुपादाय चातुर्वर्ण्ये समागते ॥ ५-७२-३३ (३४४५८)
शमं वै याचमानस्त्वं नाधर्मं तत्र लप्स्यसे ।
कुरून्विगर्हयिष्यन्ति धृतराष्ट्रं च पार्थिवाः ॥ ५-७२-३४ (३४४५९)
तस्मिंल्लोकपरित्यक्ते किं कार्यमवशिष्यते ।
हते दुर्योधने राजन्यदन्यत्क्रियतामिति ॥ ५-७२-३५ (३४४६०)
यात्वा चाहं कुरून्सर्वान्युष्मदर्थमहापयन् ।
यतिष्ये प्रशमं कर्तुं लक्षयिष्ये च चेष्टितम् ॥ ५-७२-३६ (३४४६१)
कौरवाणां प्रवृत्तिं च गत्वा युद्धाधिकारिकाम् ।
निशम्य विनिवर्तिष्ये जयाय तव भारत ॥ ५-७२-३७ (३४४६२)
सर्वथा युद्धमेवाहमाशंसापि परैः सह ।
निमित्तानि हि सर्वाणि तथा प्रादुर्भवन्ति मे ॥ ५-७२-३८ (३४४६३)
मृगाः शकुन्ताश्च वदन्ति घोरं
हस्त्यश्वमुख्येषु निशामुखेषु ।
घोराणि रूपाणि तथैव चाग्नि-
र्वर्णान्बहून्पुष्यति घोररूपान् ॥ ५-७२-३९ (३४४६४)
मनुष्यलोकक्षयकृत्सुघोरो
नो चेदनुप्राप्त इहान्तकः स्यात् ।

शस्त्राणि यन्त्रं कवचान्रथांश्च
नागान्हयांश्च प्रतिपादयित्वा ॥ ५-७२-४० (३४४६५)
योधाश्च सर्वे कृतनिश्चयास्ते
भवन्तु हस्त्यश्वरथेषु यत्ताः ।
साङ्ग्रामिकं ते यदुपार्जनीयं
सर्वं समग्रं कुरु तन्नरेन्द्र ॥ ५-७२-४१ (३४४६६)
दुर्योधनो न ह्यलमद्य दातुं
जीवंस्तवैतन्नृपते कथंचित् ।
यत्ते पुरस्तादभवत्समृद्धं
द्यूते हृतं पाण्डवमुख्य राज्यम् ॥ ॥ ५-७२-४२ (३४४६७)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
द्विसप्ततितमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-७२-३ नैष्ठिकं कर्म यावज्जीवं ब्रह्मचर्यं पारिव्राज्यं च
। विहितमिति शेषः ॥
५-७२-४ कार्पण्यं ग्रामपञ्चकं देहीति दीनवचनम् ॥
५-७२-५ वृत्तिः जीविका कर्तुमिति शेषः ॥
५-७२-६ अतिगृद्धाः अत्यन्तलुब्धाः ॥
५-७२-७ पर्याय उपायः । यद्येन बलवत्तां स्वस्येति शेषः ॥
५-७२-९ अनुक्रोशात् भवत्सु कृपातः । कार्पण्यात् स्वस्य दैन्यात्। अलं
कर्तुं पूर्णं कर्तुं न समर्थाः ॥
५-७२-१० निमित्तं अशमे कारणम् ॥
५-७२-१७ प्रकृतिं पञ्चताम् । मयि मत्समीपे नष्टा प्रकृतिः
शौर्यादिरूपः स्वभावो येषाम् ॥
५-७२-१९ गौरिव सर्वभोज्येत्युपहासो गौर्गौरिति ॥
५-७२-२६ प्रस्कृन्देन चक्राकारया वेदिकया ॥
५-७२-२९ द्विधाभावः अयं साधुरसाधुर्वेति संशयः ॥
५-७२-३० प्रातिपौरुषिकान् सर्वपुरुषसाधारणान् ॥
५-७२-३५ हते निन्द्यतया नष्टप्राये ॥
५-७२-३६ यात्वा गत्वा ॥
५-७२-३७ निशम्य आलोच्य ॥
५-७२-४० तर्हि एतन्न स्यादिति शेषः । प्रतिपादयित्वा सञ्जीकृत्य ॥

॥ श्रीः ॥
५.७३. अध्यायः ७३

Mahabharata - Udyoga Parva - Chapter Topics
भीमसेनेन श्रीकृष्णंप्रति दुर्योधनस्य दुराराध्यत्वकथनपूर्वकं
यथाकथंचित् शमस्वावश्यकर्तव्यत्ककथनम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-७३-० (३४४६८)
भीम उवाच। ५-७३-०क्ष् (३६२२)
यथायथैव शान्तिः स्यात्कुरूणां मधुसूदन ।
तथातथैव भाषेथा मा स्म युद्धेन भीषयेः ॥ ५-७३-१ (३४४६९)
अमर्षी जातसंरम्भः श्रेयोद्वेषी महामनाः ।
नोग्रं दुर्योधनो वाच्यः साम्नैवेनं समाचरेः ॥ ५-७३-२ (३४४७०)
प्रकृत्या पापसत्वश्च तुल्यचेतास्तु दस्युभिः ।
ऐश्वर्यमदमत्तश्च कृतवैरश्च पाण्डवैः ॥ ५-७३-३ (३४४७१)
अदीर्घदर्शी निष्ठूरी क्षेप्ता क्रूरपराक्रमः ।
दीर्घमन्युरनेयश्च पापात्मा निकृतिप्रियः ॥ ५-७३-४ (३४४७२)
म्रियेतापि न भज्येत नैव जह्यात्स्वकं मतम् ।
तादृशेन शमः कृष्ण मन्ये परमदुष्करः ॥ ५-७३-५ (३४४७३)
सुहृदामप्यवाचीनस्त्यक्तधर्मा प्रियानृतः ।
प्रतिहन्त्ये सुहृदां वाचश्चैव मनांसि च ॥ ५-७३-६ (३४४७४)
स मन्युवशमापन्नः स्वभावं दुष्टमास्थितः ।
स्वभावात्पापमभ्येति तृणैश्छन्न इवोरगः ॥ ५-७३-७ (३४४७५)
दुर्योधनो हि यत्सेनः सर्वथा विदितस्तव ।
यच्छीलो यत्स्वभावश्च यद्बलो यत्पराक्रमः ॥ ५-७३-८ (३४४७६)
पुरा प्रसन्नाः कुरवः सहपुत्रास्तथा वयम् ।
इन्द्रज्येष्ठा इवाभूम मोदमानाः सबान्धवाः ॥ ५-७३-९ (३४४७७)
दुर्योधनस्य क्रोधेन भरता मधुसूदन ।
धक्ष्यन्ते शिशिरापाये वनानीव हुताशनैः ॥ ५-७३-१० (३४४७८)
अष्टादशेमे राजानः प्रख्यात मधुसूदन ।
ये समुच्चिच्छिदुर्ज्ञातीन्सुहृदश्च सबान्धवान् ॥ ५-७३-११ (३४४७९)
असुराणां समृद्धानां ज्वलतामिव तेजसा ।
पर्यायकाले धर्मस्य प्राप्ते कलिरजायत ॥ ५-७३-१२ (३४४८०)
हैहयानामुदावर्तो नीपानां जनमेजयः ।

बहुलस्तालजङ्घानां कृमीणामुद्धतो वसुः ॥ ५-७३-१३ (३४४८१)
अजबिन्दुः सुवीराणां सुराष्ट्राणां रुषद्धिकः ।
अर्कजश्च बलीहानां चीनानां धौतमूलकः ॥ ५-७३-१४ (३४४८२)
हयग्रीवो विदेहानां वरयुश्च महौजसाम् ।
बाहुः सुन्दरवंशानां दीप्ताक्षाणां पुरूरवाः ॥ ५-७३-१५ (३४४८३)
सहजश्चेदिमत्स्यानां प्रवीराणां वृषध्वजः ।
धारणश्चन्द्रवत्सानां मुकुटानां विगाहनः ॥ ५-७३-१६ (३४४८४)
शमश्च नन्दिवेगानामित्येते कुलपांसनाः ।
युगान्ते कृष्ण संभूताः कुलेषु पुरुषाधमाः ॥ ५-७३-१७ (३४४८५)
अप्ययं नः कुरूणां स्याद्युगान्ते कालसंभृतः ।
दुर्योधनः कुलाङ्गारो जघन्यः पापपूरुषः ॥ ५-७३-१८ (३४४८६)
तस्मान्मृदु शनैर्ब्रूया धर्मार्थसहितं हितम् ।
कामानुबद्धं बहुलं नोग्रमुग्रपराक्रमम् ॥ ५-७३-१९ (३४४८७)
अपि दुर्योधनं कृष्ण सर्वे वयमधश्वराः ।
नीचैर्भूत्वाऽनुयास्यामो मा स्म नो भरता नशन् ॥ ५-७३-२० (३४४८८)
अप्युदासीनवृत्तिः स्याद्यथा नः कुरुभिः सह ।
वासुदेव तथा कार्यं न कुरूननयः स्पृशेत् ॥ ५-७३-२१ (३४४८९)
वाच्यः पितामहो वृद्धो ये च कृष्ण समासदः ।
भ्रातॄणामस्तु सौभ्रात्रं धार्तराष्ट्रः प्रशाम्यताम् ॥ ५-७३-२२ (३४४९०)
अहमेतद्ब्रवीम्येवं राजा चैव प्रशंसति ।
अर्जुनो नैव युद्धार्थी भूयसी हि दयाऽर्जुने ॥ ॥ ५-७३-२३ (३४४९१)

इति श्रीमन्महाभारते उग्योगपर्वणि भगवद्यानपर्वणि
त्रिसप्ततितमोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-७३-४ निष्ठूरी निष्ठुरवाक् । क्षेप्ता निन्दकः । अनेयः
शिक्षयितुमयोग्यः ॥
५-७३-६ अवाचीनो विपरीतः ॥
५-७३-१२ पर्यायकाले धर्मान्तकाले ॥
५-७३-१९ कामानुबद्धं बहुलं बाहुल्येन तस्य चित्तानुसारी ॥

उद्योगपर्व - अध्याय ०७४
॥ श्रीः ॥
५.७४. अध्यायः ७४

श्रीकृष्णेन भीमंप्रति तत्प्रतिज्ञानुस्मारणपूर्वकं युद्धप्रोत्साहनम्
॥ १ ॥

५-७४-० (३४४९२)
वैशम्पायन उवाच। ५-७४-०क्ष् (३६२३)
एतच्छ्रुत्वा महाबाहुः केशवः प्रहसन्निव ।
अभूतपूर्वं भीमस्य मार्दवोपहितं वचः ॥ ५-७४-१ (३४४९३)
गिरेरिव लघुत्वं तच्छीतत्वमिव पावके ।
मत्वा रामानुजः शौरिः शार्ङ्गधन्वा वृकोदरम् ॥ ५-७४-२ (३४४९४)
सन्तेजसंस्तदा वाग्भिर्भातरिश्वेव पावकम् ।
उवाच भीममासीनं कृपयाऽभिपरिप्लुतम् ॥ ५-७४-३ (३४४९५)
श्रीभगवानुवाच। ५-७४-४क्ष् (३६२४)
त्वमन्यदा भीमसेन युद्धमेव प्रशंससि ।
वधामिनन्दिनः क्रूरान्धार्तराष्ट्रन्मिमर्दिषुः ॥ ५-७४-४ (३४४९६)
न च स्वपिषि जागर्षि न्युब्जः शेषे परन्तप ।
घोरामशान्तां रुशतीं सदा वाचं प्रभाषसे ॥ ५-७४-५ (३४४९७)
निःश्वसन्नग्निवत्तेन सन्तप्तः स्वेन मन्युना ।
अप्रशान्तमना भीम सधूम इव पावकः ॥ ५-७४-६ (३४४९८)
एकान्ते निःश्वसञ्शेपे भारार्त इव दुर्बलः ।
अपि त्वां केचिदुन्मत्तं मन्यन्तेऽतद्विदो जनाः ॥ ५-७४-७ (३४४९९)
आरुज्य वृक्षान्निर्मूलान्गजः परिरुजन्निव ।
निघ्नन्पद्भिः क्षितिं भीम निष्टनन्परिधावसि ॥ ५-७४-८ (३४५००)
नास्मिञ्जने न रमसे रहः क्षिपसि पाण्डव ।
नान्यं निशि दिवा चापि कदाचिदभिनन्दसि ॥ ५-७४-९ (३४५०१)
अकस्मात्स्मयमानश्च रहस्यास्से रुदन्निव ।
जान्वोर्मूर्धानमाधाय चिरमास्ते प्रमीलितः ॥ ५-७४-१० (३४५०२)
भ्रुकिटिं च पुनः कुर्वन्नोष्ठौ च विदशन्निव ।
अभीक्ष्णं दृश्यसे भीम सर्वं तन्मन्युकारितम् ॥ ५-७४-११ (३४५०३)
यथा तपुरस्तात्सविता दृश्यते शुक्रमुच्चरन् ।
यथा च पश्चान्निर्मुक्तो ध्रुवं पर्येति रश्मिवान् ॥ ५-७४-१२ (३४५०४)
तथा सत्यं ब्रवीम्येतन्नास्ति तस्य व्यतिक्रमः ।
हन्ताहं गदयाभ्येत्य दुर्योधनममर्षणम् ॥ ५-७४-१३ (३४५०५)
इति स्म मध्ये भ्रातृणां सत्येनालभसे वदाम् ।

तस्य ते प्रशमे बुद्धिर्भ्रियतेऽद्य परन्तप ॥ ५-७४-१४ (३४५०६)
अहो युद्धाभिकाङ्क्षाणां युद्धकाल उपस्थिते ।
चेतांसि विप्रतीपानि यत्त्वां भीभीम विन्दति ॥ ५-७४-१५ (३४५०७)
अहो पार्थ निमित्तानि विपरीतानि पश्यसि ।
स्वप्नान्ते जागरान्ते च तस्मात्प्रशममिच्छसि ॥ ५-७४-१६ (३४५०८)
अहो नाशंससे किंचित्पुंस्त्वं क्लीब इवात्मनि ।
कश्मलेनाभिपन्नोऽसि तेन ते विकृतं मनः ॥ ५-७४-१७ (३४५०९)
उद्वेपते ते हृदयं मनस्ते प्रतिसीदति ।
ऊरुस्तम्भगृहीतोऽसि तस्मात्प्रशममिच्छसि ॥ ५-७४-१८ (३४५१०)
अनित्यं किल मर्त्यस्य पार्थ चित्तं चलाचलम् ।
वातवेगप्रचलिता अष्ठीला शाल्मलेरिव ॥ ५-७४-१९ (३४५११)
तवैषा विकृता बुद्धिर्गवां वागिव मानुषी ।
मनांसि पाण्डुपुत्राणां मज्जयत्यप्लवानिव ॥ ५-७४-२० (३४५१२)
इदं मे महादाश्चर्यं पर्वतस्येव सर्पणम् ।
यदीदृशं प्रभाषेथा भीमसेनासमं वचः ॥ ५-७४-२१ (३४५१३)
स दृष्ट्वा स्वानि कर्माणि कुले जन्म च भारत ।
उत्तिष्ठस्व विषादं मा कृथा वीर स्थिरो भव ॥ ५-७४-२२ (३४५१४)
न चैतदनुरूपं ते यत्ते ग्लानिररिन्दम ।
यदोजसा न लभते क्षत्रियो न तदश्नुते ॥ ॥ ५-७४-२३ (३४५१५)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
चतुःसप्ततितमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-७४-६ अग्निवत् अग्निनेव ॥
५-७४-८ आरुज्य भङ्क्त्वा ॥
५-७४-९ अस्मिन्वने । जनेन ब्राह्मणरामूहेन। क्षिपसि नपसि कालमिति
शेषः ॥
५-७४-१२ शुक्रं तेजः । निर्मुक्तोऽस्तं गतः। ध्रुवं निश्चयं पुनः
पर्येति मेरुं पुनःपुनः प्रदक्षिणीकरोति ॥
५-७४-१९ अष्ठीला फलान्तर्ग्रन्थिः । सा च शाल्मलेः केवलं तूलमयी
भवति ॥

उद्योगपर्व - अध्याय ०७५
॥ श्रीः ॥
५.७५. अध्यायः ७५

Mahabharata - Udyoga Parva - Chapter Topics

भीमेन कृष्णंप्रति स्वसामर्थ्यकथनपूर्वकं स्वस्य शमकामनायाः कृपामूलकत्वकथनम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-७५-० (३४५१६)
वैशम्पायन उवाच। ५-७५-०क्ष् (३६२५)
तथोक्तो वासुदेवेन नित्यमन्युरमर्षणः ।
सदश्ववत्समाधावद्बभाषे तदनन्तरम् ॥ ५-७५-१ (३४५१७)
भीमसेन उवाच। ५-७५-२क्ष् (३६२६)
अन्यथा मां चिकीर्षन्तमन्यथा मन्यसेऽच्युत ।
प्रणीतभावमत्यर्थं युधि सत्यपराक्रमम् ॥ ५-७५-२ (३४५१८)
वेत्सि दाशार्ह सत्यं मे दीर्घकालं सहोषितः ।
उत वा मां न जानासि प्लवन्हृद इवाप्लवे ॥ ५-७५-३ (३४५१९)
तस्मादनभिरुपाभिर्वाग्भिर्मां त्वं समर्च्छसि ।
कथं हि भीमसेनं मां जानन्कश्चन माधव ॥ ५-७५-४ (३४५२०)
ब्रूयादप्रतिरूपाणि यथा मां वक्तमर्हसि ।
तस्मादिदं प्रवक्ष्यामि वचनं वृष्णिनन्दन ॥ ५-७५-५ (३४५२१)
आत्मनः पौरुषं चैव बलं च न समं परैः ।
सर्वथाऽनार्यकर्मैतत्प्रशंसा स्वयमात्मनः ॥ ५-७५-६ (३४५२२)
अतिवादापविद्धस्तु वक्ष्यामि बलमात्मनः ।
पश्येमे रोदसी कृष्ण ययोरासन्निमाः प्रजाः ॥ ५-७५-७ (३४५२३)
अचले चाप्रतिष्ठे चाप्यनन्ते सर्वमातरौ ।
यदीमे सहसा क्रुद्धे समेयातां शिले इव ॥ ५-७५-८ (३४५२४)
अहमेते निगृह्णीयां बाहुभ्यां सचसाचरे ।
पश्यैतदन्तरं बाह्वोर्महापरिघयोरिव ॥ ५-७५-९ (३४५२५)
य एतत्प्राय मुच्येत न तं पश्यामि पुरूषम् ।
हिमवांश्च समुद्रश्च वज्री वा बलमित्स्वयम् ॥ ५-७५-१० (३४५२६)
मयाभिपन्नं त्रायेरन्बलमास्थाय न त्रयः ।
युद्धार्हान्क्षत्रियान्सर्वान्पाण्डवेष्वाततायिनः ॥ ५-७५-११ (३४५२७)
अधः पादतलेनैतानधिष्ठास्यामि भूतले ।
न हि त्वं नाभिजानासि मम विक्रममच्युत ॥ ५-७५-१२ (३४५२८)
यथा मया विनिर्जित्य राजानो वशगाः कृताः ।
अथ चेन्मां न जानासि सूर्यस्येवोद्यतः प्रभाम् ॥ ५-७५-१३ (३४५२९)
विगाढे युधि संबाधे वेत्स्यसे मां जनार्दन ।

परुषैराक्षिपसि किं व्रणं सूच्येव चानघ ॥ ५-७५-१४ (३४५३०)
यथामति ब्रवीम्येतद्विद्धि मामधिकं ततः ।
द्रष्टासि युधि संबाधे प्रवृत्ते वैशसेऽहनि ॥ ५-७५-१५ (३४५३१)
मया प्रणुन्नान्मातङ्गात्नथिनः सादनस्तथा ।
तथा नरानभिक्रुद्धं निघ्नन्तं क्षत्रियर्षभान् ॥ ५-७५-१६ (३४५३२)
द्रष्टा मां त्वं च लोकश्च विकर्षन्तं वरान्वरान् ।
न मे सीदन्ति गात्राणि न ममोद्वेपते मनः ॥ ५-७५-१७ (३४५३३)
सर्वलोकादभिक्रुद्धान्न भयं विद्यते मम ।
किं तु सौहृदमेवैतत्कृपया मधुसूदन ।
सर्वांस्तितिक्षे संक्लेशान्मा स्म नो भरता नशन् ॥ ॥ ५-७५-१८ (३४५३४)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
पञ्चसप्ततितमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-७५-१ समाधावत् तीव्रवेगं यथा स्यात्तथा ॥
५-७५-३ ह्रदे प्लवन् पारमिवेति शेषः ॥
५-७५-१४ संबाधे संकीर्णे ॥
५-७५-१५ वैशसे विशसनवति ॥

उद्योगपर्व - अध्याय ०७६
॥ श्रीः ॥
५.७६. अध्यायः ७६

Mahabharata - Udyoga Parva - Chapter Topics
श्रीकृष्णेन भीमंप्रति स्वस्य तन्महिमाभिज्ञत्वमभिधाय
तत्प्रशंसनपूर्वकं स्वोक्तेः तेजस्सन्दीपनार्थत्वकथनम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-७६-० (३४५३५)
श्रीभगवानुवाच । ५-७६-०क्ष् (३६२७)
भावं जिज्ञासमानोऽहं प्रणयादिदमब्रवम् ।
न चाक्षेपान्न पाण्डित्यान्न क्रोधान्न विवक्षया ॥ ५-७६-१ (३४५३६)
वेदाहं तव माहात्म्यसुत ते वेद यद्बलम् ।
उत ते वेद कर्माणि न त्वां परिभवाम्यहम् ॥ ५-७६-२ (३४५३७)
यथा चात्मनि कल्याणं संभावयसि पाण्डव ।

सहस्रगुणमप्येतत्त्वयि संभावयाम्यहम् ॥ ५-७६-३ (३४५३८)
यादृशे च कुले जन्म सर्वराजाभिपूजिते ।
बन्धुभिश्च सुहृद्भिश्च भीम त्वमसि तादृशः ॥ ५-७६-४ (३४५३९)
जिज्ञासन्तो हि धर्मस्य सन्दिग्धस्य वृकोदर ।
पर्यायं नाध्यवस्यन्ति देवमानुषयोर्जनाः ॥ ५-७६-५ (३४५४०)
स एव हेतुर्भूत्वा हि पुरुषस्यार्थसिद्धिषु ।
विनाशेऽपि स एवास्य सन्दिग्धं कर्म पौरुषम् ॥ ५-७६-६ (३४५४१)
अन्यथा परिदृष्टानि कविभिर्दोवदर्शिभिः ।
अन्यथा परिवर्तन्ते वेगा इव नभस्वतः ॥ ५-७६-७ (३४५४२)
सुमन्त्रितं सुनीतं च न्यायतश्चोपपादितम् ।
कृतं मानुष्यकं कर्म दैनेनापि विरुद्ध्यते ॥ ५-७६-८ (३४५४३)
दैवमप्यकृतं कर्म पौरुषेण विहन्यते ।
शीतमुष्णं तथा वर्षं क्षुत्पिपासे च भारत ॥ ५-७६-९ (३४५४४)
यदन्यद्दिष्टभावस्य पुरुषस्य स्वयं कृतम् ।
तस्मादनुपरोधश्च विद्यते तत्र लक्षणम् ॥ ५-७६-१० (३४५४५)
लोकस्य नान्यतो वृत्तिः पाण्डवान्यत्र कर्मणः ।
एवंबुद्धिः प्रवर्तेत फलं स्यादुभयान्वये ॥ ५-७६-११ (३४५४६)
य एवं कृतबुद्धिः स कर्मस्वेव प्रवर्तते ।
नासिद्धो व्यथते तस्य न सिद्धौ हर्षमश्नुते ॥ ५-७६-१२ (३४५४७)
तत्रेयमनुमात्रा मे भीमसेन विवक्षिता ।
नैकान्तसिद्धिर्वक्तव्या शत्रुभिः सह संयुगे ॥ ५-७६-१३ (३४५४८)
नातिप्रहीणरश्मिः स्यात्तथा भावविपर्यये ।
विषादमच्छेद् ग्लानिं वाप्येतमर्थं ब्रवीमिते ॥ ५-७६-१४ (३४५४९)
श्वोभूते धृतराष्ट्रस्य समीपं प्राप्य पाण्डव ।
यतिष्ये प्रशमं कर्तुं युष्मदर्थमहापयन् ॥ ५-७६-१५ (३४५५०)
शमं चेत्ते करिष्यन्ति ततोऽनन्तं यशो मम ।
भवतां कच कृतः कामस्तेषां च श्रेय उत्तमम् ॥ ५-७६-१६ (३४५५१)
ते चेदभिनिवेक्ष्यन्ते नाभ्युपैष्यन्ति मे वचः ।
कुरवो युद्धमेवात्र घोरं कर्म भविष्यति ॥ ५-७६-१७ (३४५५२)
अस्मिन्युद्धे भीमसेन त्वयि भारः समाहितः ।
धूरर्जुनेन धार्या स्याद्वढव्य इतरो जनः ॥ ५-७६-१८ (३४५५३)
अहं हि यन्ता बीभत्सोर्भविता संयुगे सति ।
धनञ्जयस्यैष कामो न हि युद्धं न कामये ॥ ५-७६-१९ (३४५५४)
तस्मादाशङ्कमानोऽहं वृकोदर मतिं तव ।
गदतः क्लीबया वाचा तेजस्ते समदीदिपम् ॥ ॥ ५-७६-२० (३४५५५)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
षट्सप्ततितमोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-७६-१ भावमिति । विवक्षया त्वया स्वरूपं
वक्तव्यमितीच्छया। प्रागेव तस्य ज्ञातत्वात् ॥
१ ॥
५-७६-५ देवमानुषयोर्धर्मस्य पर्यायमिति संबन्धः ॥
५-७६-७ परिदृष्टानि कर्तव्यत्वेन निश्चितानि कार्याणि ॥
५-७६-१० दिष्टः फलभोगाय आज्ञप्तः भावः सत्ता यस्य
तत् दिष्टभावं प्रारब्धकर्म । पञ्चम्यर्थे षष्ठी
। प्रारब्धादन्यदित्यर्थः । पुरुषस्य पुरुषेण संचितं
यत्स्वयंकृतं कर्म तस्मादनुपरोधो जन्मान्तरे निरोधो नास्ति। तत्र
ज्ञानेन प्रायश्चित्तेन वा संचितपापानां नाशे लक्षणं ज्ञापकं
श्रुतिस्मृतिजातं विद्यते ॥
५-७६-११ कर्मणोऽन्यत्र पौरुषंविना अन्यत एकस्माद्दैवादेव
वृत्तिर्जीविका नास्ति । एवं बुद्धिः ईदृक्ज्ञानवान्सन् प्रवर्तेत
पुरुषकारं कुर्यात्। तथा सति उभयान्वये दैवपौरुषयोः संबन्धे
फलं भवति नान्यतरत इत्यर्थः ॥
५-७६-१३ अनुमात्राऽवधारणं निश्चय इत्यर्थः ॥
५-७६-१४ प्रहीणरश्मिः निष्प्रभः । भावः प्रारब्धं कर्म। अर्च्छेत्
प्राप्नुयात् ॥
५-७६-१७ ते कुरव इति संबन्धः ॥
५-७६- ५-७६- ५-७६-

उद्योगपर्व - अध्याय ०७७
॥ श्रीः ॥
५.७७. अध्यायः ७७

Mahabharata - Udyoga Parva - Chapter Topics
अर्जुनेन सन्धिविग्रहपक्षौ प्रस्तुत्य श्रीकृष्णंप्रति यथारुचि
अन्यतरपक्षनिर्धारणकरणप्रार्थना ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-७७-० (३४५५६)
अर्जुन उवाच। ५-७७-०क्ष् (३६२८)

उक्तं युधिष्ठिरेणैव यावद्वाच्यं जनार्दन ।
तव वाक्यं तु मे श्रुत्वा प्रतिभाति परन्तप ॥ ५-७७-१ (३४५५७)
नैव प्रशममत्र त्वं मन्यसे सुकरं प्रभो ।
लोभाद्वा धृतराष्ट्रस्य दैन्याद्वा समुपस्थितात् ॥ ५-७७-२ (३४५५८)
अफलं मन्यसे वाऽपि पुरुषस्य पराक्रमम् ।
न चान्तरेण कर्माणि पौरुषेण बलोदयः ॥ ५-७७-३ (३४५५९)
तदिदं भाषितं वाक्यं तथाचन तथैव तत् ।
न चैतदेवं द्रष्टव्यमसाध्यमपि किंचन ॥ ५-७७-४ (३४५६०)
किं चैतन्मन्यसे कृच्छ्रमस्माकमवसादकम् ।
कुर्वन्ति तेषां कर्माणि येषां नास्ति फलोदयः ॥ ५-७७-५ (३४५६१)
संपाद्यमानं सम्यक्व स्यात्कर्म सफलं प्रभो ।
स तथा कृष्ण वर्तस्व यथा शर्म भवेत्परैः ॥ ५-७७-६ (३४५६२)
पाण्डवानां कुरूणां च भवान्नः प्रथमः सुहृत् ।
सुराणामसुराणां च यथा वीर प्रजापतिः ॥ ५-७७-७ (३४५६३)
कुरूणां पाण्डवानां च प्रतिपत्स्व निरामयम् ।
अस्मद्धितमनुष्ठानं मन्ये तव न दुष्करम् ॥ ५-७७-८ (३४५६४)
एवं च कार्यतामेति कार्यं तव जनार्दन ।
गमनादेवमेव त्वं करिष्यसि जनार्दन ॥ ५-७७-९ (३४५६५)
चिकीर्षितमथान्यत्ते तस्मिन्वीर दुरात्मानि ।
भविष्यति च तत्सर्वं यथा तव चिकीर्षितम् ॥ ५-७७-१० (३४५६६)
शर्म तैः सह वा नोऽस्तु तव वा यच्चिकीर्षितम् ।
विचार्यमाणो यः कामस्तव कृष्ण स नो गुरुः ॥ ५-७७-११ (३४५६७)
न स नार्हति दुष्टात्मा वधं ससुतबान्धवः ।
येन धर्मसुते दृष्टा न सा श्रीरुपमर्षिता ॥ ५-७७-१२ (३४५६८)
यच्चाप्यपश्यतोपायं धर्मिष्ठं मधुसूदन ।
उपायेन नृशंसेन हृता दुर्द्यूतदेविना ॥ ५-७७-१३ (३४५६९)
कथं हि पुरुषो जातः क्षत्रियेषु धनुर्धरः ।
समाहूतो निवर्तेत प्राणत्यागेऽप्युपस्थिते ॥ ५-७७-१४ (३४५७०)
अधर्मेण जितान्दृष्ट्वा वने प्रवृजितांस्तथा ।
वध्यतां मम वार्ष्णेय निर्गतोऽसौ सुयोधनः ॥ ५-७७-१५ (३४५७१)
न चैतदद्भुतं कृष्ण मित्रार्थे यच्चिकीर्षसि ।
क्रिया कथंच मुख्या स्यान्मृदुना चेतरेण वा ॥ ५-७७-१६ (३४५७२)
अथवा मन्यसे ज्यायान्वधस्तेषामनन्तरम् ।
तदेव क्रियतामाशु न विचार्यमतस्त्वया ॥ ५-७७-१७ (३४५७३)
जानासि हि यथैतेन द्रौपदी पापबुद्धिना ।
परिक्लिष्टा सभामध्ये तच्च तस्योपमर्षितम् ॥ ५-७७-१८ (३४५७४)

स नाम सम्यग्वर्तेत पाण्डवेष्विति माधव ।
न मे सञ्जायते बुद्धिर्बीजमुप्तमिवोषरे ॥ ५-७७-१९ (३४५७५)
तस्माद्यन्मन्यसे युक्तं पाण्डवानां हितं च यत् ।
तथाऽऽशु कुरु वार्ष्णेय यन्नः कार्यमनन्तरम् ॥ ॥ ५-७७-२० (३४५७६)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
सप्तसप्ततितमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-७७-२ दैन्याद्वा अस्मदीयात् ॥
५-७७-४ नहि युद्धं न कामये इति यत्त्वया भाषित तथाचन
तथापिच चनशब्दोऽप्यर्थे । यद्यपि ममैतदनिष्टं तथापि
त्वया यद्भाषितं तत्तथैव भविध्यतीत्यर्थः । परंतु शमोपि
तव नासाध्योऽस्तीत्याह नचेति ॥
५-७७-८ निरामयं कुशलम् ॥
५-७७-९ कार्यतां औचित्यम् । कार्यं कर्म ॥
५-७७-१४ समाहूतो द्यूतार्थम् ॥
५-७७-१५ निर्गतः निश्चयेन प्राप्तः ॥
५-७७-१६ कथंच कथमपि । मुख्या फलवती। मृदुना साम्ना। इतरेण
युद्धेन ॥

उद्योगपर्व - अध्याय ०७८
॥ श्रीः ॥
५.७८. अध्यायः ७८

Mahabharata - Udyoga Parva - Chapter Topics
श्रीकृष्णेन अर्जुनंप्रति दण्डार्हे सुयोधने शमकरणस्य
दुश्शकत्वाभिधानपूर्वकं युधिष्ठिरगौरवेण स्वस्य तदर्थं
प्रयतनकथनम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-७८-० (३४५७७)
श्रीभगवानुवाच। ५-७८-०क्ष् (३६२९)
एवमेतन्महाबाहो यथा वदसि पाण्डव ।
पाण्डवानां कुरूणां च प्रतिपत्स्ये निरामयम् ।
सर्वं त्विदं ममायत्तं बीभत्सो कर्मणोर्द्वयोः ॥ ५-७८-१ (३४५७८)

क्षेत्रं हि रसवच्छुद्धं कर्मणैवोपपादितम् ।
ऋते वर्षान्न कौन्तेय जातु निर्वर्तयेत्फलम् ॥ ५-७८-२ (३४५७९)
तत्र वै पौरुषं ब्रूयुरासेकं यत्र कारितम् ।
तत्र चापि ध्रुवं पश्येच्छोषणं दैवकारितम् ॥ ५-७८-३ (३४५८०)
तदिदं निश्चित्तं बुद्ध्या पूर्वैरपि महात्मभिः ।
दैवे च मानुषे चैव संयुक्तं लोककारणम् ॥ ५-७८-४ (३४५८१)
अहं हि तत्करिष्यामि परं पुरुषकारतः ।
देवं तु न मया शक्यं कर्म कर्तुं कथंचन ॥ ५-७८-५ (३४५८२)
स हि धर्मं च लोकं च त्यक्त्वा चरति दुर्मतिः ।
न हि सन्तप्यते तेन तथारूपेण कर्मणा ॥ ५-७८-६ (३४५८३)
तथापि बुद्धिं पापिष्ठां वर्धयन्त्यस्य मन्त्रिणः ।
शकुनिः सूतपुत्रश्च भ्राता दुःशासनस्तथा ॥ ५-७८-७ (३४५८४)
स हि त्यागेन राज्यस्य न शमं समुपैष्यति ।
अन्तरेण वधं पार्थ सानुबन्धः सुयोधनः ॥ ५-७८-८ (३४५८५)
न चापि प्रणिपातेन त्यक्तुमिच्छति धर्मराट् ।
याच्यमानश्च राज्यं स न प्रजास्यति दुर्मतिः ॥ ५-७८-९ (३४५८६)
न तु मन्ये स तद्वाच्यो यद्युधिष्ठिरशातनम् ।
उक्तं प्रयोजनं यत्तु धर्मराजेन भारत ॥ ५-७८-१० (३४५८७)
तथा पापस्तु तत्सर्वं न करिष्यति कौरवः ।
तस्मिंश्चाक्रियमाणेऽसौ लोके वध्यो भविष्यति ॥ ५-७८-११ (३४५८८)
मम चापि स वध्यो हि जगतश्चापि भारत ।
तेन कौमारके यूयं सर्वे विप्रकृताः सदा ॥ ५-७८-१२ (३४५८९)
विप्रलुप्तं च वो राज्यं नृशंसेन दुरात्मना ।
न चोपशाम्यते पापः श्रियं दृष्ट्वा युधिष्ठिरे ॥ ५-७८-१३ (३४५९०)
असकृच्चाप्यहं तेन त्वत्कृते पार्थ भेदितः ।
न मया तद्गृहीतं च पापं तस्य चिकीर्षितम् ॥ ५-७८-१४ (३४५९१)
जानासि हि महाबाहो त्वमप्यस्य परं मतम् ।
प्रियं चिकीर्षमाणं च धर्मराजस्य मामपि ॥ ५-७८-१५ (३४५९२)
संजानंस्तस्य चात्मानं मम चैव परं मतम् ।
अजानन्निव मां कस्मादर्जुनाद्याभिशङ्कसे ॥ ५-७८-१६ (३४५९३)
यच्चापि परमं दिव्यं तच्चाप्यनुगतं त्वया ।
विधानं विहितं पार्थ कथं शर्म भवेत्परैः ॥ ५-७८-१७ (३४५९४)
यत्तु वाचा मया शक्यं कर्मणा वाऽपि पाण्डव ।
करिष्ये तदहं पार्थ न त्वाशंसे शमं परैः ॥ ५-७८-१८ (३४५९५)
कथं गोहरणे ह्युक्तो नैतच्छर्म तथा हितम् ।
याच्यमानो हि भीष्मेण संवत्सरगतेऽध्वनि ॥ ५-७८-१९ (३४५९६)

तदैव ते पराभूता यदा सङ्कल्पितास्त्वया ।
लवशः क्षणशश्चापि न च तुष्टः सुयोधनः ॥ ५-७८-२० (३४५९७)
सर्वथा तु मया कार्यं धर्मराजस्य शासनम् ।
विभाव्यं तस्य भूयश्च कर्म पापं दुरात्मनः ॥ ॥ ५-७८-२१ (३४५९८)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
अष्टसप्ततितमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-७८-१ द्वयोः कर्मणोः शमयुद्धयोर्मध्ये इदं अनामयम् ॥
५-७८-४ संयुक्तं आहितम् । लोककारणं लोकहितसाधनम् ॥
५-७८-१७ दिव्यं विधानं भूभारापहारार्थं स्वर्गाद्देवानामवतरणम् ॥
५-७८-१८ आशंसे संभावयामि ॥
५-७८-१९ भीष्मेण एतच्छर्म याच्यमानोपि सः हितं कथं नोक्तः
अपितु उक्तः । संवत्सरगते गतसंवत्सरे ॥
५-७८-२० संकल्पिताः वध्यत्वेन निश्चिताः ॥
५-७८-२१ विभाव्यं विचारणीयम् ॥

उद्योगपर्व - अध्याय ०७९
॥ श्रीः ॥
५.७९. अध्यायः ७९

Mahabharata - Udyoga Parva - Chapter Topics
नकुलेन श्रीकृष्णंप्रति स्वस्य शमे अभिसन्धिप्रदर्शनपूर्वकं
सन्धिकरणस्य तेन सुशकत्वाभिधानम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-७९-० (३४५९९)
नकुल उवाच । ५-७९-०क्ष् (३६३०)
उक्तं बहुविधं वाक्यं धर्मराजेन माधव ।
धर्मज्ञेन वदान्येन श्रुतं चैव हि तत्त्वया ॥ ५-७९-१ (३४६००)
मतमाज्ञाय राज्ञश्च भीमसेनेन माधव ।
संशमो बाहुवीर्यं च ख्यापितं माधवात्मनः ॥ ५-७९-२ (३४६०१)
तथैव फाल्गुनेनापि यदुक्तं तत्त्वया श्रुतम् ।
आत्मनश्च मतं वीर कथितं भवताऽसकृत् ॥ ५-७९-३ (३४६०२)
सर्वमेतदतिक्रम्य श्रुत्वा परमतं भवान् ।

यत्प्राप्तकालं मन्येथास्तत्कुर्याः पुरुषोत्तम ॥ ५-७९-४ (३४६०३)
तस्मिंरतस्मिन्निमित्ते हि मतं भवति केशव ।
प्राप्तकालं मनुष्येण क्षमं कार्यमरिन्दम ॥ ५-७९-५ (३४६०४)
अन्यथा चिन्तितो ह्यर्थः पुनर्भवति सोऽन्यथा ।
अनित्यमतयो लोके नराः पुरुषसत्तम ॥ ५-७९-६ (३४६०५)
अन्यथाबुद्धयो ह्यासन्नस्मासु वनवासिषु ।
अदृश्येष्वन्यथा कृष्ण दृश्येषु पुनरन्यथा ॥ ५-७९-७ (३४६०६)
अस्माकमपि वार्ष्णेय वने विचरतां तदा ।
न तथा प्रणयो राज्ये यथा संप्रति वर्तते ॥ ५-७९-८ (३४६०७)
निवृत्तवनवासान्नः श्रुत्वा वीर समागताः ।
अक्षौहिण्यो हि सप्ते मास्त्वत्प्रसादाज्जनार्दन ॥ ५-७९-९ (३४६०८)
इमान्हि पुरुषव्याघ्रानचिन्त्यबलपौरुषात् ।
आत्तशस्त्रान्रणे दृष्ट्वा न व्यथेदिह कः पुमान् ॥ ५-७९-१० (३४६०९)
स भवान्कुरुमध्ये तं सान्त्वपूर्वं भयोत्तरम् ।
ब्रूयाद्वाक्यं यथा मन्दो न व्यथेत सुयोधनः ॥ ५-७९-११ (३४६१०)
युधिष्ठिरं भीमसेनं बीभत्सुं चापराचितम् ।
सहदेवं च मां चैव त्वां च रामं च केशव ॥ ५-७९-१२ (३४६११)
सात्यकिं च महावीर्यं विराटं च महात्मजम् ।
द्रुपदं च महामात्यं धृष्टद्युम्नं च माधव ॥ ५-७९-१३ (३४६१२)
काशिराजं च विक्रान्तं धृष्टकेतुं च चेदिपम् ।
मांसशोणितभृन्मर्त्यः प्रतियुध्येत को युधि ॥ ५-७९-१४ (३४६१३)
स भवान्गमनादेव साधयिष्यत्यसंशयम् ।
इष्टमर्थं महाबाहो धर्मराजस्य केवलम् ॥ ५-७९-१५ (३४६१४)
विदुरश्चैव भीष्मश्च द्रोणश्च सहबाह्लिकः ।
श्रेयः समर्था विज्ञातुमुच्यमानास्त्वयाऽनघ ॥ ५-७९-१६ (३४६१५)
ते चैनमनुनेष्यन्ति धृतराष्ट्रं जनाधिपम् ।
तं च पापसमाचारं सहामात्यं सुयोधनम् ॥ ५-७९-१७ (३४६१६)
श्रोता चार्थस्य विदुरस्त्वं च वक्ता जनार्दन ।
कमिवार्थं निवर्तन्तं स्थापयेतां न वर्त्मनि ॥ ॥ ५-७९-१८ (३४६१७)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
एकोनाशीतितमोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-७९-१८ अर्थं प्रयोजनम् । निवर्तन्तं भ्रश्यन्तम् ॥

॥ श्रीः ॥
५.८०. अध्यायः ८०

Mahabharata - Udyoga Parva - Chapter Topics
सहदेवेन श्रीकृष्णंप्रति कुरूणां शमाभिसन्धावपि
युद्धपक्षस्यैव स्थापनकथनम् ॥ १ ॥
सात्यकिना सहदेवपक्षानुमोदने योधानां सर्षात्सिंहनादः ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-८०-० (३४६१८)
सहदेव उवाच। ५-८०-०क्ष् (३६३१)
यदेतत्कथितं राज्ञा धर्म एष सनातनः ।
यथा च युद्धमेव स्यात्तथा कार्यमरिन्दम ॥ ५-८०-१ (३४६१९)
यदि प्रसममिच्छेयुः कुरवः पाण्डवैः सह ।
तथापि युद्धं दाशार्ह योजयेथाः सहैव तैः ॥ ५-८०-२ (३४६२०)
कथं नु दृष्ट्वा पाञ्चालीं तथा कृष्ण सभागताम् ।
अवधेन प्रशाम्येत मम मन्युः सुयोधने ॥ ५-८०-३ (३४६२१)
यदि भीमार्जुनौ कृष्ण धर्मराजश्च धार्मिकः ।
धर्ममुत्सृज्य तेनाहं योद्धुमिच्छामि संयुगे ॥ ५-८०-४ (३४६२२)
ब्रूहि मद्वचनं कृष्ण सुयोधनमपण्डितम् ।
कृच्छ्रे वने वा वस्तव्यं पुरे वा नागसाह्वये ॥ ५-८०-५ (३४६२३)
सात्यकिरुवाच। ५-८०-६क्ष् (३६३२)
सत्यमाह महाबाहो सहदेवो महामतिः ।
दुर्योधनवधे शान्तिस्तस्य कोपस्य मे भवेत् ॥ ५-८०-६ (३४६२४)
न जानासि यथा दृष्ट्वा चीराजिनधरान्वने ।
तवापि मन्युरुद्भूतो दुःखितान्प्रेक्ष्य पाण्डवान् ॥ ५-८०-७ (३४६२५)
तस्मान्माद्रीसुतः शूरो यदाह रणकर्कशः ।
वचनं सर्वयोधानां तन्मतं पुरुषोत्तम ॥ ५-८०-८ (३४६२६)
वैशम्पायन उवाच। ५-८०-९क्ष् (३६३३)
एवं वदि वाक्यं तु युयुधाने महामतौ ।
सुभीमः सिंहनादोऽभूद्योधानां तत्र सर्वशः ॥ ५-८०-९ (३४६२७)
सर्वे हि सर्वशो वीरास्तद्वचः प्रत्यपूजयन् ।
साधुसाध्विति शैनेयं हर्षयन्तो युयुत्सवः ॥ ॥ ५-८०-१० (३४६२८)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि अशीतितमोऽध्यायः ॥

५-८०-४ यदि यद्यपि भीमादयो धार्मिकाः स्युः तथापि अहं
धर्ममुत्सृज्य तेन सह योद्धुमिच्छामि ॥

उद्योगपर्व - अध्याय ०८१
॥ श्रीः ॥
५.८१. अध्यायः ८१

श्रीकृष्णेन द्यूतसभायां स्वानुभूतदुःसहदुःखमभिनिवेद्य रुदन्तीं
द्रौपदींप्रति सुयोधनादिनिधनप्रतिज्ञानपूर्वकं समाश्वासनम् ॥ १ ॥

५-८१-० (३४६२९)
वैशम्पायन उवाच। ५-८१-०क्ष् (३६३४)
राज्ञस्तु वचनं श्रुत्वा धर्मार्थसहितं हितम् ।
कृष्णा दाशार्हमासीनमब्रवीच्छोककर्शिता ॥ ५-८१-१ (३४६३०)
सुता द्रुपदराजस्य स्वसितायतमूर्धजा ।
संपूज्य सहदेवं च सात्यकिं च महारथम् ॥ ५-८१-२ (३४६३१)
भीमसेनं च संशान्तं दृष्ट्वा परमदुर्मनाः ।
अश्रुपूर्णेक्षणा वाक्यमुवाचेदं मनस्विनी ॥ ५-८१-३ (३४६३२)
विदितं ते महाबाहो धर्मज्ञ मधुसूदन ।
यथा निकृतिमास्थाय भ्रंशिताः पाण्डवाः सुखात् ॥ ५-८१-४ (३४६३३)
धृतराष्ट्रस्य पुत्रेण सामात्येन जनार्दन ।
यथा च सञ्जयो राज्ञा मन्त्रं रहसि श्रावितः ॥ ५-८१-५ (३४६३४)
युधिष्ठिरस्य दाशार्ह तच्चापि विदितं तव ।
यथोक्तः सञ्जयश्चैव तच्च सर्वं श्रुतं त्वया ॥ ५-८१-६ (३४६३५)
पञ्च नस्तात दीयन्तां ग्रामा इति महाद्युते ।
अविस्थलं वृकस्थलं माकन्दीं वारणावतम् ॥ ५-८१-७ (३४६३६)
अवसानं महाबाहो कंचिदेकं च पञ्चमम् ।
इति दुर्योधनो वाच्यः सुहृदश्चास्य केशव ॥ ५-८१-८ (३४६३७)
न चापि ह्यकरोद्वाक्यं श्रुत्वा कृष्ण सुयोधनः ।
युधिष्ठिरस्य दाशार्ह श्रीमतः सन्धिमिच्छतः ॥ ५-८१-९ (३४६३८)
अप्रदानेन राज्यस्य यदि कृष्ण सुयोधनः ।

सन्धिमिच्छेन्न कर्तव्यं तत्र गत्वा कथंचन ॥ ५-८१-१० (३४६३९)
शक्ष्यन्ति हि महाबाहो पाण्डवाः सृञ्जयैः सह ।
धार्तराष्ट्रबलं घोरं क्रुद्धं प्रतिसमासितुम् ॥ ५-८१-११ (३४६४०)
न हि साम्ना न दानेन शक्योऽर्थस्तेषु कश्चन ।
तस्मात्तेषु न कर्तव्या कृपा ते मधुसूदन ॥ ५-८१-१२ (३४६४१)
साम्ना दानेन वा कृष्ण ये न शाम्यन्ति शत्रवः ।
योक्तव्यस्तेषु दण्डः स्याज्जीवितं परिरक्षता ॥ ५-८१-१३ (३४६४२)
तस्मात्तेषु महादण्डः क्षेप्तव्यः क्षिप्रमच्युत ।
त्वया चैव महाबाहो पाण्डवैः सह सृञ्जयैः ॥ ५-८१-१४ (३४६४३)
एतत्समर्थं पार्थानां तव चैव यशस्करम् ।
क्रियमाणं भवेत्कृष्ण क्षत्रस्य च सुखावहम् ॥ ५-८१-१५ (३४६४४)
क्षत्रियेण हि हन्तव्यः क्षत्रियो लोभमास्थितः ।
अक्षत्रियो वा दाशार्ह स्वधर्ममनुतिष्ठता ॥ ५-८१-१६ (३४६४५)
अन्यत्र ब्राह्मणात्तात सर्वपापेष्ववस्थितात् ।
गुरुर्हि सर्ववर्णानां ब्राह्मणः प्रसृताग्रभुक् ॥ ५-८१-१७ (३४६४६)
यथाऽवध्ये वध्यमाने भवेद्दोषो जनार्दन ।
स वध्यस्यावधे दृष्ट इति धर्मविदो विदुः ॥ ५-८१-१८ (३४६४७)
यथा त्वां न स्पृशेदेष दोषः कृष्ण तथा कुरु ।
पाण्डवैः सह दाशार्हैः सृञ्जयैश्च ससैनिकैः ॥ ५-८१-१९ (३४६४८)
पुनरुक्तं च वक्ष्यामि विश्रम्भेण जनार्दन ।
का तु सीमन्तिनी मादृकं पृथिव्यामस्ति केशव ॥ ५-८१-२० (३४६४९)
सुता द्रुपदराजस्य वेदिमध्यात्समुत्थिता ।
धृष्टद्युम्नस्य भगिनी तव कृष्ण प्रिया सखी ॥ ५-८१-२१ (३४६५०)
आजमूढकुलं प्राप्त स्नुषा पाण्डोर्महात्मनः ।
महिषी पाण्डुपुत्राणां पञ्चेन्द्रसमवर्चसाम् ॥ ५-८१-२२ (३४६५१)
सुता मे पञ्चभिर्वीरैः पञ्च जाता महारथाः ।
अभिमन्युर्यथा कृष्ण तथा ते तव धर्मतः ॥ ५-८१-२३ (३४६५२)
साऽहं केशग्रहं प्राप्ता परिक्लिष्टा सभां गता ।
पश्यतां पाण्डुपुत्राणां त्वयि जीवति केशव ॥ ५-८१-२४ (३४६५३)
जीवत्सु पाण्डुपुत्रेषु पञ्चालेष्वथ वृष्णिषु ।
दासीभाताऽस्मि पापानां सभामध्ये व्यवस्थिता ॥ ५-८१-२५ (३४६५४)
निरमर्षेष्वचेष्टेषु प्रेक्ष्यमाणेषु पाण्डुषु ।
पाहि मामिति गोविन्द मनसा चिन्तितोसि मे ॥ ५-८१-२६ (३४६५५)
यत्र मां भगवान्राजा श्वशुरो वाक्यमब्रवीत् ।
वरं वृणीष्व पाञ्चालि वरार्हाऽसि मता मम ॥ ५-८१-२७ (३४६५६)
अदासाः पाण्डवाः सन्तु सरथाः सायुधा इति ।

मयोक्ते यत्र निर्मुक्ता वनवासाय केशव ॥ ५-८१-२८ (३४६५७)
एवंविधानां दुःखानामभिज्ञोऽसि जनार्दन ।
त्रायस्व पुण्डरीकाक्ष सभर्तृज्ञातिबान्धवान् ॥ ५-८१-२९ (३४६५८)
नन्वहं कृष्ण भीष्मस्य धृतराष्ट्रस्य चोभयोः ।
श्नुषा भवामि धर्मेण साऽहं दासीकृता बलात् ॥ ५-८१-३० (३४६५९)
धिक्पार्थस्य धनुष्मत्तां भीमसेनस्य धिग्बलम् ।
यत्र दुर्योधनः कृष्ण मुहूर्तमपि जीवति ॥ ५-८१-३१ (३४६६०)
यदि तेऽहमनुग्राह्या यदि तेऽस्ति कृपा मयि ।
धार्तराष्ट्रेषु वै कोपः सर्वः कृष्ण विधीयताम् ॥ ५-८१-३२ (३४६६१)
वैशम्पायन उवाच। ५-८१-३३क्ष् (३६३५)
इत्युक्त्वा मृदुसंहारं वृजिनाग्रं सुदर्शनम् ।
सुनीलमसितापाङ्गी सर्वगन्धादिवासितम् ॥ ५-८१-३३ (३४६६२)
सर्वलक्षणसंपन्नं महाभुजगवर्चसम् ।
केशपक्षं वरारोहा गृह्य वामेन पाणिना ॥ ५-८१-३४ (३४६६३)
पद्माक्षी पुण्डरीकाक्षमुपेत्य गजगामिनी ।
अश्रुपूर्णेक्षणा कृष्णा कृष्णं वचनमब्रवीत् ॥ ५-८१-३५ (३४६६४)
अयं ते पुण्डरीकाक्ष दुःशासनकरोद्धृतः ।
स्मर्तव्यः सर्वकार्येषु परेषां सन्धिमिच्छताम् ॥ ५-८१-३६ (३४६६५)
यदि भीमार्जुनौ कृष्ण कृपणौ सन्धिकामुकौ ।
पिता मे योत्स्यते वृद्धः सह पुत्रैर्महारथैः ॥ ५-८१-३७ (३४६६६)
पञ्च चैव महावीर्याः पुत्रा मे मधुसूदन ।
अभिमन्युं पुरस्कृत्य योत्स्यन्ते कुरुभिः सह ॥ ५-८१-३८ (३४६६७)
दुःशासनभुजं श्यामं संछिन्नं पांसुकुण्ठितम् ।
यद्यहं तु न पश्यामि का शान्तिर्हृदयस्य मे ॥ ५-८१-३९ (३४६६८)
त्रयोदश हि वर्षाणि प्रतीक्षन्त्या गतानि मे ।
विधाय हृदये मन्युं प्रदीप्तमिव पावकम् ॥ ५-८१-४० (३४६६९)
विदीर्यते मे हृदयं भीमवाक्षल्यपीडितम् ।
योऽयमद्य महाबाहुर्धर्ममेवानुपश्यति ॥ ५-८१-४१ (३४६७०)
इत्युक्त्वा बाष्परुद्धेन कण्ठेनायतलोचना ।
रुरोद कृष्णा सोत्कम्पं सस्वरं बाष्पगद्गदम् ॥ ५-८१-४२ (३४६७१)
स्तनौ पीनायतश्रोणी सहितावभिवर्षती ।
द्रवीभूतमिवात्युष्णं मुञ्चन्ती वारि नेत्रजम् ॥ ५-८१-४३ (३४६७२)
तामुवाच महाबाहुः केशवः परिसान्त्वयन् ।
अचिराद्द्रक्ष्यसे कृष्णे रुदतीर्भरतस्त्रियः ॥ ५-८१-४४ (३४६७३)
एवं ता भीरु रोस्त्यन्ति निहतज्ञातिबान्धवाः ।
हतमित्रा हतबला येषां क्रुद्धाऽसि भामिनी ॥ ५-८१-४५ (३४६७४)

अहं च तत्करिष्यामि भीमार्जुनयमैः सह ।
युधिष्ठिरनियोगेन दैवाच्च विधिनिर्मितात् ॥ ५-८१-४६ (३४६७५)
धार्तराष्ट्राः कालपक्वा न चेच्छ्रुण्वन्ति मे वचः ।
शेष्यन्ते निहता भूमौ श्वसृगालादनीकृताः ॥ ५-८१-४७ (३४६७६)
चलेद्धि हिमवाञ्शैलो मेदिनी शतधा भवेत् ।
द्यौः पतेच्च सनक्षत्रा न मे मोघं वचो भवेत् ॥ ५-८१-४९अग
शुष्येत्तोयनिधिः कृष्णे न मे मोघं वचो भवेत्।'
सत्यं ते प्रतिजानामि कृष्णे बाष्पो निगृह्यताम् ।
हतामित्राञ्श्रिया युक्तानचिदाद्द्रक्ष्यसे पतीन् ॥ ॥ ५-८१-४८ (३४६७७)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
एकाशीतितमोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-८१-११ प्रतिसमासितुं प्रतिपक्षतया स्थातुम् ॥
५-८१-१५ समर्थं युक्तम् ॥
५-८१-१७ प्रमृतं प्रदत्तं च तदग्रं च तस्य भोक्ता प्रसृताग्रभुक् ॥
५-८१-३३ मृदुसंहारं वेणीरूपेण समाहृतमपि मृदुम् । वृजिनाग्रं
कुटिलाग्रं केशवत्सूक्ष्माग्रं वा। वृजिनः कुटिलेऽन्यवदिति
विश्वः। सुदर्शनं रमणीयम् ॥
५-८१-४५ रोत्स्यन्ति रोदिष्यन्ति ॥

उद्योगपर्व - अध्याय ०८२
॥ श्रीः ॥
५.८२. अध्यायः ८२

Mahabharata - Udyoga Parva - Chapter Topics
युधिष्ठिरादिभिरनुगम्यमानेन श्रीकृष्णेन रथमधिरुह्य सात्यकिना
सह हास्तिनपुरंप्रति प्रस्थानम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-८२-० (३४६७८)
अर्जुन उवाच। ५-८२-०क्ष् (३६३६)
कुरूणामद्य सर्वेषां भवान्सुहृदनुत्तमः ।
संबन्धी दयितो नित्यमुभयोः पक्षयोरपि ॥ ५-८२-१ (३४६७९)
पाण्डवैर्धार्तराष्ट्राणां प्रतिपाद्यमनामयम् ।

समर्थः प्रशमं चैव कर्तुमर्हसि केशव ॥ ५-८२-२ (३४६८०)
त्वमित्तः पुण्डरीकाक्ष सुयोधनममर्षणम् ।
शान्त्यर्थं भ्रातरं ब्रूया यत्तद्वाच्यममित्रहन् ॥ ५-८२-३ (३४६८१)
त्वया धर्मार्थयुक्तं चेदुक्तं शिवमनामयम् ।
हितं नादास्यते बालो दिष्टस्य वशमेष्यति ॥ ५-८२-४ (३४६८२)
श्रीभगवानुवाच। ५-८२-५क्ष् (३६३७)
धर्म्यमस्मद्धितं चैव कुरूणां यदनामयम् ।
एष यास्यामि राजानं धृतराष्ट्रमभीप्सया ॥ ५-८२-५ (३४६८३)
वैशम्पायन उवाच। ५-८२-६क्ष् (३६३८)
ततो व्यपेते तमसि सूर्ये विमल उद्गते ।
मैत्रे मुहूर्ते संप्राप्ते मद्वर्चिषि दिवाकरे ॥ ५-८२-६ (३४६८४)
कौमुदे मासि रेवत्यां शरदन्ते हिमागमे ।
स्फीतसस्यसुखे काले कल्यः सत्ववतां वरः ॥ ५-८२-७ (३४६८५)
मङ्गल्याः पुण्यनिर्घोषा वाचः श्रृण्वंश्च सूनृताः ।
ब्राह्मणानां प्रतीतानामृषीणामिव वासवः ॥ ५-८२-८ (३४६८६)
कृत्वा पौर्वाह्णिकं कृत्यं स्नातः शुचिरलङ्कृतः ।
उपतस्थे विवस्वन्तं पावकं च जनार्दनः ॥ ५-८२-९ (३४६८७)
ऋषभं पृष्ठ आलभ्य ब्राह्मणानभिवाद्य च ।
अग्निं प्रदक्षिणं कृत्वा पश्यन्कल्याणमग्रतः ॥ ५-८२-१० (३४६८८)
तत्प्रतिज्ञाय वचनं पाण्डवस्य जनार्दनः ।
शिनेर्नप्तारमासीनमभ्यभाषत सात्यकिम् ॥ ५-८२-११ (३४६८९)
रथ आरोप्यतां शङ्खश्चक्रं च गदया सह ।
उपासङ्गाश्च शक्त्यश्च सर्वप्रहरणानि च ॥ ५-८२-१२ (३४६९०)
दुर्योधनश्च दुष्टात्मा कर्णश्च सहसौबलः ।
न च शत्रुरवज्ञेयो दुर्बलोऽपि बलीयसा ॥ ५-८२-१३ (३४६९१)
ततस्तन्मतमाज्ञाय केशवस्य पुनःसराः ।
प्रसस्त्नुर्योजयिष्यन्तो रथं चक्रगदाभृतः ॥ ५-८२-१४ (३४६९२)
तं दीप्तमिव कालाग्निमाकाशगमिवाशुगम् ।
सूर्यचन्द्रप्रकाशाभ्यां चक्राभ्यां समलङ्कृतम् ॥ ५-८२-१५ (३४६९३)
अर्धचन्द्रैश्च चन्द्रैश्च मत्स्यैः समृगपक्षिभिः ।
पुष्पैश्च विविधैश्चित्रं मणिरत्नैश्च सर्वशः ॥ ५-८२-१६ (३४६९४)
तरुणादित्यसङ्काशं बृहन्तं चारुदर्शनम् ।
मणिहेमविचित्राङ्गं सुध्वजं सुपताकिनम् ॥ ५-८२-१७ (३४६९५)
सूपस्करमनाधृष्यं वैयाघ्रपरिवारणम् ।
यशोघ्नं प्रत्यमित्राणां यदूनां नन्दिवर्धनम् ॥ ५-८२-१८ (३४६९६)
वाजिभिः शैब्यसुग्रीवमेघपुष्पबलाहकैः ।

स्नातैः संपादयामासुः संपन्नैः सर्वसंपदा ॥ ५-८२-१९ (३४६९७)
महिमानं तु कृष्णस्य भूय एवाभिवर्धयन् ।
सुघोषः पतगेन्द्रेण ध्वजेन युयुजे रथः ॥ ५-८२-२० (३४६९८)
तं मेरुशिखरप्रख्यं मेघदुन्दुभिनिस्वनम् ।
आरुरोह रथं सौरिर्विमानमिव कामगम् ॥ ५-८२-२१ (३४६९९)
ततः सात्यकिमारोप्य प्रययौ पुरुषोत्तमः ।
पृथिवीं चान्तरिक्षं च रथघोषेण नादयन् ॥ ५-८२-२२ (३४७००)
व्यपोढाभ्रस्ततः कालः क्षणेन समपद्यत ।
शिवश्चानुववौ वायुः प्रशान्तमभवद्रजः ॥ ५-८२-२३ (३४७०१)
प्रदक्षिणानुलोमाश्च मङ्गल्या मृगपक्षिणः ।
प्रयाणे वासुदेवस्य बभूवुरनुयायिनः ॥ ५-८२-२४ (३४७०२)
मङ्गल्यार्थप्रदैः शब्दैरन्ववर्तन्त सर्वशः ।
सारसाः शतपत्राश्च हंसाश्च मधुसूदनम् ॥ ५-८२-२५ (३४७०३)
मन्त्राहुतिमहाहोमैर्हूयमानश्च पावकः ।
प्रदक्षिणशिखो भूत्वा विधूमः समपद्यत ॥ ५-८२-२६ (३४७०४)
वसिष्ठो वामदेवश्च भूरिद्युम्नो गयः क्रथः ।
शुकनारदवाल्मीका मरुत्तः कुशिको भृगुः ॥ ५-८२-२७ (३४७०५)
देवब्रह्मर्षयश्चैव कृष्णं यदुसुखावहम् ।
प्रदक्षिणमवर्तन्त सहिता वासवानुजम् ॥ ५-८२-२८ (३४७०६)
एवमेतैर्महाभागैर्महर्षिगणसाधुभिः ।
पूजितः प्रययौ कृष्णः कुरूणां सदनं प्रति ॥ ५-८२-२९ (३४७०७)
ग देवताभ्यो नमस्कृत्य ब्राह्मणान्स्वस्ति वाच्य च ।
प्रययौ पुण्डरीकाक्षः सात्यकेन सहाच्युतः ॥ ५-८२-३० (३४७०८)
तं प्रयान्तमनुप्रायात्कुन्तीपुत्रो युधिष्ठिरः ।
भीमसेनार्जुनौ चोभौ माद्रीपुत्रौ च पाण्डवौ ॥ ५-८२-३१ (३४७०९)
चेकितानश्च विक्रान्तो धृष्टकेतुश्च चेदिपः ।
द्रुपदः काशिराजश्च शिखण्डी च महारथः ॥ ५-८२-३२ (३४७१०)
धृष्टद्युम्नः सपुत्रश्च विराटः केकयैः सह ।
संसाधनार्थं प्रययुः क्षत्रियाः क्षत्रियर्षभम् ॥ ५-८२-३३ (३४७११)
ततोऽनुव्रज्य गोविन्दं धर्मराजो युधिष्ठिरः ।
राज्ञां सकाशे द्युतिमानुवाचेदं वचस्तदा ॥ ५-८२-३४ (३४७१२)
यो वै न कामान्न भयान्न लोभान्नार्थकारणात् ।
अन्यायमनुवर्तेत स्थिरबुद्धिरलोलुपः ॥ ५-८२-३५ (३४७१३)
धर्मज्ञो धृतिमान्प्राज्ञः सर्वभूतेषु केशवः ।
ईश्वरः सर्वभूतानां देवदेवः सनातनः ॥ ५-८२-३६ (३४७१४)
तं सर्वगुणसंपन्नं श्रीवत्सकृतलक्षणम् ।

संरिष्वज्य कौन्तेयः सन्देष्टुमुपचक्रमे ॥ ॥ ५-८२-३७ (३४७१५)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
द्व्यशीतितमोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-८२-२ प्रतिपाद्यं संपाद्यात् । अनामयं कुशलम् ॥
५-८२-५ अभीप्सया प्राप्तुमिच्छया ॥
५-८२-७ कौमुदे कर्तिके ॥
५-८२-११ प्रतिज्ञाय अनुस्मृत्य ॥
५-८२-१५ आकाशगः सूर्यः ॥
५-८२-१८ सूपस्करं शोभनैरुपकरणैरुपेताम् । नन्दिवर्धनं
आनन्दवर्धनम् ॥
५-८२-१९ संपादयामासुः सज्जीकृतवन्तः ॥
५-८२-३३ संसाधनार्थं कार्यनिष्पत्त्यर्थम् ॥
५-८२- ५-८२- ५-८२-

उद्योगपर्व - अध्याय ०८३
॥ श्रीः ॥
५.८३. अध्यायः ८३

Mahabharata - Udyoga Parva - Chapter Topics
युधिष्ठिरेण श्रीकृष्णे पृथांप्रति
कुशलप्रश्नपूर्वकस्वभिद्वादननिवेदनसमाश्वासनप्रार्थना ॥ १ ॥
श्रीकृष्णस्य मध्येमार्गं तामदग्न्यादिमहर्षिसमागमः ॥ २ ॥
महर्षिभिः श्रीकृष्णे धृतराष्ट्रादिभिः सह तत्संवादशुश्रूषया
तत्र स्वागमननिवेदनम् ॥ ३ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-८३-० (३४७१६)
युधिष्ठिर उवाच। ५-८३-०क्ष् (३६३९)
या सा बाल्यात्प्रभृत्यस्मान्पर्यवर्धयताबला ।
उपवासतपःशीला सदा स्वस्त्ययने रता ॥ ५-८३-१ (३४७१७)
देवतातिथिपूजासु गुरुशुश्रूषणे रता ।
वत्सला प्रियपुत्रा च माताऽस्माकं जनार्दन ॥ ५-८३-२ (३४७१८)
सुयोधनभयाद्या नो त्रायतामित्रकर्शन ।

महतो मृत्युसंबाधुद्धस्तरान्नौरिवार्णवात् ॥ ५-८३-३ (३४७१९)
अस्मत्कृते च सततं यया दुःखानि माधव ।
अनुभूतान्यदुःखार्हा तां स्म पृच्छेरनामयम् ॥ ५-८३-४ (३४७२०)
भृशमाश्वासयेश्चैनां पुत्रशोकपरिप्लुताम् ।
अभिवाद्य स्वजेथास्त्वं पाण्डवान्परिकीर्तयन् ॥ ५-८३-५ (३४७२१)
ऊढात्प्रभृति दुःखानि श्वशुराणामरिन्दम ।
निराकाराऽतदर्हा च पश्यन्ती दुःखमश्नुते ॥ ५-८३-६ (३४७२२)
अपि जातु स कालः स्यात्कृष्ण दुःखविपर्ययः ।
यदहं मातरं क्लिष्टां सुखं दद्यामरिन्दम ॥ ५-८३-७ (३४७२३)
प्रव्रजन्तोऽनुधावन्तीं कृपणां पुत्रगृद्धिनीम् ।
रुदतीमपहायैनामगच्छाम वयं वनम् ॥ ५-८३-८ (३४७२४)
सा नूनं म्रियते दुःखैः सा चेज्जीवति केशव ।
तथा पुत्राधिभिर्गाढमार्तामर्चय सत्कृत ॥ ५-८३-९ (३४७२५)
अभिवाद्याऽथ सा कृष्ण त्वया मद्वचवाद्विभो ।
धृतराष्ट्रश्च कौरव्यो राजानश्च वयोधिकाः ॥ ५-८३-१० (३४७२६)
भीष्मं द्रोणं कृपं चैव महाराजं च वाह्लिकम् ।
द्रौणिं च सोमदत्तं च सर्वांश्च भरतान्पृथक् ॥ ५-८३-११ (३४७२७)
ग यथावयो यथास्थानं प्रपद्यस्व जनार्दन।'
विदुरं च महाप्राज्ञं कुरूणां मन्त्रधारिणम् ।
अगाधबुद्धिं मर्मज्ञं स्वजेथा मधुसूदन ॥ ५-८३-१२ (३४७२८)
वैशम्पायन उवाच। ५-८३-१३क्ष (३६४०)
इत्युक्त्वा केशवं तत्र राजमध्ये युधिष्ठिरः ।
अनुज्ञातो निववृते कृष्णं कृत्वा प्रदक्षिणम् ॥ ५-८३-१३ (३४७२९)
व्रजन्नेव तु बीभत्सुः सखायं पुरुषर्षभम् ।
अब्रवीत्परवीरघ्नं दाशार्हमपराजितम् ॥ ५-८३-१४ (३४७३०)
यदस्माकं विभो वृत्तं पुरा वै मन्त्रनिश्चये ।
अर्धराज्यस्य गोविद विदितं सर्वराजसु ॥ ५-८३-१५ (३४७३१)
तच्चेद्दद्यादखङ्गेन सत्कृत्यानवमत्य च ।
प्रियं मे स्यान्महाबाहो मुच्येरन्महतो भयात् ॥ ५-८३-१६ (३४७३२)
अतश्चेदन्यथाकर्ता धार्तराष्ट्रोऽनुपायवित् ।
अन्तं नूनं करिष्यामि क्षत्रियाणां जनार्दन ॥ ५-८३-१७ (३४७३३)
वैशम्पायन उवाच। ५-८३-१८क्ष (३६४१)
एवमुक्ते पाण्डवेन समहृष्यद्वृकोदरः ।
मुहुर्मुहुः क्रोधवशात्प्रावेपत च पाण्डवः ॥ ५-८३-१८ (३४७३४)
वेपमानश्च कौन्तेयः प्राक्रोशन्महतो रजन् ।
धनञ्जयवचः श्रुत्वा हर्षोत्सिक्तमना भृशम् ॥ ५-८३-१९ (३४७३५)

तस्य तं निनदं श्रुत्वा संप्रावेपन्त धन्विनः ।
वाहनानि च सर्वामि शकृन्मूत्रे प्रमुस्रुवुः ॥ ५-८३-२० (३४७३६)
इत्युक्त्वा केशवं तत्र तथा चोह्त्वा विनिश्चयम् ।
अनुज्ञातो निववृते परिष्वज्य जनार्दनम् ॥ ५-८३-२१ (३४७३७)
तेषु राजसु सर्वेषु निवृत्तेषु जनार्दनः ।
तूर्णमभ्यगमद्धृष्टः शैब्यसुग्रीववाहनः ॥ ५-८३-२२ (३४७३८)
ते हया वासुदेवस्य दारुकेण प्रचोदिताः ।
पन्थानमाचेमुरिव ग्रसमाना इवाम्बरम् ॥ ५-८३-२३ (३४७३९)
अथापश्यन्महाबाहुर्ऋषीनध्वनि केशवः ।
ब्राह्म्या श्रिया दीप्यमानान्स्थितानुभयतः पथि ॥ ५-८३-२४ (३४७४०)
सोऽवतीर्य रथात्तूर्णमभिवाद्य जनार्दनः ।
यथावृत्तानृषीन्सर्वानभ्यभाषत पूजयन् ॥ ५-८३-२५ (३४७४१)
कच्चिल्लोकेषु कुशलं कच्चिद्धर्मः स्वनुष्ठितः ।
ब्राह्मणानां त्रयो वर्णाः कच्चित्तिष्ठन्ति शासने ।
ग पितृदेवातिथिभ्यश्च कच्चित्पूता स्वनुष्ठिताः ॥' ५-८३-२६ (३४७४२)
तेभ्यः प्रयुज्य तां पूजां प्रोवाच मधुसूदनः ।
भगवन्तः क्व संसिद्धाः कोऽवधिर्भवतामिह ॥ ५-८३-२७ (३४७४३)
किं वा कार्यं भगवतामहं किं करवाणि यः ।
केनार्थेनोपप्तंप्राप्ता भगवन्तो महीतलम् ॥ ५-८३-२८ (३४७४४)
ग एवमुक्ताः केशवेन मुनयः शंसितव्रताः ।
नारदप्रमुखाः सर्वे प्रत्यनन्दन्त केशवम् ॥ ५-८३-२९ (३४७४५)
अधश्शिराः सर्पमाली महर्षिः स हि देवलः ।
अर्वावसुः सुजानुश्च मैत्रेयः शुनको बली ५-८३-३० (३४७४६)
बको दाल्भ्यः स्थूलशिराः कृष्णद्वैपायनस्तथा ।
आपोदधौम्यो धौम्यश्च आणिमाण्डव्यकौशिकौ ॥ ५-८३-३१ (३४७४७)
दामोष्णीषस्त्रिषवणः पर्णादो घटजानुकः ।
मौञ्जायनो वायुभक्षः पाराशर्योऽथ शालिकः ॥ ५-८३-३२ (३४७४८)
शीलवानशनिर्धाता शून्यपालोऽकृतव्रणः ।
श्वेतकेतुः कहोलश्च रामश्चैव महातपाः ॥' ५-८३-३३ (३४७४९)
तमब्रवीज्जामदग्न्य उपेत्य मधुसूदनम् ।
परिष्वज्य च गोविन्दं सुरासुरपतेः सखा ॥ ५-८३-३४ (३४७५०)
देवर्षयः पुण्यकृतो ब्राह्मणाश्च बहुश्रुताः ।
राजर्षयश्च दाशार्ह मानयन्ति तपस्विनः ॥ ५-८३-३५ (३४७५१)
दैवासुरस्य द्रष्टारः पुराणस्य महामते ।
समेत पार्थिवं क्षत्रं दिदृक्षन्तश्च सर्वतः ।
सभासदश्च राजानस्त्वां च सत्यं जनार्दनम् ॥ ५-८३-३६ (३४७५२)

एतन्महत्प्रेक्षणीयं द्रष्टुमिच्छाम केशव ॥ ५-८३-३७ (३४७५३)
धर्मार्थसहिता वाचः श्रोतुमिच्छाम माधव ।
त्वयोच्यमानाः कुरुषु राजमध्ये परन्तप ॥ ५-८३-३८ (३४७५४)
ग सभायां मधुरा वाचः शुश्रूषन्तस्त्वयेरिताः ।
कुरूणां प्रतिवाचश्च श्रोतुमिच्छाम माधव ॥' ५-८३-३९ (३४७५५)
भीष्मद्रोणादयश्चैव विदुरश्च महामतिः ।
त्वं च यादवशार्दूल सभायां वै समेष्यथ ॥ ५-८३-४० (३४७५६)
तव वाक्यानि दिव्यानि तथा तेषां च माधव ।
श्रोतुमिच्छाम गोविन्द सत्यानि च हितानि च ।
आपृष्टोऽसि महाबाहो पुनर्द्रक्ष्यामहे वयम् ॥ ५-८३-४१ (३४७५७)
याह्यविघ्नेन वै वीर द्रक्ष्यामस्त्वां सभागतम् ।
आसीनमासने दिव्ये बलतेजःसमाहितम् ॥ ५-८३-४२ (३४७५८)
वैशम्पायन उवाच। ५-८३-४३क्ष् (३६४२)
प्रयान्तं देवकीपुत्रं परवीररुजो दश ।
महारथा महाबाहुमन्वयुः शस्त्रपाणयः ॥ ५-८३-४३ (३४७५९)
पदातीनां सहस्रं च सादिनां च परन्तप ।
भोज्यं च विपुलं राजन्प्रेष्याश्च शतशोपरे ॥ ॥ ५-८३-४४ (३४७६०)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
त्र्यशीतितमोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-८३-६ ऊढात् विवाहात् । श्वशुराणां गृहे इति शेषः ॥
५-८३-३६ पुराणस्य दैवासुरस्य देवासुरसमुदायस्य ॥

उद्योगपर्व - अध्याय ०८४
॥ श्रीः ॥
५.८४. अध्यायः ८४

Mahabharata - Udyoga Parva - Chapter Topics
श्रीकृष्णप्रयाणे कुरुपराजयसूचकदुर्निमित्तसमुत्पत्तिः ॥ १ ॥
श्रीकृष्णस्य शुभशकुनसमुदयः ॥ २ ॥
मार्गे तत्रतत्र विपरगणाद्यश्चर्चितस्य कृष्णस्य सायाह्ने
वृकस्थलाभिगमनम् ॥ ३ ॥
तत्रत्यद्विजव्रजपूजितस्य कृष्णस्य तद्गृहगमनागमनपूर्वकं
तान्भोजयित्वा तद्व्रजन्यां वृकस्थले सुखसंवासः ॥ ४ ॥

५-८४-० (३४७६१)
जनमेजय उवाच। ५-८४-०क्ष् (३६४३)
कथं प्रयातो दाशार्हो महात्मा मधुसूदनः ।
कानि वा व्रजतस्तस्य निमित्तानि महौजसः ॥ ५-८४-१ (३४७६२)
वैशम्पायन उवाच। ५-८४-२क्ष् (३६४४)
तस्य प्रयाणे यान्यसन्निमित्तानि महात्मनः ।
तानि मे शृणु सर्वाणि दैवान्यौत्पातिकानि च ॥ ५-८४-२ (३४७६३)
अनभ्रेऽशनिनिर्घोषः सविद्युत्समजायत ।
अन्वगेव च पर्जन्यः प्रावर्षद्विघने भृशम् ॥ ५-८४-३ (३४७६४)
प्रत्यगूहुर्महानद्यः प्राङ्मुखाः सिन्धुसप्तमाः ।
विपरिता दिशः सर्वा न प्राज्ञायत किंचन ॥ ५-८४-४ (३४७६५)
प्राज्वलन्नग्नयो राजन्पृथिवी समकम्पत ।
उदपानाश्च कुम्भाश्च प्रासिञ्चञ्शतशो जलम् ॥ ५-८४-५ (३४७६६)
तमःसंवृतमप्यासीत्सर्वं जगदिदं तथा ।
न दिशो नादिशो राजन्प्रज्ञायन्तेस्म रेणुना ॥ ५-८४-६ (३४७६७)
प्रादुरासीन्महाञ्छब्दः खेशरीरमदृश्यत ।
सर्वेषु राजन्देशेषु तदद्भुतमिवाभवत् ॥ ५-८४-७ (३४७६८)
प्रामथ्नाद्वास्तिनपुरं वातो दक्षिणपश्चिमः ।
आरुजन्गणशो वृक्षान्परुषोऽशनिनिःस्वनः ॥ ५-८४-८ (३४७६९)
यत्रयत्र च वार्ष्णेयो वर्तते पथि भारत ।
तत्रतत्र सुखो वायुः सर्वं चासीत्प्रदक्षिणम् ॥ ५-८४-९ (३४७७०)
ववर्ष पुष्पवर्षं च कमलानि च भूरिशः ।
समश्च पन्था निर्दुःखो व्यपेतकुशकण्टकः ॥ ५-८४-१० (३४७७१)
संस्तुतो ब्राह्मणैर्गीर्भिस्तत्रतत्र सहस्रशः ।
अर्च्यते मधुपर्कैश्च वसुभिश्च वसुप्रदः ॥ ५-८४-११ (३४७७२)
तं किरन्ति महात्मानं वन्यैः पुष्पैः सुगन्धिभिः ।
स्त्रियः पथि समागम्य सर्वभूतहिते रतम् ॥ ५-८४-१२ (३४७७३)
स शालिभवनं रम्यं सर्वसस्यसमाचितम् ।
सुख परमधर्मिष्ठमभ्यगाद्भरतर्षभ ॥ ५-८४-१३ (३४७७४)
पश्यन्बहुपशून्ग्रामान्रम्यान्हृदयतोषणान् ।
पुराणि च व्यतिकामन्राष्ट्राणि विविधानि च ॥ ५-८४-१४ (३४७७५)
नित्यं हृष्टाः सुमनसो भारतैरभिरक्षिताः ।
नोद्विग्नाः परचक्राणां व्यसनानामकोविदाः ॥ ५-८४-१५ (३४७७६)
उपप्लाव्यादथागम्य जनाः पुरनिवासिनः ।

यथ्यतिष्ठन्त सहिता विष्वक्सेनदिदृक्षया ॥ ५-८४-१६ (३४७७७)
ते तु सर्वे समायान्तमग्निमिद्धमिव प्रभुम् ।
अर्चयामासुरर्चार्हं देशातिथिमुपस्थितम् ॥ ५-८४-१७ (३४७७८)
वृकस्थलं समासाद्य केशवः परवीरहा ।
प्रकीर्णरश्मावादित्ये व्योम्नि वै लोहितायति ॥ ५-८४-१८ (३४७७९)
ग ततो ह्यनुचरान्सर्वानुवाच मधुसूदनः ।
युधिष्ठिरस्य कार्यार्थमिह वत्स्यामहे वयम् ॥ ५-८४-१९ (३४७८०)
तस्य तन्मतमाज्ञाय चक्रुरावसथं नराः ।
क्षणेन चान्नपानानि रराविन्ति समार्जयन् ॥' ५-८४-२० (३४७८१)
अवतीर्य रथात्तूर्णं कृत्वा शौचं यथाविधि ।
रथमोचनमादिश्य सन्ध्यामुपविवेश ह ॥ ५-८४-२१ (३४७८२)
दारुकोऽपि हयान्मुक्त्वा परिचर्य च शास्त्रतः ।
मुमोच सर्वं योक्तादि मुक्त्वा चैतानवासृजत् ॥ ५-८४-२२ (३४७८३)
तस्मिन्ग्रामे प्रधानास्तु य आसन्ब्राह्मणा नृप ।
आर्याः कुलीना ह्रीमन्तो ब्राह्मीं वृत्तिमनुष्ठिताः ॥ ५-८४-२३ (३४७८४)
तेऽभिगम्य महात्मानं हृषीकेशमरिन्दमम् ।
पूजां चक्रुर्यथान्यायमाशीर्मङ्गलसंयुताम् ॥ ५-८४-२४ (३४७८५)
ते पूजयित्वा दाशार्हं सर्वलोकेषु पूजितम् ।
न्यवेदयन्त वेश्मानि गुणवन्ति महात्मने ॥ ५-८४-२५ (३४७८६)
तान्प्रभुः कृतमित्युक्ता सत्कृत्य च यथार्हतः ।
अभ्येत्य चैषां वेश्मानि पुनरायात्सहैव तैः ॥ ५-८४-२६ (३४७८७)
सुमृष्टं भोजयित्वा च ब्राह्मणांस्तत्र केशवः ।
भुक्ता च सह तैः सर्वैरवसत्तां क्षपां सुखम् ॥ ॥ ५-८४-२७ (३४७८८)

इति श्रीमन्महाभारते उद्योगपर्वमि भगवद्यानपर्वणि
चतुरशीतितमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-८४-२ दैवानि कशुनानि । औत्पातिकानि अशकुनानि ॥
५-८४-७ खेशरीरं छायापुरुषशरीरम् ॥
५-८४-१३ भवन्ति अस्मिन्निति भवने क्षेत्रम् ॥
५-८४-१६ उपप्लाव्यात् ग्रामात् ॥
५-८४-

उद्योगपर्व - अध्याय ०८५
॥ श्रीः ॥
५.८५. अध्यायः ८५

Mahabharata - Udyoga Parva - Chapter Topics

दूतैः श्रीकृष्णागमनं ज्ञातवतो धृतराष्ट्रस्याज्ञया दुर्योधनेन
पथि तदाराधनाय तत्रतत्र सभानिर्मापणम् ॥ १ ॥
श्रीकृष्णेन तदनवलोकनेनैव गमनम् ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-८५-० (३४७८९)
वैशम्पायन उवाच। ५-८५-०क्ष् (३६४५)
तदा दूतैः समाज्ञाय आयान्तं मधुसूदनम् ।
धृतराष्ट्रोऽब्रवीद्भीष्ममर्चयित्वा महाभुजम् ॥ ५-८५-१ (३४७९०)
द्रोणं च सञ्जयं चैव विदुरं च महामतिम् ।
दुर्योदनं सहामात्यं हृष्टरोमाऽब्रवीदिदम् ॥ ५-८५-२ (३४७९१)
अद्भुतं महादाश्चर्यं श्रूयते कुरुनन्दन ।
स्त्रियो बालाश्च वृद्धाश्च कथयन्ति गृहेगृहे ॥ ५-८५-३ (३४७९२)
सत्कृत्याचक्षते चान्ये तथैवान्ये समागताः ।
पृथग्वादाश्च वर्तन्ते चत्वरेषु सभासु च ॥ ५-८५-४ (३४७९३)
उपायास्यति दाशार्हः पाण्डवार्थे पराक्रमी ।
स नो मान्यश्च पूज्यश्च सर्वथा मधुसूदनः ॥ ५-८५-५ (३४७९४)
तस्मिन्हि यात्रा लोकस्य भूतानामीश्वरोऽहि सः ।
तस्मिन्धृतिश्च वीर्यं च प्रज्ञा चौजश्च माधवे ॥ ५-८५-६ (३४७९५)
स मान्यतां नरश्रेष्ठः स हि धर्मः सनातनः ।
पूजितो हि सुखाय स्यादसुखः स्यादपूजितः ॥ ५-८५-७ (३४७९६)
स चेत्तुप्यति दाशार्ह उपचरैररिन्दमः ।
कृष्णात्सर्वानभिप्रायान्प्राप्स्यामः सर्वराजसु ॥ ५-८५-८ (३४७९७)
तस्य पूजार्थमद्यैव संविधस्त्व परन्तप ।
सभाः पथि विधीयन्तां सर्वकामसमन्विताः ॥ ५-८५-९ (३४७९८)
यथा प्रीतिर्महाबाहो त्वयि जायेत तस्य वै ।
तथा कुरुष्व गान्धारे कथं वा भीष्म मन्यसे ॥ ५-८५-१० (३४७९९)
वैशम्पायन उवाच। ५-८५-११क्ष् (३६४६)
ततो भीष्मादयः सर्वे धृतराष्ट्रं जनाधिपम् ।
ऊचुःक परममित्येवं पूजयन्तोऽस्य तद्वचः ॥ ५-८५-११ (३४८००)
तेषामनुमतं ज्ञात्वा राजा दुर्योधनस्तदा ।
सभावास्तूनि रम्याणि प्रदेष्टुमुपचक्रमे ॥ ५-८५-१२ (३४८०१)
ततो देशेषु देशेषु रमणीयेषु भागशः ।

सर्वरत्नसमाकीर्णाः सभाश्चक्रुरनेकशः ॥ ५-८५-१३ (३४८०२)
आसनानि विचित्राणि युतानि विविधैर्गुणैः ।
स्त्रियो गन्धानलङ्कानारान्सूक्ष्माणि वसनानि च ॥ ५-८५-१४ (३४८०३)
गुणवन्त्यन्नपानानि भोज्यानि विविधानि च ।
माल्यानि च सुगन्धीनि तानि राजा ददौ ततः ॥ ५-८५-१५ (३४८०४)
विशेवतश्च वासार्थं सभां ग्रामे वृकस्थले ।
विदधे कौरवो राजा बहुरत्नां मनोरमाम् ॥ ५-८५-१६ (३४८०५)
एतद्विधाय वै सर्वं देवार्हमतिमानुषम् ।
आचख्यौ धृतराष्ट्राय राजा दुर्योधनस्तदा ॥ ५-८५-१७ (३४८०६)
ताः सभाः केशवः सर्वा रत्नानि विविधानि च ।
असमीक्ष्यैव दाशार्ह उपायात्कुरुसद्म तत् ॥ ॥ ५-८५-१८ (३४८०७)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
पञ्चशीतितमोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-८५-८ अभिप्रायान् मनोरथान् ॥

उद्योगपर्व - अध्याय ०८६
॥ श्रीः ॥
५.८६. अध्यायः ८६

Mahabharata - Udyoga Parva - Chapter Topics
श्रीकृष्णागमनश्रवणहृष्टेन धृतराष्ट्रेण विदुरपुरतः
समेष्यते तस्मै रथगजादिवितरणप्रतिज्ञा ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-८६-० (३४८०८)
धृतराष्ट्र उवाच। ५-८६-०क्ष् (३६४७)
उपप्लाव्यादिह क्षत्तरुपायातो जनार्दनः ।
वृकस्थले निवसति स च प्रातरिहैष्यति ॥ ५-८६-१ (३४८०९)
आहुकानामधिपतिः पुरोगः सर्वसात्वताम् ।
महामना महावीर्यो महासत्वो जनार्दनः ॥ ५-८६-२ (३४८१०)
स्फीतस्य वृष्णिराष्ट्रस्य भर्ता गोप्ता च माधवः ।
त्रयाणामपि लोकानां भगवान्प्रपितामहः ॥ ५-८६-३ (३४८११)
वृष्ण्यन्धकाः सुमनसो यस्य प्रज्ञामुपासते ।

आदित्या वसवो रुद्रा यथा बुद्धिं बृहस्पतेः ॥ ५-८६-४ (३४८१२)
तस्मै पूजां प्रयोक्ष्यामि दाशार्हाय महात्मने ।
प्रत्यक्षं तव धर्मज्ञ तां मे कथयतः शृणु ॥ ५-८६-५ (३४८१३)
एकवर्णैः सुक्लृप्ताङ्गैर्बाह्लिजातैर्हयोत्तमैः ।
चतुर्युक्तान्रथांस्तस्मै रौक्मान्दास्यामि षोडश ॥ ५-८६-६ (३४८१४)
नित्यप्रभिन्नान्मातङ्गानीषादन्तान्प्रहारिणः ।
अष्टानुचरमेकैकमष्टौ दास्यामि कौरव ॥ ५-८६-७ (३४८१५)
दासीनामप्रजातानां शुभानां रुक्मवर्चसाम् ।
शतमस्मै प्रदास्यामि दासानामपि तावताम् ॥ ५-८६-८ (३४८१६)
आविकं च सुखस्पर्शं पार्वतीयैरुपाहृतम् ।
तदप्यस्मै प्रदास्यामि सहस्त्राणि दाशार्ष्ट च ॥ ५-८६-९ (३४८१७)
अजिनानां सहस्राणि चीनदेशोद्भवानि च ।
तान्यप्यस्मै प्रदास्यामि यावदर्हति केशवः ॥ ५-८६-१० (३४८१८)
दिवा रात्रौ च भात्येष सुतेजा विमलो मणिः ।
तमप्यस्मै प्रदास्यामि तमर्हति हि केशवः ॥ ५-८६-११ (३४८१९)
एकेनाभिपतत्यह्ना योजनानि चतुर्दश ।
यानमश्वतरीयुक्तं दास्ये तस्मै तदप्यहम् ॥ ५-८६-१२ (३४८२०)
यावन्ति वाहनान्यस्य यावन्तः पुरुषाश्च ते ।
ततोष्टगुणमप्यस्मै भोज्यं दास्याम्यहं सदा ॥ ५-८६-१३ (३४८२१)
मम पुत्राश्च पौत्रश्च सर्वे दुर्योधनादृते ।
प्रत्युद्यास्यन्ति दाशार्हं रथैर्मृष्टैः स्वलङ्कृताः ॥ ५-८६-१४ (३४८२२)
स्वलङ्कृताश्च कल्याण्यः पादैरेव सहस्रशः ।
वारमुख्या महाभागं प्रत्युद्यास्यन्ति केशवम् ॥ ५-८६-१५ (३४८२३)
नगरादपि याः काश्चिद्गमिष्यन्ति जनार्दनम् ।
द्रष्टुं कन्याश्च कल्याण्यस्ताश्च यास्यन्त्यनावृताः ॥ ५-८६-१६ (३४८२४)
सस्त्रीपुरुषबालं च नगरं मधुसूदनम् ।
उदीक्षतां महात्मानं भानुमन्तमिव प्रजाः ॥ ५-८६-१७ (३४८२५)
महाध्वजपताकाश्च क्रियन्तां सर्वतो दिशः ।
जलावसिक्तो विरजाः पन्थास्तस्येति चान्वशात् ॥ ५-८६-१८ (३४८२६)
दुःशासनस्य च गृहं दुर्योधनगृहाद्वरम् ।
तदद्य क्रियतां क्षिप्रं सुसंमृष्टमलङ्कृतम् ॥ ५-८६-१९ (३४८२७)
एतद्धि रुचिराकारैः प्रासादैरुपशोभितम् ।
शिवं च रमणीयं च सर्वर्तु सुमहाधनम् ॥ ५-८६-२० (३४८२८)
सर्वमस्मिन्गृहे रत्नं मम दुर्योधनस्य च ।
यद्यदर्हति वार्ष्णेयस्तत्तद्देयमसंशयम् ॥ ॥ ५-८६-२१ (३४८२९)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वमि
षडशीतितमोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-८६-३ प्रपितामहः पितामहस्य ब्रह्मणोपि पिता ॥
५-८६-७ ईषा लाङ्गलदण्डस्तत्सदृशदन्तान् । अष्टौ अनुचराः यस्य
गजस्य ॥
५-८६-२० सर्वर्तु सर्वे ऋतवो युगपदस्मिन्सन्तीति तथा ॥

उद्योगपर्व - अध्याय ०८७
॥ श्रीः ॥
५.८७. अध्यायः ८७

Mahabharata - Udyoga Parva - Chapter Topics
विदुरेण धृतराष्ट्रंप्रति कृष्णाय दानप्रतिज्ञायाः
मृषात्वकथनम् ॥ १ ॥
तथा सामाद्युपायैः कृष्णस्य दुर्वशत्वकथनपूर्वकं
तदुक्तिसत्कारविधानम् ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-८७-० (३४८३०)
विदुर उवाच । ५-८७-०क्ष् (३६४८)
राजन्बहुमतश्चासि त्रैलोक्यस्यापि सत्तमः ।
संभावितश्च लोकस्य संमतश्चासि भारत ॥ ५-८७-१ (३४८३१)
यत्त्वमेवंगते ब्रूयाः पश्चिमे वयसि स्थितः ।
शास्त्राद्वा सुप्रतर्काद्वा सुस्थिरः स्थविरो ह्यसि ॥ ५-८७-२ (३४८३२)
लेखा शशिनिभाः सूर्ये महोर्मिरिव सागरे ।
धर्मस्त्वयि तथा राजन्निति व्यवसिताः प्रजाः ॥ ५-८७-३ (३४८३३)
सदैव भावितो लोको गुणौघैस्तव पार्थिव ।
गुणानां रक्षणे नित्यं प्रयतस्व सबान्धवः ॥ ५-८७-४ (३४८३४)
आर्जवं प्रतिपद्यस्व मा बाल्याद्ब्रहु नीनशः ।
राजन्पुत्रांश्च पौत्रांश्च सुहृदश्चैव सुप्रियान् ॥ ५-८७-५ (३४८३५)
यत्त्वं दित्ससि कृष्णाय राजन्नतिथये बहु ।
एतदन्यच्च दाशार्हः पृथिवीमपि चार्हति ॥ ५-८७-६ (३४८३६)
न तु त्वं धर्ममुद्दिश्य तस्य वा प्रियकारणात् ।
एतद्दित्ससि कृष्णाय सत्येनात्मानमालभे ॥ ५-८७-७ (३४८३७)

मायैषा सत्यमेवैतच्छद्मैतद्धूरिदक्षिणा ।
जानामि त्वन्मतं राजन्गूढं बाह्येन कर्मणा ॥ ५-८७-८ (३४८३८)
पञ्च पञ्चैव लिप्स्यन्ति ग्रामकान्पाण्डवा नृप ।
न च दित्ससि तेभ्यस्तांस्तच्छमं न करिष्यसि ॥ ५-८७-९ (३४८३९)
अर्थेन तु महाबाहुं वार्ष्णेयं त्वं जिहीर्षसि ।
अनेन चाप्युपायेन पाण्डवेभ्यो विभेत्स्यसि ॥ ५-८७-१० (३४८४०)
न च वित्तेन शक्योऽसौ नोद्यमेन न गर्हया ।
अन्यो धनञ्जयात्कर्तुमेतत्तत्त्वं ब्रवीमि ते ॥ ५-८७-११ (३४८४१)
वेद कृष्णस्य माहात्म्यं वेदास्य दृढभक्तिताम् ।
अत्याज्यमस्य जानामि प्राणैस्तुल्यं धनञ्जयम् ॥ ५-८७-१२ (३४८४२)
अन्यत्कुम्भादपांपूर्णादन्यत्पादावसेचनात् ।
अन्यत्कुशलसंप्रश्नान्नैवेक्ष्यति जनार्दनः ॥ ५-८७-१३ (३४८४३)
यत्त्वस्य प्रियमातिथ्यं मानार्हस्य महात्मनः ।
तदस्मै क्रियतां राजन्मानार्होऽसौ जनार्दनः ॥ ५-८७-१४ (३४८४४)
आशंसमानः कल्याणं कुरूनभ्येति केशवः ।
येनैव राजन्नर्थेन तदेवास्मा उपाकुरु ॥ ५-८७-१५ (३४८४५)
शममिच्छति दाशार्हस्तव दुर्योधनस्य च ।
पाण्डवानां च राजेन्द्र तदस्य वचनं कुरु ॥ ५-८७-१६ (३४८४६)
पिताऽसि राजन्पुत्रास्ते वृद्धस्त्वं शिशवः परे ।
वर्तस्व पितृवत्तेषु वर्तन्ते ते हि पुत्रवत् ॥ ॥ ५-८७-१७ (३४८४७)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
सप्ताशीतितमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-८७-४ भावितः हृष्टः ॥
५-८७-५ मा नीनशः मा नाशं प्राप्नुहि ॥
५-८७-८ माया इन्द्रजालम् । छद्म वञ्चनम् ॥
५-८७-१० विभेत्स्यसि शल्यवत्पृथक्करिष्यसि ॥
५-८७-१२ वेद विद्मि ॥
५-८७-१३ नैवेक्ष्यति नैवाङ्गीकरिष्यति ॥
५-८७-१५ उपाकुरु अर्पय ॥

उद्योगपर्व - अध्याय ०८८
॥ श्रीः ॥
५.८८. अध्यायः ८८

Mahabharata - Udyoga Parva - Chapter Topics

दुर्योधनेन श्रीकृष्णस्य विदुरोदीरितभेदागोचरताङ्गीकरणम् ॥ १ ॥
तथा हेतूपन्यासपूर्वकं कृष्णस्योपायनदाननिषेधनम् ॥ २ ॥
भीष्मेण कृष्णस्य दुरवज्ञेयत्वकथनपूर्वकं तदुक्तस्य
कर्तव्यत्वकथनम् ॥ ३ ॥
दुर्योधनेन स्वस्य कृष्णबन्धनाध्यवसायकथने धृतराष्ट्रेण
तद्गर्हणम् ॥ ४ ॥
भीष्मेण दुर्योधनोपालम्भपूर्वकं सभातो निर्गमनम् ॥ ५ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-८८-० (३४८४८)
दुर्योधन उवाच। ५-८८-०क्ष् (३६४९)
यदाह विदुरः कृष्णे सर्वं तत्सत्यमच्युते ।
अनुरक्तो ह्यसंहार्यः पार्थान्प्रति जनार्दनः ॥ ५-८८-१ (३४८४९)
यत्तत्सत्कारसंयुक्तं देयं वसु जनार्दने ।
अनेकरूपं राजेन्द्र न तद्देयं कदाचन ॥ ५-८८-२ (३४८५०)
देशः कालस्तथाऽयुक्तो न हि नार्हति केशवः ।
मंस्यत्यधोक्षजो राजन्भयादर्चति मामिति ॥ ५-८८-३ (३४८५१)
अवमानश्च यत्र स्यात्क्षत्रियस्य विशांपते ।
न तत्कुर्याद्बुधः कार्यमिति मे निश्चिता मतिः ॥ ५-८८-४ (३४८५२)
स हि पूज्यतमो लोके कृष्णः पृथुललोचनः ।
त्रयाणामपि लोकानां विदितं मम सर्वथा ॥ ५-८८-५ (३४८५३)
न तु तस्मै प्रदेयं स्यात्तथा कार्यगतिः प्रभो ।
विग्रहः समुपारब्धो न हि शाम्यत्यविग्रहात् ॥ ५-८८-६ (३४८५४)
वैशम्पायन उवाच। ५-८८-७क्ष् (३६५०)
तस्य तद्वचनं श्रुत्वा भीष्मः कुरुपितामहः ।
वैचित्रवीर्यं राजानमिदं वचनमब्रवीत् ॥ ५-८८-७ (३४८५५)
सत्कृतोऽसत्कृतो वाऽपि न क्रुध्येत जनार्दनः ।
ग्नावमंस्यत्यवज्ञातृनवज्ञातोऽपि केशवः।'
नालमेनमवज्ञातुं नावज्ञेयो हि केशवः ॥ ५-८८-८ (३४८५६)
यत्तु कार्यं महाबाहो मनसा कार्यतां गतम् ।
सर्वोपायैर्न तच्छक्यं केनचित्कर्तुमन्यथा ॥ ५-८८-९ (३४८५७)
स यद्ब्रूयान्महाबाहुस्तत्कार्यमविशङ्कया ।
वासुदेवेन तीर्थेन क्षिप्रं संशाम्य पाण्डवैः ॥ ५-८८-१० (३४८५८)
धर्म्यमर्थ्यं च धर्मात्मा ध्रुवं वक्ता जनार्दनः ।

तस्मिन्वाच्याः प्रिया वाचो भवता बान्धवैः सह ॥ ५-८८-११ (३४८५९)
दुर्योधन उवाच। ५-८८-१२क्ष् (३६५१)
न पर्याप्तोस्मि यद्राजञ्श्रियं निष्केवलामहम् ।
तैः सहेमामुपाश्नीयां यावज्जीवं पितामह ॥ ५-८८-१२ (३४८६०)
इदं तु सुमहत्कार्यं श्रुणु मे यत्समर्थितम् ।
परायणं पाण्डवानां नियच्छामि जनार्दनम् ॥ ५-८८-१३ (३४८६१)
तस्मिन्बद्धे भविष्यन्ति वृष्णयः पृथिवी तथा ।
पाण्डवाश्च विधेया मे स च प्रातरिहैष्यति ॥ ५-८८-१४ (३४८६२)
अत्रोपायान्यथा सम्यङ्ग बुद्ध्येत जनार्दनः ।
न चापायो भवेत्कश्चित्तद्भवान्प्रब्रवीतु मे ॥ ५-८८-१५ (३४८६३)
वैशम्पायन उवाच। ५-८८-१६क्ष् (३६५२)
तस्य तद्वचनं श्रुत्वा घोरं कृष्णेऽभिसंहितम् ।
धृतराष्ट्रः सहामात्यो व्यथितो विमनाभवत् ॥ ५-८८-१६ (३४८६४)
ततो दुर्योधनमिदं धृतराष्ट्रोऽब्रवीद्वचः ।
मैवं वोचः प्रजापाल नैष धर्मः सनातनः ॥ ५-८८-१७ (३४८६५)
दूतश्च हि हृषीकेशः संबन्धी च प्रियश्च नः ।
अपापः कौरवेयेषु स कथं बन्धमर्हति ॥ ५-८८-१८ (३४८६६)
भीष्म उवाच। ५-८८-१९क्ष् (३६५३)
परीतस्तव पुत्रोऽयं धृतराष्ट्र सुमन्दधीः ।
वृणोत्यनर्थं नैवार्थं याच्यमानः सुहृज्जनैः ॥ ५-८८-१९ (३४८६७)
इममुत्पथि वर्तन्तं पापं पापानुबन्धिनम् ।
वाक्यानि सुहृदां हित्वा त्वमप्यस्यानुवर्तसे ॥ ५-८८-२० (३४८६८)
कृष्णमक्लिष्टकर्माणमासाद्यायं सुदुर्मतिः ।
तव पुत्रः सहामात्यः क्षणेन न भविष्यति ॥ ५-८८-२१ (३४८६९)
पापस्यास्य नृशंसस्य त्यक्तधर्मस्य दुर्मतेः ।
नोत्सहेऽनर्थसंयुक्ताः श्रोतुं वाचः कथंचन ॥ ५-८८-२२ (३४८७०)
इत्युक्त्वा भरतश्रेष्ठो वृद्धः परममन्युमान् ।
उत्थाय तस्मात्प्रातिष्ठद्भीष्मः सत्यपराक्रमः ॥ ॥ ५-८८-२३ (३४८७१)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
अष्टाशीतितमोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-८८-१ असंहार्यः हर्तुमशक्यः ॥
५-८८-३ देश इति । यद्यपि केशवोऽर्चामर्हत्येव तथापि अर्चायां
देशः कालश्चायुक्त इत्यर्थः । तदेबाह मंस्यतीति ॥

५-८८-६ कार्यगतिः कर्तव्यरीतिः । अविग्रहात् आतिथ्यमात्रेण ॥
५-८८-८ नालं न पर्याप्तोऽसि ॥
५-८८-१० तीर्थेन अवतरणवर्त्मना । संशाम्य शान्तो भवः ॥
५-८८-१२ नोपाश्नीयमित्यन्वयः । निष्केवलां कृत्स्नाम् ॥

उद्योगपर्व - अध्याय ०८९
॥ श्रीः ॥
५.८९. अध्यायः ८९

Mahabharata - Udyoga Parva - Chapter Topics
प्रातः कृताह्निकस्य श्रीकृष्णस्य वृकस्थलात्कुरुपुरमुपेत्य
धृतराष्ट्रभवनपरवेशः ॥ १ ॥
तथा धृतराष्ट्रपूजां स्वीकृत्य विदुरसदनगमनम् ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-८९-० (३४८७२)
वैशम्पायन उवाच। ५-८९-०क्ष् (३६५४)
प्रातरुत्थाय कृष्णस्तु कृतवान्सर्वमाह्निकम् ।
ब्राह्मणैरभ्यनुज्ञातः प्रययौ नगरं प्रति ॥ ५-८९-१ (३४८७३)
तं प्रयान्तं महाबाहुमनुज्ञाप्य महाबलम् ।
पर्यवर्तन्त ते सर्वे वृकस्थलनिवासिनः ॥ ५-८९-२ (३४८७४)
ग प्रददौ पुण्डरीकाक्षो रत्नानि च धनानि च ।
तान्प्रस्थाप्य महाबाहुरुपायात्कुरुसंसदम् ॥' ५-८९-३ (३४८७५)
धार्तराष्ट्रास्तमायान्तं प्रत्युज्जग्मुः स्वलङ्कृताः ।
दुर्योधनादृते सर्वे भीष्मद्रोणकृपादयः ॥ ५-८९-४ (३४८७६)
पौराश्च बहुला राजन्हृषीकेशं दिदृक्षवः ।
यानैर्बहुविधैरन्ये पद्भिरेव तथाऽपरे ॥ ५-८९-५ (३४८७७)
स वै पथि समागम्य भीष्मेणाक्लिष्टकर्मणा ।
द्रोणेन धार्तराष्ट्रैश्च तैर्वृतो नगरं ययौ ॥ ५-८९-६ (३४८७८)
कृष्णसंमाननार्थं च नगरं समलङ्कृतम् ।
बभूव राजमार्गश्च बहुरत्नसमाचितः ॥ ५-८९-७ (३४८७९)
न च कश्चिद्गृहे राजंस्तदाऽऽसीद्भरतर्षभ ।
न स्त्री न वृद्धो न शिशुर्वासुदेवदिदृक्षया ॥ ५-८९-८ (३४८८०)
राजमार्गे नरास्तस्मिन्संस्तुवन्त्यवनिं गताः ।
तस्मिन्काले महाराज हृषीकेशप्रवेशने ॥ ५-८९-९ (३४८८१)
आवृतानि वरस्त्रीभिर्गृहाणि सुमहान्त्यपि ।

प्रचलन्तीव भारेण दृश्यन्तेस्म महीतले ॥ ५-८९-१० (३४८८२)
तथा च गतिमन्तस्ते वासुदेवस्य वाजिनः ।
प्रनष्टगतयोऽभूवन्राजमार्गे नरैर्वृते ॥ ५-८९-११ (३४८८३)
स गृहं धृतराष्ट्रस्य प्राविशच्छत्रुकर्शनः ।
पाण्डुरैः पुण्डरीकाक्षः प्रासादैरुपशोभितम् ॥ ५-८९-१२ (३४८८४)
तिस्रः कक्ष्या व्यतिक्रम्य केशवो राजवेश्मनः ।
वैचित्रवीर्यं राजानमभ्यगच्छदरिन्दमः ॥ ५-८९-१३ (३४८८५)
अभ्यागच्छति दाशार्हे प्रज्ञाचक्षुर्नराधिपः ।
तहैव द्रोणभीष्माभ्यामुदतिष्ठन्महायशाः ॥ ५-८९-१४ (३४८८६)
कृपश्च सोमदत्तश्च महाराजश्च बाह्लिकः ।
आसनेभ्योऽचलन्सर्वे पूजयन्तो जनार्दनम् ॥ ५-८९-१५ (३४८८७)
ततो राजानमासाद्य धृतराष्ट्रं यशस्विनम् ।
सभीष्मं पूजयामास वार्ष्णेयो वाग्भिरञ्जसा ॥ ५-८९-१६ (३४८८८)
तेषु धर्मानुपूर्वीं तां प्रयुज्य मधुसूदनः ।
यथावयः समीयाय राजभिः सह माधवः ॥ ५-८९-१७ (३४८८९)
अथ द्रोणं सबाह्लीकं सपुत्रं च यशस्विनम् ।
कृपं च सोमदत्तं च समीयाय जनार्दनः ॥ ५-८९-१८ (३४८९०)
तत्रासीदूर्जितं मृष्टं काञ्चनं महदासनम् ।
शासनाद्धृतराष्ट्रस्य तत्रोपाविशदच्युतः ॥ ५-८९-१९ (३४८९१)
अथ गां मधुपर्कं चाप्युदकं च जनार्दने ।
उपजह्रुर्यथान्यायं धृतराष्ट्रपुरोहिताः ॥ ५-८९-२० (३४८९२)
कृतातिथ्यस्तु गोविन्दः सर्वान्परिहसन्कुरून् ।
आस्ते सांबन्धिकं कुर्वन्कुरुभिः परिवारितः ॥ ५-८९-२१ (३४८९३)
सोऽर्चितो धृतराष्ट्रेण पूजितश्च महायशाः ।
राजानं समनुज्ञाप्य निरक्रामदरिन्दमः ॥ ५-८९-२२ (३४८९४)
तैः समेत्य यथान्यायं कुरुभिः कुरुसंसदि ।
विदुरावसथं रम्यमुपातिष्ठत माधवः ॥ ५-८९-२३ (३४८९५)
विदुरः सर्वकल्याणैरभिगम्य जनार्दनम् ।
अर्चयामास दाशार्हं सर्वकामैरुपस्थितम् ॥ ५-८९-२४ (३४८९६)
कृतातिथ्यं तु गोविन्दं विदुरः सर्वधर्मवित् ।
कुशलं पाण्डुपुत्राणामपृच्छन्मधुसूदनम् ॥ ५-८९-२५ (३४८९७)
प्रीयमाणस्य सुहृदो विदुरो बुद्धिसत्तमः ।
धर्मार्थनित्यस्य सतो गतरोवस्य धीमतः ॥ ५-८९-२६ (३४८९८)
तस्य सर्वं सविस्तारं पाण्डवानां विचेष्टितम् ।
क्षत्तुराचष्ट दाशार्हः सर्वं प्रत्यक्षदर्शिवान् ॥ ॥ ५-८९-२७ (३४८९९)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
एकोननवतितमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-८९-२२ पूजितः स्तुतः ॥
५-८९-२६ विदुरः पाण्डवानां विचेष्टितं तस्य तं कृष्णं प्रति
अपृच्छदित्यनुकृष्यान्वयः । षष्ठ्यो द्वितीयार्थे ॥

उद्योगपर्व - अध्याय ०९०
॥ श्रीः ॥
५.९०. अध्यायः ९०

Mahabharata - Udyoga Parva - Chapter Topics

श्रीकृष्णस्य कुन्तीसमीपगमनम् ॥ १ ॥
कृष्णेन प्रत्येकं नामनिर्देशपूर्वकं
युधिष्ठिरादिकुशलमापृच्छ्य स्वानुभूतदुःखानुस्मरेन शोचन्त्याः
कुन्त्याः समाश्वासनम् ॥ २ ॥
तथा कुन्तीसामन्त्र्य दुर्योधनगृहगमनम् ॥ ३ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-९०-० (३४९००)
वैशम्पायन उवाच। ५-९०-०क्ष् (३६५५)
अथोपगम्य विदुरमपराह्णे जनार्दनः ।
पितृष्वसारं स पृथामभ्यगच्छदरिन्दमः ॥ ५-९०-१ (३४९०१)
सा दृष्ट्वा कृष्णमायान्तं प्रसन्नादित्यवर्चसम् ।
कण्ठे गृहीत्वा प्राक्रोशत्स्मरन्ती तनयान्पृथा ॥ ५-९०-२ (३४९०२)
तेषां सत्ववतां मध्ये गोविन्दं सहचारिणम् ।
चिरस्य दृष्ट्वा वार्ष्णेयं बाष्पमाहारयत्पृथा ॥ ५-९०-३ (३४९०३)
साऽब्रवीत्कृष्णमासीनं कृतातिथ्यं युधां पतिम् ।
बाष्पगद्गदपूर्णेन मुखेन परिशुष्यता ॥ ५-९०-४ (३४९०४)
एते बाल्यान्प्रभृत्येव गुरुशुश्रूषणे रताः ।
परस्परस्य सुहृदः संमताः समचेतसः ।
निकृत्या भ्रंशिता राज्याञ्जनार्हा निर्जनं गताः ॥ ५-९०-५ (३४९०५)
विनीतक्रोधहर्षाश्च ब्रह्मण्याः सत्यवादिनः ।
त्यक्त्वा प्रियमुखे पार्था रुदतीमपहाय माम् ॥ ५-९०-६ (३४९०६)
अहार्षुश्च वनं यान्तः समूलं हृदयं मम ।

अतदर्हा महात्मानः कथं केशव पाण्डवाः ॥ ५-९०-७ (३४९०७)
ऊषुर्महावने तात सिंहव्याघ्रगजाकुले ।
बाला विहीनाः पित्रा ते मया सततलालिताः ॥ ५-९०-८ (३४९०८)
अपश्यन्तश्च पितरौ कथमुषूर्महावने ।
शङ्खदुन्दुभिनिर्घोषैर्भृदङ्गैर्वेणुनिस्वनैः ॥ ५-९०-९ (३४९०९)
पाण्डवाः समबोध्यन्त बाल्यात्प्रभृति केशव ।
ये स्म वारणशब्देन हयानां हेषितेन च ॥ ५-९०-१० (३४९१०)
रथेनेमिनिनादैश्च व्यबोध्यन्त तदा गृहे ।
शङ्खभेरीनिनादेन वेणुवीणानुनादिना ॥ ५-९०-११ (३४९११)
पुण्याहघोषमिश्रेण पूज्यमाना द्विजातिभिः ।
वस्त्रै रत्नैरलङ्कारैः पूजयन्तो द्विजन्मनः ॥ ५-९०-१२ (३४९१२)
गीर्भिर्मङ्गलयुक्ताभिर्ब्राह्मणानां महात्मनाम् ।
अर्चितैरर्चनार्हैश्च स्तुवद्भिरभिनन्दिताः ॥ ५-९०-१३ (३४९१३)
प्रासादाग्नेष्वबोध्यन्त राङ्खवाजिनशायिनः ।
क्रूरं च निनदं श्रुत्वा श्वापदानां महावने ॥ ५-९०-१४ (३४९१४)
न स्मोपयान्ति निद्रां ते नतदर्हा जनार्दन ।
भेरीमृदङ्गनिनदैः शङ्खवैणवनिस्वनैः ॥ ५-९०-१५ (३४९१५)
स्त्रीणां गीतनिनादैश्च मधुरैर्मधुसूदन ॥
वन्दिमागधसूतैश्च स्तुवद्भिर्बोधिताः कथम् ॥ ५-९०-१६ (३४९१६)
महावनेष्वबोध्यन्त श्वापदानां रुतेन च ।
ह्रीमात्सत्यधृतिर्दान्तो भूतानामनुकम्पिता ॥ ५-९०-१७ (३४९१७)
कामद्वेषौ वशे कृत्वा सतां वर्त्मानुवर्तते ।
अम्बरीषस्य मान्धातुर्ययातेर्नहुषस्य च ॥ ५-९०-१८ (३४९१८)
भरतस्य दिलीपस्य शिबेरौशीनरस्य च ।
राजर्षीणां पुराणानां धुरं धत्ते दुरुद्वहाम् ॥ ५-९०-१९ (३४९१९)
शीलवृत्तोपसंपन्नोः धर्मज्ञः सत्यसङ्गरः ।
राजा सर्वगुणोपेतस्त्रौलोक्यस्यापि यो भवेत् ॥ ५-९०-२० (३४९२०)
अजातशत्रुर्धर्मात्मा शुद्धजाम्बूनदप्रभः ।
श्रेष्ठः कुरुषु सर्वेषु धर्मतः श्रुतवृत्ततः ।
प्रियदर्शो दीर्घभुजः कथं कृष्ण युधिष्ठिरः ॥ ५-९०-२१ (३४९२१)
यः स नागायुतप्राणो वातरंहा महाबलः ।
सामर्षः पाण्डवो नित्यं प्रियो भ्रातुः प्रियंकरः ॥ ५-९०-२२ (३४९२२)
कीचकस्य तु सज्ञातेर्यो हन्ता मधुसूदन ।
शूरः क्रोधवशानां च हिडिम्बस्य बकस्य च ॥ ५-९०-२३ (३४९२३)
पराक्रमे शक्रसमो मातरिश्वसमो बले ।
महेश्वरसमः क्रोधे भीमः प्रहरतां वरः ॥ ५-९०-२४ (३४९२४)

क्रोधं बलममर्षं च यो निधाय परंतपः ।
जितात्मा पाण्डवोऽमर्षी भ्रातुस्तिष्ठति शासने ॥ ५-९०-२५ (३४९२५)
तेजोराशिं महात्मानं वरिष्ठमभितौजसम् ।
भीमं प्रदर्शनेनापि भीमसेनं जनार्दन ॥ ५-९०-२६ (३४९२६)
तं ममाचक्ष्व वार्ष्णेय कथमद्य वृकोदरः ।
आस्ते परिघबाहुः स मध्यमः पाण्डवो बली ॥ ५-९०-२७ (३४९२७)
अर्जुनेनार्जुनो यः स कृष्ण बाहुसहस्रिणा ।
द्विबाहुः स्पर्धते नित्यमतीतेनापि केशव ॥ ५-९०-२८ (३४९२८)
क्षिपत्येकेन वेगेन पञ्चबाणशतानि यः ।
इष्वस्त्रे सदृशो राज्ञः कार्तवीर्यस्य पाण्डवः ॥ ५-९०-२९ (३४९२९)
तेजसाऽऽदित्यसदृशो महर्षिसदृशो दमे ।
क्षमया पृथिवीतुल्यो महेन्द्रसमविक्रमः ॥ ५-९०-३० (३४९३०)
आधिराज्यं महद्दीप्तं प्रथितं मधुसूदन ।
आहृतं येन वीर्येण कुरूणां सर्वराजसु ॥ ५-९०-३१ (३४९३१)
यस्य बाहुबलं सर्वे पाण्डवाः पर्युपासते ।
स सर्वरथिनां श्रेष्ठः पाण्डवः सत्यविक्रमः ॥ ५-९०-३२ (३४९३२)
यं गत्वाऽभिमुखः सङ्ख्ये न जीवन्तश्चिदाव्रजेत् ।
यो जेता सर्वभूतानामजेयो जिष्णुरच्युत ॥ ५-९०-३३ (३४९३३)
योऽपाश्रयः पाण्डवानां देवानामिव वासवः ।
स ते भ्राता सखा चैव कथमद्य धनञ्जयः ॥ ५-९०-३४ (३४९३४)
दयावान्सर्वभूतेषु ह्रीनिषेवो महास्रवित् ।
मृदुश्च सुकुमारश्च धार्मिकश्च प्रियश्च मे ॥ ५-९०-३५ (३४९३५)
सहदेवो महेष्वासः शूरः समितिशोभनः ।
भ्रातॄणां कृष्ण शुश्रूषुर्धर्मार्थकुशलो युवा ॥ ५-९०-३६ (३४९३६)
सदैव सहदेवस्य भ्रातरो मधुसूदन ।
वृत्तं कल्याणवृत्तस्य पूजयन्ति महात्मनः ॥ ५-९०-३७ (३४९३७)
ज्येष्ठोपचायिनं वीरं सहदेवं युधां पतिम् ।
शुश्रूषुं मम वार्ष्णेय माद्रीपुत्रं प्रचक्ष्व मे ॥ ५-९०-३८ (३४९३८)
सुकुमारो युवा शूरो दर्शनीयश्च पाण्डवः ।
भ्रातॄणां चैव सर्वेषां प्रियः प्राणो बहिश्चरः ॥ ५-९०-३९ (३४९३९)
चित्रयोधी च नकुलो महेष्वासो महाबलः ।
कच्चित्स कुशली कृष्ण वत्सो मम सुखैधितः ॥ ५-९०-४० (३४९४०)
सुखोचितमदुःखार्हं सुकुमारं महारथम् ।
अपि जातु महाबाहो पश्येयं नकुलं पुनः ॥ ५-९०-४१ (३४९४१)
पक्ष्मसंपातजे काले नकुलेन विनाकृता ।
न लभामि धृतिं वीर साऽद्य जीवामि पश्य माम् ॥ ५-९०-४२ (३४९४२)

सर्वैः पुत्रैः प्रियतरा द्रौपदी मे जनार्दन ।
कुलीना रूपसंपन्ना सर्वैः समुदिता गुणैः ॥ ५-९०-४३ (३४९४३)
पुत्रलोकात्पतिलोकं वृण्वाना सत्यवादिनी ।
प्रियान्पुत्रान्परित्यज्य पाण्डवाननुरुध्यते ॥ ५-९०-४४ (३४९४४)
महाभिजनसंपन्ना सर्वकामैः सुपूजिता ।
ईश्वरी सर्वकल्याणी द्रौपदी कथमच्युत ॥ ५-९०-४५ (३४९४५)
पतिभिः पञ्चभिः शूरैरग्निकल्पैः प्रहारिभिः ।
उपपन्ना महेष्वासैर्द्रौपदी दुःखभागिनी ॥ ५-९०-४६ (३४९४६)
चतुर्दशमिदं वर्षं यन्नापश्यमरिन्दम ।
पुत्रादिभिः परिद्यूनां द्रौपदीं सत्यवादिनीम् ॥ ५-९०-४७ (३४९४७)
न नूनं कर्मभिः पुण्यैरश्नुते पुरुषः सुखम् ।
द्रौपदी चेत्तथावृत्ता नाश्नुते सुखमव्ययम् ॥ ५-९०-४८ (३४९४८)
न प्रियो मम कृष्णाया बीभत्सुर्न युधिष्ठिरः ।
भीमसेनो यमौ वापि यदपश्यं सभागताम् ॥ ५-९०-४९ (३४९४९)
न मे दुःखतरं किंचिद्भूतपूर्वं ततोऽधिकम् ।
स्त्रीधर्मिणीं द्रौपदीं यच्छ्वशुराणां समीपगाम् ॥ ५-९०-५० (३४९५०)
आनायितामनार्येण क्रोधलोभानुवर्तिना ।
सर्वे प्रैक्षन्त कुरव एकवस्त्रां सभागताम् ॥ ५-९०-५१ (३४९५१)
तत्रैव धृतराष्ट्रश्च महाराजश्च बाह्लिकः ।
कृपश्च कसोमदत्तश्च निर्विण्णाः कुरवस्तथा ॥ ५-९०-५२ (३४९५२)
तस्यां संसदि सर्वेषां क्षत्तारं पूजयाम्यहम् ।
वृत्तेन हि भवत्यार्यो न धनेन न विद्यया ॥ ५-९०-५३ (३४९५३)
तस्य कृष्ण महाबुद्धेर्गम्भीरस्य महात्मनः ।
क्षत्तुःक शीलमलङ्कारो लोकान्विष्टभ्य तिष्ठति ॥ ५-९०-५४ (३४९५४)
वैशम्पायन उवाच। ५-९०-५५क्ष् (३६५६)
सा शोकार्ता च हृष्टा च दृष्ट्वा गोविन्दमागतम् ।
नानाविधानि दुःखानि सर्वाण्येवान्वकीर्तयम् ॥ ५-९०-५५ (३४९५५)
पूर्वैराचरितं यत्तत्कुराजभिररिन्दम ।
अक्षद्यूतं मृगवधः कच्चिदेषां सुखावहम् ॥ ५-९०-५६ (३४९५६)
तन्मां दहति यत्कृष्णा सभायां कुरुसन्निधौ ।
धार्तराष्ट्रैः परिक्लिष्टा यथा न कुशलं तथा ॥ ५-९०-५७ (३४९५७)
निर्वासनं च नगरात्प्रव्रज्या च परन्तप ।
नानाविधानां दुःखानामावासोऽस्मि जनार्दन ॥ ५-९०-५८ (३४९५८)
अज्ञातचर्या बालानामवरोधश्च माधव ।
न मे क्लेशतमं तत्स्यात्पुत्रैः सह परन्तप ॥ ५-९०-५९ (३४९५९)
दुर्योधनेन निकृता वर्षमद्य चतुर्दशम् ।

दुःखादपि सुखं नः स्याद्यदि पुण्यफलक्षयः ॥ ५-९०-६० (३४९६०)
न मे विशेषो जात्वासीद्धार्तराष्ट्रेषु पाण्डवैः ।
तेन सत्येन कृष्ण त्वां हतामित्रं श्रिया वृतम् ।
अस्माद्विमुक्तं सङ्ग्रामात्पश्येयं पाण्डवैः सह ॥ ५-९०-६१ (३४९६१)
नैव शक्याः पराजेतुं सर्वं ह्येषां तथाविधम् ।
पितरं त्वेव गर्हेयं नात्मानं न सुयोधनम् ॥ ५-९०-६२ (३४९६२)
येनाहं कुन्तिभोजाय धनं वृत्तैरिवार्पिता ।
बालां मामार्यकस्तुभ्यं क्रीडन्तीं कन्दुहस्तिकां ॥ ५-९०-६३ (३४९६३)
अदात्तु कुन्तिभोजाय सखा सख्ये महात्मने ।
साऽहं पित्रा च निकृता श्वशुरैश्च परन्तप ।
अत्यन्तदुःखिता कृष्ण किं जीवितफलं मम ॥ ५-९०-६४ (३४९६४)
यन्मां वागब्रवीन्नक्तं सूतके सव्यसाचिनः ।
पुत्रस्ते पृथिवीं जेता यशश्चास्य दिवं स्पृशेत् । ५-९०-६५ (३४९६५)
हत्वा कुरून्महाजन्ये राज्यं प्राप्य धनञ्जयः ।
भ्रातृभिः सह कौन्तेयस्त्रीन्मेधानाहरिष्यति ॥ ५-९०-६६ (३४९६६)
नाहं तामभ्यसूयामि नमो धर्माय वेधसे ।
कृष्णाय महते नित्यं धर्मो धारयति प्रजाः ॥ ५-९०-६७ (३४९६७)
धर्मश्चेदस्ति वार्ष्णेय यथा वागभ्यभाषत ।
त्वं चापि तत्तथा कृष्ण सर्वं संपादयिष्यसि ॥ ५-९०-६८ (३४९६८)
न मां माधव वैधव्यं नार्थनाशो न वैरिता ।
तथा शोकाय दहति यथा पुत्रैर्विना भवः ॥ ५-९०-६९ (३४९६९)
याऽहं गाण्डीवधन्वानं सर्वशस्त्रभृतां वरम् ।
धनञ्जयं न पश्यामि का शान्तिर्हृदयस्य मे ।
इतश्चतुर्दशं वर्षं यन्नापश्यं युधिष्ठिरम् ॥ ५-९०-७० (३४९७०)
धनञ्जयं च गोविन्द यमौ तं च वृकोदरम् ।
जीवनाशं प्रनष्टानां श्राद्धं कुर्वन्ति मानवाः ॥ ५-९०-७१ (३४९७१)
अर्थतस्ते मम मृतास्तेषां चाहं जनार्दना ।
ब्रूया माधव राजानं धर्मात्मानं युधिष्ठिरम् ॥ ५-९०-७२ (३४९७२)
भूयांस्ते हीयते धर्मो मा पुत्रक वृथा कृथाः ।
पराश्रया वासुदेव या जीवति धिगस्तु ताम् ॥ ५-९०-७३ (३४९७३)
वृत्तेः कार्पण्यलब्धाया अप्रतिष्ठैव ज्यायसी ।
अथो धनञ्जयं ब्रूया नित्योद्युक्तं वृकोदरम् ॥ ५-९०-७४ (३४९७४)
यदर्थं क्षत्रिया सूते तस्य कालोऽयमागतः ।
अस्मिंश्चेदागते काले मिथ्या चातिक्रमिष्यति ॥ ५-९०-७५ (३४९७५)
लोकसंभाविताः संतः सुनृशंसं करिष्यथ ।
नृशंसेन च वो युक्तांस्त्यजेयं शाश्वतीः समाः ॥ ५-९०-७६ (३४९७६)

काले हि समनुप्राप्ते त्यक्तव्यमपि जीवनम् ।
माद्रीपुत्रौ च व्यक्तव्यौ क्षत्रधर्मरतौ सदा ॥ ५-९०-७७ (३४९७७)
विक्रमेणार्जितान्भोगान्वृणीतं जीवितादपि ।
विक्रमाधिगता ह्यर्थाः क्षत्रधर्मेण जीवतः ॥ ५-९०-७८ (३४९७८)
मनो मनुष्यस्य सदा प्रीणन्ति पुरुषोत्तम ।
गत्वा ब्रूहि महाबाहो सर्वशस्त्रभृतां वरम् ॥ ५-९०-७९ (३४९७९)
अर्जुनं पाण्डवं वीरं द्रौपद्याः पदवीं चर ।
विदितौ हि तवात्यन्तं क्रुद्धौ तौ तु यथान्तकौ ॥ ५-९०-८० (३४९८०)
भीमार्जुनौ नयेतां हि देवानपि परां गतिम् ।
तयोश्चैतदवज्ञानं यत्सा कृष्णा सभां गता ॥ ५-९०-८१ (३४९८१)
दुःशासतश्च कर्णश्च परुषाण्यभ्यभाषताम् ।
दुर्योधनो भीमसेनमभ्यगच्छन्मनस्विनम् ॥ ५-९०-८२ (३४९८२)
पश्यतां कुरुमुख्यानां तस्य द्रक्ष्यति यत्फलम् ।
न हि वैरं समासाद्य प्रशाम्यति वृकोदरः ॥ ५-९०-८३ (३४९८३)
सुचिरादपि भीमस्य न हि वैरं प्रशाम्यति ।
यावदन्तं न नयति शात्रवाञ्चत्रुकर्शनः ॥ ५-९०-८४ (३४९८४)
न दुःखं राज्यहरणं न च द्यूते पराजयः ।
प्रव्राजनं तु पुत्राणां न मे तद्दुःखकारणम् ॥ ५-९०-८५ (३४९८५)
यत्तु सा बृहती श्यामा एकवस्त्रा सभां गता ।
अशृणोत्परुषा वाचः किं नु दुःखतरं ततः ॥ ५-९०-८६ (३४९८६)
स्त्रीधर्मिणी वरारोहा क्षत्रधर्मरता सदा ।
नाभ्यगच्छत्तदा नाथं कृष्णा नाथवती सती ॥ ५-९०-८७ (३४९८७)
यस्या मम सपुत्रायास्त्वं नाथो मधुसूदन ।
रामश्च बलिनां श्रेष्ठः प्रद्युम्नश्च महारथः ॥ ५-९०-८८ (३४९८८)
साऽहमेवंविधं दुःखं सहेयं पुरुषोत्तम ।
भीमे जीवति दुर्धर्षे विजये चापलायिनि ॥ ५-९०-८९ (३४९८९)
वैशम्पायन उवाच। ५-९०-९०क्ष् (३६५७)
तत आश्वासयामास पुत्राधिभिरभिप्लुताम् ।
पितृष्वसारं शोचन्तीं शौरिः पार्थसखः पृथाम् ॥ ५-९०-९० (३४९९०)
वासुदेव उवाच। ५-९०-९१क्ष् (३६५८)
का नु सीमन्तिनी त्वादृग्लोकेष्वस्ति पितृष्वसः ।
शूरस्य राज्ञो दुहिता आजमीढकुलं गता ॥ ५-९०-९१ (३४९९१)
महाकुलीना भवती ह्रदाद्ध्रदमिवागता ।
ईश्वरी सर्वकल्याणी भर्त्रा परमपूजिता ॥ ५-९०-९२ (३४९९२)
वीरसूर्वीरपत्नी त्वं सर्वैः समुदिता गुणैः ।
मुखदुःखे महाप्राज्ञे त्वादृशी सोढुमर्हति ॥ ५-९०-९३ (३४९९३)

निद्रातन्द्रे क्रोधहर्षौ क्षुत्पिपासे हिमातपौ ।
एतानि पार्था निर्जित्य नित्यं वीरसुखे रताः ॥ ५-९०-९४ (३४९९४)
त्यक्तग्राम्यसुखाः पार्था नित्यं वीरसुखप्रियाः ।
न तु स्वल्पेन तुष्येयुर्महोत्साहा महाबलाः ॥ ५-९०-९५ (३४९९५)
अन्तं धीरा निषेवन्ते मध्यं ग्राम्यसुखप्रियाः ।
उत्तमांश्च परिक्लेशान्भोगांश्चातीव मानुषान् ॥ ५-९०-९६ (३४९९६)
अन्तेषु रेमिरे धीरा न ते मध्येषु रेमिरे ।
अन्तप्राप्तिं सुखं प्राहुर्दुःखमन्तरमन्तयोः ॥ ५-९०-९७ (३४९९७)
अभिवादयन्ति भवतीं पाण्डवाः सह कृष्णया ।
आत्मानं ते कुशलिनं निवेद्याहुरनामयम् ॥ ५-९०-९८ (३४९९८)
अरोगान्सर्वसिद्धार्थान्क्षिप्रं द्रक्ष्यसि पाण्डवान् ।
ईश्वरान्सर्वलोकस्य हतामित्रान्श्रिया वृतान् ॥ ५-९०-९९ (३४९९९)
एवमाश्वासिता कुन्ती प्रत्युवाच जनार्दनम् ।
पुत्राधिभिरभिध्वस्ता निगृह्याबुद्धिजं तमः ॥ ५-९०-१०० (३५०००)
कुन्त्युवाच । ५-९०-१०१क्ष् (३६५९)
यद्यत्तेषां महाबाहो पथ्यं स्यान्मधुसूदन ।
यथायथा त्वं मन्येथाः कुर्याः कृष्ण तथातथा ॥ ५-९०-१०१ (३५००१)
अविलोपेन धर्मस्य अनिकृत्या परन्तप ।
प्रभावज्ञाऽस्मि ते कृष्ण सत्यस्याभिजनस्य च ॥ ५-९०-१०२ (३५००२)
व्यवस्थायां च मित्रेषु बुद्धिविक्रमयोस्तथा ।
त्वमेव नः कुले धर्मस्त्वं सत्यं त्वं तपो महत् ॥ ५-९०-१०३ (३५००३)
त्वं त्राता त्वं महद्ब्रह्म त्वयि सर्वं प्रतिष्ठितम् ।
यथैवात्थ तथैवैतत्त्वयि सत्यं भविष्यति ॥ ५-९०-१०४ (३५००४)
ग कुरूणां पाण्डवानां च लोकानां चापराजित ।
सर्वस्यैतस्य वार्ष्णेय गतिस्त्वमसि माधव ।
प्रभावो बुद्धिवीर्यं च तादृशं तव केशव ॥' ५-९०-१०५ (३५००५)
वैशम्पायन उवाच । ५-९०-१०६क्ष् (३६६०)
तामामन्त्र्य च गोविन्दः कृत्वा चाभिप्रदक्षिणम् ।
प्रातिष्ठत महाबाहुर्दुर्योधनगृहान्प्रति ॥ ॥ ५-९०-१०६ (३५००६)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि नवतितमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-९०-६ प्रियं राज्यादि । सुखं भोगोत्थ आह्लादः ॥
५-९०-२१ प्रियो दर्शो दर्शनं यस्य ॥
५-९०-४८ तथावृत्ता पुण्यशीला ॥

५-९०-५९ अवरोधः राज्यप्रदानरूपो वृत्तिनिरोधः ॥
५-९०-६० यदि सुखं पुण्यक्षयरूपं अर्थाद्दुःखं पापक्षयरूपं
तर्हि दुःखात्पापक्षयहेतोस्तत्सुखं नः अस्माकं स्यात् । तथा च न
वयं दुःखाङ्गयं प्राप्नुम इत्यर्थः ॥
५-९०-६१ अस्मात् भाविनः कुरुपाण्डवसंग्रामात् ॥
५-९०-६२ सर्वं वृत्तम् । एषां पाण्डवानां तथाविधं अविषमम् ॥
५-९०-६३ वृत्तैर्वदान्यत्वेन ख्यातैर्धनं यथा अक्लेशेनार्प्यते
तद्वत् येनाहमर्पिता । वृत्तोऽतीते दृढे ख्याते इति विश्वः । आर्यकः
पितामहः । तुभ्यं तव ॥
५-९०-६६ महाजन्ये महायुद्धे । मेधान् अश्वमेधान् ॥
५-९०-७५ अतिक्रमिष्यति अयुद्धेनेत्यर्थः ॥
५-९०-१०२ अनिकृत्या अच्छलेन ॥

उद्योगपर्व - अध्याय ०९१
॥ श्रीः ॥
५.९१. अध्यायः ९१

Mahabharata - Udyoga Parva - Chapter Topics
दुर्योधनेन स्वगृहमागतस्य श्रीकृष्णस्य पूजापूर्वकं
भोजनायामन्त्रणम् ॥ १ ॥
दुर्योधनेन श्रीकृष्णंप्रति स्वीयान्नपानाद्य नादरणकारणप्रश्ने
कृष्णेन तत्कथनपूर्वकं विदुरगृहगमनम् ॥ २ ॥
विदुरेण सादरमन्नपानादिना श्रीकृष्णाराधनम् ॥ ३ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-९१-० (३५००७)
वैशम्पायन उवाच । ५-९१-०क्ष (३६६१)
पृथामामन्त्र्य गोविन्दः कृत्वा चाभिप्रदक्षिणम् ।
दुर्योधनगृहं शौरिरभ्यगच्छदरिन्दमः ॥ ५-९१-१ (३५००८)
लक्ष्म्या परमया युक्तं पुरन्दरगृहोपमम् ।
विचित्रैरासनैर्युक्तं प्रविवेश जनार्दनः ॥ ५-९१-२ (३५००९)
तस्य कक्ष्या व्यतिक्रम्य तिस्रो द्वाःस्थैरवारितः ।
ततोऽभ्रघनसङ्काशं गिरिकूटमिवोच्छ्रितम् ॥ ५-९१-३ (३५०१०)
श्रिया ज्वलन्तं प्रासादमारुरोह महायशाः ।
तत्र राजसहस्रैश्च कुरुभिश्चाभिसंवृतम् ॥ ५-९१-४ (३५०११)
धार्तराष्ट्रं महाबाहुं ददर्शासीनमासने ।

दुःशासनं च कर्णं च शकुनिं चापि सौबलम् ॥ ५-९१-५ (३५०१२)
दुर्योधनसमीपे तानासनस्थान्ददर्श सः ।
अभ्यागच्छति दाशार्हे धार्तराष्ट्रो महायशाः ॥ ५-९१-६ (३५०१३)
उदतिष्ठत्सहामात्यः पूजयन्मधुसूदनम् ।
समेत्य धार्तराष्ट्रेण महामात्येन केशवः ॥ ५-९१-७ (३५०१४)
राजभिस्तत्र वार्ष्णेयः समागच्छद्यथावयः ।
तत्र जाम्बूनदमयं पर्यङ्कं सुपरिष्कृतम् ॥ ५-९१-८ (३५०१५)
विविधास्तरणास्तीर्णमभ्युपाविशदच्युतः ।
तस्मिन्गां मधुपर्कं चाप्युदकं च जनार्दने ॥ ५-९१-९ (३५०१६)
निवेदयामास तदा गृहान्राज्यं च कौरवः । ५-९१-१०ब्ग् आसनं
सर्वतोभद्रं सर्वरत्नविभूषितम् ॥ ५-९१-१० (३५०१७)
कृष्णार्थमेवं संसिद्धं धार्तराष्ट्रस्य शासनात्।'
तत्र गोविन्दमासीनं प्रसन्नादित्यवर्चसम् ॥ ५-९१-११ (३५०१८)
उपासाञ्चक्रिरे सर्वे कुरवो राजभिः सह ।
ततो दुर्योधनो राजा वार्ष्णेयं जयतां वरम् ॥ ५-९१-१२ (३५०१९)
न्यमन्त्रयद्भोजनेन नाभ्यनन्दच्च केशवः ।
ततो दुर्योधनः कृष्णमब्रवीत्कुरुसंसदि ॥ ५-९१-१३ (३५०२०)
मृदुपूर्वं शठोदर्कं कर्णमाभाष्य कौरवः ।
कस्मादन्नानि पापानि वासांसि शयनानि च ॥ ५-९१-१४ (३५०२१)
त्वदर्थमुपनीतानि नाग्रहीस्त्वं जनार्दन ।
उभयोश्च ददत्साह्यमुभयोश्च हिते रतः ॥ ५-९१-१५ (३५०२२)
संबन्धी दयितश्चासि धृतराष्ट्रस्य माधव ।
त्वं हि गोविन्द धर्मार्थौ वेत्थ तत्त्वेन सर्वशः ।
तत्र कारणमिच्छामि श्रोतुं चक्रगदाधर ॥ ५-९१-१६ (३५०२३)
वैशम्पायन उवाच। ५-९१-१७क्ष् (३६६२)
स एवमुक्तो गोविन्दः प्रत्युवाच महामनाः ।
उद्यन्मेघस्वनःक काले प्रगृह्य विपुलं भुजम् ॥ ५-९१-१७ (३५०२४)
अलघूकृतमग्रस्तमनिरस्तमसंकुलम् ।
राजीवनेत्रो राजानं हेतुमद्वाक्यमुत्तमम् ॥ ५-९१-१८ (३५०२५)
कृतार्था भुञ्जते दूताः पूजां गृह्णन्ति चैव ह ।
कृतर्थं मां सहामात्यं समर्चिष्यसि भारत ॥ ५-९१-१९ (३५०२६)
एवमुक्तः प्रत्युवाच धार्तराष्ट्रो जनार्दनम् ।
न युक्तं भवताऽस्मासु प्रतिपत्तुमसांप्तम् ॥ ५-९१-२० (३५०२७)
कृतार्थं वाऽकृतार्थं वा त्वां वयं मधुसूदन ।
यतामहे पूजयितुं दाशार्ह न च शक्नुमः ॥ ५-९१-२१ (३५०२८)
न च तत्कारणं विद्मो यस्मान्नो मधुसूदन ।

पूजां कृतां प्रीयमाणो नामंस्थाः पुरुषोत्तम ॥ ५-९१-२२ (३५०२९)
वैरं नो नास्ति भवता गोविन्द न च विग्रहः ।
स भवान्प्रसमीक्ष्यैतन्नेदृशं वक्तुमर्हति ॥ ५-९१-२३ (३५०३०)
वैशम्पायन उवाच। ५-९१-२४क्ष् (३६६३)
एवमुक्तः प्रत्युवाच धार्तराष्ट्रं जनार्दनः ।
अभिवीक्ष्य सहामात्यं दाशार्हः प्रहसन्निव ॥ ५-९१-२४ (३५०३१)
नाहं कामान्न संरम्भान्न द्वेषान्नार्थकारणात् ।
न हेतुवादाल्लोभाद्वा धर्मं जह्यां कथंचन ॥ ५-९१-२५ (३५०३२)
संप्रीतिभोज्यान्यन्नानि आपद्भोज्यानि वा पुनः ।
न च संप्रीयते राजन्न चैवापद्गता वयम् ॥ ५-९१-२६ (३५०३३)
गद्विषदन्नं न भोक्तव्यं द्विषन्तं नैव भोजयेत् ।
पाण्डवान्द्विषसे राजन्मम प्राणा हि पाण्डवाः ॥' ५-९१-२७ (३५०३४)
अकस्माद्द्विषसे राजञ्जन्मप्रभृति पाण्डवान् ।
प्रियानुवर्तिनो भ्रातॄन्सर्वैः समुदितान्गुणैः ॥ ५-९१-२८ (३५०३५)
अकस्माच्चैव पार्थानां द्वेषणं नोपपद्यते ।
धर्मे स्थिताः पाण्डवेयाः कस्तान्किं वक्तुमर्हति ॥ ५-९१-२९ (३५०३६)
यस्तान्द्वेष्टि स मां द्वेष्टि यस्ताननु समामनु ।
ऐकात्म्यं मां गतं विद्धि पाण्डवैर्धर्मचारिभिः ॥ ५-९१-३० (३५०३७)
कामक्रोधानुवर्ती हि यो मोहाद्विरुरुत्सति ।
गुणवन्तं च यो द्वेष्टि तमाहुः पुरुषाधमम् ॥ ५-९१-३१ (३५०३८)
यः कल्याणगुणाञ्ज्ञातीन्मोहाल्लोभाद्विदृक्षते ।
सोजितात्माऽजितक्रोधो न चिरं तिष्ठति श्रिया ॥ ५-९१-३२ (३५०३९)
अथ यो गुणसंपन्नान्हृदयस्याप्रियानपि ।
प्रियेण कुरुते वश्यांश्चिरं यशसि तिष्ठति ॥ ५-९१-३३ (३५०४०)
सर्वमेतन्न भोक्तव्यमन्नं दुष्टाभिसंहितम् ।
क्षुत्तुरेकस्य भोक्तव्यमिति मे धीयते मतिः ॥ ५-९१-३४ (३५०४१)
एवमुक्त्वा महाबाहुर्दुर्योधनममर्षणम् ।
निश्चक्राम ततः शुभ्राद्धार्तराष्ट्रनिवेशनात् ॥ ५-९१-३५ (३५०४२)
निर्याय च महाबाहुर्वासुदेवो महामनाः ।
निवेशाय ययौ वेश्य विदुरस्य महात्मनः ॥ ५-९१-३६ (३५०४३)
तमभ्यगच्छद्द्रोणश्च कृपो भीष्मोऽथ बाह्लिकः ।
कुरवश्च महाबाहुं विदुरस्य गृहे स्थितम् ॥ ५-९१-३७ (३५०४४)
त ऊचुर्माधवं वीरं कुरवो मधुसूदनम् ।
निवेदयामो वार्ष्णेय सरत्नांस्ते गृहान्वयम् ॥ ५-९१-३८ (३५०४५)
तानुवाच महातेजाः कौरवान्मधुसूदनः ।
सर्वे भवन्ते गच्छन्तु सर्वा मेऽपचितिः कृता ॥ ५-९१-३९ (३५०४६)

वैशम्पायन उवाच। ५-९१-४०क्ष् (३६६४)
यातेषु कुरुषु क्षत्ता दाशार्हमपराजितम् ।
अभ्यर्चयामास तदा सर्वकामैः प्रयत्नवान् ॥ ५-९१-४० (३५०४७)
ततः क्षत्राऽन्नपानानि शुचीनि गुणवन्ति च ।
उपाहरदनेकानि केशवाय महात्मने ॥ ५-९१-४१ (३५०४८)
तैतर्पयित्वा प्रथमं ब्राह्मणान्मधुसूदनः ।
वेदविद्भ्यो ददौ कृष्णः परमद्रविणान्यपि ॥ ५-९१-४२ (३५०४९)
ग्भुक्तवत्सु द्विजाग्र्येषु निषण्णेषु वरासने ।
शुचिः सुप्रयतो भून्वा विदुरोऽन्नमुपारत् ॥ ५-९१-४३ (३५०५०)
श्रद्धया परया युक्त इदं वचनमब्रवीत् ।
संवृतैस्तुष्य गोविन्द एतन्नः धनम् ।
अन्यथा हि विशेषेण कस्त्वामर्चितुमर्हति ॥ ५-९१-४४ (३५०५१)
वैशम्पायन उवाच। ५-९१-४५क्ष् (३६६५)
ततोऽनुयायिभिः सार्धं मरुद्भिरिव वासवः ।
विदुरान्नानि बुभुजे शुचीनि गुणवन्ति च ॥ ५-९१-४५ (३५०५२)
तं भुक्तवन्तं विविधाः सुशब्दाः सूतमागधाः ।
अभितुष्टुवुरासीनं दाशार्हमपराजितम् ॥ ॥ ५-९१-४६ (३५०५३)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
एकनवतितमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-९१-१४ शठोदर्कं शाद्यपर्यवसानम् । आभाष्य
संबोधनोनोन्मुखीकृत्य । ५-९१-१७ प्रगृह्य उद्यम्य ॥
५-९१-२५ संरम्भात् क्रोधात् । हेतुवादात् कपटात् ॥
५-९१-३१ विरुरुत्सति विरोधं कर्तुमिच्छति ॥
५-९१-४४ संवृतैः राजानर्हतया गोपितैः ॥

उद्योगपर्व - अध्याय ०९२
॥ श्रीः ॥
५.९२. अध्यायः ९२

Mahabharata - Udyoga Parva - Chapter Topics
रात्रौ विदुरेण श्रीकृष्णंप्रति भीष्मादिसमाश्रयणेन गर्वितस्य
दुर्योधनस्य दौश्शील्याभिलपनपूर्वकं तस्मिन् सामवचनस्य
नैष्फल्यकथनम् ॥ १ ॥

तथा दुष्टभूयिष्ठसभाप्रवेशस्य स्वानभिमतत्वकथनम् ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१२-० (३५०५४)
वैशम्पायन उवाच। ५-१२-०क्ष् (३६६६)
तं भुक्तवन्तमाश्वस्तं निशायां विदुरोऽब्रवीत् ।
नेदं सम्यग्व्यवसितं केशवागमनं तव ॥ ५-१२-१ (३५०५५)
अर्थधर्मातिगो मन्दः संरम्भी च जनार्दन ।
मानघ्नो मानकामश्च वृद्धानां शासनातिगः ॥ ५-१२-२ (३५०५६)
धर्मशास्त्रातिगो मूढो दुरात्मा प्रग्रहं गतः ।
अनेयः श्रेयसां मन्दो धार्तराष्ट्रो जनार्दन ॥ ५-१२-३ (३५०५७)
कामात्मा प्राज्ञमानी च मित्रध्रुक्सर्वशङ्कितः ।
अकर्ता चाकृतज्ञश्च त्यक्तधर्मा प्रियानृतः ॥ ५-१२-४ (३५०५८)
मूढश्चाकृतबुद्धिश्च इन्द्रियाणामनीश्वरः ।
कामानुसारी कृत्येषु सर्वेष्वकृतनिश्चयः ॥ ५-१२-५ (३५०५९)
एतैश्चान्यैश्च बहुभिर्दोषैरेव समन्वितः ।
त्वयोच्यमानः श्रेयोऽपि संरम्भान्न ग्रहीष्यति ॥ ५-१२-६ (३५०६०)
भीष्मे द्रोणे कृपे कर्णे द्रोणपुत्रे जयद्रथे ।
भूयसीं वर्तते वृत्तिं न शमे कुरुते मनः ॥ ५-१२-७ (३५०६१)
निश्चितं धार्तराष्ट्राणां सकर्णानां जनार्दन ।
भीष्मद्रोणमुखान्पार्था न शक्ताः प्रतिवीक्षितुम् ॥ ५-१२-८ (३५०६२)
सेनासमुदयं कृत्वा पार्थिवं मधुसूदन ।
कृतार्थं मन्यते बाल आत्मानमविचक्षणाः ॥ ५-१२-९ (३५०६३)
एकः कर्णः पराञ्जेतुं समर्थ इति निश्चितम् ।
धार्तराष्ट्रस्य दुर्बुद्धेः स शमं नोपयास्यति ॥ ५-१२-१० (३५०६४)
संविच्च धार्तराष्ट्राणां सर्वेषामेव केशव ।
शमे प्रयतमानस्य तव सौभ्रात्रकाङ्क्षिणः ॥ ५-१२-११ (३५०६५)
न पाण्डवानामस्माभिः प्रतिदेयं यथोचितम् ।
इति व्यवसितास्तेषु वचनं स्यान्निरर्थकम् ॥ ५-१२-१२ (३५०६६)
यत्र सूक्तं दुरुक्तं च समं स्यान्मधुसूदन ।
न तत्र प्रलपेत्प्राज्ञो बधिरेष्विव गायनः ॥ ५-१२-१३ (३५०६७)
अविजानत्सु मूढेषु निर्मर्यादेषु माधव ।
तत्त्वं वाक्यं ब्रुवन्निन्द्याश्चण्डालेषु द्विजो यथा ॥ ५-१२-१४ (३५०६८)
सोऽयं बलस्थो मूढश्चन करिष्यति ते वचः ।
तस्मिन्निरर्थकं वाक्यमुक्तं संपत्स्यते तव ॥ ५-१२-१५ (३५०६९)

तेषां समुपविष्टानां सर्वेषां पापचेतसाम् ।
तव मध्यावतरणं मम कृष्ण न रोचते ॥ ५-९२-१६ (३५०७०)
दुर्बुद्धीनामशिष्टानां बहूनां दुष्टचेतसाम् ।
प्रतीपं वचनं मध्ये तव कृष्ण न रोचते ॥ ५-९२-१७ (३५०७१)
अनुपासितवृद्धत्वाच्छ्रियो दर्पाच्च मोहितः ।
वयोदर्पादमर्षाच्च न ते श्रेयो ग्रहीष्यति ॥ ५-९२-१८ (३५०७२)
बलं बलवदप्यस्य यदि वक्ष्यसि माधव ।
त्वय्यस्य महती शङ्का न करिष्यति ते वचः ॥ ५-९२-१९ (३५०७३)
नेदमद्य युधा शक्यमिन्द्रेणापि सहामरैः ।
इति व्यवसिताः सर्वे धार्तराष्ट्रा जनार्दन ॥ ५-९२-२० (३५०७४)
तेष्वेवमुपपन्नेषु कामक्रोधानुवर्तिषु ।
समर्थमपि ते वाक्यमसमर्थं भविष्यति ॥ ५-९२-२१ (३५०७५)
मध्ये तिष्ठन्हस्त्यनीकस्य मन्दो
रथाश्वयुक्तस्य बलस्य मूढः ।
दुर्योधनो मन्यते बीतभीतिः
कृत्स्ना मयेयं पृथिवी जितेति ॥ ५-९२-२२ (३५०७६)
आशंसते वै धृतराष्ट्रस्य पुत्रो
महाराज्यमसपत्नं पृथिव्याम् ।
तस्मिञ्शमः केवलो नोपलभ्यो
बद्धं सन्तं मन्यते लब्धमर्थम् ॥ ५-९२-२३ (३५०७७)
पर्यस्तेयं पृथिवी कालपक्वा
दुर्योधनार्थे पाण्डवान्योद्धुकामाः ।
समागताः सर्वयोधाः पृथिव्यां
राजानश्च क्षितिपालैः समेताः ॥ ५-९२-२४ (३५०७८)
सर्वे चैते कृतवैराः पुरस्ता-
त्त्वया राजानो हृतसाराश्च कृष्ण ।
तवोद्वेगात्संश्रिता धार्तराष्ट्रा-
न्सुसंहताः सह कर्णेन वीराः ॥ ५-९२-२५ (३५०७९)
त्यक्तात्मानः सह दुर्योधनेन
हृष्टा योद्धुं पाण्डवान्सर्वयोधाः ।
ग मृत्युर्जयो वेति कृतैकभावाः
कामात्मानो मन्युवशाविनीताः ॥'
तेषां मध्ये प्रविशेथा यदि त्वं
न तन्मतं मम दाशार्हवीर ॥ ५-९२-२६ (३५०८०)
तेषां समुपविष्टानां बहूनां दुष्टचेतसाम् ।
कथं मध्यं प्रपद्येथाः शत्रूणां शत्रुकर्शन ॥ ५-९२-२७ (३५०८१)

सर्वथा त्वं महाबाहो देवैरपि दुरुत्सहः ।
प्रभावं पौरुषं बुद्धिं जानामि तव शत्रुहन् ॥ ५-९२-२८ (३५०८२)
या मे प्रीतिः पाण्डवेषु भूयःक सा त्वयि माधव ।
प्रेम्णा च बहुमानाच्च सौहृदाच्च ब्रवीम्यहम् ॥ ५-९२-२९ (३५०८३)
या मे प्रीतिः पुष्कराक्ष त्वद्दर्शनसमुद्भवा ।
सा किमाख्यायते तुभ्यमन्तरात्माऽसि देहिनां ॥ ॥ ५-९२-३० (३५०८४)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
द्विनवतितमोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-९२-३ प्रग्रहं निर्बन्धं अत्यन्ताभिनिवेशमित्यर्थः । अनेयः
अप्रापणीयः। श्रेयसां श्रेयांसि ॥
५-९२-४ सर्वशङ्किता सर्वत्र विश्वासहीनः ॥
५-९२-७ वृत्तिं जीविकाम् । एते युद्धेन मह्यं राज्यं
दास्यन्तीत्याशयेत्यर्थः ॥
५-९२-९ पार्थिवं पृथ्वीसंबन्धिनम् ॥
५-९२-१२ प्रतिदेयं परावृत्यदेयं । व्यवसिताः निश्चिताः ॥
५-९२-१८ ते त्वत्तः ॥
५-९२-२३ वद्धं स्थिरां ॥

उद्योगपर्व - अध्याय ०९३
॥ श्रीः ॥
५.९३. अध्यायः ९३

Mahabharata - Udyoga Parva - Chapter Topics
श्रीकृष्णेन विदुरवचनानुमोदनपूर्वकं स्वागमनस्य
लोकपरिवादपरिहारार्थत्वकथनम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-९३-० (३५०८५)
ग वैशम्पायन उवाच। ५-९३-०क्ष् (३६६७)
विदुरस्य वचः श्रुत्वा प्रश्रितं पुरुषोत्तमः ।
इदं होवाच वचनं मधुरं मधुसूदनः ॥' ५-९३-१ (३५०८६)
श्रीभगवानुवाच। ५-९३-२क्ष् (३६६८)
यथा ब्रूयान्महाप्राज्ञो यथा ब्रूयाद्विचक्षणः ।

सथा वाच्यस्त्वद्विधेन भवता मद्विधः सुहृत् ॥ ५-९३-२ (३५०८७)
धर्मार्थयुक्तं तथ्यं च यथा त्वय्युपपद्यते ।
तथा वचनमुक्तोऽस्ति त्वयैतत्पितृमातृवत् ॥ ५-९३-३ (३५०८८)
सत्यं प्राप्तं च युक्तं वाऽप्येवमेव यथाऽऽत्थ माम् ।
श्रृणुष्वागमने हेतुं विदुरावहितो मम ॥ ५-९३-४ (३५०८९)
दौरात्म्यं धार्तराष्ट्रस्य क्षत्रियाणां च वैरिताम् ।
सर्वमेतदहं जानन्क्षत्तः प्राप्तोऽद्य कौरवान् ॥ ५-९३-५ (३५०९०)
पर्यस्तां पृथिवीं सर्वां साश्वां सरथकुञ्जराम् ।
यो मोचयेन्मृत्युपाशात्प्राप्नुयाद्धर्ममुत्तमम् ॥ ५-९३-६ (३५०९१)
धर्मकार्यं यतञ्शक्त्या नो चेत्प्राप्नोति मानवः ।
प्राप्तो भवति तत्पुण्यमत्र मे नास्ति संशयः ॥ ५-९३-७ (३५०९२)
मनसा चिन्तयन्पापं कर्मणा नातिरोचयन् ।
न प्राप्नोति फलं तस्येत्येवं धर्मविदो विदुः ॥ ५-९३-८ (३५०९३)
सोऽहं यतिष्ये प्रशमं क्षत्तः कर्तुममायया ।
कुरूणां सृञ्जयानां च सङ्ग्राने विनशिष्यताम् ॥ ५-९३-९ (३५०९४)
सेयमापन्महाघोरा कुरुष्वेव समुत्थिता ।
कर्णदुर्योधनकृता सर्वे ह्येते तदन्वयाः ॥ ५-९३-१० (३५०९५)
व्यसने क्लिश्यमानं हि यो मित्रं नाभिपद्यते ।
अनुनीय यथाशक्ति तं नृशंसं विदुर्बुधाः ॥ ५-९३-११ (३५०९६)
आकेशग्रहणान्मित्रमकार्यात्संनिवर्तयन् ।
अवाच्यः कस्यचिद्भवति कृतयत्नो यथाबलम् ॥ ५-९३-१२ (३५०९७)
तत्समर्थं शुभं वाक्यं धर्मार्थसहितं हितम् ।
धार्तराष्ट्रः सहामात्यो ग्रहीतुं विदुरार्हति ॥ ५-९३-१३ (३५०९८)
हितं हि धार्तराष्ट्राणां पाण्डवानां तथैव च ।
पृथिव्यां क्षत्रियाणां च यतिष्येऽहममायया ॥ ५-९३-१४ (३५०९९)
हिते प्रयतमानं मां शङ्केद्दुर्योधनो यदि ।
हृदयस्य च मे प्रीतिरानृण्यं च भविष्यति ॥ ५-९३-१५ (३५१००)
ज्ञातीनां हि मिथो भेदे यन्मित्रं नाभिपद्यते ।
सर्वयत्नेन माध्यस्थ्यं न तन्मित्रं विदुर्बुधाः ॥ ५-९३-१६ (३५१०१)
न मां ब्रूयुरधर्मिष्ठा मूढा ह्यसुहृदस्तथा ।
शक्तो नावारयत्कृष्णः संरब्धान्कुरुपाण्डवान् ॥ ५-९३-१७ (३५१०२)
उभयोः साधयन्नर्थमहामागत इत्युत ।
तत्र यत्नमहं कृत्वा गच्छेयं नृष्ववाच्यताम् ॥ ५-९३-१८ (३५१०३)
मम धर्मार्थयुक्तं हि श्रुत्वा वाक्यमनामयम् ।
न चेदादास्यते बालो दिष्टस्य वशमेष्यति ॥ ५-९३-१९ (३५१०४)
अहापयन्पाण्डवार्थं यथाव-

च्छमं कुरूणां यदि चाचरेयम् ।
पुण्यं च मे स्याच्चरितं महात्म-
न्मुच्येरंश्च कुरवो मृत्युपाशात् ॥ ५-९३-२० (३५१०५)
अपि वाचं भाषमाणस्य काव्यां
धर्मरामामर्थवतीमहिंस्राम् ।
अवेक्षेरन्धार्तराष्ट्राः शमार्थं
मां च प्राप्तं कुरवः पूजयेयुः ॥ ५-९३-२१ (३५१०६)
न चापि मम पर्याप्ताः सहिताः सर्वपार्थिवाः ।
क्रुद्धस्य प्रमुखे स्थातुं सिंहस्येवेतरे मृगाः ॥ ५-९३-२२ (३५१०७)
वैशम्पायन उवाच। ५-९३-२३क्ष् (३६६९)
इत्येवमुक्त्वा वचनं वृष्णीनामृषभस्तदा ।
शयने सुखसंस्पर्शे शिश्ये यदुसुखावहः ॥ ॥ ५-९३-२३ (३५१०८)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
त्रिनवतितमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-९३-६ पर्यस्तां अन्यथाभूताम् ॥
५-९३-७ यतन् यतमानः ॥

उद्योगपर्व - अध्याय ०९४
॥ श्रीः ॥
५.९४. अध्यायः ९४

Mahabharata - Udyoga Parva - Chapter Topics

प्रभाते संध्यामुपतिष्ठमानं श्रीकृष्णमभ्येत्य
शकुनिदुर्योधनाभ्यां सभागमनाय प्रार्थनम् ॥ १ ॥
श्रीकृष्णस्य विदुरेण सह सभाप्रवेशः ॥ २ ॥
अन्तरिक्षगतेषु नारदादिषु श्रीकृष्णाज्ञया भीष्मेण आसनादिना
सत्कृतेषु कृष्णादीनां यथोचितमासनेषूपवेशनम् ॥ ३ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-९४-० (३५१०९)
वैशम्पायन उवाच। ५-९४-०क्ष् (३६७०)
तथा कथयतोरेव तयोर्बुद्धिमतोस्तदा ।
शिवा नक्षत्रसंपन्ना सा व्यतीयाय शर्वरी ॥ ५-९४-१ (३५११०)

धर्मार्थकामयुक्ताश्च विचित्रार्थपदाक्षराः ।
शृण्वतो विविधा वाचो विदुरस्य महात्मनः ॥ ५-९४-२ (३५१११)
कथाभिरनुरूपाभी रक्तस्यामिततेजसः ।
अकामस्यैव कृष्णस्य सा व्यतीयाय शर्वरी ॥ ५-९४-३ (३५११२)
ततस्तु स्वरसंपन्ना बहवः सूतमागधाः ॥
शङ्खदुन्दुमिनिर्घोषैः केशवं प्रत्यबोधयन् ॥ ५-९४-४ (३५११३)
तत उत्थाय दाशार्हऋषभः सर्वसात्वताम् ।
सर्वमावश्यकं चक्रे प्रातः कार्यं जनार्दनः ॥ ५-९४-५ (३५११४)
कृतोदकानुजप्यः स हुताग्निः समलङ्कृतः ।
ततश्चादित्यमुद्यन्तमुपातिष्ठत माधवः ॥ ५-९४-६ (३५११५)
अथ दुर्योधनः कृष्मं शकुनिश्चापि सौबलः ।
सन्ध्यां तिष्ठन्तमभ्येत्य दाशार्हमपराजितम् ॥ ५-९४-७ (३५११६)
आचक्षेतां तु कृष्णस्य धृतराष्ट्रं सभागतम् ।
कुरूश्च भीष्मप्रमुखान्राज्ञः सर्वाश्च पार्थिवान् ॥ ५-९४-८ (३५११७)
त्वामर्थयन्ते गोविन्द दिवि शक्रमिवामराः ।
तावभ्यनन्दद्गोविन्दः साम्ना परमवल्गुना ॥ ५-९४-९ (३५११८)
ततो विमल आदित्ये ब्राह्मणेभ्यो जनार्दनः ।
ददौ हिरण्यं वासांसि गाश्चाश्वांश्च परन्तपः ॥ ५-९४-१० (३५११९)
विसृष्टवन्तं रत्नानि दाशार्हमपराजितम् ।
तिष्ठन्तमुपसङ्गम्य ववन्दे सारथिस्तदा ॥ ५-९४-११ (३५१२०)
ग तस्मै रथवरो युक्तः शुशुभे लोकविश्रुतः ।
वाजिभिः शैब्यसुग्रीवमेघपुष्पबलाहकैः ॥ ५-९४-१२ (३५१२१)
शैब्यस्तु शुकपत्राभः सुग्रीवः किंशुकप्रभः ।
मेघपुष्पो मेघवर्णः पाण्डरस्तु बलाहकः ॥ ५-९४-१३ (३५१२२)
दक्षिणं चावहच्छैब्यः सुग्रीवः सव्यतोऽवहत् ।
पृष्ठवाहौ रथस्यास्तां मेघपुष्पबलाहकौ ॥ ५-९४-१४ (३५१२३)
विश्वकर्मकृताऽऽपीडा रत्नजालविभूषिता ।
आश्रिता वै रथे तस्मिन्ध्वजयष्टिरशोभत ॥ ५-९४-१५ (३५१२४)
वैनतेयः स्थितस्तस्यां प्रभाकरमिव स्पृशन् ।
तस्य सत्ववतः केतौ भुजगारिरशोभत ॥ ५-९४-१६ (३५१२५)
तस्य कीर्तिमतस्तेन भास्वरेण विराजता ।
शुशुभे स्यन्दनश्रेष्ठः पतगेन्द्रेण केतुना ॥ ५-९४-१७ (३५१२६)
रश्मिजालैः पताकाभिः सौवर्णेन च केतुना ।
बभूव स रथश्रेष्ठः कालसूर्य इवोदितः ॥ ५-९४-१८ (३५१२७)
पक्षिध्वजवितानैश्च रुक्मजालकृताङ्गणैः ।
दण्डमार्गविभागैश्च सुकृतैर्विश्वकर्मणा ॥ ५-९४-१९ (३५१२८)

प्रवालमणिशोभैश्च मुक्तावैडूर्यशोभनैः ।
किङ्किणीशतसङ्घैश्च वालजालकृतान्तरैः ॥ ५-९४-२० (३५१२९)
कार्तस्वरमयीभिश्च पद्मिनीभिरलङ्कृतः ।
शुशुभे स्यन्दनश्रेष्ठस्तापनीयैश्च पादपैः ॥ ५-९४-२१ (३५१३०)
व्याघ्रसिंहवराहैश्च गोभिश्च मृगपक्षिभिः ।
ताराभिर्भास्करैश्चापि वारणैश्च हिरण्मयैः ॥ ५-९४-२२ (३५१३१)
वज्राङ्कुशविमानैश्च कूबरावृत्तसन्धिषु ।
समुच्छ्रितमहानाभिः स्तनयित्नुमहास्वनः ॥' ५-९४-२३ (३५१३२)
ततो रथेन शुभ्रेण महता किङ्किणीकिना ।
हयोत्तमयुजा शीघ्रमुपातिष्ठत दारुकः ॥ ५-९४-२४ (३५१३३)
तमुपस्थितमाज्ञाय रथं दिव्यं महामनाः ।
महाभ्रघननिर्घोषं सर्वरत्नविभूषितम् ॥ ५-९४-२५ (३५१३४)
अग्निं प्रदक्षिणं कृत्वा ब्राह्मणांश्च जनार्दनः ।
कौस्तुभं मणिमाबध्य श्रिया परमया ज्वलन् ॥ ५-९४-२६ (३५१३५)
कुरुभिः संवृतः कृष्णो वृष्णिभिश्चाभिरक्षितः ।
आतिष्ठत रथं शौरिः सर्वयादवनन्दनः ॥ ५-९४-२७ (३५१३६)
अन्वारुरोह दाशार्हं विदुरः सर्वधर्मवित् ।
सर्वप्राणभृतां श्रेष्ठं सर्वबुद्धिमतां वरम् ॥ ५-९४-२८ (३५१३७)
ततो दुर्योधनः कृष्णं शकुनिश्चापि सौबलः ।
द्वितीयेन रथेनैनमन्वयातां परन्तपम् ॥ ५-९४-२९ (३५१३८)
सात्यकिः कृतवर्मा च वृष्णीनां चापरे रथाः ।
पृष्ठतोऽनुययुः कृष्णं गजैरश्वै रथैरपि ॥ ५-९४-३० (३५१३९)
तेषां हेमपरिष्कारैर्युक्ताः परमवाजिभिः ।
गच्छतां घोषिणश्चित्ररथा राजन्विरेजिरे ॥ ५-९४-३१ (३५१४०)
संमृष्टसंसिक्तरजः प्रतिपेदे महापथम् ।
राजर्षिचरितं काले कृष्णो धीमाञ्श्रिया ज्वलन् ॥ ५-९४-३२ (३५१४१)
ततः प्रयाते दाशार्हे प्रावाद्यन्तैकपुष्कराः ।
शङ्खाश्च दध्मिरे तत्र वाद्यान्यन्यानि यानि च ॥ ५-९४-३३ (३५१४२)
प्रवीराः सर्वलोकस्य युवानः सिंहविक्रमाः ।
परिवार्य रथं शौरेरगच्छन्त परन्तपाः ॥ ५-९४-३४ (३५१४३)
ततोऽन्ये बहुसाहस्रा विचित्राङ्गतवाससः ।
असिप्रासायुधधराः कृष्णस्यासन्पुरःसराः ॥ ५-९४-३५ (३५१४४)
गजाः पञ्चशतास्तत्र रथाश्चासन्सहस्रशः ।
प्रयान्तमन्वयुर्वीरं दाशार्हमपराजितम् ॥ ५-९४-३६ (३५१४५)
पुरं कुरूणां संवृत्तं द्रष्टुकामं जनार्दनम् ।
सबालवृद्धं सस्त्रीकं रथ्यागतमरिन्दम ॥ ५-९४-३७ (३५१४६)

वेदिकामाश्रिताभिश्च समाक्रान्तान्यनेकशः ।
प्रचलन्तीव भारेण योषिद्भिर्भवनान्युत ॥ ५-९४-३८ (३५१४७)
स पूज्यमानः कुरुभिः संश्रृण्वन्मधुराः कथाः ।
यथार्हं प्रतिसत्कुर्वन्प्रेक्षमाणः शनैर्ययौ ॥ ५-९४-३९ (३५१४८)
ततः सभां समासाद्य केशवस्यानुयायिनः ।
सशङ्खैर्वेणुनिर्घोषैर्दिशः सर्वा व्यनादयन् ॥ ५-९४-४० (३५१४९)
ततः सा समितिः सर्वा राज्ञाममिततेजसाम् ।
संप्राकम्पत हर्षेण कृष्णागमनकाङ्क्षया ॥ ५-९४-४१ (३५१५०)
ततोऽभ्याशंगते कृष्णे समहृष्यन्नराधिपाः ।
श्रुत्वां तं रथनिर्घोषं पर्जन्यनिनदोपमम् ॥ ५-९४-४२ (३५१५१)
आसाद्य तु सभाद्वारमृषभः सर्वसात्वताम् ।
अवतीर्य रथाच्छौरिः कैलासशिखरोपमात् ॥ ५-९४-४३ (३५१५२)
नवमेघप्रतीकाशां ज्वलन्तीमिव तेजसा ।
महेन्द्रसदनप्रख्यां प्रविवेश सभां ततः ॥ ५-९४-४४ (३५१५३)
पाणौ गृहीत्वा विदुरं सात्यकिं च महायशाः ।
ज्येतींष्यादित्यवद्राजन्कुरून्प्राच्छादयच्छ्रिया ॥ ५-९४-४५ (३५१५४)
अग्रतो वासुदेवस्य कर्णदुर्योधनावुभौ ।
कृष्णयः कृतवर्मा चाप्यासन्कृष्णस्य पृष्ठतः ॥ ५-९४-४६ (३५१५५)
धृतराष्ट्रं पुरस्कृत्य भीष्मद्रोणादयस्ततः ।
आसनेभ्योऽचलन्सर्वे पूजयन्तो जनार्दनम् ॥ ५-९४-४७ (३५१५६)
अभ्यागच्छति दाशार्हे प्रज्ञाचक्षुर्नरेश्वर ।
सहैव द्रोणभीष्माभ्यामुदतिष्ठन्महायशाः ॥ ५-९४-४८ (३५१५७)
उत्तिष्ठति महाराजे धृतराष्ट्रे जनेश्वरे ।
तानि राजसहस्राणि समुत्तस्थुः समन्ततः ॥ ५-९४-४९ (३५१५८)
आसनं सर्वतोभद्रं जाम्बूनदपरिष्कृतम् ।
कृष्णार्थे कल्पितं तत्र धृतराष्ट्रस्य शासनात् ॥ ५-९४-५० (३५१५९)
स्मयमानस्तु राजानं भीष्मद्रोणौ च माधवः ।
अभ्यभाषत धर्मात्मा राज्ञश्चान्यान्यथावयः ॥ ५-९४-५१ (३५१६०)
तत्र केशवमानर्चुः सम्यगभ्यागतं सभाम् ।
राजानः पार्थिवाः सर्वे कुरवश्च जनार्दनम् ॥ ५-९४-५२ (३५१६१)
तत्र तिष्ठन्स दाशार्हो राजमध्ये परन्तपः ।
अपश्यदन्तरिक्षस्थानृषीन्परपुरञ्जयः। ५-९४-५३ (३५१६२)
ततस्तानभिसंप्रेक्ष्य नारदप्रमुखानृषीन् ॥
अभ्यभाषत दाशार्हो भीष्मं शान्तनवं शनैः । ५-९४-५४ (३५१६३)
पार्थिवीं समितिं द्रष्टुमृषयोऽभ्यागता नृप ॥
निमन्त्र्यन्तामासनैश्च सत्कारेण च भूयसा । ५-९४-५५ (३५१६४)

नैतेष्वनुपविष्टेषु शक्यं केनचिदासितुम् ॥
पूजा प्रयुज्यतामाशु मुनीनां भावितात्मनाम् । ५-९४-५६ (३५१६५)
वैशम्पायन उवाच। ५-९४-५७क्ष् (३६७१)
ऋषीञ्शान्तनवो दृष्ट्वा सभाद्वारमुपस्थितान् ।
त्वरमाणस्ततो भृत्यानासनानीत्यचोदयत् । ५-९४-५७ (३५१६६)
आसनान्यथ मृष्टानि महान्ति विपुलानि च ॥
मणिकाञ्चनचित्राणि समाजह्रुस्ततस्ततः । ५-९४-५८ (३५१६७)
तेषु तत्रोपविष्टेषु गृहीतार्घ्येषु भारत ॥
निषसादासने कृष्णो राजानश्च यथासनम् । ५-९४-५९ (३५१६८)
दुःशासनः सात्यकये ददावासनमुत्तमम् ॥
विविंशतिर्ददौ पीठं काञ्चनं कृतवर्मणे । ५-९४-६० (३५१६९)
अविदूरे तु कृष्णस्य कर्णदुर्योधनावुभौ ॥
एकासने महात्मानौ निषीदतुरमर्षणौ । ५-९४-६१ (३५१७०)
गान्धारराजः शकुनिर्गान्धारैरभिरक्षितः ॥
निषसादासने राजा सहपुत्रो विशांपते । ५-९४-६२ (३५१७१)
विदुरो मणिपीठे तु शुक्लस्पर्ध्याजिनोत्तरे ॥
संस्पृशन्नासनं शौरेर्महामतिरुपाविशत्। ५-९४-६३ (३५१७२)
चिरस्य दृष्ट्वा दाशार्हं राजानः सर्व एव ते ॥
अमृतस्येव नातृप्यन्प्रेक्षमाणा जनार्दनम्। ५-९४-६४ (३५१७३)
अतसीपुष्पसङ्काशः पीतवासा जनार्दनः ॥
व्यभ्राजत सभामध्ये हेम्नीवोपहितो मणिः ॥ ५-९४-६५ (३५१७४)
ततस्तूष्णीं सर्वमासीद्गोविन्दगतमानसम् ।
न तत्र कश्चित्किंचिद्वा व्याजहार पुमान्क्वचित् ॥ ॥ ५-९४-६६ (३५१७५)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
चतुर्नवतितमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-९४-३१ चित्राश्च ते रथाश्च ॥
५-९४-३३ एकपुष्कराः काहलाः ॥

उद्योगपर्व - अध्याय ०९५
॥ श्रीः ॥
५.९५. अध्यायः ९५

Mahabharata - Udyoga Parva - Chapter Topics

श्रीकृष्णेन धृतराष्ट्रंप्रति सन्ध्यर्थं स्वस्यागमनकथनम् ॥ १ ॥
सन्धिविग्रहपक्षयोः गुणदोषपर्वनपूर्वकं पाण्डवविज्ञापननिवेदनम्
॥ २ ॥
तथा हितमुपदिश्य अन्ते यथारुचि करणाभिधानम् ॥ ३ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-९५-० (३५१७६)
वैशम्पायन उवाच। ५-९५-०क्ष् (३६७२)
तेष्वासीनेषु सर्वेषु तूष्णींभूतेषु राजसु ।
वाक्यमभ्याददे कृष्णः सुदंष्ट्रो दुन्दुभिस्वनः ॥ ५-९५-१ (३५१७७)
जीमूत इव धर्मान्ते सर्वा संश्रावयन्सभाम् ।
धृतराष्ट्रमभिप्रेक्ष्य समभाषत माधवः ॥ ५-९५-२ (३५१७८)
श्रीभगवानुवाच। ५-९५-३क्ष् (३६७३)
कुरूणां पाण्डवानां च शमः स्यादिति भारत ।
अप्रणशेन वीराणामेतद्याचितुमागतः ॥ ५-९५-३ (३५१७९)
राजन्नान्यत्प्रवक्तव्यं तव नैःश्रेयसं वचः ।
विदितं ह्येव ते सर्वं वेदितव्यमरिन्दम ॥ ५-९५-४ (३५१८०)
इदं ह्यद्य कुलं श्रेष्ठं सर्वराजसु पार्थिव ।
श्रुतवृत्तोपसंपन्नं सर्वैः समुदितं गुणैः ॥ ५-९५-५ (३५१८१)
कृपानुकम्पा कारुण्यमानृशंस्यं च भारत ।
तथार्जवं क्षमा सत्यं कुरुष्वेतद्विशिष्यते ॥ ५-९५-६ (३५१८२)
तस्मिन्नेवंविधे राजन्कुले महति तिष्ठति ।
त्वन्निमित्तं विशेषेण नेह युक्तमसांप्रतम् ॥ ५-९५-७ (३५१८३)
त्वं हि धारयिता श्रेष्ठः कुरूणां कुरुसत्तम ।
मिथ्याप्रचरतां तात बाह्येष्वाभ्यन्तरेषु च ॥ ५-९५-८ (३५१८४)
ते पुत्रास्तव कौरव्य दुर्योधनपुरोगमाः ।
धर्मार्थौ पृष्ठतः कृत्वा प्रचरन्ति नृशंसवत् ॥ ५-९५-९ (३५१८५)
अशिष्टा गतमर्यादा लोभेन ह्रृतचेतसः ।
स्वेषु बन्धुषु मुख्येषु तद्वृत्थ पुरुषर्षभ ॥ ५-९५-१० (३५१८६)
सेयमापन्महाघोरा कुरुष्वेव समुत्थिता ।
उपेक्ष्यमाणा कौरव्य पृथिवीं घातयिष्यति ॥ ५-९५-११ (३५१८७)
शक्या चेयं शमयितुं त्वं चेदिच्छसि भारत ।
न दुष्करो ह्यत्र शमो मतो मे भरतर्षभ ॥ ५-९५-१२ (३५१८८)
त्वय्यधीनः शमो राजन्मयि चैव विशांपते ।
पुत्रान्स्थापय कौरव्य स्थापयिष्याम्यहं परान् ॥ ५-९५-१३ (३५१८९)

आज्ञा तव हि राजेन्द्र कार्या पुत्रैः सहान्वयैः ।
हितं बलवदप्येषां तिष्ठतां तव शासने ॥ ५-९५-१४ (३५१९०)
तव चैव हितं राजन्पाण्डवानामथो हितम् ।
शमे प्रयतमानस्य तव शासनकाङ्क्षिणः ॥ ५-९५-१५ (३५१९१)
स्वयं निष्फलमालक्ष्य संविधत्स्व विशांपते ।
सहायभूता भरतास्तवैव स्युर्जनेश्वर ॥ ५-९५-१६ (३५१९२)
धर्मार्थयोस्तिष्ठ राजन्पाण्डवैरभिरक्षितः ।
न हि शक्यास्तथाभूता यत्नादपि नराधिप ॥ ५-९५-१७ (३५१९३)
न हि त्वां पाण्डवैर्जेतुं रक्ष्यमाणं महात्मभिः ।
इन्द्रोपि देवैः सहितः प्रसहेत कुतो नृपाः ॥ ५-९५-१८ (३५१९४)
यत्र भीष्मश्च द्रोणश्च कृपः कर्णो विविंशतिः ।
अश्वत्थामा विकर्णश्च सोमदत्तोऽथ बाह्लिकः ॥ ५-९५-१९ (३५१९५)
सैन्धवश्च कलिङ्गश्च काम्भोजश्च सुदक्षिणः ।
युधिष्ठिरो भीमसेनः सव्यसाची यमौ तथा ॥ ५-९५-२० (३५१९६)
सात्यकिश्च महातेजा युयुत्सुश्च महारथः ।
को नु तान्विपरीतात्मा युद्ध्येत भरतर्षभ ॥ ५-९५-२१ (३५१९७)
लोकस्येश्वरतां भूयः शत्रुभिश्चाप्यधृष्यताम् ।
प्राप्स्यसि त्वममित्रघ्न सहितः कुरुपाण्डवैः ॥ ५-९५-२२ (३५१९८)
तस्य ते पृथिवीपालास्त्वत्समाः पृथिवीपते ।
श्रेयांसश्चैव राजानः सन्धास्यन्ते परन्तप ॥ ५-९५-२३ (३५१९९)
स त्वं पुत्रैश्च पौत्रैश्च पितृभिर्भ्रातृभिस्तथा ।
सुहृद्भिः सर्वतो गुप्तः सुखं शक्ष्यसि जीवितुं ॥ ५-९५-२४ (३५२००)
एतानेव पुरोधाय यत्कृत्य च यथा पुरा ।
अखिलां भोक्ष्यसे सर्वां पृथिवीं पृथिवीपते ॥ ५-९५-२५ (३५२०१)
एतैर्हि सहितः सर्वैः पाण्डवैः स्वैश्च भारत ।
अन्यान्विजेष्यसे शत्रूनेष स्वार्थस्तवाखिलः ॥ ५-९५-२६ (३५२०२)
तैरेवोपार्जितां भूमिं भोक्ष्यसे च परन्तप ।
यदि संपत्स्यसे पुत्रैः सहामात्यैर्नराधिप ॥ ५-९५-२७ (३५२०३)
संयुगे वै महाराज दृश्यते सुमहान्क्षयः ।
क्षये चोभयतो राजन्कं धर्ममनुपश्यसि ॥ ५-९५-२८ (३५२०४)
पाण्डवैर्निहतैः सङ्ख्ये पुत्रैर्वापि महाबलैः ।
यद्विन्देथाः सुखं राजंस्तद्ब्रूहि भरतर्षभ ॥ ५-९५-२९ (३५२०५)
शूराश्च हि कृतास्त्राश्च सर्वे युद्धाभिकाङ्क्षिणः ।
पाण्डवास्तावकाश्चैव तान्रक्ष महतो भयात् ॥ ५-९५-३० (३५२०६)
न पश्येम कुरून्सर्वान्पाण्डवांश्चैव संयुगे ।
क्षीणानुभयतः शूरान्राथिनो रथिभिर्हतान् ॥ ५-९५-३१ (३५२०७)

समवेताः पृथिव्यां हि राजानो राजसत्तम ।
अमर्षवशमापन्ना नाशयेयुरिमाः प्रजाः ॥ ५-९५-३२ (३५२०८)
त्राहि राजन्निमं लोकं न नश्येयुरिमाः प्रजाः ।
त्वयि प्रकृतिमापन्ने शेषः स्यात्कुरुनन्दन ॥ ५-९५-३३ (३५२०९)
शुक्ला वादन्या ह्रीमन्त आर्याः पुण्याभिजातयः ॥
अन्योन्यसचिवा राजंस्तान्पाहि महतो भयात् ॥ ५-९५-३४ (३५२१०)
शिवेनेमे भूमिपालाः समागम्य परस्परम् ।
सह भुक्त्वा च पीत्वा च प्रतियान्तु यथागृहम् ॥ ५-९५-३५ (३५२११)
सुवाससः स्रग्विणश्च सत्कृता भरतर्षभ ।
अमर्षं च निराकृत्य वैराणि च परन्तप ॥ ५-९५-३६ (३५२१२)
हार्दं यत्पाण्डवेष्वासीत्प्राप्तोऽस्मिन्नायुषः क्षये ।
तदेव ते भवत्वद्य सन्धत्स्व भरतर्षभ ॥ ५-९५-३७ (३५२१३)
बाला विहीनाः पित्रा ते त्वयैव परिवर्धिताः ।
तान्पालय यथान्यायं पुत्रांश्च भरतर्षभ ॥ ५-९५-३८ (३५२१४)
भवतैव हि रक्ष्यास्ते व्यसनेषु विशेषतः ।
मा ते धर्मस्तथैवार्थो नश्येत भरतर्षभ ॥ ५-९५-३९ (३५२१५)
आहुस्त्वां पाण्डवा राजन्नभिवाद्य प्रसाद्य च ।
भवतः शासनाद्दुःखसमुभूतं सहानुगैः ॥ ५-९५-४० (३५२१६)
द्वादशेमानि वर्षाणि वने निर्व्युषितानि नः ।
त्रयोदशं तथाऽज्ञातैः सजने परिवत्सरम् ॥ ५-९५-४१ (३५२१७)
स्थाता नः समये तस्मिन्पितेति कृतनिश्चयाः ।
नाहास्म समयं तात तच्च नो ब्राह्मणा विदुः ॥ ५-९५-४२ (३५२१८)
तस्मिन्नः समये तिष्ठ स्थितानां भरतर्षभ ।
नित्यं संक्लेशिता राजन्स्वराज्यांशं लभेमहि । ५-९५-४३ (३५२१९)
त्वं धर्ममर्थं संजानन्सम्यङ्वस्त्रातुमर्हसि ॥
गुरुत्वं भवति प्रेक्ष्य बहून्क्लेशांस्तितिक्षमहे । ५-९५-४४ (३५२२०)
स भवान्मातृपितृव्रदस्मासु प्रतिपद्यताम् ॥
गुरोर्गरीयसी वृत्तिर्या च शिष्यस्य भारत । ५-९५-४५ (३५२२१)
वर्तामहे त्वयि च तां त्वं च वर्तस्व नस्तथा ॥
पित्रा स्थापयितव्या हि वयमुत्पथमास्थिताः । ५-९५-४६ (३५२२२)
संस्थापय पथिप्वस्मांस्तिष्ठ धर्मे सुवर्त्मनि ॥
आहुश्चेमां परिषदं पुत्रास्ते भरतर्षभ । ५-९५-४७ (३५२२३)
धर्मज्ञेषु सभासत्सु नेह युक्तमसांप्रतम् ॥
यत्र धर्मो ह्यधर्मेण सत्यं यत्रानृतेन च। ५-९५-४८ (३५२२४)
हन्यते प्रेक्षमाणानां हतास्तत्र सभासदः ॥
विद्धो धर्मो ह्यधर्मेण सभां यत्र प्रपद्यते। ५-९५-४९ (३५२२५)

नचास्य शल्यं कृन्तन्ति विद्धास्तत्र सभासदः ॥
धर्म एतानारुजति यथा नद्यनुकूलजान् ॥ ५-९५-५० (३५२२६)
ये धर्ममनुपश्यन्तस्तूष्णीं ध्यायन्त आसते ।
ते सत्यमाहुर्धर्म्यं च न्याय्यं च भरतर्षभ ॥ ५-९५-५१ (३५२२७)
शक्यं किमन्यद्वक्तुं ते दानादन्यञ्जनेश्वर ।
ब्रुवन्तु ते महीपालाः सभायां ये समासते ॥ ५-९५-५२ (३५२२८)
धर्मार्थौ संप्रधार्यैव यदि सत्यं ब्रवीम्यहम् ।
प्रमुञ्चोमान्मृत्युपाशात्क्षत्रियान्पुरुषर्षभ ॥ ५-९५-५३ (३५२२९)
प्रशाम्य भरतश्रेष्ठ मा मन्युवशमन्वगाः ।
पित्र्यं तेभ्यः प्रदायांशं पाण्डवेभ्यो यथोचितम् ।
ततः सपुत्रः सिद्धार्थो भुङ्क्ष भोगान्परन्तप ॥ ५-९५-५४ (३५२३०)
अजातशत्रुं जानीषे स्थितं धर्मे सतां सदा ।
सपुत्रे त्वयि वृत्तिं च वर्तते यां नराधिप ॥ ५-९५-५५ (३५२३१)
दाहितश्च निरस्तश्च त्वामेवोपाश्रितः पुनः ।
इन्द्रप्रस्थं त्वयैवासौ सपुत्रेण विवासितः ॥ ५-९५-५६ (३५२३२)
स तत्र विवसन्सर्वान्वशमानीय पार्थिवान् ।
त्वन्मुखानकरोद्राजन्न च त्वामत्यवर्तत ॥ ५-९५-५७ (३५२३३)
तस्यैवं वर्तमानस्य सौबलेन जिहीर्षता ।
राष्ट्राणि धनधान्यं च प्रयुक्तः परमोपधिः ॥ ५-९५-५८ (३५२३४)
स तामवस्थां संप्राप्य कृष्णां प्रेक्ष्य सभां गताम् ।
क्षत्रधर्मादमेयात्मा नाकम्पत युधिष्ठिरः ॥ ५-९५-५९ (३५२३५)
अहं तु तव तेषां च श्रेय इच्छामि भारत ।
धर्मादर्थात्सुखाच्चैव मा राजन्नीनशः प्रजाः ॥ ५-९५-६० (३५२३६)
अनर्थमर्थं मन्वानोऽप्यर्थं चानर्थमात्मनः ।
लोभेऽतिप्रसृतान्पुत्रान्निगृह्णीष्व विशांपते ॥ ५-९५-६१ (३५२३७)
स्थिताः शुश्रूषितुं पार्थाः स्थिता योद्धुमरिन्दमाः ।
यत्ते पथ्यतमं राजंस्तस्मिंतिष्ठ परन्तप ॥ ५-९५-६२ (३५२३८)
वैशम्पायन उवाच। ५-९५-६३क्ष् (३६७४)
तद्वाक्यं पार्थिवाः सर्वे हृदयैः समपूजयन् ।
न तत्र कश्चिद्वक्तुं हि वाचं प्राक्रामदग्रतः ॥ ॥ ५-९५-६३ (३५२३९)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
पञ्चनवतितमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-९५-३ आगतः अहमिति शेषः ॥

५-१५-६ कृपा परस्य सुखार्थे यत्नः । अनुकम्पा परदुःखदर्शने
त्रासः । कारुण्यं परदुःखप्रहाणार्थो यत्नः । आनृशंस्यं
परदुःखाप्रदानम् ॥
५-१५-८ बाह्येषु द्यूतादिषु । आभ्यन्तरेषु जतुगृहादिषु ॥
५-१५-११ कुरुष्वेव भवत्स्वेव नतु पाण्डवेषु ॥
५-१५-१४ एषामपि एषामेव ॥
५-१५-१५ शासनकाङ्क्षिणः पुत्रान् शासितुमिच्छतस्तव ॥
५-१५-१६ निष्फलं वैरम् । संविधत्स्व शमं कुरु ॥
५-१५-२३ पाण्डवैः सह संधास्यन्ते सन्धि करिष्यन्ति ॥
५-१५-२५ अखिलां निष्कण्टकाम् ॥
५-१५-३३ प्रकृतिं सत्त्वगुणम् ॥
५-१५-४२ स्थाता स्थास्यति ॥
५-१५-५० आरुजति हिनस्ति । अनुकूलजान् कूलं कूलमनुमृत्य जातान्
वृक्षादीन् ॥
५-१५-५८ परमोपधिः महच्छल्य ॥

उद्योगपर्व - अध्याय ०९६
॥ श्रीः ॥
५.९६. अध्यायः ९६

Mahabharata - Udyoga Parva - Chapter Topics
जामदग्न्येन दम्भोद्भवोपाख्यानमाख्याय कृष्णार्जुनयोः
नरनारायणस्वरूपताभिधानम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-९६-० (३५२४०)
वैशम्पायन उवाच। ५-९६-०क्ष् (३६७५)
तस्मिन्नभिहिते वाक्ये केशवेन महात्मना ।
स्तिमिता हृष्टरोमाण आसन्सर्वे सभासदः ॥ ५-९६-१ (३५२४१)
कस्स्विदुत्तरमेतेषां वक्तुमुत्सहते पुमान् ।
इति सर्वे मनोभिस्ते चिन्तयन्ति स्म पार्थिवाः ॥ ५-९६-२ (३५२४२)
तथा तेषु च सर्वेषु तूष्णींभूतेषु राजसु ।
जामदग्न्य इदं वाक्यमब्रवीत्कुरुसंसदि ॥ ५-९६-३ (३५२४३)
इमां मे सोपमां वाचं श्रृणु सत्यामशङ्कितः ।
तां श्रुत्वा श्रेय आदत्स्व यदि साध्विति मन्यसे ॥ ५-९६-४ (३५२४४)

राजा दम्भोद्भवो नाम सार्वभौमः पुराऽभवत् ।
अखिलां बुभुजे सर्वां पृथिवीमिति नः श्रुतम् ॥ ५-९६-५ (३५२४५)
स स्म नित्यं निशापाये प्रातरुत्थाय वीर्यवान् ।
ब्राह्मणान्क्षत्रियान्वैश्यान्पृच्छन्नास्ते महारथः ॥ ५-९६-६ (३५२४६)
अस्ति कश्चिद्विशिष्टो वा मद्विधो वा भवेद्युधि ।
शूद्रो वैश्यः क्षत्रियो वा ब्राह्मणो वाऽपि शस्त्रभृत् ॥ ५-९६-७ (३५२४७)
इति ब्रुवन्नन्वचरत्स राजा पृथिवीमिमाम् ।
दर्पेण महता मत्तः कञ्चिदन्यमचिन्तयन् ॥ ५-९६-८ (३५२४८)
तं च वैद्या अकृपणा ब्राह्मणाः सर्वतोऽभयाः ।
प्रत्यषेधन्त राजानं श्लाघमानं पुनः पुनः ॥ ५-९६-९ (३५२४९)
निषिध्यमानोऽप्यसकृत्पृच्छत्येव स वै द्विजान् ।
अतिमानं श्रिया मत्तं तमूचुर्ब्राह्मणास्तदा ॥ ५-९६-१० (३५२५०)
तपस्विनो महात्मानो वेदप्रत्ययदर्शिनः ।
उदीर्यमाणं राजानं क्रोधदीप्ता द्विजातयः ॥ ५-९६-११ (३५२५१)
अनेकजयिनौ शङ्क्ये यौ वै पुरुषसत्तमौ ।
तयोस्त्वं न समो राजन्भवितासि कदाचन ॥ ५-९६-१२ (३५२५२)
एवमुक्तः स राजा तु पुनः पप्रच्छ तान्द्विजान् ।
क्व तौ वीरौ क्वजन्मानौ किंकर्माणौ च कौ च तौ ॥ ५-९६-१३ (३५२५३)
ब्राह्मणा ऊचुः । ५-९६-१४क्ष् (३६७६)
नरो नारायणश्चैव तापसाविति नः श्रुतम् ।
आयातौ मानुषे लोके ताभ्यां युद्ध्यस्व पार्थिव ॥ ५-९६-१४ (३५२५४)
श्रूयेते तौ महात्मानौ नरनारायणावुभौ ।
तपो घोरमनिर्देश्यं तप्येते गन्धमादने ॥ ५-९६-१५ (३५२५५)
स राजा महतीं सेनां योजयित्वा षडङ्गिनीम् ।
अमृष्यमाणः संप्रायाद्यत्र तावपराजितौ ॥ ५-९६-१६ (३५२५६)
स गत्वा विषमं घोरं पर्वतं गन्धमादनम् ।
मार्गमाणोऽन्वगच्छत्तौ तापसौ वनमाश्रितौ ॥ ५-९६-१७ (३५२५७)
तौ दृष्ट्वा क्षुत्पिपासाभ्यां कृशौ धमनिसन्ततौ ।
शीतवातातपैश्चैव कर्शितौ पुरुषोत्तमौ ॥ ५-९६-१८ (३५२५८)
अभिगम्योपसङ्गृह्य पर्यपृच्छदनामयम् ।
तमर्चित्वा मूलफलैरासनेनोदकेन च ॥ ५-९६-१९ (३५२५९)
न्यमन्त्रयेतां राजानं किं कार्यं क्रियतामिति ।
ततस्तामानुपूर्वी स पुनरेवान्वकीर्तयत् ॥ ५-९६-२० (३५२६०)
बाहुभ्यां मे जिता भूमिर्निहताः सर्वशत्रवः ।
भवद्भ्यां युद्धमाकाङ्क्षन्नुपयातोऽस्मि पर्वतम् ॥ ५-९६-२१ (३५२६१)
आतिथ्यं दीयतामेतत्काङ्क्षितं मे चिरं प्रति। ५-९६-२२ (३५२६२)

नरनारायणावूचतुः ।
अपेतक्रोधलोभोऽयमाश्रमो राजसत्तम ॥ ५-९६-२२क्ष् (३६७७)
न ह्यस्मिन्नाश्रमे युद्धं कुतः शस्त्रं कुतोऽनृजुः ।
अन्यत्र युद्धमाकाङ्क्ष बहवः क्षत्रियाः क्षितौ ॥ ५-९६-२३ (३५२६३)
राम उवाच। ५-९६-२४क्ष् (३६७८)
उच्यमानस्तथाऽपि स्म भूय एवाभ्यभाषत ।
पुनः पुनः क्षाम्यमाणः सान्त्व्यमानश्च भारत ॥ ५-९६-२४ (३५२६४)
दम्भोद्भवो युद्धमिच्छन्नाह्वयत्येव तापसौ ।
ततो नरस्त्विषीकाणां मुष्टिमादाय भारत ॥ ५-९६-२५ (३५२६५)
अब्रवीदेहि युद्ध्यस्व युद्धकामुक क्षत्रिय ।
सर्वशस्त्राणि चादत्स्व योजयस्व च वाहिनीम् ॥ ५-९६-२६ (३५२६६)
अहं हि ते विनेष्यामि युद्धश्रद्धामितः परम् ।
ग्यदाह्वयसि दर्पेण ब्राह्मणप्रमुखाञ्जनान् ॥' ५-९६-२७ (३५२६७)
दम्भोद्भव उवाच। ५-२९-१८क्ष् (३६७९)
यद्येतदस्त्रमस्मासु युक्तं तापस मन्यसे ।
एतेनापि त्वया योत्स्ये युद्धार्थी ह्यहमागतः ॥ ५-९६-२८ (३५२६८)
राम उवाच। ५-९६-२९क्ष् (३६८०)
इत्युक्त्वा शरवर्षेण सर्वतः समवाकिरत् ।
दम्भोद्भवस्तापसं तं जिवांसुः सहसैनिकः ॥ ५-९६-२९ (३५२६९)
तस्य तानस्यतो घोरानिषून्परतनुच्छिदः ।
कदर्थीकृत्य स मुनिरिषीकाभिः समार्पयत् ॥ ५-९६-३० (३५२७०)
ततोऽस्मौ प्रासृजद्घोरमैषीकमपराजितः ।
अस्त्रमप्रतिसन्धेयं तदुद्भुतमिवाभवत् ॥ ५-९६-३१ (३५२७१)
तेषामक्षीणि कर्णांश्च नासिकाश्चैव मायया ।
निमित्तवेधी स मुनिरीषीकाभिः समार्पयत् ॥ ५-९६-३२ (३५२७२)
स दृष्ट्वा श्वेतमाकाशमिषीकाभिः समाचितम् ।
पादयोर्न्यपतद्राजा स्वस्ति मेस्त्विति चाब्रवीत् ॥ ५-९६-३३ (३५२७३)
तमब्रवीन्नरो राजञ्शरण्यः शरणैषिणाम् ।
ब्रह्मण्यो भव धर्मात्मा मा च स्मैवं पुनः कृथाः ॥ ५-९६-३४ (३५२७४)
नैतादृक्पुरुषो राजन्क्षत्रधर्ममनुस्मरन् ।
मनसा नृपशार्दूल भवेत्परपुरञ्जयः ॥ ५-९६-३५ (३५२७५)
मा च दर्पसमाविष्टः वा तत्ते राजन्समाहितम् ॥
कृतप्रज्ञो वीतलोभो निरहङ्कार आत्मवान् । ५-९६-३६ (३५२७६)
दान्तः क्षान्तो मृदुः सौम्य प्रजाः पालय पार्थिव ॥
मास्म भूयः क्षिपेः कंचिदविदित्वा बलाबलम्। ५-९६-३७ (३५२७७)
अनुज्ञातः स्वस्ति गच्च मैवं भूयः समाचरेः ।

कुशलं ब्राह्मणान्पृच्छेरावयोर्वचनाद्भृशम् ॥ ५-९६-३८ (३५२७८)
ततो राजा तयोः पादावभिवाद्य महात्मनोः ।
प्रत्याजगाम स्वपुरं धर्मं चैवाचरद्भृशम् ॥ ५-९६-३९ (३५२७९)
सुमहच्चापि तत्कर्म यन्नरेण कृतं पुरा ।
ततो गुणैः सुबहुभिः श्रेष्ठो नारायणोऽभवत् ॥ ५-९६-४० (३५२८०)
तस्माद्यावद्धनुःश्रेष्ठे गाण्डीवेऽस्त्रं न युज्यते ।
तावत्त्वं मानमुत्सृज्य गच्छ राजन्धनञ्जयम् ॥ ५-९६-४१ (३५२८१)
काकुदीकं शुकं नाकमक्षिसन्तर्जनं तथा ।
सन्तानं नर्तकं घोरमास्यमोदकमष्टमम् ॥ ५-९६-४२ (३५२८२)
एतैर्विद्धाः सर्व एव मरणं यान्ति मानवाः ।
उन्मत्ताश्च विचेष्टन्ते नष्टसंज्ञा विचेतसः ॥ ५-९६-४३ (३५२८३)
ग स्वपन्ति च प्लवन्ते च च्छर्दयन्ति च मानवाः ।
मूत्रयन्ते च सततं रुदन्ति च हसन्ति च ॥' ५-९६-४४ (३५२८४)
कामक्रोधौ लोभमोहौ मदमानौ तथैव च ।
मात्सर्याहङ्कृती चैव क्रमादेत उदाहृताः ॥ ५-९६-४५ (३५२८५)
निर्माता सर्वलोकानामीश्वरः सर्वकर्मवित् ।
यस्य नारायणो बन्धुरर्जुनो दुःसहो युधि ॥ ५-९६-४६ (३५२८६)
कस्तमुत्सहते जेतुं त्रिषु लोकेषु भारत ।
वीरं कपिध्वजं जिष्णुं यस्य नास्ति समो युधि ॥ ५-९६-४७ (३५२८७)
असङ्ख्येया गुणाः पार्थे तद्विशिष्टो जनार्दनः ।
त्वमेव भूयो जानासि कुन्तीपुत्रं धनञ्जयम् ॥ ५-९६-४८ (३५२८८)
नरनारायणौ यौ तौ तावेवार्जुनकेशवौ ।
विजानीहि महाराज प्रवीरौ पुरुषोत्तमौ ॥ ५-९६-४९ (३५२८९)
यद्येतदेवं जानासि न च मामभिशङ्कसे ।
आर्यां मतिं समास्थाय शाम्य भारत पाण्डवैः ॥ ५-९६-५० (३५२९०)
अथ चेन्मन्यसे श्रेयो न मे भेदो भवेदिति ।
प्रशाम्य भरतश्रेष्ठ मा च युद्धे मनः कृथाः ॥ ५-९६-५१ (३५२९१)
भवतां च कुरुश्रेष्ठ कुलं बहुमतं भुवि ।
तत्तथैवास्तु भद्रं ते स्वार्थमेवोपचिन्तय ॥ ॥ ५-९६-५२ (३५२९२)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
षण्णवतितमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-९६-४२ काकुदीकमित्यादयोऽष्टावस्त्रजातयः ॥
५-९६-४५ अयं श्लोको बहुषु कोशेषु न दृश्यते झो पुस्तके एव

दृश्यते ॥

उद्योगपर्व - अध्याय ०९७
॥ श्रीः ॥
५.९७. अध्यायः ९७

Mahabharata - Udyoga Parva - Chapter Topics
कण्वेन सुयोधनस्य बलावलेपविलोपनाय
मातलिवरान्वेषणकथाकथनारम्भः ॥ १ ॥
मातलिना गुणकेशीनामकस्वकन्यायाः अनुगुणवरान्वेषणाय नागलोकंप्रति
प्रस्थानम् ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-९७-० (३५२९३)
वैशम्पायन उवाच। ५-९७-०क्ष् (३६८१)
जामदग्न्यवचः श्रुत्वा कण्वेऽपि भगवानृषिः ।
दुर्योधनमिदं वाक्यमब्रवीत्कुरुसंसदि ॥ ५-९७-१ (३५२९४)
कण्व उवाच। ५-९७-२क्ष् (३६८२)
अक्षयश्चाव्ययश्चैव ब्रह्मा लोकपितामहः ।
तथैव भगवन्तौ तौ नरनारायणावृषी ॥ ५-९७-२ (३५२९५)
आदित्यानां हि सर्वेषां विष्णुरेकः सनातनः ।
अजश्यश्चाव्ययश्चैव शाश्वतः प्रभुरीश्वरः ॥ ५-९७-३ (३५२९६)
निमित्तमरणाश्चान्ये चन्द्रसूर्यौ मही जलम् ।
वायुरग्निस्तथाऽऽकाशं ग्रहास्तारागणास्तथा ॥ ५-९७-४ (३५२९७)
ते च क्षयान्ते जगतो हित्वा लोकत्रयं सदा ।
क्षयं गच्छन्ति वै सर्वे सृज्यन्ते च पुनः पुनः ॥ ५-९७-५ (३५२९८)
मुहूर्तमरणास्त्वन्ये मानुषा मूगपक्षिणः ।
तैर्यग्योन्याश्च ये चान्ये जीवलोकचरास्तथा ॥ ५-९७-६ (३५२९९)
भूयिष्ठेन तु राजानः श्रियं भुक्त्वाऽऽयुषः क्षये ।
तरुणाः प्रतिपद्यन्ते भोक्तुं सुकृतदुष्कृते ॥ ५-९७-७ (३५३००)
स भवान्धर्मपुत्रेण शमं कर्तुमिहार्हसि ।
पाण्डवाः कुरवश्चैव पालयन्तु वसुन्धरान् ॥ ५-९७-८ (३५३०१)
बलवानहमित्येव न मन्तव्यं सुयोधन ।
बलवन्तो बलिभ्यो हि दृश्यन्ते पूरुषर्षभ ॥ ५-९७-९ (३५३०२)
न बलं बलिनां मध्ये बलं भवति कौरव ।
बलवन्तो हि ते सर्वे पाण्डवा देवविक्रमाः । ५-९७-१० (३५३०३)

अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
मातलेर्दातुकामस्य कन्यां मृगयतो वरम् ॥ ५-९७-११ (३५३०४)
मतस्त्रिलोकराजस्य मातलिर्नाम सारथिः ।
तस्यैकैव कुले मन्या रूपतो लोकविश्रुता ॥ ५-९७-१२ (३५३०५)
गुणकेशीति विख्याता नाम्ना सा देवरूपिणी ।
श्रिया च वपुषा चैव स्त्रियोऽन्याःसाऽतिरिच्यते ॥ ५-९७-१३ (३५३०६)
तस्याः प्रदानसमयं मातलिः सह भार्यया ।
ज्ञात्वा विममृशे राजंस्तत्परः परिचिन्तयन् ॥ ५-९७-१४ (३५३०७)
धिक्खल्वलघुशीलानामुच्छ्रितानां यशस्विनाम् ।
नराणां मृदुसत्वानां कुले कन्याप्ररोहणम् ॥ ५-९७-१५ (३५३०८)
मातुः कुलं पितृकुलं यत्र चैव प्रदीयते ।
कुलत्रयं संशयितं कुरुते कन्यका सताम् ॥ ५-९७-१६ (३५३०९)
देवमानुषलोकौ द्वौ मानुषेणैव चक्षुषा ।
अपगाह्यैव विचितौ न च मे रोचते वरः ॥ ५-९७-१७ (३५३१०)
कण्व उवाच। ५-९७-१८क्ष् (३६८३)
न देवान्नैव दितिजान्न गन्धर्वान्न मानुषान् ।
अरोचयद्वरकृते तथैव बहुलानृषीन् ॥ ५-९७-१८ (३५३११)
भार्यया तु स संमन्त्र्य सह रात्रौ सुधर्मया ।
मातलिर्नागलोकाय चकार गमने मतिम् ॥ ५-९७-१९ (३५३१२)
न मे देवमनुष्येषु गुणकेश्याः समो वरः ।
रूपतो दृश्यते कश्चिन्नागेषु भविता ध्रुवम् ॥ ५-९७-२० (३५३१३)
इत्यामन्त्र्य सुधर्मां स कृत्वा चाभिप्रदक्षिणम् ।
कन्यां शिरस्युपाघ्राय प्रविवेश महीतलम् ॥ ॥ ५-९७-२१ (३५३१४)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
सप्तनवतितमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-९७-७ तरुणाः अपीति शेषः । युद्धेन मरणं प्राप्नुवन्तीत्यर्थः ॥
५-९७-१० बलं सैन्यम् । बलिनां स्वाभाविकबलवतां बलं सामर्थ्यं
न भवति ॥
५-९७-११ मातलेरितिहासमिति संबन्धः ॥
५-९७-१५ उच्छ्रितानां महत्तया ख्यातानाम् ॥

उद्योगपर्व - अध्याय ०९८
॥ श्रीः ॥

Mahabharata - Udyoga Parva - Chapter Topics

पातालं गच्छतो मातलेः वरुणं गच्छता नारदेन यदृच्छया पथि समागमः ॥ १ ॥
वरुणेन सत्कृतयोस्तयोस्तमापृच्छ्य पातालं प्रति निवर्तनम् ॥ २ ॥
नारदेन मातलिंप्रति वरुणलोके तत्तद्वस्तुविशेषान्प्रदर्श्य तद्गुणवर्णनम् ॥ ३ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१८-० (३५३१५)
कण्व उवाच। ५-१८-०क्ष् (३६८४)
मातलिस्तु व्रजन्मार्गे नारदेन महर्षिणा ।
वरुणं गच्छता द्रष्टुं समागच्छद्यदृच्छया ॥ ५-१८-१ (३५३१६)
नारदोऽथाब्रवीदेनं क्व भवान्गन्तुमुद्यतः ।
स्येन वा सूत कार्येण शासनाद्वा शतक्रतोः ॥ ५-१८-२ (३५३१७)
मातलिर्नारदेनैवं संपृष्टः पथि गच्छता ।
यथावत्सर्वमाचष्ट स्वकार्यं नारदं प्रति ॥ ५-१८-३ (३५३१८)
तमुवाचाथ स मुनिर्गच्छावः सहिताविति ।
सलिलेशदिदृक्षार्थमहमप्युद्यतो दिवः ॥ ५-१८-४ (३५३१९)
अहं ते सर्वमाख्यास्ये दर्शयन्वसुधातलम् ।
दृष्ट्वा तत्र वरं कंचिद्रोचयिष्याव मातले ॥ ५-१८-५ (३५३२०)
अवगाह्य तु तौ भूमिमुभौ मातलिनारदौ ।
ददृशाते महात्मानौ लोकपालमपां पतिम् ॥ ५-१८-६ (३५३२१)
तत्र देवर्षिसदृशीं पूजां स प्राप नारदः ।
महेन्द्रसदृशीं चैव मातलिः प्रत्यपद्यत ॥ ५-१८-७ (३५३२२)
तावुभौ ग्रीतमनसौ कार्यवन्तौ निवेद्य ह ।
वरुणेनाभ्यनुज्ञातौ नागलोकं विचेरतुः ॥ ५-१८-८ (३५३२३)
नारदः सर्वभूतानामन्तर्भूमिनिवासिनाम् ।
जानंश्चकार व्याख्यानं यन्तुः सर्वमशेषतः ॥ ५-१८-९ (३५३२४)
नारद उवाच। ५-१८-१०क्ष् (३६८५)
दृष्टस्ते वरुणः सूत पुत्रपौत्रसमावृतः ।
पश्योदकपतेः स्थानं सर्वतोभद्रमृद्धिमत् ॥ ५-१८-१० (३५३२५)
एष पुत्रो महाप्रज्ञो वरुणस्येह गोपतेः ।
एष वै शीलवृत्तेन शौचेन च विशिष्यते ॥ ५-१८-११ (३५३२६)

एषोऽस्य पुत्रोऽभिमतः पुष्करः पुष्करेक्षणः ।
रूपवान्दर्शनीयश्च सोमपुत्र्या वृतः पतिः ॥ ५-९८-१२ (३५३२७)
ज्योत्स्नाकालीति यामाहुर्द्वितीयां रूपतः श्रियम् ।
अदित्याश्चैव यः पुत्रो ज्येष्ठः श्रेष्ठः कृतः स्मृतः
॥ ५-९८-१३ (३५३२८)
भवनं पश्य वारुण्यं यदेतत्सर्वकाञ्चनम् ।
यत्प्राप्य सुरतां प्राप्ताः सुराः सुरपतेः सखे ॥ ५-९८-१४ (३५३२९)
एतानि हृतराज्यानां दैतेयानां स्म मातले ।
दीप्यमानानि दृश्यन्ते सर्वप्रहरणान्युत ॥ ५-९८-१५ (३५३३०)
अक्षयाणि किलैतानि विवर्तन्ते स्म मातले ।
अनुभावप्रयुक्तानि सुरैरवजितानि ह ॥ ५-९८-१६ (३५३३१)
अत्र राक्षसजात्यश्च दैत्यजात्यश्च मातले ।
दिव्यप्रहरणाश्चासन्पूर्वदैवतनिर्मिताः ॥ ५-९८-१७ (३५३३२)
अग्निरेष महार्चिष्माञ्जागर्ति वारुणे ह्रदे ।
वैष्णवं चक्रमाविद्धं विधूमेन हविष्मता ॥ ५-९८-१८ (३५३३३)
एष गाण्डीमयश्चापो लोकसंहारसंभृतः ।
रक्ष्यते दैवतैर्नित्यं यतस्तद्गाण्डिवं धनुः ॥ ५-९८-१९ (३५३३४)
एष कृत्ये समुत्पन्ने तत्तद्धारयते बलम् ।
सहस्रशतसङ्ख्येन प्राणेन सततं ध्रुवः ॥ ५-९८-२० (३५३३५)
अशास्यानपि शास्त्येष रक्षोबन्धुषु राजसु ।
सृष्टः प्रथमतश्चण्डो ब्रह्मणा ब्रह्मवादिना ॥ ५-९८-२१ (३५३३६)
एतच्छस्त्रं नरेन्द्राणां महच्चक्रे भासितम् ।
पुत्राः सलिलराजस्य धारयन्ति महोदयम् ॥ ५-९८-२२ (३५३३७)
एतत्सलिलराजस्य छत्रं छत्रगृहे स्थितम् ।
सर्वतः सलिलं शीतं जीमूत इव वर्षति ॥ ५-९८-२३ (३५३३८)
एतच्छत्रात्परिभ्रष्टं सलिलं सोमनिर्मलम् ।
तमसा मूर्छितं भाति येन नार्छति दर्शनम् ॥ ५-९८-२४ (३५३३९)
बहून्यद्भुतरूपाणि द्रष्टव्यानीह मातले ।
तव कार्योपरोधस्तु तस्माद्गच्छाव मा चिरम् ॥ ॥ ५-९८-२५ (३५३४०)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वमि
अष्टनवतितमोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-९८-९ यन्तुः यन्तारं मातलिंप्रति ॥
५-९८-११ गोपतेः वारिपतेः ॥

५-९८-१३ कृतः तन्नामकः ॥
५-९८-१४ वारुण्यं वारुण्याः सुरायाः इदं वारुण्यं सुरा विद्यते येषां
ते सुराः ॥
५-९८-१६ विवर्तते प्रक्षिप्तान्यपि पुनःपुनः प्रहर्तुर्हस्तमायान्ति ॥
५-९८-१७ जात्यः जातीयाः ॥
५-९८-१८ हविष्मताऽग्निना आविद्धं रुद्धं विष्णुचक्रजमप्यत्र
भयं नास्तीत्यर्थः ॥
५-९८-१९ गाण्डी खड्गाख्यः पशुविशेषः तस्य विकारो
गाण्डीमयः गाण्डीमयत्वादेव तत् गाणाडीवं नाम धनुरभूत् । गाण्डी
वज्रग्रन्थिस्तन्मय इत्यन्ये ॥
५-९८-२१ रक्षोबन्धुषु रक्षस्तुल्येषु ॥
५-९८-२२ एतच्छस्त्रं धनुः । चक्रेण चक्रादपि ॥
५-९८-२४ येन यस्मात्करणात् मूर्च्छितं अभिभूतं आवृतमितियावत्
। नार्छति न प्राप्नोति जन इति शेषः ॥

उद्योगपर्व - अध्याय ०९९
॥ श्रीः ॥
५.९९. अध्यायः ९९

Mahabharata - Udyoga Parva - Chapter Topics
नारदेन मातलिं पातालं नीत्वा तत्रत्यवस्तुविशेषान्प्रदर्श्य
तद्गुणनिरूपणम् ॥ १ ॥
मातलिना तत्र वरानभिरोचनवचनपूर्वकमन्यत्र यात्राकीर्तनम् ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-९९-० (३५३४१)
नारद उवाच । ५-९९-०क्ष (३६८६)
एतत्तु नागलोकस्य नाभिस्थाने स्थितं पुरम् ।
पातालमिति विख्यातं दैत्यदानवसेवितम् ॥ ५-९९-१ (३५३४२)
इदमद्भिः समं प्राप्ता ये केचिद्भुवि जङ्गमाः ।
प्रविशन्तो महानादं नदन्ति भयपीडिताः ॥ ५-९९-२ (३५३४३)
अत्रासुरोऽग्निः सततं दीप्यते वारिभोजनः ।
व्यापारेण धृतात्मानं निबद्धं समबुध्यत ॥ ५-९९-३ (३५३४४)
अत्रामृतं सुरैः पीत्वा निहितं निहतारिभिः ॥
अतः सोमस्य हानिश्च वृद्धिश्चैव प्रदृश्यते ॥ ५-९९-४ (३५३४५)
अत्रादित्यो हयशिराः काले पर्वणि पर्वणि ।

उत्तिष्ठति सुवर्णाख्यो वाग्भिरापूरयञ्जगत् ॥ ५-९९-५ (३५३४६)
यस्मादलं समस्तास्ताः पतन्ति जलमूर्तयः ।
तस्मात्पातालमित्येव ख्यायते पुरमुत्तमम् ॥ ५-९९-६ (३५३४७)
ऐरावणोऽस्मात्सलिलं गृहीत्वा जगतो हितः ।
मेघेष्वामुञ्चते शीतं यन्महेन्द्रः प्रवर्षति ॥ ५-९९-७ (३५३४८)
ऐरावतो नागराजो वामनः कुमुदोऽञ्जनः ।
प्रसूताः सुप्रतीकस्य वंशे वारणसत्तमाः ॥ ५-९९-८ (३५३४९)
अत्र नानाविधाकारास्तिमयो नैकरूपिणः ।
अप्सु सोमप्रभां पीत्वा वसन्ति जलचारिणः ॥ ५-९९-९ (३५३५०)
अत्र सूर्यांशुभिर्भिन्नाः पातालतलमाश्रिताः ।
मृता हि दिवसे सूत पुनर्जीवन्ति वै निशि ॥ ५-९९-१० (३५३५१)
उदयन्नित्यशश्वात्र चन्द्रमा रश्मिबाहुभिः ।
अमृतं स्पृश्य संस्पर्शात्संजीवयतिदेहिनः ॥ ५-९९-११ (३५३५२)
अत्र तेऽधर्मनिरता बद्धाः कालेन पीडिताः ।
दैतेया निवसन्ति स्म वासवेन हृतश्रियः ॥ ५-९९-१२ (३५३५३)
अत्र भूतपतिर्नाम सर्वभूतमहेश्वरः ।
भूतये सर्वभूतानामचरत्तप उत्तमम् ॥ ५-९९-१३ (३५३५४)
अत्र गोव्रतिनो विप्राः स्वाध्यायाम्नायकर्शिताः ।
त्यक्तप्राणा जितस्वर्गा निवसन्ति महर्षयः ॥ ५-९९-१४ (३५३५५)
यत्रतत्रशयो नित्यं येनकेनचिदाशितः ।
येनकेनचिदाच्छन्नः स गोव्रत इहोच्यते ॥ ५-९९-१५ (३५३५६)
पश्य यद्यत्र ते कश्चिद्रोचते गुणतो वरः ।
वरयिष्यामि तं गत्वा यत्नमास्थाय मातले ॥ ५-९९-१६ (३५३५७)
अण्डमेतञ्जले न्यस्तं दीप्यमानमिव श्रिया ।
आप्रजानां निसर्गाद्वि नोद्विद्यति न सर्पति ॥ ५-९९-१७ (३५३५८)
नास्य जातिं निसर्गं वा कथ्यमानं शृणोमि वै ।
पितरं मातरं चापि नास्य जानाति कश्चन ॥ ५-९९-१८ (३५३५९)
अतः किल महानग्निरन्तकाले समुत्थितः ।
धक्ष्यते मातले सर्वं त्रैलोक्यं सचराचरम् ॥ ५-९९-१९ (३५३६०)
मातलिस्त्वब्रवीच्छ्रुत्वा नारदस्याथ भाषितम् ।
न मेऽत्र रोचते कश्चिदन्यतो व्रज माचिरम् ॥ ॥ ५-९९-२० (३५३६१)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
ऊनशततमोऽध्यायः ॥

५-९९-२ अद्भिः समं प्राप्ताः जलवेगेनानीताः ॥
५-९९-३ व्यापारेण जगदनुग्रहरूपेण तदर्थमितियावत् । निबद्धं
मर्यादायां स्थापितं ॥
५-९९-५ आदित्योऽदितेः पुत्रो विष्णुर्हयग्रीवरूपी ॥
५-९९-१४ स्वाध्यायाम्नायो वेदपाठः ॥
५-९९-१७ आप्रजानां निसर्गात् प्रयोत्पत्तिमारभ्य ॥
५-९९-१८ जातिं जन्म । निसर्गं स्वभावम् ॥

उद्योगपर्व - अध्याय १००
॥ श्रीः ॥
५.१००. अध्यायः १००

Mahabharata - Udyoga Parva - Chapter Topics
नारदेन दैत्यदानवायतनं हिरण्यपुरमुपेत्य मातलिंप्रति तत्र
वरान्वेषणचोदनम् ॥ १ ॥
मातलिना दैत्यदानवानां देवकुलनित्यविरोधितया
परपक्षानुबन्धानभिरुचिवचनम् ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१००-० (३५३६२)
नारद उवाच । ५-१००-०क्ष् (३६८७)
हिरण्यपुरमित्येतत्ख्यातं पुरवरं महत् ।
दैत्यानां दानवानां च मायाशतविचारिणाम् ॥ ५-१००-१ (३५३६३)
अनल्पेन प्रयत्नेन निर्मितं विश्वकर्मणा ।
मयेन मनसा सृष्टं पातालतलमाश्रितम् ॥ ५-१००-२ (३५३६४)
अत्र मायासहस्राणि वविकुर्वाणा महौजसः ।
दानवा निवसन्ति स्म शूरा दत्तवराः पुरा ॥ ५-१००-३ (३५३६५)
नैते शक्रेण नान्येन यमेन वरुणेन वा ।
शक्यन्ते वशमानेतुं तथैव धनदेन च ॥ ५-१००-४ (३५३६६)
असुराः कालखञ्जाश्च तथा वुष्णुपदोद्भवाः ।
नैर्ऋता यातुधानाश्च ब्रह्मपादोद्भवाश्च ये ॥ ५-१००-५ (३५३६७)
दंष्ट्रिणो भीमवेगाश्च वातवेगपराक्रमाः ।
मायावीर्योपसंपन्ना निवसन्त्यत्र मातले ॥ ५-१००-६ (३५३६८)
निवातकवचा नाम दानवा युद्धदुर्मदाः ।
जानासि च यथा शक्रो नैताञ्शक्नोति बाधितुं ॥ ५-१००-७ (३५३६९)
बहुशो मातले त्वं च तव पुत्रश्च गोमुखः ।

निर्भग्नो देवराजश्च सहपुत्रः शचीपतिः ॥ ५-१००-८ (३५३७०)
पश्य वेश्मानि रौक्माणि मातले राजतानि च ।
कर्मणा विधियुक्तेन युक्तान्युपगतानि च ॥ ५-१००-९ (३५३७१)
वैदूर्यमणिचित्राणि प्रवालरुचिराणि च ।
अर्कस्फटिकशुभ्राणि वज्रसारोज्ज्वलानि च ॥ ५-१००-१० (३५३७२)
पार्थिवानीव चाभास्ति पद्मरागमयानि च ।
शैलानीव च दृश्यन्ते दारवाणीव चाप्युत ॥ ५-१००-११ (३५३७३)
सूर्यरूपाणि चाभान्ति दीप्ताग्निसदृशानि च ।
मणिजालविचित्राणि प्रांशूनि निबिडानि च ॥ ५-१००-१२ (३५३७४)
नैतानि शक्यं निर्देष्टु रूपतो द्रव्यतस्तथा ।
गुणतश्चैव सिद्धानि प्रमाणगुणवन्ति च ॥ ५-१००-१३ (३५३७५)
आक्रीडान्पश्य दैत्यानां तथैव शयनान्युत ।
रत्नवन्ति महार्हाणि भाजनान्यासनानि च ॥ ५-१००-१४ (३५३७६)
जलदाभांस्तथा शैलांस्तोयप्रस्रवणानि च ।
कामपुष्पफलांश्चापि पादपान्कापचारिणः ॥ ५-१००-१५ (३५३७७)
मातले कश्चिदत्रापि रुचिरस्ते वरो भवेत् ।
अथवाऽन्यां दिशं भूमेर्गच्छाव यदि मन्यसे ॥ ५-१००-१६ (३५३७८)
मातलिस्त्वब्रवीदेनं भाषमाणं तथाविधम् ।
देवर्षे नैव मे कार्यं विप्रियं त्रिदिवौकसाम् ॥ ५-१००-१७ (३५३७९)
नित्यानुषक्तवैरा हि भ्रातरो देवदानवाः ।
परपक्षेण संबन्धं रोचयिष्याम्यहं कथम् ॥ ५-१००-१८ (३५३८०)
अन्यत्र साधु गच्छाव द्रष्टुं नार्हामि दानवान् ।
जानामि तव चात्मानं हिंसात्मकमनं तथा ॥ ॥ ५-१००-१९ (३५३८१)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि शततमोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-१००-११ शैलानि शिलामयानि ॥
५-१००-१४ आक्रीडान् क्रीडास्थानानि ॥
५-१००-१९ हिंसात्मकमनं हिंसाप्रधानानां दैत्यानां कमनं अपेक्षणीयम् । जानामि तु तवात्मानमिच्छसे कलहानिति इति को पाठः ॥

उद्योगपर्व - अध्याय १०१
॥ श्रीः ॥
५.१०१. अध्यायः १०१

Mahabharata - Udyoga Parva - Chapter Topics

नारदेन मातलिं सुपर्णलोकमुपनीय सुपर्णवंश्यानां पक्षिणां
नामनिर्देशपूर्वकं गुणानुकीर्तनम् ॥ १ ॥
तत्र वरानभिरोचने देशान्तरनयनवचनम् ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१०१-० (३५३८२)
नारद उवाच। ५-१०१-०क्ष् (३६८८)
अयं लोकः सुपर्णानां पक्षिणां पन्नगाशिनाम् ।
विक्रमे गमने भारे नैषामस्ति परिश्रमः ॥ ५-१०१-१ (३५३८३)
वैनतेयसुतैः सूत पङ्क्तिभस्ततमिदं कुलम् ।
सुमुखेन सुनाम्ना च सुनेत्रेण सुवर्चसा ॥ ५-१०१-२ (३५३८४)
सुरुचा पक्षिराजेन सुबलेन च मातले ।
वर्धितानि प्रसूत्या वै विनाताकुलकर्तृभिः ॥ ५-१०१-३ (३५३८५)
पक्षिराजाभिजात्यानां सहस्राणि शतानि च ।
कश्यपस्य ततो वंशे जातैर्भूतिविवर्धनैः ॥ ५-१०१-४ (३५३८६)
सर्वे ह्येते श्रिया युक्ताः सर्वे श्रीवत्सलक्षणाः ।
सर्वे श्रियमभीप्सन्तो धारयन्ति बलान्युत ॥ ५-१०१-५ (३५३८७)
कर्मणा क्षत्रियाश्चैते निर्घृणा भोगिभोजिनः ।
ज्ञातिसङ्क्षयकर्तृत्वाद्ब्राह्मण्यं न लभन्ति वैः ॥ ५-१०१-६ (३५३८८)
नामानि चैषां वक्ष्यामि यथाप्राधान्यतः शृणु ।
मातले श्लाघ्यमेतद्धि कुलं विष्णुपरिग्रहम् ॥ ५-१०१-७ (३५३८९)
दैवतं विष्णुरेतेषां विष्णुरेव परायणम् ।
हृदि चैषां सदा विष्णुर्विष्णुरेव सदा गतिः ॥ ५-१०१-८ (३५३९०)
सुवर्णचूडो नागाशी दारुणश्चण्डतुण्डकः ।
अनिलश्चानलश्चैव विशालाक्षोऽथ कुण्डली ॥ ५-१०१-९ (३५३९१)
पङ्कजिद्वज्रविष्कम्भो वैनतेयोऽथ वामनः ।
वातवेगो दिशाचक्षुर्निमेषोऽनिमिषस्तथा ॥ ५-१०१-१० (३५३९२)
त्रिरावः सप्तरावश्च वाल्मीकिर्दीपकस्तथा ।
दैत्यद्वीपः सरिद्द्वीपः सारसः पद्मकेतनः ॥ ५-१०१-११ (३५३९३)
सुमुखश्चित्रकेतुश्च चित्रबर्हस्तथाऽनघः ।
मेषहृत्कुमुदो दक्षः सर्पान्तः सोमभोजनः ॥ ५-१०१-१२ (३५३९४)
गुरुभारः कपोतश्च सूर्यनेत्रश्चिरान्तकः ।
विष्णुधर्मा कुमारश्च परिबर्हो हरिस्तथा ॥ ५-१०१-१३ (३५३९५)
सुस्वरो मधुपर्कश्च हेमवर्णस्तथैव च ।

मालयो मातरिश्वा च निशाकरदिवाकरौ ॥ ५-१०१-१४ (३५३९६)
एते प्रदेशमात्रेण मयोक्ता गरुडात्मजाः ।
प्राधान्यतस्ते यशसा कीर्तिताः प्राणिनश्चये ॥ ५-१०१-१५ (३५३९७)
यद्यत्र न रुचिः काचिदेहि गच्छाव मातले ।
तं नयिष्यामि देशं त्वां वरं यत्रोपलप्स्यसे ॥ ॥ ५-१०१-१६ (३५३९८)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
एकाधिकशततमोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-१०१-३ प्रसृत्या प्रकृष्टगत्या जवेन वृद्धिमन्तीत्यर्थः ॥

उद्योगपर्व - अध्याय १०२
॥ श्रीः ॥
५.१०२. अध्यायः १०२

Mahabharata - Udyoga Parva - Chapter Topics
नारदेन मातलिं रसातलमुपनीय तत्र वास्तव्यसुरभिसन्ततिगुणस्तवनम्
॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१०२-० (३५३९९)
नारद उवाच। ५-१०२-०क्ष् (३६८९)
इदं रसातलं नाम सप्तमं पृथिवीतलम् ।
यत्रास्ते सुरभिर्माता गवाममृतसंभवा ॥ ५-१०२-१ (३५४००)
क्षरन्ती सततं क्षीरं पृथिवीसारसंभवम् ।
षण्णं रसानां सारेण रसमेकमनुत्तमम् ॥ ५-१०२-२ (३५४०१)
अमृतेनाभितृप्तस्य सारमुद्गिरतः पुरा ।
पितामहस्य वदनादुदतिष्ठदनिन्दिता ॥ ५-१०२-३ (३५४०२)
यस्याः क्षीरस्य धाराया निपतन्त्या महीतले ।
ह्रदः कृतः क्षीरनिधिः पवित्रं परमुच्यते ॥ ५-१०२-४ (३५४०३)
पुष्पितस्येव फेनेन पर्यन्तमनुवेष्टितम् ।
पिबन्तो निवसन्त्यत्र फेनपा मुनिसत्तमाः ॥ ५-१०२-५ (३५४०४)
फेनपा नाम ते ख्याताः फेनाहाराश्च मातले ।
उग्रे तपसि वर्तन्ते येषां बिभ्यति देवताः ॥ ५-१०२-६ (३५४०५)
अस्याश्चतस्रो धेन्वोऽन्या दिक्षु सर्वासु मातले ।

निवसन्ति दिशां पाल्यो धारयन्त्योदिशःस्म ताः ॥ ५-१०२-७ (३५४०६)
पूर्वां दिशं धारयते सुरूपा नाम सौरभी ।
दक्षिणां हंसिका कनाम धारयत्यपरां दिशम् ॥ ५-१०२-८ (३५४०७)
पश्चिमा वारुणी दिक्च धार्यते वै सुभद्रया ।
महानुभावया नित्यं मातले विश्वरूपया ॥ ५-१०२-९ (३५४०८)
सर्वकामदुघा नाम धेनुर्धारयते दिशम् ।
उत्तरां मातले धर्म्यां तथैलविलसंश्रिताम् ॥ ५-१०२-१० (३५४०९)
आसां त पयसा मिश्रं पयो निर्मथ्य सागरे ।
मन्थानं मन्दरं कृत्वा देवैरसुरसंहितैः ॥ ५-१०२-११ (३५४१०)
अद्भूता वारुणी लक्ष्मीरमृतं चापि मातले ।
उच्चैःश्रवाश्चाश्वराजो मणिरत्नं च कौस्तुभम् ॥ ५-१०२-१२ (३५४११)
सुधाहारेषु च सुधां स्वधाभोजिषु च स्वधाम् ।
अमृतं चामृताशेषु सुरभी क्षरते पयः ॥ ५-१०२-१३ (३५४१२)
अत्र गाथा पुरा गीता रसातलनिवासिभिः ।
पौराणी श्रूयते लोके गीयते या मनीषिभिः ॥ ५-१०२-१४ (३५४१३)
न नागलोके न स्वर्गे न विमाने त्रिविष्टपे ।
परिवासः सुखस्तादृक् रसातलतले यथा ॥ ॥ ५-१०२-१५ (३५४१४)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवाद्यानपर्वणि
द्व्यधिकशततमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-१०२-११ असुरसंहितैः असुरसहितैः ॥
५-१०२-१५ परिवासः निवासः । सुखः सुखकरः ॥
१५ ॥

उद्योगपर्व - अध्याय १०३
॥ श्रीः ॥
५.१०३. अध्यायः १०३

Mahabharata - Udyoga Parva - Chapter Topics
नारदेन मातलिं भोगवतीं नीत्वा वरान्वेषणचोदनम् ॥ १ ॥
तत्र सुमुखं नाम कंचन भुजगराजमभिरोचमानेन मातलिना
नारदंप्रति तस्य जन्मकर्मादिप्रश्नः ॥ २ ॥
नारदेन तस्य आर्यकनाम्नो भोगिनः पौत्रत्वे कीर्तिते मातलिना
नारदंप्रति तद्धटनाभ्यर्थना ॥ ३ ॥

५-१०३-० (३५४१५)
नारद उवाच। ५-१०३-०क्ष् (३६९०)
इयं भोगवती नाम पुरी वासुकिपालिता ।
यादृशी देवराजस्य पुरी वर्याऽमरावती ॥ ५-१०३-१ (३५४१६)
एष शेषः स्थितो नागो येनेयं धार्यते सदा ।
तपसा लोकमुख्येन प्रभावसहिता मही ॥ ५-१०३-२ (३५४१७)
श्वेताचलनिभाकारो दिव्याभरणभूषितः ।
सहस्रं धारयन्मूर्ध्नां ज्वालाजिह्वो महाबलः ॥ ५-१०३-३ (३५४१८)
इह नानाविधाकारा नानाविधविभूषणाः ।
सुरसायाः सुता नागा निवसन्ति गतव्यथाः ॥ ५-१०३-४ (३५४१९)
मणिस्वस्तिकचक्राङ्काः कमण्डलुकलक्षणाः ।
सहस्रसंख्या बलिन सर्वे रौद्राः स्वभावतः ॥ ५-१०३-५ (३५४२०)
सहस्रशिरसः केचित्केचित्पञ्चशताननाः ।
शतशीर्षास्तथा केचित्केचित्त्रिशिरसोऽपि च ॥ ५-१०३-६ (३५४२१)
द्विपञ्चशिरसः केचित्केचित्सप्तसुखास्तथा ।
महाभोगा महाकायाः पर्वताभोगभोगिनः ॥ ५-१०३-७ (३५४२२)
बहूनीह सहस्राणि प्रयुतान्यर्बुदानि च ।
नागानामेकवंशानां यथाश्रेष्ठं तु मे श्रुणु ॥ ५-१०३-८ (३५४२३)
वासुकिस्तक्षकश्चैव कर्कोटकधनञ्जयौ ।
कालीयो नहुषश्चैव कम्बलाश्वतरावुभौ ॥ ५-१०३-९ (३५४२४)
बाह्यकुण्डो मणिर्नागस्तथैवापूरणः खगः ।
वामनश्चैलपत्रश्च कुकुरः कुकुणस्तथा ॥ ५-१०३-१० (३५४२५)
आर्यको नन्दकश्चैव तथा कलशपोतकौ ।
कैलासकः पिञ्जरको नागश्चैरावतस्तथा ॥ ५-१०३-११ (३५४२६)
सुमनोमुखो दधिमुखः शङ्खो नन्दोपनन्दकौ ।
आप्तः कोटरकश्चैव शिखी निष्ठूरिकस्तथा ॥ ५-१०३-१२ (३५४२७)
तित्तिरिर्हस्तिभद्रश्च कुमुदो माल्यपिण्डकः ।
द्वौ पद्मौ पुण्डरीकश्च पुष्पो मुद्गरपर्णकः ॥ ५-१०३-१३ (३५४२८)
करवीरः पीठरकः संवृत्तो वृत्त एव च ।
पिण्डारो बिल्वपत्रश्च मूषिकादः शिरीषकः ॥ ५-१०३-१४ (३५४२९)
दिलीपः शङ्खशीर्षश्च ज्योतिष्कोऽथापराजितः ।
कौरव्यो धृतराष्ट्रश्च कुहुरः कृशकस्तथा ॥ ५-१०३-१५ (३५४३०)
विरजा धारणश्चैव सुबाहुर्मुखरो जयः ।
बधिरान्धौ विशुण्डिश्च विरसः सुरसस्तथा ॥ ५-१०३-१६ (३५४३१)

एते चान्ये च बहवः कश्यपस्यात्मजाः स्मृताः ।
मातले पश्य यद्यत्र कश्चित्ते रोचते वरः ॥ ५-१०३-१७ (३५४३२)
कण्व उवाच। ५-१०३-१८क्ष् (३६९१)
मातलिस्त्वेकमव्यग्रः सततं संनिरीक्ष्य वै ।
पप्रच्छ नारदं तत्र प्रीतिमानिव चाभवत् ॥ ५-१०३-१८ (३५४३३)
मातलिरुवाच। ५-१०३-१९क्ष् (३६९२)
स्थितो य एष पुरतः कौरव्यस्यार्यकस्य तु ।
द्युतिमान्दर्शनीयश्च कस्यैष कुलनन्दनः ॥ ५-१०३-१९ (३५४३४)
कः पिता जननी चास्य कतमस्यैष भोगिनः ।
वंशस्य कस्यैष महान्केतुभूत इव स्थितः ॥ ५-१०३-२० (३५४३५)
प्रणिधानेन धैर्येण रूपेण वयसा च मे ।
मनः प्रविष्टो देवर्षे गुणकेश्याः पतिर्वरः ॥ ५-१०३-२१ (३५४३६)
कण्व उवाच। ५-१०३-२२क्ष् (३६९३)
मातलिं प्रीतमनसं दृष्ट्वा सुमुखदर्शनात् ।
निवेदयामास तदा माहात्म्यं जन्म कर्म च ॥ ५-१०३-२२ (३५४३७)
नारद उवाच। ५-१०३-२३क्ष् (३६९४)
ऐरावतकुले जातः सुमुखो नाम नागराट् ।
आर्यकस्य मतः पौत्रो दौहित्रो वामनस्य च ॥ ५-१०३-२३ (३५४३८)
एतस्य हि पिता नागश्चिकुरो नाम मातले ।
नचिराद्वैतनेयेन पञ्चत्वमुपपादितः ॥ ५-१०३-२४ (३५४३९)
ततोऽब्रवीत्प्रीतमना मातलिर्नारदं वचः ।
एष मे रुचितस्तात जामाता भुजगोत्तमः ॥ ५-१०३-२५ (३५४४०)
क्रियतामत्र यत्नो वै प्रीतिमानस्म्यनेन वै ।
अस्मै नागाय वै दातुं प्रियां दुहितरं मुने ॥ ॥ ५-१०३-२६ (३५४४१)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
त्र्यधिकशततमोऽध्यायः ॥

उद्योगपर्व - अध्याय १०४
॥ श्रीः ॥
५.१०४. अध्यायः १०४

Mahabharata - Udyoga Parva - Chapter Topics
नारदेन आर्यकंप्रति पौत्रार्थं मातलिकन्यापरिग्रहचोदनम् ॥ १ ॥
आर्यकेण नारदंप्रति सुमुखजनकं भक्षितवता वैनतेयेन मासान्तरे
सुमुखभक्षणप्रतिज्ञानिवेदनम् ॥ २ ॥
मातलिना तार्क्ष्यात्सुमुखरिरक्षया सुमुखनारदाभ्यां सह

शक्रसमीपगमनम् ॥ ३ ॥
नारदेन मातालेकार्यं विज्ञापितेन विष्णुना सुमुखाय
अमृतवितरणाज्ञापनेपि इन्द्रेण अमृताप्रदानेनैव दीर्घायुर्दानम्
॥ ४ ॥
मातलिना सुमुखाय स्वकन्यां प्रदाय विवाहनिर्वर्तनम् ॥ ५ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१०४-० (३५४४२)
कण्व उवाच। ५-१०४-०क्ष् (३६९५)
मातलेर्वचनं श्रुत्वा नारदो मुनिसत्तमः ।
अब्रवीद्देवराजं तमार्यकं कुरुनन्दन ॥ ५-१०४-१ (३५४४३)
सूतोऽयं मातलिर्नाम शक्रस्य दयितः सुहृत् ।
शुचिः शीलगुणोपेतस्तेजस्वी वीर्यवान्बली ॥ ५-१०४-२ (३५४४४)
शक्रस्यायं सखा चैव मन्त्री सारथिरेव च ।
अल्पान्तरप्रभावश्च वासवेन रणे रणे ॥ ५-१०४-३ (३५४४५)
अयं हरिसहस्रेण युक्तं जैत्रं रथोत्तमम् ।
देवासुरेषु युद्धेषु मनसैव नियच्छति ॥ ५-१०४-४ (३५४४६)
अनेन विजितानश्वैर्दोर्भ्यां जयति वासवः ।
अनेन बलभित्पूर्वं प्रहृते प्रहरत्युत ॥ ५-१०४-५ (३५४४७)
अस्य कन्या वरारोहा रूपेणासदृशी भुवि ।
सत्यशीलगुणोपेता गुणकेशीति विश्रुता ॥ ५-१०४-६ (३५४४८)
तस्यास्य यत्नाच्चरतस्त्रैलोक्यममरद्युते ।
सुमुखो भवतः पौत्रो रोचते दुहितुः पतिः ॥ ५-१०४-७ (३५४४९)
यदि ते रोचते सम्यग्भुजगोत्तम मा चिरम् ।
क्रियतामार्यक क्षिप्रं बुद्धिः कन्यापरिग्रहे ॥ ५-१०४-८ (३५४५०)
यथा विष्णुकुले लक्ष्मीर्यथा स्वाहा विभावसोः ।
कुले तव तथैवास्तु गुणकेशी सुमध्यमा ॥ ५-१०४-९ (३५४५१)
पौत्रस्यार्थे भवांस्तस्माद्गुणकेशीं प्रतीच्छतु ।
सदृशीं प्रतिरूपस्य वासवस्य शचीमिव ॥ ५-१०४-१० (३५४५२)
पितृहीनमपि ह्येनं गुणतो वरयामहे ।
बहुमानाच्च भवतस्तथैवैरावतस्य च ॥ ५-१०४-११ (३५४५३)
सुमुखस्य गुणैश्चैव शीलशौचदमादिभिः ।
अभिगम्य स्वयं कन्यामयं दातुं समुद्यतः ।
मातलिस्तस्य संमानं कर्तुमर्हो भवानपि ॥ ५-१०४-१२ (३५४५४)
कण्व उवाच। ५-१०४-१३क्ष् (३६९६)

स तु दीनः प्रहृष्टश्च प्राह नारदमार्यकः ।
व्रियमाणे तथा पौत्रे पुत्रे च निधनं गते ॥ ५-१०४-१३ (३५४५५)
आर्यक उवाच। ५-१०४-१४क्ष् (३६९७)
मन्ये नैतद्बहुमतं महर्षे वचनं तव ।
सखा शक्रस्य संयुक्तः कस्यायं नेप्सितो भवेत् ।
कारणस्य तु दौर्बल्याच्चिन्तयामि महामुने ॥ ५-१०४-१४ (३५४५६)
अस्य देहकरस्तात मम पुत्रो महाद्युते ।
भक्षितो वैनतेयेन दुःखार्तास्तेन वै वयम् ॥ ५-१०४-१५ (३५४५७)
पुनरेव च तेनोक्तं वैनतेयेन गच्छता ।
मासेनान्येन सुमुखं भक्षयिष्य इति प्रभो ॥ ५-१०४-१६ (३५४५८)
ध्रुवं तथा तद्भविता जानीमस्तस्य निश्चयम् ।
तेन हर्षः प्रनष्टो मे सुपर्णवचनेन वै ॥ ५-१०४-१७ (३५४५९)
कण्व उवाच। ५-१०४-१८क्ष् (३६९८)
मातलिस्त्वब्रवीदेनं बुद्धिरत्र कृता मया ।
जामातृभावेन वृतः सुमुखस्तव पुत्रजः ॥ ५-१०४-१८ (३५४६०)
सोऽयं मया च सहितो नारदेन च पन्नगः ।
त्रिलोकेशं सुरपतिं गत्वा पश्यतु वासवम् ॥ ५-१०४-१९ (३५४६१)
शेषेणैवास्य कार्येण प्रज्ञास्वाम्यहमायुषः ।
सुपर्णस्य विघाते च प्रयतिष्यामि सत्तम ॥ ५-१०४-२० (३५४६२)
सुमुखश्च मया सार्धं देवेशमिगच्छतु ।
कार्यसंसाधनार्थाय स्वस्ति तेऽस्तु भुजङ्गम ॥ ५-१०४-२१ (३५४६३)
ग्कण्व उवाच। ५-१०४-२२क्ष् (३६९९)
आर्यकेणाभ्यनुज्ञाता गम्यतामिति भारत।'
ततस्ते सुमुखं गृह्य सर्व एव महौजसः ।
ददृशुः शक्रमासीनं देवराजं महाद्युतिम् ॥ ५-१०४-२२ (३५४६४)
सङ्गत्या तत्र भगवान्विष्णुरासीच्चतुर्भुजः ।
ततस्तत्सर्वमाचख्यौ नारदो मातलिं प्रति ॥ ५-१०४-२३ (३५४६५)
वैशम्पायन उवाच। ५-१०४-२४क्ष् (३७००)
ततः पुरन्दरं विष्णुरुवाच भुवनेश्वरम् ।
अमृतं दीयतामस्मै क्रियताममरैः समः ॥ ५-१०४-२४ (३५४६६)
मातलिर्नारदश्चैव सुमुखश्चैव वासव ।
लभन्तां भवतः कामात्काममेतं यथेप्सितम् ॥ ५-१०४-२५ (३५४६७)
पुरन्दरोऽथ संचिन्त्य वैनतेयपराक्रमम् ।
विष्णुमेवाब्रवीदेनं भवानेव ददात्विति ॥ ५-१०४-२६ (३५४६८)
विष्णुरुवाच। ५-१०४-२७क्ष् (३७०१)
ईशस्त्वं सर्वलोकानां चराणामचराश्च ये ।

त्वया दत्तमदत्तं कः कर्तुमुत्सहते विभो ॥ ५-१०४-२७ (३५४६९)
प्रादाच्छक्रस्ततस्तस्मै पन्नगायायुरुत्तमम् ।
न त्वेनममृतप्राशं चकार बलवृत्रहा ॥ ५-१०४-२८ (३५४७०)
लब्ध्वा वरं तु सुमुखः सुमुखः संबभूव ह ।
कृतदारो यथाकामं जगाम च गृहान्प्रति ॥ ५-१०४-२९ (३५४७१)
नारदस्त्वार्यकश्चैव कृतकार्यौ मुदा युतौ ।
अभिजग्मतुरभ्यर्च्य देवराजं महाद्युतिम् ॥ ॥ ५-१०४-३० (३५४७२)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
चतुरधिकशततमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-१०४-२० अस्यायुषः शेषेण कार्येण प्रज्ञास्यामि विज्ञापयिष्यामि ॥

उद्योगपर्व - अध्याय १०५
॥ श्रीः ॥
५.१०५. अध्यायः १०५

Mahabharata - Udyoga Parva - Chapter Topics

सुमुखाय आयुर्दानश्रवणकुपितेन गरुडेन इन्द्रोपेन्द्रावभ्येत्य दर्पोक्तिः
॥ १ ॥
उपेन्द्रेण तार्क्ष्यदर्पविमोक्षणाय तदंसे स्वदक्षबाहुविक्षेपे
तद्वहनाक्षमेण तेन तत्क्षमापनम् ॥ २ ॥
कण्वेन सुयोधनंप्रति गरुडनिदर्शनप्रदर्शनपूर्वकं
गर्वपरिहारेण पाण्डवैः सह शमविधानम् ॥ ३ ॥
दुर्योधनेन ऊरुताजनपूर्वकं कण्वोपहासे तेन तं प्रति तव ऊरावेव
मृत्युर्भविष्यतीति शापदानम् ॥ ४ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१०५-० (३५४७३)
कण्व उवाच। ५-१०५-०क्ष् (३७०२)
गरुडस्तत्र शुश्राव यथावृत्तं महाबलः ।
आयुःप्रदानं शक्रेण कृतं नागस्य भारत ॥ ५-१०५-१ (३५४७४)
पक्षवातेन महता रुद्ध्वा त्रिभुवनं खगः ।
सुपर्णः परमक्रुद्धो वासवं समुपाद्रवत् ॥ ५-१०५-२ (३५४७५)

गरुड उवाच। ५-१०५-३क्ष् (३७०३)
भगवन्किमवज्ञानाद्वृत्तिः प्रतिहता मम ।
कामकारवरं दत्त्वा पुनश्चलितवानसि ॥ ५-१०५-३ (३५४७६)
निसर्गात्सर्वभूतानां सर्वभूतेश्वरेण मे ।
आहारो विहितो धात्रा किमर्थं वार्यते त्वया ॥ ५-१०५-४ (३५४७७)
वृतश्चैष महानागः स्थापितः समयश्च मे ।
अनेन च मया देव भर्तव्यः प्रसवो महान् ॥ ५-१०५-५ (३५४७८)
एतस्मिंस्तु तथाभूते नान्यं हिंसितुमुत्सहे ।
क्रीडसे कामकारेण देवराज यथेच्छकम् ॥ ५-१०५-६ (३५४७९)
सोऽहं प्राणान्विमोक्ष्यामि तथा परिजनो मम ।
ये च भृत्या मम गृहे प्रीतिमान्भव वासव ॥ ५-१०५-७ (३५४८०)
ग्कण्व उवाच। ५-१०५-८क्ष् (३७०४)
श्रुत्वा सुपर्णवचनं सुमुखो दुर्मुखस्तदा ।
त्यक्त्वा रूपं विवर्णस्तु सर्परूपधरोऽभवत् ।
गत्वा विष्णुसमीपं तु पादपीठं समाश्लिषत् ॥ ५-१०५-८ (३५४८१)
इन्द्र उवाच। ५-१०५-९क्ष् (३७०५)
न मत्कृतं वैनतेय न मां क्रोद्धुं त्वमर्हसि ।
दत्ताभयः स सुमुखो विष्णुना प्रभविष्णुना ।
श्रत्वा पुरन्दरेणोक्तमुवाच विनतासुतः ॥' ५-१०५-९ (३५४८२)
एतच्चैवाहमर्हामि भूयश्च बलवृत्रहन् ।
त्रैलोक्यस्येश्वरो योऽहं परभृत्यत्वमागतः ॥ ५-१०५-१० (३५४८३)
त्वयि तिष्ठति देवेश न विष्णुः कारणं मम ।
त्रैलोक्यराजराज्यं हि त्वयि वासव शाश्वतम् ॥ ५-१०५-११ (३५४८४)
ममापि दक्षस्य सुता जननी कश्यपः पिता ।
अहमत्युत्सहे लोकान्समन्ताद्वोढुमोजसा ॥ ५-१०५-१२ (३५४८५)
असह्यं सर्वभूतानां ममापि विपुलं बलम् ।
मयाऽपि सुमहत्कर्म कृतं दैतेयविग्रहे ॥ ५-१०५-१३ (३५४८६)
श्रुतश्रीः श्रुतसेनश्च विवस्वान्रोचनामुखः ।
प्रस्रुतः कालकाक्षश्च मयाऽपि दितिजा हताः ॥ ५-१०५-१४ (३५४८७)
यत्तु ध्वजस्थानगतो यत्नात्परिचराम्यहम् ।
वहामि चैवानुजं ते तेन मामवमन्यसे ॥ ५-१०५-१५ (३५४८८)
कोऽन्यो भारसहो ह्यस्ति कोऽन्योस्ति बलवत्तरः ।
मया योऽहं विशिष्टः सन्वहामीमं सबान्धवं ॥ ५-१०५-१६ (३५४८९)
अवज्ञाय तु यत्तेऽहं भोजनाद्यपरोपितः ।
तेन मे गौरवं नष्टं त्वत्तश्चास्माच्च वासव ॥ ५-१०५-१७ (३५४९०)
अदित्यां य इमे जाता बलविक्रमशालिनः ।

त्वमेषां किल सर्वेषां बलेन बलवत्तरः ॥ ५-१०५-१८ (३५४९१)
सोऽहं पक्षैकदेशेन वहामि त्वां गतक्लमः ।
विमृश त्वं शनैस्तात कोऽन्वत्र बलवानिति ॥ ५-१०५-१९ (३५४९२)
कण्व उवाच। ५-१०५-२०क्ष् (३७०६)
स तस्य वचनं श्रुत्वा खगस्योदर्कदारुणम् ।
अक्षोभ्यं क्षोभयंस्तार्क्ष्यमुवाच रथचक्रभृत् ॥ ५-१०५-२० (३५४९३)
गरुत्मन्मन्यसेत्मानं बलवन्तं सुदुर्बलम् ।
अलमस्मत्समक्षं ते स्तोतुमात्मानमण्डज ॥ ५-१०५-२१ (३५४९४)
त्रैलोक्यमपि मे कृत्स्नमशक्तं देहधारणे ।
अहमेवात्मनात्मानं वहामि त्वां च धारये ॥ ५-१०५-२२ (३५४९५)
ग्न त्वं वहसि मां दोर्भ्यां मोघं तव विकत्थनम् ।'
इमं तावन्ममैकं त्वं बाहुं सव्येतरं वह ।
यद्येनं धारयस्येकं सफलं ते विकत्थितम् ॥ ५-१०५-२३ (३५४९६)
इत्युक्त्वा भगवांस्तस्य स्कन्धे बाहुं समासजत् ।
ग्आरोपितं समुद्वोढुं भारं तं नाशकद्बलात् ।'
निपपात स भारार्तो विह्वलो नष्टचेतनः ॥ ५-१०५-२४ (३५४९७)
यावान्हि भारः कृत्स्नायाः पृथिव्याः पर्वतैः सह ।
एकस्या देहशाखायास्तावद्भारममन्यत ॥ ५-१०५-२५ (३५४९८)
न त्वेनं पीडयामास बलेन बलवत्तरः ।
ततो हि जीवितं तस्य न व्यनीनशदच्युतः ॥ ५-१०५-२६ (३५४९९)
व्यात्तास्यः स्रस्तकायश्च विचेता विह्वलः खगः ।
मुमोच पत्त्राणि तदा गुरुभारप्रपीडितः ॥ ५-१०५-२७ (३५५००)
स विष्णुं शिरसा पक्षी प्रणम्य विनतासुतः ।
विचेता विह्वलो दीनः किंचिद्वचनमब्रवीत् ॥ ५-१०५-२८ (३५५०१)
भगवँल्लोकसारस्य सदृशेन वपुष्मता ।
भुजेन स्वैरमुक्तेन निष्पिष्टोऽस्मि महीतले ॥ ५-१०५-२९ (३५५०२)
क्षन्तुमर्हसि मे देव विह्वलस्याल्पचेतसः ।
बलदाहविदग्धस्य पक्षिणो ध्वजवासिनः ॥ ५-१०५-३० (३५५०३)
न हि ज्ञातं बलं देव मया ते परम विभो ।
तेन मन्याम्यहं वीर्यमात्मनो न समं परैः ॥ ५-१०५-३१ (३५५०४)
कण्व उवाच। ५-१०५-३२क्ष् (३७०७)
ततश्चक्रे स भगवान्प्रसादं वै गरुत्मतः ।
मैवं भूय इति स्नेहात्तदा चैनमुवाच ह ॥ ५-१०५-३२ (३५५०५)
पादाङ्गुष्ठेन चिक्षेप सुमुखं गरुडोरसि ।
ततः प्रभृति राजेन्द्र सहसर्पेण वर्तते ॥ ५-१०५-३३ (३५५०६)
एवं विष्णुबलाक्रान्तो गर्वनाशमुपागतः ।

गरुडो बलवान्राजन्वैनतेयो महायशाः ॥ ५-१०५-३४ (३५५०७)
कण्व उवाच। ५-१०५-३५क्ष् (३७०८)
तथा त्वमपि गान्धारे यावत्पाण्डुसुतान्रणे ।
नासादयसि तान्वीरांस्तावज्जीवसि पुत्रक ॥ ५-१०५-३५ (३५५०८)
भीमः प्रहरतां श्रेष्ठो वायुपुत्रो महाबलः ।
धनञ्जयश्चेन्द्रसुतो न हन्यातां तु कं रणे ॥ ५-१०५-३६ (३५५०९)
विष्णुर्वायुश्च शक्रश्च धर्मस्तौ चाश्विनावुभौ ।
एते देवास्त्वया केन हेतुना वीक्षितुं क्षमाः ॥ ५-१०५-३७ (३५५१०)
तदलं ते विरोधेन शमं गच्छ नृपात्मज ।
वासुदेवेन तीर्थेन कुलं रक्षितुमर्हसि ॥ ५-१०५-३८ (३५५११)
प्रत्यक्षदर्शी सर्वस्य नारदोऽयं महातपाः ।
माहात्म्यस्य तदा विष्णोः सोऽयं चक्रगदाधरः ॥ ५-१०५-३९ (३५५१२)
वैशम्पायन उवाच। ५-१०५-४०क्ष् (३७०९)
दुर्योधनस्तु तच्छ्रुत्वा निश्वसन्भृकुटीमुखः ।
राधेयमभिसंप्रेक्ष्य जहास स्वनवत्तदा ॥ ५-१०५-४० (३५५१३)
कदर्थीकृत्य तद्वाक्यमृषेः कण्वस्य दुर्मतिः ।
ऊरुं गजकराकारं ताडयन्निदमब्रवीत् ॥ ५-१०५-४१ (३५५१४)
यथैवेश्वरसृष्टोऽस्मि यद्भावि या च मे गतिः ।
तथा महर्षे वर्तामि किं प्रलापः करिष्यति ॥ ५-१०५-४२ (३५५१५)
ग् ततः कण्वोऽब्रवीत्क्रुद्धो दुर्योधनमपण्डितम् ।
यस्मादूकं ताडयसि ऊरौ मृत्युर्भविष्यति ॥' ॥ ५-१०५-४३ (३५५१६)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
पञ्चाधिकशततमोऽध्यायः ॥

उद्योगपर्व - अध्याय १०६
॥ श्रीः ॥
५.१०६. अध्यायः १०६

Mahabharata - Udyoga Parva - Chapter Topics
निर्बन्धस्यानर्थहेतुतायां निदर्शनप्रदर्शनाय दुर्योधनंप्रति
नारदेन गालवोपाख्यानकथनारम्भः ॥ १ ॥
विश्वामित्रेण गुरुदक्षिणानिषेधनेऽपि निर्बन्धकारिणं गालवंप्रति
एकतश्श्यामकर्णश्वेताश्वशताष्टकानयननियोगः ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१०६-० (३५५१७)
जनमेजय उवाच। ५-१०६-०क्ष् (३७१०)
अनर्थे जातिनिर्बन्धं परार्थे लोभमोहितम् ।
अनार्यकेष्वभिरतं मरणे कृतनिश्चयम् ॥ ५-१०६-१ (३५५१८)
ज्ञातीनां दुःखकर्तारं बन्धूनां शोकवर्धनम् ।
सुहृदां क्लेशदातारं द्विषतां हर्षवर्धनम् ॥ ५-१०६-२ (३५५१९)
कथं नैनं विमार्गस्थं वारयन्तीह बान्धवाः ।
सौहृदाद्वा सुहृत्स्निग्धो भगवान्वा पितामहः ॥ ५-१०६-३ (३५५२०)
वैशम्पायन उवाच। ५-१०६-४क्ष् (३७११)
उक्तं भगवता वाक्यमुक्तं भीष्मेण यत्क्षमम् ।
उक्तं बहुविधं चैव नारदेनापि तच्छृणु ॥ ५-१०६-४ (३५५२१)
नारद उवाच। ५-१०६-५क्ष् (३७१२)
दुर्लभो वै सुहृच्छ्रोता दुर्लभश्च हितः सुहृत् ।
तिष्ठते हि सुह्यद्यत्र न बन्धुस्तत्र तिष्ठते ॥ ५-१०६-५ (३५५२२)
श्रोतव्यमपि पश्यापि सुहृदां कुरुनन्दन ।
न कर्तव्यश्च निर्बन्धो निर्बन्धो हि सुदारुणः ॥ ५-१०६-६ (३५५२३)
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
यथा निर्बन्धतः प्राप्तो गालवेन पराजयः ॥ ५-१०६-७ (३५५२४)
विश्वामित्रं तपस्यन्तं धर्मो जिज्ञासया पुरा ।
अभ्यगच्छत्स्वयं भूत्वा वसिष्ठो भगवानृषिः ॥ ५-१०६-८ (३५५२५)
सप्तर्षीणामन्यतमं वेषमास्थाय भारत ।
बभुक्षुः क्षुधितो राजन्नाश्रमं कौशिकस्य तु ॥ ५-१०६-९ (३५५२६)
विश्वामित्रोऽथ संभ्रान्तः श्रपयामास वै चरुम् ।
परमान्नस्य यत्नेन न च तं प्रत्यपालयत् ॥ ५-१०६-१० (३५५२७)
अन्नं तेन यदा भुक्तमन्यैर्दत्तं तपस्विभिः ।
अथ गृह्णान्नमत्युष्णं विश्वामित्रोऽप्युपागमत् ॥ ५-१०६-११ (३५५२८)
भुक्तं मे तिष्ठ तावत्त्वमित्युक्त्वा भगवान्ययौ ।
विश्वामित्रस्ततो राजन्स्थित एव महाद्युतिः ॥ ५-१०६-१२ (३५५२९)
भक्तं प्रगृह्य मूर्ध्ना वै बाहुभ्यां संशितव्रतः ।
स्थितः स्थाणुरिवाभ्याशे निश्चेष्टो मारुताशनः ॥ ५-१०६-१३ (३५५३०)
तस्य शुश्रूषणे यत्नमकरोद्गालवो मुनिः ।
गौरवाद्बहुमानाच्च हार्देन प्रियकाम्यया ॥ ५-१०६-१४ (३५५३१)
अथ वर्षशते पूर्णे धर्मः पुनरुपागमत् ।
वासिष्ठं वेषमास्थाय कौशिकं भोजनेप्सया ॥ ५-१०६-१५ (३५५३२)
स दृष्ट्वा शिरसा भक्तं ध्रियमाणं महर्षिणा ।
तिष्ठता वायुभक्षेण विश्वामित्रेण धीमता ॥ ५-१०६-१६ (३५५३३)

प्रतिगृह्य ततो धर्मस्तथैवोष्णं तथा नवम् ।
भुक्त्वा प्रीतोस्मि विप्रर्षे तमुक्त्वा स मुनिर्गतः ॥ ५-१०६-१७ (३५५३४)
क्षत्रभावादपगतो ब्राह्मणत्वमुपागतः ।
धर्मस्य वचनात्प्रीतो विश्वामित्रस्तथाऽभवत् ॥ ५-१०६-१८ (३५५३५)
विश्वामित्रस्तु शिष्यस्य गालवस्य तपस्विनः ।
शुश्रूषया च भक्त्या च प्रीतिमानित्युवाच ह ॥ ५-१०६-१९ (३५५३६)
अनुज्ञातो मया वत्स यथेष्टं गच्छ गवालव ।
इत्युक्तः प्रत्युवाचेदं गालवो मुनिसत्तमम् ॥ ५-१०६-२० (३५५३७)
प्रीतो मधुरया वाचा विश्वामित्रं महाद्युतिम् ।
दक्षिणाः काः प्रयच्छामि भवते गुरुकर्मणि ॥ ५-१०६-२१ (३५५३८)
दक्षिणाभिरुपेतं हि कर्म सिद्ध्यति मानद ।
दक्षिणानां हि दाता वै अपवर्गेण युज्यते ॥ ५-१०६-२२ (३५५३९)
स्वर्गे क्रतुफलं तद्धि दक्षिणा शान्तिरुच्यते ।
किमाहरामि गुर्वर्थं ब्रवीतु भगवानिति ॥ ५-१०६-२३ (३५५४०)
स जानानस्तु भगवान्खिन्नं शुश्रूषणेन वै ।
विश्वामित्रस्तमसकृद्गच्छ गच्छेत्यचोदयत् ॥ ५-१०६-२४ (३५५४१)
असकृद्गच्छगच्छेति विश्वामित्रेण भाषितः ।
किं ददानीति बहुशो गालवः प्रत्यभाषत ॥ ५-१०६-२५ (३५५४२)
निर्बन्धतस्तु बहुशो गालवस्य तपस्विनः ।
किंचिदागतसंरम्भो विश्वामित्रोऽब्रवीदिदम् ॥ ५-१०६-२६ (३५५४३)
एकतःश्यामकर्णानां हयानां चन्द्रवर्चसाम् ।
अष्टौ शतानि मे देहि गच्छ गालव मा चिरम् ॥ ॥ ५-१०६-२७ (३५५४४)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
षडधिकशततमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-१०६-१ परार्थे परस्वनिमित्तम् ॥
५-१०६-५ सुहृत् प्रत्युपकारमनपेक्ष्य उपकर्ता ॥
५-१०६-६ श्रोतव्यं श्रोतुं युक्तम् । निर्बन्धः सत्यपि बलवद्बाधके
तत्रैवाग्रहः ॥
५-१०६-१० न प्रत्यपालयत् अन्नसिद्धिपर्यन्तं न प्रतीक्षितवान् ॥
५-१०६-११ तेन वसिष्ठेन । उपागमत् वसिष्ठसमीपम् ॥
५-१०६-१३ मूर्ध्नी बाहुभ्यां च परिगृह्य । अभ्याशे समीपे आश्रमस्य ॥
५-१०६-१४ गौरवात् गुरुत्वात् । बहुमानात् लोकपूज्यत्वात् । हार्देन प्रीत्या ॥
५-१०६-१९ शुश्रूषया सेवया । भक्त्या आराध्यत्वज्ञानेन ॥

५-१०६-२१ गुरुकर्मणि ब्रह्मचर्यव्रतसमाप्तौ सत्याम् ॥
५-१०६-२२ अपवर्गेण फलप्राप्त्या ॥
५-१०६-२३ क्रतुफलं दक्षिणाप्रद एव प्राप्नोति । शान्तिः
सर्वोपद्रवहारिणी ॥
५-१०६-२७ श्यामो हरितः । एकतः बहिःप्रदेशे एव श्यामाः कर्णा येषां
एकतःश्यामकर्णानाम् ॥

उद्योगपर्व - अध्याय १०७
॥ श्रीः ॥
५.१०७. अध्यायः १०७

Mahabharata - Udyoga Parva - Chapter Topics
विश्वामित्रोक्तलक्षणाश्वाधिगमोपायापरिज्ञानेन शोचता गालवेन
स्वार्थलाभाय श्रीविष्णूपासनम् ॥ १ ॥
सुहृदा गरुडेन गालवमुपगम्य स्वेन तस्याभिमतदेशप्राणकथनम् ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१०७-० (३५५४५)
नारद उवच । ५-१०७-०क्ष् (३७१३)
एवमुक्तस्तदा तेन विश्वामित्रेण धीमता ।
नास्ते न शेते नाहारं कुरुते गालवस्तदा ॥ ५-१०७-१ (३५५४६)
त्वगस्थिभूतो हरिणाश्चिन्ताशोकपरायणः ।
शोचमानोऽतिमात्रं स दह्यमानश्च मन्युना ।
गालवो दुःखितो दुःखाद्विललाप सुयोधन ॥ ५-१०७-२ (३५५४७)
कुतः पुष्टानि मित्राणि कुतोऽर्थाः सञ्चयः कृतः ।
हयानां चन्द्रशुभ्राणां शतान्यष्टौ कुतो मम ॥ ५-१०७-३ (३५५४८)
कुतो मे भोजने श्रद्धा सुखश्रद्धा कुतश्च मे ।
श्रद्धा मे जीवितस्यापि छिन्ना किं जीवितेन मे ॥ ५-१०७-४ (३५५४९)
अहं पारे समुद्रस्य पृथिव्या वा परं परात् ।
गत्वाऽऽत्मानं विमुञ्चामि किं फलं जीवितेन मे ॥ ५-१०७-५ (३५५५०)
अदनस्याकृतार्थस्य त्यक्तस्य विविधैः फलैः ।
ऋणं धारयमाणस्य कुतः सुखमनीहया ॥ ५-१०७-६ (३५५५१)
सुहृदां हि धनं भुक्त्वा कृत्वा प्रणयमीप्सितम् ।
प्रतिकर्तुमशक्तस्य जीवितान्मरणं वरम् ॥ ५-१०७-७ (३५५५२)
प्रतिश्रुत्य करिष्येति कर्तव्यं तदकुर्वतः ।
मिथ्यावचनदग्धस्य इष्टापूर्तं प्रणश्यति ॥ ५-१०७-८ (३५५५३)

न रूपमनृतस्यास्ति नानृतस्यास्ति सन्ततिः ।
नानृतस्याधिपत्यं च कुत एव गतिः शुभा ॥ ५-१०७-९ (३५५५४)
कुतः कृतघ्नस्य यशः कुतः स्थानं कुतः सुखम् ।
अश्रद्धेयः कृतघ्नो हि कृतघ्ने नास्ति निष्कृतिः ॥ ५-१०७-१० (३५५५५)
न जीवत्यधनः पापः कुतः पापस्य तन्त्रणम् ।
पापो ध्रुवमवाप्नोति विनाशं नाशयन्कृतम् ॥ ५-१०७-११ (३५५५६)
सोऽहं पापः कृतघ्नस्य कृपणश्चानृतोऽपि च ।
गुरोर्यः कृतकार्यः संस्तत्करोमि न भाषितम् ॥ ५-१०७-१२ (३५५५७)
सोऽहं प्राणान्विमोक्ष्यामि कृत्वा यत्नमनुत्तमम् ।
अर्थिता न मया काचित्कृतपूर्वा दिवौकसाम् ॥ ५-१०७-१३ (३५५५८)
मानयन्ति च मां सर्वे त्रिदशा यज्ञसंस्तरे ।
अहं तु विबुधश्रेष्ठं देवं त्रिभुवनेश्वरम् ।
विष्णुं गच्छाम्यहं कृष्णं गतिं गतिमतां वरम् ॥ ५-१०७-१४ (३५५५९)
भोगा यस्मात्प्रतिष्ठन्ते व्याप्य सर्वान्सुरासुरान् ।
प्रणतो द्रष्टुमिच्छामि कृष्णं योगिनमव्ययम् ॥ ५-१०७-१५ (३५५६०)
एवमुक्ते सखा तस्य गरुडो विनतात्मजः ।
दर्शयामास तं प्राह संहृष्टः प्रियकाम्यया ॥ ५-१०७-१६ (३५५६१)
सहृज्ज्ञवान्मम मतः सुहृदां च मतः सुहृत् ।
ईप्सितेनाभिलाषेण योक्तव्यो विभवे सति ॥ ५-१०७-१७ (३५५६२)
विभवश्चास्ति मे विप्र वासवावरजो द्विज ।
पूर्वमुक्तस्त्वदर्थं च कृतः कामश्च तेन मे ॥ ५-१०७-१८ (३५५६३)
५-१०७-१९ (३५५६४)
स भवानेतु गच्छाव नयिष्ये त्वां यथासुखम् ।
देशं पारं पृथिव्या वा गच्छ गालव मा चिरम् ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-१०७-५ परं परात् दूरादपि दूरम् । आत्मानं देहम् । ५-१०७-६ अनीहया अनुद्यमेन ॥
५-१०७-७ ईप्सितं दास्यामीति विश्वासमुत्पाद्य ॥
५-१०७-८ करिष्येतीति संधिरार्षः ॥
५-१०७-९ अनृतस्य सत्यहीनस्य ॥
५-१०७-११ तन्त्रणं कुटुम्बधारणम् ॥
५-१०७-१४ अत्राहमितिपदस्य द्विरावृत्तिर्वक्तुर्वैक्लव्याददोषः ॥

उद्योगपर्व - अध्याय १०८
॥ श्रीः ॥

Mahabharata - Udyoga Parva - Chapter Topics

गालवंप्रति गरुडेन स्वेन तस्य पूर्वादिदिक्प्रापणकथनपूर्वकं
पूर्वदिग्गुणवर्णनम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१०८-० (३५५६५)
सुपर्ण उवाच। ५-१०८-०क्ष् (३७१४)
अनुशिष्टोऽस्मि देवेन गालव ज्ञानयोनिना ।
ब्रूहि कामं तु कां यामि द्रष्टुं प्रथममो दिशम् ॥ ५-१०८-१ (३५५६६)
पूर्वां वा दक्षिणां वाहमथवा पश्चिमां दिशम् ।
उत्तरां वा द्विजश्रेष्ठ कुतो गच्छामि गालव ॥ ५-१०८-२ (३५५६७)
यस्यामुदयते पूर्वं सर्वलोकप्रभावनः ।
सविता यत्र सन्ध्यायां साध्यानां वर्तते तपः ॥ ५-१०८-३ (३५५६८)
यस्यां पूर्वं मतिर्जाता यया व्याप्तमिदं जगत् ।
चक्षुषी यत्र धर्मस्य यत्र चैष प्रतिष्ठितः ॥ ५-१०८-४ (३५५६९)
कृतं यतो हुतं हव्यं सर्पते सर्वतोदिशम् ॥
एतद्द्वारं द्विजश्रेष्ठ दिवसस्य तथाऽध्वनः ॥ ५-१०८-५ (३५५७०)
अत्र पूर्वं प्रसूता वै दाक्षायण्यः प्रजाः स्त्रियः ।
यस्यां दिशि प्रवृद्धाश्च कश्यपस्यात्मसंभवाः ॥ ५-१०८-६ (३५५७१)
अदोमूला सुराणां श्रीर्यत्र शक्रोऽभ्यषिच्यत ।
सुरराज्येन विप्रर्षे देवैश्चात्र तपश्चितम् ॥ ५-१०८-७ (३५५७२)
एतस्मात्कारणाद्ब्रह्मन्पूर्वेत्येषा दिगुच्यते ।
यस्मात्पूर्वतरे काले पूर्वमेवावृतासुरैः ॥ ५-१०८-८ (३५५७३)
अत एव च सर्वेषां पूर्वामाशां प्रचक्षते ।
पूर्वं सर्वाणि कार्याणि दैवानि सुखमीप्सता ॥ ५-१०८-९ (३५५७४)
अत्र वेदाञ्जगौ पूर्वं भगवाँल्लोकभावनः ।
अत्रैवोक्ता सवित्रासीत्सावित्री ब्रह्मवादिषु ॥ ५-१०८-१० (३५५७५)
अत्र दत्तानि सूर्येण यजूंषि द्विजसत्तम ।
अत्र लब्धवरः सोमः सुरैः क्रतुषु पीयते ॥ ५-१०८-११ (३५५७६)
अत्र तृप्ता हुतवहाः स्वां योनिमुपभुञ्जते ।
अत्र पातालमाश्रित्य वरुणः श्रियमाप च ॥ ५-१०८-१२ (३५५७७)
अत्र पूर्वं वसिष्ठस्य पौराणस्य द्विजर्षभ ।
सूतिश्चैव प्रतिष्ठा च निधनं च प्रकाशते ॥ ५-१०८-१३ (३५५७८)

ओङ्कारस्यात्र जायन्ते सृतयो दशतीर्दश ।
पिबन्ति मुनयो यत्र हविर्धूमं स्म धूमपाः ॥ ५-१०८-१४ (३५५७९)
प्रोक्षिता यत्र बहवो वराहाद्या मृगा वने ।
शक्रेण यज्ञभागार्थे दैवतेषु प्रकल्पिताः ॥ ५-१०८-१५ (३५५८०)
अत्राहिताः कृतघ्नाश्च मानुषाश्चासुराश्च ये ।
उदयंस्तान्हि सर्वान्वै क्रोधाद्धन्ति विभावसुः ॥ ५-१०८-१६ (३५५८१)
एतद्द्वारं त्रिलोकस्य स्वर्गस्य च सुखस्य च ।
एष पूर्वो दिशां भागो विशावोऽत्र यदीच्छसि ॥ ५-१०८-१७ (३५५८२)
प्रियं कार्यं हि मे तस्य यस्यास्मि वचने स्थितः ।
ब्रूहि गालव यास्यामि शृणु चाप्यपरां दिशम् ॥ ॥ ५-१०८-१८ (३५५८३)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
अष्टाधिकशततमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-१०८-४ गतिर्बुद्धिः जाता प्राप्ता । चक्षुषी आज्यभागाख्ये
अग्नीषोमदैवत्ये। धर्मस्य यज्ञस्य ॥
५-१०८-६ दाक्षायण्यः अदित्यादयः । प्रजाः लोकान् ॥
५-१०८-९ पूर्वं पूर्वसंस्थानि । सुखमीप्सता सुखाद्यर्थिना ॥
५-१०८-११ यजूंषि दत्तानि याज्ञवल्क्यायेति शेषः ॥
५-१०८-१२ स्वां योनिं सोमाज्यपयआदिरूपं जलम् ॥
५-१०८-१३ पूर्वं मित्रावरुणयोर्यज्ञकाले । पौराणस्य पुराणस्य स्वार्थे
तद्धितः । निधनं निमिशापात् ॥
५-१०८-१४ दशशतीशब्दस्य पृषोदरादिशकारलोपेन दशतीशब्दः
सहस्रवाची । दशतीरित्यत्र वाछन्दसीति पूर्वसवर्णः। सृतयो
मार्गाः ॥
५-१०८-१६ तान् हन्ति तेषामायुरल्पीकरोतीत्यर्थः ॥

उद्योगपर्व - अध्याय १०९
॥ श्रीः ॥
५.१०९. अध्यायः १०९

Mahabharata - Udyoga Parva - Chapter Topics
गरुडेन गालवंप्रति दक्षिणदिग्गुणवर्णनम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१०९-० (३५५८४)
सुपर्ण उवाच। ५-१०९-०क्ष् (३७१५)
इयं विवस्वदा पूर्वं श्रौतेन विधिना किल ।
गुरवे दक्षिणा दत्ता दक्षिणेत्युच्यते च दिक् ॥ ५-१०९-१ (३५५८५)
अत्र लोकत्रयस्यास्य पितृपक्षः प्रतिष्ठितः ।
अत्रोष्मपाणां देवानां निवासः श्रूयते द्विज ॥ ५-१०९-२ (३५५८६)
अत्र विश्वे सदा देवाः पितृभिः सार्धमासते ।
इज्यमानाः स्म लोकेषु संप्राप्तास्तुल्यभागताम् ॥ ५-१०९-३ (३५५८७)
एतद्द्वितीयं देवस्य द्वारमाचक्षते द्विज ।
त्रुटिशो लवशश्चापि गण्यते कालनिश्चयः ॥ ५-१०९-४ (३५५८८)
अत्र देवर्षयो नित्यं पितृलोकर्षयस्तथा ।
तथा राजर्षयः सर्वे निवसन्ति गतव्यथाः ॥ ५-१०९-५ (३५५८९)
अत्र धर्मश्च सत्यं च कर्म चात्र निगद्यते ।
गतिरेषा द्विजश्रेष्ठ कर्मणामवसायिनाम् ॥ ५-१०९-६ (३५५९०)
एषा दिक्सा द्विजश्रेष्ठ यां सर्वः प्रतिपद्यते ।
वृता त्वनवबोधेन सुखं तेन न गम्यते ॥ ५-१०९-७ (३५५९१)
नैर्ऋतानां सहस्रामि बहून्यत्र द्विजर्षभ ।
सृष्टानि प्रतिकूलानि द्रष्टव्यान्यकृतात्मभिः ॥ ५-१०९-८ (३५५९२)
अत्र मन्दरकुञ्जेषु विप्रर्षिसदनेषु च ।
गायन्ति गाथा गन्धर्वाश्चित्तबुद्धिहरा द्विज ॥ ५-१०९-९ (३५५९३)
अत्र सामानि गाथाभिः श्रुत्वा गीतानि रैवतः ।
गतदारो गतामात्यो गतराज्यो वनं गतः ॥ ५-१०९-१० (३५५९४)
अत्र सावर्मिना चैव यवक्रीतात्मजेन च ।
मर्यादा स्थापिता ब्रह्मन्यां सूर्यो नातिवर्तते ॥ ५-१०९-११ (३५५९५)
अत्र राक्षसराजेन पौलस्त्येन महात्मना ।
रावणेन तपः कृत्वा सुरेभ्योऽमरता वृता ॥ ५-१०९-१२ (३५५९६)
अत्र वृत्तेन वृत्रोऽपि शक्रशत्रुत्वमेयिवान् ।
अत्र सर्वासवः प्राप्ताः पुनर्गच्छन्ति पञ्चधा ॥ ५-१०९-१३ (३५५९७)
अत्र दुष्कृतकर्माणो नराः पच्यन्ति गालव ।
अत्र वैतरणी नाम नदी वैतरणैर्वृता ॥ ५-१०९-१४ (३५५९८)
अत्र गत्वा सुखस्यान्तं दुःखस्यान्तं प्रपद्यते ।
अत्रावृत्तो दिनकरः सुरसं क्षरते पयः ॥ ५-१०९-१५ (३५५९९)
काष्ठां चासाद्य वासिष्ठीं हिममुत्सृजते पुनः ।
अत्राहं गालव पुरा क्षुधाऽऽर्तः परिचिन्तयन् ॥ ५-१०९-१६ (३५६००)
लब्धवान्युध्यमानौ द्वौ बृहन्तौ गजकच्छपौ ।

अत्र चक्रधनुर्नाम सूर्याज्जातो महानृषिः ॥ ५-१०९-१७ (३५६०१)
विदुर्यं कपिलं देवं येनार्ताः सगरात्मजाः ।
अत्र सिद्धाः शिवा नाम ब्राह्मणा वेदपारगाः ॥ ५-१०९-१८ (३५६०२)
अधीत्य सकलान्वेदाँल्लेभिरे मोक्षमक्षयम् ।
अत्र भोगवती नाम पुरी वासुकिपालिता ॥ ५-१०९-१९ (३५६०३)
तक्षकेण च नागेन तथैवैरावतेन च ।
अत्र निर्याणकालेऽपि तमः संप्राप्यते महत् ॥ ५-१०९-२० (३५६०४)
अभेद्यं भास्करेणापि स्वयं वा कृष्णवर्त्मना ।
एष तस्यापि ते मार्गः परिचारस्य गालव ।
ब्रूहि मे यदि गन्तव्यं प्रतीचीं शृणु चापराम् ॥ ॥ ५-१०९-२१ (३५६०५)

इति श्रीमन्महाभरते उद्योगपर्वणि भगवद्यानपर्वणि
नवाधिकशततमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-१०९-२ ऊष्मपाणां उष्णान्नभोजिनाम् ॥
५-१०९-३ विश्वे त्रयोदशमितो गणः ॥
५-१०९-४ द्वितीयं देवस्य धर्मस्य द्वारम् ॥
५-१०९-११ सावर्णिना अनुना । मर्यादा सूर्यरथस्य ॥
५-१०९-१३ सर्वासवः सर्वेषां प्राणा अत्र प्राप्ताः सन्तः पुनः पञ्चधा
गच्छन्ति देहं प्राप्नुवन्ति । प्राणापानादिभेदेनेत्यर्थः ॥
५-१०९-१४ वैतरणैः वैतरणीनदीसंज्ञकनरकाहैः ॥
५-१०९-१५ सुखस्यान्तं नरकम् । दुःखस्यान्तं स्वर्गसुखम् । आवृत्तः
कर्कायनगतः । तदाहि वृष्टिर्भवति ॥
५-१०९-१६ वासिष्ठीं काष्ठां उदीचीं
वसिष्ठोपलक्षितसप्तर्षिभिरधिष्ठिताम् ॥
५-१०९-२० निर्याणकाले मरणकाले । तमः आन्ध्यम् ॥
५-१०९-२१ तस्य ते तव परिचारस्य अन्वेषणस्य ॥

उद्योगपर्व - अध्याय ११०
॥ श्रीः ॥
५.११०. अध्यायः ११०

Mahabharata - Udyoga Parva - Chapter Topics
गरुडेन गालवंप्रति पश्चिमदिग्गुणवर्णनम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-११०-० (३५६०६)
सुपर्ण उवाच। ५-११०-०क्ष् (३७१६)
इयं दिग्दयिता राज्ञो वरुणस्य तु गोपतेः ।
सदा सलिलराजस्य प्रतिष्ठा चादिरेव च ॥ ५-११०-१ (३५६०७)
अत्र पश्चादहः सूर्यो विसर्जयति गाः स्वयम् ।
पश्चिमेत्यभिविख्याता दिगियं द्विजसत्तम ॥ ५-११०-२ (३५६०८)
यादसामत्र राज्येन सलिलस्य च गुप्तये ।
कश्यपो भगवान्देवो वरुणं स्माभ्यषेचयत् ॥ ५-११०-३ (३५६०९)
अत्र पीत्वा समस्तान्वै वरुणस्य रसांस्तु षट् ।
जायते तरुणः सोमः शुक्लस्यादौ तमिस्रहा ॥ ५-११०-४ (३५६१०)
अत्र पञ्चात्कृता दैत्या वायुना संयतास्तदा ।
निश्वसन्तो महावातैरर्दिताः सुषुपुर्द्विज ॥ ५-११०-५ (३५६११)
अत्र सूर्यं प्रणयिनं प्रतिगृह्णाति पर्वतः ।
अस्तो नाम यतः सन्ध्या पश्चिमा प्रतिसर्यति ॥ ५-११०-६ (३५६१२)
अतो रात्रिश्च निद्रा च निर्गता दिवसक्षये ।
जायते जीवलोकस्य हर्तुमर्धमिवायुषः ॥ ५-११०-७ (३५६१३)
अत्र देवीं दितिं सुप्तामात्मप्रसवधारिणीम् ।
विगर्भामकरोच्छक्रो यत्र जातो मरुद्गणः ॥ ५-११०-८ (३५६१४)
अत्र मूलं हिमवतो मन्दरं याति शाश्वतम् ।
अपि वर्षसहस्रेण न चास्यान्तोऽधिगम्यते ॥ ५-११०-९ (३५६१५)
अत्र काञ्चनशैलस्य काञ्चनाम्बुरुहस्य च ।
उदधेस्तीरमासाद्य सुरभिः क्षरते पयः ॥ ५-११०-१० (३५६१६)
अत्र मध्ये समुद्रस्य कबन्धः प्रतिदृश्यते ।
स्वर्भानोः सूर्यकल्पस्य सोमसूर्यौ जिघांसतः ॥ ५-११०-११ (३५६१७)
सुवर्णशिरसोऽप्यत्र हरिरोम्णः प्रगायतः ।
अदृश्यस्याप्रमेयस्य श्रूयते विपुलो ध्वनिः ॥ ५-११०-१२ (३५६१८)
अत्र ध्वजवती नाम कुमारी हरिमेधसः ।
आकाशे तिष्ठतिष्ठेति तस्थौ सूर्यस्य शासनात् ॥ ५-११०-१३ (३५६१९)
अत्र वायुस्तथा वह्निरापः खं चापि गालव ।
आह्निकं चैव नैशं च दुःखं स्पर्शं विमुञ्चति ॥ ५-११०-१४ (३५६२०)
अतःप्रभृति सूर्यस्य तिर्यगावर्तते गतिः ।
अत्र ज्योतींषि सर्वाणि विशन्त्यादित्यमण्डलम् ॥ ५-११०-१५ (३५६२१)
अष्टाविंशतिरात्रं च क्रम्य सह भानुना ।
निष्पतन्ति पुनः सूर्यात्सोमसंयोगयोगतः ॥ ५-११०-१६ (३५६२२)
अत्र नित्यं स्रवन्तीनां प्रभवः सागरोदयः ।

अत्र लोकत्रयस्यापस्तिष्ठन्ति वरुणालये ॥ ५-११०-१७ (३५६२३)
अत्र पन्नगराजस्याप्यनन्तस्य निवेशनम् ।
अनादिनिधनस्यात्र विष्णोः स्थानमनुत्तमम् ॥ ५-११०-१८ (३५६२४)
अत्रानलसखस्यापि पवनस्य निवेशनम् ।
महर्षेः कश्यपस्यात्र मारीचस्य निवेशनम् ॥ ५-११०-१९ (३५६२५)
एष ते पश्चिमो मार्गो दिग्द्वारेण प्रकीर्तितः ।
ब्रूहि गालव गच्छावो बुद्धिः का द्विजसत्तम ॥ ॥ ५-११०-२० (३५६२६)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
दशाधिकशततमोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-११०-१ गोपतेः दिक्पालस्य ॥
५-११०-२ अह्नः पश्चाद्भागे गाः रश्मीन् विसर्जयति । अतएव पश्चिमा
। ५-११०-५ पश्चात्कृताः वेगेन पृष्ठतः कृताः ॥
५-११०-९ मन्दरं समुद्रे मग्नम् । एतेन हिमवन्मूलस्य समुद्रजलस्य
चाप्रमेयत्वमुक्तम् ॥
५-११०-१० काञ्चनमयानि अम्बुरुहाणि यत्र तस्य उदधेः समुद्रतुल्यस्य
सरसः ॥
५-११०-१२ सुवर्णशिरसो मुनेः । हरिरोम्णः अपलितस्य
नित्यतरुणस्येत्यर्थः ॥
५-११०-१३ हरिमेधसो मुनेः कुमरी । तिष्ठतिष्ठति सूर्यस्य शासनात् ॥
५-११०-१४ वाय्वादयोऽत्र दुःखदं शीतोष्णस्पर्शं विमुञ्चन्ति । सदा
सुखसंस्पर्शा एवेत्यर्थः ॥
५-११०-१६ सोमसंयोगयोगतः सोमसंयोगसदृशाद्योगात् ॥
५-११०-१७ स्रवन्तीनां नदीनाम् । सागरस्य उदयः पूर्तिर्येन तादृशः
प्रभवः ॥
५-११०-२० दिगद्वारेण संक्षेपप्रकारेण ॥

उद्योगपर्व - अध्याय १११
॥ श्रीः ॥
५.१११. अध्यायः १११

Mahabharata - Udyoga Parva - Chapter Topics
गरुडेन गालवंप्रति उत्तरदिगनुवर्णनपूर्वकं अभिमतदिगभिगमनाय
स्वपृष्ठाधिरोहणविधानम् ॥ १ ॥

५-१११-० (३५६२७)
सपर्ण उवाच। ५-१११-०क्ष् (३७१७)
यस्मादुत्तार्यते पापाद्यस्मान्निश्रेयसोऽश्नुते ।
अस्मादुत्तारणबलादुत्तरेत्युच्यते द्विज ॥ १ ॥ ५-१११-१ (३५६२८)
उत्तरस्य हिरण्यस्य परिवापस्य गालव ।
मार्गः पश्चिमपूर्वाभ्यां दिग्भ्यां वै मध्यमः स्मृतः ॥ ५-१११-२ (३५६२९)
अस्यां दिशि वरिष्ठायामुत्तरायां द्विजर्षभ ।
नासौम्यो नाविधेयात्मा नाधर्मो वसते जनः ॥ ५-१११-३ (३५६३०)
अत्र नारायणः कृष्णो जिष्णुश्चैव नरोत्तमः ।
बदर्यामाश्रमपदे तथा ब्रह्मा च शाश्वतः ॥ ५-१११-४ (३५६३१)
अत्र वै हिमवत्पृष्ठे नित्यमास्ते महेश्वरः ।
ग्प्रकृत्या पुरुषः सार्धं युगान्ताग्निसमप्रभः ॥ ५-१११-५ (३५६३२)
न स दृश्यो मुनिगणैस्तथा देवैः सवासवैः ।
गन्धर्वयक्षसिद्धैर्वा नरनारायणादृते ॥ ५-१११-६ (३५६३३)
अत्र विष्णुः सहस्राक्षः सहस्रचरणोऽव्ययः ।
सहस्रशिरसः श्रीमानेकः पश्यति माययाः ॥ ५-१११-७ (३५६३४)
अत्र राज्येन विप्राणां चन्द्रमाश्चाभ्यषिच्यत ।
अत्र गङ्गां महादेवः पतन्तीं गगनाच्च्युताम् ॥ ५-१११-८ (३५६३५)
प्रतिगृह्य ददौ लोके मानुषे ब्रह्मवित्तम ।
अत्र देव्या तपस्तप्तं महेश्वरपरीप्सया ॥ ५-१११-९ (३५६३६)
अत्र कामश्च रोषश्च शैलश्चोमा च संबभुः ।
अत्र राक्षसयक्षाणां गन्धर्वाणां च गालव ॥ ५-१११-१० (३५६३७)
आधिपत्येन कैलासे धनदोऽप्यभिषेचितः ।
अत्र चैत्ररथं रम्यमत्र वैखानसाश्रमः ॥ ५-१११-११ (३५६३८)
अत्र मन्दाकिनी चैव मन्दरश्च द्विजर्षभ ।
अत्र सौगन्धिकवनं नैर्ऋतैरभिरक्ष्यते ॥ ५-१११-१२ (३५६३९)
शाद्वलं कदलीस्कन्धमत्र सन्तानका नगाः ।
अत्र संयमनित्यानां सिद्धानां स्वैरचारिणाम् ॥ ५-१११-१३ (३५६४०)
विमानान्युनुरूपाणि कामभोग्यानि गालव ।
अत्र ते ऋषयः सप्त देवी चारुन्धती तथा ॥ ५-१११-१४ (३५६४१)
अत्र तिष्ठति वै रात्रिन्दिवाप्यत्रावतिष्ठते ।
अत्र यज्ञं समासाद्य ध्रुवं स्थाता पितामहः ॥ ५-१११-१५ (३५६४२)
ज्योतींषि चन्द्रसूर्यौ च परिवर्तन्ति नित्यशः ।
अत्र गङ्गामहाद्वारं रक्षन्ति द्विजसत्तम ॥ ५-१११-१६ (३५६४३)

धामा नाम महात्मानो मुनयः सत्यवादिनः ।
न तेषां ज्ञायते मूर्तिर्नाकृतिर्न तपश्चितम् ॥ ५-१११-१७ (३५६४४)
परिवर्तसहस्रामि कामभोज्याननि गालव ।
यथायथा प्रविशति तस्मात्परतरं नरः । ५-१११-१८ (३५६४५)
तथातथा द्विजश्रेष्ठ प्रविलीयति गालव ।
नैतत्केनचिदन्येन गतपूर्वं द्विजर्षभ ॥ ५-१११-१९ (३५६४६)
ऋते नारायणं देवं नरं वा जिष्णुमव्ययम् ।
अत्र कैलासमित्युक्तं स्थानमैलविलस्य तत् ॥ ५-१११-२० (३५६४७)
अत्र विद्युत्प्रभा नाम जज्ञिरेऽप्सरसो दश ।
अत्र विष्णुपदं नाम क्रमता विष्णुना कृतम् ॥ ५-१११-२१ (३५६४८)
त्रिलोकविक्रमे ब्रह्मन्नुत्तरां दिशमाश्रितम् ।
अत्र राज्ञा मरुतेन यज्ञेनेष्टं द्विजोत्तम ॥ ५-१११-२२ (३५६४९)
उशीरबीजे विप्रर्षे यत्र जाम्बूनदं सरः ।
जीमूतस्यात्र विप्रर्षेरुपतस्थे महात्मनः ॥ ५-१११-२३ (३५६५०)
साक्षाद्धिमवतः पुण्यो विमलः कनकाकरः ।
ब्राह्मणेषु च यत्कृत्स्नं स्वन्तं कृत्वा धनं महत् ॥ ५-१११-२४ (३५६५१)
वव्रे धनं महर्षिः स जैमूतं तद्धनं ततः ।
अत्र नित्यं दिशांपालाः सायंप्रातर्द्विजर्षभ ॥ ५-१११-२५ (३५६५२)
कस्य कार्यं किमिति वै परिक्रोशान्ति गालव ।
एवमेषा द्विजश्रेष्ठ गुणैरन्यैर्दिगुत्तरा ॥ ५-१११-२६ (३५६५३)
उत्तरेति परिख्याता सर्वकर्मस्तु चोत्तरा ।
एता विस्तरशस्तात तव शङ्गीर्तिता दिशः ॥ ५-१११-२७ (३५६५४)
चतस्रः क्रमयोगेन कामाशां गन्तुमिच्छसि ।
उद्यतोऽहं द्विजश्रेष्ठ तव दर्शयितुं दिशः ।
पृथिवीं चाखिलां ब्रह्मंस्तस्मादारोह मां द्विज ॥ ॥ ५-१११-२८ (३५६५५)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
एकादशाधिकशततमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-१११-१ यस्मादिति । उत्तरेण पथा गतानां हि पापनाशः
स्वर्गप्राप्तेश्च भवतीति योगाद्धुत्तरा उत्कृष्टतरा इयं दिगित्यर्थः
॥
५-१११-२ परिवापस्य स्थानस्य । दिग्नन्यामुपलक्षितः ॥
५-१११-३ अविधेयात्मा अजितचित्तः ॥
५-१११-५ प्रकृत्या पुरुषस्सार्धं इत्यारभ्य एकः पश्यति मायया

इति पर्यन्तिं सार्धश्लोकद्वयं दाक्षिणात्येषु बहुषु कोशेषु न
दृश्यते । झो पुस्तक एव वर्तते । प्रकृत्या उभया ॥
५-१११-७ सहस्रशिरस इत्यकारन्तः शब्दः ॥
५-१११-१७ मूर्तिः पिण्डः । आकृतिः संस्थानविशेषः ॥
५-१११-१८ परिवर्तसहस्राणि चतुर्युगसहस्राणि । तस्मात् हिमस्थानात् ॥
५-१११-१९ प्रविलीयति हिमेन नश्यति ॥
५-१११-२० ऐलविलस्य कुबेरस्य ॥
५-१११-२३ उशीरबीजे स्थाने ॥
५-१११-२४ कनकाकरः जीमूतस्य उप समीपे तस्थे प्रकाशं गतः
। प्रकाशनस्थेयाख्ययोश्चेति तङ् ॥
५-१११-२५ वव्रे ब्राह्मणेभ्यः । मन्नामकमेतदस्त्विति ॥
५-१११-२६ उत्तरा उत्कृष्टतरा ॥

उद्योगपर्व - अध्याय ११२
॥ श्रीः ॥
५.११२. अध्यायः ११२

Mahabharata - Udyoga Parva - Chapter Topics
गरुडवेगमसहमानेन गालवेन गुरुदक्षिणानर्पणेनैव
स्वप्राणविमोक्षणशङ्कया परिशोचनम् ॥ १ ॥
गरुडेन गालवंप्रति प्रागेवाभिमतानिवेदनेन अकौशलाभिलपनपूर्वकं
ऋषभाचले विश्रम्य पुनर्निवर्तनकीर्तनम् ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-११२-० (३५६५६)
गालव उवाच । ५-११२-०क्ष् (३७१८)
गरुत्मन्भुजगेन्द्रारे सुपर्ण विनतात्मज ।
नय मां तार्क्ष्य पूर्वेण यत्र धर्मस्य चक्षुषी ॥ ५-११२-१ (३५६५७)
पूर्वमेतां दिशं गच्छ या पूर्वं परिकीर्तिता ।
देवतानां हि सान्निध्यमत्र कीर्तितवानसि ॥ ५-११२-२ (३५६५८)
अत्र सत्यं च धर्मश्च त्वया सम्यक्प्रकीर्तितः ।
इच्छेयं तु समागन्तुं समस्तैर्दैवतैरहम् ।
भूयश्च तान्सुरान्द्रष्टुमिच्छेयमरुणानुज ॥ ५-११२-३ (३५६५९)
नारद उवाच । ५-११२-४क्ष् (३७१९)
तमाह विनतासूनुरारोहस्वेति वै द्विजम् ।
आरुरोहाथ स मुनिर्गरुडं गालवस्तदा ॥ ५-११२-४ (३५६६०)

गालव उवाच। ५-११२-५क्ष् (३७२०)
क्रममाणस्य ते रूपं दृश्यते पन्नगाशन ।
भास्करस्येव पूर्वाह्णे सहस्रांशोर्विवस्वतः ॥ ५-११२-५ (३५६६१)
पक्षवातप्रणुन्नानां वृक्षाणामनुगामिनाम् ।
प्रस्थितानामिव समं पश्यामीह गतिं खग ॥ ५-११२-६ (३५६६२)
ससागरवनामुर्वी सशैलवनकाननाम् ।
आकर्षन्निव चाभासि पक्षवातेन खेचर ॥ ५-११२-७ (३५६६३)
समीननागनक्रं च खमिवारोप्यते जलम् ।
वायुना चैव महता पक्षवातेन चानिशम् ॥ ५-११२-८ (३५६६४)
तुल्यरूपाननान्मत्स्यांस्तथा तिमितिमिङ्गिलान् ।
नागाश्वनरवक्त्रांश्च पश्याम्युन्मथितानिव ॥ ५-११२-९ (३५६६५)
महार्णवस्य च रवैः श्रोत्रे मे बधिरे कृते ।
न शृणोमि न पश्यामि नात्मनो वेद्मि कारणम् ॥ ५-११२-१० (३५६६६)
शनैः स तु भवात्यातु ब्रह्मवध्यामनुस्मरन् ।
न दृश्यते रविस्तात न दिशो न च खं खग ॥ ५-११२-११ (३५६६७)
तम एव तु पश्यामि शरीरं ते न लक्षये ।
मणी व जात्यौ पश्यामि चक्षुषी तेऽहमण्डज ॥ ५-११२-१२ (३५६६८)
शरीरं तु न पश्यामि तव चैवात्मनश्च ह ।
पदेपदे तु पश्यामि शरीरादग्निमुत्थितम् ॥ ५-११२-१३ (३५६६९)
स मे निर्वाप्य सहसा चक्षुषी शाम्यते पुनः ।
तन्नियच्छ महावेगं गमने विनतात्मज ॥ ५-११२-१४ (३५६७०)
न मे प्रयोजनं किंचिद्गमने पन्नगाशन ।
संनिवर्त महाभाग न वेगं विषहामि ते ॥ ५-११२-१५ (३५६७१)
गुरवे संश्रुतानीह शतान्यष्टौ हि वाजिनाम् ।
एकतःश्यामकर्णानां शुभ्राणां चन्द्रवर्चसाम् ॥ ५-११२-१६ (३५६७२)
तेषां चैवापवर्गाय मार्गं पश्यामि नाण्डज ।
ततोऽयं जीवितत्यागे दृष्टो मार्गोमयाऽऽत्मनः ॥ ५-११२-१७ (३५६७३)
नैव मेऽस्ति धनं किंचिन्न धनेनान्वितः सुहृत् ।
न चार्थेनापि महता शक्यमेतद्व्यपोहितुम् ॥ ५-११२-१८ (३५६७४)
नारद उवाच। ५-११२-१९क्ष् (३७२१)
एवं बहु च दीनं च ब्रुवाणं गालवं तदा ।
प्रत्युवाच व्रजन्नेव प्रहसन्विनतात्मजः ॥ ५-११२-१९ (३५६७५)
नातिप्रज्ञोऽसि विप्रर्षे योत्मानं त्युक्तुमिच्छसि ।
न चापि कृत्रिमः कालः कालो हि परमेश्वरः ॥ ५-११२-२० (३५६७६)
किमहं पूर्वमेवेह भवता नाभिचोदितः ।
उपायोऽत्र महानस्ति येनैतदुपपद्यते ॥ ५-११२-२१ (३५६७७)

तदेष ऋषभो नाम पर्वतः सागरान्तिके ।
अत्र विश्रम्य भुक्त्वा च निवर्तिष्याव गालव ॥ ॥ ५-११२-२२ (३५६७८)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
द्वादशाधिकशततमोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-११२-१२ मणी वेति इवार्थे वशब्दः ॥
५-११२-१४ निर्वाप्य मन्दीकृत्य ॥
५-११२-१५ संनिवर्त निवर्तस्व ॥
५-११२-२० योत्मानं संधिरार्षः । कृत्रिमः स्वेच्छासंपाद्यः । कालो
मृत्युः ॥

उद्योगपर्व - अध्याय ११३
॥ श्रीः ॥
५.११३. अध्यायः ११३

Mahabharata - Udyoga Parva - Chapter Topics
ऋषभगिरिश्रृङ्गमुपगतयोः गरुडगालवयोः तत्र
शाण्डिलीनामकब्राह्मणीदर्शनम् ॥ १ ॥
तद्दत्तान्नमुपभुज्य विश्रमाय तत्र शयनम् ॥ २ ॥
सुप्तोत्थितं शिथिलपक्षबन्धं तार्क्ष्यमभिवीक्ष्य गालवेन तंप्रति
तत्कारणप्रश्नः ॥ ३ ॥
सुपर्णेन ब्राह्मण्याः विष्णावाद्यन्यतमसमीपप्रापणानुचिन्तनस्य
स्वानर्थप्राप्तिकारणत्वकथनपूर्वकं तांप्रति क्षमापनम् ॥ ४ ॥
तत्प्रसादाधिगतपक्षबलेन सुपर्णेन सह गच्छतो गालवस्य
मध्येमार्गं यदृच्छोपागतेन विश्वामित्रेण पुनरश्वानयनचोदनम्
॥ ५ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-११३-० (३५६७९)
नारद उवाच । ५-११३-०क्ष् (३७२२)
ऋषभस्य ततः शृङ्गं निपत्य द्विजपक्षिणौ ।
शाण्डिलीं ब्राह्मणीं तत्र ददृशो तपोन्विताम् ॥ ५-११३-१ (३५६८०)
अभिवाद्य सुपर्णस्तु गालवश्चाभिपूज्य ताम् ।
तया च स्वागतेनोक्तौ विष्टरे सन्निषीदतुः ॥ ५-११३-२ (३५६८१)

सिद्धमन्नं तया दत्तं बलिमन्त्रोपबृंहितम् ।
भुक्त्वा तृप्तावुभौ भूमौ सुप्तौ तावनुमोहितौ ॥ ५-११३-३ (३५६८२)
मुहूर्तात्प्रतिबुद्धस्तु सुपर्णो गमनेप्सया ।
ग तां दृष्ट्वा चारुसर्वाङ्गी तापसीं ब्रह्मचारिणीम् ॥ ५-११३-४ (३५६८३)
ग्रहीतुं हि मनश्चक्रे रूपात्साक्षादिव श्रियम् ।'
अथ भ्रष्टतनूजाङ्गमात्मानं ददृशे खगः ॥ ५-११३-५ (३५६८४)
मांसपिण्डोपमोऽभूत्स मुखपादान्वितः खगः ।
गालवस्तं तथा दृष्ट्वा विमनाः पर्यपृच्छत ॥ ५-११३-६ (३५६८५)
किमिदं भवता प्राप्तमिहागमनजं फलम् ।
वासोऽयमिह कालं तु कियन्तं नौ भविष्यति ॥ ५-११३-७ (३५६८६)
किं नु ते मनसा ध्यातमशुभं धर्मदूषणम् ।
न ह्ययं भवतः स्वल्पो व्यभिचारो भविष्यति ॥ ५-११३-८ (३५६८७)
सुपर्णोऽथाब्रवीद्विप्रं प्रध्यातं वै मया द्विज ।
इमां सिद्धामितो नेतुं तत्र यत्र प्रजापतिः ॥ ५-११३-९ (३५६८८)
यत्र देवो महादेवो यत्र विष्णुः सनातनः ।
यत्र धर्मश्च यज्ञश्च तत्रेयं निवसेदिति ॥ ५-११३-१० (३५६८९)
सोऽहं भगवतीं याचे प्रणतः प्रियकाम्यया ।
मयैतन्नाम प्रध्यातं मनसा शोचसा किल ॥ ५-११३-११ (३५६९०)
तदेवं बहुमानात्ते मयेहानीप्सितं कृतम् ।
सुकृतं दुष्कृतं वा त्वं माहात्म्यात्क्षन्तुमर्हसि ॥ ५-११३-१२ (३५६९१)
सा तौ तदाऽब्रवीत्तुष्टा पतगेन्द्रद्विजर्षभौ ।
न भेतव्यं सुपर्णोऽसि सुपर्ण त्यज संभ्रमम् ॥ ५-११३-१३ (३५६९२)
निन्दितास्मि त्वया वत्स न च निन्दां क्षमाम्यहम् ।
लोकेभ्यः सपदि भ्रश्येद्यो मां निन्देत पापकृत् ॥ ५-११३-१४ (३५६९३)
हीनयाऽलक्षणैः सर्वैस्तथाऽनिन्दितया मया ।
आचारं प्रतिगृह्णन्त्या सिद्धिः प्राप्तेयमुत्तमा ॥ ५-११३-१५ (३५६९४)
आचारः फलते धर्ममाचारः फलते धनम् ।
आचाराच्छ्रियमाप्नोति आचारो हन्त्यलक्षणम् ॥ ५-११३-१६ (३५६९५)
तदायुष्मन्खगपते यथेष्टं गम्यतामितः ।
न च ते गर्हणीयाऽहं गर्हितव्याः स्त्रियः क्वचित् ॥ ५-११३-१७ (३५६९६)
ग यदि त्वमात्मनो ह्यर्थे मां चैवादातुमिच्छसि ।
तदेव नष्टदेहस्तु स्या वै त्वं पन्नगाशन ॥ ५-११३-१८ (३५६९७)
तस्यैव हि प्रसादेन देवदेवस्य चिन्तनात् ।
त्वं तु साङ्गस्तु सञ्जातः पुनरेव भविष्यसि ॥' ५-११३-१९ (३५६९८)
भवितासि यथापूर्वं बलवीर्यसमन्वितः । ५-११३-२० (३५६९९)
नारद उवाच ।

बभूवतुस्ततस्तस्य पक्षौ द्रविणवत्तरौ ॥ ५-११३-२०क्ष् (३७२३)
अनुज्ञातस्तु शाण्डिल्या यथागतमुपागमत् ।
नैव चासादयामास तथारूपांस्तुरङ्गमान् ॥ ५-११३-२१ (३५७००)
विश्वामित्रोऽथ तं दृष्ट्वा गालवं चाध्वनि स्थितः ।
उवाच वदतां श्रेष्ठो वैनतेयस्य सन्निधौ ॥ ५-११३-२२ (३५७०१)
यस्त्वया स्वयमेवार्थः प्रतिज्ञातो मम द्विज ।
तस्य कालोऽपवर्गस्य यथा वा मन्यते भवान् ॥ ५-११३-२३ (३५७०२)
प्रतीक्षिष्याम्यहं कालमेतावन्तं तथा परम् ।
यथासंसिध्यते विप्र स मार्गस्तु निशाम्यताम् ॥ ५-११३-२४ (३५७०३)
सुपर्णोऽथाब्रवीद्दीनं गालवं भृशदुःखितम् ।
प्रत्यक्षं खल्विदानीं मे विश्वामित्रो यदुक्तवान् ॥ ५-११३-२५ (३५७०४)
तदागच्छ द्विजश्रेष्ठ मन्त्रयिष्याव गालव ।
नादत्त्वा गुरवे शक्यं कृत्स्नमर्थं त्वयाऽऽसितुम् ॥ ॥ ५-११३-२६ (३५७०५)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
त्रयोदशाधिकशततमोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-११३-५ भ्रष्टतनूजं छिन्नपक्षमङ्गं यस्य तं भ्रष्टतनूजाङ्गम् ॥
५-११३-८ व्यभिचारो धर्मातिक्रमः ॥
५-११३-११ शोचता कथमियमत्र वसतीति ॥
५-११३-२० द्रविणवत्तरौ बलवत्तरौ ॥
५-११३-२३ अपवर्गस्य फलप्राप्तेः ॥
५-११३-२४ निशाम्यतां विचार्यताम् ॥

उद्योगपर्व - अध्याय ११४
॥ श्रीः ॥
५.११४. अध्यायः ११४

Mahabharata - Udyoga Parva - Chapter Topics
गालवानुगतेन गरुडेन ययातिंगत्वा गालववृत्तान्तकथनपूर्वकं
धनयाचनम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-११४-० (३५७०६)
नारद उवाच। ५-११४-०क्ष् (३७२४)

अथाह गालवं दीनं सुपर्णः पततां वरः ।
निर्मितं वह्निना भूमौ वायुना शोधितं तथा ।
यस्माद्धिरण्मयं सर्वं हिरण्यं तेन चोच्यते ॥ ५-११४-१ (३५७०७)
धत्ते धारयते चेदमतस्मात्कारणाद्धनम् ।
तदेतत्त्रिषु लोकेषु धनं तिष्ठति शाश्वतम् ॥ ५-११४-२ (३५७०८)
नित्यं प्रोष्ठपदाभ्यां च शुक्रे धनपतौ तथा ।
मनुष्येभ्यः समादत्ते शुक्रश्चित्तार्जितं धनम् ॥ ५-११४-३ (३५७०९)
अजैकपादहिर्बुध्न्यौ रक्ष्येते धनदेन च ।
एवं न शक्यते लब्धुमलब्धव्यं द्विजर्षभ ।
ऋते च धनमश्वानां नावाप्तिर्विद्यते तव ॥ ५-११४-४ (३५७१०)
स त्वं याचात्र राजानं कंचिद्राजर्षिवंशजम् ।
अपीड्य राजा पौरान्हि यो नौ कुर्यात्कृतार्थिनौ ॥ ५-११४-५ (३५७११)
अस्ति सोमान्ववाये मे जातः कश्चिन्नृपः सखा ।
अभिगच्छावहे तं वै तस्यास्ति विभवो भुवि ॥ ५-११४-६ (३५७१२)
ययातिर्नाम राजर्षिर्नोहुषः सत्यविक्रमः ।
स दास्यति मया चोक्तो भवता चार्थितः स्वयम् ॥ ५-११४-७ (३५७१३)
विभवश्चास्य सुमहानासीद्धनपतेरिव ।
एवं गुरुधनं विद्वन्दानेनैव विशोधय ॥ ५-११४-८ (३५७१४)
तथा तौ कथयन्तौ च चिन्तयन्तौ च यत्क्षमम् ।
प्रतिष्ठाने नरपतिं ययातिं प्रत्युपस्थितौ ॥ ५-११४-९ (३५७१५)
प्रतिगृह्य च सत्कारैरर्घ्यपाद्यादिकं वरम् ।
पृष्टश्चागमने हेतुमुवाच विनतासुतः ॥ ५-११४-१० (३५७१६)
अयं मे नाहुष सखा गालवस्तपसो निधिः ।
विश्वामित्रस्य शिष्योऽभूद्वर्षाण्ययुतशो नृप ॥ ५-११४-११ (३५७१७)
सोऽयं तेनाभ्यनुज्ञात उपकारेप्सया द्विजः ।
तमाह भगवान्किं ते ददानि गुरुदक्षिणाम् ॥ ५-११४-१२ (३५७१८)
असकृत्तेन चोक्तेन किंचिदागतमन्युना ।
अयमुक्तः प्रयच्छेति जानता विभवं लघु ॥ ५-११४-१३ (३५७१९)
एकतःश्यामकर्णानां शुभ्राणां शुद्धजन्मनाम् ।
अष्टौ शतानि मे देहि हयानां चन्द्रवर्चसाम् ॥ ५-११४-१४ (३५७२०)
गुर्वर्थो दीयतामेव यदि गालव मन्यसे ।
इत्येवमाह सक्रोधो विश्वामित्रस्तपोधनः ॥ ५-११४-१५ (३५७२१)
सोऽयं शोकेन महता तप्यमानो द्विजर्षभः ।
अशक्तः प्रतिकर्तुं तद्भवन्तं शरणं गतः ॥ ५-११४-१६ (३५७२२)
प्रतिगृह्य नरव्याघ्र त्वत्तो भिक्षां गतव्यथः ।
कृत्वाऽऽपवर्गं गुरवे चरिष्यति महत्तपः ॥ ५-११४-१७ (३५७२३)

तपसः संविभागेन भवन्तमपि योक्ष्यते ।
स्वेन राजर्षितपसा पूर्णं त्वां पूरयिष्यति ॥ ५-११४-१८ (३५७२४)
यावन्ति रोमाणि हये भवन्तीह नरेश्वर ।
तावन्तो वाजिनो लोकान्प्राप्नुवन्ति महीपते ॥ ५-११४-१९ (३५७२५)
पात्रं प्रतिग्रहस्यायं दातुं पात्रं तथा भवान् ।
शङ्के क्षीरमिवासक्तं भवत्वेतत्तथोपमम् ॥ ॥ ५-११४-२० (३५७२६)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
चतुर्दशाधिकशततमोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-११४-१ हिर्वह्निः वह्निशब्दघटकवर्णलोपादिना हिशब्दस्य
निष्पन्नत्वात् । एवं रमणीयशब्दनिष्पन्नरणशब्दवाच्यो वायुः क्रमेण
ताभ्यां जातत्वाच्छोधितत्वाच्च हिरण्यमित्युच्यते। यस्माच्च सर्वं
जगत् हिरण्मयं हिरण्यप्रधानकं तेन च हिरण्यमित्युच्यत इत्यर्थः
। हिरण्यस्य हितत्वाद्रमणीयत्वाच्च जगत्पतिप्राधान्यम् ॥
५-११४-२ धत्ते पुष्णाति । धारयते जीवयति ॥
५-११४-३ प्रोष्टपदाभ्याम् । तस्मिन्नक्षत्रद्वये शुक्रे शुक्रवासरे
तद्योगे सति धनपतौ कुबेरस्य वृद्ध्यर्थम् ॥
५-११४-५ याच याचस्व ॥
५-११४-८ विशोधय परिहर ॥

उद्योगपर्व - अध्याय ११५
॥ श्रीः ॥
५.११५. अध्यायः ११५

Mahabharata - Udyoga Parva - Chapter Topics
व्ययितवित्तेन ययातिना धनप्रतिनिधितया
माधवीनामकस्वकन्यकासमर्पणम् ॥ १ ॥
गरुडेन समधिगततुरगाधिगमोपायं गालवमापृच्छ्य स्वगृहगमनम्
॥ २ ॥
गालवेन सह कन्यया हृर्यश्वनामकनृपसमीपमुपेत्य शुल्कार्पणेन
कन्या कलत्रीकरणकथनम् ॥ ३ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-११५-० (३५७२७)
नारद उवाच। ५-११५-०क्ष् (३७२५)
एवमुक्तः सुपर्णेन तथ्यं वचनमुत्तमम् ।
विमृश्यावहितो राजा निश्चित्य च पुनः पुनः ॥ ५-११५-१ (३५७२८)
यष्टा क्रतुसहस्राणां दाता दानपतिः प्रभुः ।
ययातिः सर्वकाशीश इदं वचनमब्रवीत् ॥ ५-११५-२ (३५७२९)
दृष्ट्वा प्रियसखं तार्क्ष्यं गालवं च द्विजर्षभम् ।
निदर्शनं च तपसो भिक्षां श्लाघ्यां च कीर्तिताम् ॥ ५-११५-३ (३५७३०)
अतीत्य च नृपानन्यानादित्यकुलसंभवान् ।
मत्सकाशमनुप्राप्तावेतां बुद्धिमवेक्ष्य च ॥ ५-११५-४ (३५७३१)
अद्य मे सफलं जन्म तारितं चाद्य मे कलम् ।
अद्यायं तारितो देशो मम तार्क्ष्य त्वयाऽनघ ॥ ५-११५-५ (३५७३२)
वक्तुमिच्छामि तु सखे यथा जानासि मां पुरा ।
न तथा वित्तवानस्मि क्षीणं वित्तं च मे सखे ॥ ५-११५-६ (३५७३३)
न च शक्तोऽस्मि ते कर्तुं मोघमागमनं खग ।
न चाशामस्य विपर्षेर्वितथीकर्तुमुत्सहे ॥ ५-११५-७ (३५७३४)
पुत्रीं दास्यामि यत्कार्यमियं संपादयिष्यति ।
अभिगम्य हताशो हि निवृत्तो दहते कुलम् ॥ ५-११५-८ (३५७३५)
नातः परं वैनतेय किंचित्पापिष्ठमुच्यते ।
प्रथाशानाशनं लोके देहि नास्तीति वा वचः ॥ ५-११५-९ (३५७३६)
हताशो ह्यकृतार्थः सन्हतः संभावितो नरः ।
हिनस्ति तस्य पुत्रांश्च पौत्रांश्चाकुर्वतो हितम् ॥ ५-११५-१० (३५७३७)
तस्माच्चतुर्णां वंशानां स्थापयित्री सुता मम ।
ग्माधवी नाम तार्क्ष्येयं सर्वधर्मप्रदायिनी ॥' ५-११५-११ (३५७३८)
इयं सुरसुतप्रख्या सर्वधर्मोपचायिनी ।
सदा देवमनुष्यणामसुराणां च गालव ।
काङ्क्षिता रूपतो बाला सुता मे प्रतिगृह्यताम् ॥ ५-११५-१२ (३५७३९)
अस्याः शुल्कं प्रदास्यन्ति नृपा राज्यमपि ध्रुवम् ।
किं पुनः श्यामकर्णानां हयानां द्वे चतुःशते ॥ ५-११५-१३ (३५७४०)
स भवाप्रतिगृह्णातु ममैतां माधवीं सुताम् ।
अहं दौहित्रवान्त्स्यां वै वर एष मम प्रभो ॥ ५-११५-१५अग स तस्य
वचनं श्रुत्वा ब्राह्मणः शंसितव्रतः ।'
प्रतिगृह्य च तां कन्यां गालवः सह पक्षिणा ।
पुनर्द्रक्ष्याव इत्युक्त्वा प्रतस्थे सह कन्यया ॥ ५-११५-१४ (३५७४१)
उपलब्धमिदं द्वारमश्वानामिति चाण्डजः ।
उक्त्वा गालवमापृच्छ्य जगाम भवनं स्वकम् ॥ ५-११५-१६ (३५७४२)

गते पतगराजे तु गालवः सह कन्यया ।
चिन्तयानः क्षमंदाने राजानं शुल्कतोऽगमत् ॥ ५-११५-१७ (३५७४३)
सोऽगच्छन्मनसेक्ष्वाकुं हर्यश्वं राजसत्तमम् ।
अयोध्यायां महावीर्यं चतुरङ्गबलान्वितम् ॥ ५-११५-१८ (३५७४४)
कोशधान्यबलोपेतं प्रियपौरं द्विजप्रियम् ।
प्रजाभिकामं शाम्यन्तं कुर्वाणं तप उत्तमम् ॥ ५-११५-१९ (३५७४५)
तमुपागम्य विप्रः स हर्यश्वं गालवोऽब्रवीत् ।
कन्येयं मम राजेन्द्र प्रसवैः कुलवर्धिनी ॥ ५-११५-२० (३५७४६)
इयं शुल्केन भार्यार्थं हर्यश्व प्रतिगृह्यताम् ।
शुल्कं ते कीर्तियिष्यामि तच्छ्रुत्वा संप्रधार्यताम् ॥ ॥ ५-११५-२१ (३५७४७)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवाद्यनपर्वणि
पञ्चदशाधिकशततमोऽध्यायः ॥

उद्योगपर्व - अध्याय ११६
॥ श्रीः ॥
५.११६. अध्यायः ११६

Mahabharata - Udyoga Parva - Chapter Topics
हर्यश्वपृष्टेन गालवेन तं प्रति शुल्कनिवेदनम् ॥ १ ॥
हर्यश्वेन गालवंप्रति स्वस्याश्वशतद्वयवत्तया वरदाने सति
एकापत्योत्पादनेन पुनः कन्याविसर्जनोक्तिः ॥ २ ॥
माधव्या गालवंप्रति स्वस्य प्रसूत्यन्ते प्रसूत्यन्ते पुनः पुनः
कन्यात्वसंपादकविप्रवरप्राप्तिकथनम् ॥ ३ ॥
हर्यश्वेन शुक्लदानेन तस्यां वसुमनोनामकपुत्रोत्पादनम् ॥ ४ ॥
हर्यश्वेन कालान्तरे समागताय गालवाय पुनर्माधवीप्रत्यर्पणम् ॥ ५ ॥
गालवेन कामतः पुनः कन्यात्वमुपगतया तया सह दिवोदाससमीपगमनम्
॥ ६ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-११६-० (३५७४८)
नारद उवाच । ५-११६-०क्ष् (३७२६)
हर्यश्वस्त्वब्रवीद्राजा विचिन्त्य बहुधा ततः ।
दीर्घमुष्णं च निश्वस्य प्रजाहेतोर्नृपोत्तमः ॥ ५-११६-१ (३५७४९)
उन्नतेषून्नता षट्सु सूक्ष्मा सूक्ष्मेषु पञ्चसु ।
गम्भीरा त्रिषु चाङ्गेषु इयं रक्ता च पञ्चसु ॥ ५-११६-२ (३५७५०)

ग्श्रोण्यौ ललाटमूरू च घ्राणं चेति षडुन्नतम् ।
सूक्ष्माण्यङ्गुलिपर्वाणि केशरोमनस्वत्वचः । ५-११६-३ (३५७५१)
स्वरः सत्वं च नाभिश्च त्रिगम्भीरं प्रचक्षते ।
पाणिपादतले रक्ते नेत्रान्तौ च नखानि च ॥ ५-११६-४ (३५७५२)
पञ्चदीर्घं चतुर्ह्रस्वं पञ्चसूक्ष्मं षडुन्नतम् ।
सप्तरक्तं त्रिविस्तीर्णं त्रिगम्भीरं प्रशकस्यते ॥ ५-११६-५ (३५७५३)
पञ्चैव दीर्घा हनुलोचनानि
बाहूरुनासाश्च सुखप्रदानि ।
ह्रस्वानि चत्वारि च लिङ्गपृष्ठे
ग्रीवा च जङ्घे च हितप्रदानि ॥ ५-११६-६ (३५७५४)
सूक्ष्माणि चत्वारि च लिङ्गपृष्ठे
ग्रीवा च जङ्घे च हितप्रदानि ॥
सूक्ष्माणि पञ्च दशनाङ्गुलिपर्वकेशा
स्त्वक्त्वैव वै कररुहाश्च न दुःखितानाम् ।
वक्षोऽथ कक्षो नखनासिकास्यु-
रंसत्रिकं चेति षडुन्नतानि ॥ ५-११६-७ (३५७५५)
नेत्रान्तपादकरताल्वधरोष्ठजिह्वा
रक्ता नखाश्च खलु सर्वसुखावहानि ॥' ५-११६-८ (३५७५६)
बहुदेवासुरालोका बहुगन्धर्वदर्शना ।
बहुलक्षणसंपन्ना बहुकल्याणधारिणी ॥ ५-११६-९ (३५७५७)
समर्थेयं जनयितुं चक्रवर्तिनमात्मजम् ।
ब्रूहि शुल्कं द्विजश्रेष्ठ समीक्ष्य विभवं मम ॥ ५-११६-१० (३५७५८)
गालव उवाच। ५-११६-११क्ष् (३७२७)
एकतःश्यामकर्णानां शतान्यष्टौ प्रयच्छ मे ।
हयानां चन्द्रशुभ्राणां देशजानां वपुष्मताम् ॥ ५-११६-११ (३५७५९)
ततस्तव भवित्रीयं पुत्राणां जननी शुभा ।
अरणीव हुताशानां योनिरायतलोचना ॥ ५-११६-१२ (३५७६०)
नारद उवाच। ५-११६-१३क्ष् (३७२८)
एतच्छ्रुत्वा वचो राजा हर्यश्वः काममोहितः ।
उवाच गालवं दीनो राजर्षिर्ऋषिसत्तमम् ॥ ५-११६-१३ (३५७६१)
द्वे मे शते संनिहिते हयानां यद्विधास्तव ।
एष्टव्याः शतशस्त्वन्ये चरन्ति मम वाजिनः ॥ ५-११६-१४ (३५७६२)
सोऽहमेकमपत्यं वै जनयिष्यामि गालव ।
अस्यामेतं भवान्कामं संपादयतु मे वरम् ॥ ५-११६-१५ (३५७६३)
एतच्छ्रुत्वा तु सा कन्या गालवं वाक्यमब्रवीत् ।
मम दत्तो वरः कश्चित्केनचिद्ब्रह्मवादिना ॥ ५-११६-१६ (३५७६४)

प्रसूत्यन्ते प्रसूत्यन्ते कन्यैव त्वं भविष्यसि ।
स त्वं ददस्व मां राज्ञे प्रतिगृह्य हयोत्तमान् ॥ ५-११६-१७ (३५७६५)
नृपेभ्यो हि चतुर्भ्यस्ते पूर्णान्यष्टौ शतानि वै ।
भविष्यन्ति तथा पुत्रा मम चत्वार एव च ॥ ५-११६-१८ (३५७६६)
क्रियतामुपसंहारो गुर्वर्थं द्विजसत्तम ।
एषा तावन्मम प्रज्ञा यथा वा मन्यसे द्विज ॥ ५-११६-१९ (३५७६७)
एवमुक्तस्तु स मुनिः कन्यया गालवस्तदा ।
हर्यश्वं पृथिवीपालमिदं वचनमब्रवीत् ॥ ५-११६-२० (३५७६८)
इयं कन्या नरश्रेष्ठ हर्यश्व प्रतिगृह्यताम् ।
चतुर्भागेन शुल्कस्य जनयस्वैकमात्मजम् ॥ ५-११६-२१ (३५७६९)
नारद उवाच। ५-११६-२२क्ष् (३७२९)
प्रतिगृह्य स तां कन्यां गालवं प्रतिनन्द्य च ।
समये देशकाले च लब्धवान्सुतमीप्सितम् ॥ ५-११६-२२ (३५७७०)
ततो वसुमना नाम वसुभ्यो वसुमत्तरः ।
वसुप्रख्यो नरपतिः स बभूव वसुप्रदः ॥ ५-११६-२३ (३५७७१)
अथ काले पुनर्धीमान्गालवः प्रत्युपस्थितः ।
उपसङ्गम्य चोवाच हर्यश्वं प्रीतमानसम् ॥ ५-११६-२४ (३५७७२)
जातो नृप सुतस्तेऽयं बालो भास्करसंनिभः ।
कालो गन्तुं नरश्रेष्ठ शुल्कार्थमपरं नृपम् ॥ ५-११६-२५ (३५७७३)
नारद उवाच। ५-११६-२६क्ष् (३७३०)
हर्यश्वः सत्यवचने स्थितः स्थित्वा च पौरुषे ।
दुर्लभत्वाद्धयानां च प्रददौ माधवीं पुनः ॥ ५-११६-२६ (३५७७४)
माधवी च पुनर्दीप्तां परित्यज्यनृपश्रियम् ।
कुमारी कामतो भूत्वा गालवं पृष्ठतोऽन्वगात् ॥ ५-११६-२७ (३५७७५)
त्वय्येव तावत्तिष्ठन्तु हया इत्युक्तवान्द्विजः ।
प्रययौ कन्यया सार्धं दिवोदासं प्रजेश्वरम् ॥ ॥ ५-११६-२८ (३५७७६)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
षोडशाधिकशततमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-११६-९ बहुभिर्देवैरसुरैश्च आलोकयितुं योग्या बहुदेवासुरालोका
। गन्धर्वाणां दर्शनं शास्त्रं गीतादिविद्या यस्यां सा तथा ॥

उद्योगपर्व - अध्याय ११७
॥ श्रीः ॥
५.११७. अध्यायः ११७

Mahabharata - Udyoga Parva - Chapter Topics

गालवेन दिवोदासंप्रति स्वागमनकारणकथनम् ॥ १ ॥
तेन स्वस्याप्यश्वशतद्वयवत्त्वेन एकपुत्रोत्पादनकथनम् ॥ २ ॥
तथा शुल्कदानेन तस्यां प्रतर्दनाख्यसुतमुत्पाद्य कालान्तरागताय
गालवाय माधवीप्रत्यर्पणम् ॥ ३ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-११७-० (३५७७७)
गालव उवाच। ५-११७-०क्ष् (३७३१)
महावीर्यो महीपालः काशीनामीश्वरः प्रभुः ।
दिवोदास इति ख्यातो भैमसेनिर्नराधिपः ॥ ५-११७-१ (३५७७८)
तत्र गच्छावहे भद्रे शनैरागच्छ मा शुचः ।
धार्मिकः संयमे युक्तः सत्ये चैव जनेश्वरः ॥ ५-११७-२ (३५७७९)
नारद उवाच। ५-११७-३क्ष् (३७३२)
तमुपागम्य स मुनिर्न्यायतस्तेन सत्कृतः ।
गालवः प्रसवस्यार्थे तं नृपं प्रत्यचोदयत् ॥ ५-११७-३ (३५७८०)
दिवोदाम उवाच। ५-११७-४क्ष् (३७३३)
श्रुतमेतन्मया पूर्वं किमुक्त्वा विस्तरं द्विज ।
काङ्क्षितो हि मयैषोऽर्थः श्रुत्वैव द्विजसत्तम ॥ ५-११७-४ (३५७८१)
एतच्च मे बहुमतं यदुत्सृज्य नराधिपान् ।
मामेवमुपयातोऽसि भावि चैतदसंशयम् ॥ ५-११७-५ (३५७८२)
स एव विभवोऽसमाकमश्वानामपि गालव ।
अहमप्येकमेवास्यां जनयिष्यामि पार्थिवम् ॥ ५-११७-६ (३५७८३)
नारद उवाच। ५-११७-७क्ष् (३७३४)
तथेत्युक्त्वा द्विजश्रेष्ठः प्रादात्कन्यां महीपतेः ।
विधिपूर्वं च तां राजा कन्यां प्रतिगृहीतवान् ॥ ५-११७-७ (३५७८४)
रेमे स तस्यां राजर्षिः प्रभावत्यां यथा रविः ।
स्वाहायां च यथा वह्निर्यथा शाच्यां च वासवः ॥ ५-११७-८ (३५७८५)
यथा चन्द्रश्च रोहिण्यां यथा धूमोर्णया यमः ।
वरुणश्च यथा गौर्यां यथा चर्ष्यां धनेश्वरः ॥ ५-११७-९ (३५७८६)
यथा नारायणो लक्ष्म्यां जाह्नव्यां च यथोदधिः ।
यथा रुद्रश्च रुद्राण्यां यथा वेद्यां पितामहः ॥ ५-११७-१० (३५७८७)
अदृश्यन्त्यां च वासिष्ठो वसिष्ठश्चाक्षमालया ।
च्यवनश्च सुकन्यायां पुलस्त्यः सन्ध्यया यथा ॥ ५-११७-११ (३५७८८)

अगस्त्यश्चापि वैदर्भ्यां सावित्र्यां सत्यवान्यथा ।
यथा भृगुः पुलोमायामदित्यां कश्यपो यथा ॥ ५-११७-१२ (३५७८९)
रेणुकायां यथार्चीको हैमवत्यां च कौशिकः ।
बृहस्पतिश्च तारायां शुक्रश्च शतपर्वणा ॥ ५-११७-१३ (३५७९०)
यथा भूम्यां भूमिपतिरुर्वश्यां च पुरूरवाः ।
ऋचीकः सत्यवत्यां च सरस्वस्यां यथा मनुः ॥ ५-११७-१४ (३५७९१)
शकुन्तलायां दुष्यन्तो धृत्यां धर्मश्च शाश्वतः ।
दमयन्त्यां नलश्चैव सत्यवत्यां च नारदः ॥ ५-११७-१५ (३५७९२)
जरत्कारुर्जरत्कार्वां पुलस्त्यश्च प्रतीच्यया ।
मेनकायां यथोर्णायुस्तुम्बुरुश्चैव रम्भया ॥ ५-११७-१६ (३५७९३)
वासुकिः शतशीर्षायां कुमार्यां च धनञ्जयः ।
वैदेह्यां च यथा रामो रुक्मिण्यां च जनार्दनः ॥ ५-११७-१७ (३५७९४)
तथा तु रममाणस्य दिवोदासस्य भूपतेः ।
माधवी जनयामास पुत्रमेकं प्रतर्दनम् ॥ ५-११७-१८ (३५७९५)
अथाजगाम भगवान्दिवोदासं स गालवः ।
समये समनुप्राप्ते वचनं चेदमब्रवीत् ॥ ५-११७-१९ (३५७९६)
निर्यातयतु मे कन्यां भवांस्तिष्ठन्तु वाजिनः ।
यावदन्यत्र गच्छामि शुल्कार्थं पृथिवीपते ॥ ५-११७-२० (३५७९७)
नारद उवाच । ५-११७-२१क्ष् (३७३५)
दिवोदासोऽथ धर्मात्मा समये गालवस्य ताम् ।
कान्यां निर्यातयामास स्थितः सत्ये महीपतिः ॥ ॥ ५-११७-२१ (३५७९८)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
सप्तदशाधिकशततमोऽध्यायः ॥

उद्योगपर्व - अध्याय ११८
॥ श्रीः ॥
५.११८. अध्यायः ११८

Mahabharata - Udyoga Parva - Chapter Topics
गालवेन पुनः कन्यात्वमुपगतया माधव्या सह उशीनरनृपं गत्वा
स्वागमनकारणकथनम् ॥ १ ॥
तेनाप्यश्वशतद्वयदानेन माधव्यां शिबिनामकतनयोत्पादनम् ॥ २ ॥
कालान्तरे उशीनरान्माधवीमादाय गच्छतो गालवस्य मध्येमार्गं गरुडेन
समागमः ॥ ३ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-११८-० (३५७९९)
नारद उवाच। ५-११८-०क्ष् (३७३६)
तथैव तां श्रियं त्यक्त्वा कन्या भूत्वा यशस्विनी ।
माधवी गालवं विप्रमभ्ययात्सत्यसङ्गरा ॥ ५-११८-१ (३५८००)
गालवो विमृशन्नेव स्वकार्यगतमानसः ।
जगाम भोजनगरं द्रष्टुमौशीनरं नृपम् ॥ ५-११८-२ (३५८०१)
तमुवाचाथ गत्वा स नृपतिं सत्यविक्रमम् ।
इय कन्या सुतौ द्वौ ते जनयिष्यति पार्थिवौ ॥ ५-११८-३ (३५८०२)
अस्यां भवानवाप्तार्थो भविता प्रेत्य चेह च ।
सोमार्कप्रतिसङ्काशौ जनयित्वा सुतौ नृप ॥ ५-११८-४ (३५८०३)
शुल्कं तु सर्वधर्मज्ञ हयानां चन्द्रवर्चसाम् ।
एकतःश्यामकर्णानां देयं मह्यं चतुःशतम् ॥ ५-११८-५ (३५८०४)
गुर्वर्थोऽयं समारम्भो न हयैः कृत्यमस्ति मे ।
यदि शक्यं महाराज क्रियतामविचारितम् ॥ ५-११८-६ (३५८०५)
अनपत्योऽसि राजर्षे पुत्रौ जनय पार्थिव ।
पितॄन्पुत्रप्लवेन त्वमात्मानं चैव तारय ॥ ५-११८-७ (३५८०६)
न पुत्रफलभोक्ता हि राजर्षे पात्यते दिवः ।
न याति नरकं घोरं यत्र गच्छन्त्यनात्मजाः ॥ ५-११८-८ (३५८०७)
एतच्चान्यच्च विविधं श्रुत्वा गालवभाषितम् ।
उशीनरः प्रतिवचो ददौ तस्य नराधिपः ॥ ५-११८-९ (३५८०८)
श्रुतवानस्मि ते वाक्यं यथा वदसि गालव ।
विधिस्तु बलवान्ब्रह्मन्प्रवणं हि मनो मम ॥ ५-११८-१० (३५८०९)
शते द्वे तु ममाश्वानामीदृशानां द्विजोत्तम ।
इतरेषां सहस्राणि सुबहूनि चरन्ति मे ॥ ५-११८-११ (३५८१०)
अहमप्येकमेवास्यां जनयिष्यामि गालव ।
पुत्रवद्विगर्तं मार्गं गमिष्यामि परैरहम् ॥ ५-११८-१२ (३५८११)
मूल्येनापि समं कुर्यां तवाहं द्विजसत्तम ।
पौरजानपदार्थं तु ममार्थो नात्मभोगतः ॥ ५-११८-१३ (३५८१२)
कामतो हि धनं राजा पारक्यं यः प्रयच्छति ।
न स धर्मेण धर्मात्मन्युज्यते यशसा न च ॥ ५-११८-१४ (३५८१३)
सोऽहं प्रतिग्रहीष्यामि ददात्वेतां भवान्मम ।
कुमारीं देवगर्भाभामेकपुत्रभवाय मे ॥ ५-११८-१५ (३५८१४)
तथा तु बहुधा कन्यामुक्तवन्तं नराधिपम् ।
उशीनरं द्विजश्रेष्ठो गालवः प्रत्यपूजयत् ॥ ५-११८-१६ (३५८१५)
उशीनरं प्रतिग्राह्य गालवः प्रययौ वनम् ।

रेमे स तां समासाद्य कृतपुण्य इव श्रियम् ॥ ५-११८-१७ (३५८१६)
कन्दरेषु च शैलानां नदीनां निर्झरेषु च ।
उद्यानेषु विचित्रेषु वनेषूपवनेषु च ॥ ५-११८-१८ (३५८१७)
हर्म्येषु रमणीयेषु प्रासादशिखरेषु च ।
वातायनविमानेषु तथा गर्भगृहेषु च ॥ ५-११८-१९ (३५८१८)
ततोऽस्य समये यज्ञे पुत्रो बालरविप्रभः ।
शिबिर्नाम्नाभिविख्यातो यः स पार्थिवसत्तमः ॥ ५-११८-२० (३५८१९)
उपस्थाय स तं विप्रो गालवः प्रतिगृह्य च ।
कन्यां प्रयातस्तां राजन्दृष्टवान्विनतात्मजम् ॥ ॥ ५-११८-२१ (३५८२०)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
अष्टादशाधिकशततमोऽध्यायाः ॥

उद्योगपर्व - अध्याय ११९
॥ श्रीः ॥
५.११९. अध्यायः ११९

Mahabharata - Udyoga Parva - Chapter Topics
गालवेन गरुडंप्रत्यश्वानां शतद्वयन्यूनताकथनम् ॥ १ ॥
गरुडेन तस्य दुर्लभत्वकथनपूर्वकं तत्प्रतिनिधितया माधव्या
एव दानकथनम् ॥ २ ॥
विश्वामित्रेण गालवदत्तायां माधव्यां अष्टकाख्यपुत्रमुत्पाद्य तस्याः
पुनर्गालवे पुनर्गालवे प्रत्यर्पणम् ॥ ३ ॥
गालवेन पुनर्ययातये माधवीप्रत्यर्पणम् ॥ ४ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-११९-० (३५८२१)
नारद उवाच । ५-११९-०क्ष् (३७३७)
गालवं वैनतेयोऽथ प्रहसन्निदमब्रवीत् ।
दिष्ट्या कृतार्थं पश्यामि भवन्तमिह वै द्विज ॥ ५-११९-१ (३५८२२)
गालवस्तु वचः श्रुत्वा वैनतेयेन भाषितम् ।
चतुर्भागावशिष्टं तदाचख्यौ कार्यमस्य हि ॥ ५-११९-२ (३५८२३)
सुपर्णस्त्वब्रवीदेनं गालवं वदतां वरः ।
प्रयत्नस्ते न कर्तव्यो नैष संपत्स्यते तव ॥ ५-११९-३ (३५८२४)
पुरा हि कान्यकुब्जे वै गाधेः सत्यवतीं सुताम् ।
भार्यार्थे वरयत्कन्यामृचीकस्तेन भाषितः ॥ ५-११९-४ (३५८२५)

एकतःश्यामकर्णानां हयानां चन्द्रवर्चसाम् ।
भगवन्दीयताकं मह्यं महस्रमिति गालव ॥ ५-११९-५ (३५८२६)
ऋचीकस्तु तथेत्युक्त्वा वरुणस्यालयं गतः ।
अश्वतीर्थे हयाँल्लब्ध्वा दत्तवान्पार्थिवाय वै ॥ ५-११९-६ (३५८२७)
इष्ट्वा ते पुण्डरीकेण दत्ता राज्ञा द्विजातिषु ।
तेभ्यो द्वे द्वे शते क्रीत्वा प्राप्ते तैः पार्थिवैस्तदा ॥ ५-११९-७ (३५८२८)
अपराण्यपि चत्वारि शतानि द्विजसत्तम ।
नीयमानानि संतारे हृतान्यासन्नितस्ततः ॥ ५-११९-८ (३५८२९)
एवं न शक्यमप्राप्यं प्राप्तुं गालव कर्हिचित् ।
इमामश्वशताभ्यां वै द्वाभ्यां तस्मै निवेदय ॥ ५-११९-९ (३५८३०)
विश्वामित्राय धर्मात्मन्षड्भिरश्वशतैः सह ।
ततोऽसि गतसंमोहः कृतकृत्यो द्विजोत्तम ॥ ५-११९-१० (३५८३१)
गालवस्तं तथेत्युक्त्वा सुपर्णसहितस्ततः ।
आदायाश्वांश्च कन्यां च विश्वामित्रपुपागमत् ॥ ५-११९-११ (३५८३२)
अश्वानां काङ्क्षितार्थानां षडिमानि शतानि वै ।
शतद्वयेन कन्येयं भवता प्रतिगृह्यताम् ॥ ५-११९-१२ (३५८३३)
अस्यां राजर्षिभिः पुत्रा जाता वै धार्मिकास्त्रयः ।
चतुर्थं जनयत्वेकं भवानपि नरोत्तमम् ॥ ५-११९-१३ (३५८३४)
पूर्णान्येवं शतान्यष्टौ तुरगाणां भवन्तु ते ।
भवतो ह्यनृणो भूत्वा तपः कुर्या यथासुखम् ॥ ५-११९-१४ (३५८३५)
विश्वामित्रस्तु तं दृष्ट्वा गालवं सह पक्षिणा ।
कन्यां च तां वरारोहामिदमित्यब्रवीद्वचः ॥ ५-११९-१५ (३५८३६)
किमियं पूर्वमेवेह न दत्ता मम गालव ।
पुत्रा ममैव चत्वारो भवेयुः कुलभावनाः ॥ ५-११९-१६ (३५८३७)
प्रतिगृह्णामि ते कन्यामेकपुत्रफलाय वै ।
अश्वाश्चाश्रममासाद्य चरन्तु मम सर्वशः ॥ ५-११९-१७ (३५८३८)
नारद उवाच । ५-११९-१८क्ष् (३७३८)
स तया रममाणोऽथ विश्वामित्रो महाद्युतिः ।
आत्मजं जनयामास माधवीपुत्रमष्टकम् ॥ ५-११९-१८ (३५८३९)
जातमात्रं सुतं तं च विश्वामित्रो महामुनिः ।
संयोज्यार्थैस्तथा धर्मैरश्वैस्तैः समयोजयत् ॥ ५-११९-१९ (३५८४०)
अथाष्टकः पुरं प्रायात्तदा सोमपुरप्रभम् ।
निर्यात्य कन्यां शिष्याय कौशिकोपि वनं ययौ ॥ ५-११९-२० (३५८४१)
गालवोपि सुपर्णेन सह निर्यात्य दक्षिणाम् ।
मनसाऽतिप्रतीतेन कन्यामिदमुवाच ह ॥ ५-११९-२१ (३५८४२)
जातो दानपतिः पुत्रस्त्वया शूरस्तथाऽपरः ।

सत्यधर्मरतश्चान्यो यज्वा चापि तथाऽपरः ॥ ५-११९-२२ (३५८४३)
तदागच्छ वरारोहे तारितस्ते पिता सुतैः ।
चत्वारश्चैव राजानस्तथा चाहं सुमध्यमे ॥ ५-११९-२३ (३५८४४)
नारद उवाच। ५-११९-२४क्ष् (३७३९)
गालवस्त्वभ्यनुज्ञाय सुपर्णं पन्नगाशनम् ।
पितुर्निर्यात्य तां कन्यां प्रययौ वनमेव ह ॥ ॥ ५-११९-२४ (३५८४५)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवाद्यानपर्वणि
एकोनविंशत्यधिकशततमोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-११९-८ संतारे मार्गे ॥
५-११९-१८ अष्टकं तन्नामकम् ॥
५-११९-२० निर्यात्य प्रत्यर्प्य । शिष्याय गालवाय ॥

उद्योगपर्व - अध्याय १२०
॥ श्रीः ॥
५.१२०. अध्यायः १२०

Mahabharata - Udyoga Parva - Chapter Topics
ययातिना माधव्याः गङ्गायमुनासङ्गमदेशे स्वयंवरोद्घोषणेन
यक्षगन्धर्वादीनां तत्रागमनम् ॥ १ ॥
माधव्या तु सर्ववरानतिक्रम्य वनमध्ये तपश्चरणम् ॥ २ ॥
कालान्तरे स्वर्गं ययातेः बहुवर्षसहस्रावसाने सदसि
देवर्ष्याद्यवमाननेन सद्यस्तेजोहानिः ॥ ३ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१२०-० (३५८४६)
नारद उवाच। ५-१२०-०क्ष् (३७४०)
स तु राजा पुनस्तस्याः कर्तुकामः स्वयंवरम् ।
उपगम्याश्रमपदं गङ्गायामुनसङ्गमे ॥ ५-१२०-१ (३५८४७)
गृहीतमाल्यदामां तां रथमारोप्य माधवीम् ।
पूरुर्यदुश्च भगिनीमाश्रमे पर्यधावताम् ॥ ५-१२०-२ (३५८४८)
नागयक्षमनुष्याणां गन्धर्वमृगपक्षिणाम् ।
शैलद्रुमवनौकानामासीत्तत्र समागमः ॥ ५-१२०-३ (३५८४९)
नानापुरुषदेश्यानामीश्वरैश्च समाकुलम् ।

ऋषिभिर्ब्रह्मकल्पैश्च समन्तादावृतं वनम् ॥ ५-१२०-४ (३५८५०)
निर्दिश्यमानेषु तु सा वरेषु वरवर्णिनी ।
वरानुत्क्रम्य सर्वास्तान्वरं वृतवती वनम् ॥ ५-१२०-५ (३५८५१)
अवतीर्य रथात्कन्या नमस्कृत्य च बन्धुषु ।
उपगम्य वनं पुण्यं तपस्तेपे ययातिजा ॥ ५-१२०-६ (३५८५२)
उपवसैश्च विविधैर्दीक्षाभिर्नियमैस्तथा ।
आत्मनो लघुतां कृत्वा बभूव मृगचारिणी ॥ ५-१२०-७ (३५८५३)
वैदूर्याङ्कुरकल्पानि मृदूनि हरितानि च ।
चरन्ती श्लक्ष्णशष्पाणि तिक्तानि मधुराणि च ॥ ५-१२०-८ (३५८५४)
स्रवन्तीनां च पुण्यानां सुरसानि सुचीनि च ।
पिबन्ती वारिमुख्यानि शीतानि विमलानि च ॥ ५-१२०-९ (३५८५५)
वनेषु मृगराजेषु व्याघ्रविप्रोषितेषु च ।
दावाग्निविप्रयुक्तेषु शून्येषु गहनेषु च ॥ ५-१२०-१० (३५८५६)
चरन्ती हरिणैः सार्धं मृगीव वनचारिणी ।
चचार विपुलं धर्मं ब्रह्मचर्येण संवृतम् ॥ ५-१२०-११ (३५८५७)
ययातिरपि पूर्वेषां राज्ञां वृत्तमनुष्ठितः ।
बहुवर्षसहस्रायुर्युयुजे कालधर्मणा ॥ ५-१२०-१२ (३५८५८)
पुरुर्यदुश्च द्वौ वंशे वर्धमानौ नरोत्तमौ ।
ताभ्यां प्रतिष्ठितो लोके परलोके च नाहुषः ॥ ५-१२०-१३ (३५८५९)
महीपते नरपतिर्ययातिः स्वर्गमास्थितः ।
महर्षिकल्पो नृपतिः स्वर्गाग्र्यफलभुग्विभुः ॥ ५-१२०-१४ (३५८६०)
बहुवर्षसहस्राख्ये काले बहुगुणे गते ।
राजर्षिषु निषण्णेषु महीयःसु महर्धिषु ॥ ५-१२०-१५ (३५८६१)
अवमेने नरान्सर्वान्देवानृषिगणांस्तथा ।
ययातिर्मूढविज्ञानो विस्मयाविष्टचेतनः ॥ ५-१२०-१६ (३५८६२)
ततस्तं बुबुधे देवः शक्रो बलनिषूदनः ।
ते च राजर्षयः सर्वे धिग्धिगित्येवमब्रुवन् ॥ ५-१२०-१७ (३५८६३)
विचारश्च समुत्पन्नो निरीक्ष्य नहुषात्मजम् ।
कोऽन्वयं कस्य वा राज्ञः कथं वा स्वर्गमागतः ॥ ५-१२०-१८ (३५८६४)
कर्मणा केनसिद्धोऽयं क्व वाऽनेन तपश्चितम् ।
कथं वा ज्ञायते स्वर्गे केन वा ज्ञायतेऽप्युत ॥ ५-१२०-१९ (३५८६५)
एवं विचास्यन्तस्ते राजानं स्वर्गवासिनः ।
दृष्ट्वा पप्रच्छुरन्योन्यं ययातिं नृपतिं प्रति ॥ ५-१२०-२० (३५८६६)
विमानपालाः शतशः स्वर्गद्वाराभिरक्षिणः ।
पृष्टा आसनपालाश्च न जानीमेत्यथाऽब्रुवन् ॥ ५-१२०-२१ (३५८६७)
सर्वे ते ह्यावृतज्ञाना नाभ्यजानन्त तं नृपम् ।

स मुहूर्तादथ नृपो हतौजाश्चाभवत्तदा ॥ ॥ ५-१२०-२२ (३५८६८)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
विंशत्यधिकशततमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-१२०-१ सतु राजा आश्रमपदमुपगम्य कर्तुकामः अभूदिति शेषः ॥
५-१२०-२ पर्यधावतां वरान्वेषणायेत्यर्थः ॥
५-१२०-५ वनं वनवासम् ॥
५-१२०-१० व्याघ्राणां विप्रोषितं पर्यटनं येषु ॥
५-१२०-१२ कालधर्मणा मृत्युना ॥
५-१२०-१३ नाहुषः ययातिः ॥

उद्योगपर्व - अध्याय १२१
॥ श्रीः ॥
५.१२१. अध्यायः १२१

Mahabharata - Udyoga Parva - Chapter Topics
ययातिंप्रति इन्द्रदूतेन पतेत्युक्तिः ॥ १ ॥
ययातेः सत्सु पतेयमिति स्वप्रार्थितेन्द्रवरेण नैमिषे यजतां
स्वदौहित्राणां मध्ये भुवंप्रति पतनम् ॥ २ ॥
ययातिना तैः प्रदित्सितसुकृतफलप्रतिग्रहानभिरोचनम् ॥ ३ ॥
तत्रागतया माधव्या तेषां तद्दौहित्रमामभिधाय ययातये तेभ्यः
सुकृतफलप्रदापनपूर्वकं स्वसुकृतफलार्धदानम् ॥ ४ ॥
गालवेन स्वतपोष्टमांशफलदानम् ॥ ५ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१२१-० (३५८६९)
नारद उवाच। ५-१२१-०क्ष (३७४१)
अथ प्रचलितः स्थानादासनाच्च परिच्युतः ।
कम्पितेनेव मनसा धर्षितः शेकवाह्निना ॥ ५-१२१-१ (३५८७०)
म्लानस्रग्भ्रष्टविज्ञानः प्रभ्रष्टमुकुटाङ्गदः ।
विघूर्णन्स्रस्तसर्वाङ्गः प्रभ्रष्टाभरणाम्बरः ॥ ५-१२१-२ (३५८७१)
अदृश्यमानस्तान्पश्यन्नपश्यंश्च पुनः पुनः ।
शून्यः शून्येन मनसा प्रपतिष्यन्महीतलम् ॥ ५-१२१-३ (३५८७२)

किं मया मनसा ध्यातमशुभं धर्मदूषणम् ।
येनाहं चलितः स्थानादिति राजा व्यचिन्तयत् ॥ ५-१२१-४ (३५८७३)
ते तु तत्रैव राजानः सिद्धाश्चाप्सरसस्तथा ।
अपश्यन्त निरालम्बं तं ययातिं परिच्युतम् ॥ ५-१२१-५ (३५८७४)
अथैत्य पुरुषः कश्चित्क्षीणपुण्यनिपातकः ।
ययातिमब्रवीद्राजन्द्रेवराजस्य शासनात् ॥ ५-१२१-६ (३५८७५)
अतीव मदमत्तस्त्वं न कंचिन्नावमन्यसे ।
मानेन भ्रष्टः स्वर्गस्ते नार्हस्त्वं पार्थिवात्मज ॥ ५-१२१-७ (३५८७६)
न च प्रज्ञायसे गच्छ पतस्वेति तमब्रवीत् ।
पतेयं सत्स्विति वचस्त्विरुत्का नहुषात्मजः ॥ ५-१२१-८ (३५८७७)
पतिष्यंन्तयामास गतिं गतिमतां वरः ।
एतस्मिन्नेव काले तु नैमिषे पार्थिवर्षभान् ॥ ५-१२१-९ (३५८७८)
चतुरोऽपश्यत नृपस्तेषां मध्ये पपात ह ।
प्रतर्दनो वसुमनाः शिबिरौशीनरोऽष्टकः ॥ ५-१२१-१० (३५८७९)
वाजपेयेन यज्ञेन तर्पयन्ति सुरेश्वरम् ।
तेषामध्वरजं धूमं स्वर्गद्वारमुपस्थितम् ॥ ५-१२१-११ (३५८८०)
ययातिरुपजिघ्रन्वै निपपात महीं प्रति ।
भूमौ स्वर्गे च संबद्धां नदीं धूममयीमिव ।
गङ्गां गामिव गच्छन्तीमालम्ब्य जगतीपतिः ॥ ५-१२१-१२ (३५८८१)
श्रीमत्स्ववभृथाग्येषु चतुर्षु प्रतिबन्धुषु ।
मध्ये निपतितो राजा लोकपालोपमेषु सः ॥ ५-१२१-१३ (३५८८२)
चतुर्षु हुतकल्पेषु राजसिंहमहाग्निषु ।
पपात मध्ये राजर्षिर्ययातिः पुण्यसङ्क्षये ॥ ५-१२१-१४ (३५८८३)
तमाहुः पार्थिवाः सर्वे दीप्यमानमिव श्रिया ।
को भवान्कस्य वा बन्धुर्देशस्य नगरस्य वा ॥ ५-१२१-१५ (३५८८४)
यक्षो वाऽप्यथवा देवो गन्धर्वो राक्षसोऽपि वा ।
न हि मानुषरूपोसि कोवार्थः काङ्क्ष्यते त्वया ॥ ५-१२१-१६ (३५८८५)
ययातिरुवाच । ५-१२१-१७क्ष् (३७४२)
ययातिरस्मि राजर्षिः क्षीणपुण्यश्च्युतो दिवः ।
पतेयं सत्स्विति ध्यायन्भवत्सु पतितस्ततः ॥ ५-१२१-१७ (३५८८६)
राजान ऊचुः । ५-१२१-१८क्ष् (३७४३)
सत्यमेतद्भवतु ते काङ्क्षितं पुरुषर्षभ ।
सर्वेषां नः क्रतुफलं धर्मश्च प्रतिगृह्यताम् ॥ ५-१२१-१८ (३५८८७)
ययातिरुवाच । ५-१२१-१९क्ष् (३७४४)
नाहं प्रतिग्रहधनो ब्राह्मणः क्षत्रियोऽह्यहम् ।
न च मे प्रवणा बुद्धिः परपुण्यविनाशने ॥ ५-१२१-१९ (३५८८८)

नारद उवाच। ५-१२१-२०क्ष् (३७४५)
एतस्मिन्नेव काले तु मृगचर्याक्रमागताम् ।
माधवीं प्रेक्ष्य राजानस्तेऽभिवाद्येदमब्रुवन् ॥ ५-१२१-२० (३५८८९)
किमागमनकृत्यं ते किं कुर्मः शासनं तव ।
आज्ञाप्या हि वयं सर्वे तव पुत्रास्तपोधने ॥ ५-१२१-२१ (३५८९०)
नारद उवाच। ५-१२१-२२क्ष् (३७४६)
तेषां तद्भाषितं श्रुत्वा माधवी परया मुदा ।
पितरं समुपागच्छद्ययातिं सा ववन्द च ॥ ५-१२१-२२ (३५८९१)
स्पृष्ट्वा मूर्धनि तान्पुत्रांस्तापसी वाक्यमब्रवीत् ।
दौहित्रास्तव राजेन्द्र मम पुत्रा न ते पराः ॥ ५-१२१-२३ (३५८९२)
इमे त्वां तारयिष्यन्ति दिष्टमेतत्पुरातनम् ।
अहं ते दुहिता राजन्माधवी मृगचारिणी ॥ ५-१२१-२४ (३५८९३)
मयाऽप्युपचितो धर्मस्ततोऽर्धं प्रतिगृह्यताम् ।
यस्माद्राजन्नराः सर्वे अपत्यफलभागिनः ॥ ५-१२१-२५ (३५८९४)
तस्मादिच्छन्ति दौहित्रान्यथा त्वं वसुधाधिप । ५-१२१-२६ (३५८९५)
नारद उवाच ।
ततस्ते पार्थिवाः सर्वे शिरसा जननीं तदा ॥ ५-१२१-२६क्ष् (३७४७)
अभिवाद्य नमस्कृत्य मातामहमथाब्रुवन् ।
उच्चैरनुपमैः स्निग्धैः स्वरैरापूर्य मेदिनीम् ।
मातामहं नृपतयस्तारयन्तो दिवश्च्युतम् । ५-१२१-२७ (३५८९६)
ग राजान ऊचुः । ५-१२१-२८क्ष् (३७४८)
राजधर्मगुणोपेताः सत्यधर्मगुणान्विताः ।
दौहित्रास्ते वयं राजन्दिवमारोह पार्थिव ॥ ५-१२१-२८ (३५८९७)
नारद उवाच।' ५-१२१-२९क्ष् (३७४९)
अथाकस्मादुपगतो गालवोऽप्याह पार्थिवम् ।
तपसो मेऽष्टभागेन स्वर्गमारोहतां भवान् ॥ ॥ ५-१२१-२९ (३५८९८)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
एकविंशत्यधिकशततमोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-१२१-१० शिबिरौशीनर इत्येकः ॥
५-१२१-१३ प्रतिबन्धुषु दौहित्ररूपेषु ॥
५-१२१-१५ बन्धुः पालयिता ॥
५-१२१-२९ अष्टभागेन अष्टमांशेन ॥

॥ श्रीः ॥
५.१२२. अध्यायः १२२

Mahabharata - Udyoga Parva - Chapter Topics
स्वदौहित्रादिदत्तपुण्यफलप्रभावेण पुनर्ययातेः स्वर्गगमनम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१२२-० (३५८९९)
नारद उवाच। ५-१२२-०क्ष् (३७५०)
प्रत्यभिज्ञातमात्रोऽथ सङ्गिस्तैर्नरपुङ्गवः ।
समारुरोह नृपतिरस्पृशन्वसुधातलम् ।
ययातिर्दिव्यसंस्थानो बभूव विगतज्वरः ॥ ५-१२२-१ (३५९००)
दिव्यमाल्याम्बरधरो दिव्याभरणभूषितः ।
दिव्यगन्धगुणोपेतो न पृथ्वीमस्पृशत्पदा ॥ ५-१२२-२ (३५९०१)
ततो वसुमनाः पूर्वमुच्चैरुच्चारयन्वचः ॥
ख्यातो दानपतिर्लोके व्याजहार नृपं तदा ॥ ५-१२२-३ (३५९०२)
प्राप्तवानस्मि यल्लोके सर्ववर्णेष्वगर्हया ।
तदप्यथ च दास्यामि तेन संयुज्यतां भवान् ॥ ५-१२२-४ (३५९०३)
यत्फलं दानशीलस्य क्षमाशीलस्य यत्फलम् ।
यच्च मे फलमाधाने तेन संयुज्यतां भवान् ॥ ५-१२२-५ (३५९०४)
ततः प्रतर्दनोऽप्याह वाक्यं क्षत्रियपुङ्गवः ।
यथा धर्मरतिर्नित्यं नित्यं युद्धपरायणः ॥ ५-१२२-६ (३५९०५)
प्राप्तवानस्मि यल्लोके क्षत्रवंशोद्भवं यशः ।
वीरशब्दफलं चैव तेन संयुज्यतां भवान् ।
यथा धर्मे रतिर्नित्यं तेन सत्येन खं व्रज ॥ ५-१२२-७ (३५९०६)
शिबिरौशीनरो धीमानुवाच मधुरां गिरम् ।
यथा बालेषु नारीषु वैवाह्येषु तथैव च ॥ ५-१२२-८ (३५९०७)
सङ्गरेषु निपातेषु तथा तद्व्यसनेषु च ।
अनृतं नोक्तपूर्वं मे तेन सत्येन खं व्रज ॥ ५-१२२-९ (३५९०८)
यथा प्राणांश्च राज्यं च राजन्कामसुखानि च ।
त्यजेयं न पुनः सत्यं तेन सत्येन खं व्रज ॥ ५-१२२-१० (३५९०९)
यथा सत्येन मे धर्मो यथा सत्येन पावकः ।
प्रीतः शतक्रतुश्चैव तेन सत्येन खं व्रज ॥ ५-१२२-११ (३५९१०)
अष्टकस्त्वथ राजर्षिः कौशिको माधवीसुतः ।
अनेकशतयज्वानं नाहुषं प्राह धर्मवित् ॥ ५-१२२-१२ (३५९११)

शतशः पुण्डरीका मे गोसवाश्वरिताः प्रभो ।
क्रतवो वाजपेयाश्च तेषां फलमवाप्नुहि ॥ ५-१२२-१३ (३५९१२)
न मे रत्नानि न धनं न तथाऽन्ये परिच्छदा ।
क्रतुष्वनुपयुक्तानि तेन सत्येन खं व्रज ॥ ५-१२२-१४ (३५९१३)
नारद उवाच । ५-१२२-१५क्ष् (३७५१)
यथायथा हि जल्पन्ति दौहित्रास्तं नराधिपम् ।
तथतथा वसुमतीं त्यक्त्वा राजा दिवं ययौ ॥ ५-१२२-१५ (३५९१४)
एवं सर्वे समस्तैस्ते राजानः सुकृतैस्तदा ।
ययातिं स्वर्गतो भ्रष्टं तारयामासुरञ्जसा ॥ ५-१२२-१६ (३५९१५)
दौहित्राः स्वेन धर्मेण यज्ञदानकृतेन वै ।
चतुर्षु राजवंशेषु संभूताः कुलवर्धनाः ।
मातामहं महाप्राज्ञं दिवमारोपयन्त ते ॥ ५-१२२-१७ (३५९१६)
राजान ऊचुः । ५-१२२-१८क्ष् (३७५२)
राजधर्मगुणोपेताः सर्वधर्मगुणान्विताः ।
दौहित्रास्ते वयं राजन्दिवमारोह पार्थिव ॥ ॥ ५-१२२-१८ (३५९१७)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
द्वाविंशत्यधिकशततमोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-१२२-१ प्रत्यभिज्ञातेति ॥
५-१२२-५ आधाने अग्न्याधानोपलक्षिते श्रौतधर्मे ॥
५-१२२-९ आपत्सु संकटेषु । व्यसनेषु द्यूतादिषु । खं स्वर्गम् ॥

उद्योगपर्व - अध्याय १२३
॥ श्रीः ॥
५.१२३. अध्यायः १२३

Mahabharata - Udyoga Parva - Chapter Topics
स्वर्गे ययातिप्रश्नानुरोधेन पितामहेन तत्पतनकारणकथनम् ॥ १ ॥
नारदेन ययात्युपाख्यानोपसंहारपूर्वकं दुर्योधनंप्रति
गालवययातिदृष्टान्तप्रदर्शनेन निर्बन्धाभिमानत्यागपूर्वकं
पाण्डवैः सन्धिकरणविधानम् ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१२३-० (३५९१८)

नारद उवाच । ५-१२३-०क्ष् (३७५३)
सङ्गिरारोपितः स्वर्गं पार्थिवैर्भूरिदक्षिणैः ।
अभ्यनुज्ञाय दौहित्रान्ययातिर्दिवमास्थितः ॥ ५-१२३-१ (३५९१९)
अभिवृष्टश्च वर्षेण नानापुष्पसुगन्धिना ।
परिष्वक्तश्च पुण्येन वायुना पुण्यगन्धिना ॥ ५-१२३-२ (३५९२०)
अचलं स्थानमासाद्य दौहित्रफलनिर्जितम् ।
कर्मभिः स्वैरुपचितो जज्वाल परया श्रिया ॥ ५-१२३-३ (३५९२१)
उपगीतोपनृत्तश्च गन्धर्वाप्सरसां गणैः ।
प्रीत्या प्रतिगृहीतश्च स्वर्गे दुन्दुभिनिःस्वनैः ॥ ५-१२३-४ (३५९२२)
अभिष्टुतश्च विविधैर्देवराजर्षिचारणैः ।
अर्चितश्चोत्तमार्घेण दैवतैरभिनन्दितः ॥ ५-१२३-५ (३५९२३)
प्राप्तः स्वर्गफलं चैव तमुवाच पितामहः ।
निर्वृतं शान्तमनसं वचोभिस्तर्पयन्निव ॥ ५-१२३-६ (३५९२४)
चतुष्पादस्त्वया धर्मश्रितो लोक्येन कर्मणा ।
अक्षयस्तव लोकोऽयं कीर्तिश्चैवाक्षया दिवि ॥ ५-१२३-७ (३५९२५)
पुनस्त्वयैव राजर्षे स्वकृतेन विघातितम् ।
आवृतं तमसा चेतः सर्वेषां स्वर्गवासिनाम् ॥ ५-१२३-८ (३५९२६)
येन त्वां नाभिजानन्ति ततोऽज्ञातोसि पातितः ।
प्रीत्यैव चासि दौहित्रैस्तारितस्त्वमिहागतः ॥ ५-१२३-९ (३५९२७)
स्थानं च प्रतिपन्नोऽसि कर्मणा स्वेन निर्जितम् ।
अचलं शाश्वतं पुण्यमुत्तमं ध्रुवमव्ययम् ॥ ५-१२३-१० (३५९२८)
ययातिरुवाच । ५-१२३-११क्ष् (३७५४)
भगवन्संशयो मेऽस्ति कश्चितं छेत्तुमर्हसि ।
न ह्यन्यमहमर्हामि प्रष्टुं लोकपितामह ॥ ५-१२३-११ (३५९२९)
बहुवर्षसहस्रान्तं प्रजापालनवर्धितम् ।
अनेकक्रतुदानौघैरार्जितं मे महत्फलम् ॥ ५-१२३-१२ (३५९३०)
कथं तदल्पकालेन क्षीणं येनास्मि पातितः ।
भगवन्वेत्थ लोकांश्च शाश्वतान्मम निर्मितान् ।
कथं नु मम तत्सर्वं विप्रनष्टं महाद्युते ॥ ५-१२३-१३ (३५९३१)
पितामह उवाच । ५-१२३-१४क्ष् (३७५५)
बहुवर्षसहस्रान्तं प्रजापालनवर्धितम् ।
अनेकक्रतुदानौघैर्यत्त्वयोपार्जितं फलम् ॥ ५-१२३-१४ (३५९३२)
तदनेनैव दोषेण क्षीणं येनासि पातितः ।
अभिमानेन राजेन्द्र धिक्कृतः स्वर्गवासिभिः ॥ ५-१२३-१५ (३५९३३)
नायं मानेन राजर्षे न बलेन न हिंसया ।
न शाठ्येन न मायाभिर्लोको भवति शाश्वतः ॥ ५-१२३-१६ (३५९३४)

नावमान्यास्त्वया राजन्नधमोत्कृष्टमध्यमाः ।
न हि मानप्रदग्धानां कश्चिदस्ति शमः क्वचित् ॥ ५-१२३-१७ (३५९३५)
पतनारोहणमिदं कथयिष्यन्ति ये नराः ।
विषमाण्यपि ते प्राप्तास्तरिष्यन्ति न संशयः ॥ ५-१२३-१८ (३५९३६)
नारद उवाच । ५-१२३-१९क्ष् (३७५६)
एष दोषोऽभिमानेन पुरा प्राप्तो ययातिना ।
निर्बध्नताऽतिमात्रं च गालवेन महीपते ॥ ५-१२३-१९ (३५९३७)
श्रोतव्यं हितकामानां सुहृदां हितमिच्छताम् ।
न कर्तव्यो हि निर्बन्धो निर्बन्धो हि क्षयोदयः ॥ ५-१२३-२० (३५९३८)
तस्मात्त्वमपि गान्धारे मानं क्रोधं च वर्जय ।
सन्धत्स्व पाण्डवैर्वीर संरम्भं त्यज पार्थिव ॥ ५-१२३-२१ (३५९३९)
स भवान्सुहृदां पथ्यं वचो गृह्णातु माऽनृतम् ।
समर्थैर्विग्रहं कृत्वा विषमस्थो भविष्यसि ॥ ५-१२३-२२ (३५९४०)
ददाति यत्पार्थिव यत्करति
यद्वा तपस्तप्यति यज्जुहोति ।
न तस्य नाशोऽस्ति न चापकर्षो
नान्यस्तदश्नाति स एव कर्ता ॥ ५-१२३-२३ (३५९४१)
इदं महाख्यानमनुत्तमं हितं
बहुश्रुतानां गतरोषरागिणाम् ।
समीक्ष्य लोके बहुधा प्रधारितं
त्रिवर्गदृष्टिः पृथिवीमुपाश्नुते ॥ ५-१२३-२४ (३५९४२)
ग एतत्पुण्यतमं राजन्ययातेश्चरितं महत् ।
यच्छ्रुत्वा श्रावयित्वा च स्वर्गं यान्तीह मानवाः ॥' ॥ ५-१२३-२५ (३५९४३)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
त्रयोविंशत्यधिकशततमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-१२३-८ स्वकृतेन सम्यक्संपादितेन कर्मणा । मया समोऽन्यो नास्तीति
वाक्प्रयोगेण । तमसा क्रोधेन ॥
५-१२३-२४ प्रधारितं निश्चितम् ॥

उद्योगपर्व - अध्याय १२४
॥ श्रीः ॥
५.१२४. अध्यायः १२४

Mahabharata - Udyoga Parva - Chapter Topics

धृतराष्ट्रेण श्रीकृष्णंप्रति दुर्योधनानुनयप्रार्थन ॥ १ ॥
श्रीकृष्णेन दुर्योधनानुनयः ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१२४-० (३५९४४)
धृतराष्ट्र उवाच। ५-१२४-०क्ष् (३७५७)
भगवन्नेवमेवैतद्यथा वदसि नारद ।
इच्छामि चाहमप्येवं न त्वीशो भगवन्नहम् ॥ ५-१२४-१ (३५९४५)
वैशम्पायन उवाच। ५-१२४-२क्ष् (३७५८)
एवमुक्त्वा ततः कृष्णमभ्यभाषत कौरवः ।
स्वर्ग्यं लोक्यं च मामात्थ धर्म्यं न्याय्यं च केशव ॥ ५-१२४-२ (३५९४६)
न त्वहं स्ववशस्तात क्रियमाणं न मे प्रियम् ।
ग्न मंस्यन्ते दुरात्मानः पुत्रा मम जनार्दन ॥' ५-१२४-३ (३५९४७)
अङ्ग दुर्योधनं कृष्ण मन्दं शास्त्रातिगं मम ।
अनुनेतुं महाबाहो यतस्व पुरुषोत्तम ॥ ५-१२४-४ (३५९४८)
न श्रृणोति महाबाहो वचनं साधु भाषितम् ।
गान्धार्याश्च हृषीकेश विदुरस्य च धीमतः ।
अन्येषां चैव सुहृदां भीष्मादीनां हितैषिणाम् ॥ ५-१२४-५ (३५९४९)
स त्वं पापमतिं क्रूरं पापचित्तमचेतनम् ।
अनुशाधि दुरात्मानं स्वयं दुर्योधनं नृपम् ॥ ५-१२४-६ (३५९५०)
सुहृत्कार्यं तु सुमहत्कृतं ते स्याज्जनार्दन ॥ ५-१२४-७ (३५९५१)
वैशम्पायन उवाच। ५-१२४-८क्ष् (३७५९)
ततोऽभ्यावृत्य वार्ष्णेयो दुर्योधनममर्षणम् ।
अब्रवीन्मधुरां वाचं सर्वधर्मार्थतत्त्ववित् ॥ ५-१२४-८ (३५९५२)
दुर्योधन निबोधेदं मद्वाक्यं कुरुसत्तम ।
शर्मार्थं ते विशेषेण सानुबन्धस्य भारत ॥ ५-१२४-९ (३५९५३)
महाप्रज्ञकुले जातः साध्वेतत्कर्तुमर्हसि ।
श्रुतवृत्तोपसंपन्नः सर्वैः समुदितो गुणैः ॥ ५-१२४-१० (३५९५४)
दौष्कुलेया दुरात्मानो नृशंसा निरपत्रपाः ।
त एतदीदृशं कुर्युर्यथा त्वं तात मन्यसे ॥ ५-१२४-११ (३५९५५)
धर्मार्थयुक्ता लोकेऽस्मिन्प्रवृत्तिर्लक्ष्यते सताम् ।
असतां विपरीता तु लक्ष्यते भरतर्षभ ।
विपरीता त्वियं वृत्तिरसकृल्लक्ष्यते त्वयि ॥ ५-१२४-१२ (३५९५६)
अधर्मश्चानुबन्धोऽत्र घोरः प्राणहरो महान् ।
अनिष्टश्चानिमित्तश्च न च शक्यश्च भारत ॥ ५-१२४-१३ (३५९५७)

तमनर्थं परिहरन्नात्मश्रेयः करिष्यसि ।
भ्रातॄणामथ भृत्यानां मित्राणां च परन्तप ॥ ५-१२४-१४ (३५९५८)
अधर्म्यादयशस्याच्च कर्मणस्त्वं प्रमोक्ष्यसे ॥ ५-१२४-१५ (३५९५९)
प्राज्ञैः शूरैर्महोत्साहैरात्मवद्भिर्बहुश्रुतैः ।
सन्धत्स्व पुरुषव्याघ्र पाण्डवैर्भरतर्षभ ।
तद्धितं च प्रियं चैव धृतराष्ट्रस्य धीमतः ॥ ५-१२४-१६ (३५९६०)
पितामहस्य द्रोणस्य विदुरस्य महामतेः ।
कृपस्य सोमदत्तस्य बाह्लीकस्य च धीमतः ॥ ५-१२४-१७ (३५९६१)
अश्वत्थाम्नो विकर्णस्य सञ्जयस्य विविंशतेः ।
ज्ञातीनां चैव भूयिष्ठं मित्राणां च परन्तप ॥ ५-१२४-१८ (३५९६२)
शमे शर्म भवेत्तात सर्वस्य जगतस्तथा ।
ह्रीमानसि कुले जातः श्रुतवानानृशंस्यवान् ।
तिष्ठ तात पितुः शास्त्रे मातुश्च भरतर्षभ ॥ ५-१२४-१९ (३५९६३)
एतच्छ्रेयो हि मन्यन्ते पिता यच्छास्ति भारत ।
उक्तमापद्गतः पूर्वं पितुः स्मरसि शासनम् ॥ ५-१२४-२० (३५९६४)
रोचते ते पितुस्तात पाण्डवैः सह सङ्गमः ।
सामात्यस्य कुरुश्रेष्ठ तत्तुभ्यां तात रोचताम् ॥ ५-१२४-२१ (३५९६५)
श्रुत्वा यः सुहृदां शास्त्रं मर्त्यो न प्रतिपद्यते ।
विपाकान्ते दहत्येनं किंपाकमिव भक्षितम् ॥ ५-१२४-२२ (३५९६६)
यस्तु निःश्रेयसं वाक्यं मोहान्न प्रतिपद्यते ।
स दीर्घसूत्रो हीनार्थः पश्चात्तापेन युज्यते ॥ ५-१२४-२३ (३५९६७)
यस्तु न्निःश्रेयसं श्रुत्वा प्राक्तदेवाभिपद्यते ।
आत्मनो मतमुत्सृज्य स लोके सुखमेधते ॥ ५-१२४-२४ (३५९६८)
योऽर्थकामस्य वचनं प्रातिकूल्यान्न मृष्यते ।
शृणोति प्रतिकूलानि द्विषतां वशमेति सः ॥ ५-१२४-२५ (३५९६९)
सतां मतमतिक्रम्य योऽसतां वर्तते मते ।
शोचन्ते व्यसने तस्य सुहृदो नचिरादिव ॥ ५-१२४-२६ (३५९७०)
मुख्यानमात्यानुत्सृज्य यो निहीनान्निषेवते ।
स घोरामापदं प्राप्य नोत्तारमधिगच्छति ॥ ५-१२४-२७ (३५९७१)
योऽसत्सेवी वृथाचारो न श्रोता सुहृदां सताम् ।
परान्वृणीति स्वान्द्वेष्टि तं गौस्त्यजति भारत ॥ ५-१२४-२८ (३५९७२)
तत्वं विरुद्धा तैर्वीरैस्येतत्राणमिच्छसि ।
अशिष्टेभ्योऽसमर्थेभ्यो मूढेभ्यो भरतर्षभ ॥ ५-१२४-२९ (३५९७३)
को हि शक्रसमाञ्ज्ञातीनतिक्रम्य महारथान् ।
अन्येभ्यस्त्राणमाशंसेत्त्वदन्यो भुवि मानवः ॥ ५-१२४-३० (३५९७४)
जन्मप्रभृति कौन्तेया नित्यं विनिकृतास्त्वया ।

न च ते जातु कुप्यन्ति धर्मात्मानो हि पाण्डवाः ॥ ५-१२४-३१ (३५९७५)
मिथ्योपचरितास्तात जन्मप्रभृति बान्धवाः ।
त्वयि सम्यङ्महाबाहो प्रतिपन्ना यशस्विनः ॥ ५-१२४-३२ (३५९७६)
त्वयाऽपि प्रतिपत्तव्यं तथैव भरतर्षभ ।
स्वेषु बन्धुषु मुख्येषु मा मन्युवशमन्वगाः ॥ ५-१२४-३३ (३५९७७)
त्रिवर्गयुक्तः प्राज्ञानामारम्भो भरतर्षभ ।
धर्मार्थावनुरुद्ध्यन्ते त्रिवर्गासंभवे नराः ॥ ५-१२४-३४ (३५९७८)
पृथक्व विनिविष्टानां धर्मं धीरोऽनुरुध्यते ।
मध्यमोऽर्थं कलिं बालः काममेवानुरुद्ध्यते ॥ ५-१२४-३५ (३५९७९)
इन्द्रियैः प्राकृतो लोभाद्धर्मं विप्रजहाति यः ।
कामार्थावनुपायेन लिप्समानो विनश्यति ॥ ५-१२४-३६ (३५९८०)
कामार्थौ लिप्समानस्तु धर्ममेवादितश्चरेत् ।
न हि धर्मादपैत्यर्थः कामो वाऽपि कदाचन ॥ ५-१२४-३७ (३५९८१)
उपायं धर्ममेवाहुस्त्रिवर्गस्य विशांपते ।
लिप्समानो हि तेनाशु कक्षेऽग्निरिव वर्धते ॥ ५-१२४-३८ (३५९८२)
स त्वं तातानुपायेन लिप्ससे भरतर्षभ ।
आधिराज्यं महद्दीप्तं प्रथितं सर्वराजसु ॥ ५-१२४-३९ (३५९८३)
आत्मानं तक्षति ह्येष वनं परशुना यथा ।
यः सम्यग्वर्तमानेषु मिथ्या राजन्प्रवर्तते ।
न तस्य हि मतिं छिन्द्याद्यस्य नेच्छेत्पराभवम् ॥ ५-१२४-४० (३५९८४)
अविच्छिन्नमतेरस्य कल्याणे धीयते मतिः ।
आत्मवान्नावमन्येत त्रिषु लोकेषु भारत ॥ ५-१२४-४१ (३५९८५)
अप्यन्यं प्राकृतं कञ्चित्किमु तान्पाण्डवर्षभान् ।
अमर्षवशमापन्नो न किंचिद्बुद्ध्यते जनः ॥ ५-१२४-४२ (३५९८६)
छिद्यते ह्याततं सर्वं प्रमाणं पश्य भारत ।
श्रेयस्ते दुर्जनात्तात पाण्डवैः सह सङ्गतम् ॥ ५-१२४-४३ (३५९८७)
तैर्हि संप्रीपमाणस्त्वं सर्वान्कामानवाप्स्यसि ।
पाण्डवैर्निर्मितां भूमिं भुञ्जानो राजसत्तम ॥ ५-१२४-४४ (३५९८८)
पाण्डवान्पृष्ठतः कृत्वा त्राणमाशससऽन्वतः ।
दुःशासने दुर्विषहे कर्णे चापि ससौबले ॥ ५-१२४-४५ (३५९८९)
एतेष्वैश्वर्यमाधाय भूतिमिच्छसि भारत ।
न चैते तव पर्याप्ता ज्ञाने धर्मार्थयोस्तथा ॥ ५-१२४-४६ (३५९९०)
विक्रमे चाप्यपर्याप्तः पाण्डवान्प्रति भारत ।
न हीमे सर्वराजानः पर्याप्ताः सहितास्त्वया ॥ ५-१२४-४७ (३५९९१)
क्रुद्धस्य भीमसेनस्य प्रेक्षितुं मुखमाहवे ।
इदं सनिहितं तात समग्रं पार्थिवं बलम् ॥ ५-१२४-४८ (३५९९२)

अयं भीष्मस्तथा द्रोणः कर्णश्चायं तथा कृपः ।
भूरिश्रवाः सौमदत्तिरश्वत्थामा जयद्रथः ॥ ५-१२४-४९ (३५९९३)
अशक्ताः सर्व एवैते प्रतियोद्धुं धनञ्जयम् ।
अजेयो ह्यर्जुनः सङ्ख्ये सर्वैरपि सुरासुरैः ।
मानुषैरपि गन्धर्वैर्मा युद्ध चेत आधिथाः ॥ ५-१२४-५० (३५९९४)
दृश्यतां वा पुमान्कश्चित्समग्रे पार्थिवे बले ।
योऽर्जुनं समरे प्राप्य स्वस्तिमानाव्रजेद्गृहान् ॥ ५-१२४-५१ (३५९९५)
किं ते जनक्षयेणेह कृतेन भरतर्षभ ।
यस्मिञ्चिते जितं ते स्यात्पुमानेकः स दृश्यतां ॥ ५-१२४-५२ (३५९९६)
यः सदेवान्सगन्धर्वान्सयक्षासुरपन्नगान् ।
अजयत्खाण्डवप्रस्थे कस्तं युद्धेय मानवः ॥ ५-१२४-५३ (३५९९७)
तथा विराटनगरे श्रूयते महदद्भुतम् ।
एकस्य च बहूनां च पर्याप्तं तन्निदर्शनम् ॥ ५-१२४-५४ (३५९९८)
युद्धे येन महादेवः साक्षात्सन्तोषितः शिवः ।
तमजेयमनाधृष्यं विजेतुं जिष्णुमच्युतम् ।
आशंससीह समरे वीरमर्जुनमूर्जितम् ॥ ५-१२४-५५ (३५९९९)
मद्द्वितीयं पुनः पार्थं कः प्रार्थयितुमर्हति ।
युद्धे प्रतीपमायान्तमपि साक्षात्पुरन्दरः ॥ ५-१२४-५६ (३६०००)
बाहुभ्यामुद्वहेद्भूमिं दहेत्क्रुद्ध इमाः प्रजाः ।
पातयेत्रिदिवाद्देवान्योऽर्जुनं समरे जयेत् ॥ ५-१२४-५७ (३६००१)
पश्य पुत्रांस्तथा भ्रातॄञ्ज्ञातीन्संबन्धिनस्तथा ।
त्वत्कृते न विनश्येयुरिमे भरतसत्तमाः ॥ ५-१२४-५८ (३६००२)
अस्तु शेषं कौरवाणां मा पराभूदिदं कुलम् ।
कुलघ्न इति नोच्येथा नष्टकीर्तिर्नराधिप ॥ ५-१२४-५९ (३६००३)
त्वामेव स्थापयिष्यन्ति यौवराज्ये महारथाः ।
महाराज्येऽपि पितरं धृतराष्ट्रं जनेश्वरम् ॥ ५-१२४-६० (३६००४)
मा तात श्रियमायान्तीमवमंस्थाः समुद्यताम् ।
अर्धं प्रदाय पार्थेभ्यो महतीं श्रियमाप्नुहि ॥ ५-१२४-६१ (३६००५)
पाण्डवैः संशमं कृत्वा कृत्वा च सुहृदां वचः ।
संप्रीयमाणो मित्रैश्च चिरं भद्राण्यवाप्स्यसि ॥ ॥ ५-१२४-६२ (३६००६)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
चतुर्विंशत्यधिकशततमोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-१२४-१९ शास्त्रे शासने ॥

५-१२४-२२ किंपाकं महाकालफलम् ॥
५-१२४-२४ निःश्रेयसं कल्याणम् ॥
५-१२४-२८ गौः भूमिः ॥
५-१२४-३२ उपचरिताः प्रचारिताः ॥
५-१२४-३५ अर्थं कलि कलहहेतम ॥
५-१२४-३६ अनुपायन हीनोपायेन ॥
५-१२४-४४ निर्मितां वशीकरणेनोत्पादिताम् ॥
५-१२४-५२ यस्मिन्नर्जुने जिते सति ते तव जितं जयः स्यात् ॥

उद्योगपर्व - अध्याय १२५
॥ श्रीः ॥
५.१२५. अध्यायः १२५

Mahabharata - Udyoga Parva - Chapter Topics
भीष्मद्रोणाभ्यां दुर्योधनंप्रति श्रीकृष्णवचनादरणविधानम् ॥ १ ॥
तथा धृतराष्ट्रेणापि दुर्योधनंप्रति श्रीकृष्णवाक्यप्रत्याख्याने
अनर्थप्राप्तिकथनम् ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१२५-० (३६००७)
वैशम्पायन उवाच। ५-१२५-०क्ष् (३७६०)
ततः शान्तनवो भीष्मो दुर्योधनममर्षणम् ।
केशवस्य वचः श्रुत्वा प्रोवाच भरतर्षभ ॥ ५-१२५-१ (३६००८)
कृष्णेन वाक्यमुक्तोऽसि सृहृदां शममिच्छता ।
अन्वपद्यस्व तत्तात मा मन्युवशमन्वगाः । ५-१२५-२ (३६००९)
अकृत्वा वचनं तात केशवस्य महात्मनः ।
श्रेयो न जातु न सुखं न कल्याणमवाप्स्यसि ॥ ५-१२५-३ (३६०१०)
धर्म्यमर्थ्यं महाबाहुराह त्वां तात केशवः ।
तदर्थमभिपद्यस्व मा राजन्नीनशः प्रजाः ॥ ५-१२५-४ (३६०११)
ज्वलितां त्वमिमां लक्ष्मीं भारतीं सर्वराजसु ।
जीवतो धृतराष्ट्रस्य दौरात्म्याद्भंशयिष्यसि ॥ ५-१२५-५ (३६०१२)
आत्मानं च सहामात्यं सपुत्रभ्रातृबान्धवम् ।
अहमित्यनया बुद्ध्या जीविताद्भंशयिष्यतसि ॥ ५-१२५-६ (३६०१३)
अतिक्रामन्केशवस्य तथ्यं वचनमर्थवत् ।
पितुश्च भारतश्रेष्ठ विदुरस्य च धीमतः ॥ ५-१२५-७ (३६०१४)
मा कुलघ्नः कुपुरुषो दुर्मतिः कापथं गमः ।

मातरं पितरं चैव मा मञ्जीः शोकसागरे ॥ ५-१२५-८ (३६०१५)
अथ द्रोणोऽब्रवीत्तत्र दुर्योधनमिदं वचः ।
अमर्षवशमापन्नं निःश्वसन्तं पुनःपुनः ॥ ५-१२५-९ (३६०१६)
धर्मार्थयुक्तं वचनमाह त्वां तात केशवः ।
तथा भीष्मः शान्तनवस्तञ्जुषस्व नराधिप ॥ ५-१२५-१० (३६०१७)
प्राज्ञौ मेधाविनौ दान्तावर्थकामौ बहुश्रुतौ ।
आहतुस्त्वां हितं वाक्यं तञ्जुषस्व नराधिप ॥ ५-१२५-११ (३६०१८)
अनुतिष्ठ महाप्राज्ञ कृष्णभीष्मौ यदूचतुः ।
माधवं बुद्धिमोहेन माऽवमंस्थाः परन्तप ॥ ५-१२५-१२ (३६०१९)
ये त्वां प्रोत्साहयन्त्येते नैते कृत्याय कर्हिचित् ।
वैरं परेषां ग्रीवायां प्रतिमोक्ष्यन्ति संयुगे ॥ ५-१२५-१३ (३६०२०)
मा जीघनः प्रजाः सर्वाः पुत्रान्भ्रातॄंस्तथैव च ।
वासुदेवार्जुनौ यत्र विद्धयजेयानलं हि तान् ॥ ५-१२५-१४ (३६०२१)
एतच्चैव मतं सत्यं सुहृदोः कृष्णभीष्मयोः ।
यदि नादास्यसे तात पश्चात्तप्स्यसि भारत ॥ ५-१२५-१५ (३६०२२)
यथोक्तं जामदग्न्येन भूयानेष ततोऽर्जुनः ।
कृष्णो हि देवकीपुत्रो देवैरपि सुदुःसहः ।
किं ते सुखप्रियेणेह प्रोक्तेन भरतर्षभ ॥ ५-१२५-१६ (३६०२३)
एतत्ते सर्वमाख्यातं यथेच्छसि तथा कुरु ।
न हि त्वामुत्सहे वक्तुं भूयो भरतसत्तम ॥ ५-१२५-१७ (३६०२४)
वैशम्पायन उवाच। ५-१२५-१८क्ष् (३७६१)
तस्मिन्वाक्यान्तरे वाक्यं क्षत्ताऽपि विदुरोऽब्रवीत् ।
दुर्योधनमभिप्रेक्ष्य धार्तराष्ट्रममर्षणम् ॥ ५-१२५-१८ (३६०२५)
दुर्योधन न शोचामि त्वामहं भरतर्षभ ।
इमो तु वृद्धौ शोचामि गान्धारीं पितरं च ते ॥ ५-१२५-१९ (३६०२६)
यावनाथौ चरिष्येते त्वया नाथेन दुर्हृदा ।
हतमित्रौ हतामात्यौ लूनपक्षाविवाण्डजौ ॥ ५-१२५-२० (३६०२७)
भिक्षुकौ विचरिष्येते शोचन्तौ पृथिवीमिमाम् ।
कुलघ्नमीदृशं पापं जनयित्वा कुपूरुषम् ॥ ५-१२५-२१ (३६०२८)
अथ दुर्योधं राजा धृतराष्ट्रोऽभ्यभाषत ।
आसीनं भ्रातृभिः सार्धं राजभिः परिवारितम् ॥ ५-१२५-२२ (३६०२९)
दुर्योधन निबोधेदं शौरिणोक्तं महात्मना ।
आदत्स्व शिवमत्यन्तं योगक्षेमवदव्ययम् ॥ ५-१२५-२३ (३६०३०)
अनेन हि सहायेन कृष्णेनाक्लिष्टकर्मणा ।
इष्टान्सर्वानभिप्रायान्प्राप्स्यामः सर्वराजसु ॥ ५-१२५-२४ (३६०३१)
सुसंहतः केशवेन तात गच्छ युधिष्ठिरम् ।

चर स्वस्त्ययनं कृत्स्नं भरतानामनामयम् ॥ ५-१२५-२५ (३६०३२)
वासुदेवेन तीर्थेन तात गच्छस्व संशमम् ।
कालप्राप्तमिदं मन्ये मा त्वं दुर्योधनातिगाः ॥ ५-१२५-२६ (३६०३३)
शमं चेद्याचमानं त्वं प्रत्याख्यास्यसि केशवम् ।
त्वदर्थमभिजल्पन्तं न तवास्त्यपराभवः ॥ ॥ ५-१२५-२७ (३६०३४)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवाद्यनपर्वणि
पञ्चविंशत्यधिकशततमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-१२५-२५ सुसंहतः सुष्ठु एकीभूतः ॥
५-१२५-२६ तीर्थेन उपायेन ॥
५-१२५-२७ अपराभवो जयः ॥

उद्योगपर्व - अध्याय १२६
॥ श्रीः ॥
५.१२६. अध्यायः १२६

Mahabharata - Udyoga Parva - Chapter Topics

पुनर्भीष्मद्रोणाभ्यां दुर्योधनंप्रति परेषां युद्धसंनाहात्पूर्वमेव
तैःसह शमविधानम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१२६-० (३६०३५)
वैशम्पायन उवाच। ५-१२६-०क्ष् (३७६२)
धृतराष्ट्रवचः श्रुत्वा भीष्मद्रोणौ समव्यथौ ।
दुर्योधनमिदं वाक्यमूचतुः शासनातिगम् ॥ ५-१२६-१ (३६०३६)
यावत्कृष्णावसन्नद्धौ यावत्तिष्ठति गाण्डिवम् ।
यावद्धौम्यो न मेधाग्नौ जुहोतीह द्विषद्बलम् ॥ ५-१२६-२ (३६०३७)
यावन्न प्रेक्षते क्रूद्धः सेनां तव युधिष्ठिरः ।
ह्रीनिषेवो महेष्वासस्तावच्छाम्यतु वैशसम् ॥ ५-१२६-३ (३६०३८)
यावन्न दृश्यते पार्थः स्वेऽप्यनीके व्यवस्थितः ।
भीमसेनो महेष्वासस्तावच्छाम्यतु वैशसम् ॥ ५-१२६-४ (३६०३९)
यावन्न चरते मार्गान्पृतनामभिधर्षयन् ।
भीमसेनो गदापाणिस्तावत्संशाम्य पाण्डवैः ॥ ५-१२६-५ (३६०४०)
यावन्न शातयत्याजौ शिरांसि गजयोधिनाम् ।

गदया वीरघातिन्या फलानीव वनस्पतेः ।
कालेन परिपक्वानि तावच्छाम्यतु वैशसम् ॥ ५-१२६-६ (३६०४१)
नकुलः सहदेवश्च धृष्टद्युम्नश्च पार्षतः ॥
विराटश्च शिखण्डी च शैशुपालिश्च दंशिताः ॥ ५-१२६-७ (३६०४२)
यावन्न प्रविशन्त्येते नक्रा इव महार्णवम् ।
कृतास्त्राः क्षिप्रमस्यन्तस्तावच्छाम्यतु वैशसम् ॥ ५-१२६-८ (३६०४३)
यावन्न सुकुमारेषु शरीरेषु महीक्षिताम् ।
गार्ध्रपत्राः पतन्त्युग्रास्तावच्छाम्यतु वैशसम् ॥ ५-१२६-९ (३६०४४)
चन्दनागुरुदिग्धेषु हारनिष्कधरेषु च ।
नोरस्सु यावद्योधानां महेष्वासैर्महेषवः ॥ ५-१२६-१० (३६०४५)
कृतस्त्रैः क्षिप्रमस्यद्भिर्दूरपातिभिरायसाः ।
अभिलक्ष्यैर्निपात्यन्ते तावच्छाम्यतु वैशसम् ॥ ५-१२६-११ (३६०४६)
अभिवादयमानं त्वां शिरसा राजकुञ्जरः ।
पाणिभ्यां प्रतिगृह्णातु धर्मराजो युधिष्ठिरः ॥ ५-१२६-१२ (३६०४७)
ध्वजाङ्कुशपताकाङ्कं दक्षिणं ते सुदक्षिणः ।
स्कन्धे निक्षिपतां बहुं शान्तये भरतर्षभ ॥ ५-१२६-१३ (३६०४८)
रत्नौषधिसमेतेन रत्नाङ्गुलितलेन च ।
उपविष्टस्य पृष्ठं ते पाणिना परिमार्जतु ॥ ५-१२६-१४ (३६०४९)
शालस्कन्धो महाबहुस्त्वां स्वजानो वृकोदरः
। ५-१२६-१५ब्सामान्नाऽभिवदतां चापि शान्तये भरतर्षभ ॥
५-१२६-१५ (३६०५०)
अर्जुनेन यमाभ्यां च त्रिभिस्तैरभिवादितः ।
मूर्ध्नि तान्समुपाघ्राय प्रेम्णाऽभिवद पार्थिव ॥ ५-१२६-१६ (३६०५१)
दृष्ट्वा त्वां पाण्डवैर्वीरैर्भ्रातृभिः सह संगतम् ।
यावदानन्दजाश्रूणि प्रन्मुञ्चन्तु नराधिपाः ॥ ५-१२६-१७ (३६०५२)
घुष्यतां राजधानीषु सर्वसंपन्महीक्षिताम् ।
पृथिवी भ्रातृभावेन भुज्यतां विज्वरो भव ॥ ॥ ५-१२६-१८ (३६०५३)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
षड्विंशत्यधिकशततमोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-१२६-२ मेधाग्नौ संग्रामाग्नौ । मेघो यज्ञः ॥
५-१२६-३ वैशसं वैरम् ॥

उद्योगपर्व - अध्याय १२७
॥ श्रीः ॥

Mahabharata - Udyoga Parva - Chapter Topics

दुर्योधनेन श्रीकृष्णंप्रति स्वस्मिन्नपराधलेशोऽपि नास्तीति कथनम् ॥ १ ॥
भीष्मादिरक्षितस्य स्वस्याजय्यत्वकथनपूर्वकं युद्धे निधनसंभवेऽपि पाण्डवेभ्यः सूच्यग्रपरिमितभूमेरप्यप्रदानवचनम् ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१२७-० (३६०५४)
वैशम्पायन उवाच। ५-१२७-०क्ष् (३७६३)
श्रुत्वा दुर्योधनो वाक्यमप्रियं कुरुसंसदि ।
प्रत्युवाच महाबाहुं वासुदेवं यशस्विनम् ॥ ५-१२७-१ (३६०५५)
प्रसमीक्ष्य भवानेतद्वक्तुमर्हति केशव ।
मामेव हि विशेषेण विभाष्य परिगर्हसे ॥ ५-१२७-२ (३६०५६)
भक्तिवादेन पार्थानामकस्मान्मधुसूदन ।
भवान्गर्हयति नित्यं किं समीक्ष्य बलाबलम् ॥ ५-१२७-३ (३६०५७)
भवान्क्षत्ता च राजा वाऽप्याचार्यो वा पितामहः ।
मामेव परिगर्हन्ते नान्यं कंचन पाण्डवम् ॥ ५-१२७-४ (३६०५८)
न चाहं लक्षये कंचिद्व्यभिचारमिहात्मनः ।
अथ सर्वे भवन्तो मां विद्विषन्ति सराजकाः ॥ ५-१२७-५ (३६०५९)
न चाहं कंचिदत्यर्थमपराधमरिन्दम ।
विचिन्तयन्प्रपश्यामि सुसूक्ष्ममपि केशव ॥ ५-१२७-६ (३६०६०)
प्रियाभ्युपगते द्यूते पाण्डवा मधूसूदन ।
जिताः शकुनिना राज्यं तत्र किं मम दुष्कृतम् ॥ ५-१२७-७ (३६०६१)
यत्पुनर्द्रविणं किंचित्तत्राजीयन्त पाण्डवाः ।
तेभ्य एवाभ्यनुज्ञातं तत्तद मधुसूदन ॥ ५-१२७-८ (३६०६२)
अपराधो न चास्माकं यत्ते ह्यक्षैः पराजिताः ।
अजेया जयतां श्रेष्ठ पार्थाः प्रव्राजिता वनम् ॥ ५-१२७-९ (३६०६३)
केन वाऽप्यपवादेन विरुद्ध्यन्त्यरिभिः सह ।
अशक्ताः पाण्डवाः कृष्ण प्रहृष्टाः प्रत्यमित्रवत् ॥ ५-१२७-१० (३६०६४)
किमस्माभिः कृतं तेषां कस्मिन्वा पुनरागसि ।
धार्तराष्ट्राञ्जिघांसन्ति पाण्डवाः सृञ्जयैः सह ॥ ५-१२७-११ (३६०६५)
न चापि वयमुग्रेण कर्मणा वचनेन वा ।

प्रभ्रष्टाः प्रणमामेह भयादपि शतक्रतुम् ॥ ५-१२७-१२ (३६०६६)
न च तं कृष्ण पश्यामि क्षत्रधर्ममनुष्ठितम् ।
उत्सहेत युधा जेतुं यो नः शत्रुनिबर्हण ॥ ५-१२७-१३ (३६०६७)
न हि भीष्मकृपद्रोणाः सकर्णा मधुसूदन ।
देवैरपि युधा जेतुं शक्याः किमुत पाण्डवैः ॥ ५-१२७-१४ (३६०६८)
स्वधर्ममनुपश्यन्तो यदि माधव संयुगे ।
अस्त्रेण निधनं काले प्राप्स्यामः स्वर्ग्यमेव तत् ॥ ५-१२७-१५ (३६०६९)
मुख्यश्चैवैष नो धर्मः क्षत्रियाणां जनार्दन ।
यच्छयीमहि सङ्ग्रामे शरतल्पगता वयम् ॥ ५-१२७-१६ (३६०७०)
ते वयं वीरशयनं प्राप्स्यामो यदि संयुगे ।
अप्रणम्यैव शत्रूणां न नस्तप्स्यन्ति माधव ॥ ५-१२७-१७ (३६०७१)
कश्च जातु कुले जातः क्षत्रधर्मेण वर्तयन् ।
भयाद्वृत्तिं समीक्ष्यैवं प्रणमेदिह कर्हिचित् ॥ ५-१२७-१८ (३६०७२)
उद्यच्छेदेव न नमेदुद्यमो ह्येव पौरुषम् ।
अप्यपर्वणि भज्येत न नमेदिह कर्हिचित् ॥ ५-१२७-१९ (३६०७३)
इति मातङ्गवचनं परिप्सन्ति हितेप्सवः ।
धर्माय चैव प्रणमेद्ब्राह्मणेभ्यश्च मद्विधः ॥ ५-१२७-२० (३६०७४)
अचिन्तयन्कंचिदन्यं यावज्जीवं तथा चरेत् ।
एष धर्मः क्षत्रियाणां मतमेतच्च मे सदा ॥ ५-१२७-२१ (३६०७५)
राज्यांशश्चाभ्यनुज्ञातो यो मे पित्रा पुराऽभवत् ।
न स लभ्यः पुनर्जातु मयि जीवति केशव ॥ ५-१२७-२२ (३६०७६)
यावच्च राजा ध्रियते धृतराष्ट्रो जनार्दन ।
न्यस्तशस्त्रा वयं ते वाऽप्युपजीवाम माधव ।
अप्रदेयं पुरा दत्तं राज्यं परवतो मम ॥ ५-१२७-२३ (३६०७७)
अज्ञानाद्वा भयाद्वाऽपि मयि बाले जनार्दन ।
न तदद्य पुनर्लभ्यं पाण्डवैर्वृष्णिनन्दन ॥ ५-१२७-२४ (३६०७८)
ध्रियमाणे महाबाहौ मयि संप्रति केशव ।
यावद्धि तीक्ष्णया सूच्या विद्ध्येदग्रेण केशव ।
तावदप्यपरित्याज्यं भूमेर्नः पाण्डवान्प्रति ॥ ॥ ५-१२७-२५ (३६०७९)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
सप्तविंशत्यधिकशततमोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-१२७-१९ अपर्वणि अप्रस्तावे ॥
५-१२७-२० मातंगः मुनिः ॥

उद्योगपर्व - अध्याय १२८
॥ श्रीः ॥
५.१२८. अध्यायः १२८

Mahabharata - Udyoga Parva - Chapter Topics
श्रीकृष्णेन दुर्योधनंप्रति सगर्हणं पाण्डवेषु
तत्कृतापनयानुस्मारणम् ॥ १ ॥
दुर्योधनस्य पाण्डवैरसन्धाने कौरवैर्वन्धनपूर्वकं पाण्डवेभ्यः
स्वसमर्पणप्रतिपादकदुश्शासनवचनश्रवणजकोपात् सभातो
निर्गमनम् ॥ २ ॥
कृष्णेन धृतराष्ट्रंप्रति कुलस्यार्धे दुर्योधनपरित्यागाविधानम् ॥ ३ ॥
तथा सदृष्टान्तप्रदर्शनं दुर्योधनस्य बन्धनपूर्वकं
पाण्डवेभ्यः समर्पणविधानम् ॥ ४ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१२८-० (३६०८०)
वैशम्पायन उवाच ॥ ५-१२८-०क्ष् (३७६४)
ततः प्रहस्य दाशार्हः क्रोधपर्याकुलेक्षणः ।
दुर्योधनमिदं वाक्यमब्रवीत्कुरुसंसदि ॥ ५-१२८-१ (३६०८१)
लप्स्यसे वीरशयनं काममेतदवाप्स्यसि ।
स्थिरो भव सहामात्यो विमर्दो भविता महान् ॥ ५-१२८-२ (३६०८२)
यच्चैतन्मन्यसे मूढ न मे कश्चिद्व्यतिक्रमः ।
पाण्डवेष्विति तत्सर्वं निबोध त्वं नराधिप ॥ ५-१२८-३ (३६०८३)
श्रियां संतप्यमानेन पाण्डवानां महात्मनाम् ।
त्वया दुर्मन्त्रितं द्यूतं सौबलेन च भारत ॥ ५-१२८-४ (३६०८४)
कथं च ज्ञातयस्तात श्रेयांसः साधुसंमताः ।
तथाऽन्याय्यमुपस्थातुं जिह्मेनाजिह्मचारिणः ॥ ५-१२८-५ (३६०८५)
अक्षद्यूतं महाप्रज्ञ सतां मतिविनाशनम् ।
असतां तत्र जायन्ते भेदाश्च व्यसनानि च ॥ ५-१२८-६ (३६०८६)
तदिदं व्यसनं घोरं त्वया द्यूतमुखं कृतम् ।
असमीक्ष्य सदाचारान्सार्धं पापानुबन्धनैः ॥ ५-१२८-७ (३६०८७)
कश्चान्यो भ्रातृभार्यां वै विप्रकर्तुं तथार्हति ।
आनीय च सभां व्यक्तं यथोक्ता द्रौपदी त्वया ॥ ५-१२८-८ (३६०८८)
कुलीना शीलसंपन्ना प्राणेभ्योऽपि गरीयसी ।
महिषी पाण्डुपुत्राणां तथा विनिकृता त्वया ॥ ५-१२८-९ (३६०८९)

जानन्ति कुरवः सर्वे यथोक्ताः कुरुसंसदि ।
दुःशासनेन कौन्तेयाः प्रव्रजन्तः परन्तपाः ॥ ५-१२८-१० (३६०९०)
सम्यग्वृत्तेष्वलुब्धेषु सततं धर्मचारिषु ।
स्वेषु बन्धुषु कः साधुश्चरेदेवमसांप्रतम् ॥ ५-१२८-११ (३६०९१)
नृशंसानामनार्याणां तथा परुषभाषणम् ।
कर्णदुःशासनाभ्यां च त्वया च बहुशः कृतम् ॥ ५-१२८-१२ (३६०९२)
सह मात्रा प्रदग्धुं तान्बालकान्वारणावते ।
आस्थितः परमो यत्नो न समृद्धश्च तत्तव ॥ ५-१२८-१३ (३६०९३)
ऊषुश्च सुचिरं कालं प्रच्छन्नाः पाण्डवास्तदा ।
मात्रा सहैकचक्रायां ब्राह्मणस्य निवेशने ॥ ५-१२८-१४ (३६०९४)
विषेण सर्पबन्धैश्च यतिताः पाण्डवास्त्वया ।
सर्वोपायैर्विनाशाय न समृद्धं च तत्तव ॥ ५-१२८-१५ (३६०९५)
एवंबुद्धिः पाण्डवेषु मिथ्यावृत्तिः सदा भवान् ।
कथं ते नापराधोऽस्ति पाण्डवेषु महात्मसु ॥ ५-१२८-१६ (३६०९६)
एवंवृत्तः कथं राज्ये स्थातुमर्हसि पापकृत् ।
स राज्याच्च सुखाच्चैव ह्यस्यसे कुलपांसन ॥ ५-१२८-१७ (३६०९७)
यच्चैभ्यो याचमानेभ्यः पित्र्यमंशं न दित्सति ।
तच्च पाप प्रदाताऽसि भ्रष्टश्चर्यो निपातितः ॥ ५-१२८-१८ (३६०९८)
कृत्वा बहून्यकार्याणि पाण्डवेषु नृशंसवत् ।
मिथ्यावृत्तिरनार्यः सन्नद्य विप्रतिपद्यसे ॥ ५-१२८-१९ (३६०९९)
मातापितृभ्यां भीष्मेण द्रोणेन विदुरेण च ।
शाम्येति मुहुरुक्तोसि न च शाम्यसि पार्थिव ॥ ५-१२८-२० (३६१००)
शमे हि सुमहाँल्लाभस्तव पार्थस्य चोभयोः ।
न च रोचयसे राजन्किमन्यद्बुद्धिलाघवात् ॥ ५-१२८-२१ (३६१०१)
न शर्म प्राप्स्यसे राजन्नुत्क्रम्य सुहृदां वचः ।
अधर्म्यमयशस्यं च क्रियते पार्थिव त्वया ॥ ५-१२८-२२ (३६१०२)
वैशम्पायन उवाच। ५-१२८-२३क्ष् (३७६५)
एवं ब्रुवति दाशार्हे दुर्योधनममर्षणम् ।
दुःशासन इदं वाक्यमब्रवीत्करुसंसदि ॥ ५-१२८-२३ (३६१०३)
न चेत्सन्धास्यसे राजन्स्वेन कामेन पाण्डवैः ।
बद्ध्वा किल त्वां दास्यन्ति कुन्तीपुत्राय कौरवाः ॥ ५-१२८-२४ (३६१०४)
वैकर्तनं त्वां च मां च त्रीनेतान्मनुजर्षभ ।
पाण्डवेभ्यः प्रदास्यन्ति भीष्मो द्रोणः पिता च ते ॥ ५-१२८-२५ (३६१०५)
भ्रातुरेतद्वचः श्रुत्वा धार्तराष्ट्रः सुयोधनः ।
क्रुद्धः प्रातिष्ठतोत्थाय महानाग इव श्वसन् ॥ ५-१२८-२६ (३६१०६)
विदुरं च सोमदत्तं च महाराजं च बाह्लिकम् ।

कृपं च सोमदत्तं च भीष्मं द्रोणं जनार्दनम् ॥ ५-१२८-२७ (३६१०७)
सर्वानेताननादृत्य दुर्मतिर्निरपत्रपः ।
अशिष्टवदमर्यादो मानी मान्यावमानिता ॥ ५-१२८-२८ (३६१०८)
तं प्रस्थितमभिप्रेक्ष्य भ्रातरो मनुजर्षभम् ।
अनुजग्मुः सहामात्या राजानश्चापि सर्वशः ॥ ५-१२८-२९ (३६१०९)
सभायामुत्थितं क्रुद्धं प्रस्थितं भ्रातृभिः सह ।
दुर्योधनमभिप्रेक्ष्य भीष्मः शान्तनवोऽब्रवीत् ॥ ५-१२८-३० (३६११०)
धर्मार्थावभिसन्त्यज्य संरम्भं योऽनुमन्यते ।
हसन्ति व्यसने तस्य दुर्हृदो नचिरादिव ॥ ५-१२८-३१ (३६१११)
दुरात्मा राजपुत्रोऽयं धार्तराष्ट्रोऽनुपायवित् ।
मिथ्याभिमानी राज्यस्य क्रोधलोभवशानुगः ॥ ५-१२८-३२ (३६११२)
कालपक्वमिदं मन्ये सर्वं क्षत्रं जनार्दन ।
सर्वे ह्यनुसृता मोहात्पार्थिवाः सह मन्त्रिभिः ॥ ५-१२८-३३ (३६११३)
भीष्मस्याथ वचः श्रुत्वा दाशार्हः पुष्करेक्षणः ।
भीष्मद्रोणमुखान्सर्वानभ्यभाषत वीर्यवान् ॥ ५-१२८-३४ (३६११४)
सर्वेषां कुरुवृद्धानां महानयमतिक्रमः ।
प्रसह्य मन्दमैश्वर्ये न नियच्छन्ति यन्नृपम् ॥ ५-१२८-३५ (३६११५)
तत्र कार्यमहं मन्ये कालप्राप्तमरिन्दमाः ।
क्रियमाणे भवेच्छ्रेयस्तत्सर्वं श्रृणुतानघाः ॥ ५-१२८-३६ (३६११६)
प्रत्यक्षमेतद्भवतां यद्वक्ष्यामि हितं वचः ।
भवतामानुकूल्येन यदि रोचेत भारताः ॥ ५-१२८-३७ (३६११७)
पुत्रो वै भोजराजस्य दुराचारो ह्यनात्मवान् ।
जीवतः पितुरैश्वर्यं हृत्वा मृत्युवशं गतः ॥ ५-१२८-३८ (३६११८)
उग्रसेनसुतः कंसः परित्यक्तः स बान्धवैः ।
ज्ञातीनां हितकामेन मया शस्तो महामृधे ॥ ५-१२८-३९ (३६११९)
आहुकः पुनरस्माभिर्ज्ञातिभिश्चापि सत्कृतः ।
उग्रसेनः कृतो राजा भोजराजन्यवर्धनः ॥ ५-१२८-४० (३६१२०)
संसमेकं परित्यज्य कुलार्थे सर्वयादवाः ।
संभूय सुखमेधन्ते भारतान्धकवृष्णयः ॥ ५-१२८-४१ (३६१२१)
अपि चाप्यवदद्राजन्परमेष्ठी प्रजापतिः ।
व्यूढे देवासुरे युद्धेऽभ्युद्यतेष्वायुधेषु च ॥ ५-१२८-४२ (३६१२२)
द्वैधीभूतेषु लोकेषु विनश्यत्सु च भारत ।
अब्रवीत्तु तदा देवो भगवाँल्लोकभावनः ॥ ५-१२८-४३ (३६१२३)
पराभविष्यन्त्यसुरा दैतेया दानवैः सह ।
आदित्या वसवो रुद्रा भविष्यन्ति दिवौसकः ॥ ५-१२८-४४ (३६१२४)
देवासुरमनुष्याश्च गन्धर्वोरगराक्षसाः ।

अस्मिन्युद्धे सुसंक्रुद्धा हनिष्यन्ति परस्परम् ॥ ५-१२८-४५ (३६१२५)
ग वर्तमानं जगत्सर्वं मुहूर्तान्न भविष्यति।
इति मत्वाऽब्रवीद्धर्मं परमेष्ठी प्रजापतिः ।
वरुणाय प्रयच्छैतान्बद्ध्वा दैतेयदानवान् ॥ ५-१२८-४६ (३६१२६)
एवमुक्तस्ततो धर्मो नियोगात्परमेष्ठिनः ।
वरुणाय ददौ सर्वान्बद्ध्वा दैतेयदानवान् ॥ ५-१२८-४७ (३६१२७)
तान्बद्ध्वा धर्मपाशैश्च स्वैश्च पाशैर्जलेश्वरः ।
वरुणः सागरे यत्तो नित्यं रक्षति दानवान् ॥ ५-१२८-४८ (३६१२८)
तथा दुर्योधनं कर्णं शकुनिं चापि सौबलम् ।
बद्ध्वा दुःशासनं चापि पाण्डवेभ्यः प्रयच्छत ॥ ५-१२८-४९ (३६१२९)
त्यजेत्कुलार्थे पुरुषं ग्रामस्यार्थे कुलं त्यजेत् ।
ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत् ॥ ५-१२८-५० (३६१३०)
राजन्दुर्योधनं बद्ध्वा ततः संशाम्य पाण्डवैः ।
त्वत्कृते न विनश्येयुः क्षत्रियाः क्षत्रियर्षभ ॥ ॥ ५-१२८-५१ (३६१३१)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
अष्टाविंशत्यधिकशततमोऽध्यायः ॥

उद्योगपर्व - अध्याय १२९
॥ श्रीः ॥
५.१२९. अध्यायः १२९

Mahabharata - Udyoga Parva - Chapter Topics
विदुरेण धृतराष्ट्राज्ञया गान्धार्याः सभां प्रत्यानयनम् ॥ १ ॥
गान्धार्या दुर्योधनं पुनः सभामानाय्य तंप्रति नीतिकथ नपूर्वकं
पाण्डवैः सह शमविधानम् ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१२९-० (३६१३२)
वैशम्पायन उवाच। ५-१२९-०क्ष् (३७६६)
कृष्णस्य तु वचः श्रुत्वा धृतराष्ट्रो जनेश्वरः ।
विदुरं सर्वधर्मज्ञं त्वरमाणोऽभ्यभाषत ॥ ५-१२९-१ (३६१३३)
गच्छ तात महाप्राज्ञ गान्धारीं दीर्घदर्शिनीम् ।
आनयेह तया सार्धमनुनेष्यामि दुर्मतिम् ॥ ५-१२९-२ (३६१३४)
यदि सा न दुरात्मानं शमयेद्दुष्टचेतसम् ।
अपि कृष्णस्य सुहृदस्तिष्ठेम वचने वयम् ॥ ५-१२९-३ (३६१३५)

दुर्बुद्धेर्दुःसहायस्य शमार्थं ब्रुवती वचः ॥
अपि नो व्यसनं घोरं दुर्योधनकृतं महत् । ५-१२९-४ (३६१३६)
शमयेच्चिररात्राय योगक्षेमवदव्ययम् ।
राज्ञस्तु वचनं श्रुत्वा विदुरो दीर्घदर्शिनीम् । ५-१२९-५ (३६१३७)
आनयामास गान्धारीं धृतराष्ट्रस्य शासनात् ॥ ५-१२९-६ (३६१३८)
धृतराष्ट्र उवाच। ५-१२९-७क्ष् (३७६७)
एष गान्धारि पुत्रस्ते दुरात्मा शासनातिगः ।
ऐश्वर्यलोभादैश्वर्यं जीवितं च प्रहास्यति ॥ ५-१२९-७ (३६१३९)
अशिष्टवदमर्यादः पापैः सह दुरात्मवान् ।
सभाया निर्गतो मूढो व्यतिक्रम्य सुहृद्वचः ॥ ५-१२९-८ (३६१४०)
वैशम्पायन उवाच। ५-१२९-९क्ष् (३७६८)
सा भर्तृवचनं श्रुत्वा राजपुत्री यशस्विनी ।
अन्विच्छन्ती महच्छ्रेयो गान्धारी वाक्यमब्रवीत् ॥ ५-१२९-९ (३६१४१)
आनायय सुतं क्षिप्रं राज्यकामुकमातुरम् ।
नहि राज्यमशिष्टेन शक्यं धर्मार्थलोपिना ।
आप्तुमाप्तं तथाऽपीदमविनीतेन सर्वथा ॥ ५-१२९-१० (३६१४२)
त्वं ह्येवात्र भृशं गर्ह्यो धृतराष्ट्र सुतप्रियः ।
यो जानन्पापतामस्य तत्प्रज्ञामनुवर्तसे ॥ ५-१२९-११ (३६१४३)
स एष काममन्युभ्यां प्रलब्धो लोभमास्थितः ।
अशक्योऽद्य त्वया राजन्विनिवर्तयितुं बलात् ॥ ५-१२९-१२ (३६१४४)
राष्ट्रप्रदाने मूढस्य बालिशस्य दुरात्मनः ।
दुःसहायस्य लुब्धस्य धृतराष्ट्रोऽश्नुते फलम् ॥ ५-१२९-१३ (३६१४५)
कथं हि स्वजने भेदमुपेक्षेत महीपतिः ।
भिन्नं हि स्वजनेन त्वां प्रहरिष्यन्ति शत्रवः ॥ ५-१२९-१४ (३६१४६)
या हि शक्या महाराज साम्ना भेदेन वा पुनः ।
निस्तर्तुमापदः स्वेषु दण्डं कस्तत्र पातयेत् ॥ ५-१२९-१५ (३६१४७)
वैशम्पायन उवाच। ५-१२९-१६क्ष् (३७६९)
शासनाद्धृतराष्ट्रस्य दुर्योधनममर्षणम् ।
मातुश्च वचनात्क्षत्ता सभां प्रावेशयत्पुनः ॥ ५-१२९-१६ (३६१४८)
स मातुर्वचनाकाङ्क्षी प्रविवेश पुनः सभाम् ।
अभिताम्रेक्षणः क्रोधान्निश्वसन्निव पन्नगः ॥ ५-१२९-१७ (३६१४९)
तं प्रविष्टमभिप्रेक्ष्य पुत्रमुत्पथमास्थितम् ।
विगर्हमाणा गान्धारी शमार्थं वाक्यमब्रवीत् ॥ ५-१२९-१८ (३६१५०)
दुर्योधन निबोधेदं वचनं मम पुत्रक ।
हितं ते सानुबन्धस्य तथाऽऽयत्यांसुखोदयम् ॥ ५-१२९-१९ (३६१५१)
दुर्योधन यदाह त्वां पिता भरतसत्तम ।

भीष्मो द्रोणः कृपः क्षत्ता सुहृदां कुरु तद्वचः ॥ ५-१२९-२० (३६१५२)
भीष्मस्य तु पितुश्चैव मम चापचितिः कृता ।
भवेद्द्रोणमुखानां च सुहृदां शाम्यता त्वया ॥ ५-१२९-२१ (३६१५३)
न हि राज्यं महाप्राज्ञ स्वेन कामेन शक्यते ।
अवाप्तुं रक्षितुं वाऽपि भोक्तुं भरतसत्तम ॥ ५-१२९-२२ (३६१५४)
न ह्यवश्येन्द्रियो राज्यमश्नीयाद्दीर्घमन्तरम् ।
विजितात्मा तु मेधावी स राज्यमभिपालयेत् ॥ ५-१२९-२३ (३६१५५)
कामक्रोधौ हि पुरुषमर्थेभ्यो व्यपकर्षतः ।
तौ तु शत्रू विनिर्जित्य राजा विजयते महीम् ॥ ५-१२९-२४ (३६१५६)
लोकेश्वर प्रभुत्वंहि महदेतद्दुरात्मभिः ।
राज्यं नामेप्सितं स्थानं न शक्यमभिरक्षितुम् ॥ ५-१२९-२५ (३६१५७)
इन्द्रियाणि महत्प्रेप्सुर्नियच्छेदर्थधर्मयोः ।
इन्द्रियैर्नियतैर्बुद्धिर्वर्धतेऽग्निरिवेन्धनैः ॥ ५-१२९-२६ (३६१५८)
अविधेयानि हीमानि व्यापादयितुमप्यलम् ।
अविधेया इवादान्ता हयाः पथि कुसारथिम् ॥ ५-१२९-२७ (३६१५९)
अविजित्य य आत्मानममात्यान्विजिगीषते ।
अमित्रान्वाऽजितामात्यः सोऽवशः परिहीयते ॥ ५-१२९-२८ (३६१६०)
आत्मानमेव प्रथमं द्वेष्यरूपेण योजयेत् ।
ततोऽमात्यानमित्रांश्च न मोघं विजिगीषते ॥ ५-१२९-२९ (३६१६१)
वश्येन्द्रियं जितामात्यं धृतदण्डं विकारिषु ।
परीक्ष्यकारिणं धीरमत्यर्थं श्रीर्निषेवते ॥ ५-१२९-३० (३६१६२)
क्षुद्राक्षेणेव जालेन झषावपिहितावुभौ ।
कामक्रोधौ शरीरस्थौ प्रज्ञानं तौ विलुम्पतः ॥ ५-१२९-३१ (३६१६३)
याभ्यां हि देवाः स्वर्यातुः स्वर्गस्य पिदधुर्मुखम् ।
बिभ्यतोऽनुपरागस्य कामक्रोधौ स्म वर्धितौ ॥ ५-१२९-३२ (३६१६४)
कामं क्रोधं च लोभं च दम्भं दर्पं च भूमिपः ।
सम्यग्विजेतुं यो वेद स महीमभिजायते ॥ ५-१२९-३३ (३६१६५)
सततं निग्रहे युक्त इन्द्रियाणां भवेन्नृपः ।
ईप्सन्नर्थं च धर्मं च द्विषतां च पराभवम् ॥ ५-१२९-३४ (३६१६६)
कामाभिभूतः क्रोधाद्वा यो मिथ्या प्रतिपद्यते ।
स्वेषु चान्येषु वा तस्य न सहाया भवन्त्युत ॥ ५-१२९-३५ (३६१६७)
एकीभूतैर्महाप्राज्ञैः शूरैररिनिबर्हणैः ।
पाण्डवैः पृथिवीं तात भोक्ष्यसे सहितः सुखी ॥ ५-१२९-३६ (३६१६८)
यथा भीष्मः शान्तनवो द्रोणश्चापि महारथः ।
आहतुस्तात तत्सत्यमजेयौ कृष्णपाण्डवौ ॥ ५-१२९-३७ (३६१६९)
प्रपद्यष्व महाबाहुं कृष्णमक्लिष्टकारिणम् ।

प्रसन्नो हि सुखाय स्यादुभयोरेव केशवः ॥ ५-१२९-३८ (३६१७०)
सुहृदामर्थकामानां यो न तिष्ठति शासने ।
प्राज्ञानां कृतविद्यानां स नरः शत्रुनन्दनः ॥ ५-१२९-३९ (३६१७१)
न युद्ध्व तात कल्याणं न धर्मार्थौ कुतः सुखम् ।
न चापि विजयो नित्यं मा युद्ध्व चेत आधिथाः ॥ ५-१२९-४० (३६१७२)
भीष्मेण हि महाप्राज्ञ पित्र ते बाह्लिकेन च ।
दत्तोंऽशः पाण्डुपुत्राणां भेदाज्ञतैररिन्दम ॥ ५-१२९-४१ (३६१७३)
तस्थ चैतत्प्रदानस्य फलमद्यानुपश्यसि ।
यद्भुङ्क्षे पृथिवीं कृत्स्नां शूरैर्निहतकण्टकाम् ॥ ५-१२९-४२ (३६१७४)
प्रयच्छ पाण्डुपुत्राणां यथोचितमरिन्दम ।
यदीच्छसि सहामात्यो भोक्तुमर्धं प्रदीयताम् ॥ ५-१२९-४३ (३६१७५)
अलमर्धं पृथिव्यास्ते महामात्यस्य जीवितुम् ।
सुहृदां वचने तिष्ठन्यशः प्राप्स्यति भारत ॥ ५-१२९-४४ (३६१७६)
श्रीमद्भिरात्मवद्भिस्तैर्बुद्धिमद्भिर्जितेन्द्रियैः ।
पाण्डवैर्विग्रहस्तात भ्रंशयेन्महतः सुखात् ॥ ५-१२९-४५ (३६१७७)
निगृह्य सुहृदां मन्युं शाधि राज्यं यथोचितम् ।
स्वमंशं पाण्डुपुत्रेभ्यः प्रदाय भरतर्षभ ॥ ५-१२९-४६ (३६१७८)
अलमङ्ग निकारोऽयं त्रयोदशसमाः कृतः ।
शमयैनं महाप्राज्ञ कामक्रोधसमेधितम् ॥ ५-१२९-४७ (३६१७९)
न चैष शक्तः पार्थानां यस्त्वदर्थमभीप्सति ।
सूतपुत्रो दृढक्रोधो भ्राता दुःशासनश्च ते ॥ ५-१२९-४८ (३६१८०)
भीष्मे द्रोणे कृपे कर्णे भीमसेने धनञ्जये ।
धृष्टद्युम्ने च संक्रुद्धे न स्युः सर्वाः प्रजा ध्रुवम् ॥ ५-१२९-४९
(३६१८१)
अमर्षवशमापन्नो मा कुरूंस्तात जीघनः ।
एषा हि पृथिवी कृत्स्ना मा गमत्त्वत्कृते वधम् ॥ ५-१२९-५० (३६१८२)
यच्च त्वं मन्यसे मूढ भीष्मद्रोणकृपादयः ।
योत्स्यन्ते सर्वशक्त्येति नैतदद्योपपद्यते ॥ ५-१२९-५१ (३६१८३)
समं हि राज्यं प्रीतिश्च स्थानं हि विदितात्मनाम् ।
पाण्डवेष्वथ युष्मासु धर्मस्त्वभ्यधिकस्ततः ॥ ५-१२९-५२ (३६१८४)
राजपिण्डभयादेते यदि हास्यन्ति जीवितम् ।
न हि शक्ष्यन्ति राजानं युधिष्ठिरमुदीक्षितुम् ॥ ५-१२९-५३ (३६१८५)
न लोभादर्थसंपत्तिर्नराणामिह दृश्यते ।
तदलं तात लोभेन प्रशाम्य भरतर्षभ ॥ ॥ ५-१२९-५४ (३६१८६)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि

एकोनत्रिंशदधिकशततमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-१२९-१९ आयत्यां परिणामे ॥
५-१२९-२१ अपचितिः पूजा ॥
५-१२९-२३ दीर्घमन्तरं चेरकालम् ॥
५-१२९-२९ महद्राज्यं । महद्राज्यविशालयोरिति विश्वः ॥
५-१२९-३१ क्षुद्राक्षेण सूक्ष्मच्छिद्रेण ॥
५-१२९-३२ याभ्यां पिदधुः तौ कामक्रोधावित्यध्याहारेण योजना ॥
५-१२९-३३ अभिजायते शास्ति ॥
५-१२९-४७ निकारः अपकारः ॥

उद्योगपर्व - अध्याय १३०

॥ श्रीः ॥

५.१३०. अध्यायः १३०

Mahabharata - Udyoga Parva - Chapter Topics

मातृवाक्यमनादृत्य निर्गतेन दुर्योधनेन कर्णादिभिः सहालोच्य कृष्णबन्धननिर्धारणम् ॥ १ ॥
इङ्गितज्ञेन सात्यकिना कृष्णादिषु तन्नवेदनम् ॥ २ ॥
धृतराष्ट्रेण पुनर्दुर्योधनमानाय्य कृष्णस्य दुर्ग्रहत्वनिरूपणम् ॥ ३ ॥
विदुरेण संगृह्य कृष्ण चरित्रनिरूपणपूर्वकं दुर्योधनगर्हणम् ॥ ४ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१३०-० (३६१८७)
वैशम्पायन उवाच । ५-१३०-०क्ष् (३७७०)
तत्तु वाक्यमनादृत्य सोऽर्थवन्मातृभाषितम् ।
पुनः प्रतस्थे संरम्भात्सकाशमकृतात्मनाम् ॥ ५-१३०-१ (३६१८८)
ततः सभाया निर्गम्य मन्त्रयामास कौरवः ।
सौबलेन मताक्षेण राज्ञा शकुनिना सह ॥ ५-१३०-२ (३६१८९)
ग दुर्योधनं धार्तराष्ट्रं कर्ण दुःशासनोऽब्रवीति ।
नोचेत्सन्धास्यसे राजन्स्वेन कामेन पाण्डवैः ।
बद्ध्वैव त्वां प्रदास्यन्ति पाण्डुपुत्राय भारत ॥ ५-१३०-३ (३६१९०)
वैकर्तनं त्वां च मां च त्रीनेतान्भरतर्षभ ।
पाण्डवेभ्यः प्रदास्यन्ति भीष्मद्रोणौ पिता च ते ॥ ५-१३०-४ (३६१९१)
दुःशासनस्य तद्वाक्यं निशम्य भरतर्षभ ।

दुर्योधनो धार्तराष्ट्रो निश्वस्य प्रहसन्निव ॥ ५-१३०-५ (३६१९२)
एकान्तमुपसृत्येह मन्त्रं पुनरमन्त्रयत् ।
सौबलेन मताक्षेण राज्ञा शकुनिना सह ॥ ५-१३०-६ (३६१९३)
दुर्योधनस्य कर्णस्य शकुनेः सौबलस्य च ।
दुःशासनचतुर्थानामिदमासीद्विचेष्टितम् ॥ ५-१३०-७ (३६१९४)
पुराऽयमस्मान्गृह्णाति क्षिप्रकारी जनार्दनः ।
सहितो धृतराष्ट्रेण राज्ञा शान्तनवेन च ॥ ५-१३०-८ (३६१९५)
वयमेव हृषीकेशं निगृह्णीम बलादिव ।
प्रसह्य पुरुषव्याघ्रमिन्द्रो वैरोचनिं यथा ॥ ५-१३०-९ (३६१९६)
श्रुत्वा गृहीतं वार्ष्णेयं पाण्डवा हतचेतसः ।
निरुत्साहा भविष्यन्ति भग्नदंष्ट्रा इवोरगाः ॥ ५-१३०-१० (३६१९७)
अयं ह्येषां महाबाहुः सर्वेषां शर्म वर्म च ।
अस्मिन्गृहीते वरदे ऋषभे सर्वसात्वताम् ।
निरुद्यमा भविष्यन्ति पाण्डवाः सोमकैः सह ॥ ५-१३०-११ (३६१९८)
तस्माद्वयमिहैवैकं केशवं क्षिप्रकारिणम् ।
क्रोशतो धृतराष्ट्रस्य बद्ध्वा योत्स्यामहे रिपून् ॥ ५-१३०-१२ (३६१९९)
वैशम्पायन उवाच। ५-१३०-१३क्ष् (३७७१)
तेषां पापमभिप्रायं पापानां दुष्टचेतसाम् ।
इङ्गितज्ञः कविः क्षिप्रमन्वबुद्ध्यत सात्यकिः ॥ ५-१३०-१३ (३६२००)
तदर्थमभिनिष्क्रम्य हार्दिक्येन सहास्थितः ।
अब्रवीत्कृतवर्माणं क्षिप्रं योजय वाहिनीम् ॥ ५-१३०-१४ (३६२०१)
व्यूढानीकः सभाद्वारमुपतिष्ठस्व दंशितः ।
यावदाख्याम्यहं चैतत्कृष्णायाक्लिष्टकारिणे ॥ ५-१३०-१५ (३६२०२)
स प्रविश्य सभां वीरः सिंहो गिरिगुहामिव ।
आचष्ट तमभिप्रायं केशवाय महात्मने ॥ ५-१३०-१६ (३६२०३)
धृतराष्ट्रं ततश्चैव विदुरं चान्वभाषत ।
तेषामेतमभिप्रायमाचचक्षे स्मयन्निव ॥ ५-१३०-१७ (३६२०४)
धर्मादर्थाच्च कामाच्च कर्म साधुविगर्हितम् ।
मन्दाः कर्तुमिहेच्छन्ति न चावाप्यं कथंचन ॥ ५-१३०-१८ (३६२०५)
पुरा विकुर्वते मूढाः पापात्मानः समागताः ।
धर्षिताः काममन्युभ्यां क्रोधलोभवशानुगाः ॥ ५-१३०-१९ (३६२०६)
इमं हि पुण्डरीकाक्षं जिघृक्षन्त्यल्पचेतसः ।
पटेनाग्निं प्रज्वलितं यथा बाला यथा जडाः ॥ ५-१३०-२० (३६२०७)
सात्यकेस्तद्वचः श्रुत्वा विदुरो दीर्घदर्शिवान् ।
धृतराष्ट्रं महाबाहुमब्रवीत्कुरुसंसदि ॥ ५-१३०-२१ (३६२०८)
राजन्परीतकालास्ते पुत्राः सर्वे परन्तप ।

असक्यमयशस्यं च कर्तुं कर्म समुद्यताः ॥ ५-१३०-२२ (३६२०९)
इमं हि पुण्डरीकाक्षमभिभूय प्रसह्य च ।
निग्रहीतुं किलेच्छन्ति सहिता वासवानुजम् ॥ ५-१३०-२३ (३६२१०)
इमं पुरुषशार्दूलमप्रधृष्यं दुरसदम् ।
आसाद्य नभविष्यन्ति पतङ्गा इव पावकम् ॥ ५-१३०-२४ (३६२११)
अयमिच्छन्हि तान्सर्वान्युध्यमानाञ्जनार्दनः ।
सिंहो नागानिव क्रुद्धो गमयेद्यमसादनम् ॥ ५-१३०-२५ (३६२१२)
न त्वयं निन्दितं कर्म कुर्यात्पापं कथंचन ।
न च धर्मादपक्रामदेच्युतः पुरुषोत्तमः ॥ ५-१३०-२६ (३६२१३)
ग यथा वाराणसी दग्धा साश्वा सरथकुञ्जरा ।
सानुबन्धस्तु कृष्णेन काशीनामृषभो हतः ॥ ५-१३०-२७ (३६२१४)
तथा नागपुरं दग्ध्वा शङ्खचक्रगदाधरः ।
स्वयं कालेश्वरो भूत्वा नाशयिष्यति कौरवान् ॥ ५-१३०-२८ (३६२१५)
पारिजातहरं ह्येनमेकं यदुसुखावहम् ।
नाभ्यवर्तत संरब्धो वृत्रहा वसुभिः सह ॥ ५-१३०-२९ (३६२१६)
प्राप्य निर्मोचने पाशान्षट्सहस्रांस्तरस्विनः ।
हृतास्ते वासुदेवेन ह्युपसङ्क्रम्य कौरवान् ॥ ५-१३०-३० (३६२१७)
द्वारमासाद्य सौभस्य विधूय गदया गिरिम् ।
द्युमत्सेनः सहामात्यः कृष्णेन विनिपातितः ॥ ५-१३०-३१ (३६२१८)
शेषवत्त्वात्कुरूणां तु धर्मापेक्षी तथाऽच्युतः ।
क्षमते पुण्डरीकाक्षः शक्तः सन्पापकर्मणाम् ॥ ५-१३०-३२ (३६२१९)
एते हि यदि गोविन्दमिच्छन्ति सह राजभिः ।
अद्यैवातिथयः सर्वे भविष्यन्ति यमस्य ते ॥ ५-१३०-३३ (३६२२०)
यथा वायोस्तृणाग्रणि वशं यान्ति बलीयसः ।
तथा चक्रभृतः सर्वे वशमेष्यन्ति कौरवाः ॥ ५-१३०-३४ (३६२२१)
वैशम्पायन उवाच।' ५-१३०-३५क्ष (३७७२)
विदुरेणैवमुक्ते तु केशवो वाक्यमब्रवीत् ।
धृतराष्ट्रमभिप्रेक्ष्य सुहृदां श्रृण्वतां मिथः ॥ ५-१३०-३५ (३६२२२)
राजन्नेते यदि क्रुद्धा मां निगृह्णीयुरोजसा ।
एते वा मामहं वैनाननुजानीहि पार्थिव ॥ ५-१३०-३६ (३६२२३)
एतान्हि सर्वान्संरब्धान्नियन्तुमहमुत्सहे ।
न त्वहं निन्दितं कर्म कुर्यां पापं कथंचन ॥ ५-१३०-३७ (३६२२४)
पाण्डवार्थे हि लुभ्यन्तः स्वार्थान्हास्यन्ति ते सुताः ।
एते चेदेवमिच्छन्ति कृतकार्यो युधिष्ठिरः ॥ ५-१३०-३८ (३६२२५)
अद्यैव ह्यहमेनांश्च ये चैनाननु भारत ।
निगृह्य राजन्पार्थेभ्यो दद्यां किं दुष्कृतं भवेत् ॥ ५-१३०-३९ (३६२२६)

ग एष मे निश्चयो राजन्यद्येषोऽस्य विनिश्चयः ।
नर्दन्तु सहिताः शङ्खाः पणवानकनिस्वनैः ॥ ५-१३०-४० (३६२२७)
अनायासेन पार्थानां पर्वतां च शिवं महत् ।
निगृह्य राजन्पार्थेभ्यो दद्यां चेत्सुकृतं भवेत् ॥' ५-१३०-४१ (३६२२८)
इदं तु न प्रवर्तेयं निन्दितं कर्म भारत ।
सन्निधौ ते महाराज क्रोधजं पापबुद्धिजम् ॥ ५-१३०-४२ (३६२२९)
एष दुर्योधनो राजन्यथेच्छति तथाऽस्तु तत् ।
अहं तु सर्वांस्तनयाननुजानामि ते नृप ॥ ५-१३०-४३ (३६२३०)
एतच्छ्रुत्वा तु विदुरं धृतराष्ट्रोऽभ्यभाषत ।
क्षिप्रमानय तं पापं राज्यलुब्धं सुयोधनम् ॥ ५-१३०-४४ (३६२३१)
सहमित्रं सहामात्यं ससोदर्यं सहानुगम् ।
शक्नुयां यदि पन्थानमवतारयितुं पुनः ॥ ५-१३०-४५ (३६२३२)
ततो दुर्योधनं क्षत्ता पुनः प्रावेशयत्तमभाम् ।
अकामं भ्रातृभिः सार्धं राजभिः परिवारितम् ॥ ५-१३०-४६ (३६२३३)
अथ दुरोयधनं राजा धृतराष्ट्रोऽभ्यभाषत ।
कर्णदुःशासनाभ्यां च राजभिश्चापि संवृतम् ॥ ५-१३०-४७ (३६२३४)
नृशंस पापभूयिष्ठ क्षुद्रकर्मसहायवान् ।
पापैः सहायैः संहत्य पापं कर्म चिकीर्षसि ॥ ५-१३०-४८ (३६२३५)
अशक्यमयशस्यं च सद्भिश्चापि विगर्हितम् ।
यथा त्वादृशको मूढो व्यवस्येत्कुलपांसनः ॥ ५-१३०-४९ (३६२३६)
त्वमिमं पुण्डरीकाक्षमप्रधृष्यं दुरासदम् ।
पापैः सहायैः संहत्य निग्रहीतुं किलेच्छसि ॥ ५-१३०-५० (३६२३७)
यो न शक्यो बलात्कर्तुं देवैरपि सवासवैः ।
तं त्वं प्रार्थयसे मन्द बालश्चन्द्रमसं यथा ॥ ५-१३०-५१ (३६२३८)
देवैर्मनुष्यैर्गन्धर्वैरसुरैरुरगैश्च यः ।
न सोढुं समरे शक्यस्तं न बुध्यसि केशवम् ॥ ५-१३०-५२ (३६२३९)
दुर्ग्राह्यः पाणिना वायुर्दुस्पर्शः पाणिना शशी ।
दुर्धरा पृथिवी मूर्ध्ना दुर्ग्राह्यः केशवो बलात् ॥ ५-१३०-५३ (३६२४०)
इत्युक्ते धृतराष्ट्रेण क्षत्ताऽपि विदुरोऽब्रवीत् ।
दुर्योधनमभिप्रेक्ष्य धार्तराष्ट्रममर्षणम् ॥ ५-१३०-५४ (३६२४१)
दुर्योधन निबोधेदं वचनं मम सांप्रतम् ।
सौभद्वारे वानरेन्द्रो द्विविदो नाम नामतः ।
शिलावर्षेण महता छादयामास केशवम् ॥ ५-१३०-५५ (३६२४२)
ग्रहीतुकामो विक्रम्य सर्वयत्नेन माधवम् ।
ग्रहीतुं नाशकच्चैनं तं त्वं प्रार्थयसे बलात् ॥ ५-१३०-५६ (३६२४३)
प्राग्ज्योतिषगतं शौरिं नरकः सह दानवैः ।

ग्रहीतुं नाशकत्तत्र तं त्वं प्रार्थयसे बलात् ॥ ५-१३०-५७ (३६२४४)
अनेकयुगवर्षायुर्निहत्य नरकं मृधे ।
नीत्वा कन्यासहस्राणि उपयेमे यथाविधि ॥ ५-१३०-५८ (३६२४५)
निर्मोचने षट्सहस्राः पाशैर्बद्ध्वा महासुराः ।
ग्रहीतुं नाशकंश्चैनं तं त्वं प्रार्थयसे बलात् ॥ ५-१३०-५९ (३६२४६)
अनेन हि हता बाल्ये पूतना शिशुना तदा ।
गोवर्धनो धारितश्च गवार्थे भरतर्षभ ॥ ५-१३०-६० (३६२४७)
अरिष्टो धेनुकश्चैव चाणूरश्च महाबलः ।
अश्वराजश्च निहतः कंसश्चारिष्टमाचरन् ॥ ५-१३०-६१ (३६२४८)
जरासन्धश्च वक्रश्च शिशुपालश्च वीर्यवान् ।
बाणाश्च निहतः सङ्ख्ये राजानश्च निषूदिताः ॥ ५-१३०-६२ (३६२४९)
वरुणो निर्जितो राजा पावकश्चामितौजसा ।
पारिजातं च हरता जितः साक्षाच्छचीपतिः ॥ ५-१३०-६३ (३६२५०)
एकार्णवे च स्वपता निहतौ मधुकैटभौ ।
जन्मान्तरमुपागम्य हयग्रीवस्तथा हतः ॥ ५-१३०-६४ (३६२५१)
अयं कर्ता न क्रियते कारणं चापि पौरुषे ।
यद्यदिच्छेदयं शौरिस्तत्तत्कुर्यादयत्नतः ॥ ५-१३०-६५ (३६२५२)
तं न बुध्यसि गोविन्द घोरविक्रममच्युतम् ।
आशीविषमिव क्रूद्धं तेजोराशिमनिन्दितम् ॥ ५-१३०-६६ (३६२५३)
प्रधर्षयन्महाबाहुं कृष्णमक्लिष्टकारिणम् ।
पतङ्गोऽग्निमिवासाद्य सामात्यो नभविष्यसि ॥ ॥ ५-१३०-६७ (३६२५४)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
त्रिंशदधिकशततमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-१३०-१ वैरोचनिं बलिम् ॥
५-१३०-१८ कर्म दूतनिग्रहाख्यम् ॥
५-१३०-३८ पाण्डवार्थे पाण्डवधने ॥
५-१३०-४२ इदं तु कर्म कर्तुमिति शेषः ॥
५-१३०-४९ निर्मोचने नगरविशेषे ॥

उद्योगपर्व - अध्याय १३१
॥ श्रीः ॥
५.१३१. अध्यायः १३१

Mahabharata - Udyoga Parva - Chapter Topics

श्रीकृष्णेन सभायां विश्वरूपप्रदर्शनम् ॥ १ ॥
कृष्णप्रसादात्लब्धचक्षुषा धृतराष्ट्रेण कृष्णं
दृष्टवता वक्षुषा इतरेषामदि दृक्षया कृष्णवरात्पुनः
स्वचक्षुषोरन्तर्धानाधिगमः ॥ २ ॥
कृष्णेन तद्रूपोपसंहारपूर्वकं पूर्वरूपं स्वीकृत्य रथाधिरोहणेन
कुन्तीसमीपगमनम् ॥ ३ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१३१-० (३६२५५)
वैशम्पायन उवाच । ५-१३१-०क्ष् (३७७३)
विदुरेणैवमुक्तस्तु केशवः शत्रुपूगहा ।
दुर्योधनं धार्तराष्ट्रमभ्यभाषत वीर्यवान् ॥ ५-१३१-१ (३६२५६)
एकोऽहमिति यन्मोहान्मन्यसे मां सुयोधन ।
परिभूय सुदुर्बुद्धे ग्रहीतुं मां चिकीर्षसि ॥ ५-१३१-२ (३६२५७)
इहैव पाण्डवाः सर्वे तथैवान्धकवृष्णयः ।
इहादित्याश्च रुद्राश्च वसवश्च महर्षिभिः ॥ ५-१३१-३ (३६२५८)
एवमुक्त्वा जाहासोच्चैः केशवः परवीरहा ।
तस्य संस्मयतः शौरेर्विद्युद्रूपा महात्मनः ।
ग्युगपच्च विनिष्पेतुः साक्षात्सर्वास्तु देवताः ॥' ५-१३१-४ (३६२५९)
अङ्गुष्टमात्रास्त्रिदशा बभूवुः पावकार्चिषः ।
तस्य ब्रह्मा ललाटस्थो रुद्रो वक्षसि चाभवत् ॥ ५-१३१-५ (३६२६०)
लोकपाला भुजेष्वासन्नग्निरास्यादजायत ।
आदित्याश्चैव साध्याश्च वसवोऽथाश्विनावपि ॥ ५-१३१-६ (३६२६१)
मरुतश्च सहेन्द्रेण विश्वेदेवास्तथैव च ।
बभूवुश्चैव यक्षाश्च गन्धर्वोरगराक्षसाः ॥ ५-१३१-७ (३६२६२)
प्रादुरास्तां तथा दोर्भ्यां सङ्कर्षणधनञ्जयौ ।
दक्षिणेऽथार्जुनो धन्वी हली रामश्च सव्यतः ॥ ५-१३१-८ (३६२६३)
भीमो युधिष्ठिरश्चैव माद्रीपुत्रौ च पृष्ठतः ।
अन्धका वृष्णयश्चैव प्रद्युम्नपरमुखास्ततः ॥ ५-१३१-९ (३६२६४)
अग्रे बभूवुः कृष्णस्य समुद्यतमहायुधाः ।
शङ्खचक्रगदाशक्तिशार्ङ्गलाङ्गलनन्दकाः ॥ ५-१३१-१० (३६२६५)
अदृश्यन्तोद्यतान्येव सर्वप्रहरणानि च ।
नानाबाहुषु कृष्णस्य दीप्यमानानि सर्वशः ॥ ५-१३१-११ (३६२६६)
नेत्राभ्यां नासिकाभ्यां च श्रोत्राभ्यां च समन्ततः ।
प्रादुरासन्महारौद्राः सधूमाः पावकार्चिषः ॥ ५-१३१-१२ (३६२६७)

रोमकूपेषु च तथा सूर्यस्येव मरीचयः ।
ग्सहस्रचरणः श्रीमाञ्शतबाहुः सहस्रदृक् ॥' ५-१३१-१३ (३६२६८)
तस्य वै नागलोकश्च गुल्फाधो ददृशे तदा ।
चन्द्रसूर्यौ तथा नेत्रे ग्रहः वै सर्वतः स्थिताः ॥ ५-१३१-१४ (३६२६९)
ऊर्ध्वलोकाश्च सर्वेऽपि कुक्षौ तस्य व्यवस्थिताः ।
सरितः सागराश्चैव स्वेदस्तस्य महात्मनः ॥ ५-१३१-१५ (३६२७०)
अस्थीनि पर्वताः सर्वे वृक्षा रोमाणि तस्य हि ।
निमेषणं रात्र्यहनी जिह्वायां शारदा तथा ॥' ५-१३१-१६ (३६२७१)
तं दृष्ट्वा घोरमात्मानं केशवस्य महात्मनः ।
न्यमीलयन्त नेत्राणि राजानस्त्रस्तचेतसः ॥ ५-१३१-१७ (३६२७२)
ऋत द्रोणं च भीष्मं च विदुरं च महामतिम् ।
संजयं धृतराष्ट्रं च ऋषींश्चैव तपोधनान् ॥ ५-१३१-१८ (३६२७३)
प्रादात्तेषां स भगवान्दिव्यं चक्षुर्जनार्दनः ॥ ५-१३१-१९ (३६२७४)
ग्धृतराष्ट्राय प्रददौ भगवान्दिव्यचक्षुषी ।
ददर्श परमं रूपं धृतराष्ट्रोऽम्बिकासुतः ॥ ५-१३१-२० (३६२७५)
ततो देवाः सगन्धर्वाः किन्नराश्च महोरगाः ।
ऋषयश्च महाभागा लोकपालैः समन्विताः ।
प्रणम्य शिरसा देवं तुष्टुवुः प्राञ्जलिस्थिताः ॥ ५-१३१-२१ (३६२७६)
क्रोधं प्रभो संहर संहर स्वं
रूपं च यद्दर्शितमात्मसंस्थम् ।
यावत्त्विमे देवगणैः समेता
लोकाः समस्ता भुवि नाशमीयुः ॥ ५-१३१-२२ (३६२७७)
त्वं च कर्ता विकर्ता च त्वमेव परिरक्षसे ।
त्वया व्याप्तमिदं सर्वं जगत्स्थावरजङ्गमम् ॥ ५-१३१-२३ (३६२७८)
कियन्मात्रा महीपालाः किंवीर्याः किंपराक्रमाः ।
तेषामर्थे महाबाहो दिव्यं रूपं प्रदर्शितवान् ।
एवमुच्चारिता वाचः सह देवार्विभुं तदा ॥' ५-१३१-२४ (३६२७९)
तद्दृष्ट्वा महदाश्चर्यं माधवस्य सभातले ।
देवदुन्दुभयो नेदुः पुष्पवर्षं पपात च ॥ ५-१३१-२५ (३६२८०)
धृतराष्ट्र उवाच। ५-१३१-२६क्ष (३७७४)
त्वमेव पुण्डरीकाक्ष सर्वस्य जगतो हितः ।
तस्मान्मे यादवश्रेष्ठ प्रसादं कर्तुमर्हसि ॥ ५-१३१-२६ (३६२८१)
भगवन्मम नेत्राभ्यामन्तर्धानं वृणे पुनः ।
भवन्तं दृष्टवानस्मि नान्यं द्रष्टुमिहोत्सहे ॥ ५-१३१-२७ (३६२८२)
ततोऽब्रवीन्महाबाहुर्धृतराष्ट्रं जनार्दनः ।
अदृश्यमाने नेत्रे द्वे भवेतां कुरुनन्दन ॥ ५-१३१-२८ (३६२८३)

तत्राद्भुतं महाराज धृतराष्ट्रश्च चक्षुषी ।
लब्धवान्वासुदेवाच्च विश्वरूपदिदृक्षया ॥ ५-१३१-२९ (३६२८४)
लब्धचक्षुषमासीनं धृतराष्ट्रं नराधिपाः ।
विस्मिता ऋषिभिः सार्धं तुष्टुवुर्मधुसूदनम् ॥ ५-१३१-३० (३६२८५)
चचाल च मही कृत्स्ना सागरश्चापि चुक्षुभे ।
विस्मयं परमं जग्मुः पार्थिवा भरतर्षभ ॥ ५-१३१-३१ (३६२८६)
ततः स पुरुषव्याघ्रः सञ्जहार वपुः स्वकम् ।
तां दिव्यामद्भुतां चित्रामृद्धिमत्तामरिन्दमः ॥ ५-१३१-३२ (३६२८७)
ततः सात्यकिमादाय पाणौ विदुरमेव च ।
ऋषिभिस्तैरनुज्ञातो निर्ययौ मधुसूदनः ॥ ५-१३१-३३ (३६२८८)
ऋषयोऽन्तर्हिता जग्मुस्ततस्ते नारदादयः ।
तस्मिन्कोलाहले वृत्ते तदद्भुतमिवाभवत् ॥ ५-१३१-३४ (३६२८९)
तं प्रस्थितमभिप्रेक्ष्य कौरवाः सह राजभिः ।
अनुजग्मुर्नरव्याघ्रं देवा इव शतक्रतम् ॥ ५-१३१-३५ (३६२९०)
अचिन्तयन्नमेयात्मा सर्वं तद्राजमण्डलम् ।
निश्चक्राम ततः शौरिः सधूम इव पावकः ॥ ५-१३१-३६ (३६२९१)
ततो रथेन शुभ्रेण महता किङ्किणीकिना ।
हेमजालविचित्रेण लघुना मेघनादिना ॥ ५-१३१-३७ (३६२९२)
सूपस्करेण शुभ्रेण वैयाघ्रेण वरूथिना ।
शैब्यसुग्रीवयुक्तेन प्रत्यदृश्यत दारुकः ॥ ५-१३१-३९अतथैव
रथमास्थाय कृतवर्मा महारथः ।
वृष्णीनां संमतो वीरो हार्दिक्यः समदृश्यत ॥ ५-१३१-३८ (३६२९३)
उपस्थितरथं शौरिं प्रयास्यन्तमरिन्दमम् ।
धृतराष्ट्रो महाराजः पुनरेवाभ्यभाषत ॥ ५-१३१-४० (३६२९४)
यावद्बलं मे पुत्रेषु पश्यतस्ते जनार्दन ।
प्रत्यक्षं ते न ते किंचित्परोक्षं शत्रुकर्शन ॥ ५-१३१-४१ (३६२९५)
कुरूणां शममिच्छन्तं यतमानं च केशव ।
विदित्वैतामवस्थां मे नातिशङ्कितुमर्हसि ॥ ५-१३१-४२ (३६२९६)
न मे पापोऽस्त्यभिप्रायः पाण्डवान्प्रति केशव ।
ज्ञातमेव हितं वाक्यं यन्मयोक्तः सुयोधनः ॥ ५-१३१-४३ (३६२९७)
जानन्ति कुरवः सर्वे राजानश्चैव पार्थिवाः ।
शमे प्रयतमानं मां सर्वयत्नेन माधव ॥ ५-१३१-४४ (३६२९८)
वैशम्पायन उवाच। ५-१३१-४५क्ष् (३७७५)
ततोऽब्रवीन्महाबाहुर्धृतराष्ट्रं जनार्दनः ।
द्रोणं पितामहं भीष्मं क्षत्तारं बाह्लिकं कृपम् ॥ ५-१३१-४५ (३६२९९)
प्रत्यक्षमेतद्भवतां यद्वृत्तं कुरुसंसदि ।

यथा चाशिष्टवन्मन्दो रोषाददद्य समुत्थितः ॥ ५-१३१-४६ (३६३००)
वदत्यनीशमात्मानं धृतराष्ट्रो महीपतिः ।
आपृच्छे भवतः सर्वान्गमिष्यामि युधिष्ठिरम् ॥ ५-१३१-४७ (३६३०१)
आमन्त्र्य प्रस्थितं शौरिं रथस्थं पुरुषर्षभ ।
अनुजग्मुर्महेष्वासाः प्रवीरा भरतर्षभाः ॥ ५-१३१-४८ (३६३०२)
भीष्मो द्रोणः कृपः क्षत्ता धृतराष्ट्रोऽथ बाह्लिकः ।
अश्वत्थामा विकर्णश्च युयुत्सुश्च महारथः ॥ ५-१३१-४९ (३६३०३)
ततो रथेन शुभ्रेण महता किङ्किणीकिना ।
कुरूणां पश्यतां द्रष्टुं स्वसारं स पितुर्ययौ ॥ ॥ ५-१३१-५० (३६३०४)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानर्वणि
एकत्रिंशदधिकशततमोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-१३१-२८ अदृश्यमाने दर्शनशक्तिरहिते ॥
५-१३१-३८ वरूथिना रथगुप्तिमता ॥
५-१३१-४६ मन्दो दुर्योधनः ॥

उद्योगपर्व - अध्याय १३२
॥ श्रीः ॥
५.१३२. अध्यायः १३२

Mahabharata - Udyoga Parva - Chapter Topics
कृष्णेन कुन्तींप्रति सप्रणामं सभावृत्तन्तकथनम् ॥ १ ॥
कुन्त्या कृष्णचोदनया तस्मिन् युधिष्ठिराय संदेशप्रेषणम् ॥ २ ।
Mahabharata - Udyoga Parva - Chapter Text

५-१३२-० (३६३०५)
वैशम्पायन उवाच। ५-१३२-०क्ष् (३७७६)
प्रविश्याथ गृहं तस्याश्चरणावभिवाद्य च ।
आचख्यौ तत्समासेन यद्वृत्तं कुरुसंसदि ॥ ५-१३२-१ (३६३०६)
वासुदेव उवाच। ५-१३२-२क्ष् (३७७७)
उक्तं बहुविधं वाक्यं ग्रहणीयं सहेतुकम् ।
ऋषिभिश्चैव च मया न चासौ तद्गृहीतवान् ॥ ५-१३२-२ (३६३०७)
कालपक्वमिदं सर्वं सुयोधनवशानुगम् ।
ग सर्वक्षत्रं क्षणेनैव दह्यते पार्थवह्निना ।'
आपृच्छे भवतीं शीघ्रं प्रयास्ये पाण्डवान्प्रति ॥ ५-१३२-३ (३६३०८)

किं वाच्याः पाण्डवेयास्ते भवत्या वचनान्मया ।
तद्ब्रूहि त्वं महाप्रज्ञे शुश्रूषे वचनं तव ॥ ५-१३२-४ (३६३०९)
कुन्त्युवाच । ५-१३२-५क्ष् (३७७८)
ब्रूयाः केशव राजानं धर्मात्मानं युधिष्ठिरम् ।
भूयांस्ते हीयते धर्मो मा पुत्रक वृथा कृथाः ॥ ५-१३२-५ (३६३१०)
श्रोत्रियस्येव ते राजन्मन्दकस्याविपश्चितः ।
अनुवाकहता बुद्धिर्धर्ममेवैकमीक्षते ॥ ५-१३२-६ (३६३११)
अङ्गावेक्षस्व धर्मं त्वं यथा सृष्टः स्वयंभुवा ।
बाहुभ्यां क्षत्रियाः सृष्टा बाहुवीर्योपजीविनः ॥ ५-१३२-७ (३६३१२)
क्रूराय कर्मणे नित्यं प्रजानां परिपालने ।
शृणु चात्रोपमामेकां या वृद्धेभ्यः श्रुता मया ॥ ५-१३२-८ (३६३१३)
मुचुकुन्दस्य राजर्षेरददत्पृथिवीमिमाम् ।
पुरा वैश्रवणः प्रीतो न चासौ तद्गृहीतवान् ॥ ५-१३२-९ (३६३१४)
बाहुवीर्यार्जितं राज्यमश्रीयामिति कामये ।
ततो वैश्रवणः प्रीतो विस्मितः समपद्यत ॥ ५-१३२-१० (३६३१५)
मुचुकुन्दस्ततो राजा सोऽन्वशासद्वसुन्धराम् ।
बाहुवीर्यार्जितां सम्यक् क्षत्रधर्ममनुव्रतः ॥ ५-१३२-११ (३६३१६)
यं हि धर्मं चरन्तीह प्रजा राज्ञा सुरक्षिताः ।
चतुर्थं तस्य धर्मस्य राजा विन्देन भारत ॥ ५-१३२-१२ (३६३१७)
राजा चरति चेद्धर्मं देवत्वायैव कल्पते ।
स चेदधर्मं चरति नरकायैव गच्छति ॥ ५-१३२-१३ (३६३१८)
दण्डनीतिः स्वधर्मेण चातुर्वर्ण्यं नियच्छति ।
प्रयुक्तास्वामिना सम्यगधर्मेभ्यो नियच्छति ॥ ५-१३२-१४ (३६३१९)
दण्डनीत्यां यदा राजा सम्यक्कात्स्न्र्येन वर्तते ।
तदा कृतयुं नाम कालः श्रेष्ठः प्रवर्तते ॥ ५-१३२-१५ (३६३२०)
कालो वा कारणं राज्ञो राजा वा कालकारणम् ।
इति ते संशयो मा भूद्राजा कालस्य कारणम् ॥ ५-१३२-१६ (३६३२१)
राजा कृतयुगस्रष्टा त्रेताया द्वापरस्य च ।
युगस्य च चतुर्थस्य राजा भवति कारणम् ॥ ५-१३२-१७ (३६३२२)
कृतस्य करणाद्राजा स्वर्गमत्यन्तमश्नुते ।
त्रेतायाः करणाद्राजा स्वर्गं नात्यन्तमश्नुते ॥ ५-१३२-१८ (३६३२३)
प्रवर्तनाद्द्वापरस्य यथाभागमुपाश्नुते ।
कलेः प्रवर्तनाद्राजा पापमत्यन्तमश्नुते ॥ ५-१३२-१९ (३६३२४)
ततो वसति दुष्कर्मा नरके शाश्वतीः समाः ।
राजदोषेण हि जगत्स्पृश्यते जगतः स च ॥ ५-१३२-२० (३६३२५)
राजधर्मानवेक्षस्व पितृपैतामहोचितान् ।

नैतद्राजर्षिवृत्तं हि यत्र त्वं स्थातुमिच्छसि ॥ ५-१३२-२१ (३६३२६)
न हि वैक्लब्यसंसृष्ट आनृशंस्ये व्यवस्थितः ।
प्रजापालनसंभूतं फलं किंचन लब्धवान् ॥ ५-१३२-२२ (३६३२७)
न ह्येतामाशिषं पाण्डुर्न चाहं न पितामहः ।
प्रयुक्तवन्तः पूर्वं ते यया चरसि मेधया ॥ ५-१३२-२३ (३६३२८)
यज्ञो दानं तपः शौर्यं प्रज्ञा सन्तानमेव च ।
माहात्म्यं बलमोजश्च नित्यमाशंसितं मया ॥ ५-१३२-२४ (३६३२९)
नित्यं स्वाहा स्वधा नित्यं दद्युर्मानुषदेवताः ।
दीर्घमायुर्धनं पुत्रान्सम्यगाराधिताः शुभाः ॥ ५-१३२-२५ (३६३३०)
पुत्रेष्वाशासते नित्यं पितरो दैवतानि च ।
दानमध्ययनं यज्ञः प्रजानां परिपालनम् ॥ ५-१३२-२६ (३६३३१)
एतद्धर्ममधर्मं वा जन्मनैवाभ्यजायथाः ।
ते तु वैद्याः कुले जाता अवृत्त्या तात पीडिताः ॥ ५-१३२-२७ (३६३३२)
यत्र दानपतिं शूरं क्षुधिताः पृथिवीचराः ।
प्राप्य तुष्टाः प्रतिष्ठन्ते धर्मः कोऽभ्यधिकस्ततः ॥ ५-१३२-२८ (३६३३३)
दानेनान्यं बलेनान्यं तथा सूनृतयाऽपरम् ।
सर्वतः प्रतिगृह्णीयाद्राज्यं प्राप्येह धार्मिकः ॥ ५-१३२-२९ (३६३३४)
ब्राह्मणः प्रचरेद्भैक्षं क्षत्रियः परिपालयेत् ।
वैश्यो धनार्जनं कुर्याच्छूद्रः परिचरेच्च तान् ॥ ५-१३२-३० (३६३३५)
भैक्षं विप्रतिषिद्धं ते कृषिर्नैवोपपद्यते ।
क्षत्रियोऽसि क्षतात्राता बाहुवीर्योपजीविता ॥ ५-१३२-३१ (३६३३६)
पित्र्यमंशं महाबाहो निमग्नं पुनरुद्धर ।
साम्ना भेदेन दानेन दण्डेनाथ नयेन वा ॥ ५-१३२-३२ (३६३३७)
इतो दुःखतरं किं नु यदहं दीनबान्धवा ।
परपिण्डमुदीक्षे वै त्वां सूत्वा मित्रनन्दन ॥ ५-१३२-३३ (३६३३८)
युध्यस्व राजधर्मेण मा निमज्जीः पितामहान् ।
मा गमः क्षीणपुण्यस्त्वं सानुजः पापिकां गतिं ॥ ॥ ५-१३२-३४ (३६३३९)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
द्वात्रिंशदधिकशततमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-१३२-५ भूयान् पृथ्वीपालनजो धर्मः ॥
५-१३२-६ श्रोत्रियस्य वेदाध्यायिनः । मन्दकस्य अर्थज्ञानशून्यस्य
। अनुवाकेन अत्यन्तं वेदाक्षसंवृत्त्या हता नष्टाः ॥
५-१३२-२० जगतः दोषेण सच राजा स्पृश्यते ॥

५-१३२-२२ फलं न लब्धवान् असीति शेषः ॥
५-१३२-२५ नित्यमिति । मानुषाश्च देवताश्च सम्यगाराधिताः सत्यः
इह लोके आयुरादीनि परलोकसाधनानि स्वधादीनि सत्कर्माणि च ददुः ॥
५-१३२-२७ एतत् मद्वाक्यं धर्मं धर्मयुक्तं अधर्मं च जन्मनैव
स्वभावत एव अभ्यजायथाः अभिजानीषे । हे कृष्ण ते तु पाण्डवास्तु
वैद्याः विद्यावन्तः ॥
५-१३२-२९ राज्य राजत्वं क्षत्रियत्वमित्यर्थः ॥

उद्योगपर्व - अध्याय १३३
॥ श्रीः ॥
५.१३३. अध्यायः १३३

Mahabharata - Udyoga Parva - Chapter Topics
कुन्त्या युधिष्ठिरबोधनाय कृष्णंप्रति विदुलोपाख्यानकथनम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१३३-० (३६३४०)
कुन्त्युवाच। ५-१३३-०क्ष् (३७७९)
अत्राप्युदाहरन्तीममितिहासं पुरातनम् ।
विदुलायाश्च संवादं पुत्रस्य च परन्तप ॥ ५-१३३-१ (३६३४१)
ततः श्रेयश्च भूयश्च यथावद्वक्तुमर्हसि ।
यशस्विनी मन्युमती कुले जाता विभावरी ॥ ५-१३३-२ (३६३४२)
क्षत्रधर्मरता दान्ता विदुला दीर्घदर्शिनी ।
विश्रुता राजसंसत्सु श्रुतवाक्या बहुश्रुता ॥ ५-१३३-३ (३६३४३)
विदुला नाम राजन्या जगर्हे पुत्रमौरसम् ।
निर्जितं सिन्धुराजेन शयानं दीनचेतसम् ॥ ५-१३३-४ (३६३४४)
विदुलोवाच। ५-१३३-५क्ष् (३७८०)
अनन्दन मया जात द्विषतां हर्षवर्धन ।
न मया त्वं न पित्रा च जातः क्वाभ्यागतोह्यसि ॥ ५-१३३-५ (३६३४५)
निर्मन्युश्चाप्यसङ्ख्येयः पुरुषः क्लीबसाधनः ।
यावज्जीवं निराशोऽसि कल्याणाय धुरं वह ॥ ५-१३३-६ (३६३४६)
माऽऽत्मानमवमन्यस्व मैनमल्पेन बीभरः ।
मनः कृत्वा सुकल्याणं मा भैस्त्वं प्रतिसंहर ॥ ५-१३३-७ (३६३४७)
उत्तिष्ठ हे कापुरुष मा शेष्वैवं पराजितः ।
अमित्रान्नन्दयन्सर्वान्निर्मानो बन्धुशोकदः ॥ ५-१३३-८ (३६३४८)
सुपूरा वै कुनदिका सुपूरो मुषिकाञ्जलिः ।

सुसंतोषः कापुरुषः स्वल्पकेनैव तुष्यति ॥ ५-१३३-९ (३६३४९)
अप्यहेरारुजन्दंष्ट्रामाश्वेव निधनं व्रज ।
अपि वा संशयं प्राप्य जीवितेऽपि पराक्रमेः ॥ ५-१३३-१० (३६३५०)
अप्यरेः श्येनवच्छिद्रं पश्येस्त्वं विपरिक्रमन् ।
विवदन्वाऽथवा तूष्णीं व्योम्नीवापरिशङ्कितः ॥ ५-१३३-११ (३६३५१)
त्वमेवं प्रेतवच्छेषे कस्माद्वज्रहतो यथा ।
उत्तिष्ठ हे कापुरुष मा स्वाप्सीः शत्रुनिर्जितः ॥ ५-१३३-१२ (३६३५२)
माऽस्तं गमस्त्वं कृपणो वि श्रूयस्व स्वकर्मणा ।
मा मध्ये मा जघन्ये त्वं माऽधो भूस्तिष्ठ गर्जितः ॥ ५-१३३-१३ (३६३५३)
अलातं तिन्दुकस्येव मुहूर्तमपि हि ज्वल ।
मा तुषाग्निरिवानर्चिर्धूमायस्व जिजीविषुः ॥ ५-१३३-१४ (३६३५४)
मुहूर्तं ज्वलितं श्रेयो न च धूमायितं चिरम् ।
मा ह स्म कस्यचिद्गेहे जनी राज्ञः स्वरीमृदुः ॥ ५-१३३-१५ (३६३५५)
कृत्वा मानुष्यकं कर्म सृत्वाऽऽजिं यावदुत्तमम् ।
धर्मस्यानृण्यमाप्नोति न चात्मानं विगर्हते ॥ ५-१३३-१६ (३६३५६)
अलब्ध्वा यदि वा लब्ध्वा नानुशोचति पण्डितः ।
आनन्तर्यं चारभते न प्राणानां धनायते ॥ ५-१३३-१७ (३६३५७)
उद्भावयस्वं वीर्यं वा तां वा गच्छ ध्रुवां गतिम् ।
धर्मं पुत्राग्रतः कृत्वा किंनिमित्तं हि जीवसि ॥ ५-१३३-१८ (३६३५८)
इष्टापूर्तं हि ते क्लीब कीर्तिश्च सकला हता ।
विच्छिन्नं भोगमूलं ते किंनिमित्तं हि जीवसि ॥ ५-१३३-१९ (३६३५९)
शत्रुर्निमज्जता ग्राह्यो जङ्घायां प्रपतिष्यता ।
विपरिच्छिन्नमूलोऽपि न विषीदेत्कथंचन ॥ ५-१३३-२० (३६३६०)
उद्यम्य धुरमुत्कर्षेदाजानेयकतं स्मरन् ।
कुरु सत्वं च मानं च विद्धि पौरुषमात्मनः । ५-१३३-२१ (३६३६१)
उद्भावय कुलं मग्नं त्वत्कृते स्वयमेव हि ।
यस्य वृत्तं न जल्पन्ति मानवा महदद्भुतम् ॥ ५-१३३-२२ (३६३६२)
राशिवर्धनमात्रं स नैव स्त्री न पुनः पुमान् ।
दाने तपसि सत्ये च यस्य नोच्चरितं यशः ॥ ५-१३३-२३ (३६३६३)
विद्यायामर्थलाभे वा मातुरुच्चार एव सः ।
श्रुतेन तपसा वाऽपि श्रिया वा विक्रमेण वा ॥ ५-१३३-२४ (३६३६४)
जनान्योऽभिभवत्यन्यान्कर्मणा हि स वै पुमान् ।
न त्वेव जाल्मीं कापालीं वृत्तिमेषितुमर्हसि ॥ ५-१३३-२५ (३६३६५)
नृशंस्यामयशस्यां च दुःखां कापुरुषोचिताम् ।
यमेनमभिनन्देयुरमित्राः पुरुषं कृशम् ॥ ५-१३३-२६ (३६३६६)
लोकस्य समवज्ञातं निहीनासनवाससम् ।

अहोलाभकरं हीनमल्पजीवनमल्पकम् ॥ ५-१३३-२७ (३६३६७)
नेदृशं बन्धुमासाद्य बान्धवः सुखमेधते ।
अवृत्त्यैव विपत्स्यामो वयं राष्ट्रात्प्रवासिताः ॥ ५-१३३-२८ (३६३६८)
सर्वकामरसैर्हीनाः स्थानभ्रष्टा अकिंचनाः ।
अवल्गुकारिण सत्सु कुलवंशस्य नाशनम् ॥ ५-१३३-२९ (३६३६९)
कलिं पुत्रप्रवादेन सञ्जय त्वामजीजनम् ।
निरमर्षं निरुत्साहं निर्वीर्यमरिनन्दनम् ॥ ५-१३३-३० (३६३७०)
मा स्म सीमन्तिनी काचिञ्जनयेत्पुत्रमीदृशम् ।
मा धूमाय ज्वलात्यन्तमाक्रम्य जहि शात्रवान् ॥ ५-१३३-३१ (३६३७१)
ज्वल मूर्धन्यमित्राणां मुहूर्तमपि वा क्षणम् ।
एतावानेव पुरुषो यदमर्षी यदक्षमी ॥ ५-१३३-३२ (३६३७२)
क्षमावान्निरमर्षश्च नैव स्त्री न पुनः पुमान् ।
संतोषो वै श्रियं हन्ति तथाऽनुक्रोश एव च ॥ ५-१३३-३३ (३६३७३)
अनुत्थानभये चोभे निरीहो नाश्नुते महत् ।
एभ्यो निकृतिपापेभ्यः प्रमुञ्चात्मानमात्मना ॥ ५-१३३-३४ (३६३७४)
आयसं हृदयं कृत्वा मृगयस्व पुनः स्वकम् ।
परं विषहते यस्मात्तस्मात्पुरुष उच्यते ॥ ५-१३३-३५ (३६३७५)
तमाहुर्व्यर्थनामानं स्त्रीवद्य इह जीवति ।
शूरस्योर्जितसत्वस्य सिंहविक्रान्तचारिणः ॥ ५-१३३-३६ (३६३७६)
दिष्टभावं गतस्यापि विषये मोदते प्रजा ।
य आत्मनः प्रियमुखे हित्वा मृगयते श्रियम् ॥ ५-१३३-३७ (३६३७७)
अमात्यानामथो हर्षमादधात्यचिरेण सः ॥ ५-१३३-३८ (३६३७८)
पुत्र उवाच। ५-१३३-३९क्ष (३७८१)
किं नु मे मामपश्यन्त्याः पृथिव्या अपि सर्वया ।
किमाभरणकृत्यं ते किं भोगैर्जीवितेन वा । ५-१३३-३९ (३६३७९)
मातोवाच। ५-१३३-४०क्ष (३७८२)
ग्पैरर्विहन्यमानस्य जीवितेनापि किं फलम्।'
निर्मन्युकानां ये लोका द्विषन्तस्तानवाप्नुयुः ।
ये त्वादृतात्मनां लोकाः सुहृदस्तान्व्रजन्तु नः ॥ ५-१३३-४० (३६३८०)
भृत्यैर्विहीयमानानां परपिण्डोपजीविनाम् ।
कृपणानामसत्वानां मा वृत्तिमनुवर्तिथाः ॥ ५-१३३-४१ (३६३८१)
अनु त्वां तात जीवन्तु ब्राह्मणाः सुहृदस्तथा ।
पर्यन्यमिव भूतानि देवा इव शतक्रतुम् ॥ ५-१३३-४२ (३६३८२)
यमाजीवन्ति पुरुषं सर्वभूतानि संजय ।
पक्वं द्रुममिवासाद्य तस्य जीवितमर्थवत् ॥ ५-१३३-४३ (३६३८३)
यस्य शूरस्य विक्रान्तैरेधन्ते बान्धवाः सुखम् ।

त्रिदशा इव शक्रस्य साधु तस्येह जीवितम् ॥ ५-१३३-४४ (३६३८४)
स्वबाहुबलमाश्रित्य योहि जीवति मानवः ।
स लोके लभते कीर्तिं परत्र च शुभां गतिम् ॥ ॥ ५-१३३-४५ (३६३८५)

इति श्रीमन्माभारते उद्योगपर्वणि भगवद्यानपर्वणि
त्रयस्त्रिंशदधिकशततमोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-१३३-२ मन्युमती दैन्यवती । विभावरी कुपिता। विभावरी रजन्यां च वक्रयोषितीति विश्वः ॥
५-१३३-५ अनन्दन कुपुत्र । कुत्सार्थेऽत्र नञ् । ५-१३३-६ क्लीबे निर्वीर्यै साधनं बाह्वादिकं यस्य स तथा ॥
५-१३३-७ मा वीभरः मा पालय । प्रतिसंहर भयमिति शेषः ॥
५-१३३-१० पराक्रमेः पराक्रमं कुरु ॥
५-१३३-११ विवदन् शत्रुजयार्थं अनेकान् पक्षानुद्भावयन्वा तूष्णींभूतोऽरेश्छिद्रं पश्येः । यथा व्योम्नि अपरिशङ्कितः शत्रोराधिक्याद्भयमपश्यन् श्येनस्तद्वत् ॥
५-१३३-१३ विश्रूयस्व ख्यातो भव । सामभेदौ जघन्यमध्यमौ । दानमधमो नीच उपायः। दण्डस्तूतमः। तत्राद्यत्रयकर्ता माभूः किंतु गर्जितो दण्डयितैव भवेत्यर्थः । ऊर्जित इति वा पाठः ॥
५-१३३-१५ कस्यचिद्राज्ञो गेहे स्वरी गर्दभीव मृदुः अकिञ्चिन्करः जायत इति जनिः पुत्रो माभूत् ॥
५-१३३-१६ आजिं संग्रामम् ॥
५-१३३-१७ प्राणानां प्राणाः बलं तत्साध्यानां कार्याणाम् । आनन्तर्यं अविच्छेदेन कार्यधारामारभते । न धनायते धनं आत्मनो नेच्छति। तृष्णं त्यजतीत्यर्थः ॥
५-१३३-१८ ध्रुवां गतिं मरणम्, अग्रत इत्युपहासः । पृष्ठतः कृत्वेत्यर्थः ॥
५-१३३-२० निमज्जता प्रपतिष्यता च शत्रुर्जङ्घायां ग्राह्यः । तेनैव सह निमज्जेत्पतेद्वेत्यर्थः । न विषीदेत् निरुद्यमो न भवेत् ॥
५-१३३-२१ आजानेयाः जात्यश्वाः तेषां कृतं कर्म युद्धेऽनवसादरूपं ॥
५-१३३-२२ त्वत्कृते मग्नमिति संबन्धः । ५-१३३-२३ राशिवर्धनः संख्यापूरको नतु प्रयोजनान्तरार्हः ॥
५-१३३-२४ मातुः उच्चारो विष्ठा ॥
५-१३३-२६ यं एन अमित्रा अभिनन्देषु तं बन्धुं बान्धवः आसाद्य न सुखमेधत इति तृतीयश्लोकेन संबन्धः ॥

५-१३३-२७ अहोलाभकरं अल्पेऽपि लाभे अहो लाभो जात इति विस्मयं कुर्वाणम् ॥
५-१३३-३७ दिष्टभावं मरणम् ॥

उद्योगपर्व - अध्याय १३४
॥ श्रीः ॥
५.१३४. अध्यायः १३४

Mahabharata - Udyoga Parva - Chapter Topics
कुन्त्या विदुलोपाख्यानकथनम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१३४-० (३६३८६)
विदुलोवाच। ५-१३४-०क्ष् (३७८३)
अथैतस्यामवस्थायां पौरुषं हातुमिच्छसि ।
निहीनसेवितं मार्गं गमिष्यस्यचिरादिव ॥ ५-१३४-१ (३६३८७)
यो हि तेजो यथाशक्ति न कर्शयति विक्रमात् ।
क्षत्रियो जीविताकाङ्क्षी स्तेन इत्येव तं विदुः ॥ ५-१३४-२ (३६३८८)
अर्थवन्त्युपपन्नानि वाक्यानि गुणवन्ति च ।
नैव संप्राप्नुवन्ति त्वां मुमूर्षुमिव भेषजम् ॥ ५-१३४-३ (३६३८९)
सन्ति वै सिन्धुराजस्य सन्तुष्टा न तथा जनाः ।
दौर्बल्यादासते मूढा व्यसतौघपतीक्षिणः ॥ ५-१३४-४ (३६३९०)
सहायोपचितिं कृत्वा व्यवसाय्य ततस्ततः ।
अनुदुष्येयुरपरे पश्यन्तस्तव पौरुषम् ॥ ५-१३४-५ (३६३९१)
तैः कृत्वा सह संघातं गिरिदुर्गालयं चर ।
काले व्यसनमाकाङ्क्षन्नैवायमजरामरः ॥ ५-१३४-६ (३६३९२)
सञ्जयो नामतश्च त्वं न च पश्यामि तत्त्वयि ।
अन्वर्थनामा भव मे पुत्र मा व्यर्थनामकः ॥ ५-१३४-७ (३६३९३)
सम्यग्दृष्टिर्महाप्राज्ञो बालं त्वां ब्राह्मणोऽब्रवीत् ।
अयं प्राप्य महत्कृच्छ्रं पुनर्वृद्धिं गमिष्यति ॥ ५-१३४-८ (३६३९४)
तस्य स्मरन्ती वचनमाशंसे विजयं तव ।
तस्मात्तात ब्रवीमि त्वां वक्ष्यामि च पुनःपुनः ॥ ५-१३४-९ (३६३९५)
यस्य ह्यर्थाभिनिर्वृत्तौ भवन्त्याप्यायिताः परे ।
तस्यार्थसिद्धिर्नियता नयेष्वर्थानुसारिणः ॥ ५-१३४-१० (३६३९६)
समृद्धिरसमृद्धिर्वा पूर्वेषां मम सञ्जय ।
एवं विद्वान्युद्धमना भव मा प्रत्युपाहरः ॥ ५-१३४-११ (३६३९७)
नातः पापीयसीं कांचिदवस्थां शम्बरोऽब्रवीत् ।

यत्र नैवाद्य न प्रातर्भोजनं प्रतिदृश्यते ॥ ५-१३४-१२ (३६३९८)
पतिपुत्रवधादेतत्परमं दुःखमब्रवीत् ।
दारिद्र्यमिति यत्प्रोक्तं पर्यायमरणं हि तत् ॥ ५-१३४-१३ (३६३९९)
अहं महाकुले जाता ह्रदाद्ध्रदमिवागता ।
ईश्वरी सर्वकल्याणी भर्त्रा परमपूजिता ॥ ५-१३४-१४ (३६४००)
महार्हमाल्याभरणां सुमृष्टाम्बरवाससम् ।
पुरा हृष्टः सुहृद्वर्गो मामपश्यत्सुहृद्गताम् ॥ ५-१३४-१५ (३६४०१)
यदा मां चैव भार्यां च द्रष्टासि भृशदुर्बलाम् ।
न तदा जीवितेनार्थो भविता तव सञ्जय ॥ ५-१३४-१६ (३६४०२)
दासकर्मकरान्भृत्यानाचार्यर्त्विक्पुरोहितान् ।
अवृत्त्याऽस्मान्प्रजहतो दृष्ट्वा किं जीवितेन ते ॥ ५-१३४-१७ (३६४०३)
यदि कृत्यं न पश्यामि तवाद्याहं यथा पुरा ।
श्लाघनीयं यशस्यं च का शान्तिर्हृदयस्य मे ॥ ५-१३४-१८ (३६४०४)
नेति चेद्ब्राह्मणं ब्रूयां दीर्येत हृदयं मम ।
न ह्यद न च मे भर्ता नेति ब्राह्मणमुक्तवान् ॥ ५-१३४-१९ (३६४०५)
वयमाश्रयणीयाः स्म न श्रोतारः परस्य च ।
अन्यमासाद्य जीवन्ती परित्यक्ष्यामि जीवितम् ॥ ५-१३४-२० (३६४०६)
अपारे भव नः पारमप्लवे भव नः प्लवः ।
कुरुष्व स्थानमस्थाने मृतान्सञ्जीवयस्व नः ॥ ५-१३४-२१ (३६४०७)
सर्वे ते शत्रवः शक्या न चेञ्जीवितुमर्हसि ।
अथ चेदीदृशीं वृत्तिं क्लीबामभ्युपपद्यसे ॥ ५-१३४-२२ (३६४०८)
निर्विण्णात्मा हतमना मुञ्चैतां पापजीविकाम् ।
एकशत्रुवधेनैव शूरो गच्छति विश्रुतिम् ॥ ५-१३४-२३ (३६४०९)
इन्द्रो वृत्रवधेनैव महेन्द्रः समपद्यत ।
माहेन्द्रं च ग्रहं लेभे लोकानां चेश्वरोऽभवत् ॥ ५-१३४-२४ (३६४१०)
नाम विश्राव्य वै शङ्क्ये शत्रूनाहूय दंशितान् ।
सेनाग्रं चापि विद्राव्य हत्वा वा पुरुषं वरम् ॥ ५-१३४-२५ (३६४११)
यदैव लभते वीरः सुयुद्धेन महद्यशः ।
तदैव प्रव्यथन्तेऽस्य शत्रवो विनमन्ति च ॥ ५-१३४-२६ (३६४१२)
त्यक्त्वात्मानं रणे दक्षं शूरं कापुरुषा जनाः ।
अवशास्तर्पयन्ति स्म सर्वकामसमृद्धिभिः ॥ ५-१३४-२७ (३६४१३)
राज्यं चाप्युग्रवि भ्रंशं संशयो जीवितस्य वा ।
न लब्धस्य हि शत्रोर्वै शेषं कुर्वन्ति साधवः ॥ ५-१३४-२८ (३६४१४)
स्वर्गद्वारोपमं राज्यमथवाप्यमृतोपमम् ।
रुद्धमेकायनं मत्वा पतोल्मुक इवारिषु ॥ ५-१३४-२९ (३६४१५)
जहि शत्रून्रणे राजन्स्वधर्मनुपालय ।

मा त्वा दृशं सुकृपणं शत्रूणां भयवर्धनम् ॥ ५-१३४-३० (३६४१६)
अस्मदीयैश्च शोचिद्भिर्नदद्भिश्च परैर्वृतम् ।
अपि त्वां नानुपश्येयं दीनाद्दीनमिवास्थितम् ॥ ५-१३४-३१ (३६४१७)
हृप्य सौवीरकन्याभिः श्लाघस्वार्थैर्यथा पुरा ।
मा च सैन्धवकन्यानामवसन्नो वशं गमः ॥ ५-१३४-३२ (३६४१८)
युवा रूपेण संपन्नो विद्ययाभिजनेन च ।
यत्त्वादृशो विकुर्वीत यशस्वी लोकविश्रुतः ॥ ५-१३४-३३ (३६४१९)
अधुर्यवच्च वोढव्ये मन्ये मरणमेव तत् ।
यदि त्वामनुपश्यामि परस्य प्रियवादिनम् ॥ ५-१३४-३४ (३६४२०)
पृष्ठतोऽनुव्रजन्तं वा का शान्तिर्हृदयस्य मे ।
नास्मिञ्जातु कुले जातो गच्छेद्योन्यस्य पृष्ठतः । ५-१३४-३५ (३६४२१)
न त्वं परस्यानुचरस्तात जीवितुमर्हसि ।
अहं हि क्षत्रहृदयं वेद यत्परिशाश्वतम् ॥ ५-१३४-३६ (३६४२२)
पूर्वैः पूर्वतरैः प्रोक्तं परैः परतरैरपि ।
शाश्वतं चाव्ययं चैव प्रजापतिविनिर्मितम् ॥ ५-१३४-३७ (३६४२३)
यो वै कश्चिदिहाजातः क्षत्रियः क्षत्रधर्मवित् ।
भयाद्वृत्तिसमीक्षो वा न नमेदिह कस्यचित् ॥ ५-१३४-३८ (३६४२४)
उद्यच्छेदेव न नमेदुद्यमो ह्येव पौरुषम् ।
अप्यपर्वणि भज्येत न नमेतेह कस्यचित् ॥ ५-१३४-३९ (३६४२५)
मातङ्गो मत्त इव च परीयात्स महामनाः ।
ब्राह्मणेभ्यो नमेन्नित्यं धर्मायैव च सञ्जय ॥ ५-१३४-४० (३६४२६)
नियच्छन्नितरान्वर्णान्विनिघ्नन्सर्वदुष्कृतः ।
ससहायोऽसहायो वा यावज्जीवं तथा भवेत् ॥ ॥ ५-१३४-४१ (३६४२७)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
चतुस्त्रिंशदधिकशततमोऽध्यायः ।
Mahabharata - Udyoga Parva - Chapter Footnotes

५-१३४-११ पूर्वेषां मम च युद्धे
समृद्धिरसमृद्धिर्वाऽवश्यंभाविनीत्येव विद्वान् युद्धमना
भव लाभालाभौ समौ कृत्वा युध्यस्त्वेति भावः । माप्रत्युपाहरः
प्रत्युपहारं युद्धोपसंहारं माकार्षीरित्यर्थः ॥
५-१३४-१८ कृत्यं कर्तव्यं पराक्रमम् ॥
५-१३४-२० श्रोतारः पराज्ञायाः ॥
५-१३४-२२ शक्याः जेतुमिति शेषः ॥
५-१३४-२३ निर्विण्णात्मा विरक्तचित्तः । यतो हतमना नष्टसंकल्पः

। विश्रुतिं ख्यातिम् ॥
५-१३४-२४ ग्रहं सोमपात्रम् । प्रग्रहमिति पाठे नियमनं
नियन्तृत्वमित्यर्थः ॥
५-१३४-२७ कापुरुषाः जनाः रणे आत्मानं देहं त्यक्त्वा रणे रक्षं
शूरं समृद्धिभिस्तर्पयन्तिस्मेति संबन्धः ॥
५-१३४-२८ उग्रविभ्रंशं महाप्रपातम् । जीवितस्य संशयो
मरणम्। लब्धस्य जितस्य। शेषं पुनः स्वल्पेन विभवेनावस्थापनम् ॥
५-१३४-२९ रुद्धं ग्रस्तं मत्वा एकायनं स्वर्गराज्ययोर्मध्ये एकं
मार्गं पत गच्छ ॥
५-१३४-३० शत्रूणां भयवर्धनं भयच्छेदनम् । अनुग्रत्वात्
सुकृषणं दीनं त्वा त्वां मा दृशं माद्राक्षम् ॥
५-१३४-३२ हृष्य हर्षं प्राप्नुहि । सौवीरकन्याभिः स्वदारैः
। माचेति । सैन्धवकन्यानां शत्रुदेशजकन्यानाम् ॥
५-१३४-३३ विकुर्वीत अपसरणं कुर्वीत ॥
५-१३४-३४ अधुर्यवत् अदान्तवृषभवत् । तत् विकारकरणम् ॥
५-१३४-३६ वेद वेद्मि । परिशाश्वतं
सर्वथैवैकरूपम्। अक्षीणमित्यर्थः ॥
५-१३४-३७ अव्ययं अपक्षयहीनं क्षत्रहृदयं प्रोक्तमिति पूर्वेण
संबन्धः ॥
५-१३४-३८ आजातः सम्यग्जातः कुले जात इत्यर्थः । य आजातः स
भयात्कस्यचिन्न नमेत्। वृत्तिसमीक्षो वृत्तिं समीक्षमाणो वा न
नमेत् ॥
५-१३४-४० परीयात् पर्यटनं कुर्यात् ॥
५-१३४-४१ दुष्कृतः पापिष्टान् ॥

उद्योगपर्व - अध्याय १३५
॥ श्रीः ॥
५.१३५. अध्यायः १३५

Mahabharata - Udyoga Parva - Chapter Topics
कुन्त्या विदुलोपाख्यानकथनम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१३५-० (३६४२८)
पुत्र उवाच। ५-१३५-०क्ष् (३७८४)
कृष्णायसस्येव च ते संहत्य हृदयं कृतम् ।

मम मातस्त्वकरुणे वीरप्रज्ञे ह्यमर्षणे ॥ ५-१३५-१ (३६४२९)
अहो क्षत्रसमाचारो यत्र मामितरं यथा ।
नियोजयसि युद्धाय परमातेव मां तथा ॥ ५-१३५-२ (३६४३०)
ईदृशं वचनं ब्रूयाद्भवती पुत्रमेकजम् ।
किं नु ते मामपश्यन्त्याः पृथिव्या अपि सर्वया ॥ ५-१३५-३ (३६४३१)
किमाभरणकृत्येन किं भोगैर्जीवितेन वा ।
मयि वा सङ्गरहते प्रियपुत्रे विशेषतः ॥ ५-१३५-४ (३६४३२)
मातोवाच। ५-१३५-५क्ष् (३७८५)
सर्वावस्था हि विदुषां तात धर्मार्थकारणात् ।
तावेवाभिसमीक्ष्याहं सञ्जय त्वामचूजुदम् ॥ ५-१३५-५ (३६४३३)
स समीक्ष्य क्रमोपेतो मुख्यः कालोऽयमागतः ।
अस्मिंश्चेदागते काले कार्यं न प्रतिपद्यसे ॥ ५-१३५-६ (३६४३४)
असंभावितरूपस्त्वमानृशंस्यं करिष्यसि ।
तं त्वामयशसा स्पृष्टं न ब्रूयां यदि सञ्जय ॥ ५-१३५-७ (३६४३५)
खरीवात्सल्यमाहुस्तन्निःसामर्थ्यमहेतुकम् ।
सद्भिर्विगर्हितं मार्गं त्यज मूर्खनिषेवितम् ॥ ५-१३५-८ (३६४३६)
अविद्या वै महत्यस्ति यामिमां संश्रिताः प्रजाः ।
तव स्याद्यदि सद्वृत्तं तेन मे त्वं प्रियो भवेः ॥ ५-१३५-९ (३६४३७)
धर्मार्थगुणयुक्तेन नेतरेण कथञ्चन ।
दैवमानुषयुक्तेन सद्भिराचरितेन च ॥ ५-१३५-१० (३६४३८)
यो ह्येवमविनीतेन रमते पुत्रनप्तृणा ।
अनुत्थानवता चापि दुर्विनीतेन दुर्धिया ॥ ५-१३५-११ (३६४३९)
रमते यस्तु पुत्रेण मोघं तस्य प्रजाफलम् ।
अकुर्वन्तो हि कर्माणि कुर्वन्तो निन्दितानि च ॥ ५-१३५-१२ (३६४४०)
सुखं नैवेह नामुत्र लभन्ते पुरुषाधमाः ।
युद्धाय क्षत्रियः सृष्टः सञ्जयेह जयाय च ।
ग्क्रूराय कर्मणे नित्यं प्रजानां परिपालने ॥' ५-१३५-१३ (३६४४१)
जयन्वा वध्यमानो वा प्राप्नोतीन्द्रसलोकताम् ।
न शक्रभवने पुण्ये दिवि तद्विद्यते सुखम् ।
यदमित्रान्वशे कृत्वा क्षत्रियः सुखमेधते ॥ ५-१३५-१४ (३६४४२)
मन्युना दह्यमानेह पुरुषेण मनस्विना ।
निकृतेनेह बहुशः शत्रून्प्रति जिगीषया ॥ ५-१३५-१५ (३६४४३)
आत्मानं वा परित्यज्य शत्रुं वा विनिपात्य च ।
प्राप्यते नेह शान्तिर्हि नित्यमेव तु सञ्जय ।
अतोन्येन प्रकारेण शान्तिरस्य कुतो भवेत् ॥ ५-१३५-१६ (३६४४४)
इह प्राज्ञो हि पुरुषः स्वल्पमप्रियमिच्छति ।

यस्य स्वल्पं प्रियं लोके ध्रुवं तस्यात्पमप्रियम् ॥ ५-१३५-१७ (३६४४५)
प्रियाभावाच्च पुरुषो नैव प्राप्नोति शोभनम् ।
ध्रुवं चाभावमभ्येति गत्वा गङ्गेव सागरम् ॥ ५-१३५-१८ (३६४४६)
पुत्र उवाच। ५-१३५-१९क्ष् (३७८६)
नेयं मतिस्त्वया वाच्या मातः पुत्रे विशेषतः ।
कारुण्यमेव पश्य त्वं भूत्वेह जडमूकवत् ॥ ५-१३५-१९ (३६४४७)
मातोवाच। ५-१३५-२०क्ष् (३७८७)
अतो मे भूयसी नन्दिर्यदेवमनुपश्यसि ।
चोद्यं मां चोदयस्येतद्दृशं वै चोदयामि ते ॥ ५-१३५-२० (३६४४८)
अथ त्वां पूजयिष्यामि हत्वा वै सर्वसैन्धवान् ।
अहं पश्यामि विजयं कृच्छ्रभाविनमेव ते ॥ ५-१३५-२१ (३६४४९)
पुत्र उवाच। ५-१३५-२२क्ष् (३७८८)
अकोशस्यासहायस्य कुतः सिद्धिर्जयो मम ।
इत्यवस्थां विदित्वैतामात्मनात्मनि दारुणाम् ॥ ५-१३५-२२ (३६४५०)
राज्याद्भावो निवृत्तो मे त्रिदिवादिव दुष्कृतः ।
ईदृशं भवती कंचिदुपायमनुपश्यति ॥ ५-१३५-२३ (३६४५१)
तन्मे परिणतप्रज्ञे सम्यक्प्रब्रूहि पृच्छते ।
करिष्यामि हि तत्सर्वं यथावदनुशासनम् ॥ ५-१३५-२४ (३६४५२)
मातोवाच। ५-१३५-२५क्ष् (३७८९)
पुत्र नात्मावमन्तव्यः पूर्वाभिरसमृद्धिभिः ।
अभूत्वा हि भवन्त्यर्था भूत्वा नश्यन्ति चापरे ।
अमर्षणैव चाप्यर्था नारब्धव्याः सुबालिशैः ॥ ५-१३५-२५ (३६४५३)
सर्वेषां कर्मणां तात फले नित्यमनित्यता ।
अनित्यमिति जानन्तो न भवन्ति भवन्ति च ॥ ५-१३५-२६ (३६४५४)
अथ ये नैव कुर्वन्ति नैव जातु भवन्ति ते ।
ऐकगुण्यमनीहायामभावः कर्मणां फलम् ॥ ५-१३५-२७ (३६४५५)
अथ द्वैगुण्यमीहायां फलं भवति वा नवा ।
यस्य प्रागेव विदिता सर्वार्थानामनित्यता ॥ ५-१३५-२८ (३६४५६)
नुदेद्बुद्धिसमृद्धी स प्रतिकूले नृपात्मज ।
उत्थातव्यं जागृतव्यं योक्तव्यं भूतिकर्मसु ॥ ५-१३५-२९ (३६४५७)
भविष्यतीत्येव मनः कृत्वा सततमव्यथैः ।
मङ्गलानि पुरस्कृत्य ब्राह्मणांश्चेश्वरैः सह ॥ ५-१३५-३० (३६४५८)
प्राज्ञस्य नृपतेराशु वृद्धिर्भवति पुत्रक ।
अभिवर्तति लक्ष्मीस्तं प्राचीमिव दिवाकरः ॥ ५-१३५-३१ (३६४५९)
निदर्शनान्युपायांश्च बहून्युद्धर्षणानि च ।
अनुदर्शितरूपोऽसि पश्यामि कुरु पौरुषम् ॥ ५-१३५-३२ (३६४६०)

पुरुषार्थमभिप्रेतं समाहर्तुमिहार्हसि ।
क्रुद्धान्लुब्धान्परिक्षीणानवलिप्तान्विमानितान् ॥ ५-१३५-३३ (३६४६१)
स्पर्धिनश्चैव ये केचित्तान्युक्त उपधारय ।
एतेन त्वं प्रकारेण महतो भेत्स्यसे गणान् ।
महावेग इवोद्धूतो मातरिश्वा बलाहकान् ॥ ५-१३५-३४ (३६४६२)
तेषामग्रप्रदायी स्याः कल्पोत्थायी प्रियंवदः ।
ते त्वां प्रियं करिष्यन्ति पुरोधास्यन्ति च ध्रुवम् ॥ ५-१३५-३५ (३६४६३)
यदैव शत्रुर्जानीयात्सपत्नं त्यक्तजीवितम् ।
तदैवास्मादुद्विजेत सपद्विश्मगतादिव ॥ ५-१३५-३६ (३६४६४)
तं विदित्वा पराक्रान्तं वशे न कुरुते यदि ।
निर्वादैर्निर्वदेदेनमन्ततस्तद्भविष्यति ॥ ५-१३५-३७ (३६४६५)
निर्वादादास्पदं लब्धा धनवृद्धिर्भविष्यति ।
धनवन्तं हि मित्राणि भजन्ते चाश्रयन्ति च ॥ ५-१३५-३८ (३६४६६)
स्खलितार्थं पुनस्तानि सन्त्यजन्ति च बान्धवाः ।
नह्यस्मिन्नाश्रयन्ते च जुगुप्सन्ते च तादृशम् ॥ ५-१३५-३९ (३६४६७)
शत्रुं कृत्वा यः सहायं विश्वासमुपगच्छति ।
स न संभाव्यमेवैतद्यद्राज्यं प्राप्नुयादिति ॥ ॥ ५-१३५-४० (३६४६८)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
पञ्चत्रिंशदधिकशततमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-१३५-१ कृष्णायसस्य लोहस्य । संहत्य णिण्डीकृत्य ॥
५-१३५-३ एकजं अभ्रातृकम् ॥
५-१३५-५ सर्वावस्था गार्हस्थ्यादिरूपा । तावेव धर्मार्थावेव। अचूचुदं
प्रेरितवत्यस्मि ॥
५-१३५-६ समीक्ष्य क्रमोपेतः द्रष्टुं योग्येन पराक्रमेण युक्तः
। अस्मिन्काले चेत् कार्यं कर्तव्यं युद्धं न प्रतिपद्यसे ॥
५-१३५-७ आनृशंस्यं शत्रुषु स्वदेहे वा दयांकरिष्यसि तर्हि त्वं
असंभावितरूपस्तिरस्कृतरूपो भविष्यसीति संबन्धः ॥
५-१३५-८ स्वरीति । उभयलोकानुपयुक्तेपि पुत्रे वृथा वात्सल्यं खरी
करोति तद्वदहमपि स्यामित्यर्थः ॥
५-१३५-१० धर्मार्थेति । त्वया भाव्यमिति शेषः ॥
५-१३५-१५ प्रस्थातव्यमेवेति शेषः ॥
५-१३५-१७ स्वल्पमैश्वर्यं अप्रियमनिष्टं इच्छति मन्यते प्राज्ञः
। यस्य तु अल्पमेवैश्वर्यं प्रियं तस्य ध्रुवं निश्चितं तदेवाल्पं

प्रियत्वेन गृहीतं अप्रियमनर्थकरं स्यात्। तेन राज्ञाऽल्पसंतुष्टेन
न भवितव्यमित्यर्थः ॥
५-१३५-१८ अभावं नाशम् ॥
५-१३५-१९ पश्य हितत्वेनेति शेषःक ॥
५-१३५-२० अतो वचनात् मे मम भूयसी नन्दिः समृद्धिः भवितेति
शेषः । यत् एवं कारुण्यं देहे कृपां अनुपश्यसि हितत्वेन
। एवंसत्यपि त्वमेव चोद्यं पूर्वपक्षं चोदयसि प्रेरयसि कारुण्यं
कुर्विति। अथापि वज्रहृदयाहं ते तुभ्यं चोदयामि ॥
५-१३५-२१ सैन्धवान् हत्वा कृच्छ्रेण भाविनं ते तव विजयं यदा
पश्यामि द्रक्ष्यामि अथ त्वां पूजयिष्यामीति योजना ॥
५-१३५-२२ एतां अवस्थां दारुणामात्मनि आत्मना स्वयं विदित्वा । मे मम
भावश्चित्तं राज्यान्निवृत्त इत्युत्तरेण संबन्धः ॥
५-१३५-२९ वृद्धिः पीडा । वृधु हिंसायामित्यस्य
रूपम्। समृद्धिरैश्वर्यम्। आत्मनः पीडां परस्यैश्वं च
नुदेदित्यर्थः ॥
५-१३५-३५ तेषां क्रुद्धादीनां अग्रप्रदायी । भक्तं वेतनं च
सर्वेभ्यः प्रथमं देयम्। न चेत्सद्यः कुपितास्ते त्यजेयुरित्यर्थः ॥
५-१३५-३६ एनं निर्वादैः परिनिष्ठितैर्दूतैर्निर्वदेत् परिनिष्ठां
प्रापयेत् । साम्ना दानेन वा तं पर्यवस्थापयेदित्यर्थः । अन्ततः
फलतः तत् शत्रोर्वशीकरणं भविष्यति ॥
५-१३५-३७ तत्रोपायमाह निर्वादादिति । एवं परिनिष्ठिततया आस्पदं
स्थानं प्राप्तं चेत् शत्रुणाऽनुपद्रुतस्य धनवृद्ध्यादिकं सर्वं
सेत्स्यतीत्यर्थः ॥

उद्योगपर्व - अध्याय १३६
॥ श्रीः ॥
५.१३६. अध्यायः १३६

Mahabharata - Udyoga Parva - Chapter Topics
विदुलोपाख्यानोपसंहारः ॥ १ ॥
विदुलोपाख्यानश्रवणफलकथनम् ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१३६-० (३६४६९)
मातोवाच। ५-१३६-०क्ष् (३७९०)
नैव राज्ञा दरः कार्यो जातु कस्यांचिदापदि ।

अथ चेदपि दीर्णः स्यान्नैव वर्तेत दीर्णवत् ॥ ५-१३६-१ (३६४७०)
दीर्णं हि दृष्ट्वा राजानं सर्वमेवानुदीर्यते ।
राष्ट्रं बलममात्याश्च पृथक्कुर्वन्ति ते मतीः ॥ ५-१३६-२ (३६४७१)
शत्रुनेके प्रपद्यन्ते प्रजहत्यपरे पुनः ।
अन्ये तु प्रजिहीर्षन्ति ये पुरस्ताद्विमानिताः ॥ ५-१३६-३ (३६४७२)
य एवात्यन्तसुहृदस्त एनं पर्युपासते ।
अशक्तयः स्वस्तिकामा बद्धवत्सा इला इव ॥ ५-१३६-४ (३६४७३)
शोचन्तमनुशोचन्ति पतितानिव बान्धवान् ।
अपि ते पूजिताः पूर्वमपि ते सुहृदो मताः ॥ ५-१३६-५ (३६४७४)
ये राष्ट्रमभिमन्यन्ते राज्ञो व्यसनमीयुषः ।
मा दीदरस्त्वं सुहृदो मा त्वां दीर्णं प्रहासिषुः ॥ ५-१३६-६ (३६४७५)
प्रभावं पौरुषं बुद्धिं जिज्ञासन्त्या मया तव ।
विदधत्या समाश्वासमुक्तं तेजोविवृद्धये ॥ ५-१३६-७ (३६४७६)
यदेतत्संविजानासि यदि सम्यग्ब्रवीम्यहम् ।
कृत्वा सौम्यमिवात्मानं जायायोत्तिष्ठ सञ्जय ॥ ५-१३६-८ (३६४७७)
अस्ति नः कोशनिचयो महानविदितस्तव ।
तमहं वेद नान्यस्तमुपसंपादयामि ते ॥ ५-१३६-९ (३६४७८)
सन्ति नैकशता भूयः सुहृदस्तव सञ्जय ।
सुखदुःखसहा वीर संग्रामादनिवर्तिनः ॥ ५-१३६-१० (३६४७९)
तादृशा हि सहाया वै पुरुषस्य बुभूषतः ।
इष्टं जिहीर्षतः किंचित्सचिवाः शत्रुकर्शन ॥ ५-१३६-११ (३६४८०)
तस्यास्त्वीदृशकं वाक्यं श्रुत्वापि स्वल्पचेतसः ।
तमस्त्वपागमत्तस्य सुचित्रार्थपदाक्षरम् ॥ ५-१३६-१२ (३६४८१)
पुत्र उवाच। ५-१३६-१३क्ष् (३७९१)
उदके नौरियं धार्या वक्तव्यं प्रवणे मया ।
यस्य मे भवती नेत्री भविष्यद्भूतिदर्शिनी ॥ ५-१३६-१३ (३६४८२)
अहं हि वचनं त्वत्तः शुश्रूषुरपरापरम् ।
किञ्चित्किञ्चित्प्रतिवदंस्तूष्णीमासं मुहुर्मुहुः ॥ ५-१३६-१४ (३६४८३)
अतृप्यन्नमृतस्येव कृच्छ्राल्लब्धस्य बान्धवात् ।
उद्यच्छाम्येष शत्रूणां नियमार्थं जायय च ॥ ५-१३६-१५ (३६४८४)
कुन्त्युवाच। ५-१३६-१६क्ष् (३७९२)
सदश्व इव स क्षिप्तः प्रणुन्नो वाक्यसायकैः ।
तच्चकार तथा सर्वं यथावदनुशासनम् ॥ ५-१३६-१६ (३६४८५)
इदमुद्धर्षणं भीमं तेजोवर्धनमुत्तमम् ।
राजानं श्रावयेन्मन्त्री सीदन्तं शत्रुपीडितम् ॥ ५-१३६-१७ (३६४८६)
जयो नामेतिहासोऽयं श्रोतव्यो विजिगीषुणा ।

महीं विजयते क्षिप्रं श्रुत्वा शत्रूंश्च मर्दति ॥ ५-१३६-१८ (३६४८७)
इदं पुंसवनं चैव वीराजननमेव च ।
अभीक्ष्णं गर्भिणी श्रुत्वा ध्रुवं वीरं प्रजायते ॥ ५-१३६-१९ (३६४८८)
विद्याशूरं तपःशूरं दानशूरं तपस्विनम् ।
ब्राह्मया श्रिया दीप्यमानं साधुवादे च संमतम् ॥ ५-१३६-२० (३६४८९)
अर्चिष्मन्तं बलोपेतं महाभागं महारथम् ।
धृतिमन्तमनाधृष्यं जेतारमपराजितम् ॥ ५-१३६-२१ (३६४९०)
नियन्तारमसाधूनां गोप्तारं धर्मचारिणाम् ।
ईदृशं क्षत्रिया सूते वीरं सत्यपराक्रमम् ॥ ॥ ५-१३६-२२ (३६४९१)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
षट्त्रिंशदधिकशततमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-१३६-१ दरो भयम् ॥
५-१३६-४ इला धेनवः ॥
५-१३६-१० शतार्हा अनिवर्तिन इति को खो पाठः । शतार्हाः
शतवेतनयोग्या इति रत्नगर्भः ॥
५-१३६-१२ स्वल्पचेतसोपि तस्य तमोपागमदिति संबन्धः ॥
५-१३६-१३ उदके भूरियं धार्या मर्तव्यं प्रवणे मया इति झो
पाठः । तत्रायमर्थः । उदके मज्जन्तीव भूः पित्र्यं राज्यं
।(धूरिति पाठेपि स एवार्थः) इयं मया धार्या मग्नं राज्यं वा
उद्धर्तव्यम् । प्रवणे प्रपाते वा युद्धाख्ये वा मर्तव्यं नतु एवमेव
निर्व्यापारेण स्थेयम् । नेत्री शिक्षयित्री । उदके सूर्यवद्यस्मिन्सक्तव्यं
प्रवणे मया इति डो पाठः ॥
५-१३६-१४ अपरापरं उत्तरोत्तरम् । प्रतिवदन् प्रतिकूलं वदन् ॥
५-१३६-१५ बान्धवात् बन्धुतः । उद्यच्छामि उद्यमं करोमि । नियमार्थ
निग्रहार्थम् ॥
५-१३६-१९ पुंसवनं पुत्रप्रसवकरम् ॥

उद्योगपर्व - अध्याय १३७
॥ श्रीः ॥
५.१३७. अध्यायः १३७

Mahabharata - Udyoga Parva - Chapter Topics
कुन्त्या श्रीकृष्णे अर्जुनादीन्प्रति वक्तव्यसंदेशकथनम् ॥ १ ॥
श्रीकृष्णस्य स्वरथमारोपितेन कर्णेन सह

संभाषणपूर्वकमुपप्लाव्यं प्रत्यागमनम् ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१३७-० (३६४९२)
कुन्त्युवाच। ५-१३७-०क्ष् (३७९३)
अर्जुनं केशव ब्रूयास्त्वयि जाते स्म सूतके ।
उपोपविष्टा नारीभिराश्रमे परिवारिता ॥ ५-१३७-१ (३६४९३)
अथान्तरिक्षे वागासीद्दिव्यरूपा मनोरमा ।
सहस्राक्षसमः कुन्ति भविष्यत्येष ते सुतः । ५-१३७-२ (३६४९४)
एष जेष्यति सङ्ग्रामे कुरून्सर्वान्समागतान् ।
भीमसेनद्वितीयश्च लोकमुद्धर्तयिष्यति ॥ ५-१३७-३ (३६४९५)
पुत्रस्ते पृथिवीं जेता यशश्चास्य दिवं स्पृशेत् ।
हत्वा कुरूंश्च सङ्ग्रामे वासुदेवसहायवान् ॥ ५-१३७-४ (३६४९६)
पित्र्यमंशं प्रनष्टं च पुनरप्युद्धरिष्यति ।
भ्रातृभिः सहितः श्रीमांस्त्रीन्मेधानाहरिष्यति ॥ ५-१३७-५ (३६४९७)
स सत्यसन्धो बीभत्सुः सव्यसाची यथाच्युत ।
तथा त्वमेव जानासि बलवन्तं दुरासदम् ॥ ५-१३७-६ (३६४९८)
तथा तदस्तु दाशार्ह यथा वागभ्यभाषत ।
धर्मश्चेदस्ति वार्ष्णेय तथा सत्यं भविष्यति ॥ ५-१३७-७ (३६४९९)
त्वं चापि तत्तथा कृष्ण सर्वं संपादयिष्यसि ।
नाहं तदभ्यसूयामि यथा वागभ्यभाषत ॥ ५-१३७-८ (३६५००)
नमो धर्माय महते धर्मो धारयति प्रजाः ।
एतद्धनञ्जयो वाच्यो नित्योद्युक्तो वृकोदरः ॥ ५-१३७-९ (३६५०१)
यदर्थं क्षत्रिया सूते तस्य कालोऽयमागतः ।
न हि वैरं समासाद्य सीदन्ति पुरुषर्षभाः ॥ ५-१३७-१० (३६५०२)
विदिता ते सदा बुद्धिर्भीमस्य न स शाम्यति ।
यावदन्तं न कुरुते शत्रूणां शत्रुकर्शनः ॥ ५-१३७-११ (३६५०३)
तावदेव महापबाहुर्निशासु न सुखं लभेत् ।
सर्वधर्मविशेषज्ञां स्नुषां पाण्डोर्महात्मनः ।
ब्रूया माधव कल्याणीं कृष्ण कृष्णां यशस्विनीम् ॥ ५-१३७-१२ (३६५०४)
युक्तमेतन्महाभागे कुले जाते यशस्विनि ।
यन्मे पुत्रेषु सर्वेषु यथावत्त्वमवर्तिथाः ॥ ५-१३७-१३ (३६५०५)
माद्रीपुत्रौ च वक्तव्यौ क्षत्रधर्मरतावुभौ ।
विक्रमेणार्जितान्भोगान्वृणीतं जीवितादपि ॥ ५-१३७-१४ (३६५०६)
विक्रमाधिगता ह्यर्थाः क्षत्रधर्मेण जीवतः ।

मनो मनुष्यस्य सदा प्रीणन्ति पुरुषोत्तम ॥ ५-१३७-१५ (३६५०७)
यच्च वः प्रेक्षमाणानां सर्वधर्मोपचायिनाम् ।
पाञ्चाली परुषाण्युक्तका को नु तत्क्षन्तुमर्हति ॥ ५-१३७-१६ (३६५०८)
न राज्यहरणं दुःखं द्यूते चापि पराजयः ।
प्रव्राजनं सुतानां वा न मे तद्दुःखकारणम् ॥ ५-१३७-१७ (३६५०९)
यत्र सा बृहती श्यामा सभायां रुदती तदा ।
अश्रौषीत्परुषा वाचस्तन्मे दुःखतरं महत् ॥ ५-१३७-१८ (३६५१०)
स्त्रीधर्मिणी वरारोहा क्षत्रधर्मरता सदा ।
नाध्यगच्छत्तदा नाथं कृष्णा नाथवती सती ॥ ५-१३७-१९ (३६५११)
तं वै ब्रूहि महाबाहो सर्वशस्त्रभृतां वरम् ।
अर्जुनं पुरुषव्याघ्रं द्रौपद्याः पदवीं चर ॥ ५-१३७-२० (३६५१२)
विदितं हि तवात्यन्तं क्रूद्धाविव यमान्तकौ ।
भीमार्जुनौ नयेतां हि देवानपि परां गतिम् ॥ ५-१३७-२१ (३६५१३)
तयोश्चैतदवज्ञानं यत्सा कृष्णा सभागता ।
दुःशासनश्च यद्वीमं कटुकान्यभ्यभाषत ॥ ५-१३७-२२ (३६५१४)
पश्यतां कुरुवीराणां तच्च संस्मारयेः पुनः ।
पाण्डवान्कुशलं पृच्छेः सपुत्रान्कृष्णया सह ॥ ५-१३७-२३ (३६५१५)
मां वै कुशलिनीं ब्रूयास्तेषु भूयो जनार्दन ।
अरिष्टं गच्छ पन्थानं पुत्रान्मे प्रतिपालय ॥ ५-१३७-२४ (३६५१६)
वैशम्पायन उवाच। ५-१३७-२५क्ष् (३७९४)
अभिवाद्याथ तां कृष्णः कृत्वा चापि प्रदक्षिणम् ।
निश्चक्राम महाबाहुः सिंहखेलगतिस्ततः ॥ ५-१३७-२५ (३६५१७)
ततो विसर्जयामास भीष्मादीन्कुरुपुङ्गवान् ।
आरोप्याथ रथे कर्णं प्रायात्सात्यकिना सह ॥ ५-१३७-२६ (३६५१८)
ततः प्रयाते दाशार्हे कुरवः सङ्गता मिथः ।
जजल्पुर्महदाश्चर्यं केशवे परमाद्भुतम् ॥ ५-१३७-२७ (३६५१९)
प्रमूढा पृथिवी सर्वा मृत्युपाशवशीकृता ।
दुर्योधनस्य बालिश्यान्नैतदस्तीति चाब्रुवन् ॥ ५-१३७-२८ (३६५२०)
ततो निर्याय नगरात्प्रययौ पुरुषोत्तमः ।
मन्त्रयामास च तदा कर्णेन सुचिरं सह ॥ ५-१३७-२९ (३६५२१)
विसर्जयित्वा राधेयं सर्वयादवनन्दनः ।
ततो जवेन महता तूर्णमश्वानचोदयत् ॥ ५-१३७-३० (३६५२२)
ते पिबन्त इवाकाशं दारुकेण प्रचोदिताः ।
हया जग्मुर्महावेगा मनोमारुतरंहसः ॥ ५-१३७-३१ (३६५२३)
ते व्यतीत्य महाध्वानं क्षिप्रं श्येना इवाशुगाः ।
उच्चैर्जग्मुरुपप्लाव्यं शार्ङ्गधन्वानमावहन् ॥ ॥ ५-१३७-३२ (३६५२४)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
सप्तत्रिंशदधिकशततमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-१३७-३ उद्वर्तयिष्यति आकुलीकरिष्यति । लोकं शत्रुजनम् ॥
५-१३७-५ मेधान् अश्वमेधान् ॥
५-१३७-१६ धर्मोपचायिनां धर्मवर्धनशीलानाम् ॥
५-१३७-२० पदवीं चर मार्गमनुसर ॥
५-१३७-२८ नैतदस्ति । राष्ट्रमिति शेषः ॥
५-१३७-२९ निर्याय निर्गत्य ॥
५-१३७-३२ उपप्लाव्यं विराटनगरम् ॥

उद्योगपर्व - अध्याय १३८
॥ श्रीः ॥
५.१३८. अध्यायः १३८

Mahabharata - Udyoga Parva - Chapter Topics

भीष्मद्रोणाभ्यां कुन्तीवाक्यं श्रुत्वा समीपस्थं दुर्योधनं प्रति
पाण्डवानां कुन्तीनिदेशानतिलङ्घित्वकथनपूर्वकं पाण्डवैः सह
सन्धिविधानम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१३८-० (३६५२५)
वैशम्पायन उवाच। ५-१३८-०क्ष् (३७९५)
कुन्त्यास्तु वचनं श्रुत्वा भीष्मद्रोणौ महारथौ ।
दुर्योधनमिदं वाक्यमूचतुः शासनातिगम् ॥ ५-१३८-१ (३६५२६)
श्रुतं ते पुरुषव्याघ्र कुन्त्याः कृष्णस्य संनिधौ ।
वाक्यमर्थवदत्युग्रमुक्तं धर्म्यमनुत्तमम् ॥ ५-१३८-२ (३६५२७)
तत्करिष्यन्ति कौन्तेया वासुदेवस्य संमतम् ।
न हि ते जातु शाम्येरन्नृते राज्येन कौरव ॥ ५-१३८-३ (३६५२८)
क्लेशिता हि त्वया पार्था धर्मपाशसितास्तदा ।
सभायां द्रौपदी चैव तैश्च तन्मर्षितं तव ॥ ५-१३८-४ (३६५२९)
कृतास्त्रं ह्यर्जुनं प्राप्य भीमं च कृतनिश्चयम् ।
गाण्डीवं चेषुधी चैव रथं च ध्वजमेव च ॥ ५-१३८-५ (३६५३०)
नकुलं सहदेवं च बलवीर्यसमन्वितौ ।

सहायं वासुदेवं च न क्षंस्यति युधिष्ठिरः ॥ ५-१३८-६ (३६५३१)
प्रत्यक्षं ते महाबाहो यथा पार्थेन धीमता ।
विराटनगरे पूर्वं सर्वे स्म युधि निर्जिताः ॥ ५-१३८-७ (३६५३२)
दानवा घोरकर्माणो निवातकवचा युधि ।
रौद्रमस्त्रं समादाय दग्धा वानरकेतुना ॥ ५-१३८-८ (३६५३३)
कर्णप्रभृतयश्चेमे त्वं चापि कवची रथी ।
मोक्षितो घोषयात्रायां पर्याप्तं तन्निदर्शनम् ॥ ५-१३८-९ (३६५३४)
प्रशाम्य भरतश्रेष्ठ भ्रातृभिः सह पाण्डवैः ।
रक्षेमां पृथिवीं सर्वां मृत्योर्दंष्ट्रान्तरं गताम् ॥ ५-१३८-१० (३६५३५)
ज्येष्ठो भ्राता धर्मशीलो वत्सलः श्लक्ष्णवाक्कविः ।
तं गच्छ पुरुषव्याघ्रं व्यपनीयेह किल्बिषम् ॥ ५-१३८-११ (३६५३६)
दृष्टश्चेत्त्वं पाण्डवेन व्यपनीतशरासनः ।
प्रशान्तभ्रुकुटिः श्रीमान्कृता शान्तिःकुलस्य नः ॥ ५-१३८-१२ (३६५३७)
तमभ्येत्य सहामात्यः परिष्वज्य नृपात्मजम् ।
अभिवादय राजानं यथापूर्वमरिन्दम ॥ ५-१३८-१३ (३६५३८)
अभिवादयमानं त्वां पाणिभ्यां भीमपूर्वजः ।
प्रतिगृह्णातु सौहार्दात्कुन्तीपुत्रो युधिष्ठिरः ॥ ५-१३८-१४ (३६५३९)
सिंहस्कन्धोरुबाहुस्त्वां वृत्तायतमहाभुजः ।
परिष्वजतु बाहुभ्यां भीमः प्रहरतां वरः ॥ ५-१३८-१५ (३६५४०)
कम्बुग्रीवो गुडाकेशस्ततस्त्वां पुष्करेक्षणः ।
अभिवादयतां पार्थः कुन्तीपुत्रो धनञ्जयः ॥ ५-१३८-१६ (३६५४१)
आश्विनेयौ नरव्याघ्रौ रूपेणाप्रतिमौ भुवि ।
तौ च त्वां गुरुवत्प्रोम्णा पूजया प्रत्युदीयताम् ॥ ५-१३८-१७ (३६५४२)
मुञ्चन्त्वानन्दजाश्रूणि दाशार्हप्रमुखा नृपाः ।
संगच्छ भ्रातृभिः सार्धं मानं संत्यज्य पार्थिव ॥ ५-१३८-१८ (३६५४३)
प्रशाधि पृथिवीं कृत्स्नां ततस्त्वं भ्रातृभिः सह ।
समालिङ्ग्य च हर्षेण नृपा यान्तु परस्परम् ॥ ५-१३८-१९ (३६५४४)
अलं युद्धेन राजेन्द्र सुहृदां शृणु वारणम् ।
ध्रुवं विनाशो युद्धे हि क्षत्रियाणां प्रदृश्यते ॥ ५-१३८-२० (३६५४५)
ज्योतींषि प्रतिकूलानि दारुणा मृगपक्षिणः ।
उत्पाता विविधा वीर दृश्यन्ते क्षत्रनाशनाः ॥ ५-१३८-२१ (३६५४६)
विशेषत इहास्माकं निमित्तानि विनाशने ।
उल्काभिर्हि प्रदीप्ताभिर्बाध्यते पृतना तव ॥ ५-१३८-२२ (३६५४७)
वाहनान्यप्रहृष्टानि रुदन्तीव विशांपते ।
गृध्रास्ते पर्युपासन्ते सैन्यानि च समन्ततः ॥ ५-१३८-२३ (३६५४८)
नगरं न यथापूर्वं तथा राजनिवेशनम् ।

शिवाश्चाशिवनिर्घोषा दीप्तां सेवन्ति वै दिशं ॥ ५-१३८-२४ (३६५४९)
कुरु वाक्यं पितुर्मातुरस्माकं च हितैषिणाम् ।
त्वय्यायत्तो महाबाहो शमो व्यायाम एव च ॥ ५-१३८-२५ (३६५५०)
न चेत्करिष्यसि वचः सुहृदामरिकर्शन ।
तप्स्यसे वाहिनीं दृष्ट्वा पार्थबाणप्रपीडिताम् ॥ ५-१३८-२६ (३६५५१)
भीमस्य च महानादं नदतः शुष्मिणो रणे ।
श्रुत्वा स्मर्तासि मे वाक्यं गाण्डीवस्य च निःस्वनम् ।
यद्येतदपसव्यं ते वचो मम भविष्यति ॥ ॥ ५-१३८-२७ (३६५५२)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
अष्टत्रिंशदधिकशततमोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-१३८-१० प्रशाम्य प्रशमं कुरु ॥
५-१३८-२० वारणं प्रतिषेधम् ॥
५-१३८-२४ दीप्तां दिशमिति दिग्दाहाख्य उत्पात उक्तः ॥
५-१३८-२७ शुष्मिणः बलिनः । अपसव्यं विपरीतम् ॥

उद्योगपर्व - अध्याय १३९
॥ श्रीः ॥
५.१३९. अध्यायः १३९

Mahabharata - Udyoga Parva - Chapter Topics
Mahabharata - Udyoga Parva - Chapter Text

५-१३९-० (३६५५३)
वैशम्पायन उवाच। ५-१३९-०क्ष् (३७९६)
एवमुक्तस्तु विमनास्तिर्यग्दृष्टिरधोमुखः ।
संहत्य च भ्रुवोर्मध्यं न किञ्चिद्व्याजहार ह ॥ ५-१३९-१ (३६५५४)
तं वै विमनसं दृष्ट्वा संप्रेक्ष्यान्योन्यमन्तिकात् ।
पुनरेवोत्तरं वाक्यमुक्तवन्तौ नरर्षभौ ॥ ५-१३९-२ (३६५५५)
भीष्म उवाच। ५-१३९-३क्ष् (३७९७)
शुश्रूषमनसूयं च ब्रह्मण्यं सत्यवादिनम् ।
प्रतियोत्स्यामहे पार्थमतो दुःखतरं नु किम् ॥ ५-१३९-३ (३६५५६)
द्रोण उवाच। ५-१३९-४क्ष् (३७९८)
अश्वत्थाम्नि यथा पुत्रे भूयो मम धनञ्जये ।
बहुमानः परो राजन्सन्नतिश्च कपिध्वजे ॥ ५-१३९-४ (३६५५७)

तं चेत्पुत्रात्प्रियतमं प्रतियोत्स्ये धनञ्जयम् ।
क्षात्रं धर्ममनुष्ठाय धिगस्तु क्षत्रिजीविकाम् ॥ ५-१३९-५ (३६५५८)
यस्य लोके समो नास्ति कश्चिदन्यो धनुर्धरः ।
मत्प्रसादात्स बीभत्सुः श्रेयानन्यैर्धनुर्धरैः ॥ ५-१३९-६ (३६५५९)
मित्रध्रुग्दुष्टभावश्च नास्तिकोऽथानृजुः शठः ।
न सत्सु लभते पूजां यज्ञे मूर्ख इवागतः ॥ ५-१३९-७ (३६५६०)
वार्यमाणोऽपि पापेभ्यः पापात्मा पापमिच्छति ।
चोद्यमानोऽपि पापेन शुभात्मा शुभमिच्छति ॥ ५-१३९-८ (३६५६१)
मिथ्योपचरिता ह्येते वर्तमान ह्यनुप्रिये ।
अहितत्वाय कल्पन्ते दोषा भरतसत्तम ॥ ५-१३९-९ (३६५६२)
त्वमुक्तः कुरुवृद्धेन मया च विदुरेण च ।
वासुदेवेन च तथा श्रेयो नैवाभिमन्यसे ॥ ५-१३९-१० (३६५६३)
अस्ति मे बलमित्येव सहसा त्वं तितीर्षसि ।
सग्राहनक्रमकरं गङ्गावेगमिवोष्णगे ॥ ५-१३९-११ (३६५६४)
वाससैव यथा हि त्वं प्रावृण्वानोऽभिमन्यसे ।
स्रजं त्यक्तामिव प्राप्य लोभाद्यौधिष्ठिरीं श्रियम् ॥ ५-१३९-१२ (३६५६५)
द्रौपदीसहितं पार्थं सायुधैर्भ्रातृभिर्वृतम् ।
वनस्थमपि राज्यस्थः पाण्डवं को विजेष्यति ॥ ५-१३९-१३ (३६५६६)
निदेशे यस्य राजानः सर्वे तिष्ठन्ति किङ्कराः ।
तमैलविलमासाद्य धर्मराजो व्यराजत ॥ ५-१३९-१४ (३६५६७)
कुबेरसदनं प्राप्य ततो रत्नान्यवाप्य च ।
स्फीतमाक्रम्य ते राष्ट्रं राज्यमिच्छन्ति पाण्डवाः ॥ ५-१३९-१५ (३६५६८)
दत्तं हुतमधीतं च ब्राह्मणास्तर्पिता धनैः ।
आवयोर्गतमायुश्च कृतकृत्यौ च विद्धि नौ ॥ ५-१३९-१६ (३६५६९)
त्वं तु हित्वा सुखं राज्यं मित्राणि च धनानि च ।
विग्रहं पाण्डवैः कृत्वा महद्व्यसनमाप्स्यसि ॥ ५-१३९-१७ (३६५७०)
द्रौपदी यस्य चाशास्ते विजयं सत्यवादिनी ।
तपोघोरव्रता देवी कथं जेष्यसि पाण्डवम् ॥ ५-१३९-१८ (३६५७१)
मन्त्री जनार्दनो यस्य भ्राता यस्य धनञ्जयः ।
सर्वशस्त्रभृतां श्रेष्ठः कथं जेष्यसि पाण्डवम् ॥ ५-१३९-१९ (३६५७२)
सहाया ब्राह्मणा यस्य धृतिमन्तो जितेन्द्रियाः ।
तमुग्रतपसं वीरं कथं जेष्यसि पाण्डवम् ॥ ५-१३९-२० (३६५७३)
पुनरुक्तं च वक्ष्यामि यत्कार्यं भूतिमिच्छता ।
सुहृदा मज्जमानेषु सुहृत्सु व्यसनार्णवे ॥ ५-१३९-२१ (३६५७४)
अलं युद्धेन तैर्वीरैः शाम्य त्वं कुरुवृद्धये ।
मा गमः सतुतामात्यःसमित्रश्च यमक्षयम् ॥ ॥ ५-१३९-२२ (३६५७५)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
एकोनचत्वारिंशदधिकशततमोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-१३९-९ एते पाण्डवास्त्वया मिथ्योपचारिता अपि अनु पश्चात्प्रिये
वर्तमाना हि प्रसिद्धम् । तव तु दोषाः द्वेषादयः । अहितत्वाय
वैरभावाय कल्पन्ते ॥
५-१३९-११ उष्णगे उष्णातिगमे वर्षकाले ॥
५-१३९-१२ वासुदेवो यथा हि त्वां प्रवृण्वानो न मन्यते इति खो डो
पाठः । वासमेव यथाहि त्वं इति घोटो पाठः । वासवेय यथा इति को
पाठः ॥
५-१३९-१४ ऐलविलं कुबेरम् । आसाद्य रणे प्राप्य ॥

उद्योगपर्व - अध्याय १४०
॥ श्रीः ॥
५.१४०. अध्यायः १४०

Mahabharata - Udyoga Parva - Chapter Topics
कृष्णेन कर्णः किमुक्त इति जनमेजयप्रश्नः ॥ १ ॥
कृष्णेन कर्णंप्रति तस्य कुन्तीसुतत्वरूपरहस्यकथनपूर्वकं
पाण्डवपक्षप्रवेशचोदना ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१४०-० (३६५७६)
जनमेजय उवाच । ५-१४०-०क्ष् (३७९९)
राजपुत्रैः परिवृतस्तथा भृत्यैश्च सत्तम ।
उपारोप्य रथे कर्णं निर्यातो मधुसूदनः ॥ ५-१४०-१ (३६५७७)
किमब्रवीद्रथोपस्थे राधेयं परवीरहा ।
कानि सान्त्वानि गोविन्दः सूतपुत्रे प्रयुक्तवान् ॥ ५-१४०-२ (३६५७८)
उद्यन्मेघस्वनः काले यत्कृष्णः कर्णमब्रवीत् ।
मृदु वा यदि वा तीक्ष्णं तन्ममाचक्ष्व सर्वशः ॥ ५-१४०-३ (३६५७९)
वैशम्पायन उवाच । ५-१४०-४क्ष् (३८००)
आनुपूर्व्येण वाक्यानि तीक्ष्णानि च मृदूनि च ।
प्रियाणि धर्मयुक्तानि सत्यानि च हितानि च ॥ ५-१४०-४ (३६५८०)
हृदयग्रहणीयानि राधेयं मधुसूदनः ।

यान्यब्रवीदमेयात्मा तानि मे शृणु भारत ॥ ५-१४०-५ (३६५८१)
वासुदेव उवाच। ५-१४०-६क्ष् (३८०१)
उपासितास्ते राधेय ब्राह्मणा वेदपारगाः ।
तत्त्वार्थं परिपृष्टाश्च नियतेनानसूयया ॥ ५-१४०-६ (३६५८२)
त्वमेव कर्ण जानासि वेदवादान्सनातनान् ।
त्वमेव धर्मशास्त्रेषु सूक्ष्मेषु परिनिष्ठितः ॥ ५-१४०-७ (३६५८३)
कानीनश्च सहोढश्च कन्यायां यश्च जायते ।
वोढारं पितरं तस्य प्राहुः शास्त्रविदो जनाः ॥ ५-१४०-८ (३६५८४)
सोऽसि कर्ण तथाजातः पाण्डोः पुत्रोसि धर्मतः ।
निश्चयाद्धर्मशास्त्राणामेहि राजा भविष्यसि ॥ ५-१४०-९ (३६५८५)
पितृपक्षे च ते पार्था मातृपक्षे च वृष्णयः ।
द्वौ पक्षावभिजानीहि त्वमेतौ पुरुषर्षभ ॥ ५-१४०-१० (३६५८६)
मया सार्धमितो यातमद्य त्वां तात पाण्डवाः ।
अभिजानन्तु कौन्तेयं पूर्वजातं युधिष्ठिरात् ॥ ५-१४०-११ (३६५८७)
पादौ तव ग्रहीष्यन्ति भ्रातरः पञ्च पाण्डवाः ।
द्रौपदेयास्तथा पञ्च सौभद्रश्चापराजितः ॥ ५-१४०-१२ (३६५८८)
राजानो राजपुत्राश्च पाण्डवार्थे समागताः ।
पादौ तव ग्रहीष्यन्ति सर्वे चान्धकवृष्णयः ॥ ५-१४०-१३ (३६५८९)
हिरण्मयांश्च ते कुम्भान्राजतान्पार्थिवांस्तथा ।
ओषध्यः सर्वबीजानि सर्वरत्नानि वीरुधः ॥ ५-१४०-१४ (३६५९०)
राजन्या राजकन्याश्चाप्यानयन्त्वाभिषेचनम् ।
षष्ठे त्वां च तथा काले द्रौपद्युपगमिष्यति ॥ ५-१४०-१५ (३६५९१)
अग्निं जुहोतु वै धौम्यः संशितात्मा द्विजोत्तमः ।
अद्य त्वामभिषिञ्चन्तु चातुर्वैद्या द्विजातयः ॥ ५-१४०-१६ (३६५९२)
पुरोहितः पाण्डवानां ब्रह्मकर्मण्यवस्थितः ।
तथैव भ्रातरः पञ्च पाण्डवाः पुरुषर्षभाः ॥ ५-१४०-१७ (३६५९३)
द्रौपदेयास्तथा पञ्च पाञ्चालाश्चेदयस्तथा ।
अहं च त्वाऽभिषेक्ष्यामि राजानं पृथिवीपतिम् ॥ ५-१४०-१८ (३६५९४)
युवराजोऽस्तु ते राजा धर्मपुत्रो युधिष्ठिरः ।
गृहीत्वा व्यजनं श्वेतं धर्मात्मा संशितव्रतः । ५-१४०-१९ (३६५९५)
उपान्वारोहतु रथं कुन्तीपुत्रो युधिष्ठिरः ।
छत्रं च ते महाश्वेतं भीमसेनो महाबलः ॥ ५-१४०-२० (३६५९६)
अभिषिक्तस्य कौन्तेयो धारयिष्यति मूर्धनि ।
किङ्किणीशतनिर्घोषं वैयाघ्रपरिवारणम् ॥ ५-१४०-२१ (३६५९७)
रथं श्वेतहयैर्युक्तमर्जुनो वाहयिष्यति ।
अभिमन्युश्च ते नित्यं प्रत्यासन्नो भविष्यति ॥ ५-१४०-२२ (३६५९८)

नकुलः सहदेवश्च द्रौपदेयाश्च पञ्च ये ।
पञ्चालाश्चानुयास्यन्ति शिखण्डी च महारथः । ५-१४०-२३ (३६५९९)
अहं च त्वाऽनुयास्यामि सर्वे चान्धकवृष्णयः ।
दाशार्हाः परिवारास्ते दाशार्णाश्च विशांपते ॥ ५-१४०-२४ (३६६००)
भुङ्क्ष्व राज्यं महाबाहो भ्रातृभिः सह पाण्डवैः ।
जपैर्होमैश्च संयुक्तो मङ्गलैश्च पृथग्विधैः ॥ ५-१४०-२५ (३६६०१)
पुरोगमाश्च ते सन्तु द्रविडाः सहकुन्तलैः ।
आन्ध्रास्तालचराश्चैव चूचुपा वेणुपास्तथा ॥ ५-१४०-२६ (३६६०२)
स्तुवन्तु त्वां च बहुभिः स्तुतिभिः सूतमागधाः ।
विजयं वसुषेणस्य घोषयन्तु च पाण्डवाः ॥ ५-१४०-२७ (३६६०३)
स त्वं परिवृतः पार्थैर्नक्षत्रैरिव चन्द्रमाः ।
प्रशाधि राज्यं कौन्तेय कुन्तीं च प्रतिनन्दय ॥ ५-१४०-२८ (३६६०४)
मित्राणि ते प्रहृष्यन्तु व्यथन्तु रिपवस्तथा ।
सौभ्रात्रं चैव तेऽद्यास्तु भ्रातृभिः सह पाण्डवैः ॥ ॥ ५-१४०-२९
(३६६०५)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
चत्वारिंशदधिकशततमोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-१४०-८ यश्च यस्तु कन्यायां जायते स द्विविधः कानीनः सहोढश्च
। सहोढः विवाहादूर्ध्वं जातः। अन्यो विवाहात्प्राग्जातः । तन्मातुर्वोढारं
तस्य पितरं प्राहुः ॥

उद्योगपर्व - अध्याय १४१
॥ श्रीः ॥
५.१४१. अध्यायः १४१

Mahabharata - Udyoga Parva - Chapter Topics
कर्णेन कृष्णंप्रति स्वस्य पाण्डवपक्षप्रवेशे सयुक्तिकं
प्रतिबन्धकनिरूपणपूर्वकं स्वरहस्यगोपनप्रार्थनादि ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१४१-० (३६६०६)
कर्ण उवाच। ५-१४१-०क्ष् (३८०२)

असंशयं सौहृदान्मे प्रणयाच्चाथ केशव ।
सख्येन चैव वार्ष्णेय श्रेयस्कामतयैव च ॥ ५-१४१-१ (३६६०७)
सर्वं चैवाभिजानामि पाण्डोः पुत्रोऽस्मि धर्मतः ।
निश्चयाद्धर्मशास्त्राणां यथा त्वं कृष्ण मन्यसे ॥ ५-१४१-२ (३६६०८)
कन्या गर्भं समाधत्त भास्करान्मां जनार्दन ।
आदित्यवचनाच्चैव जातं मां सा व्यसर्जयत् ॥ ५-१४१-३ (३६६०९)
सोस्मि कृष्ण तथाजातः पाण्डोः पुत्रोस्मि धर्मतः ।
कुन्त्या त्वहमपाकीर्णो यथा न कुशलं तथा ॥ ५-१४१-४ (३६६१०)
सूतो हि मामधिरथो दृष्ट्वैवाभ्यानयद्गृहान् ।
राधायाश्चैव मां प्रादात्सौहार्दान्मधुसूदन ॥ ५-१४१-५ (३६६११)
मत्स्नेहाच्चैव राधायां सद्यः क्षीरमवातरत् ।
सा मे मूत्रं पुरीषं च प्रतिजग्राह माधव ॥ ५-१४१-६ (३६६१२)
तस्याः पिण्डव्यपनयं कुर्यादस्मद्विधः कथम् ।
धर्मविद्धर्मशास्त्राणां श्रवणे सततं रतः ॥ ५-१४१-७ (३६६१३)
तथा मामभिजानाति सूतश्चाधिरथः सुतम् ।
पितरं चाभिजानामि तमहं सौहृदात्सदा ॥ ५-१४१-८ (३६६१४)
स हि मे जातकर्मादि कारयामास माधव ।
शास्त्रदृष्टेन विधिना पुत्रप्रीत्या जनार्दन ॥ ५-१४१-९ (३६६१५)
नाम वै वसुषेणेति कारयामास वै द्विजैः ।
भार्याश्चोढा मम प्राप्ते यौवने तत्परिग्रहात् ॥ ५-१४१-१० (३६६१६)
तासु पुत्राश्च पौत्राश्च मम जाता जनार्दन ।
तासु मे हृदयं कृष्ण संजातं कामबन्धनम् ॥ ५-१४१-११ (३६६१७)
न पृथिव्या सकलया न सुवर्णस्य राशिभिः ।
हर्षाद्भयाद्वा गोविन्द मिथ्या कर्तुं तदुत्सहे ॥ ५-१४१-१२ (३६६१८)
धृतराष्ट्रकुले कृष्ण दुर्योधनसमाश्रयात् ।
मया त्रयोदशसमा भुक्तं राज्यमकण्टकम् ॥ ५-१४१-१३ (३६६१९)
इष्टं च बहुभिर्यज्ञैः सहसूतैर्मयाऽसकृत् ।
आवाहाश्च विवाहाश्च सहसूतैर्मया कृताः ॥ ५-१४१-१४ (३६६२०)
मां च कृष्ण समासाद्य कृतः शस्त्रसमुद्यमः ।
दुर्योधनेन वार्ष्णेय विग्रहश्चापि पाण्डवैः ॥ ५-१४१-१५ (३६६२१)
तस्माद्रणे द्वैरथे मां प्रत्युद्यातारमच्युत ।
वृतवान्परमं कृष्ण प्रतीपं सव्यसाचिनः ॥ ५-१४१-१६ (३६६२२)
वधाद्बन्धाद्भयाद्वापि लोभाद्वापि जनार्दन ।
अनृतं नोत्सहे कर्तुं धार्तराष्ट्रस्य धीमतः ॥ ५-१४१-१७ (३६६२३)
यदि ह्यद्य न गच्छेयं द्वैरथं सव्यसाचिना ।
अकीर्तिः स्याद्धृषीकेश मम पार्थस्य चोभयोः ॥ ५-१४१-१८ (३६६२४)

असंशयं हितार्थाय ब्रूयास्त्वं मधुसूदन ।
सर्वं च पाण्डवाः कुर्युस्त्वद्वशित्वान्न संशयः ॥ ५-१४१-१९ (३६६२५)
मन्त्रस्य नियमं कुर्यास्त्वमत्र मधुसूदन ।
एतदत्र हितं मन्ये सर्वं यादवनन्दन ॥ ५-१४१-२० (३६६२६)
यदि जानाति मां राजा धर्मात्मा संयतेन्द्रियः ।
कुन्त्याः प्रथमजं पुत्रं न स राज्यं ग्रहीष्यति ॥ ५-१४१-२१ (३६६२७)
प्राप्य चापि महद्राज्यं तदहं मधुसूदन ।
स्फीतं दुर्योधनायैव संप्रदद्यामरिन्दम ॥ ५-१४१-२२ (३६६२८)
स एव राजा धर्मात्मा शाश्वतोऽस्तु युधिष्ठिरः ।
नेता यस्य हृषीकेसो योद्धा यस्य धनञ्जयः ॥ ५-१४१-२३ (३६६२९)
पृथिवी तस्य राष्ट्रं च यस्य भीमो महारथः ।
नकुलः सहदेवश्च द्रौपदेयाश्च माधव ॥ ५-१४१-२४ (३६६३०)
धृष्टद्युम्नश्च पाञ्चल्यः सात्यकिश्च महारथः ।
उत्तमौजा युधामन्युः सत्यधर्मा च सौमकिः ॥ ५-१४१-२५ (३६६३१)
चैद्यश्च चेकितानश्च शिखण्डी चापराजितः ।
इन्द्रगोपकवर्णाश्च केकया भ्रातरस्तथा ।
इन्द्रायुधसवर्णश्च कुन्तिभोजो महामनाः ॥ ५-१४१-२६ (३६६३२)
मातुलो भीमसेनस्य श्येनजिच्च महारथः ।
शङ्खः पुत्रो विराटस्य निधिस्त्वं च जनार्दन ॥ ५-१४१-२७ (३६६३३)
महानयं कृष्ण कृतः क्षत्रस्य समुदानयः ।
राज्यं प्राप्तमिदं दीप्तं प्रथितं सर्वराजसु ॥ ५-१४१-२८ (३६६३४)
धार्तराष्ट्रस्य वार्ष्णेय शस्त्रयज्ञो भविष्यति ।
अस्य यज्ञस्य वेत्ता त्वं भविष्यसि जनार्दन ॥ ५-१४१-२९ (३६६३५)
आध्वर्यवं च ते कृष्ण ऋतावस्मिन्भविष्यति ।
होता चैवात्र बीभत्सुः सन्नद्धः स कपिध्वजः ॥ ५-१४१-३० (३६६३६)
गाण्डीवं स्रुक् तथा चाज्यं वीर्यं पुंसां भविष्यति ।
ऐन्द्रं पाशुपतं ब्राह्मं स्थूणाकर्णं च माधव ।
मन्त्रास्तत्र भविष्यन्ति प्रयुक्ताः सव्यसाचिना ॥ ५-१४१-३१ (३६६३७)
अनुयातश्च पितरमधिको वा पराक्रमे ।
गीतं स्तोत्रं स सौभद्रः सम्यक् तत्र भविष्यति ॥ ५-१४१-३२ (३६६३८)
उद्गातात्र पुनर्भीमः प्रस्तोता सुमहाबलः ।
विनदन्स नरव्याघ्रो नागानीकान्तकृद्रणे ॥ ५-१४१-३३ (३६६३९)
स चैव तत्र धर्मात्मा शश्वद्राजा युधिष्ठिरः ।
जपैर्होमैश्च संयुक्तो ब्रह्मत्वं कारयिष्यति ॥ ५-१४१-३४ (३६६४०)
शङ्खशब्दाः समुरजा भेर्यश्च मधुसूदन ।
उत्कृष्टः सिंहनादश्च सुब्रह्मण्यो भविष्यति ॥ ५-१४१-३५ (३६६४१)

नकुलः सहदेवश्च माद्रीपुत्रौ यशस्विनौ ।
शामित्रं तौ महावीर्यौ सम्यक् तत्र भविष्यतः ।
ग्तौ मैत्रावरुणाग्नीध्रौ महावीर्यौ भविष्यतः ॥' ५-१४१-३६ (३६६४२)
कल्माषदण्डा गोविन्द विमला रथपङ्क्तयः ।
यूपाः समुपकल्पन्तामस्मिन्यज्ञे जनार्दन ॥ ५-१४१-३७ (३६६४३)
कर्णिनालीकनाराचा वत्सदन्तोपबृंहणाः ।
तोमराः सोमकलशाः पवित्राणि धनूंषि च ॥ ५-१४१-३८ (३६६४४)
असयोऽत्र कपालानि पुरोडाशाः शिरांसि च ।
हविस्तु रुधिरं कृष्ण तस्मिन्यज्ञे भविष्यति ॥ ५-१४१-३९ (३६६४५)
इध्माः परिधयश्चैव शक्तयो विमला गदाः ।
सदस्या द्रोणशिष्याश्च कृपस्य च शरद्वतः ॥ ५-१४१-४० (३६६४६)
इषवोऽत्र परिस्तोमा मुक्ता गाण्डीवधन्वना ।
महारथप्रयुक्ताश्च द्रोणद्रौणिप्रचोदिताः ॥ ५-१४१-४१ (३६६४७)
प्रतिप्रास्थानिकं कर्म सात्यकिस्तु करिष्यति ।
दीक्षितो धार्तराष्ट्रोऽत्र पत्नी चास्य महाचमूः ॥ ५-१४१-४२ (३६६४८)
घटोत्कचोऽत्र शामित्रं करिष्यति महाबलः ।
अतिरात्रे महाबाहो विततेयज्ञकर्मणि ॥ ५-१४१-४३ (३६६४९)
दक्षिणा त्वस्य यज्ञस्य धृष्टद्युम्नः प्रतापवान् ।
वैतानिके कर्ममुखे जातो यत्कृष्ण पावकात् ॥ ५-१४१-४४ (३६६५०)
यदब्रुवमहं कृष्ण कटुकानि स्म पाण्डवान् ।
प्रियार्थं धार्तराष्ट्रस्य तेन तप्ये ह्यकर्मणा ॥ ५-१४१-४५ (३६६५१)
यदा द्रक्ष्यसि मां कृष्ण निहतं सव्यसाचिना ।
पुनश्चितिस्तदा चास्य यज्ञस्याथ भविष्यति ॥ ५-१४१-४६ (३६६५२)
दुःशासनस्य रुधिरं यदा पास्यति पाण्डवः ।
आनर्द नर्दतः सम्यक् तदा सूयं भविष्यति ॥ ५-१४१-४७ (३६६५३)
यदा द्रोणं च भीष्मं च पाञ्चाल्यौ पातयिष्यतः ।
तदा यज्ञावसानं तद्भविष्यति जनार्दन ॥ ५-१४१-४८ (३६६५४)
दुर्योधनं यदा हन्ता भीमसेनो महाबलः ।
तदा समाप्स्यते यज्ञो धार्तराष्ट्रस्य माधव ॥ ५-१४१-४९ (३६६५५)
स्नुषाश्च प्रस्नुषाश्चैव धृतराष्ट्रस्य सङ्गताः ।
हतेश्वरा नष्टपुत्रा हतनाथाश्च केशव ॥ ५-१४१-५० (३६६५६)
रुदन्त्यः सहगान्धार्या श्वगृध्रकुरराकुले ।
स यज्ञेऽस्मिन्नवभृथो भविष्यति जनार्दन ॥ ५-१४१-५१ (३६६५७)
विद्यावृद्धा वयोवृद्धाः क्षत्रियाः क्षत्रियर्षभ ।
वृथा मृत्युं न कुर्वीरंस्त्वत्कृते मधुसूदन ॥ ५-१४१-५२ (३६६५८)
शस्त्रेण निधनं गच्छेत्समृद्धं क्षत्रमण्डलम् ।

करुक्षेत्रे पुण्यतमे त्रैलोक्यस्यापि केशव ॥ ५-१४१-५३ (३६६५९)
तदत्र पुण्डरीकाक्ष विधत्स्व यदभीप्सितम् ।
यथा कात्स्न्र्येन वार्ष्णेय क्षत्रं स्वर्गमवाप्नुयात् ॥ ५-१४१-५४ (३६६६०)
यावत्स्थास्यन्ति गिरयः सरितश्च जनार्दन ।
तावत्कीर्तिभवः शब्दः शाश्वतोयं भविष्यति ॥ ५-१४१-५५ (३६६६१)
ब्राह्मणाः कथयिष्यन्ति महाभारतमाहवम् ।
समागमेषु वार्ष्णेय क्षत्रियाणां यशोधनम् ॥ ५-१४१-५६ (३६६६२)
समुपानय कौन्तेयं युद्धाय मम केशव ।
मन्त्रसंवरणं कुर्वन्नित्यमेव परन्तप ॥ ॥ ५-१४१-५७ (३६६६३)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानर्वणि
एकचत्वारिंशदधिकशततमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-१४१-४ यथा न कुलजस्तथेति को पाठः ॥
५-१४१-१४ आवाहाः कुलधर्माः ॥
५-१४१-१५ मां च । मित्रमिति शेषः ॥
५-१४१-१९ ब्रयास्त्वं पाण्डवान्प्रतीति शेषः ॥
५-१४१-२० नियमं गोपनम् ॥
५-१४१-२८ समुदानयः समुदायीकरणम् ॥
५-१४१-४१ परिस्तोमाः सोमचमसादयः ॥
५-१४१-४२ प्रतिप्रस्थाताऽध्वर्योस्तव द्वितीयः तस्य कर्म
प्रतिप्रास्थानिकम् ॥
५-१४१-४३ अतिरात्रे ऋतौ । श्लेषेण निशीथेच। घटोत्कचः
रात्रिचरत्वात् शामित्रं करिष्यति ॥
५-१४१-४६ पुनश्चितिर्यज्ञानन्तरं चयनारम्भो यज्ञविशेषेषूक्तः ॥
५-१४१-४७ आनर्द महानादं नर्दतः । णमुलन्तं पूर्वपदम्। सूयं
सोमाभिषवः। सुत्या भविष्यतीति को पाठः ॥
५-१४१-४८ यज्ञावसानं यज्ञस्य मध्येमध्ये विरम्यावस्थानम् ॥

उद्योगपर्व - अध्याय १४२
॥ श्रीः ॥
५.१४२. अध्यायः १४२

Mahabharata - Udyoga Parva - Chapter Topics
कृष्णेन कर्णंप्रति पाण्डवजयनिर्धारणकथनपूर्वकं भीष्मादिषु

युद्धसन्नाहसंदेशकथनचोदना ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१४२-० (३६६६४)
वैशम्पायन उवाच। ५-१४२-०क्ष् (३८०३)
कर्णस्य वचनं श्रुत्वा केशवः परवीरहा ।
उवाच प्रहसन्वाक्यं स्मितपूर्वमिदं यथा ॥ ५-१४२-१ (३६६६५)
श्रीभगवानुवाच। ५-१४२-२क्ष् (३८०४)
अपि त्वां न लभेत्कर्ण राज्यलम्भोपपादनम् ।
मया दत्तां हि पृथिवीं न प्रशासितुमिच्छसि ॥ ५-१४२-२ (३६६६६)
ध्रुवो जयः पाण्डवानामितीदं
न संशयः कश्चन विद्यतेऽत्र ।
जयध्वजो दृश्यते पाण्डवस्य
समुच्छ्रितो वानरराज उग्रः । ५-१४२-३ (३६६६७)
दिव्या माया विहिता भौमनेन
समुच्छ्रिता इन्द्रकेतुप्रकाशाः ।
दिव्यानि भूतानि जयावहानि
दृश्यन्ति चैवात्र भयानकानि ॥ ५-१४२-४ (३६६६८)
न सज्जते शैलवनस्पतिभ्य
ऊर्ध्वं तिर्यग्योजनमात्ररूपः ।
श्रीमान्ध्वजः कर्ण धनञ्जयस्य
समुच्छ्रितः पावकतुल्यरूपः ॥ ५-१४२-५ (३६६६९)
यदा द्रक्ष्यसि सङ्ग्रामे श्वेताश्वं कृष्णसारथिम् ।
ऐन्द्रमस्त्रं विकुर्वाणमुभे चाप्यग्निमारुते ॥ ५-१४२-६ (३६६७०)
गाण्डीवस्य च निर्घोषं विस्फूर्जितमिवाशनेः ।
न तदा भविता त्रेता न कृतं द्वापरं न च ॥ ५-१४२-७ (३६६७१)
यदा द्रक्ष्यसि सङ्ग्रामे कुन्तीपुत्रं युधिष्ठिरम् ।
जपहोमसमायुक्तं स्वां रक्षन्तं महाचमूम् ॥ ५-१४२-८ (३६६७२)
आदित्यमिव दुर्धर्षं तपन्तं शत्रुवाहिनीम् ।
न तदा भविता त्रेता न कृतं द्वापरं न च ॥ ५-१४२-९ (३६६७३)
यदा द्रक्ष्यसि सङ्ग्रामे भीमसेनं महाबलम् ।
दुःशासनस्य रुधिरं पीत्वा नृत्यन्तमाहवे ॥ ५-१४२-१० (३६६७४)
प्रभिन्नमिव मातङ्गं प्रतिद्विरदघातिनम् ।
न तदा भविता त्रेता न कृतं द्वापरं न च ॥ ५-१४२-११ (३६६७५)
यदा द्रक्ष्यसि सङ्ग्रामे द्रोणं शान्तनवं कृपम् ।

सुयोधनंच राजानं सैन्धवं च जयद्रथम् ॥ ५-१४२-१२ (३६६७६)
युद्धायापततस्तूर्णं वारितान्सव्यसाचिना ।
न तदा भविता त्रेता न कृतं द्वापरं न च ॥ ५-१४२-१३ (३६६७७)
यदा द्रक्ष्यसि सङ्ग्रामे माद्रीपुत्रौ महाबलौ ।
वाहिनीं धार्तराष्ट्राणां क्षोभयन्तौ गजाविव ॥ ५-१४२-१४ (३६६७८)
विगाढे शस्त्रसंपाते परवीररथारुजौ ।
न तदा भविता त्रेता न कृतं द्वापरं न च ॥ ५-१४२-१५ (३६६७९)
ब्रूयाः कर्ण इतो गत्वा द्रोणं शान्तनवं कृपम् ।
सौम्योऽयं वर्तते मासः सुप्रापयवसेन्धनः ॥ ५-१४२-१६ (३६६८०)
सर्वौषधिवनस्फीतः फलवानल्पमक्षिकः ।
निष्पङ्को रसवत्तोयो नात्युष्णशिशिरः सुखः ॥ ५-१४२-१७ (३६६८१)
सप्तमाच्चापि दिवसादमावास्या भविष्यति ।
सङ्ग्रामो युज्यतां तस्यां तामाहुः शक्रदेवताम् ॥ ५-१४२-१८ (३६६८२)
तथा राज्ञो वदेः सर्वान्ये युद्धायाभ्युपागताः ।
यद्वो मनीषितं तद्वै सर्वं संपादयाम्यहम् ॥ ५-१४२-१९ (३६६८३)
५-१४२-२० (३६६८४)
राजानो राजपुत्राश्च दुर्योधनवशानुगाः ।
प्राप्य शस्त्रेण निधनं प्राप्स्यन्ति गतिमुत्तमाम् ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-१४२-४ भौमनेन विश्वकर्मणा ॥
५-१४२-१८ संग्रामः संग्रामसाधनकलापः । बुज्यतां एकीभूयावतिष्ठताम् ॥

उद्योगपर्व - अध्याय १४३
॥ श्रीः ॥
५.१४३. अध्यायः १४३

Mahabharata - Udyoga Parva - Chapter Topics

कर्णेन कृष्णंप्रति पृथिवीवीनाशे कशुनिदुश्शासनयोः स्वस्यच
मूलत्वकथनम् ।१ ॥
तथा पार्थधार्तराष्ट्राणां जयपराजयसूचकनिमित्तोपवर्णनपूर्वकं
कृष्णमालिङ्ग्य प्रतिनिवर्तनम् ॥ २ ॥
सात्यकिनासह कृष्णस्य उपप्लाव्यागमनम् ॥ ३ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१४३-० (३६६८५)

वैशम्पायन उवाच। ५-१४३-०क्ष् (३८०५)
केशवस्य तु तद्वाक्यं कर्णः श्रुत्वा हितं शुभम् ।
अब्रवीदभिसंपूज्य कृष्णं तं मधुसूदनम् ॥ ५-१४३-१ (३६६८६)
जानन्मां किं महाबाहो संमोहयितुमिच्छसि ।
योयं पृथिव्याः कात्स्न्र्येन विनाशः समुपस्थितः ॥ ५-१४३-२ (३६६८७)
निमित्तं तत्र शकुनिरहं दुःशासनस्तथा ।
दुर्योधनश्च नृपतिर्धृतराष्ट्रसुतोऽभवत् ॥ ५-१४३-३ (३६६८८)
असंशयमिदं कृष्ण महद्युद्धमुपस्थितम् ।
पाण्डवानां कुरूणां च घोरं रुधिरकर्दमम् ॥ ५-१४३-४ (३६६८९)
राजानो राजपुत्राश्च दुर्योधनवशानुगाः ।
रणे शस्त्राग्निना दग्धाः प्राप्स्यन्ति यमसादनम् ॥ ५-१४३-५ (३६६९०)
स्वप्ना हि बहवो घोरा दृश्यन्ते मधुसूदन ।
निमित्तानि च घोराणि तथोत्पाताः सुदारुणाः ॥ ५-१४३-६ (३६६९१)
पराजयं धार्तराष्ट्रे विजयं च युधिष्ठिरे ।
संसन्त इव वार्ष्णेय विविधा रोमहर्षणाः ॥ ५-१४३-७ (३६६९२)
प्राजापत्यं हि नक्षत्रं ग्रहस्तीक्ष्णो महाद्युतिः ।
शनैश्चरः पीडयति पीडयन्प्राणिनोऽधिकम् ॥ ५-१४३-८ (३६६९३)
कृत्वा चाङ्गारको वक्रं ज्योष्ठायां मधुसूदन ।
अनुराधां प्रार्थयते मैत्रं संगमयन्निव । ५-१४३-९ (३६६९४)
नूनं महद्भयं कृष्ण कुरूणां समुपस्थितम् ।
विशेषेण हि वार्ष्णेय चित्रां पीडयते ग्रहः ॥ ५-१४३-१० (३६६९५)
सोमस्य लक्ष्म व्यावृत्तं राहुरर्कमुपैति च ।
दिवश्चोल्काः पतन्त्येताः सनिर्घाताः सकंपनाः ॥ ५-१४३-११ (३६६९६)
निष्टनन्ति च मातङ्गा मुञ्चन्त्यश्रूणि वाजिनः ।
पानीयं यवसं चापि नाभिनन्दन्ति माधव ॥ ५-१४३-१२ (३६६९७)
प्रादुर्भूतेषु चैतेषु भयमाहुरुपास्थितम् ।
निमित्तेषु महाबाहो दारुणं प्राणिनाशनम् ॥ ५-१४३-१३ (३६६९८)
अल्पे भुक्ते पुरीषं च प्रभूतमिह दृश्यते ।
वाजिनां वारणानां च मनुष्याणां च केशव ॥ ५-१४३-१४ (३६६९९)
धार्तराष्ट्रस्य सैन्येषु सर्वेषु मधुसूदन ।
पराभवस्य तल्लिङ्गमिति प्राहुर्मनीषिणः ॥ ५-१४३-१५ (३६७००)
प्रहृष्टं वाहनं कृष्ण पाण्डवानां प्रचक्षते ।
प्रदक्षिणा मृगाश्चैव तत्तेषां जयलक्षणम् ॥ ५-१४३-१६ (३६७०१)
अपसव्या मृगाः सर्वे धार्तराष्ट्रस्य केशव ।
वाचश्चाप्यशरीरिण्यस्तकत्पराभवलक्षणम् ॥ ५-१४३-१७ (३६७०२)
मयूराः पुण्यशकुना हंससारसचातकाः ।

जीवञ्जीवकसङ्घाश्चाप्यनुगच्छन्ति पाण्डवान् ॥ ५-१४३-१८ (३६७०३)
गृध्राः कङ्का बकाः श्येना यातुधानास्तथा वृकाः ।
मक्षिकाणां च सङ्घाता अनुधावन्ति कौरवान् ॥ ५-१४३-१९ (३६७०४)
धार्तराष्ट्रस्य सैन्येषु भेरीणां नास्ति निःस्वनः ।
अनाहताः पाण्डवानां नदन्ति पटहाः किल ॥ ५-१४३-२० (३६७०५)
उदपानाश्च नर्दन्ति यथा गोवृषभास्तथा ।
धार्तराष्ट्रस्य सैन्येषु तत्पराभवलक्षणम् ॥ ५-१४३-२१ (३६७०६)
मांसशोणितवर्षं च वृष्टं देवेन माधव ।
तथा गन्धर्वनगरं भानुमत्समुपस्थितम् ॥ ५-१४३-२२ (३६७०७)
सप्राकारं सपरिखं सवप्रं चारुतोरणम् ।
कृष्णश्च परिघस्तत्र भानुमावृत्य तिष्ठति ॥ ५-१४३-२३ (३६७०८)
उदयास्तमने संध्ये वेदयन्ती महद्भयम् ।
शिवा च वाशते घोरं तत्पराभवलक्षणम् ॥ ५-१४३-२४ (३६७०९)
एकपक्षाक्षिचरणाः पक्षिणो मधुसूदन ।
उत्सृजन्ति महद्घोरं तत्पराभवलक्षणम् ॥ ५-१४३-२५ (३६७१०)
कृष्णग्रीवाश्च शकुना रक्तपादा भयानकाः ।
सन्ध्यामिमुखा यान्ति तत्पराभवलक्षणम् ॥ ५-१४३-२६ (३६७११)
ब्राह्मणान्प्रथमं द्वेष्टि गुरूंश्च मधुसूदन ।
भृत्यान्भक्तिमतश्चापि तत्पराभवलक्षणम् ॥ ५-१४३-२७ (३६७१२)
पूर्वा दिग्लोहिताकारा शस्त्रवर्णा च दक्षिणा ।
आमपात्रप्रतीकाशा पश्चिमा मधुसूदन। ५-१४३-२८ (३६७१३)
उत्तरा शङ्खवर्णाभा दिशां वर्णा उदाहृताः ॥
प्रदीप्ताश्च दिशः सर्वा धार्तराष्ट्रस्य माधव। ५-१४३-२९ (३६७१४)
महद्भयं वेदयन्ति तस्मिन्नुत्पातदर्शने ॥
सहस्रपादं प्रासादं स्वप्नान्ते स्म युधिष्ठिरः। ५-१४३-३० (३६७१५)
अधिरोहन्मया दृष्टः सह भ्रातृभिरच्युत ॥
श्वेतोष्णीषाश्च दृश्यन्ते सर्वे वै शुक्लवाससः । ५-१४३-३१ (३६७१६)
आसनानि च शुभ्राणि सर्वेषामुपलक्षये ॥
तव चापि मया कृष्ण स्वप्नान्ते रुधिराविला । ५-१४३-३२ (३६७१७)
आन्त्रेण पृथिवी दृष्टा परिक्षिप्ता जनार्दन ॥
अस्थिसञ्चयमारूढश्चामितौजा यधिष्ठिरः । ५-१४३-३३ (३६७१८)
सुवर्णपात्र्यां संहृष्टो भुक्तवान्घृतपायसम् ॥
युधिष्ठिरो मया दृष्टो ग्रसमानो वसुन्धराम्। ५-१४३-३४ (३६७१९)
उच्चं पर्वतमारूढो भीमकर्मा वृकोदरः ।
गदापाणिर्नरव्याघ्रो ग्रसन्निव महीमिमाम् ॥ ५-१४३-३५ (३६७२०)
क्षपयिष्यति नः सर्वान्स सुव्यक्तं महारणे ।

विदितं मे हृषीकेश श्रिया परमया ज्वलन् ॥ ५-१४३-३६ (३६७२१)
पाण्डुरं गजमारूढो गाण्डीवी स धनञ्जयः ।
त्वया सार्धं हृषीकेश श्रिया परमया ज्वलन् ॥ ५-१४३-३७ (३६७२२)
यूयं सर्वे वधिष्यध्वं तत्र मे नास्ति संशयः ।
पार्थिवान्समरे कृष्ण दुर्योधनपुरोगमान् ॥ ५-१४३-३८ (३६७२३)
नकुलः सहदेवश्च सात्यकिश्च महारथः ।
शुक्लकेयूरकण्ठत्राः शुक्लमाल्याम्बरावृताः ॥ ५-१४३-३९ (३६७२४)
अधिरूढा नरव्याघ्रा नरवाहनमुत्तमम् ।
त्रय एते मया दृष्टाः पाण्डुरच्छत्रवाससः ॥ ५-१४३-४० (३६७२५)
श्वेतोष्णीषाश्च दृश्यन्ते त्रय एते जनार्दन ।
धार्तराष्ट्रेषु सैन्येषु तान्विजानीहि केशव ॥ ५-१४३-४१ (३६७२६)
अश्वत्थामा कृपश्चैव कृतवर्मा च सात्वतः ।
रक्तोष्णीषाश्च दृश्यन्ते सर्वे माधव पार्थिवाः ॥ ५-१४३-४२ (३६७२७)
उष्ट्रप्रयुक्तमारूढौ भीष्मद्रोणौ महारथौ ।
मया सार्धं महाबाहो धार्तराष्ट्रेण वा विभो ॥ ५-१४३-४३ (३६७२८)
अगस्त्यशास्तां च दिशं प्रयाताः स्म जनार्दन ।
अचिरेणैव कालेन प्राप्स्यामो यमसादनम् ॥ ५-१४३-४४ (३६७२९)
अहं चान्ये च राजानो यच्च तत्क्षत्रमण्डलम् ।
गाण्डिवाग्निं प्रवेक्ष्याम इति मे नास्ति संशयः ॥ ५-१४३-४५ (३६७३०)
कृष्ण उवाच । ५-१४३-४६क्ष् (३८०६)
अपस्थितविनाशेयं नूनमद्य वसुंधरा ।
यथा हि मे वचः कर्ण नोपैति हृदयं तव ॥ ५-१४३-४६ (३६७३१)
सर्वेषां तात भूतानां विनाशे प्रत्युपस्थिते ।
अनयो नयसङ्काशो हृदयान्नापसर्पति ॥ ५-१४३-४७ (३६७३२)
कर्ण उवाच । ५-१४३-४८क्ष् (३८०७)
अपि त्वां कृष्ण पश्यामो जीवन्तोऽस्मान्महारणात् ।
समुत्तीर्णा महाबाहो वीरक्षत्रविनाशनात् ॥ ५-१४३-४८ (३६७३३)
अथवा सङ्गमः कृष्ण स्वर्गे नो भविता ध्रुवम् ।
तत्रेदानीं समेष्यामः पुनः सार्धं त्वयानघ ॥ ५-१४३-४९ (३६७३४)
वैशम्पायन उवाच । ५-१४३-५०क्ष् (३८०८)
इत्युक्त्वा माधवं कर्णः परिष्वज्य च पीडितम् ।
विसर्जितः केशवेन रथोपस्थादवातरत् ॥ ५-१४३-५० (३६७३५)
ततः स्वरथामास्थाय जाम्बूनदविभूषितम् ।
महात्मा वै निववृते राधेयो दीनमानसः ॥ ५-१४३-५१ (३६७३६)
ततः शीघ्रतरं प्रायात्केशवः सहसात्यकिः ।
पुनरुच्चारयन्वाणीं याहि याहीति सारथिम् ॥ ॥ ५-१४३-५२ (३६७३७)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
त्रिचत्वारिंशदधिकशततमोध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-१४३-२१ उदपानाः कूपादयो जलाशयाः ॥
५-१४३-२३ गन्धर्वनगरं सप्राकारम् । परिघः परिवेषः । तत्राकाशे
गन्धर्वनगरोपर्येव ॥
५-१४३-२४ शिवा श्रृगालः वाशते शब्दं करोति ॥
५-१४३-३० सहस्रपादं सहस्रस्तम्भम् ॥
५-१४३-३२ तव पृथिवीति संबन्धः । त्वच्छरीरमित्यर्थः
। परिक्षिप्ता परिवेष्टिता ॥
५-१४३-४६ तव हृदयं कर्तृ मम वचो नोपैति नाङ्गीकरोति ॥

उद्योगपर्व - अध्याय १४४
॥ श्रीः ॥
५.१४४. अध्यायः १४४

Mahabharata - Udyoga Parva - Chapter Topics
विदुरेण कुन्तीसमीपे युद्धे बहुवीरविनाशानुचिन्तनेन शोचनम् ॥ १ ॥
कर्णपराक्रमभीतया कुन्त्या पाण्डवान्प्रति तन्मनःप्रसादनेच्छया
गङ्गातीरे कर्णसमीपगमनम् ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१४४-० (३६७३८)
वैशम्पायन उवाच। ५-१४४-०क्ष् (३८०९)
असिद्धानुनये कृष्णे कुरुभ्यः पाण्डवान्गते ।
अभिगम्य पृथां क्षत्ता शनैः शोचन्निवाब्रवीत् ॥ ५-१४४-१ (३६७३९)
जानासि मे जीवपुत्री भावं नित्यमविग्रहे ।
क्रोशतो नच गृह्णीते वचनं मे सुयोधनः ॥ ५-१४४-२ (३६७४०)
उपपन्नो ह्यसौ राजा चेदिपाञ्चालकेकयैः ।
भीमार्जुनाभ्यां कृष्णेन युयुधानयमैरपि ॥ ५-१४४-३ (३६७४१)
उपप्लाव्ये निविष्टोऽपि धर्ममेव युधिष्ठिरः ।
काङ्क्षते ज्ञातिसौहार्दाद्बलवान्दुर्बलो यथा ॥ ५-१४४-४ (३६७४२)
राजा तु धृतराष्ट्रोऽयं वयोवृद्धो न शाम्यति ।

मत्तः पुत्रमदेनैव विधर्मे पथि वर्तते ॥ ५-१४४-५ (३६७४३)
जयद्रथस्य कर्णस्य तथा दुःशासनस्य च ।
सौबलस्य च दुर्बुद्ध्या मिथो भेदः प्रपत्स्यते । ५-१४४-६ (३६७४४)
अधर्मेम हि धर्मिष्ठं ह्रियते राज्यमीदृशम् ।
येषां तेषामयं धर्मः सानुबन्धो भविष्यति ॥ ५-१४४-७ (३६७४५)
क्रियमाणे बलाद्धर्मे कुरुभिः को न संज्वरेत् ।
असाम्ना केशवे याते समुद्योक्ष्यन्ति पाण्डवाः ॥ ५-१४४-८ (३६७४६)
ततः कुरूणामनयो भविता वीरनाशनः ।
चिन्तयन्न लभे निद्रामहःसु च निशासु च ॥ ५-१४४-९ (३६७४७)
श्रुत्वा तु कुन्ती तद्वाक्यमर्थकामेन भाषितम् ।
सा निःश्वसन्ती दुःखार्ता मनसा विममर्श ह ॥ ५-१४४-१० (३६७४८)
धिगस्त्वर्थं यत्कृतेयं सुमहाञ्ज्ञातिसंक्षयः ।
वर्त्स्यते सुहृदां चैव युद्धेऽस्मिन्वै पराभवः ॥ ५-१४४-११ (३६७४९)
पाण्डवाश्चेदिपञ्चाला यादवाश्च समागताः ।
भारतैः सह योत्स्यन्ति किं नु दुःखमतःपरम् ॥ ५-१४४-१२ (३६७५०)
पश्ये दोषं ध्रुवं युद्धे तथाऽयुद्धे पराभवम् ।
अधनस्य मृतं श्रेयो न हि ज्ञातिक्षयो जयः ।
इति मे चिन्तयन्त्या वै हृदि दुःखं प्रवर्तते ॥ ५-१४४-१३ (३६७५१)
पितामहः शान्तनव आचार्यश्च युधां पतिः ।
कर्णश्च धार्तराष्ट्रार्थं वर्धयन्ति भयं मम ॥ ५-१४४-१४ (३६७५२)
नाचार्यः कामवाञ्शिष्यैद्रौणोयुद्धयेत जातुचित् ।
पाण्डवेषु कथं हार्दं कुर्यान्न च पितामहः । ५-१४४-१५ (३६७५३)
अयं त्वेको वृथादृष्टिर्धार्तराष्ट्रस्य दुर्मतेः ।
मोहानुवर्ती सततं पापो द्वेष्टि च पाण्डवान् ॥ ५-१४४-१६ (३६७५४)
महत्यनर्थे निर्बन्धी बलवांश्च विशेषतः ।
कर्णः सदा पाण्डवानां तन्मे दहति संप्रति ॥ ५-१४४-१७ (३६७५५)
आशंसे त्वद्य कर्णस्य मनोऽहं पाण्डवान्प्रति ।
ग्रसादयितुमासाद्य दर्शयन्ती यथातथम् ॥ ५-१४४-१८ (३६७५६)
तोषितो भगवान्यत्र दुर्वासा मे वरं ददौ ।
आह्वानं मन्त्रसंयुक्तं वसन्त्याः पितृवेश्मनि ॥ ५-१४४-१९ (३६७५७)
साहमन्तःपुरे राज्ञः कुन्तिभोजपुरस्कृता ।
चिन्तयन्ती बहुविधं हृदयेन विदूयता ॥ ५-१४४-२० (३६७५८)
बलाबलं च मन्त्राणां ब्राह्मणस्य च वाग्बलम् ।
स्त्रीभावाद्बालभावाच्च चिन्तयन्ती पुनः पुनः ॥ ५-१४४-२१ (३६७५९)
धात्र्या विस्रब्धया गुप्ता सखीजनवृता तदा ।
दोषं परिहरन्ती च पितुश्चारित्र्यरक्षिणी ॥ ५-१४४-२२ (३६७६०)

कथं नु सुकृतं मे स्यान्नापराधवती कथम् ।
भवेयमिति संचिन्त्य ब्राह्मणं तं नमस्य च ॥ ५-१४४-२३ (३६७६१)
कौतूहलात्तु तं लब्धा बालिश्यादाचरं तदा ।
कन्या सती देवमर्कमासादयमहं ततः ॥ ५-१४४-२४ (३६७६२)
योऽसौ कानीनगर्भो मे पुत्रवत्परिरक्षितः ।
कस्मान्न कुर्याद्वचनं पथ्यं भ्रातृहितं तथा ॥ ५-१४४-२५ (३६७६३)
इति कुन्ती विनिश्चित्य कार्यनिश्चयमुत्तमम् ।
कार्यार्थमभिनिश्चित्य ययौ भागीरथीं प्रति ॥ ५-१४४-२६ (३६७६४)
आत्मजस्य ततस्तस्य घृणिनः सत्यसङ्गिनः ।
गङ्गातीरे पृथापश्यज्जपस्थानमनुत्तमम् ॥ ५-१४४-२७ (३६७६५)
प्राङ्मुखस्योर्ध्वबाहोः सा पर्यतिष्ठत पृष्ठतः ।
जप्यावसानं कार्यार्थं प्रतीक्षन्ती तपस्विनी ॥ ५-१४४-२८ (३६७६६)
अतिष्ठत्सूर्यतापार्ता कर्णस्योत्तरवाससि ।
कौरव्यपत्नी वार्ष्णेयी मद्रमालेव शुष्यती ॥ ५-१४४-२९ (३६७६७)
आपृष्टतापाञ्जप्त्वा स परिवृत्त्य यतव्रतः ।
दृष्ट्वा कुन्तीमुपातिष्ठदभिवाद्य कृताञ्जलिः ॥ ५-१४४-३० (३६७६८)
यथान्यायं महातेजा मानी धर्मभृतां वरः ।
उत्स्मयन्प्रणतः प्राह कुन्तीं वैकर्तनो वृषः ॥ ॥ ५-१४४-३१ (३६७६९)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
चतुश्चत्वारिंशदधिकशततमोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-१४४-८ बलाद्धर्मे पास्वण्डिनां पारदार्यं उभयसंतोषकरमिति
द्वयोरपि धर्महेतुरिति बलात्कल्पना शास्त्रबहिर्भूता
तद्वदयमपीत्यर्थः ॥
५-१४४-१० अर्थकामेन हितकामेन ॥
५-१४४-१३ पश्ये पश्यामि । आर्षमात्मनेपदम् ॥
५-१४४-२४ आचरं तेन मन्त्रेण देवतावाहनाख्यं कार्यं कृतवती ॥
५-१४४-२९ उत्तरवाससि उत्तरीयवस्त्रच्छायायाम् ॥
५-१४४-३० आपृष्टतापादपराह्णपर्यन्तमित्यर्थः ॥

उद्योगपर्व - अध्याय १४५
॥ श्रीः ॥
५.१४५. अध्यायः १४५

कुन्त्या कर्णप्रति तस्य सूर्यात्स्वस्मिन् जननकथनपूर्वकं पाण्डवैः
सह संगमचोदना ॥

५-१४५-० (३६७७०)
कर्ण उवाच। ५-१४५-०क्ष् (३८१०)
राधेयोऽहमाधिरथिः कर्णस्त्वामभिवादये ।
प्राप्ता किमर्थं भवती ब्रूहि किं करवामि ते ॥ ५-१४५-१ (३६७७१)
कुन्त्युवाच। ५-१४५-२क्ष् (३८११)
कौन्तेयस्त्वं न राधेयो न तवाधिरथः पिता ।
नासि सूतकुले जातः कर्ण तद्विद्धि मे वचः ॥ ५-१४५-२ (३६७७२)
कानीनस्त्वं मया जातः पूर्वजः कुक्षिणा धृतः ।
कुन्तिराजस्य भवने पार्थस्त्वमसि पुत्रक ॥ ५-१४५-३ (३६७७३)
प्रकाशकर्मा तपनो योऽयं देवो विरोचनः ।
अजीजनत्त्वां मय्येष कर्ण शस्त्रभृतां वरम् ॥ ५-१४५-४ (३६७७४)
कुण्डली बद्धकवचो देवगर्भः श्रिया वृतः ।
जातस्त्वमसि दुर्धर्ष मया पुत्र पितुर्गृहे ॥ ५-१४५-५ (३६७७५)
स त्वं भ्रातॄनसंबुद्ध्य मोहद्यदुपसेवसे ।
धार्तराष्ट्रान्न तद्युक्तं त्वयि पुत्र विशेषतः ॥ ५-१४५-६ (३६७७६)
एतद्धर्मफलं पुत्र नराणां धर्मनिश्चये ।
यत्तुष्यन्त्यस्य पितरो माता चाप्येकदर्शिनी ॥ ५-१४५-७ (३६७७७)
अर्जुनेनार्जितां पूर्वं हृतां लोभादसाधुभिः ।
आच्छिद्य धार्तराष्ट्रेभ्यो भुङ्क्ष यौधिष्ठिरीं श्रियम् ॥ ५-१४५-८
(३६७७८)
अद्य पश्यन्तु कुरवः कर्णार्जुनसमागमम् ।
सौभ्रात्रेण समालक्ष्य संनमन्तामसाधवः । ५-१४५-९ (३६७७९)
कर्णार्जुनौ वै भवतां यथा रामजनार्दनौ ।
असाध्यं किं नु लोके स्याद्युवयोः संहितात्मनोः ॥ ५-१४५-१० (३६७८०)
कर्ण शोभिष्यसे नूनं पञ्चमिर्भ्रातृभिर्वृतः ।
देवैः परिवृतो ब्रह्मा वेद्यामिव महाध्वरे ॥ ५-१४५-११ (३६७८१)
उपपद्यो गुणैः सर्वैर्ज्येष्ठः श्रेष्ठेषु बन्धुषु ।
सूतपुत्रेति मा शब्दः पार्थस्त्वमसि वीर्यवान् ॥ ॥ ५-१४५-१२ (३६७८२)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
पञ्चचत्वारिंशदधिकशततमोऽध्यायः ॥

५-१४५-७ एकं पुत्रमेव स्नेहेन पश्यन्ती एकदर्शिनी ॥

उद्योगपर्व - अध्याय १४६
॥ श्रीः ॥
५.१४६. अध्यायः १४६

Mahabharata - Udyoga Parva - Chapter Topics
सूर्येण कर्णप्रति कुन्तीवचनस्वीकरणविधानम् ॥ १ ॥
कर्णेन कुन्तींप्रति सोपालम्भं दुर्योधनपरित्यागस्य
सयुक्तिकमनौचेत्यकथनपूर्वकं अर्जुनवर्जं
पाण्डवासंहरणप्रतिज्ञानम् ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१४६-० (३६७८३)
वैशम्पायन उवाच। ५-१४६-०क्ष् (३८१२)
ततः सूर्यान्निश्चरितां कर्णः शुश्राव भारतीम् ।
दुरत्ययां प्रणयिनीं पितृवद्भास्करेरिताम् ॥ ५-१४६-१ (३६७८४)
सूर्य उवाच। ५-१४६-२क्ष् (३८१३)
सत्यमाह पृथा वाक्यं कर्ण मातृवचः कुरु ।
श्रेयस्ते स्यान्नरव्याघ्र सर्वमाचरतस्तथा ॥ ५-१४६-२ (३६७८५)
वैशम्पायन उवाच। ५-१४६-३क्ष् (३८१४)
एवमुक्तस्य मात्रा च स्वयं पित्रा च भानुना ।
चचाल नैव कर्णस्य मतिः सत्यधृतेस्तदा ॥ ५-१४६-३ (३६७८६)
कर्ण उवाच। ५-१४६-४क्ष् (३८१५)
न चैतच्छ्रद्दधे वाक्यं क्षत्रिये भाषितं त्वया ।
धर्मद्वारं ममैतत्स्यान्नियोगकरणं तव ॥ ५-१४६-४ (३६७८७)
अकरोन्मयि यत्पापं भवती सुमहात्ययम् ।
अपाकीर्णोऽस्मि यन्मातस्तद्यशःकीर्तिनाशनम् ॥ ५-१४६-५ (३६७८८)
अहं चेत्क्षत्रियो जातो न प्राप्तः क्षत्रसत्क्रियाम् ।
त्वत्कृते किं नु पापीयः शत्रुः कुर्यान्ममाहितम् ॥ ५-१४६-६ (३६७८९)
क्रियाकाले त्वनुक्रोशमकृत्वा त्वमिमं मम ।
हीनसंस्क्रासमयमद्य मां समचूचुदः ॥ ५-१४६-७ (३६७९०)
न वै मम हितं पूर्वं मातृवच्चेष्टितं त्वया ।

सा मां संबोधयस्यद्य केवलात्महितैषिणी ॥ ५-१४६-८ (३६७९१)
कृष्णेन सहितात्को वै न व्यथेत धनंजयात् ।
कोद्य भीतं न मां विद्यात्पर्थानां समितिं गतम् ॥ ५-१४६-९ (३६७९२)
अभ्राता विदितः पूर्वं युद्धकाले प्रकाशितः ।
पाण्डवान्यदि गच्छामि किं मां क्षत्रं वदिष्यति ॥ ५-१४६-१० (३६७९३)
सर्वकामैः संविभक्तः पूजितश्च यथासुखम् ।
अहं वै धार्तराष्ट्राणां कुर्यां तदफलं कथम् ॥ ५-१४६-११ (३६७९४)
उपनह्य परैर्वैरं ये मां नित्यमुपासते ।
नमस्कुर्वन्ति च सदा वसवो वासवं यथा ॥ ५-१४६-१२ (३६७९५)
मम प्राणेन ये शत्रूञ्शक्ताः प्रतिसमासितुम् ।
मन्यन्ते ते कथं तेषामहं छिन्द्यां मनोरथम् ॥ ५-१४६-१३ (३६७९६)
मया प्लवेन संग्रामं तितीर्षन्ति दुरत्ययम् ।
अपारे पारकामा ये त्यजेयं तानहं कथम् ॥ ५-१४६-१४ (३६७९७)
अयं हि कालः संप्राप्तो धार्तराष्ट्रोपजीविनाम् ।
निर्वेष्टव्यं मया तत्र प्राणानपरिरक्षता ॥ ५-१४६-१५ (३६७९८)
कृतार्थाः सुभृता ये हि कृत्यकाले ह्युपस्थिते ।
अनवेक्ष्य कृतं पापा विकुर्वन्त्यनवस्थिताः ॥ ५-१४६-१६ (३६७९९)
राजकिल्बिषिणां तेषां भर्तृपिण्डापहारिणाम् ।
नैवायं न परो लोको विद्यते पापकर्मणाम्। ५-१४६-१७ (३६८००)
धृतराष्ट्रस्य पुत्राणामर्थे योत्स्यामि ते सुतैः ।
बलं च शक्तिं चास्थाय न वै त्वय्यनृतं वदे ॥ ५-१४६-१८ (३६८०१)
आनृशंस्यमथो वृत्तं रक्षन्सत्पुरुषोचितम् ।
अतोऽर्थकरमप्येतन्न करोम्यद्य ते वचः ॥ ५-१४६-१९ (३६८०२)
न च तेऽयं समारम्भो मयि मोघो भविष्यति ।
वध्यान्विषह्यान्संग्रामे न हनिष्यामि ते सुतान् ॥ ५-१४६-२० (३६८०३)
युधिष्ठिरं च भीमं च यमौ चैवार्जुनादृते ।
अर्जुनेन समं युद्धमपि यौधिष्ठिरे बले ॥ ५-१४६-२१ (३६८०४)
अर्जुनं हि निहत्याजौ संप्राप्तं स्यात्फलं मया ।
यशसा चापि युज्येयं निहतः सव्यसाचिना ॥ ५-१४६-२२ (३६८०५)
न ते जातु नशिष्यन्ति पुत्राः पञ्च यशस्विनि ।
निरर्जुनाः सकर्णा वा सार्जुना वा हते मयि ॥ ५-१४६-२३ (३६८०६)
इति कर्णवचः श्रुत्वा कुन्ती दुःखात्प्रवेषती ।
उवाच पुत्रमाश्लिष्य कर्णं धैर्यादकम्पनम् ॥ ५-१४६-२४ (३६८०७)
एवं वै भाव्यमेतेन क्षयं यास्यन्ति कौरवाः ।
यथा त्वं भाषसे कर्ण दैवं तु बलवत्तरम् ॥ ५-१४६-२५ (३६८०८)
त्वया चतुर्णां भ्रातॄणामभयं शत्रुकर्शन ।

दत्तं तत्प्रतिजानीहि सङ्गरप्रतिमोचनम् ॥ ५-१४६-२६ (३६८०९)
अनामयं स्वस्ति चेति पृथाथो कर्णमब्रवीत् ।
तां कर्णोऽभ्यवदत्प्रीतस्ततस्तौ जग्मतुः पृथक् ॥ ॥ ५-१४६-२७ (३६८१०)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
षट्चत्वारिंशदधिकशततमोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-१४६-४ न श्रद्दधे कर्तव्यत्वेन न मन्ये । धर्मद्वारं
विपरीतलक्षणया धर्मापगमद्वारम्। तव नियोगकरणं
त्वदाज्ञप्तार्थानुष्ठानम् ॥
५-१४६-५ सुमहात्ययं सुमहान् अत्ययो जातिभ्रंशाख्यो विनाशो यस्मात्
। अपाकीर्णस्त्यक्तः ॥
५-१४६-६ त्वत्कृते त्वत्सुखार्थं कानीनो गर्भः प्रकटो माभूदिति
हेतोरहं क्षत्रसत्क्रियां चेन्न प्राप्तस्तर्हि त्वदन्यः कः शत्रुः
किं ममाहितं पापीय इति इतोपि पापतरं कुर्यान्न कोऽपीत्यर्थः ॥
५-१४६-७ क्रियाकाले क्षत्रियोचितसंस्कारकाले । अनुक्रोशं
दयाम्। समचूचुदः स्वकार्यार्थं प्रेरितवत्यनि ॥
५-१४६-१२ उपनह्य बध्वा ॥
५-१४६-१३ प्रतिसमासितुं जेतुम् ॥
५-१४६-१५ निर्वेष्टव्यं आनृण्यं कर्तव्यम् ॥
५-१४६-२० विषह्यान् हन्तुं शक्यानपीत्यर्थः ॥

उद्योगपर्व - अध्याय १४७
॥ श्रीः ॥
५.१४७. अध्यायः १४७

Mahabharata - Udyoga Parva - Chapter Topics
कृष्णेन पाण्डवान्प्रति संक्षेपेण हास्तिननगरवृत्तान्तकथनम् ॥ १ ॥
पाण्डवैः कृष्णंप्रति विस्तरेण भीष्मादिवचनकथनप्रार्थना ॥ २ ॥
कृष्णेन शमविधायकभीष्मवचनानुवादः ॥ ३ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१४७-० (३६८११)
वैशम्पायन उवाच। ५-१४७-०क्ष् (३८१६)

आगम्य हास्तिनपुरादुपप्लाव्यमरिन्दमः ।
पाण्डवानां यथावृत्तं केशवः सर्वमुक्तवान् ॥ ५-१४७-१ (३६८१२)
संभाष्य सुचिरं कालं मन्त्रयित्वा पुनः पुनः ।
स्वमेव भवनं शौरिर्विश्रमार्थं जगाम ह ॥ ५-१४७-२ (३६८१३)
विसृज्य सर्वान्नृपतीन्विराटप्रमुखांस्तदा ।
पाण्डवा भ्रातरः पञ्च भानावस्तंगते सति ॥ ५-१४७-३ (३६८१४)
सन्ध्यामुपास्य ध्यायन्तस्तमेव गतमानसाः ।
आनाय्य कृष्णं दाशार्हं पुनर्मन्त्रममन्त्रयन् ॥ ५-१४७-४ (३६८१५)
युधिष्ठिर उवाच। ५-१४७-५क्ष् (३८१७)
त्वया नागपुरं गत्वा सभायां धृतराष्ट्रजः ।
किमुक्तः पुण्डरीकाक्ष तन्नः शंसितुमर्हसि ॥ ५-१४७-५ (३६८१६)
वासुदेव उवाच। ५-१४७-६क्ष् (३८१८)
मया नागपुरं गत्वा सभायां धृतराष्ट्रजः ।
तथ्यं पथ्यं हितं चोक्तो न च गृह्णाति दुर्मतिः । ५-१४७-६ (३६८१७)
युधिष्ठिर उवाच। ५-१४७-७अतस्मिन्नुत्पथमापन्ने कुरुवृद्धः पितामहः ।
किमुक्तवान्हृषीकेश दुर्योधनममर्षणम् ॥ ५-१४७-७क्ष् (३८१९)
आचार्यो वा महाभाग भारद्वाजः किमब्रवीत् ।
पितरौ धृतराष्ट्रस्तं गान्धारी वा किमब्रवीत् ॥ ५-१४७-८ (३६८१८)
पिता यवीयानस्माकं क्षत्ता धर्मविदां वरः ।
पुत्रशोकाभिसन्तप्तः किमाह धृतराष्ट्रजम् ॥ ५-१४७-९ (३६८१९)
किंच सर्वे नृपतयः सभायां ये समासते ।
उक्तवन्तो यथातत्त्वं तद्ब्रूहि त्वं जनार्दन ॥ ५-१४७-१० (३६८२०)
उक्तवान्हि भवान्सर्वं वचनं कुरुमुख्ययोः ।
धार्तराष्ट्रस्य तेषां हि वचनं कुरुसंसदि ॥ ५-१४७-११ (३६८२१)
कामलोभाभिभूतस्य मन्दस्य प्राज्ञमानिनः ।
अप्रियं हृदये मह्यं तन्न तिष्ठति केशव ॥ ५-१४७-१२ (३६८२२)
तेषां वाक्यानि गोविन्द श्रोतुमिच्छाम्यहं विभो ।
यथा च नाभिपद्येत कालस्तात तथा कुरु ।
भवान्हि नो गतिः कृष्ण भवान्नाथो भवान्गुरुः ॥ ५-१४७-१३ (३६८२३)
वासुदेव उवाच। ५-१४७-१४क्ष् (३८२०)
श्रृणु राजन्यथा वाक्यमुक्तो राजा सुयोधनः ।
मध्ये कुरूणां राजेन्द्र सभायां तन्निबोध मे ॥ ५-१४७-१४ (३६८२४)
मया विश्रावित वाक्ये जहास धृतराष्ट्रजः ।
अथ भीष्मः सुसंक्रुद्ध इदं वचनमब्रवीत् ॥ ५-१४७-१५ (३६८२५)
दुर्योधन निबोधेदं कुलार्थे यद्ब्रवीमि ते ।
तच्छ्रुत्वा राजशार्दूल स्वकुलस्य हितं कुरु ॥ ५-१४७-१६ (३६८२६)

मम तात पिता राजञ्शन्तनुर्लोकविश्रुतः ।
तस्याहमेक एवासं पुत्रः पुत्रवतां वरः ॥ ५-१४७-१७ (३६८२७)
तस्य बुद्धिः समुत्पन्ना द्वितीयः स्यात्कथं सुतः ।
एकपुत्रमपुत्रं वै प्रवदन्ति मनीषिणः ॥ ५-१४७-१८ (३६८२८)
न चोच्छेदं कुलं यायाद्विस्तीर्येच्च कथं यशः ।
तस्याहमीप्सितं बुद्ध्वा कालीं मातरमावहम् ॥ ५-१४७-१९ (३६८२९)
प्रतिज्ञां दुष्करां कृत्वा पितुरर्थे कुलस्य च ।
अराजा चोर्ध्वरेताश्च यथा सुविदितं तव ।
प्रतीतो निवसाम्येष प्रतिज्ञामनुपालयन् ॥ ५-१४७-२० (३६८३०)
तस्यां जज्ञे महाबाहुः श्रीमान्कुरुकुलोद्वहः ।
विचित्रवीर्यो धर्मात्मा कनीयान्मम पार्थिव ॥ ५-१४७-२१ (३६८३१)
स्वर्यातेऽहं पितरि तं स्वराज्ये सन्न्यवेशयम् ।
विचित्रवीर्यं राजानं भृत्यो भूत्वा ह्यधश्वरः ॥ ५-१४७-२२ (३६८३२)
तस्याहं सदृशान्दारान्राजेन्द्र समुपाहरम् ।
जित्वा पार्थिवसङ्घातमपि ते बहुशः श्रुतम् ॥ ५-१४७-२३ (३६८३३)
ततो रामेण समरे द्वन्द्वयुद्धमुपागमम् ।
स हि रामभयादेभिर्नागरैर्विप्रवासितः ॥ ५-१४७-२४ (३६८३४)
दारेष्वप्यतिसक्तश्च यक्ष्माणं समपद्यत ।
यदा त्वराजके राष्ट्रे न ववर्ष सुरेश्वरः ।
तदाभ्यधावन्मामेव प्रजाः क्षुद्भयपीडिताः ॥ ५-१४७-२५ (३६८३५)
प्रजा ऊचुः । ५-१४७-२६क्ष् (३८२१)
उपक्षीणाः प्रजाः सर्वा राजा भव भवाय नः ।
ईतीः प्रणुद भद्रं शन्तनोः कुलवर्धन ॥ ५-१४७-२६ (३६८३६)
पीड्यन्ते ते प्रजाः सर्वा व्याधिभिर्भृशदारुणैः ।
अल्पावशिष्टा गाङ्गेय ताः परित्रातुमर्हसि ॥ ५-१४७-२७ (३६८३७)
व्याधीन्प्रणुद्य वीर त्वं प्रजा धर्मेण पालय ।
त्वयि जिवती मा राष्ट्रं विनाशमुपगच्छतु ॥ ५-१४७-२८ (३६८३८)
भीष्म उवाच। ५-१४७-२९क्ष् (३८२२)
प्रजानां क्रोशतीनां वै नैवाक्षुभ्यत मे मनः ।
प्रतिज्ञां रक्षमाणस्य तद्वृत्तं स्मरतस्तथा ।
ततः पौरा महाराज माता काली च मे शुभा ॥ ५-१४७-२९ (३६८३९)
भृत्याः पुरोहिताचार्या ब्राह्मणाश्च बहुश्रुताः ।
मामूचुर्भृशसंतप्ता भव राजेति सन्ततम् ॥ ५-१४७-३० (३६८४०)
प्रतीपरक्षितं राष्ट्रं त्वां प्राप्य विनशिष्यति ।
स त्वमस्मद्धितार्थं वै राजा भव महामते ॥ ५-१४७-३१ (३६८४१)
इत्युक्तः प्राञ्जलिर्भूत्वा दुःखितो भृशमातुरः ।

तेभ्यो न्यवेदयं तत्र प्रतिज्ञां पितृगोरवात् ॥ ५-१४७-३२ (३६८४२)
ऊर्ध्वरेता ह्यराजा च कुलस्यार्थे पुनः पुनः ।
विशेषतस्त्वदर्थं च धुरि मा मां नियोजय ॥ ५-१४७-३३ (३६८४३)
ततोऽहं प्राञ्जलिर्भूत्वा मातरं संप्रसादयम् ।
नाम्ब शन्तनुना जातः कौरवं वंशमुद्वहन् ॥ ५-१४७-३४ (३६८४४)
प्रतिज्ञां वितथां कुर्यामिति राजन्पुनः पुनः ।
विशेषतस्त्वदर्थं च प्रतिज्ञां कृतवानहम् ॥ ५-१४७-३५ (३६८४५)
अहं प्रेष्यश्च दासश्च तवाद्य सुतवत्सले ।
एवं तामनुनीयाहं मातरं जनसन्निधौ ॥ ५-१४७-३६ (३६८४६)
अयाचं भ्रतृदारेषु तदा व्यासं महामुनिम् ।
सह मात्रा महाराज प्रसाद्य तमृषिं महामुनिम् । ५-१४७-३७ (३६८४७)
अपत्यार्थं महाराज प्रसादं कृतवांश्च सः ।
त्रीन्स पुत्रानजनयत्तदा भरतसत्तम ॥ ५-१४७-३८ (३६८४८)
अन्धः करणहीनत्वान्न वै राजा पिता तव ।
राजा तु पाण्डुरभवन्महात्मा लोकविश्रुतः ॥ ५-१४७-३९ (३६८४९)
स राजा तस्य ते पुत्राः पितुर्दायाद्यहारिणः ।
मा तात कलहं कार्षी राज्यस्यार्धं प्रदीयताम् ॥ ५-१४७-४० (३६८५०)
मयि जीवति राज्यं कः संप्रशासेत्पुमानिह ।
मावमंस्या वचो मह्यं शममिच्छामि वः सदा ॥ ५-१४७-४१ (३६८५१)
न विशेषोऽस्ति मे पुत्र त्वयि तेषु च षार्थिव ।
मतमेतत्पितुस्तुभ्यं गान्धार्या विदुरस्य च ॥ ५-१४७-४२ (३६८५२)
श्रोतव्यं खलु वृद्धानां नाभिशङ्कीर्वचो मम ।
नाशयिष्यसि मा सर्वमात्मानं पृथिवीं तथा ॥ ॥ ५-१४७-४३ (३६८५३)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
सप्तचत्वारिंशदधिकशततमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-१४७-१३ नाभिपद्येत नातिक्रामेत ॥
५-१४७-१९ कालीं सत्यवतीम् ॥
५-१४७-२० प्रतीतः तुष्टः ॥
५-१४७-२४ विप्रवासितः दूरेस्थापितः ॥

उद्योगपर्व - अध्याय १४८
॥ श्रीः ॥
५.१४८. अध्यायः १४८

Mahabharata - Udyoga Parva - Chapter Topics

कृष्णेन पाण्डवान्प्रति द्रोणवाक्यानुवादः ॥ १ ॥
तथा भीष्मंप्रत्युक्तविदुरवचनानुवादः ॥ २ ॥
तथा गान्धारीवचनानुवादः ॥ ३ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१४८-० (३६८५४)
वासुदेव उवाच। ५-१४८-०क्ष् (३८२३)
भीष्मेणोक्ते ततो द्रोणो दुर्योधनमभाषत ।
मध्ये नृपाणां भद्रं ते वचनं वचनक्षमः ॥ ५-१४८-१ (३६८५५)
प्रातीपः शन्तनुस्तात कुलस्यार्थे यथा स्थितः ।
यथा देवव्रतो भीष्मः कुलस्यार्थे स्थितोऽभवत् ॥ ५-१४८-२ (३६८५६)
तथा पाण्डुर्नरपतिः सत्यसन्धो जितेन्द्रियः ।
राजा कुरूणां धर्मात्मा सुव्रतः सुसमाहिताः ॥ ५-१४८-३ (३६८५७)
ज्येष्ठाय राज्यमददद्धृतराष्ट्राय धीमते ।
यवीयसे तथा क्षत्रे कुरूणां वंशवर्धनः । ५-१४८-४ (३६८५८)
ततः सिंहासने राजन्स्थापयित्वैनमच्युतम् ॥
वनं जगाम कौरव्यो भार्याभ्यां सहितो नृपः ॥ ५-१४८-५ (३६८५९)
नीचैः स्थित्वा तु विदुर उपास्ते स्म विनीतवत् ।
प्रेष्यवत्पुरुषव्याघ्रो वालव्यजनमुत्क्षिपन् ॥ ५-१४८-६ (३६८६०)
ततः सर्वाः प्रजास्तात धृतराष्ट्रं जनेश्वरम् ।
अन्वपद्यन्त विधिवद्यथा पाण्डुं जनाधिपम् ॥ ५-१४८-७ (३६८६१)
विसृज्य धृतराष्ट्राय राज्यं स विदुराय च ।
चचार पृथिवीं पाण्डुः सर्वां परपुरञ्जयः ॥ ५-१४८-८ (३६८६२)
कोशसंवनने दाने भृत्यानां चान्ववेक्षणे ।
भरणे चैव सर्वस्य विदुरः सत्यसङ्गरः ॥ ५-१४८-९ (३६८६३)
सन्धिविग्रहसंयुक्तो राज्ञां संवाहनक्रियाः ।
अवैक्षत महातेजा भीष्मः परपुरञ्जयः ॥ ५-१४८-१० (३६८६४)
सिंहासनस्थो नृपतिर्धृतराष्ट्रो महाबलः ।
अन्वास्यमानः सततं विदुरेण महात्मना ॥ ५-१४८-११ (३६८६५)
कथं तस्य कुले जातः कुलभेदं व्यवस्यसि ।
संभूय भ्रातृभिः सार्धं भुङ्क्ष भोगाञ्जनाधिप ॥ ५-१४८-१२ (३६८६६)
ब्रवीम्यहं न कार्पण्यान्नार्थहेतोः कथञ्चन ।
भीष्मेण दत्तमिच्छामि न त्वया राजसत्तम ॥ ५-१४८-१३ (३६८६७)
नाहं त्वत्तोऽभिकाङ्क्षिष्ये वृत्त्युपायं जनाधिप ।

यतो भीष्मस्ततो द्रोणो यद्भीष्मस्त्वाह तत्कुरु ॥ ५-१४८-१४ (३६८६८)
दीयतां पाण्डुपुत्रेभ्यो राज्यार्धमरिकर्शन ।
सममाचार्यकं तात तव तेषां च मे सदा ॥ ५-१४८-१५ (३६८६९)
अश्वत्थामा यथा मह्यं तथा श्वेतहयो मम ।
बहुना किं प्रलापेन यतो धर्मस्ततो जयः ॥ ५-१४८-१६ (३६८७०)
वासुदेव उवाच। ५-१४८-१७क्ष् (३८२४)
एवमुक्ते महाराज द्रोणेनामिततेजसा ।
व्याजहार ततो वाक्यं विदुरः सत्यसङ्गरः ।
पितुर्वदनमन्वीक्ष्य परिवृत्त्य च धर्मवित् ॥ ५-१४८-१७ (३६८७१)
विदुर उवाच। ५-१४८-१८क्ष् (३८२५)
देवव्रत निबोधेदं वचनं मम भाषतः ।
प्रनष्टः कौरवो वंशस्त्वयायं पुनरुद्धृतः ॥ ५-१४८-१८ (३६८७२)
तन्मे विलपमानस्य वचनं समुपेक्षसे ।
कोयं दुर्योधनो नाम कुलेऽस्मिन्कुलपांसनः ॥ ५-१४८-१९ (३६८७३)
यस्य लोभाभिभूतस्य मतिं समनुवर्तसे ।
अनार्यस्याकृतज्ञस्य लोभेन हृतचेतसः ।
अतिक्रामति यः शास्त्रं पितुर्धर्मार्थदर्शिनः ॥ ५-१४८-२० (३६८७४)
एते नश्यन्ति कुरवो दुर्योधनकृतेन वै ।
यथा ते न प्रणश्येयुर्महाराज तथा कुरु ॥ ५-१४८-२१ (३६८७५)
मां चैव धृतराष्ट्रं च पूर्वमेव महामते ।
चित्रकार इवालेख्यं कृत्वा स्थापितवानसि ॥ ५-१४८-२२ (३६८७६)
प्रजापतिः प्रजाः सृष्ट्वा यथा संहरते तथा ।
नोपेक्षस्व महाबाहो पश्यमानः कुलक्षयम् ॥ ५-१४८-२३ (३६८७७)
अथ तेऽद्य मतिर्नष्टा विनाशे प्रत्युपस्थिते ।
वनं गच्छ मया सार्धं धृतराष्ट्रेण चैव ह ॥ ५-१४८-२४ (३६८७८)
बद्ध्वा वा निकृतिप्रज्ञं धार्तराष्ट्रं सुदुर्मतिम् ।
शाधीदं राज्यमद्याशु पाण्डवैरभिरक्षितम् ॥ ५-१४८-२५ (३६८७९)
प्रसीद राजशार्दूल विनाशो दृश्यते महान् ।
पाण्डवानां कुरूणां च राज्ञामिततेजसाम् ॥ ५-१४८-२६ (३६८८०)
वासुदेव उवाच। ५-१४८-२७क्ष् (३८२६)
विरराम्मैवमुक्त्वा तु विदुरो दीनमानसः ।
प्रध्यायमानः स तदा निःश्वसंश्च पुनः पुनः ॥ ५-१४८-२७ (३६८८१)
ततोऽस्य राज्ञः सुबलस्य पुत्री
धर्मार्थयुक्तं कुलनाशमीता ।
दुर्योधनं पापमतिं नृशंसं
राज्ञां समक्षं सुतमाह कोपात् ॥ ५-१४८-२८ (३६८८२)

ये पार्थिवा राजसभां प्रविष्टा
ब्रह्मर्षयो ये च सभासदोऽन्ये ।
श्रृण्वन्तु वक्ष्यामि तवापराधं
पापस्य सामात्यपरिच्छदस्य ॥ ५-१४८-२९ (३६८८३)
राज्यं कुरूणामनुरूपभोज्यं
क्रमागतो नः कुलधर्म एषः ।
त्वं पापबुद्धेऽतिनृशंसकर्मन्
राज्यं कुरूणामनयाद्विहंसि ॥ ५-१४८-३० (३६८८४)
राज्ये स्थितो धृतराष्ट्रो मनीषी
तस्यानुजो विदुरो दीर्घदर्शी ।
एतावतिक्रम्य कथं नृपत्वं
दुर्योधन प्रार्थयसेऽद्य मोहात् ॥ ५-१४८-३१ (३६८८५)
राजा च क्षत्ता च महानुभावौ
भीष्मे स्थिते परवन्तौ भवेताम् ।
अयं तु धर्मज्ञतया महात्मा
न राज्यकामो नृवरो नदीजः ॥ ५-१४८-३२ (३६८८६)
राज्य तु पाण्डोरिदमप्रधृष्यं
तस्याद्य पुत्राः प्रभवन्ति नान्ये ।
राज्यं तदेतन्निखिलं पाण्डवानां
पैतामहं पुत्रपौत्रानुगामि ॥ ५-१४८-३३ (३६८८७)
यद्वै ब्रूते कुरुमुख्यो महात्मा
देवव्रतः सत्यसन्धो मनीषी ।
सर्वं तदस्माभिरहत्य कार्यं
राज्यं स्वधर्मान्परिपालयद्भिः ॥ ५-१४८-३४ (३६८८८)
अनुज्ञया चाथ महाव्रतस्य
ब्रूयान्नृपोऽयं विदुरस्तथैव ।
कार्यं भवेत्तत्सुहृद्भिर्नियोज्यं
धर्मं पुरस्कृत्य सुदीर्घकालम् ॥ ५-१४८-३५ (३६८८९)
न्यायागतं राज्यमिदं कुरूणां
युधिष्ठिरः शास्तु वै धर्मपुत्रः ।
प्रचोदितो धृतराष्ट्रेण राज्ञा
पुरस्कृतः शान्तनवेन चैव ॥ ॥ ५-१४८-३६ (३६८९०)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
अष्टचत्वारिंशदधिकशततमोऽध्यायः ॥

५-१४८-४ यथा ज्येष्ठायाददत् तथा क्षत्रे विदुरायापि
न्यासभूतमददादिति भावः ॥
५-१४८-९ संवननमात्मीयताकरणम् ॥
५-१४८-१७ पितुर्भीष्मस्य ॥
५-१४८-२० शास्त्रं आज्ञाम् ॥

उद्योगपर्व - अध्याय १४९
॥ श्रीः ॥
५.१४९. अध्यायः १४९

Mahabharata - Udyoga Parva - Chapter Topics
कृष्णेन पाण्डवान्प्रति धृतराष्ट्रेण
दुर्योधनंप्रत्युक्तवचनानुवादः ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१४९-० (३६८९१)
वासुदेव उवाच। ५-१४९-०क्ष् (३८२७)
एवमुक्ते तु गान्धार्या धृतराष्ट्रो जनेश्वरः ।
दुर्योधनमुवाचेदं राजमध्ये जनाधिप ॥ ५-१४९-१ (३६८९२)
दुर्योधन निबोधेदं यत्त्वां वक्ष्यामि पुत्रक ।
तथा तत्कुरु भद्रं ते यद्यस्ति पितृगौरवम् ॥ ५-१४९-२ (३६८९३)
सोमः प्रजापतिः पूर्वं कुरूणां वंशवर्धनः ।
सोमाद्बभूव षष्ठोऽयं ययातिर्नहुषात्मजः ॥ ५-१४९-३ (३६८९४)
तस्य पुत्रा बभूवुर्हि पञ्च राजर्षिसत्तमाः ।
तेषां यदुर्महातेजा ज्येष्ठः समभवत्प्रभुः ॥ ५-१४९-४ (३६८९५)
पूरुर्यवीयांश्च ततो योऽस्माकं वंशवर्धनः ।
शर्मिष्ठया संप्रसूतो दुहित्रा वृषपर्वणः ॥ ५-१४९-५ (३६८९६)
यदुश्च भरतश्रेष्ठ देवयान्याः सुतोऽभवत् ।
दौहित्रस्तात शुक्रस्य काव्यस्यामिततेजसः ॥ ५-१४९-६ (३६८९७)
यादवानां कुलकरो बलवान्वीर्यसंमतः ।
अवमेने स तु क्षत्रं दर्पपूर्णः सुमन्दधीः ॥ ५-१४९-७ (३६८९८)
न चातिष्ठत्पितुः शस्त्रि बलदर्पविमोहितः ।
अवमेने च पितरं भ्रातॄंश्चाप्यपराजितः ॥ ५-१४९-८ (३६८९९)
पृथिव्यां चतुरन्तायां यदुदेवाभवद्बली ।

वशे कृत्वा स नृपतीन्न्यवसन्नागसाह्वये ॥ ५-१४९-९ (३६९००)
तं पिता परमक्रुद्धो ययातिर्नहुषात्मजः ।
शशाप पुत्रं गान्धारे राज्याच्चापि व्यरोपयत् ॥ ५-१४९-१० (३६९०१)
ये चैनमन्ववर्तन्त भ्रातरो बलदर्पिताः ।
शशाप तानपि क्रुद्धो ययातिस्तनयानथ ॥ ५-१४९-११ (३६९०२)
यवीयांसं ततः पुरुं पुत्रं स्ववशवर्तिनम् ।
राज्ये निवेशयामास विधेयं नृपसत्तमः ॥ ५-१४९-१२ (३६९०३)
एवं ज्येष्ठोऽप्यथोत्सिक्तो न राज्यमभिजायते ।
यवीयांसोपि जायन्ते राज्यं वृद्धोपसेवया ॥ ५-१४९-१३ (३६९०४)
तथैव सर्वधर्मज्ञः पितुर्मम पितामहः ।
प्रतीपः पृथिवीपालस्त्रिषु लोकेषु विश्रुतः ॥ ५-१४९-१४ (३६९०५)
तस्य पार्थिवसिंहस्य राज्यं धर्मेण शासतः ।
त्रयः प्रजज्ञिरे पुत्रा देवकल्पा यशस्विनः ॥ ५-१४९-१५ (३६९०६)
देवापिरभवच्छ्रेष्ठो बाह्लीकस्तदनन्तरम् ।
तृतीयः शन्तनुस्तात धृतिमान्मे पितामहः ॥ ५-१४९-१६ (३६९०७)
देवापिस्तु महातेजास्त्वग्दोषी राजसत्तमः ।
धार्मिकः सत्यवादी च पितुः शुश्रूषणे रतः ॥ ५-१४९-१७ (३६९०८)
पौरजानपदानां च संमतः साधुसत्कृतः ।
सर्वेषां बालवृद्धानां देवापिर्हृदयङ्गमः ॥ ५-१४९-१८ (३६९०९)
वदान्यः सत्यसन्धश्च सर्वभूतहिते रतः ।
वर्तमानः पितुः शास्त्रे ब्राह्मणानां तथैव च ॥ ५-१४९-१९ (३६९१०)
बाह्लीकस्य प्रियो भ्राता शन्तनोश्च महात्मनः ।
सौभ्रात्रं च परं तेषां सहितानां महात्मनाम् ॥ ५-१४९-२० (३६९११)
अथ कालस्य पर्याये वृद्धो नृपतिसत्तमः ।
संभारानभिषेकार्थं कारयामास शास्त्रतः ॥ ५-१४९-२१ (३६९१२)
कारयामास सर्वाणि मङ्गलार्थानि वै विभुः ।
तं ब्राह्मणाश्च वृद्धाश्च पौरजानपदैः सह ॥ ५-१४९-२२ (३६९१३)
सर्वे निवारयामासुर्देवापेरभिषेचनम् ।
स तच्छ्रुत्वा तु नृपतिरभिषेकनिवारणम् ।
अश्रुकण्ठोऽभवद्राजा पर्यशोचत चात्मजम् ॥ ५-१४९-२३ (३६९१४)
एवं वदान्यो धर्मज्ञः सत्यसन्धश्च सोऽभवत् ।
प्रियः प्रजानामपि संस्त्वग्दोषेण प्रदूषितः ॥ ५-१४९-२४ (३६९१५)
हीनाङ्गं पृथिवीपालं नाभिनन्दन्ति देवताः ।
इति कृत्वा नृपश्रेष्ठं प्रत्यषेधन्द्विजर्षभाः ॥ ५-१४९-२५ (३६९१६)
ततः प्रव्यथिताङ्गोऽसौ पुत्रशोकसमन्वितः ।
ममार तं मृतं दृष्ट्वा देवापिः संश्रितो वनम् ॥ ५-१४९-२६ (३६९१७)

बाह्लीको मातुलकुलं त्यक्त्वा राज्यं समाश्रितः ।
पितृभ्रातॄन्परित्यज्य प्राप्तवान्परमर्धिमत् ॥ ५-१४९-२७ (३६९१८)
बाह्लीकेन त्वनुज्ञातः शन्तनुर्लोकविश्रुतः ।
पितर्युपरते राजन्राजा राज्यमकारयत् ॥ ५-१४९-२८ (३६९१९)
तथैवाहं मतिमता परिचिन्त्येह पाण्डुना ।
ज्येष्ठः प्रभ्रंशितो राज्याद्धीनाङ्ग इति भारत ॥ ५-१४९-२९ (३६९२०)
पाण्डुस्तु राज्यं संप्राप्तः कनीयानपि सन्नृपः ।
विनाशे तस्य पुत्राणामिदं राज्यमरिन्दम ॥ ५-१४९-३० (३६९२१)
मय्यभागिनि राज्याय कथं त्वं राज्यमिच्छसि ।
अराजपुत्रो ह्यस्वामी परस्वं हर्तुमिच्छसि ॥ ५-१४९-३१ (३६९२२)
युधिष्ठिरो राजपुत्रो महात्मा
न्यायागतं राज्यमिदं च तस्य ।
स कौरवस्यास्य कुलस्य भर्ता
प्रशासिता चैव महानुभावः ॥ ५-१४९-३२ (३६९२३)
स सत्यसन्धः स तथाऽप्रमत्तः
शास्त्रे स्थितो बन्धुजनस्य साधुः ।
प्रियः प्रजानां सुहृदानुकम्पी
जितेन्द्रियः साधुजनस्य भर्ता ॥ ५-१४९-३३ (३६९२४)
क्षमा तितिक्षा दम आर्जवं च
सत्यव्रतत्वं श्रुतमप्रमादः ।
भूतानुकम्पा ह्यनुशासनं च
युधिष्ठिरे राजगुणाः समस्ताः ॥ ५-१४९-३४ (३६९२५)
अराजपुत्रस्त्वमनार्यवृत्तो
लुब्धः सदा बन्धुषु पापबुद्धिः ।
क्रमागतं राज्यमिदं परेषां
हर्तुं कथं शक्ष्यसि दुर्विनीत ॥ ५-१४९-३५ (३६९२६)
प्रयच्छ राज्यार्धमपेतमोहः
सवाहनं त्व सपरिच्छदं च ।
ततोऽवशेषं तव जीवितस्य
सहानुजस्यैव भवेन्नरेन्द्र ॥ ॥ ५-१४९-३६ (३६९२७)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
एकोनपञ्चाशदधिकशततमोऽध्यायः ॥

उद्योगपर्व - अध्याय १५०
॥ श्रीः ॥
५.१५०. अध्यायः १५०

Mahabharata - Udyoga Parva - Chapter Topics

कृष्णेन पाण्डवान्प्रति भीष्मादिवचनमवधूय समुत्थितेन
दुर्योधनेन चोदितानां राज्ञीं भीष्मं पुरस्कृत्य सेनाभिः सह
कुरुक्षत्रेप्रस्थानकथनम् ॥ १ ॥
तथा स्वेन सामादित्रयप्रयोगेऽप्यवशीभूते दुर्योधने दण्डस्यैव
प्रयोक्तव्यत्वकथनम् ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१५०-० (३६९२८)
भगवानुवाच। ५-१५०-०क्ष् (३८२८)
एवमुक्ते तु भीष्मेण द्रोणेन विदुरेण च ।
गान्धार्या धृतराष्ट्रेण न वै मन्दोऽन्वबुद्ध्यत ॥ ५-१५०-१ (३६९२९)
अवधूयोत्थितो मन्दः क्रोधसंरक्तलोचनः ।
अन्वद्रवन्त तं पश्चाद्राजानस्त्यक्तजीविताः ॥ ५-१५०-२ (३६९३०)
आज्ञापयच्च राज्ञस्तान्पार्थिवान्नष्टचेतसः ।
प्रयात वै कुरुक्षेत्रं पुष्योऽद्येति पुनः पुनः ॥ ५-१५०-३ (३६९३१)
ततस्ते पृथिवीपालाः प्रययुः सहसैनिकाः ।
भीष्मं सेनापतिं कृत्वा संहृष्टाः कालचोदिताः ॥ ५-१५०-४ (३६९३२)
अक्षौहिण्यो दशैका च कौरवाणां समागताः ।
तासां प्रमुखतो भीष्मस्तालकेतुर्व्यरोचत ॥ ५-१५०-५ (३६९३३)
यदत्र युक्तं प्राप्तं च तद्विधत्स्व विशांपते ।
उक्तं भीष्मेण यद्वाक्यं द्रोणेन विदुरेण च ॥ ५-१५०-६ (३६९३४)
गान्धार्या धृतराष्ट्रेण समक्षं मम भारत ।
एतत्ते कथितं राजन्यद्वृत्तं कुरुसंसदि ॥ ५-१५०-७ (३६९३५)
साम चादौ प्रयुक्तं मे राजन्सौभ्रात्रमिच्छता ।
अभेदायास्य वंशस्य प्रजानां च विवृद्धये ॥ ५-१५०-८ (३६९३६)
पुनर्भेदश्च मे युक्तो यदा साम न गृह्यते ।
कर्मानुकीर्तनं चैव देवमानुपसंहितम् ॥ ५-१५०-९ (३६९३७)
यदा नाद्रियते वाक्यं सामपूर्वं सुयोधनः ।
तदा मया समानीय भेदिताः सर्वपार्थिवाः ॥ ५-१५०-१० (३६९३८)
अद्भुतानि च घोराणि दारुणानि च भारत ।
अमानुषाणि कर्माणि दर्शितानि मया विभो ॥ ५-१५०-११ (३६९३९)
निर्भर्त्सयित्वा राज्ञस्तांस्तृणीकृत्य सुयोधनम् ।
राधेयं भीषयित्वा च सौबलं च पुनः पुनः ॥ ५-१५०-१२ (३६९४०)

द्यूततो धार्तराष्ट्राणां निन्दां कृत्वा तथा पुनः ।
भेदयित्वा नृपास्नर्वान्वाग्भिर्मन्त्रेम चासकृत् ॥ ५-१५०-१३ (३६९४१)
पुनः सामाभिसंयुक्तं संप्रदानमथाब्रुवम् ।
अभेदात्कुरुवंशस्य कार्ययोगात्तथैव च ॥ ५-१५०-१४ (३६९४२)
ते शूरा धृतराष्ट्रस्य भीष्मस्य विदुरस्य च ।
तिष्ठेयुः पाण्डवाः सर्वे हित्वा मानमधश्वराः ॥ ५-१५०-१५ (३६९४३)
प्रयच्छन्तु च ते राज्यमनीशास्ते भवन्तु च ।
यथाह राजा गाङ्गेयो विदुरश्च हितं तव ॥ ५-१५०-१६ (३६९४४)
सर्वं भवतु ते राज्यं पञ्च ग्रामान्विसर्जय ।
अवश्यं भरणीया हि पितुस्ते राजसत्तम ॥ ५-१५०-१७ (३६९४५)
एवमुक्तोऽपि दुष्टात्मा नैव भागं व्यमुञ्चत ।
दण्डं चतुर्थं पश्यामि तेषु पापेषु नान्यथा ॥ ५-१५०-१८ (३६९४६)
निर्याताश्च विनाशाय कुरुक्षेत्रं नराधिपाः ।
एतत्ते कथितं राजन्यद्वृत्तं कुरुसंसदि ॥ ५-१५०-१९ (३६९४७)
न ते राज्यं प्रयच्छन्ति विना युद्धेन पाण्डव ।
विनाशहेतवः सर्वे प्रत्युपस्थितमृत्यवः ॥ ॥ ५-१५०-२० (३६९४८)

इति श्रीमन्महाभारते उद्योगपर्वणि भगवद्यानपर्वणि
पञ्चाशदधिकशततमोऽध्यायः ॥

उद्योगपर्व - अध्याय १५१
॥ श्रीः ॥
५.१५१. अध्यायः १५१

Mahabharata - Udyoga Parva - Chapter Topics
युधिष्ठिरेण भ्रातॄन्प्रति कस्यचित्सेनापतित्वकल्पने
स्वस्वाभिप्रायनिवेदनचोदना ॥ १ ॥
तैः स्वस्वाभिप्रायनिवेदनानन्तरं युधिष्ठिरेण श्रीकृष्णंप्रति
तदभिप्रायनिवेदनप्रार्थना ॥ २ ॥
श्रीकृष्णेन धृष्टद्युम्नस्य सेनापतित्वेन वरणस्य
स्वाभिमतत्वकथने राज्ञां हर्षात्समुद्घोपः ॥ ३ ॥
युधिष्ठिरादीनां सर्वेषां कुरुक्षेत्रप्रवेशः ॥ ४ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१५१-० (३६९४९)
वैशम्पायन उवाच। ५-१५१-०क्ष् (३८२९)

जनार्दनवचः श्रुत्वा धर्मराजो युधिष्ठिरः ।
भ्रातॄनुवाच धर्मात्मा समक्षं केशवस्य ह ॥ ५-१५१-१ (३६९५०)
श्रुतं भवद्भिर्यद्वृत्तं सभायां कुरुसंसदि ।
केशवस्यापि यद्वाक्यं तत्सर्वमवधारितम् ॥ ५-१५१-२ (३६९५१)
तस्मात्सेनाविभागं मे कुरुध्वं नरसत्तमाः ।
अक्षौहिण्यश्च सप्तैताः समेता विजयाय वै ॥ ५-१५१-३ (३६९५२)
तासां ये पतयः सप्त विख्यातास्तान्निबोधत ।
द्रुपदश्च विराटश्च धृष्टद्युम्नशिखण्डिनौ ॥ ५-१५१-४ (३६९५३)
सात्यकिश्चेकितानश्च भीमसेनश्च वीर्यवान् ।
एते सेनाप्रणेतारो वीराः सर्वे तनुत्यजः ॥ ५-१५१-५ (३६९५४)
सर्वे वेदविदः शूराः सर्वे सुचिरितव्रताः ।
ह्रीमन्तो नीतिमन्तश्च सर्वे युद्धविशारदाः ॥ ५-१५१-६ (३६९५५)
इष्वस्त्रकुशलाः सर्वे तथा सर्वास्त्रयोधिनः ।
सप्तानामपि यो नेता सेनानां प्रविभागवित् ॥ ५-१५१-७ (३६९५६)
यः सहेत रणे भीष्मं शरार्चिःपावकोपमम् ।
तं तावत्सहदेवात्र प्रब्रूहि कुरुनन्दन ।
स्वगतं पुरुषव्याघ्र को नः सेनापतिः क्षमः ॥ ५-१५१-८ (३६९५७)
सहदेव उवाच। ५-१५१-९क्ष् (३८३०)
संयुक्त एकदुःखश्च वीर्यवांश्च महीपतिः ।
यं समाश्रित्य धर्मज्ञं स्वमंशमनुयुञ्ज्महे ॥ ५-१५१-९ (३६९५८)
मत्स्यो विराटो बलवान्कृतास्त्रो युद्धदुर्मदः ।
प्रसहिष्यति सङ्ग्रामे भीष्मं तांश्च महारथान् ॥ ५-१५१-१० (३६९५९)
वैशम्पायन उवाच। ५-१५१-११क्ष् (३८३१)
तथोक्ते सहदेवेन वाक्ये वाक्यविशारदः ।
नकुलोऽनन्तरं तस्मादिदं वचनमाददे ॥ ५-१५१-११ (३६९६०)
वयसा शास्त्रतो धैर्यात्कुलेनाभिजनेन च ।
ह्रीमान्बलान्वितः श्रीमान्सर्वशास्त्रविशारदः ॥ ५-१५१-१२ (३६९६१)
वेद चास्त्रं भारद्वाजाहुर्धर्षः सत्यसङ्गरः ।
यो नित्यं स्पर्धते द्रोणं भीष्मं चैव महाबलम् ॥ ५-१५१-१३ (३६९६२)
श्लाघ्यः पार्थिववंशस्य प्रमुखे वाहिनीपतिः ।
पुत्रपौत्रैः परिवृतः शतशाख इव द्रुमः ॥ ५-१५१-१४ (३६९६३)
यस्तताप तपो घोरं सदारः पृथिवीपतिः ।
रोषाद्द्रोणविनाशाय वीरः समितिशोभनः ॥ ५-१५१-१५ (३६९६४)
पितेवास्मान्समाधत्ते यः सदा पार्थिवर्षभः ।
श्वशुरो द्रुपदोऽस्माकं सेनाग्रं स प्रकर्षतु ॥ ५-१५१-१६ (३६९६५)
स द्रोणभीष्मावायातौ सहेदिति मतिर्मम ।

स हि दिव्यास्त्रविद्राजा सखा चाङ्गिरसो नृपः ॥ ५-१५१-१७ (३६९६६)
माद्रीसुताभ्यामुक्ते तु स्वमते कुरुनन्दनः ।
वासविर्वासवसमः सव्यसाच्यब्रवीद्वचः ॥ ५-१५१-१८ (३६९६७)
योयं तपःप्रभावेन ऋषिसन्तोषणेन च ।
दिव्यः पुरुष उत्पन्नो ज्वालावर्णो महाभुजः ॥ ५-१५१-१९ (३६९६८)
धनुष्मान्कवची खड्गी रथमारुह्य दंशितः ।
दिव्यैर्हयवरैर्युक्तमग्निकुण्डात्समुत्थितः ॥ ५-१५१-२० (३६९६९)
गर्जन्निव महामेघो रथघोषेण वीर्यवान् ।
सिंहसंहननो वीरः सिंहतुल्यपराक्रमः ॥ ५-१५१-२१ (३६९७०)
सिंहोरस्कः सिंहभुजः सिंहवक्षा महाबलः ।
सिंहप्रगर्जनो वीरः संहस्कन्धो महाद्युतिः ॥ ५-१५१-२२ (३६९७१)
शुभ्रूः सुदंष्ट्रः सुहनुः सुबाहुः सुमुखोऽकृशः ।
सुजत्रुः सुविशालाक्षः सुपादः सुप्रतिष्ठितः ॥ ५-१५१-२३ (३६९७२)
अभेद्यः सर्वशस्त्राणां प्रभिन्न इव वारणः ।
जज्ञे द्रोणविनाशाय सत्यवादी जितेन्द्रियः ॥ ५-१५१-२४ (३६९७३)
धृष्टद्युम्नमहं मन्ये सहेङ्गीष्मस्य सायकान् ।
वज्राशनिसमस्पर्शान्दीप्तास्यानुरगानिव ॥ ५-१५१-२५ (३६९७४)
यमदूतसमान्वेगे निपाते पावकोपमान् ।
रामेणाजौ विषिहितान्वज्रनिष्पेषदारुणान् ॥ ५-१५१-२६ (३६९७५)
पुरुष तं न पश्यामि यः सहेत महाव्रतम् ।
धृष्टद्युम्नमृते राजन्निति मे धीयते मतिः ॥ ५-१५१-२७ (३६९७६)
क्षिप्रहस्तश्चित्रयोधी मतः सेनापतिर्मम ।
अभेद्यकवचः श्रीमान्मातङ्ग इव यूथपः
॥ ५-१५१-२९अग्अर्जुनेनैवमुक्ते तु भीमो वाक्यं समाददे।
वधार्थं यः समुत्पन्नः शिखण्डी द्रुपदात्मजः ।
वदन्ति सिद्धा राजेन्द्र ऋषयश्च समागताः ॥ ५-१५१-२८ (३६९७७)
यस्य सङ्ग्राममध्ये तु दिव्यमस्त्रं प्रकुर्वतः ।
रूपं द्रक्ष्यन्ति पुरुषा रामस्येव महात्मनः ॥ ५-१५१-३० (३६९७८)
न तं युद्धे प्रपश्यामि यो भिन्द्यात्तु शिखण्डिनाम् ।
शस्त्रेण समरे राजन्सन्नद्धं स्यन्दने स्थितम् ॥ ५-१५१-३१ (३६९७९)
द्वैरथे समरे नान्यो भीष्मं हन्यान्महाव्रतम् ।
शिखण्डिनमृते वीरं स मे सेनापतिर्मतः ॥ ५-१५१-३२ (३६९८०)
युधिष्ठिर उवाच। ५-१५१-३३क्ष् (३८३२)
सर्वस्य जगतस्तात सारासारं बालाबलम् ।
सर्वं जानाति धर्मात्मा मतमेषां च केशवः ॥ ५-१५१-३३ (३६९८१)
यमाह कृष्णो दाशार्हः सोऽस्तु सेनापतिर्मम ।

कृतास्त्रोप्यकृतास्त्रो वा वृद्धो वा यदि वा युवा ॥ ५-१५१-३४ (३६९८२)
एष नो विजये मूलमेष तात विपर्यये ।
अत्र प्राणाश्च राज्यं च भावाभावौ सुखासुखे ॥ ५-१५१-३५ (३६९८३)
एष धाता विधाता च सिद्धिरत्र प्रतिष्ठिता ।
यमाह कृष्णो दाशार्हः सोस्तु नो वाहिनीपतिः ॥ ५-१५१-३६ (३६९८४)
ब्रवीतु वदतां श्रेष्ठो निशा समभिवर्तते ।
ततः सेनापतिं कृत्वा कृष्णस्य वशवर्तिनः ॥ ५-१५१-३७ (३६९८५)
रात्रेः शेषे व्यतिक्रान्ते प्रयास्यामो रणाजिरम् ।
अधिवासितशस्त्राश्च कृतकौतुकमङ्गलाः ॥ ५-१५१-३८ (३६९८६)
वैशम्पायन उवाच। ५-१५१-३९क्ष् (३८३३)
तस्य तद्वचनं श्रुत्वा धर्मराजस्य धीमतः ।
अब्रवीत्पुण्डरीकाक्षो धनञ्जयमवेक्ष्य ह ॥ ५-१५१-३९ (३६९८७)
ममाप्येते महाराज भवद्विर्य उदाहृताः ।
नेतारस्तव सेनाया मता विक्रान्तयोधिनः ॥ ५-१५१-४० (३६९८८)
सर्व एव समर्था हि तव शत्रुं प्रबाधितुम् ।
इन्द्रस्यापि भयं ह्येते जनयेयुर्महाहवे ॥ ५-१५१-४१ (३६९८९)
किं पुनर्धार्तराष्ट्राणां लुब्धानां पापचेतसाम् ।
मयापि हि महाबाहो त्वत्प्रियार्थं महाहवे ॥ ५-१५१-४२ (३६९९०)
कृतो यत्नो महांस्तत्र शमः स्यादिति भारत ।
धर्मस्य गतमानृण्यं न स्म वाच्या विवक्षताम् ॥ ५-१५१-४३ (३६९९१)
कृतार्थं मन्यते बाल आत्मनमविचक्षणः ।
धार्तराष्ट्रो बलस्थं च पश्यत्यात्मानमातुरः ॥ ५-१५१-४४ (३६९९२)
युज्यतां वाहिनी साधु वधसाध्या हि मे मताः ।
न धार्तराष्ट्राः शक्ष्यन्ति स्थातुं दृष्ट्वा धनञ्जयम् ॥ ५-१५१-४५
(३६९९३)
भीमसेनं च सङ्क्रुद्धं यमौ चापि यमोपमौ ।
युयुधानं द्वितीयं च धृष्टद्युम्नममर्षणम् ॥ ५-१५१-४६ (३६९९४)
अभिमन्युं द्रौपदेयान्विराटद्रुपदावपि ।
अक्षौहिणीपतींश्चान्यान्नरेन्द्रान्भीमविक्रमान् ॥ ५-१५१-४७ (३६९९५)
सारवद्बलमस्माकं दुष्प्रधर्षं दुरासदम् ।
धार्तराष्ट्रबलं सङ्ख्ये हनिष्यति न संशयः ॥ ५-१५१-४८ (३६९९६)
धृष्टद्युम्नमहं मन्ये सेनापतिमरिन्दम। ५-१५१-४९ (३६९९७)
वैशम्पायन उवाच ।
एवमुक्ते तु कृष्णेन संप्राहृष्यन्नरोत्तमाः ॥ ५-१५१-४९क्ष् (३८३४)
तेषां प्रहृष्टमनसां नादः समभवन्महान् ।
योग इत्यथ सैन्यानां त्वरतां संप्रधावताम् ॥ ५-१५१-५० (३६९९८)

हयवारणशब्दाश्च नेमिघोषाश्च सर्वतः ।
शङ्खदुन्दुभिघोषाश्च तुमुलाः सर्वतोऽभवन् ॥ ५-१५१-५१ (३६९९९)
तद्बभ्रं सागरनिभं क्षुब्धं बलसमागमम् ।
रथपत्तिगजोदयं महोर्मिभिरिवाकुलम् ॥ ५-१५१-५२ (३७०००)
धावतामाहुयानानां तनुत्राणि च बध्नताम् ।
प्रयास्यतां पाण्डवानां ससैन्यानां समन्ततः ॥ ५-१५१-५३ (३७००१)
गङ्गेव पूर्णा दुर्धर्षा समदृश्यत वाहिनी ।
अग्रानीके भीमसेनो माद्रीपुत्रौ च दंशितौ ॥ ५-१५१-५४ (३७००२)
सौभद्रो द्रौपदेयाश्च धृष्टद्युम्नस्य पार्षतः ।
प्रभद्रकाश्च पञ्चाला भीमसेनमुखा ययुः ॥ ५-१५१-५५ (३७००३)
ततः शब्दः समभवत्सुमुद्रस्येव पर्वणि ।
हृष्टानां संप्रयातानां घोषो दिवमिवास्पृशम् ॥ ५-१५१-५६ (३७००४)
प्रहृष्टा दंशिता योधाः परानीकविदारणाः ।
तेषां मध्ये ययौ राजा कुन्तीपुत्रो युधिष्ठिरः ॥ ५-१५१-५७ (३७००५)
शकटापणवेशाश्च यानयुग्यं च सर्वशः ।
कोशं यन्त्रायुधं चैव ये च वैद्याश्चिकित्सकाः ॥ ५-१५१-५८ (३७००६)
फल्गु यच्चं बलं किंचिद्यच्चापि कृशदुर्बलम् ।
तत्सङ्गृह्य ययौ राजा ये चापि परिचारकाः ॥ ५-१५१-५९ (३७००७)
उपप्लाव्ये तु पाञ्चाली द्रौपदी सत्यवादिनी ।
सह स्त्रीभिर्निनवृते दासीदाससमावृता ॥ ५-१५१-६० (३७००८)
कृत्वा मूलप्रतीकारं गुल्मैः स्थावरजङ्गमैः ।
स्कन्धावारेण महता प्रययुः पाण्डुनन्दनाः ॥ ५-१५१-६१ (३७००९)
ददतो गां हिरण्यं च ब्राह्मणैरभिसंवृताः ।
स्तूयमाना ययू राजन्रथैर्मणिविभूषितैः ॥ ५-१५१-६२ (३७०१०)
केकया धृष्टकेतुश्च पुत्रः काश्यस्य चाभिभूः ।
श्रेणिमान्वसुदानश्च शिखण्डी चापराजितः ॥ ५-१५१-६३ (३७०११)
हृष्टास्तुष्टाः कवचिनः सशस्त्राः समलङ्कृताः ।
राजानमन्वयुः सर्वे परिवार्य युधिष्ठिरम् ॥ ५-१५१-६४ (३७०१२)
जघनार्धे विराटश्च याज्ञसेनिश्च सौमकिः ।
सुधर्मा कुन्तिभोजश्च धृष्टद्युम्नस्य चात्मजाः ॥ ५-१५१-६५ (३७०१३)
रथायुतानि चत्वारि हयाः पञ्चगुणास्तथा ।
पत्तिसैन्यं दशगुणं गजानामयुतानि षट् ॥ ५-१५१-६६ (३७०१४)
अनाधृष्टिश्चेकितानो धृष्टकेतुश्च सात्यकिः ।
परिवार्य ययुः सर्वे वासुदेवधनञ्जयौ ॥ ५-१५१-६७ (३७०१५)
आसाद्य तु कुरुक्षेत्रं व्यूढानीकाः प्रहारिणः ।
पाण्डवाः समदृश्यन्त नर्दन्तो वृषभा इव ॥ ५-१५१-६८ (३७०१६)

तेऽवगाह्य कुरुक्षेत्रं शङ्खान्दध्मुररिन्दमाः ।
तथैव दध्मतुः शङ्खं वासुदेवधनञ्जयौ ॥ ५-१५१-६९ (३७०१७)
पाञ्चजन्यस्य निर्घोषं विस्फूर्जितमिवाशनेः ।
निशम्य सर्वसैन्यानि समहृष्यन्त सर्वशः ॥ ५-१५१-७० (३७०१८)
शङ्खदुन्दुभिसंह्रष्टः सिंहनादस्तरस्विनाम् ।
पृथिवीं चान्तरिक्षं च सागरांश्चान्वनादयत् ॥ ॥ ५-१५१-७१ (३७०१९)

इति श्रीमन्महाभारते उद्योगपर्वणि सैन्यनिर्याणपर्वणि
एकपञ्चाशदधिकशततमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-१५१-९ संयुक्तः संबन्धी ॥
५-१५१-१२ कुलेन वंशेन । अभिजनेन स्वजनसमूहेन ॥
५-१५१-१७ अङ्गिरसो द्रोणस्य ॥
५-१५१-३८ शस्त्राणामधिवासनं गन्धाद्यैः पूजनम् ॥
५-१५१-४८ अस्माकं बलं कर्तृ ॥
५-१५१-५० योगो युद्धाय सज्जीभवनम् ॥
५-१५१-५८ शकटा अनांसि । आपणो वणिग्वीथ्युपलक्षितं विक्रेयद्रव्यम् ॥
५-१५१-६१ मूलप्रतीकारं धनदाररक्षाम् । गुल्मैः स्थावरैः
प्रकाररूपैः। जंगमैः परितः स्थानेस्थाने शूरसंघैः। स्कन्धावारेण
सैन्येन ॥
५-१५१-६५ जघनार्धे पश्चिमार्धे ॥
५-१५१-७० समहृष्यन्त रोमाञ्चितानि ॥

उद्योगपर्व - अध्याय १५२
॥ श्रीः ॥
५.१५२. अध्यायः १५२

Mahabharata - Udyoga Parva - Chapter Topics
युधिष्ठिरेण कुरुक्षेत्रे समुचितदेशे सेनानां निवेशनम् ॥ १ ॥
धृष्टद्युम्नादिभिः सर्वेषां पृथक्पृथक्षिबिरनिर्मापणम् ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१५२-० (३७०२०)
वैशम्पायन उवाच। ५-१५२-०क्ष् (३८३५)

ततो देशे समे स्निग्धे प्रभूतयवसेन्धने ।
निवेशयामास तदा सेनां राजा युधिष्ठिरः ॥ ५-१५२-१ (३७०२१)
परिहृत्य श्मशानानि देवतायतनानि च ।
आश्रमांश्च महर्षीणां तीर्थान्यायतनानि च ॥ ५-१५२-२ (३७०२२)
मधुरानूषरे देशे शुचौ पुण्ये महामतिः ।
निवेशं कारयामास कुन्तीपुत्रो युधिष्ठिरः ॥ ५-१५२-३ (३७०२३)
ततश्च पुनरुत्थाय सुखी विश्रान्तवाहनः ।
प्रययौ पृथिवीपालैर्वृतः शतसहस्रशः ॥ ५-१५२-४ (३७०२४)
विद्राव्य शतशो गुल्मान्धार्तराष्ट्रस्य सैनिकान् ।
पर्यक्रामत्समन्ताच्च पार्थेन सह केशवः ॥ ५-१५२-५ (३७०२५)
शिबिरं मापयामास धृष्टद्युम्नश्च पार्षतः ।
सात्यकिश्च रथोदारो युयुधानश्च वीर्यवान् ॥ ५-१५२-६ (३७०२६)
आसाद्य सरितं पुण्यां कुरुक्षेत्रे हिरण्वतीम् ।
सूपतीर्थां शुचिजलां शर्करापङ्कवर्जिताम् ॥ ५-१५२-७ (३७०२७)
खानयामास परिखां केशवस्त्रत्र भारत ।
गुप्त्यर्थमपि चादिश्य बलं तत्र न्यवेशयत् ॥ ५-१५२-८ (३७०२८)
विधिर्यः शिबिरस्यासीत्पाण्डवानां महात्मनाम् ।
तद्विधानि नरेन्द्राणां कारयामास केशवः ॥ ५-१५२-९ (३७०२९)
प्रभूततरकाष्ठानि दुराधर्षतराणि च ।
भक्ष्यभोज्यान्नपानानि शतशोऽथ सहस्रशः ॥ ५-१५२-१० (३७०३०)
शिबिराणि महार्हाणि राज्ञां तत्र पृथक्पृथक् ।
विमानानीव राजेन्द्र निविष्टानि महीतले ॥ ५-१५२-११ (३७०३१)
तत्रासञ्शिल्पिनः प्राज्ञाः शतशो दत्तवेतनाः ।
सर्वापकरणैर्युक्ता वैद्याः शास्त्रविशारदाः ॥ ५-१५२-१२ (३७०३२)
ज्याधनुर्वर्मशस्त्राणां तथैव मधुसर्पिषोः ।
ससर्जरकसपांसूनां राशयः पर्वतोपमाः ॥ ५-१५२-१३ (३७०३३)
बहूदकं सुयवसं तुषाङ्गारसमन्वितम् ।
शिबिरे शिबिरे राजा सञ्चकार युधिष्ठिरः ॥ ५-१५२-१४ (३७०३४)
महायन्त्राणि नाराचास्तोमराणि परश्वधाः ।
धनूंषि कवचादीनि ऋष्टयस्तूणसंयुताः ॥ ५-१५२-१५ (३७०३५)
गजाः कण्टकसन्नाहा लोहवर्मोत्तरच्छदाः ।
दृश्यन्ते तत्र गिर्याभाः सहस्रशतयोधिनः ॥ ५-१५२-१६ (३७०३६)
निविष्टान्पाण्डवांस्तत्र ज्ञात्वा मित्राणि भारत ।
अभिसस्रुर्यथादेशं सबलाः सहवाहनाः ॥ ५-१५२-१७ (३७०३७)
चरितब्रह्मचर्यास्ते सोमपा भूरिदक्षिणाः ।
जयाय पाण्डुपुत्राणां समाजग्मुर्महीक्षितः ॥ ॥ ५-१५२-१८ (३७०३८)

इति श्रीमन्महाभारते उद्योगपर्वणि सैन्यनिर्याणपर्वणि
द्विपञ्चशदधिकशततमोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-१५२-५ गुल्मान् सैनिकसङ्घान् ॥
५-१५२-७ सूपतीर्थां शोभनोपकण्ठाम् ॥
५-१५२-९ तद्विधानि शिबिराणि ॥
५-१५२-१६ कण्टकसन्नाहाः येषां स्पर्शमात्रादपि गजान्तराणां
कण्टकवेधो भवति तादृशाः सन्नाहाः कवचानि । कण्टकैः कवचैः
सन्नहनं येषामिति प्राञ्चः ॥
५-१५२-१९ अभिसस्रुरभ्याजग्मुः ॥

उद्योगपर्व - अध्याय १५३
॥ श्रीः ॥
५.१५३. अध्यायः १५३

Mahabharata - Udyoga Parva - Chapter Topics
कर्णादीन्प्रति दुर्योधनेन सांग्रामिकसामग्रीसंपादनचोदनम् ॥ १ ॥
तच्चोदनया राज्ञां सेनाभिः सह कुरुक्षेत्रप्रस्थानम् ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

जनमेजय उवाच ।
युधिष्ठिरं सहानीकमुपायान्तं युयुत्सया ।
सन्निविष्टं कुरुक्षेत्रे वासुदेवेन पालितम् ॥ ५-१५३-१ (३७०३९)
विराटद्रुपदाभ्यां च सपुत्राभ्यां समन्वितम् ।
केकयैर्वृष्णिभिश्चैव पार्थिवैः शतशो वृतम् ॥ ५-१५३-२ (३७०४०)
महेन्द्रमिव चादित्यैरभिगुप्तं महारथैः ।
श्रुत्वा दुर्योधनो राजा किं कार्यं प्रत्यपद्यत ॥ ५-१५३-३ (३७०४१)
एतदिच्छाम्यहं श्रोतुं विस्तरेण महामते ।
संभ्रमे तुमुले तस्मिन्यदासीत्कुरुजाङ्गले ॥ ५-१५३-४ (३७०४२)
व्यथयेयुरिमे देवान्सेन्द्रानपि समागमे ।
पाण्डवा वासुदेवश्च विराटद्रुपदौ तथा ॥ ५-१५३-५ (३७०४३)
धृष्टद्युम्नश्च पाञ्चाल्यः शिखण्डी च महारथः ।
युधामन्युश्च विक्रान्तो देवैरपि दुरासदः ॥ ५-१५३-६ (३७०४४)
एतदिच्छाम्यहं श्रोतुं विस्तरेण तपोधन ।

कुरूणां पाण्डवानां च यद्यदासीद्विचेष्टितम् ॥ ५-१५३-७ (३७०४५)
वैशम्पायन उवाच। ५-१५३-८क्ष् (३८३६)
प्रतियाते तु दाशार्हे राजा दुर्योधनस्तदा ।
कर्णं दुःशासनं चैव शकुनिं चाब्रवीदिदम् ॥ ५-१५३-८ (३७०४६)
अकृतेनैव कार्येण गतः पार्थानधोक्षजः ।
स एनान्मन्युनाविष्टो ध्रुवं धक्ष्यत्यसंशयम् ॥ ५-१५३-९ (३७०४७)
इष्टो हि वासुदेवस्य पाण्डवैर्मम विग्रहः ।
भीमसेनार्जुनौ चैव दाशार्हस्य मते स्थितौ ॥ ५-१५३-१० (३७०४८)
अजातशत्रुरत्यर्थं भीमसेनवशानुगः ।
निकृतश्च मया पूर्वं सह सर्वैः सहोदरैः ॥ ५-१५३-११ (३७०४९)
विराटद्रुपदौ चैव कृतवैरौ मया सह ।
तौ च सेनाप्रणेतारौ वासुदेववशानुगौ ॥ ५-१५३-१२ (३७०५०)
भविता विग्रहः सोयं तुमुलो लोमहर्षणः ।
तस्मात्साङ्ग्रामिकं सर्वं कारयध्वमतन्द्रिताः ॥ ५-१५३-१३ (३७०५१)
शिबिराणि कुरुक्षेत्रे क्रियन्तां वसुधाधिपाः ।
स्वपर्याप्तावकाशानि दुरादेयानि शत्रुभिः ॥ ५-१५३-१४ (३७०५२)
आसन्नजलकोष्ठानि शतशोथ सहस्रशः ।
अच्छेद्याहारमार्गाणि बन्धोच्छ्रयचितानि च । ५-१५३-१५ (३७०५३)
विविधायुधपूर्णानि पताकाध्वजवन्ति च ।
समाश्च तेषां पन्थानः क्रियन्तां नगराद्बहिः ॥ ५-१५३-१६ (३७०५४)
प्रयाणं घुष्यतामद्य श्वोभूत इति माचिरम् । ५-१५३-१७ (३७०५५)
वैशम्पायन उवाच ।
ते तथेति प्रतिज्ञाय श्वोभूते चक्रिरे तथा ॥ ५-१५३-१७क्ष् (३८३७)
हृष्टरूपा महात्मानो निवासाय महीक्षिताम् ।
ततस्ते पार्थिवाः सर्वे तच्छ्रुत्वा राजशासनम् ॥ ५-१५३-१८ (३७०५६)
आसनेभ्यो महार्हेभ्य उदतिष्ठन्नमर्षिताः ।
बाहून्परिघसङ्काशान्संस्पृशन्तः शनैः शनैः ॥ ५-१५३-१९ (३७०५७)
काञ्चनाङ्गददीप्तांश्च चन्दनागरुभूषितान् ।
उष्णीषाणि नियच्छन्तः पुण्डरीकनिभै करैः ।
अन्तरीयोत्तरीयाणि भूषणानि च सर्वशः ॥ ५-१५३-२० (३७०५८)
ते रथान्रथिनः श्रेष्ठा हयांश्च हयकोविदाः ।
सज्जयन्ति स्म नागांश्च नागशिक्षास्वनुष्ठिताः ॥ ५-१५३-२१ (३७०५९)
अथ वर्माणि चित्राणि काञ्चनानि बहूनि च ।
विविधानि च शस्त्राणि चक्रुः सर्वाणि सर्वशः ॥ ५-१५३-२२ (३७०६०)
पदातयश्च पुरुषाः शस्त्राणि विविधानि च ।
उपाजह्रुः शरीरेषु हेमचित्राण्यनेकशः ॥ ५-१५३-२३ (३७०६१)

तदुत्सव इवोदग्रं संप्रहृष्टनरावृतम् ।
नगरं धार्तराष्ट्रस्य भारतासीत्समाकुलम् ॥ ५-१५३-२४ (३७०६२)
जनौघसलिलावर्तो रथनागाश्वमीनवान् ।
शङ्खदुन्दुभिनिर्घोषः कोशसञ्चयरत्नवान् ॥ ५-१५३-२५ (३७०६३)
चित्राभरणवर्मोर्मिः शस्त्रनिर्मलफेनवान् ।
प्रासादमालाद्रिवृतो रथ्यापणमहाह्रदः ॥ ५-१५३-२६ (३७०६४)
योधचन्द्रोदयोद्भूतः कुरुराजमहार्णवः ।
व्यदृश्यत तदा राजंश्चन्द्रोदय इवोदधिः ॥ ॥ ५-१५३-२७ (३७०६५)

इति श्रीमन्महाभारते उद्योगपर्वणि सैन्यनिर्याणपर्वणि
त्रिपञ्चाशदधिकशततमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-१५३-१५ आसन्नजला कोष्ठाः कक्ष्या येषु तानि तथा । अच्छेद्यः
शत्रुभिरनिर्वार्य आहार आहरणं वस्तूनां मार्गाश्च येषु तानि
अच्छेद्याहारमार्गाणि ॥
५-१५३-२० अन्तरीयं परिधानीयम् । उत्तरीयं प्रावरणवस्त्रम् ॥

उद्योगपर्व - अध्याय १५४
॥ श्रीः ॥
५.१५४. अध्यायः १५४

Mahabharata - Udyoga Parva - Chapter Topics
गुरुवधभयात् कर्तव्यमौढ्यमुपगतेन युधिष्ठिरेण
कर्तव्यनिर्धारणप्रार्थना ॥ १ ॥
कृष्णेन युद्धकरणनिर्धारणम् ॥ २ ॥
पुनर्युधिष्ठिरस्य शङ्कायां अर्जुनेन कुन्तीविदुरवचनानुस्मारणेन
तत्परिहरणम् ॥ ३ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१५४-० (३७०६६)
वैशम्पायन उवाच। ५-१५४-०क्ष् (३८३८)
वासुदेवस्य तद्वाक्यमनुस्मृत्य युधिष्ठिरः ।
पुनः पप्रच्छ वार्ष्णेयं कथं मन्दोऽब्रवीदिदम् ॥ ५-१५४-१ (३७०६७)
अस्मिन्नभ्यागते काले किंच नः क्षममच्युत ।
कथं च वर्तमाना वै स्वधर्मान्न च्यवेमहि ॥ ५-१५४-२ (३७०६८)

दुर्योधनस्य कर्णस्य शकुनेः सौबलस्य च ।
वासुदेव मतज्ञोऽसि मम सभ्रातृकस्य च ॥ ५-१५४-३ (३७०६९)
विदुरस्यापि तद्वाक्यं श्रुतं भीष्मस्य चोभयोः ।
कुन्त्याश्च विपुलप्रज्ञ प्रज्ञा कात्स्न्र्येन ते श्रुता ॥ ५-१५४-४ (३७०७०)
सर्वमेतदतिक्रम्य विचार्य च पुनः पुनः ।
क्षमं यन्नो महाबाहो तद्ब्रवीह्यविचारयन् ॥ ५-१५४-५ (३७०७१)
श्रुत्वैतद्धर्मराजस्य धर्मार्थसहितं वचः ।
मेघदुन्दुभिनिर्घोषः कृष्णो वाक्यमथाब्रवीत् ॥ ५-१५४-६ (३७०७२)
उक्तवानस्मि यद्वाक्यं धर्मार्थसहितं हितम् ।
न तु तन्निकृतिप्रज्ञे कौरव्ये प्रतितिष्ठति ॥ ५-१५४-७ (३७०७३)
न च भीष्मस्य दुर्मेधाः शृणोति विदुरस्य वा ।
मम वा भाषितं किंचित्सर्वमेवातिवर्तते ॥ ५-१५४-८ (३७०७४)
नैष कामयते धर्मं नैष कामयते यशः ।
जितं स मन्यते सर्वं दुरात्मा कर्णमाश्रितः ॥ ५-१५४-९ (३७०७५)
बन्धमाज्ञापयामास मम चापि सुयोधनः ।
न च तं लब्धवान्कामं दुरात्मा पापनिश्चयः ॥ ५-१५४-१० (३७०७६)
न च भीष्मो न च द्रोणो युक्तं तत्राहतुर्वचः ।
सर्वे तमनुवर्तन्ते ऋते विदुरमुच्युत ॥ ५-१५४-११ (३७०७७)
शकुनिः सौबलश्चैव कर्णदुःशासनावपि ।
त्वय्ययुक्तान्यभाषन्त मूढा मूढममर्षणम् ॥ ५-१५४-१२ (३७०७८)
किंच तेन मयोक्तेन यान्यभाषत कौरवः ।
संक्षेपेण दुरात्मासौ न युक्तं त्वयि वर्तते ॥ ५-१५४-१३ (३७०७९)
पार्थिवेषु न सर्वेषु य इमे तव सैनिकाः ।
यत्पापं यन्न कल्याणं सर्वं तस्मिन्प्रतिष्ठितम् ॥ ५-१५४-१४ (३७०८०)
न चापि वयमत्यर्थं परित्यागेन कर्हिचित् ।
कौरवैः शममिच्छामस्तत्र युद्धमनन्तरम् ॥ ५-१५४-१५ (३७०८१)
वैशम्पायन उवाच। ५-१५४-१६क्ष (३८३९)
तच्छ्रुत्वा पार्थिवाः सर्वे वासुदेवस्य भाषितम् ।
अब्रुवन्तो मुखं राज्ञः समुदैक्षन्त भारत ॥ ५-१५४-१६ (३७०८२)
युधिष्ठिरस्त्वभिप्रायमभिलक्ष्य महीक्षिताम् ।
योगमाज्ञापयामास भीमार्जुनयमैः सह ॥ ५-१५४-१७ (३७०८३)
ततः किलकिलाभूतमनीकं पाण्डवस्य ह ।
आज्ञापिते तदा योगे समहृष्यन्त सैनिकाः ॥ ५-१५४-१८ (३७०८४)
अवध्यानां वधं पश्यन्धर्मराजो युधिष्ठिरः ।
निश्वसन्भीमसेनं च विजयं चेदमब्रवीत् ॥ ५-१५४-१९ (३७०८५)
यदर्थं वनवासश्च प्राप्तं दुःखं च यन्मया ।

सोयमस्मानुपैत्येव परोऽनर्थः प्रयत्नतः ॥ ५-१५४-२० (३७०८६)
यस्मिन्यत्नः कृतोऽस्माभिः स नो हीनः प्रयत्नतः ।
अकृते तु प्रयत्नेऽस्मानुपावृत्तः कलिर्महान् ॥ ५-१५४-२१ (३७०८७)
कथं ह्यवध्यैः सङ्ग्रामः कार्यः सह भविष्यति ।
कथं हत्वा गुरून्वृद्धान्विजयो नो भविष्यति ॥ ५-१५४-२२ (३७०८८)
वैशम्पायन उवाच। ५-१५४-२३क्ष् (३८४०)
तच्छ्रुत्वा धर्मराजस्य सव्यसाची परन्तपः ।
यदुक्तं वासुदेवेन श्रावयामास तद्वचः ॥ ५-१५४-२३ (३७०८९)
उक्तवान्देवकीपुत्रः कुन्त्याश्च विदुरस्य च ।
वचनं तत्त्वया राजन्निखिलेनावधारितम् ॥ ५-१५४-२४ (३७०९०)
न च तौ वक्ष्यतोऽधर्ममिति मे नैष्ठिकी मतिः ।
नापि युक्तं च कौन्तेय निवर्तितुमयुध्यतः ॥ ५-१५४-२५ (३७०९१)
तच्छ्रुत्वा वासुदेवोऽपि सव्यसाचिवचस्तदा ।
स्मयमानोऽब्रवीद्वाक्यं पार्थमेवमिति ब्रुवन् ॥ ५-१५४-२६ (३७०९२)
ततस्ते धृतसंकल्पा युद्धाय सह सैनिकाः ।
पाण्डवेया महाराज तां रात्रिं सुखमावसन् ॥ ॥ ५-१५४-२७ (३७०९३)

इति श्रीमन्महाभारते उद्योगपर्वणि सैन्यनिर्याणपर्वणि
चतुःपञ्चशदधिकशततमोऽध्यायाः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-१५४-१३ युक्तं सम्यक् ॥
५-१५४-१४ न कल्याणं अकल्याणं पापं अकल्याणं च त्वदीयेष्वविद्यमानं
सर्वं तस्मिन् दुर्योधने प्रतिष्ठितम् ॥
५-१५४-१५ परित्यागेन राज्यस्योपेक्षया शमं नेच्छामः ॥
५-१५४-१७ योगं युद्धोद्योगम् ॥
५-१५४-२० यदर्थं यन्निवृत्त्यर्थम् । अनर्थः
कुलक्षयः। प्रयत्नतो बलात् ॥
५-१५४-२५ अयुध्यतस्तव निवर्तितुमपि न युक्तम् ॥

उद्योगपर्व - अध्याय १५५
॥ श्रीः ॥
५.१५५. अध्यायः १५५

Mahabharata - Udyoga Parva - Chapter Topics
दुर्योधनेन स्वसेनानां अग्र्यमध्यमपाश्चात्यभेदेन त्रेधा विभजनम् ॥ १ ॥
तासां सांग्रामिकोपकरणसमृद्धिवर्णनम् ॥ २ ॥

दुर्योधनेन कृपादीनामेकादशानां
पृथक्पृथगक्षौहिण्यधिपतित्वेऽभिषेचनम् ॥ ३ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१५५-० (३७०९४)
वैशम्पायन उवाच। ५-१५५-०क्ष् (३८४१)
व्युष्टायां वै रजन्यां हि राजा दुर्योधनस्ततः ।
व्यभजत्तान्यनिकानि दश चैकं च भारत ॥ ५-१५५-१ (३७०९५)
नरहस्तिरथाश्वानां सारं मध्यं च फल्गु च ।
सर्वेष्वेतेष्वनीकेषु सन्दिदेश नराधिपः ॥ ५-१५५-२ (३७०९६)
सानुकर्षाः सतूणीराः सवरूथाः सतोमराः ।
सोपासङ्गाः सशक्तीकाः सनिषङ्गाः सहर्ष्टयः । ५-१५५-३ (३७०९७)
सध्वजाः सपताकाश्च सशरासनतोमराः ।
रज्जुभिश्च विचित्राभिः सपाशाः सपरिच्छदाः ॥ ५-१५५-४ (३७०९८)
सकचग्रहविक्षेपाः सतैलगुडवालुकाः ।
साशीविषघटाः सर्वे ससर्जरसपांसवः ॥ ५-१५५-५ (३७०९९)
सघण्टफलकाः सर्वे सायोगुडजलोपलाः ॥
सशालभिन्दिपालाश्च समधूच्छिष्टमुद्गराः ॥ ५-१५५-६ (३७१००)
सकाण्डदण्डकाः सर्वे ससीरविषतोमराः ।
सशूर्पपिटकाः सर्वे सदात्राङ्कुशतोमराः ॥ ५-१५५-७ (३७१०१)
सकीलकवचाः सर्वे वाशीवृक्षादनान्विताः ।
व्याघ्रचर्मपरीवारा द्वीपिचर्मावृताश्च ते ॥ ५-१५५-८ (३७१०२)
सहर्ष्टयः सश्रृङ्गाश्च सप्रासविविधायुधाः ।
सकुठाराः सकुद्दालाः सतैलक्षौमसर्पिषः ॥ ५-१५५-९ (३७१०३)
रुक्मजालप्रतिच्छन्ना नानामणिविभूषिताः ।
चित्रानीकाः सुवपुषो ज्वलिता इव पावकाः ॥ ५-१५५-१० (३७१०४)
तथा कवचिनः शूराः शस्त्रेषु कृतनिश्चयाः ।
कुलीना हययोनिज्ञाः सारथ्ये विनिवेशिताः ॥ ५-१५५-११ (३७१०५)
बद्धारिष्टा बद्धकक्षा बद्धध्वजपताकिनः ।
बद्धाभरणनिर्यूहा बद्धचर्मासिपट्टिशाः ॥ ५-१५५-१२ (३७१०६)
चतुर्युजो रथाः सर्वे सर्वे चोत्तमवाजिनः ।
सप्रासऋष्टिकाः सर्वे सर्वे शतशरासनाः ॥ ५-१५५-१३ (३७१०७)
धुर्ययोर्हकययोरेकस्तथान्यौ पर्ष्णिसारथी ।
तौ चापि रथिनां श्रेष्ठौ रथी च हयवित्तथा ॥ ५-१५५-१४ (३७१०८)
नगराणीव गुप्तानि दुराधर्षाणि शत्रुभिः ।

आसन्रथसहस्राणि हेममालीनि सर्वशः ॥ ५-१५५-१५ (३७१०९)
यथा रथास्तथा नागा बद्धकक्षाः स्वलङ्कृताः ।
बभूवुः सप्तपुरुषा रत्नवन्त इवाद्रयः ॥ ५-१५५-१६ (३७११०)
द्वावङ्कुशधरौ तत्र द्वावुत्तमधनुर्धरौ ।
द्वौ वरासिधरौ राजन्नेकः शक्तिपिनाकधृत् ॥ ५-१५५-१७ (३७१११)
गजैर्मत्तैः समाकीर्णं सर्वमायुधकोशकैः ।
तद्बभूव बलं राजन्कौरव्यस्य महात्मनः ॥ ५-१५५-१८ (३७११२)
आमुक्तकवचैर्युक्तैः सपताकैः स्वलङ्कृतैः ।
सादिभिश्चोपपन्नास्तु तथा चायुतशो हयाः ॥ ५-१५५-१९ (३७११३)
असङ्ग्राहाः सुसंपन्ना हेमभाण्डपरिच्छदाः ।
अनेकशतसाहस्राः सर्वे सादिवशे स्थिताः ॥ ५-१५५-२० (३७११४)
नानारूपविकाराश्च नानाकवचशस्त्रिणः ।
पदातिनो नरास्तत्र बभूवुर्हेममालिनः ॥ ५-१५५-२१ (३७११५)
रथस्यासन्दश गजा गजस्य दश वाजिनः ।
नरा दश हयस्यासन्पादरक्षाः समन्ततः ॥ ५-१५५-२२ (३७११६)
रथस्य नागाः पञ्चाशन्नागस्यासञ्शतं हयाः ।
हयस्य पुरुषाः सप्त भिन्नसन्धानकारिणः ॥ ५-१५५-२३ (३७११७)
सेना पञ्चशतं नागा रथास्तावन्त एव च ।
दशसेना च पृतना पृतना दश वाहिनी ॥ ५-१५५-२४ (३७११८)
सेना च वाहिनी चैव पृतना ध्वजिनी चमूः ।
अक्षौहिणीति पर्यायैर्निरुक्ता च वरूथिनी ॥ ५-१५५-२५ (३७११९)
एवं व्यूढान्यनीकानि कौरवेयेण धीमता ।
अक्षौहिण्यो दशैका च सङ्ख्याताः सप्त चैव ह ॥ ५-१५५-२६ (३७१२०)
अक्षौहिण्यस्तु सप्तैव पाण्डवानामभूद्बलम् ।
अक्षौहिण्यो दशैका च कौरवाणामभूद्बलम् ॥ ५-१५५-२७ (३७१२१)
नराणां पञ्चपञ्चाशदेषा पत्तिर्विधीयते ।
सेनामुखं च तिस्रस्ता गुल्म इत्यभिशब्दितम् ॥ ५-१५५-२८ (३७१२२)
त्रयो गुल्मा गणस्त्वासीद्गणास्त्वयुतशोऽभवन् ।
दुर्योधनस्य सेनासु योत्स्यमानाः प्रहारिणः ॥ ५-१५५-२९ (३७१२३)
तत्र दुर्योधनो राजा शूरान्बुद्धिमतो नरान् ।
प्रसमीक्ष्य महाबाहुश्चक्रे सेनापतींस्तदा । ५-१५५-३० (३७१२४)
पृथगक्षौहिणीनां च प्रणेतॄन्नरसत्तमान् ।
विधिवत्पूर्वमानीय पार्थिवानभ्यषेचयत् ॥ ५-१५५-३१ (३७१२५)
कृपं द्रोणं च शल्यं च सैन्धवं च जयद्रथम् ।
सुदक्षिणं च काम्भोजं कृतवर्माणमेव च ॥ ५-१५५-३२ (३७१२६)
द्रोणपुत्रं च कर्णं च भूरिश्रवसमेव च ।

शकुनिं सौबलं चैव बाह्लीकं च महाबलम् ॥ ५-१५५-३३ (३७१२७)
दिवसे दिवसे तेषां प्रतिवेलं च भारत ।
चक्रे स विविधाः पूजाः प्रत्यक्षं च पुनः पुनः ॥ ५-१५५-३४ (३७१२८)
तथा विनियताः सर्वे ये च तेषां पदानुगाः ।
बभूवुः सैनिका राज्ञां प्रियं राज्ञश्चिकीर्षवः ॥ ॥ ५-१५५-३५ (३७१२९)

इति श्रीमन्महाभारते उद्योगपर्वणि सैन्यनिर्याणपर्वणि
पञ्चपञ्चाशदधिकशततमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-१५५-१ व्युष्टायां व्यतीतायाम् ॥
५-१५५-२ सारं पुरोगामि । मध्यं मध्यमम्। फल्गु पाश्चात्त्यम् ॥
५-१५५-३ अनुकर्षः युद्धविमर्दयस्यकस्यचिद्रथावयवस्य
नष्टस्य प्रतिसमाधानार्थं यद्रथस्याधोदारुबध्यते तत् । अनुकर्षो
रथाधःस्थदारुणीति भेदिनी । तूणीरो रथवाह्यो बाणकोशः । महान्
निषङ्ग इति यावत्। उपासङ्गाः हयगजवाह्यास्तूणाः । निषङ्गः
पत्तिवाह्यः स एव ॥
५-१५५-५ कचग्रहविक्षेपः कचेषु गृहीत्वा येन शत्रुर्विक्षिप्यते
तादृशः । तैलादयः प्रपप्ताः शत्रूणामुपरि क्षिप्यन्ते
। साशीविषघटाः ससर्पाः कुम्भाः । सर्जरसो रालद्रव्यमग्न्युद्दीपकम्
॥
५-१५५-६ सघण्टानि फलकानि शस्त्राग्राणि येषां ते सघण्टफलकाः
। अयंसि खड्गपट्टिशच्चुरिकादीनि। गुडजलं तप्तम्। उपला
यन्त्रक्षेप्या गोलाः। शालते कत्थते शब्दं करोतीति शालः स चासौ
भिन्दिपालो गोफलकः। मधूच्छिष्टं मयनं तदपि द्रवीकृत्य
गुडजलवत्प्रक्षेप्यम्। मुद्गरः मुशलतुल्यो दण्डः ॥
५-१५५-७ काण्डं बाणफलकं तद्युक्तो दण्डः काण्डदण्डः
इतियावत् । सीरं लाङ्गलम् । विषं प्रसिद्धं तेन युक्तास्तोमरा
विषतोमराः। शूर्पाणि तप्तगुडादिप्रक्षेपार्थानि। पिटकास्तदाश्रया
मञ्जूषाः अस्त्ररोधनार्था वा। दात्रां परशुप्रभृति । अङ्कुशतोमराः
बदरीकण्टकतुल्यलोहकण्टकोपेतास्तोमराः ॥
५-१५५-८ कीलकवचवान् हि परेण मुष्टियुद्धे जेतुमशक्यः
। वाशी काष्ठप्रच्छन्नं शस्त्रम्। वृक्षादनाः
लोहकण्टककीलादीन्युपकरणानि। व्याघ्रचर्मणा द्वीपी
चित्रव्याघ्रस्तच्चर्मणा च परिवृता रथा एव ॥
५-१५५-९ तैलक्षौमानि तैलाक्तवस्त्रविशेषा येषां भस्म

प्रहारस्थले दीयते । सर्पिश्च पुरातनं तदर्थमेव ॥
५-१५५-१० चित्रानीकाः चित्राणि सैन्यानि ॥
५-१५५-११ विनिवेशेता येषु रथेष्विति शेषः ॥
५-१५५-१२ बद्धानि अरिष्टानि अशुभहराणि यन्त्रौषधादीनि येषु
ते बद्धारिष्टाः । बद्धकक्षाः बद्धाः कक्षाः स्पर्धापदानि
तुरगादिशिरसि घण्टामालामौक्तिकगुच्छादीनि। बद्धानि बिरुदानि
येषु। बद्धानि आभरणानि क्षुद्रघण्टिकादीनि निर्यूहाः शिखराणि च
येषु ॥
५-१५५-१४ चतुर्युज इत्येतद्व्याचष्टे धुर्ययोरिति । धुर्ययोः
धूःसन्निहितयोः। पार्ष्णिस्पारथी चक्ररक्षौ ॥
५-१५५-१७ पिनाकः त्रिशूलम् ॥
५-१५५-२० संग्राहः हेषणपूर्वकमग्रादाभ्यामुत्प्लवनं तद्रहिताः
। यतः सुसंपन्नाः सम्यकशिक्षिताः ॥
५-१५५-२२ एकस्य रथस्य यथोक्तविभागेन दश गजाः शतं अश्वाः
सहस्रं पदातयश्च परिवार इत्यर्थः ॥
५-१५५-२३ पक्षान्तरमाह रथस्येति । एकस्य रथस्य पञ्चाशद्गदा
पञ्चसहस्रं अश्वाः पञ्चत्रिंशत्सहस्रं पदातयः परिवार
इत्यर्थः ॥
५-१५५-२४ पृतनायां तु पञ्चसहस्रं नागास्तावन्तो रथाः
पञ्चविंशतिसहस्रं नराः पञ्चदशसहस्रं अश्वाः । वाहिन्यां
पञ्चाशत्सहस्रं नागास्तावन्तो रथाः सार्धलक्षद्वयं
नराः। सार्धलक्षं अश्वा इति ज्ञेयम् ॥

उद्योगपर्व - अध्याय १५६
॥ श्रीः ॥
५.१५६. अध्यायः १५६

Mahabharata - Udyoga Parva - Chapter Topics
दुर्योधनेन भीष्मंप्रति सैनापत्यस्वीकारप्रार्थना ॥ १ ॥
भीष्मेण समयप्रतिज्ञाकरणपूर्वकं सैनापत्याङ्गीकारः ॥ २ ॥
दुर्योधनेन भीष्मस्य सैनापत्येऽभिषेचनपूर्वकं सेनाभिः सह
कुरुक्षेत्रगमनम् ॥ ३ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१५६-० (३७१३०)

वैशम्पायन उवाच। ५-१५६-०क्ष् (३८४२)
ततः शान्तनवं भीष्मं प्राञ्जलिर्धृतराष्ट्रजः ।
सह सर्वैर्महीपालैरिदं वचनमब्रवीत् ॥ ५-१५६-१ (३७१३१)
ऋते सेनाप्रणेतारं पृतना सुमहत्यपि ।
दीर्यते युद्धमासाद्य पिपीलिकपुटं यथा ॥ ५-१५६-२ (३७१३२)
नहि जातु द्वयोर्बुद्धिः समा भवति कर्हिचित् ।
शौर्यं च वलनेतॄणां स्पर्धते च परस्परम् ॥ ५-१५६-३ (३७१३३)
श्रूयते च महाप्राज्ञ हैहयानमितौजसः ।
अभ्ययुर्ब्राह्मणाः सर्वे समुच्छ्रितकुशध्वजाः ॥ ५-१५६-४ (३७१३४)
तानभ्ययुस्तदा वैश्याः शूद्राश्चैव पितामह ।
एकतस्तु त्रयो वर्णा एकतः क्षत्रियर्षभाः ॥ ५-१५६-५ (३७१३५)
ते स्म युद्धे प्रभज्यन्ते त्रयो वर्णाः पुनः पुनः ।
क्षत्रियाश्च जयन्त्येव बहुलं चैकतो बलम् ॥ ५-१५६-६ (३७१३६)
ततस्ते क्षत्रियानेव पप्रच्छुर्द्विजसत्तमाः ।
तेभ्यः शशंसुर्धर्मज्ञा याथातथ्यं पितामह ॥ ५-१५६-७ (३७१३७)
वयमेकस्य शृणुमो महाबुद्धिमतो रणे ।
भवन्तस्तु पृथक्सर्वे स्वबुद्धिवशवर्तिनः ॥ ५-१५६-८ (३७१३८)
ततस्ते ब्राह्मणाश्चक्रुरेकं सेनापतिं द्विजम् ।
नये सुकुशलं शूरमजयन्क्षत्रियांस्ततः ॥ ५-१५६-९ (३७१३९)
एवं ये कुशलं शूरं हितेप्सितमकल्पषम् ।
सेनापतिं प्रकुर्वन्ति ते जयन्ति रणे रिपून् ॥ ५-१५६-१० (३७१४०)
भवानुशनसा तुल्यो हितैषी च सदा मम ।
असंहार्यः स्थितो धर्मे स नः सेनापतिर्भव ॥ ५-१५६-११ (३७१४१)
रश्मीवतामिवादित्यो वीरुधामिव चन्द्रमाः ।
कुबेर इव यक्षाणां देवानामिव वासवः ॥ ५-१५६-१२ (३७१४२)
पर्वतानां यथा मेरुः सुपर्णः पक्षिणां यथा ।
कुमार इव देवानां वसूनामिव हव्यवाट् ॥ ५-१५६-१३ (३७१४३)
भवता हि वयं गुप्ताः शत्रेणेव दिवौकसः ।
अनाधृष्या भविष्यामस्त्रिदशानामपि ध्रुवम् ॥ ५-१५६-१४ (३७१४४)
प्रयातु नो भवानग्रे देवानामिव पावकिः ।
वयं त्वामनुयास्यामः सौरभेया इवर्षभम् ॥ ५-१५६-१५ (३७१४५)
भीष्म उवाच । अ६-१५६-१६क्ष् (३८४३)
एवमेतन्महाबाहो यथा वदसि भारत ।
यथैव हि भवन्तो मे तथैव मम पाण्डवाः ॥ ५-१५६-१६ (३७१४६)
अपि चैव मया श्रोयो वाच्यं तेषां नराधिप ।
संयोद्धव्यं तवार्थाय यथा मे समयः कृतः ॥ ५-१५६-१७ (३७१४७)

न तु पश्यामि योद्धारमात्मनः सदृशं भुवि ।
ऋते तस्मान्नरव्याघ्रात्कुन्तीपुत्राद्धनञ्जयात् ॥ ५-१५६-१८ (३७१४८)
स हि वेद महाबुद्धिर्दिव्यान्यस्त्राण्यनेकशः ।
न तु मां विवृतो युद्धे जातु युध्येत पाण्डवः ॥ ५-१५६-१९ (३७१४९)
अहं स च क्षणेनैव निर्मनुष्यमिदं जगत् ।
कुर्यावास्त्रबलेनैव ससुरासुरराक्षसम् ॥ ५-१५६-२० (३७१५०)
न त्वेवोत्सादनीया मे पाण्डोः पुत्रा जनाधिप ।
तस्माद्योधान्हनिष्यामि प्रयोगेणायुतं सदा ॥ ५-१५६-२१ (३७१५१)
एवमेषां फरिष्यामि निधनं कुरुनन्दन ।
न चेत्ते मां हनिष्यन्ति पूर्वमेव समागमे ॥ ५-१५६-२२ (३७१५२)
सेनापतिस्त्वहं राजन्समयेनापरेण ते ।
भविष्यामि यथाकामं तन्मे श्रोतुमिहार्हसि ॥ ५-१५६-२३ (३७१५३)
कर्णो वा युध्यतां पूर्वमहं वा पृथिवीपते ।
स्पर्धते हि सदात्यर्थं सूतपुत्रो मया रणे ॥ ५-१५६-२४ (३७१५४)
कर्ण उवाच। ५-१५६-२५क्ष् (३८४४)
नाहं जीवति गाङ्गेये राजन्योत्स्ये कथंचन ।
हते भीष्मे तु योत्स्यामि सह गाण्डीवधन्वना ॥ ५-१५६-२५ (३७१५५)
वैशम्पायन उवाच। ५-१५६-२६क्ष् (३८४५)
ततः सेनापतिं चक्रे विधिवद्भूरिदक्षिणम् ।
धृतराष्ट्रात्मजो भीष्मं सोऽभिषिक्तो व्यरोचत ॥ ५-१५६-२६ (३७१५६)
ततो भेरीश्च शङ्खांश्च शतशोऽथ सहस्रशः ।
वादयामासुव्यग्रा वादका राजशासनात् ॥ ५-१५६-२७ (३७१५७)
सिंहनादाश्च विविधा वाहनानां च निःस्वनाः ॥ ५-१५६-२८ (३७१५८)
निर्घाताः पृथिवीकम्पा गजबृंहितनिःस्वनाः ।
आसंश्च सर्वयोधानां पातयन्तो मनांस्युत ॥ ५-१५६-२९ (३७१५९)
वाचश्चाप्यशरीरिण्यो दिवश्चोल्काः प्रपेदिरे ।
शिवाश्च भयवेदिन्यो नेदुर्दीप्ततरा भृशम् ॥ ५-१५६-३० (३७१६०)
सैनापत्ये यदा राजा गाङ्गेयमभिषिक्तवान् ।
तदैतान्युग्ररूपाणि बभूवुः शतशो नृप ॥ ५-१५६-३१ (३७१६१)
ततः सेनापतिं कृत्वा भीष्मं परबलार्दनम् ।
वाचयित्वा द्विजश्रेष्ठान्गोभिर्निष्कैश्च भूरिशः ॥ ५-१५६-३२ (३७१६२)
वर्धमानो जयाशीर्भिर्निर्ययौ सैनिकैर्वृतः ।
आपगेयं पुरस्कृत्य भ्रातृभिः सहितस्तदा ॥ ५-१५६-३३ (३७१६३)
स्कन्धावारेण महता कुरुक्षेत्रं जगाम ह ॥ ५-१५६-३४ (३७१६४)
परिक्रम्य कुरुक्षेत्रं कर्णेन सह कौरवः ।
शिबिरं मापयामास समे देशे जनाधिप ॥ ५-१५६-३५ (३७१६५)

मधुरानूषरे देशे प्रभूतयवसेन्धने ।
यथैव हास्तिनपुरं तद्वच्छिबिरमाबभौ ॥ ॥ ५-१५६-३६ (३७१६६)

इति श्रीमन्महाभारते उद्योगपर्वणि सैन्यनिर्याणपर्वणि
षट्पञ्चाशदधिकशततमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-१५६-१५ पावकिः कार्तिकेयः ॥
५-१५६-१९ विवृतो विस्पष्टो भूत्वेत्यर्थः ॥
५-१५६-२० निर्मनुष्यं निर्जनम् ॥
५-१५६-२१ सदा प्रत्यहम् ॥
५-१५६-२९ पातयन्तः मूर्च्छितानि कुर्वन्तः ॥

उद्योगपर्व - अध्याय १५७
॥ श्रीः ॥
५.१५७. अध्यायः १५७

Mahabharata - Udyoga Parva - Chapter Topics

युधिष्ठिरेण श्रीकृष्णानुमत्या द्रुपदादीनां सप्तानां
पृतगक्षौहिण्याधिपत्येऽभिषेचनपूर्वकं धृष्टद्युम्नस्य
सर्वसैन्याधिपत्येऽभिषेचनम् ॥ १ ॥
बलरामस्य अक्रूरादिभिः सह पाण्डवदिदृक्षया कुरुक्षेत्रागमनम् ॥ २ ॥
युधिष्ठिरादिपूजितस्य तस्य बन्धुनिधनावलोकनासहिष्णुतया
तीर्थनिषेवणार्थं गमनम् ॥ ३ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१५७-० (३७१६७)
जनमेजय उवाच । ५-१५७-०क्ष् (३८४६)
आपगेयं महात्मानं भीष्मं शस्त्रभृतां वरम् ।
पितामहं भारतानां ध्वजं सर्वमहीक्षिताम् ॥ ५-१५७-१ (३७१६८)
बृहस्पतिसं बुद्ध्या क्षमया पृथिवीसमम् ।
समुद्रमिव गाम्भीर्ये हिमवन्तमिव स्थिरम् ॥ ५-१५७-२ (३७१६९)
प्रजापतिमिवौदार्ये तेजसा भास्करोपमम् ।
महेन्द्रमिव शत्रूणां ध्वंसनं शरवृष्टिभिः ॥ ५-१५७-३ (३७१७०)
रणयज्ञे प्रवितते सुभीमे लोमहर्षणे ।
दीक्षितं चिररात्राय श्रुत्वा तत्र युधिष्ठिरः ॥ ५-१५७-४ (३७१७१)

किमब्रवीन्महाबाहुः सर्वशस्त्रभृतां वरः ।
भीमसेनार्जुनौ वापि कृष्णो वा प्रत्यभाषत ॥ ५-१५७-५ (३७१७२)
वैशम्पायन उवाच। ५-१५७-६क्ष् (३८४७)
आपद्धर्मार्थकुशलो महाबुद्धिर्युधिष्ठिरः ।
सर्वान्भ्रातॄन्समानीय वासुदेवं च शाश्वतम् ॥ ५-१५७-६ (३७१७३)
उवाच वदतां श्रेष्ठः सान्त्वपूर्वमिदं वचः ।
पर्याक्रामत सैन्यानि यत्तास्तिष्ठत दंशिताः ॥ ५-१५७-७ (३७१७४)
पितामहेन वो युद्धं पूर्वमेव भविष्यति ।
तस्मात्सप्तसु सेनासु प्रणेतॄन्मम पश्यत ॥ ५-१५७-८ (३७१७५)
कृष्ण उवाच। ५-१५७-९क्ष् (३८४८)
यथार्हति भवान्वक्तुमस्मिन्काले ह्युपस्थिते ।
तथेदमर्थवद्वाक्यमुक्तं ते भरतर्षभ ॥ ५-१५७-९ (३७१७६)
रोचते मे महाबाहो क्रियतां यदनन्तरम् ।
नायकास्तव सेनायां क्रियन्तामिह सप्त वै ॥ ५-१५७-१० (३७१७७)
वैशम्पायन उवाच। ५-१५७-११क्ष् (३८४९)
ततो द्रुपदमानाय्य विराटं शिनिपुङ्गवम् ।
धृष्टद्युम्नं च पाञ्चाल्यं धृष्टकेतुं च पार्थिव ।
शिखण्डिनं च पाञ्चाल्यं सहदेवं च मागधम् ॥ ५-१५७-११ (३७१७८)
एतान्सप्त महाभागान्वीरान्युद्धाभिकाङ्क्षिणः ।
सेनाप्रणेतॄन्विधिवदभ्यषिञ्चद्युधिष्ठिरः ॥ ५-१५७-१२ (३७१७९)
सर्वसेनापतिं चात्र धृष्टद्युम्नं चकार ह ।
द्रोणान्तहेतोरुत्पन्नो य इद्धाञ्जातवेदसः ॥ ५-१५७-१३ (३७१८०)
सर्वेषामेव तेषां तु समस्तानां महात्मनाम् ।
सेनापतिपतिं चक्रे गडाकेशं धनञ्जयम् ॥ ५-१५७-१४ (३७१८१)
अर्जुनस्यापि नेता च संयन्ता चैव वाजिनाम् ।
सङ्कर्णणानुजः श्रीमान्महाबुद्धिर्जनार्दनः ॥ ५-१५७-१५ (३७१८२)
तद्दृष्टवोपस्थितं युद्धं समासन्नं महात्ययम् ।
प्राविशद्भवनं राज्ञः पाण्डवानां हलायुधः ॥ ५-१५७-१६ (३७१८३)
सहाक्रूरप्रभृतिभिर्ददसाम्बोद्धवादिभिः ।
रौक्मिणेयाहुकसुतैश्चारुदेष्णपुरोगमैः ॥ ५-१५७-१७ (३७१८४)
वृष्णिमुख्यैरधिगतैर्व्याघ्रैरिव बलोत्कटैः ।
अभिगुप्तो महाबाहुर्मरुद्भिरिव वासवः ॥ ५-१५७-१८ (३७१८५)
नीलकौशेयवसनः कैलासशिखरोपमः ।
सिंहखेलगतिः श्रीमान्मदरक्तान्तलोचनः ॥ ५-१५७-१९ (३७१८६)
तं दृष्ट्वा धर्मराजश्च केशवश्च महाद्युतिः ।
उदतिष्ठत्ततः पार्थो भीमकर्मा वृकोदरः ॥ ५-१५७-२० (३७१८७)

गाण्डीवधन्वा ये चान्ये राजानस्तत्र केचन ।
पूजयाञ्चक्रिरे ते वै समायान्तं हलायुधम् ॥ ५-१५७-२१ (३७१८८)
ततस्तं पाण्डवो राजा करे पस्पर्श पाणिना ।
वासुदेवपुरोगास्तं सर्व एवाभ्यवादयन् ॥ ५-१५७-२२ (३७१८९)
विराटद्रुपदौ वृद्धावभिवाद्य हलायुधः ।
युधिष्ठिरेण सहित उपाविशदरिन्दमः ॥ ५-१५७-२३ (३७१९०)
ततस्तेषूपविष्टेषु पार्थिवेषु समन्ततः ।
वासुदेवमभिप्रेक्ष्य रौहिणेयोऽभ्यभाषत ॥ ५-१५७-२४ (३७१९१)
भवितायं महारौद्रो दारुणः पुरुषक्षयः ।
दिष्टमेतद्ध्रुवं मन्ये न शक्यमतिवर्तितुम् ॥ ५-१५७-२५ (३७१९२)
तस्माद्युद्धात्समुत्तीर्णानपि वः समुहञ्जानान् ।
अरोगानक्षतैर्देहैर्द्रष्टास्मीति मतिर्मम ॥ ५-१५७-२६ (३७१९३)
समेतं पार्थिवं क्षत्रं कालपक्वमसंशयम् ।
विमर्दश्च महान्भावी मांसशोणितकर्दमः ॥ ५-१५७-२७ (३७१९४)
उक्तो मया वासुदेवः पुनः पुनरुपह्वरे ।
संबन्धिषु समां वृत्तिं वर्तस्व मधुसूदन ॥ ५-१५७-२८ (३७१९५)
पाण्डवा हि यथास्माकं तथा दुर्योधनो नृपः ।
तस्यापि क्रियतां साह्यं स पर्येति पुनःपुनः ॥ ५-१५७-२९ (३७१९६)
तच्च मे नाकरोद्वाक्यं त्वदर्थे मधुसूदनः ।
निर्विष्टः सर्वभावेन धनञ्जयमवेक्ष्य ह ॥ ५-१५७-३० (३७१९७)
ध्रुवो जयः पाण्डवानामिति मे निश्चिता मतिः ।
तथा ह्यभिनिवेशोऽयं वासुदेवस्य भारत ॥ ५-१५७-३१ (३७१९८)
न चाहमृत्सहे कृष्णमृते लोकमुदीक्षितुम् ।
ततोऽहमनुवर्तामि केशवस्य चिकीर्षितम् ॥ ५-१५७-३२ (३७१९९)
उभौ शिष्यौ हि मे वीरौ गदायद्धविशारदौ ।
तुल्यस्नेहोऽस्म्यतो भीते तथा दुर्योधने नृपे ॥ ५-१५७-३३ (३७२००)
तस्माद्यास्यामि तीर्थानि सरस्वत्या निषेवितुम् ।
न हि शक्ष्यामि कौरव्यान्नश्यमानानवेक्षितुम् ॥ ५-१५७-३४ (३७२०१)
वैशम्पायन उवाच। ५-१५७-३५क्ष् (३८५०)
एवमुक्त्वा महाबाहुरनुज्ञातश्च पाण्डवैः ।
तीर्थयात्रां ययौ रामो निवर्त्य मधुसूदनम् ॥ ॥ ५-१५७-३५ (३७२०२)

इति श्रीमन्महाभारते उद्योगपर्वमि सैन्यनिर्याणपर्वणि
सप्तपञ्चाशदधिकशततमोऽध्यायः ॥

५-१५७-१३ इद्धात्प्रदीप्तात् ॥
५-१५७-१६ महात्ययं अत्यन्तं क्षयकरम् ॥
५-१५७-२४ रौहिणेयो बलरामः ॥
५-१५७-२८ उपह्वरे एकान्ते ॥

उद्योगपर्व - अध्याय १५८
॥ श्रीः ॥
५.१५८. अध्यायः १५८

Mahabharata - Udyoga Parva - Chapter Topics
श्रीकृषाणश्यालस्य रुक्मिणः पाण्डवानुपेत्य अर्जुनंप्रति तस्य भयविकल्पपूर्वकं दर्पास्त्वेन साहाय्यकरणोक्तिः ॥ १ ॥
अर्जुनेन तस्य प्रत्याख्यानम् ॥ २ ॥
दुर्योधनमेत्य तथाभाषिणस्तस्य तेनापि प्रत्याख्यानम् ॥ ३ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१५८-० (३७२०३)
वैशम्पायन उवाच। ५-१५८-०क्ष् (३८५१)
एतस्मिन्नेव काले तु भीष्मकस्य महात्मनः ।
हिरण्यरोम्णो नृपतेः साक्षादिन्द्रसखस्य वै ॥ ५-१५८-१ (३७२०४)
आकृतीनामधिपतिर्भोजस्यातियशस्विनः ।
दाक्षिणात्यपतेः पुत्रो दिक्षु रुक्मीति विश्रुतः ॥ ५-१५८-२ (३७२०५)
यः किंपुरुषसिंहस्य गन्धमादनवासिनः ।
कृत्स्नं शिष्यो धनुर्वेदं चतुष्पादमवाप्तवान् ॥ ५-१५८-३ (३७२०६)
यो माहेन्द्रं धनुर्लेभे तुल्यं गाण्डीवतेजसा ।
शार्ङ्गेण च महाबाहुः संमितं दिव्यलक्षणम् ॥ ५-१५८-४ (३७२०७)
त्रीण्येवैतानि दिव्यानि धनूंषि दिविचारिणाम् ।
वारुणं गाण्डिवं तत्र माहेन्द्रं विजयं धनुः ।
शार्ङ्गं तु वैष्णवं प्राहुर्दिव्यं तेजोमयं धनुः ॥ ५-१५८-५ (३७२०८)
धारयामास तत्कृष्णः परसेनाभयावहम् ।
गाण्डीवं पावकाल्लेभे खाण्डवे पाकशासनिः ॥ ५-१५८-६ (३७२०९)
द्रुमाद्रुक्मी महातेजा विजयं प्रत्यपद्यत ।
संछिद्य मौरवान्पाशान्निहत्य मुरमोजसा ॥ ५-१५८-७ (३७२१०)
निर्जित्य नरकं भौममाहृत्य मणिकुण्डले ।
षोडश स्त्रीसहस्राणि रत्नानि विविधानि च ॥ ५-१५८-८ (३७२११)

प्रतिपेदे हृषीकेशः शार्ङ्गं च धनुरुत्तमम् ।
रुक्मी तु विजयं लब्ध्वा धनुर्मेघनिभस्वनम् ॥ ५-१५८-९ (३७२१२)
विभीषयन्निव जगत्पाण्डवानभ्यवर्तत ।
नामृष्यत पुरा योऽसौ स्वबाहुलगर्वितः ॥ ५-१५८-१० (३७२१३)
रुक्मिण्या हरणं वीरो वासुदेवेन धीमता ।
कृत्वा प्रतिज्ञां नाहत्वा निवर्तिष्ये जनार्दनम् ॥ ५-१५८-११ (३७२१४)
ततोऽन्वधावद्वार्ष्णेयं सर्वशस्त्रभृतां वरः ।
सेनया चतुरङ्गिण्या महत्या दूरपातया ॥ ५-१५८-१२ (३७२१५)
विचित्रायुधवर्मिण्या गङ्गयेव प्रवृद्धया ।
स समासाद्य वार्ष्णेयं योगानामीश्वरं प्रभुम् ॥ ५-१५८-१३ (३७२१६)
व्यंसितो व्रीडितो राजन्नाजगाम स कुण्डिनम् ।
यत्रैव कृष्णेन रणे निर्जितः परवीरहा ॥ ५-१५८-१४ (३७२१७)
तत्र भोजकटं नाम कृतं नगरमुत्तमम् ।
सैन्येन महता तेन प्रभूतगजवाजिना ॥ ५-१५८-१५ (३७२१८)
पुरं तद्भुवि विख्यातं नाम्ना भोजकटं नृप ।
स भोजराजः सैन्येन महता परिवारितः ॥ ५-१५८-१६ (३७२१९)
अक्षौहिण्या महावीर्यः पाण्डवान्क्षिप्रमागमत् ।
ततः स कवची धन्वी तली खड्गी शरासनी ॥ ५-१५८-१७ (३७२२०)
रथेनादित्यवर्णेन प्रविवेश महाचमूम् ।
विदितः पाण्डवेयानां वासुदेवप्रियेप्सया ॥ ५-१५८-१८ (३७२२१)
युधिष्ठिरस्तु तं राजा प्रत्युद्गम्याभ्यपूजयत् ।
स पूजितः पाण्डुपुत्रैर्यथान्यायं सुसंस्तुतः ॥ ५-१५८-१९ (३७२२२)
प्रतिगृह्य तु तान्सर्वान्विश्रान्तः सहसैनिकः ।
उवाच मध्ये वीराणां कुन्तीपुत्रं धनञ्जयम् ॥ ५-१५८-२० (३७२२३)
सहायोस्मि स्थितो युद्धे यदि भीतोसि पाण्डव ।
करिष्यामि रणे साह्यमसह्यं तव शत्रुभिः ॥ ५-१५८-२१ (३७२२४)
न हि मे विक्रमे तुल्यः पुमानस्तीह कश्चन ।
हनिष्यामिरणे भागं यन्मे दास्यसि पाण्डव ॥ ५-१५८-२२ (३७२२५)
अपि द्रोणकृपौ वीरौ भीष्मकर्णावथो पुनः ।
अथवा सर्व एवैते तिष्ठन्तु वसुधाधिपाः ॥ ५-१५८-२३ (३७२२६)
निहत्य समरे शत्रूंस्तव दास्यामि मेदिनीम् ।
इत्युक्तो धर्मराजस्य केशवस्य च संनिधौ ॥ ५-१५८-२४ (३७२२७)
शृण्वतां पार्थिवेन्द्राणामन्येषां चैव सर्वशः ।
वासुदेवमभिप्रेक्ष्य धर्मराजं च पाण्डवम् ।
उवाच धीमान्कौन्तेयः प्रहस्य सखिपूर्वकम् ॥ ५-१५८-२५ (३७२२८)
युध्यमानस्य मे वीर गन्धर्वैः सुमहाबलैः ।

सहायो घोषयात्रायां कस्तदासीत्सखा मम ॥ ५-१५८-२६ (३७२२९)
तथा प्रतिभये तस्मिन्देवदानवसंकुले ।
खाण्डवे युध्यमानस्य कः सहायस्तदावभवत् ॥ ५-१५८-२७ (३७२३०)
निवातकवचैर्युद्धे कालकेयैश्च दानवैः ।
तत्र मे युध्यमानस्य कः सहायस्तदाभवत् ॥ ५-१५८-२८ (३७२३१)
तथा विराटनगरे कुरुभिः सह सङ्गरे ।
युध्यतो बहुभिस्तत्र कः सहायोऽभवन्मम ॥ ५-१५८-२९ (३७२३२)
उपजीव्य रणे रुद्रं शक्रं वैश्रवणं यमम् ।
वरुणं पावकं चैव कृपं द्रोणं च माधवम् ॥ ५-१५८-३० (३७२३३)
धारयन्गाण्डिवं दिव्यं धनुस्तेजोमयं दृढम् ।
अक्षय्यशरसंयुक्तो दिव्यास्त्रपरिबृंहितः ॥ ५-१५८-३१ (३७२३४)
कौरवामां कुले जातः पाण्डोः पुत्रो विशेषतः ।
द्रोणं व्यपदिशञ्छिष्यो वासुदेवसहायवान् ॥ ५-१५८-३२ (३७२३५)
कथमस्मद्विधो ब्रूयाद्भीतोऽस्मीति यशोहरम् ।
वचनं नरशार्दूल वज्रायुधसमस्वनम् ॥ ५-१५८-३३ (३७२३६)
नास्मि भीतो महाबाहो सहायार्थश्च नास्ति मे ।
यथाकामं यथायोगं गच्छ वात्रैव तिष्ठ वा ॥ ५-१५८-३४ (३७२३७)
ग्वैशम्पायन उवाच ५-१५८-३५क्ष् (३८५२)
तच्छ्रुत्वा वचनं तस्य विजयस्य च धीमतः ।
विनिवर्त्य ततो रुक्मी सेनां सागरसंनिभाम् ।
दुर्योधनमुपागच्छत्तथैव भरतर्षभ ॥ ५-१५८-३५ (३७२३८)
तथैव चाभिगम्यैनमुवाच वसुधाधिपः ।
प्रत्याख्यातश्च तेनापि स तदा शूरमानिना ॥ ५-१५८-३६ (३७२३९)
द्वावेव तु महाराज तस्माद्युद्धादपेयतुः ।
रौहिणेयश्च वार्ष्णेयो रुक्मी च वसुधाधिप ॥ ५-१५८-३७ (३७२४०)
गते रामे तीर्थयात्रां भीष्मकस्य सुते तथा ।
उपाविशन्पाण्डवेया मन्त्राय पुनरेव च ॥ ५-१५८-३८ (३७२४१)
समितिर्धर्मराजस्य सा पार्थिवसमाकुला ।
शुशुभे तारकैश्चित्रा द्यौश्चन्द्रेणेव भारत ॥ ॥ ५-१५८-३९ (३७२४२)

इति श्रीमन्महाभारते उद्योगपर्वमि सैन्यनिर्याणपर्वणि
अष्टपञ्चाशदधिकशततमोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-१५८-१ साक्षात्पुत्र इति संबन्धः ॥
५-१५८-२ आकूतीनां संकल्पानाम् । सत्यसंकल्प इत्यर्थः ॥

५-१५८-७ मौरवान् आन्त्रतन्तिमयान् । यैरिदानी शार्ङ्गे धनुषि ज्या क्रियते ॥
५-१५८-३० उपजीव्य आराध्य । रणे युद्धनिमित्तम् ॥
५-१५८-३२ द्रोणं अयं मम गुरुरिति व्यपदिशन् कथयन् ॥

उद्योगपर्व - अध्याय १५९
॥ श्रीः ॥
५.१५९. अध्यायः १५९

Mahabharata - Udyoga Parva - Chapter Topics
धृतराष्ट्रेण सञ्जयंप्रति
कुरुपाण्डवसेनयोर्वृत्तवृत्तान्तकथनचोदना ॥ १ ॥
संजयेन धृतराष्ट्रंप्रति पुरुषस्याकर्तृत्वकथनपूर्वकं स्वेन
वक्ष्यमाणबन्धुनिधनश्रवणेन शोकानधिगमोपदेशः ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१५९-० (३७२४३)
जनमेजय उवाच। ५-१५९-०क्ष् (३८५३)
तथा व्यूढेष्वनीकेषु कुरुक्षेत्रे द्विजर्षभ ।
किमकुर्वञ्च कुरवः कालेनाभिप्रचोदिताः ॥ ५-१५९-१ (३७२४४)
वैशम्पायन उवाच। ५-१५९-२क्ष् (३८५४)
तथा व्यूढेष्वनीकेषु यत्तेषु भरतर्षभ ।
धृतराष्ट्रो महाराज सञ्जयं वाक्यमब्रवीत् ॥ ५-१५९-२ (३७२४५)
एहि सञ्जय सर्वं मे आचक्ष्वानवशेषतः ।
सेनानिवेशे यद्वृत्तं कुरुपाण्डवसेनयोः ॥ ५-१५९-३ (३७२४६)
दिष्टमेव परं मन्ये पौरुषं चाप्यनर्थकम् ।
यदहं बुद्ध्यमानोऽपि युद्धदोषान्क्षयोदयान् ॥ ५-१५९-४ (३७२४७)
तथापि निकृतिप्रज्ञं पुत्रं दुर्द्यूतदेविनम् ।
न शक्नोमि नियन्तुं वा कर्तुं वा हितमात्मनः ॥ ५-१५९-५ (३७२४८)
भवत्येव हि मे सूत बुद्धिर्दोषानुदर्शिनी ।
दुर्योधनं समासाद्य पुनः सा परिवर्तते ॥ ५-१५९-६ (३७२४९)
एवं गते वै यद्भावि तद्भविष्यति सञ्जय ।
क्षत्रधर्मः किल रणे तनुत्यागे हि पूजितः ॥ ५-१५९-७ (३७२५०)
सञ्जय उवाच। ५-१५९-८क्ष् (३८५५)
त्वद्युक्तोऽयमनुप्रश्नो महाराज यथेच्छसि ।
न तु दुर्योधने दोषमिममाधातुमर्हसि ॥ ५-१५९-८ (३७२५१)

शृणुष्वानवशेषेण वदतो मम पार्थिव ।
य आत्मनो दुश्चरितादशुभं प्राप्नुयान्नरः ।
न स कालं न वा देवानेनसा गन्तुमर्हति ॥ ५-१५९-९ (३७२५२)
महाराज मनुष्येषु निन्द्यं यः सर्वमाचरेत् ।
स वध्यः सर्वलोकस्य निन्दितानि समाचरन् ॥ ५-१५९-१० (३७२५३)
निकारा मनुजश्रेष्ठ पाण्डवैस्त्वत्प्रतीक्षया ।
अनुभूताः सहामात्यैर्निकृतैरधिदेवने ॥ ५-१५९-११ (३७२५४)
हयानां च गजानां च राज्ञां चामिततेजसाम् ।
वैशसं समरे वृत्तं यत्तन्मे शृणु सर्वशः ॥ ५-१५९-१२ (३७२५५)
स्थिरो भूत्वा महाप्राज्ञ सर्वलोकक्षयोदयम् ।
यथाभूतं महायुद्धे श्रुत्वा मा विमना भव ॥ ५-१५९-१३ (३७२५६)
न ह्येव कर्ता पुरुषः कर्मणोः शुभपापयोः ।
अस्वतन्त्रो हि पुरुषः कार्यते दारुयन्त्रवत् ॥ ५-१५९-१४ (३७२५७)
केचिदीश्वरनिर्दिष्टाः केचिदेव यदृच्छया ।
पूर्वकर्मभिरप्यन्ये त्रैधमेतत्प्रदृश्यते ।
तस्मादनर्थमापन्नः स्थिरो भूत्वा निशामय ॥ ॥ ५-१५९-१५ (३७२५८)

इति श्रीमन्महाभारते उद्योगपर्वणि सैन्यनिर्याणपर्वणि
एकोनषष्ट्यधिकशततमोऽध्यायः ॥ ॥ समाप्तं च सैन्यनिर्याणपर्व
॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-१५९-४ क्षयस्यैव उदयो येभ्यस्तान् क्षयोदयान् ॥
५-१५९-५ निकृतिप्रज्ञं कपटविषयैव प्रज्ञा न धर्मविषया
यस्य तम् ॥
५-१५९-९ एनसा दोषेण देवान्कालं वा गुन्तुं उपलब्धुं नार्हति । न स
कालं न वा देवं वक्तुमेतदिहार्हतीति पाठेप्ययमेवार्थः ॥
५-१५९-११ निकाराः तिरस्काराः ॥

उद्योगपर्व - अध्याय १६०
॥ श्रीः ॥
५.१६०. अध्यायः १६०

Mahabharata - Udyoga Parva - Chapter Topics
दुर्योधनेन पृथक्पृथग्युधिष्ठिरादीन्प्रति
वक्तव्यसन्देशकथनपूर्वकमुलूकस्य पाण्डवान्प्रति दूत्येन प्रेषणम्
॥ १ ॥

५-१६०-० (३७२५९)
सञ्जय उवाच। ५-१६०-०क्ष् (३८५६)
हिरण्वत्यां निविष्टेषु पाण्डवेषु महात्मसु ।
न्यविशन्त महाराज कौरवेया यथाविधि ॥ ५-१६०-१ (३७२६०)
तत्र दुर्योधनो राजा निवेस्य बलमोजसा ।
संमानयित्वा नृपतीन्न्यस्य गुल्मांस्तथैव च ॥ ५-१६०-२ (३७२६१)
आरक्षस्य विधिं कृत्वा योधानां तत्र भारत ।
कर्णं दुःशासनं चैव शकुनिं चापि सौबलम् ॥ ५-१६०-३ (३७२६२)
आनाय्य नृपतिस्तत्र मन्त्रयामास भारत ।
तत्र दुर्योधनो राजा कर्णेन सह भारत ॥ ५-१६०-४ (३७२६३)
सौबलेन च राजेन्द्र मन्त्रयित्वा नरर्षभ ।
आहूयोपह्वरे राजन्नुलूकमिदमब्रवीत् ॥ ५-१६०-५ (३७२६४)
उलूक गच्छ कैतव्य पाण्डवान्सहसोमकान् ।
गत्वा मम वचो ब्रूहि वासुदेवस्य शृण्वतः ॥ ५-१६०-६ (३७२६५)
इदं तत्समनुप्राप्तं वर्षपूगाभिचिन्तितम् ।
पाण्डवानां कुरूणां च युद्धं लोकभयङ्करम् ॥ ५-१६०-७ (३७२६६)
यदेतत्कत्थनावाक्यं सञ्जयो महदब्रवीत् ।
वासुदेवसहायस्य गर्जतः सानुजस्य ते ॥ ५-१६०-८ (३७२६७)
मध्ये करूणां कौन्तेय तस्य कालोयमागतः ।
यथावत्संप्रतिज्ञातं तत्सर्वं क्रियतामिति ॥ ५-१६०-९ (३७२६८)
ज्येष्ठं तथैव कौन्तेयं ब्रूयास्त्यं वचनान्मम ॥ ५-१६०-१० (३७२६९)
भ्रातृभिः सहितः सर्वैः सोमकैश्च सकेकयैः ।
कथं वा धार्मिको भूत्वा त्वमधर्मे मनः कृथाः ।
य इच्छसि जगत्सर्वं नश्यमानं नृशंसवत् ॥ ५-१६०-११ (३७२७०)
अभयं सर्वभूतेभ्यो पाता त्वमिति मे मतिः ॥ ५-१६०-१२ (३७२७१)
श्रूयते हि पुरा गीतः श्लोकोऽयं भरतर्षभ ।
प्रह्लादेनाथ भद्रं ते हृते राज्ये तु दैवतैः ॥ ५-१६०-१३ (३७२७२)
यस्य धर्मध्वजो नित्यं सुरा ध्वज इवोच्छ्रितः ।
प्रच्छन्नानि च पापानि बैडालं नाम तद्व्रतम् ॥ ५-१६०-१४ (३७२७३)
अत्र ते वर्तयिष्यामि आख्यानमिदमुत्तमम् ।
कथितं नारदेनेह पितुर्मम नराधिप ॥ ५-१६०-१५ (३७२७४)
मार्जारः किल दुष्टात्मा निश्चेष्टः सर्वकर्मसु ।
ऊर्ध्वबाहुः स्थितो राजन् गङ्गातीर कदाचन ॥ ५-१६०-१६ (३७२७५)

स वै कृत्वा मनःशुद्धिं प्रत्ययार्थं शरीरिणाम् ।
करोमि धर्ममित्याह सर्वानेव शरीरिणः ॥ ५-१६०-१७ (३७२७६)
तस्य कालेन महता विस्त्रम्यं जग्मुरण्डजाः ।
समेत्य च प्रशंसन्ति मार्जारं तं विशांपते ॥ ५-१६०-१८ (३७२७७)
पूज्यमानस्तु तैः सर्वैः पक्षिभिः पक्षिभोजनः ।
आत्मकार्यं कृतं मेने चार्यायाश्च कृतं फलम् ॥ ५-१६०-१९ (३७२७८)
अथ दीर्घस्य कालस्य तं देशं मूषिका ययुः ।
ददृशुस्तं च ते तत्र धार्मिकं व्रतचारिणम् ॥ ५-१६०-२० (३७२७९)
कार्येण महता युक्तं दम्भयुक्तेन भारत ।
तेषां मतिरियं राजन्नासीत्तत्र विनिश्चये ॥ ५-१६०-२१ (३७२८०)
बहुमित्रा वयं सर्वे तेषां नो मातुलो ह्ययम् ।
रक्षां करोतु सततं वृद्धबालस्य सर्वशः ॥ ५-१६०-२२ (३७२८१)
उपगम्य तु ते सर्वे बिडालमिदमब्रुवन् ।
भवत्प्रसादादिच्छामश्चर्तुं चैव यथासुखम् ॥ ५-१६०-२३ (३७२८२)
भवान्नो गतिरव्यग्रा भवान्नः परमः सुहृत् ।
ते वयं सहिताः सर्वे भवन्तं शरणं गताः ॥ ५-१६०-२४ (३७२८३)
भवान्धर्मपरो नित्यं भवान्धर्मे व्यवस्थितः ।
स नो रक्ष महाप्रज्ञ त्रिदशानिव वज्रभृत् ॥ ५-१६०-२५ (३७२८४)
एवमुक्तस्तु तैः सर्वैर्मूषिकैः स विशांपते ।
प्रत्युवाच ततः सर्वान्मूषिकान्मूषिकान्तकृत् ॥ ५-१६०-२६ (३७२८५)
द्वयोर्योगं न पश्यामि तपसो रक्षणस्य च ।
अवश्यं तु मया कार्यं वचनं भवतां हितम् ॥ ५-१६०-२७ (३७२८६)
युष्माभिरपि कर्तव्यं वचनं मम नित्यशः ।
तपसास्मि परिश्रान्तो दृढं नियमामास्थितः ॥ ५-१६०-२८ (३७२८७)
न चापि गमने शक्तिं कांचित्पश्यामि चिन्तयन् ।
सोस्मि नेयः सदा ताता नदीकूलमितःपरम् ॥ ५-१६०-२९ (३७२८८)
तथेति तं प्रतिज्ञाय मूषिका भरतर्षभ ।
वृद्धबालमथो सर्वं मार्जाराय न्यवेदयन् ॥ ५-१६०-३० (३७२८९)
ततः स पापो दुष्टात्मा मूषिकानथ भक्षयन् ।
पीवरश्च सुवर्णश्च दृढबन्धश्च जायते ॥ ५-१६०-३१ (३७२९०)
मूषिकाणां गणश्चात्र भृशं संक्षीयतेऽथ सः ।
मार्जारो वर्धते चापि तेजोबलसमन्वितः ॥ ५-१६०-३२ (३७२९१)
ततस्ते मूषिकाः सर्वे समेत्यान्योन्यमब्रुवन् ।
मातुलो वर्धते नित्यं वयं क्षीयामहे भृशम् ॥ ५-१६०-३३ (३७२९२)
ततः प्राज्ञतमः कश्चिद्धिरण्डिको नाम मूषिकः ।
अब्रवीद्वचनं राजन्मूषिकाणां महागणम् ॥ ५-१६०-३४ (३७२९३)

गच्छतां वो नदीतीरं सहितानां विशेषतः ।
पृष्ठतोऽहं गमिष्यामि सहैव मातुलेन तु ॥ ५-१६०-३५ (३७२९४)
साधु साध्विति ते सर्वे पूजयाञ्चक्रिरे तदा ।
चक्रुश्चैव यथान्यायं डिण्डिकस्य वचोऽर्थवत् ॥ ५-१६०-३६ (३७२९५)
अविज्ञानात्ततः सोऽथ डिण्डिकं ह्युपभुक्तवान् ।
ततस्ते सहिताः सर्वे मन्त्रयामासुरञ्जसा ॥ ५-१६०-३७ (३७२९६)
तत्र वृद्धतमः कश्चित्कोलिको नाम मूषिकः ।
अब्रवीद्वचनं राजञ्ज्ञातिमध्ये यथातथम् ॥ ५-१६०-३८ (३७२९७)
न मातुलो धर्मकामश्छद्ममात्रं कृता शिखा ।
न मूलफलभक्षस्य विष्ठा भवति लोमशा ॥ ५-१६०-३९ (३७२९८)
अस्य गात्राणि वर्धन्ते गणश्च परिहीयते ।
अद्य सप्ताष्टदिवसान्डिण्डिकोपि न दृश्यते ॥ ५-१६०-४० (३७२९९)
एतच्छ्रुत्वा वचः सर्वे मूषिका विप्रदुद्रुवुः ।
बिडालोपि स दुष्टात्मा जगामैव यथागतम् ॥ ५-१६०-४१ (३७३००)
तथा त्वमपि दुष्टात्मन्बैडालं व्रतमास्थितः ।
चरसि ज्ञातिषु सदा बिडालोमूषिकेष्विव ॥ ५-१६०-४२ (३७३०१)
अन्यथा किल ते वाक्यमन्यथा कर्म दृश्यते ।
दम्भनार्थाय लोकस्य वेदाश्चोपशमश्च ते ॥ ५-१६०-४३ (३७३०२)
त्यक्त्वा छद्म त्विदं राजन्क्षत्रधर्मं समाश्रितः ।
कुरु कार्याणि सर्वाणि धर्मिष्ठोऽसि नरर्षभ ॥ ५-१६०-४४ (३७३०३)
बाहुवीर्येण पृथिवीं लब्ध्वा भरतसत्तम ।
देहि दानं द्विजातिभ्यः पितृभ्यश्चयथोचितम् ॥ ५-१६०-४५ (३७३०४)
क्लिष्टाया वर्षपूगांश्च मातुर्मातृहिते स्थितः ।
प्रमार्जाश्रु रणे जित्वा संमानं परमावह ॥ ५-१६०-४६ (३७३०५)
पञ्चग्रामा वृता यत्नात्रास्माभिरपवर्जिताः ।
युध्यामहे कथं सङ्ख्ये कोपयेम च पाण्डवान् ॥ ५-१६०-४७ (३७३०६)
त्वत्कृते दुष्टभावस्य संत्यागो विदुरस्य च ।
जातुषे च गृहे दाहं स्मर तं पुरुषो भव ॥ ५-१६०-४८ (३७३०७)
यच्च कृष्णमवोचस्त्वमायान्तं कुरुसंसदि ।
अयमस्मि स्थितो राजञ्शमायसमराय च ॥ ५-१६०-४९ (३७३०८)
तस्यायमागतः कालः समरस्य नराधिप ।
एतदर्थं मया सर्वं कृतमेतद्युधिष्ठिर ॥ ५-१६०-५० (३७३०९)
किं नु युद्धात्परं लाभं क्षत्रियो बहु मन्यते ।
किंच त्वं क्षत्रियकुले जातः संप्रथितो भुवि ॥ ५-१६०-५१ (३७३१०)
द्रोणादस्त्राणि संप्राप्य कृपाच्च भरतर्षभ ।
तुल्ययोनौ समबले वासुदेवं समाश्रितः ॥ ५-१६०-५२ (३७३११)

ब्रूयास्त्वं वासुदेवं च पाण्डवानां समीपतः ।
आत्मार्थं पाण्डवार्थं च यत्तो मां प्रतियोधय ॥ ५-१६०-५३ (३७३१२)
सभामध्ये च यद्रूपं मायया कृतवानसि ।
तत्तथैव पुनः कृत्वा सार्जुनो मामभिद्रव ॥ ५-१६०-५४ (३७३१३)
इन्द्रजालं च मायां वै कुहका वापि भीषणा ।
आत्तशस्त्रस्य सङ्ग्रमे वहन्ति प्रतिगर्जनाः ॥ ५-१६०-५५ (३७३१४)
वयमप्युत्सहेम द्यां खं च गच्छेम मायया ।
रसातलं विशामोपि ऐन्द्रं वा पुरमेव तु ॥ ५-१६०-५६ (३७३१५)
दर्शयेम च रूपाणि स्वशरीरे बहून्यपि ।
न तु पर्यायतः सिद्धिर्बुद्धिमाप्नोति मानुषीम् ॥ ५-१६०-५७ (३७३१६)
मनसैव हि भूतानि धातैव कुरुते वशे ।
यद्ब्रवीषि च वार्ष्णेय धार्तराष्ट्रानहं रणे ॥ ५-१६०-५८ (३७३१७)
घातयित्वा प्रदास्यामि पार्थेभ्यो राज्यमुत्तमम् ।
आचचक्षे च मे सर्वं सञ्जयस्तव भाषितम् ।
मद्द्वितीयेन पार्थेन वैरं वः सव्यसाचिना ॥ ५-१६०-५९ (३७३१८)
स सत्यसङ्गरो भूत्वा पाण्डवार्थे पराक्रमी ।
युद्ध्यस्वाद्य रणे यत्तः पश्यामः पुरुषो भव ॥ ५-१६०-६० (३७३१९)
यस्तु शत्रुमभिज्ञाय शुद्धं पौरुषमास्थितः ।
करोति द्विषतां शोकं स जीवति सुजीवितम् ॥ ५-१६०-६१ (३७३२०)
अकस्माच्चैव ते कृष्ण ख्यातं लोके महद्यशः ।
अद्येदानीं विजानीमः सन्ति षण्डाः शश्वृङ्गकाः ॥ ५-१६०-६२ (३७३२१)
मद्विधो नापि नृपतिस्त्वयि युक्तः कथंचन ।
सन्नाहं संयुगे कर्तुं कंसभृत्ये विशेषतः ॥ ५-१६०-६३ (३७३२२)
तं च तूबरकं बालं बह्वाशिनमविद्यकम् ।
उलूक मद्वचो ब्रूहि असकृद्भीमसेनकम् ॥ ५-१६०-६४ (३७३२३)
विराटनगरे पार्थ यस्त्वं सूदो ह्यभूः पुरा ।
बल्लवो नाम विख्यातस्तन्ममैव हि पौरुषम् ॥ ५-१६०-६५ (३७३२४)
प्रतिज्ञातं सभामध्ये न तन्मिथ्या त्वया पुरा ।
दुःशासनस्य रुधिरं पीयतां यदि शक्यते ॥ ५-१६०-६६ (३७३२५)
यद्ब्रवीषि च कौन्तेय धार्तराष्ट्रानहं रणे ।
निहनिष्यामि तरसा तस्य कालोऽयमागतः ॥ ५-१६०-६७ (३७३२६)
त्वं हि भोज्ये पुरस्कार्यो भक्ष्ये पेये च भारत ।
क्व युद्धं क्व च भोक्तव्यं युध्यस्व पुरुषो भव ॥ ५-१६०-६८ (३७३२७)
शयिष्यसे हतो भूमौ गदामालिङ्ग्य भारत ।
तद्वृथा च सभामध्ये वल्गितं ते वृकोदर ॥ ५-१६०-६९ (३७३२८)
उलूक नकुलं ब्रूहि वचनान्मम भारत ।

युध्यस्वाद्य स्थिरो भूत्वा पश्यामस्तव पौरुषम् ॥ ५-१६०-७० (३७३२९)
युधिष्ठिरानुरागं च द्वेषं च मयि भारत ।
कृष्णायाश्च परिक्लेशं स्मरेदानीं यथातथम् ॥ ५-१६०-७१ (३७३३०)
ब्रूयास्त्वं सहदेवं च राजमध्ये वचो मम ।
युद्ध्येदानीं रणे यत्तः क्लेशान्स्मर च पाण्डव ॥ ५-१६०-७२ (३७३३१)
विराटद्रुपदौ चोभौ ब्रूयास्त्वं वचनान्मम ।
न दृष्टपूर्वा भर्तारो भृत्यैरपि महागुणैः ।
तथार्थपतिभिर्भृत्या यतः सृष्टाः प्रजास्ततः ॥ ५-१६०-७३ (३७३३२)
अश्लाघ्योऽयं नरपतिर्युवयोरिति चागतम् ॥ ५-१६०-७४ (३७३३३)
ते यूयं संहता भूत्वा तद्वधार्थं ममापि च ।
आत्मार्थं पाण्डवार्थं च प्रयुद्ध्यध्वं मया सह ॥ ५-१६०-७५ (३७३३४)
धृष्टद्युम्नं च पाञ्चाल्यं ब्रूयास्त्वं वचनान्मम ।
एष ते समयः प्राप्तो लब्धव्यश्च त्वयापि सः ॥ ५-१६०-७६ (३७३३५)
द्रोणमासाद्य समरे ज्ञास्यसे हितमुत्तमम् ।
युद्ध्यस्व समुहृत्पापं कुरु कर्म सुदुष्करम् ॥ ५-१६०-७७ (३७३३६)
शिखण्डिनमथो ब्रूहि उलूक वचनान्मम ।
स्त्रीति मत्वा महाबाहुर्न हनिष्यति कौरवः ॥ ५-१६०-७८ (३७३३७)
गाङ्गेयो धन्विनां श्रेष्ठो युद्ध्येदानीं सुनिर्भयः ।
कुरु कर्म रणे यत्तः पश्यामः पौरुषं तव ॥ ५-१६०-७९ (३७३३८)
एवमुक्त्वा ततो राजा प्रहस्योलूकमब्रवीत् ।
धनञ्जयं पुनर्ब्रूहि वासुदेवस्य श्रृण्वतः ॥ ५-१६०-८० (३७३३९)
अस्मान्वा त्वं पराजित्य प्रसाधि पृतिवीमिमाम् ।
अथवा निर्जितोस्माभी रणे वीर शयिष्यसि ॥ ५-१६०-८१ (३७३४०)
राष्ट्रान्निर्वासनक्लेशं वनवासं च पाण्डव ।
कृष्णायाश्च परिक्लेशं संस्मरन्पुरुषो भव ॥ ५-१६०-८२ (३७३४१)
यदर्थं क्षत्रिया सूते सर्वं तदिदमागतम् ।
बलं वीर्यं च शौर्यं च परं चाप्यस्त्रलाघवम् ॥ ५-१६०-८३ (३७३४२)
पौरुषं दर्शयन्युद्धे कोपस्य कुरु निष्कृतिम् ।
परिक्लिष्टस्य दीनस्य दीर्घकालोषितस्य च ।
हृदयं कस्य न स्फोटेदैश्वर्याद्भ्रंशितस्य च ॥ ५-१६०-८४ (३७३४३)
कुले जातस्य शूरस्य परिवित्तेष्वगृध्यतः ।
आस्थितं राज्यमाक्रम्य कोपं कस्य न दीपयेत् ॥ ५-१६०-८५ (३७३४४)
यत्तदुक्तं महद्वाक्यं कर्मणा तद्विभाव्यताम् ।
अकर्मणा कत्थितेन सन्तः कुपुरुषं विदुः ॥ ५-१६०-८६ (३७३४५)
अमित्राणां वशे स्थानं राज्यं च पुनरुद्धर ।
द्वावर्थौ युद्धकामस्य तस्मात्तत्कुरु पौरुषम् ॥ ५-१६०-८७ (३७३४६)

पराजितोऽसि द्यूतेन कृष्णा चानायिता सभाम् ।
शक्योऽमर्षो मनुष्येण कर्तु पुरुषमानिना ॥ ५-१६०-८८ (३७३४७)
द्वादशैव तु वर्षाणि वने धिष्ण्याद्विवासितः ।
संवत्सरं विराटस्य दास्यमास्थाय चोषितः ॥ ५-१६०-८९ (३७३४८)
राष्ट्रान्निर्वासनक्लेशं वनवासं च पाण्डव ।
कृष्णायाश्च परिक्लेशं संस्मरन्पुरुषो भव ॥ ५-१६०-९० (३७३४९)
अप्रियाणां च वचनं प्रब्रुवत्सु पुनः पुनः ।
अमर्षं दर्शयस्व त्वममर्षो ह्येव पौरुषम् ॥ ५-१६०-९१ (३७३५०)
क्रोधो बलं तथा वीर्यं ज्ञानयोगोऽस्त्रलाघवम् ।
इह ते दृश्यतां पार्थ युद्ध्यस्व पुरुषो भव ॥ ५-१६०-९२ (३७३५१)
लोहाभिसारो निर्वृत्तः कुरुक्षेत्रमकर्दमम् ।
पुष्टास्तेऽश्वा भृता योधाः श्वो युद्ध्यस्व सकेशवः ॥ ५-१६०-९३ (३७३५२)
असमागम्य भीष्मेण संयुगे किं विकत्थसे ।
आरुरुक्षुर्यथा मन्दः पर्वतं गन्धमादनम् ॥ ५-१६०-९४ (३७३५३)
एवं कत्थसि कौन्तेय अकत्थन्पुरुषो भव ।
सूतपुत्रं सुदुर्धर्षं शल्यं च बलिनां वरम् ॥ ५-१६०-९५ (३७३५४)
द्रोणं च बलिनां श्रेष्ठं शचीपतिसमं युधि ।
अजित्वा संयुगे पार्थ राज्यं कथमिहेच्छसि ॥ ५-१६०-९६ (३७३५५)
ब्राह्मे धनुषि चाचार्यं वेदयोरन्तगं द्वयोः ।
युधि धुर्यमविक्षोभ्यमनीकचरमच्युतम् ॥ ५-१६०-९७ (३७३५६)
द्रोणं महाद्युतिं पार्थ जेतुमिच्छसि तन्मृषा ।
न हि शुश्रुम वातेन मेरुमुन्मथितं गिरिम् ॥ ५-१६०-९८ (३७३५७)
अनिलो वा वहेन्मेरुं द्यौर्वापि निपतेन्महीम् ।
युगं वा रिवर्तेत यद्येवं स्याद्यथात्थ माम् ॥ ५-१६०-९९ (३७३५८)
को ह्यस्ति जीविताकाङ्क्षी पराप्येममरिमर्दनम् ।
पार्थो वा इतरो वापि कोन्यः स्वस्ति गृहान्व्रजेत् ॥ ५-१६०-१०० (३७३५९)
कथमाभ्यामभिध्यातः संस्पृष्टो दारुणेन वा ।
रणे जीवन्प्रमुच्येत पदा भूमिपुमस्पृशन् ॥ ५-१६०-१०१ (३७३६०)
किं दर्दुरः कूपशयो यथेमां
न बुध्यसे राजचमूं समेताम् ।
दुराधर्षां देवचमूप्रकाशां
गुप्तां नरेन्द्रैस्त्रिदशैरिव द्याम् ॥ ५-१६०-१०२ (३७३६१)
प्राच्यैः प्रतीच्यैरथ दाक्षिणात्यै-
रुदीच्यकाम्भोजशकैः खशैश्च ।
साल्वैः समत्स्यैः कुरुमध्यदेश्यै-
र्म्लेच्छैः पुलिन्दैर्द्रविडान्ध्रकाञ्च्यैः ॥ ५-१६०-१०३ (३७३६२)

नानाजनौघं युधि संप्रवृद्धं
गाङ्गं यथा वेगमपारणीयम् ।
मां च स्थितं नानाबलस्य मध्ये
युयुत्ससे मन्द किमल्पबुद्धे ॥ ५-१६०-१०४ (३७३६३)
अक्षय्याविषुधी चैव अग्निदत्तं च ते रथम् ।
जानीमो हि रणे पार्थ केतुं दिव्यं च भारत ॥ ५-१६०-१०५ (३७३६४)
अकत्थमानो युद्ध्यस्व कत्थसेऽर्जुन किं बहु ।
पर्यायात्सिद्धिरेतस्य नैतत्सिध्याति कत्थनात् ॥ ५-१६०-१०६ (३७३६५)
यदीदं कत्थनाल्लोके सिध्येत्कर्म धनञ्जय ।
सर्वे भवेयुः सिद्धार्थाः कत्थने को हि दुर्गतः ॥ ५-१६०-१०७ (३७३६६)
जनामि ते वासुदेवं सहायं
जानामि ते गाण्डिवं तालमात्रम् ।
जानाम्यहं त्वादृशो नास्ति योद्धा
जानानस्ते राज्यमेतद्धरामि ॥ ५-१६०-१०८ (३७३६७)
न तु पर्यायधर्मेम सिद्धिं प्राप्नोति मानवः ।
मनसैवानुकूलानि धातैव कुरुते वशे ॥ ५-१६०-१०९ (३७३६८)
त्रयोदशसमा भुक्तं राज्यं विलपतस्तव ।
भूयश्चैव प्रशासिष्ये त्वां निहत्य सबान्धवम् ॥ ५-१६०-११० (३७३६९)
क्व तदा गाण्डिवं तेऽभूद्यत्त्वं दासपणैर्जितः ।
क्व तदा भीमसेनस्य बलमासीच्च फाल्गुन ॥ ५-१६०-१११ (३७३७०)
सगदाद्भीमसेनाद्वा फाल्गुनाद्वा सगाण्डिवात् ।
न वै मोक्षस्तदा यो भूद्विना कृष्णमनिन्दितां ॥ ५-१६०-११२ (३७३७१)
सा वो दास्ये समापन्नान्मोचयामास पार्षती ।
अमानुष्यं समापन्नान्दासकर्मण्यवस्थितान् ॥ ५-१६०-११३ (३७३७२)
अवोचं यत्षण्डतिलानहं वस्तथयमेव तत् ।
धृता हि वेमी पार्थेन विराटनगरे तदा ॥ ५-१६०-११४ (३७३७३)
सूदकर्मणि च श्रान्तं विराटस्य महानसे ।
भीमसेनेन कौन्तेय यत्तु तन्मम पौरुषम् ॥ ५-१६०-११५ (३७३७४)
एवमेव सदा दण्डं क्षत्रियाः क्षत्रिये दधुः ।
वेणीं कृत्वा षण्डवेषः कन्यां नर्तितवानसि ॥ ५-१६०-११६ (३७३७५)
न भयाद्वासुदेवस्य न चापि तव फल्गुन ।
राज्यं प्रतिप्रदास्यामि युध्यस्व सहकेशवः ॥ ५-१६०-११७ (३७३७६)
न माया हीन्द्रजालं वा कुहका वापि भीषणा ।
आत्तशस्त्रस्य सङ्ग्रामे वहन्ति प्रतिगर्जनाः ॥ ५-१६०-११८ (३७३७७)
वासुदेवसहस्रं वा फाल्गुनानां शतानि वा ।
आसाद्य माममोघेषुं द्रविष्यन्ति दिशो दश ॥ ५-१६०-११९ (३७३७८)

संयुगं गच्छ भीष्मेण भिन्धि वा शिरसा गिरिम् ।
तरस्व वा महागाधं बाहुभ्यां पुरुषोदधिम् ॥ ५-१६०-१२० (३७३७९)
शारद्वतमहामीनं विविंशतिमहोरगम् ।
बृहद्बलमहोद्वेलं सौमदत्तितिमिङ्गिलम् ॥ ५-१६०-१२१ (३७३८०)
भीष्मवेगमपर्यन्तं द्रोणग्राहदुरसदम् ।
कर्णशल्यझषावर्तं काम्भोजबडबामुखम् ॥ ५-१६०-१२२ (३७३८१)
दुःशासनौघं शलशल्यमत्स्यं
सुषेणचित्रायुधनागनक्रम् ।
जयद्रथाद्रिं पुरुमित्रगाधं
दुर्मर्षणोदं शकुनिप्रपातम् ॥ ५-१६०-१२३ (३७३८२)
शश्त्रौघमक्षय्यमभिप्रवृद्धं
यदावगाह्य श्रमनष्टचेताः ।
भविष्यसि त्वं हतसर्वबान्धव-
स्तदा मनस्ते परितापमेष्यति ॥ ५-१६०-१२४ (३७३८३)
तदा मनस्ते त्रिदिवादिवाशुचे-
र्निवर्तिता पार्थ महीप्रशासनात् ।
प्रशाम्य राज्यं हि सुदुर्लभं त्वया
बुभूषितः स्वर्ग इवातपस्विना ॥ ॥ ५-१६०-१२५ (३७३८४)

इति श्रीमन्महाभारते उद्योगपर्वणि उलूकदूतागमनपर्वणि
षष्ट्यधिकशततमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-१६०-३ आरक्षस्य रक्षणीयस्य द्रव्यादेः विधिं रक्षाविधानम् ॥
५-१६०-११ भ्रातृभिः सहितः कथमधर्मे मनः कृथा इति संबन्धः ॥
५-१६०-१४ भो सुरा इति देवान् प्रह्लादः सबोधयति । यस्य व्रतस्य
धर्मध्वजो धर्मचिह्नं दर्भपवित्रपाणित्वादि। उच्छ्रितः
सर्वलोकविदितः ॥
५-१६०-१७ मनःशुद्धिं हिंसातो निवृत्तिम् ॥
५-१६०-१८ विस्रम्भं विश्वासम् ॥
५-१६०-३९ शिखा जटाधारणमितियत् तच्छद्ममात्रम् ॥
५-१६०-४४ धर्मिष्ठोऽसीत्युपाहसः ॥
५-१६०-५५ कुहका कृत्या प्रतिगर्जनाः विपरीतान्कोपान् वहन्ति प्रापयन्ति
नतु भयं जनयन्तीत्यर्थ गर्जनं निनदे कोपे इति मेदिनी ॥
५-१६०-५७ पर्यायतः पर्यायो भयप्रदर्शनादिरूपः प्रकारस्तेन सिद्धिः
स्वस्य नतु भवति । तथा परोपि तेन बुद्धिं मानुषी भयात्मिकां न

प्राप्नोति ॥
५-१६०-६२ सश्मश्रुकका शृङ्गं पुंस्त्वचिह्नं
श्मश्रुलत्वलिङ्गवत्त्वादिकं तत्सहिताः षण्डाः निर्वीर्याः सन्ति । येषु
तव शौर्यं प्रख्यातमिति भावः ॥
५-१६०-६४ तूबरकं अश्मश्रुपुरुषम् । अविद्यकं मूढम् ॥
५-१६०-७३ अर्थपतिभी राजभिः यतः कालात् तत आरम्भेत्यर्थः ॥
५-१६०-७४ मूढां यूयं मयि गुणवति स्वामिनि न संतुष्टाः स्थेति भावः ॥
५-१६०-७५ तत्तस्माद्धेतोर्मम वधार्थं च प्रयुध्यध्वमिति संबन्धः ॥
५-१६०-७७ पापं कर्म कुरुगुरुवाधाख्याम् । ५-१६०-८५ राज्यमाक्रम्य
मादृश इति शेषः । ५-१६०-८७ स्थानं स्थितिम् । तत्
स्थानराज्ययोरुद्धरणम् । पौरुषं पुरुषकर्म कुरु ॥
५-१६०-८९ धिष्ण्यात् गृहात् ॥
५-१६०-९३ लोहाभिसारः शस्त्राणां नीराजनादिकं तेषु मन्त्रेण
देवतावाहनादिकं च ॥
५-१६०-९७ वेदयोः श्रुतिधनुर्वेदयोः । अन्तगं पारगम् ॥
५-१६०-९९ युगं कालचक्रम् ॥
५-१६०-१०१ आभ्यां द्रोणभीष्माभ्यां अभिध्यातो हन्तव्यत्वेन निश्चितः ॥
५-१६०-१०२ दुर्दुरो मण्डूकः ॥
५-१६०-१०६ पर्यायात् युद्धप्रकारात् ॥
५-१६०-१०९ पर्यायधर्मेम उपधर्मेण मायादिना । अथवा राजपुत्रोऽयं
राज्यार्ह इति क्रमधर्मस्तेन न किंतु शौर्येणैव सिद्धिमाप्नोतीत्यर्थः
। मनसा संकल्पेन धातैव कुरुते नतु मनुष्यः ॥
५-१६०-११३ अमानुष्यं नीचमनुष्यत्वम् । अल्पार्थोऽत्र नञ् ॥
५-१६०-१२१ उद्वेलो वृद्धिः ॥
५-१६०-१२५ निवर्तिता निवर्तिष्यति । बुभूषितः प्राप्तुमिष्टः ॥

उद्योगपर्व - अध्याय १६१
॥ श्रीः ॥
५.१६१. अध्यायः १६१

Mahabharata - Udyoga Parva - Chapter Topics
उलूकेन पाण्डवानुपेत्य युधिष्ठिरार्जुनौप्रति दुर्योधनसन्देशकथनम्
॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१६१-० (३७३८५)

सञ्जय उवाच। ५-१६१-०क्ष् (३८५७)
सेनानिवेशं संप्राप्तः कैतव्यः पाण्डवस्य ह ।
समागतः पाण्डवेयैर्युधिष्ठिरमभाषत ॥ ५-१६१-१ (३७३८६)
अभिज्ञो दूतवाक्यानां यथोक्तं ब्रुवतो मम ।
दुर्योधनसमादेशं श्रुत्वा न क्रोद्धुमर्हसि ॥ ५-१६१-२ (३७३८७)
युधिष्ठिर उवाच। ५-१६१-३क्ष् (३८५८)
उलूक न भयं तेऽस्ति ब्रूहि त्वं विगतज्वरः ।
यन्मत्तं धार्तराष्ट्रस्य लुब्धस्यादीर्घदर्शिनः ॥ ५-१६१-३ (३७३८८)
सञ्जय उवाच। ५-१६१-४क्ष् (३८५९)
ततो द्युतिमतां मध्ये पाण्डवानां महात्मनाम् ।
सृञ्जयानां च मत्स्यानां कृष्णस्य च यशस्विनः ॥ ५-१६१-४ (३७३८९)
द्रुपदस्य सपुत्रस्य विराटस्य च संनिधौ ।
भूमिपानां च सर्वेषां मध्ये वाक्यं जगाद ह ॥ ५-१६१-५ (३७३९०)
उलूक उवाच। ५-१६१-६क्ष् (३८६०)
इदं त्वामब्रवीद्राजा धार्तराष्ट्रो महामनाः ।
शृण्वतां कुरुवीराणां तन्निबोध युधिष्ठिर ॥ ५-१६१-६ (३७३९१)
पराजितोऽसि द्यूतेन कृष्णा चानायिता सभाम् ।
शक्योऽमर्षो मनुष्येण कर्तुं पुरुषमानिना ॥ ५-१६१-७ (३७३९२)
द्वादशैव तु वर्षाणि वने धिष्ण्याद्विवासितः ।
संवत्सरं विराटस्य दास्यमास्थाय चोषितः ॥ ५-१६१-८ (३७३९३)
अमर्षं राज्यहरणं वनवासं च पाण्डव ।
द्रौपद्याश्च परिक्लेशं संस्मरन्पुरुषो भव ॥ ५-१६१-९ (३७३९४)
अशक्तेन च यच्छप्तं भीमसेनेन पाण्डव ।
दुःशासनस्य रुधिरं पीयतां यदि शक्यते ॥ ५-१६१-१० (३७३९५)
लोहाभिसारो निर्वृत्तः कुरुक्षेत्रमकर्दमम् ।
समः पन्था भृतास्तेश्वाः श्वो युध्यस्व सकेशवः ॥ ५-१६१-११ (३७३९६)
असमागम्य भीष्मेण संयुगे किं विकत्थसे ।
आरुरुक्षुर्यथा पङ्गुः पर्वतं गन्धमादनम् ॥ ५-१६१-१२ (३७३९७)
एवं कत्थसि कौन्तेय अकत्थन्पुरुषो भव ।
सूतपुत्रं सुदुर्धर्षं शल्यं च बलिनां वरम् ॥ ५-१६१-१३ (३७३९८)
द्रोणं च बलिनां श्रेष्ठं शचीपतिसमं युधि ।
अजित्वा संयुगे पार्थ राज्यं कथमिहेच्छसि ॥ ५-१६१-१४ (३७३९९)
ब्राह्मे धनुषि चाचार्यं वेदयोरन्तगं द्वयोः ।
युधि धुर्यमविक्षोभ्यमनीकचरमच्युतम् ॥ ५-१६१-१५ (३७४००)
द्रोणं महाद्युतिं पार्थ जेतुमिच्छसि तन्मृषा ।
न हि शुश्रुम वातेन मेरुमुन्मथितं गिरिम् ॥ ५-१६१-१६ (३७४०१)

अनिलो वा वहेन्मेरुं द्यौर्वापि निपतेन्महीम् ।
युगं वा परिवर्तेत यद्येवं स्याद्यथात्थ माम् ॥ ५-१६१-१७ (३७४०२)
को ह्यस्ति जीविताकाङ्क्षी प्राप्येममरिमर्दनम् ।
गजो वाजी रथो वापि पुनः स्वस्ति गृहान्व्रजेत् ॥ ५-१६१-१८ (३७४०३)
कथमाभ्यामभिध्यातः संसृष्टो दारुणेन वा ।
रणे जीवन्विमुच्येत पदा भूमिमुपस्पृशन् ॥ ५-१६१-१९ (३७४०४)
किं दुर्दुरः कूपशयो यथेमां
न बुध्यमे राजचमूं समेताम् ।
दुराधरषां देवचमूप्रकाशां
गुप्तां नरेन्द्रैस्त्रिदशैरिव द्याम् ॥ ५-१६१-२० (३७४०५)
प्राच्यैः प्रतीच्यैरथ दाक्षिणात्यै-
रुदीच्यकाम्भोजशकैः खशैश्च ।
साल्वैः समत्स्यैः कुरुमुख्यदेश्यै-
र्म्लेच्छैः पुलिन्दैर्द्रविडान्ध्रकाञ्च्यैः ॥ ५-१६१-२१ (३७४०६)
नानाजनौघं युधि संप्रवृद्धं
नाङ्गं यथा वेगमपारकणीयम् ।
मां च स्थितं नागबलस्य मध्ये
युयुत्समे मन्द किमल्पबुद्धे ॥ ५-१६१-२२ (३७४०७)
इत्येवमुक्त्वा राजानं धर्मपुत्रं युधिष्ठिरम् ।
अभ्यवृत्य पुनर्जिष्णुमुलूकः प्रत्यभाषत ॥ ५-१६१-२३ (३७४०८)
अकत्थमानो युध्यस्व कत्थेसेऽर्जुन किं बहु ।
पर्यायात्सिद्धिरेस्य नैतत्सिध्यति कत्थनात् ॥ ५-१६१-२४ (३७४०९)
यदीदं कत्थनाल्लोके सिध्येत्कर्म धनञ्जय ।
सर्वे भवेयुः सिद्धार्थाः कत्थने को हि दुर्गतः ॥ ५-१६१-२५ (३७४१०)
जानामि ते वासुदेवं सहायं
जानामि ते गाण्डिवं तालमात्रम् ।
जानाम्येतत्त्वादृशो नास्ति योद्धा
जानानस्ते राज्यमेतद्धरामि ॥ ५-१६१-२६ (३७४११)
न तु पर्यायधर्मेण राज्यं प्राप्नोति मानुषः ।
मनसैवानुकूलानि विधाता कुरुते वशे ॥ ५-१६१-२७ (३७४१२)
त्रयोदश समा भुक्तं राज्यं विलपतस्तव ।
भूयश्चैव प्रशासिष्ये निहत्य त्वां सबान्धवम् ॥ ५-१६१-२८ (३७४१३)
क्व तदा गाण्डिवं तेऽभूद्यत्त्वं दासपणैर्जितः ।
क्व तदा भीमसेनस्य बलमासीच्च फाल्गुना ॥ ५-१६१-२९ (३७४१४)
सगदाद्भीमसेनाद्वा पार्थाद्वापि सगाण्डिवात् ।
न वै मोक्षस्तदा वोभूद्विना कृष्णामनिन्दिताम् ॥ ५-१६१-३० (३७४१५)

सा वो दास्ये समापन्नान्मोचयामास पार्षती ।
अमानुष्यं समापन्नान्दासकर्मण्यवस्थितान् ॥ ५-१६१-३१ (३७४१६)
अवोचं यत्षण्डतिलानहं वस्तथ्यमेव तत् ।
धृता हि वेणी पार्थेन विराटनगरे तदा ॥ ५-१६१-३२ (३७४१७)
सूदकर्मणि च श्रान्तं विराटस्य महानसे ।
भीमसेनेन कौन्तेय यच्च तन्मम पौरुषम् ॥ ५-१६१-३३ (३७४१८)
एवमेतत्सदां दण्डं क्षत्रियाः क्षत्रिये दधुः ।
वेणीं कृत्वा षण्डवेषः कन्यां नर्तितवानसि ॥ ५-१६१-३४ (३७४१९)
न भयाद्वासुदेवस्य न चापि तव फाल्गुन ।
राज्यं प्रतिप्रदाकस्यामि युद्ध्यस्व सहकेशवः ॥ ५-१६१-३५ (३७४२०)
न माया हीन्द्रजालं वा कुहका वापि भीषणा ।
आत्तशस्त्रस्य मे युद्धे वहन्ति प्रतिगर्जनाः ॥ ५-१६१-३६ (३७४२१)
वासुदेवसहस्रं वा फाल्गुनानां शतानि वा ।
आसाद्य माममोघेषुं द्रविष्यन्ति दिशो दशः ॥ ५-१६१-३७ (३७४२२)
संयुगं गच्छ भूष्मेण भिन्धि वा शिरसा गिरिम् ।
तरेमं वा महागाधं सौमदत्तितिमिङ्गिलम् ॥ ५-१६१-३८ (३७४२३)
शारद्वतमहामीनं विविंशतिमहोरगम् ।
बृहद्बलमहोद्वेलं सौमदत्तिकतिमिङ्गितम् ॥ ५-१६१-३९ (३७४२४)
भीष्मवेगमपर्यन्तं द्रोणग्राहदुरासदम् ।
कर्णशल्यझषावर्तं काम्भोजबडबासुखम् ॥ ५-१६१-४० (३७४२५)
दुःशासनौघं शलशल्यमत्स्यं
सुषेणचित्रायुधनागनक्रम् ।
जयद्रथाद्रिं पुरुमित्रगाधं
दुर्मर्षणोदं शकुनिप्रपातम् ॥ ५-१६१-४१ (३७४२६)
शस्त्रौघमक्षय्यमतिप्रवृद्धं
यदावगाह्य श्रमनष्टचेताः ।
भविष्यसि त्वं हतसर्वबान्धव-
स्तदा मनस्ते परितापमेष्यति ॥ ५-१६१-४२ (३७४२७)
तदा मनस्ते त्रिदिवादिवाशुचे-
र्निवर्तिता पार्थ महीप्रशासनात् ।
प्रशाम्य राज्यं हि सुदुर्लभं त्वया
बुभूषितः स्वर्ग इवातपस्विना ॥ ॥ ५-१६१-४३ (३७४२८)

इति श्रीमन्महाभारते उद्योगपर्वणि उलूकदूतागमनपर्वणि
एकषष्ट्यधिकशततमोऽध्यायः ॥

॥ श्रीः ॥
५.१६२. अध्यायः १६२

Mahabharata - Udyoga Parva - Chapter Topics
भीमादिभिर्दुर्योधनंप्रति उलूकद्वारा प्रतिसन्देशप्रेषणम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१६२-० (३७४२९)
सञ्जय उवाच। ५-१६२-०क्ष् (३८६१)
उलूकस्त्वर्जुनं भूयो यथोक्तं वाक्यमब्रवीत् ।
आशीविषमिव क्रुद्धं तुदन्वाक्यशलाकया ॥ ५-१६२-१ (३७४३०)
तस्य तद्वचनं श्रुत्वा रुषिताः पाण्डवा भृशम् ।
प्रागेव भृशसंक्रुद्धाः कैतव्येनापि धर्षिताः ॥ ५-१६२-२ (३७४३१)
आसनेषूदतिष्ठन्त बाहूंश्चैव प्रचिक्षिपुः ।
आशीविषा इव क्रुद्धा वीक्षाञ्चक्रुः परस्परम् ॥ ५-१६२-३ (३७४३२)
अवाक्छिरा भीमसेनः समुदैक्षत कैतवम् ।
नेत्राभ्यां लोहितान्ताभ्यामाशीविष इव श्वसन् ॥ ५-१६२-४ (३७४३३)
आर्तं वातात्मजं दृष्ट्वा क्रोधेनाभिहतं भृशम् ।
उत्स्मयन्निव दाशार्हः कैतव्यं प्रत्यभाषत ॥ ५-१६२-५ (३७४३४)
प्रयाहि शीघ्रं कैतव्य ब्रूयाश्चैव सुयोधनम् ।
श्रुतं वाक्यं गृहीतोर्थो मतं यत्ते तथास्तु तत् ॥ ५-१६२-६ (३७४३५)
एवमुक्त्वा महाबाहुः केशवो राजसत्तम ।
पुनरेव महाप्राज्ञं युधिष्ठिरमुदैक्षत ॥ ५-१६२-७ (३७४३६)
सृञ्जयानां च सर्वेषां कृष्णस्य च यशस्विनः ।
द्रुपदस्य सपुत्रस्य विराटस्य च संनिधौ ॥ ५-१६२-८ (३७४३७)
भूमिपानां च सर्वेषां मध्ये वाक्यं जगाद ह ।
उलूकोऽप्यर्जुनं भूयो यथोक्तं वाक्यमब्रवीत् ॥ ५-१६२-९ (३७४३८)
आशीविषमिव क्रुद्धं तुदन्वाक्यशलाकया ।
कृष्णादींश्चैव तान्सर्वान्यथोक्तं वाक्यमब्रवीत् ॥ ५-१६२-१० (३७४३९)
उलूकस्य तु तद्वाक्यं पापं दारुणमीरितम् ।
श्रुत्वा विचुक्षुभे पार्थो ललाटं चाप्यमार्जयत् ॥ ५-१६२-११ (३७४४०)
तदवस्थं तदा दृष्ट्वा पार्थं सा समितिर्नृप ।
नामृष्यत महाराज पाण्डवानां महारथाः ॥ ५-१६२-१२ (३७४४१)
अधिक्षेपेण कृष्णस्य पार्थस्य च महात्मनः ।
श्रुत्वा ते पुरुषव्याघ्राः क्रोधाञ्जज्वलुरच्युत ॥ ५-१६२-१३ (३७४४२)

धृष्टद्युम्नः शिखण्डी च सात्यकिश्च महारथः ।
केकया भ्रातरः पञ्च राक्षसश्च घटोत्कचः ॥ ५-१६२-१४ (३७४४३)
द्रौपदेयाभिमन्युश्च धृष्टकेतुश्च पार्थिवः ।
भीमसेनश्च विक्रान्तो यमजौ च महारथौ ॥ ५-१६२-१५ (३७४४४)
उत्पेतुरासनात्सर्वे क्रोधसंरक्तलोचनाः ।
बाहुन्प्रगृह्य रुचिरान्रक्तचन्दनरूषितान् ।
अङ्गदैः पारिहार्यैश्च केयूरैश्च विभूषितान् ॥ ५-१६२-१६ (३७४४५)
दन्तान्दन्तेषु निष्पिष्य सृक्किणी परिलेलिहन् ।
तेषामाकारभावज्ञः कुन्तीपुत्रो वृकोदरः ॥ ५-१६२-१७ (३७४४६)
उदतिष्ठत्स वेगेन क्रोधेन प्रज्वलन्निव ।
उद्वृत्य सहसा नेत्रे दन्तान्कटकटाय्य च ॥ ५-१६२-१८ (३७४४७)
हस्तं हस्तेन निष्पिष्य उलूकं वाक्यमब्रवीत् ।
अशक्तानामिवास्माकं प्रोत्साहननिमित्तकम् ॥ ५-१६२-१९ (३७४४८)
श्रुतं ते चवनं मूर्ख यत्त्वां दुर्योधनोऽब्रवीत् ।
तन्मे कथयतो मन्द शृणु वाक्यं दुरासदम् ॥ ५-१६२-२० (३७४४९)
सर्वक्षत्रस्य मध्ये तं यद्वक्ष्यसि सुयोधनम् ।
शृण्वतः सूतपुत्रस्य पितुश्च त्वं दुरात्मनः ॥ ५-१६२-२१ (३७४५०)
अस्माभिः प्रीतिकामैस्तु भ्रातुर्ज्येष्ठस्य नित्यशः ।
मर्षितं ते दुराचार तत्त्वं न बहु मन्यसे ॥ ५-१६२-२२ (३७४५१)
प्रेषितश्च हृषीकेशः शमाकाङ्क्षी कुरून्प्रति ।
कुलस्य हितकामेन धर्मराजेन धीमता ॥ ५-१६२-२३ (३७४५२)
त्वं कालचोदितो नूनं गन्तुकामो यमक्षयम् ।
गच्छस्वाहवमस्माभिस्तच्च श्वो भविता ध्रुवम् ॥ ५-१६२-२४ (३७४५३)
मयापि च प्रतिज्ञातो वधः सभ्रातृकस्य ते ।
स तथा भविता पाप नात्र कार्या विचारणा ॥ ५-१६२-२५ (३७४५४)
वेलामतिक्रमेत्सद्यः सागरो वरुणालयः ।
पर्वताश्च विशीर्येयुर्मयोक्तं न मृषा भवेत् ॥ ५-१६२-२६ (३७४५५)
सहायस्ते यदि यमः कुबेरो रुद्र एव वा ।
यथाप्रतिज्ञं दुर्बुद्धे प्रकरिष्यन्ति पाण्डवाः ।
दुःशासनस्य रुधिरं पाता चास्मि यथेप्सितम् ॥ ५-१६२-२७ (३७४५६)
यश्चेह प्रतिसंरब्धः क्षत्रियो माभियास्यति ।
अपि भीष्मं पुरुस्कृत्य तं नेष्यामि यमक्षयम् ॥ ५-१६२-२८ (३७४५७)
यच्चैतदुक्तं वचनं मया क्षत्रस्य संसदि ।
यथैतद्भविता सत्यं तथैवात्मानमालभे ॥ ५-१६२-२९ (३७४५८)
भीमसेनवचः श्रुत्वा सहदेवोऽप्यमर्षणः ।
क्रोधसंरक्तनयनस्ततो वाक्यमुवाच ह ॥ ५-१६२-३० (३७४५९)

शौटीरशूरसदृशमनीकजनसंसदि ।
श्रृणु पाप वचो मह्यं यद्वाच्यो हि पितात्वया ॥ ५-१६२-३१ (३७४६०)
नास्माकं भविता भेदः कदाचित्कुरुभिः सह ।
धृतराष्ट्रस्य संबन्धो यदि न स्यात्त्वया सह ॥ ५-१६२-३२ (३७४६१)
त्वं तु लोकविनाशाय धृतराष्ट्रकुलस्य च ।
उत्पन्नो वैरपुरुषः स्वकुलघ्नश्च पापकृत् ॥ ५-१६२-३३ (३७४६२)
जन्मप्रभृति चास्माकं पिता ते पापपूरुषः ।
अहितानि नृशंसानि नित्यशः कर्तुमिच्छति ॥ ५-१६२-३४ (३७४६३)
तस्य वैरानुषङ्गस्य गन्तास्म्यन्तं सुदुर्गमम् ।
अहमादौ निहत्य त्वां शकुनेः संप्रपश्यतः ॥ ५-१६२-३५ (३७४६४)
ततोऽस्मि शकुनिं हन्ता मिषतां सर्वधन्विनाम् ।
भीमस्य वचनं श्रुत्वा सहदेवस्य चोभयोः ॥ ५-१६२-३६ (३७४६५)
उवाच फाल्गुनो वाक्यं भीमसेनं स्मयन्निव ।
भीमसेन न ते सन्ति येषां वैरं त्वया सह ॥ ५-१६२-३७ (३७४६६)
मन्दा गृहेषु सुखिनो मृत्युपाशवशं गताः ।
उलूकश्च न ते वाच्यः परुषं पुरुषोत्तम ॥ ५-१६२-३८ (३७४६७)
दूताः किमपराध्यन्ते यथोक्तस्यानुभाषिणः ।
एवमुक्त्वा महाबाहुर्भीमं भीमपराक्रमम् ॥ ५-१६२-३९ (३७४६८)
धृष्टद्युम्नसुखान्वीरान्सुहृदः समभाषत ।
श्रुतं वस्तस्य पापस्य धार्तराष्ट्रस्य भाषितम् ॥ ५-१६२-४० (३७४६९)
कुत्सनं वासुदेवस्य मम चैव विशेषतः ।
श्रुत्वा भवन्तः संरब्धा अस्माकं हितकाम्यया ॥ ५-१६२-४१ (३७४७०)
प्रभावाद्वासुदेवस्य भवतां च प्रयत्नतः ।
समग्रं पार्थिवं क्षत्रं सर्वं न गणयाम्यहम् ॥ ५-१६२-४२ (३७४७१)
भवद्भिः समनुज्ञातो वाक्यमस्य यदुत्तरम् ।
उलूके प्रापयिष्यामि यद्वक्ष्यति सुयोधनम् ॥ ५-१६२-४३ (३७४७२)
श्वो भूते कत्थितस्यास्य प्रतिवाक्यं चमूमुखे ।
गाण्डीवेनाभिधास्याकमि क्लीबा हि वचनोत्तराः । ५-१६२-४४ (३७४७३)
ततस्ते पार्थिवाः सर्वे प्रशशंसुर्धनञ्जयम् ।
तेन वाक्योपचारेण विस्मिता राजसत्तमाः ॥ ५-१६२-४५ (३७४७४)
अनुनीय च तान्सर्वान्यथामान्यं यथावयः ।
धर्मराजं तदा वाक्यं तत्प्राप्यं प्रत्यभाषत ॥ ५-१६२-४६ (३७४७५)
आत्मानमवमन्वानो न हि स्यात्पार्थिवोत्तमः ।
तत्रोत्तरं प्रवक्ष्यामि तव शुश्रूषणे रतः ॥ ५-१६२-४७ (३७४७६)
उलूकं भरतश्रेष्ठ सामपूर्वमथोर्जितम् ।
दुर्योधनस्य तद्वाक्यं निशम्य भरतर्षभः ॥ ५-१६२-४८ (३७४७७)

अतिलोहितनेत्राभ्यामाशीविष इव श्वसन् ।
स्मयमान इव क्रोधात्सृक्किणी परिसंलिहन् ॥ ५-१६२-४९ (३७४७८)
जनार्दनमभिप्रेक्ष्य भ्रातॄंश्चैवेदमब्रवीत् ।
अभ्यभाषत कैतव्यं प्रगृह्य विपुलं भुजम् ॥ ५-१६२-५० (३७४७९)
उलूक गच्छ कैतव्य ब्रूहि तात सुयोधनम् ।
कृतघ्नं वैरपुरुषं दुर्मतिं कुलपांसनम् ॥ ५-१६२-५१ (३७४८०)
पाण्डवेषु सदा पाप नित्यं जिह्मं प्रवर्तते ।
स्ववीर्याद्यः पराक्रम्य पाप आह्वयते परान् ।
अभीतः पूरयन्वाक्यमेष वैः क्षत्रियः पुमान् ॥ ५-१६२-५२ (३७४८१)
स पापः क्षत्रियो भूत्वा अस्मानाहूय संयुगे ।
मान्यामान्यान्पुरस्कृत्य युद्धं मा गाः कुलाधम ॥ ५-१६२-५३ (३७४८२)
आत्मवीर्यं समाश्रिकत्य भृत्यवीर्यं च कौरव ।
आह्वयस्व रणे पार्थान्सर्वथा क्षत्रियो भव ॥ ५-१६२-५४ (३७४८३)
परवीर्यं समाश्रित्य यः समाह्वयते परान् ।
अशक्तः स्वयमादातुमेतदेव नपुंसकम् ॥ ५-१६२-५५ (३७४८४)
स त्वं परेषां वीर्येण आत्मानं बहुमन्यसे ।
कथमेवमशक्तस्त्वमस्मान्समभिगर्जसि ॥ ५-१६२-५६ (३७४८५)
कृष्ण उवाच। ५-१६२-५७क्ष् (३८६२)
मद्वचश्चापि भूयस्ते वक्तव्यः स सुयोधनः ।
श्व इदानीं प्रपद्येथाः पुरुषो भव दुर्मते ॥ ५-१६२-५७ (३७४८६)
मन्यसे यच्च मूढ त्वं न योत्स्यति जनार्दनः ।
सारथ्येन वृतः पार्थैरिति त्वं न बिभेषि च ॥ ५-१६२-५८ (३७४८७)
जघन्यकालमप्येतन्न भवेत्सर्वपार्थिवान् ।
निर्दहेयमहं क्रोधात्तृणानीव हुताशनः ॥ ५-१६२-५९ (३७४८८)
युधिष्ठिरनियोगात्तु फाल्गुनस्य महात्मनः ।
करिष्ये युध्यमानस्य सारथ्यं विजितात्मनः ॥ ५-१६२-६० (३७४८९)
यद्युत्पतसि लोकांस्त्रीन्यद्याविशसि भूतलम् ।
तत्रतत्रार्जुनरथं प्रभाते द्रक्ष्यसे पुनः ॥ ५-१६२-६१ (३७४९०)
यच्चापि भीमसेनस्य मन्यसे मोघभाषितम् ।
दुःशासनस्य रुधिरं पीतमद्यावधारय ॥ ५-१६२-६२ (३७४९१)
न त्वां समीक्षते पार्थो नापि राजा युधिष्ठिरः ।
न भीमसेनो न यमौ प्रतिकूलप्रभाषिणम् ॥ ॥ ५-१६२-६३ (३७४९२)

इति श्रीमन्महाभारते उद्योगपर्वणि उलूकदूतागमनपर्वणि
द्विषष्ट्यधिकशततमोऽध्यायः ॥

५-१६२-१२ समितिः सभा ॥
५-१६२-३१ शौटीरः सगर्वः । शूरो विक्रान्तः । मह्यं मम ॥
५-१६२-५५ नपुंसकं नपुंसकत्वं तव ॥
५-१६२-६३ समीक्षते गणयति ॥

उद्योगपर्व - अध्याय १६३
॥ श्रीः ॥
५.१६३. अध्यायः १६३

Mahabharata - Udyoga Parva - Chapter Topics
अर्जुनादिभिः सर्वैरुलूकद्वारा पृथक्पृथग्दुर्योधनंप्रति
प्रतिसन्देशप्रेषणम् ॥ १ ॥
उलूकेन दुर्योधनंप्रति युधिष्ठिरादिप्रतिसन्देशकथनम् ॥ २ ॥
दुर्योधनाज्ञया कर्णेन सेनासु युद्धसन्नाहोद्घोषणम् ॥ ३ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१६३-० (३७४९३)
सञ्जय उवाच । ५-१६३-०क्ष् (३८६३)
दुर्योधनस्य तद्वाक्यं निशम्य भरतर्षभ ।
नेत्राभ्यामतिताम्राभ्यां कैतव्यं समुदैक्षत ॥ ५-१६३-१ (३७४९४)
स केशवमभिप्रेक्ष्य गुडाकेशो महायशाः ।
अभ्यभाषत कैतव्यं प्रगृह्य विपुलं भुजम् ॥ ५-१६३-२ (३७४९५)
स्ववीर्यं यः समाश्रित्य समाह्वयति वै परान् ।
अभीतो युध्यते शत्रून्स वै पुरुष उच्यते ॥ ५-१६३-३ (३७४९६)
परवीर्यं समाश्रित्य यः समाह्वयते परान् ।
क्षत्रबन्धुरशक्तत्वाल्लोके स पुरुषाधमः ॥ ५-१६३-४ (३७४९७)
स त्वं परेषां वीर्येण मन्यसे वीर्यमात्मनः ।
स्वयं कापुरुषो मूढ परांश्च क्षेप्तुमिच्छसि ॥ ५-१६३-५ (३७४९८)
यस्त्वं वृद्धं सर्वराज्ञां हितबुद्धिं जितेन्द्रियम् ।
मरणाय महाप्रज्ञं दीक्षयित्वा विकत्थसे ॥ ५-१६३-६ (३७४९९)
भावस्ते विदितोऽस्माभिर्दुर्बुद्धे कुलपांसन ।
न हनिष्यन्ति गाङ्गेयं पाण्डवा घृणयेति हि ॥ ५-१६३-७ (३७५००)
यस्य वीर्यं समाश्रित्य धार्तराष्ट्र विकत्थसे ।
हन्तास्मि प्रथमं भीष्मं मिषतां सर्वधन्विनाम् । ५-१६३-८ (३७५०१)
कैतव्य गत्वा भरतान्समेत्य

सुयोधनं धार्तराष्ट्रं वदस्व ।
तथेत्युवाचार्जुनः सव्यसाची
निशाव्यपाये भविता विमर्दः ॥ ५-१६३-९ (३७५०२)
यद्वा ब्रवीद्वाक्यमदीनसत्वो
मध्ये कुरून्हर्षयन्सत्यसन्धः ।
अहं हन्ता सृञ्जयानामनीकं
साल्वेयकांश्चेति ममैष भारः ।
कैतव्य गत्वा भरतान्समेत्य
सुयोधनं धार्तराष्ट्रं वदस्व ॥ ५-१६३-१० (३७५०३)
हन्यामहं द्रोणमृतेऽपि लोकं
न ते भयं विद्यते पाण्डवेभ्यः ।
ततो हि ते लब्धमतं च राज्य-
मापद्गताः पाण्डवाश्चेति भावः ॥ ५-१६३-११ (३७५०४)
स दर्पपूर्णो न समीक्षसे त्व-
मनर्थमात्मन्यपि वर्तमानम् ।
तस्मादहं ते प्रथमं समूहे
हन्ता समक्ष कुरुवृद्धमेव ॥ ५-१६३-१२ (३७५०५)
सूर्योदये युक्तसेनः प्रतीक्ष्य
ध्वजी रथी रक्षत सत्यसन्धम् ।
अहं हि वः पश्यतां द्विपमेनं
भीष्मं रथात्पातयिष्यामि बाणैः ॥ ५-१६३-१३ (३७५०६)
श्वोभूते कत्थनावाक्यं विज्ञास्यति सुयोधनः ।
आचितं शरजालेन मया दृष्ट्वा पितामहम् ॥ ५-१६३-१४ (३७५०७)
यदुक्तश्च सभामध्ये पुरुषो ह्रस्वदर्शनः ।
क्रुद्धेन भीमसेनेन भ्राता दुःशासनस्तव ॥ ५-१६३-१५ (३७५०८)
अधर्मज्ञो नित्यवैरी पापबुद्धिर्नृशंसकृत् ।
सत्यां प्रतिज्ञामचिराद्द्रक्ष्यसे तां सुयोधन ॥ ५-१६३-१६ (३७५०९)
अभिमानस्य दर्पस्य क्रोधपारुष्ययोस्तथा ।
नैष्ठुर्यस्यावलेपस्य आत्मसंभावनस्य च ॥ ५-१६३-१७ (३७५१०)
नृशंसतायास्तैक्ष्ण्यस्य धर्मविद्वेषणस्य च ।
अधर्मस्यातिवादस्य वृद्धातिक्रमणस्य च ॥ ५-१६३-१८ (३७५११)
दर्शनस्य च चक्रस्य कृत्स्नस्यापनयस्य च ।
द्रक्ष्यसि त्वं फलं तीव्रमचिरेण सुयोधन ॥ ५-१६३-१९ (३७५१२)
वासुदेवद्वितीये हि मयि क्रुद्धे नराधम ।
आशा ते जीविते मूढ राज्ये वा केन हेतुना ॥ ५-१६३-२० (३७५१३)
शान्ते भीष्मे तथा द्रोणे सूतपुत्रे च पातिते ।

निराशो जीविते राज्ये पुत्रेषु च भविष्यसि ॥ ५-१६३-२१ (३७५१४)
भ्रातॄणां निधनं श्रुत्वा पुत्राणां च सुयोधन ।
भीमसेनेन निहतो दुष्कृतानि स्मरिष्यसि ॥ ५-१६३-२२ (३७५१५)
न द्वितीयां प्रतिज्ञां हि प्रतिजानामि कैतव ।
सत्यं ब्रवीम्यहं ह्येतत्सर्वं सत्यं भविष्यति ॥ ५-१६३-२३ (३७५१६)
युधिष्ठिरोऽपि कैतव्यमुलूकमिदमब्रवीत् ।
उलूक मद्वचो ब्रूहि गत्वा तात सुयोधनम् ॥ ५-१६३-२४ (३७५१७)
स्वेन वृत्तेन मे वृत्तं नाधिगन्तुं त्वमर्हसि ।
उभयोरन्तरं वेद सूनृतानृतयोरपि ॥ ५-१६३-२५ (३७५१८)
न चाहं कामये पापमपि कीटपिपीलकयोः ।
किं पुनर्ज्ञातिषु वधं कामयेयं कथं च न ॥ ५-१६३-२६ (३७५१९)
एतदर्थं मया तात पञ्च ग्रामा वृताः पुरा ।
कथं तव सुदुर्बुद्धे न प्रेक्ष्ये व्यसनं महत् ॥ ५-१६३-२७ (३७५२०)
स त्वं कामपरीतात्मा मूढभावाच्च कत्थसे ।
तथैव वासुदेवस्य न गृह्णासि हितं वचः । ५-१६३-२८ (३७५२१)
किंचेदानीं बहूक्तेन युध्यस्व सह बान्धवैः ।
मम विप्रियकर्तारं कैतव्य सह बान्धवैः । ५-१६३-२९ (३७५२२)
मम विप्रियकर्तारं कैतव्य ब्रूहि कौरवम् ॥
श्रुतं वाक्यं गृहीतोऽर्थो मतं यत्ते तथास्तु तत्। ५-१६३-३० (३७५२३)
भीमसेनस्ततो वाक्यं भूय आह नृपात्मजम् ॥
उलूक मद्वचो ब्रूहि दुर्मतिं पापपूरुषम्। ५-१६३-३१ (३७५२४)
शठं नैकृतिकं पापं दुराचारं सुयोधनम् ॥
गृध्रोदरे वा वस्तव्यं पुरे वा नागसाह्वये । ५-१६३-३२ (३७५२५)
प्रतिज्ञातं मया यच्च सभामध्ये नराधम ॥
कर्ताहं तद्वचः सत्यं सत्येनैव शपामि ते। ५-१६३-३३ (३७५२६)
दुःशासनस्य रुधिरं हत्वा पास्याम्यहं मृधे ॥
सक्थिनी तव भंक्त्वैव हत्वा हि तव सोदनान्। ५-१६३-३४ (३७५२७)
सर्वेषां राजपुत्राणामभिमन्युरसंशयम् ।
कर्मणा तोषयिष्यामि भूयश्चैव वचः शृणु ॥ ५-१६३-३५ (३७५२८)
हत्वा सुयोधन त्वां वै सहितं सर्वसोदरैः ।
आक्रमिष्ये पदा मूर्ध्नि धर्मराजस्य पश्यतः ॥ ५-१६३-३६ (३७५२९)
नकुलस्तु ततो वाक्यमिदमाह महीपते ।
उलूक ब्रूहि कौरव्यं धार्तराष्ट्रं सुयोधनम् ॥ ५-१६३-३७ (३७५३०)
श्रुतं ते गदतो वाक्यं सर्वमेव यथातथम् ।
तथा कर्तास्मि कौरव्य यथा त्वमनुशासि मां ॥ ५-१६३-३९असहदेवोऽपि
नृपते इदमाह वचोऽर्थवत् ।

सुयोधन मतिर्या ते वृथैषा ते भविष्यति ॥ ५-१६३-३८ (३७५३१)
शोचिष्यसे महाराज सपुत्रज्ञातिबान्धवः ।
इमं च क्लेशमस्माकं हृष्टो यत्त्वं विकत्थसे ॥ ५-१६३-४० (३७५३२)
विराटद्रुपदौ वृद्धावुलूकमिदमूचतुः ।
दासभावं नियच्छेव साधोरिति मतिः सदा ।
तौ च दासावदासौ वा पौरुषं यस्य यादृशम् ॥ ५-१६३-४१ (३७५३३)
शिखण्डी तु ततो वाक्यमुलूकमिदमब्रवीत् ।
वक्तव्यो भवता राजा पापेष्वभिरतः सदा ॥ ५-१६३-४२ (३७५३४)
पश्य त्वं मां रणे राजन्कुर्वाणं कर्म दारुणम् ।
यस्य वीर्यं समासाद्य मन्यसे विजयं युधि ॥ ५-१६३-४३ (३७५३५)
तमहं पातयिष्यामि रथात्तव पितामहम् ।
अहं भीष्मवधात्सृष्टो नूनं धात्रा महात्मना ॥ ५-१६३-४४ (३७५३६)
सोऽहं भीष्मं हनिष्यामि मिषतां सर्वधन्विनाम् ।
धृष्टद्युम्नोऽपि कैतव्यमुलूकमिदमब्रवीत् ॥ ५-१६३-४५ (३७५३७)
सुयोधनो मम वचो वक्तव्यो नृपतेः सुतः ।
अहं द्रोणं हनिष्यामि सगणं सहबान्धवम् ॥ ५-१६३-४६ (३७५३८)
अवश्यं च मया कार्यं पूर्वेषां चरितं महत् ।
कर्ता चाहं तथा कर्म यथा नान्यः करिष्यति ५-१६३-४७ (३७५३९)
तमब्रवीद्धर्मराजः कारुण्यार्थं वचो महत् ।
नाहं ज्ञातिवधं राजन्कामयेयं कथंचन ॥ ५-१६३-४८ (३७५४०)
तवैव दोषाद्दुर्बुद्धे सर्वमेतत्त्वनावृतम् ।
स गच्छ माचिरं तात उलूक यदि मन्यसे ॥ ५-१६३-४९ (३७५४१)
इह वा तिष्ठ भद्रं ते वयं हि तव बान्धवाः ।
उलूकस्तु ततो राजन्धर्मपुत्रं युधिष्ठिरम् ॥ ५-१६३-५० (३७५४२)
आमन्त्र्य प्रययौ तत्र यत्र राजा सुयोधनः ।
उलूकस्तत आगमक्य दुर्योधनममर्षणम् ॥ ५-१६३-५१ (३७५४३)
अर्जुनस्य समादेशं यथोक्तं सर्वमब्रवीत् ।
वासुदेवस्य भीमस्य धर्मराजस्य पौरुषम् ॥ ५-१६३-५२ (३७५४४)
नकुलस्य विराटस्य द्रुपदस्य च भारत ।
सहदेवस्य च वचो धृष्टद्युम्नशिखण्डिनोः ।
केशवार्जुनयोर्वाक्यं यथोक्तं सर्वमब्रवीत् ॥ ५-१६३-५३ (३७५४५)
कैतव्यस्य तु तद्वाक्यं निशम्य भरतर्षभः ।
दुःशासनं च कर्णं च शकुनिं चापि भारत ॥ ५-१६३-५४ (३७५४६)
आज्ञपयत राज्ञश्च बलं मित्रबलं तथा ।
यथा प्रागुदयात्सर्वे युक्तास्तिष्ठन्त्यनीकिनः ॥ ५-१६३-५५ (३७५४७)
ततः कर्णसमादिष्टा दूताः सन्त्वरिता रथैः ।

उष्ट्रवामीभिरप्यन्ये सदश्वैश्च महाजवैः ॥ ५-१६३-५६ (३७५४८)
तूर्णं परिययुः सेनां कृत्स्नां कर्णस्य शासनात् ।
आज्ञापयन्तो राज्ञश्च योगः प्रागुदयादिति ॥ ॥ ५-१६३-५७ (३७५४९)

इति श्रीमन्महाभारते उद्योगपर्वणि उलूकदूतागमनपर्वणि
त्रिष्टष्यधिकशततमोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-१६३-६ वृद्धं बाह्लिकं भीष्मं च ॥
५-१६३-१० सत्यसंधो भीष्मः । भीष्मवाक्यमेवाह अहं हन्तेति। हे
कैतव्य अहं हन्तेत्यादि मदीयं वाक्यं भरतान् पाण्डवान्प्रति गत्वा
वदस्व । किं कृत्वा सुयोधनं समेत्य मदीयं संदेशं दुर्योधनाय
श्रावयित्वा पाण्डवान्प्रति कथयेत्यर्थः। तेन दुर्योधनसुखं
पाण्डवानां भयं चोदेष्यतीति भावः ॥
५-१६३-११ द्रोणमृतेपि द्रोणंविनाप्यसहाय एवाहं लोकं हन्याम् । ततो
भीष्मवाक्यात्। ते तव भाव एवंभूतो जात इत्यर्थः ॥
५-१६३-१२ हन्ता हनिष्यामि । कुरुवृद्धं भीष्मम् ॥
५-१६३-१३ यो युक्तसेनो ध्वजी रथी तं रक्षतेति योजना ॥
५-१६३-१९ दर्शनं कर्णादिषु जयनिश्चयः । चक्रं सेनाया आधिक्यम्
। अपनयः अस्माकं दूरीकरणम् । एतेषां फलं द्रक्ष्यसि ॥
५-१६३-२५ वेद विद्मि ॥
५-१६३-२७ हे सुदुर्बुद्धे तव व्यसनं मरणागमं कथमपि न प्रेक्ष्ये
इति हेतोः पञ्चग्रामा वृता इति संबन्धः ॥
५-१६३-४१ साधोः दासभावं नियच्छेव नितरां यच्छेव प्रार्थयावहे
। तौ च आवां दासावदासौवेति यस्य तव यादृशं पौरुषं तत्तथैव
श्वो द्रक्ष्याव इति शेषः ॥
५-१६३-४४ वधात् वधहेतोः ॥
५-१६३-४७ पूर्वेषां चरितं द्रोणवधेन पितृवैरप्रतियातनम् ॥
५-१६३-४९ अनावृतं विस्पष्टम् ॥

उद्योगपर्व - अध्याय १६४
॥ श्रीः ॥
५.१६४. अध्यायः १६४

Mahabharata - Udyoga Parva - Chapter Topics
युधिष्ठिरेण युद्धाय सेनानिर्यातनम् ॥ १ ॥
धृष्टद्युम्नेन भीमादीनां दुर्योधनादिभिः सह द्वन्द्वयुद्धाय

समादेशः ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१६४-० (३७५५०)
संजय उवाच। ५-१६४-०क्ष् (३८६४)
उलूकस्य वृत्तः श्रुत्वा कुन्तीपुत्रो युधिष्ठिरः ।
सेनां नियापयामास धृष्टद्युम्नपुरोगमाम् ॥ ५-१६४-१ (३७५५१)
पदातिनीं नागवतीं रथिनीमश्ववृन्दिनीम् ।
चतुर्विधबलां भीमामकम्पां पृथिवीमिव ॥ ५-१६४-२ (३७५५२)
भीमसेनादिभिर्गुप्तां सार्जुनैश्च महारथैः ।
धृष्टद्युम्नवशां दुर्गां सागरस्तिमितोपमाम् ॥ ५-१६४-३ (३७५५३)
तस्यास्त्वग्रे महेष्वासः पाञ्चाल्यो युद्धदुर्मदः ।
द्रोणप्रेप्सुरनीकानि धृष्टद्युम्नो व्यकर्षत ॥ ५-१६४-४ (३७५५४)
यथाबलं यथोत्साहं रथिनः समुपादिशत् ।
अर्जुनं सूतपुत्राय भीमं दुर्योधनाय च ॥ ५-१६४-५ (३७५५५)
धृष्टकेतुं च शल्याय गौतमायोत्तमौजसम् ।
अश्वात्थाम्ने च नकुलं शैब्यं च कृतवर्मणे ॥ ५-१६४-६ (३७५५६)
सैन्धवाय च वार्ष्णेयं युयुधानं समादिशत् ।
शिखण्डिनं च भीष्माय प्रमुखे समकल्पयत् ॥ ५-१६४-७ (३७५५७)
सहदेवं शकुनये चेकितानं शलाय वै ।
द्रौपदेयांस्तथा पञ्च त्रिगर्तेभ्यः समादिशत् ॥ ५-१६४-८ (३७५५८)
वृषसेनाय सौभद्रं शेषाणां च महीक्षिताम् ।
स समर्थं हि तं मेने पार्थादभ्यधिकं रणे ॥ ५-१६४-९ (३७५५९)
एवं विभज्य योधांस्तान्पृथक्व सह चैव ह ।
ज्वालावर्णो महेष्वासो द्रोणमंशमकल्पयत् ॥ ५-१६४-१० (३७५६०)
धृष्टद्युम्नो महेष्वासः सेनापतिपतिस्ततः ।
विधिवद्बूह्य मेधावी युद्धाय धृतमानसः ॥ ५-१६४-११ (३७५६१)
यथोद्दिष्टानि सैन्यानि पाण्डवानामयोजयत् ।
जयाय पाण्डुपुत्राणां यत्तस्तस्थौ रणाजिरे ॥ ॥ ५-१६४-१२ (३७५६२)

इति श्रीमन्महाभारते उद्योगपर्वणि उलूकदूतागमनपर्वणि
चतुःषष्ट्यधिकशततमोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-१६४-१० अंशं स्वकीयमिति शेषः ॥

उद्योगपर्व - अध्याय १६५
॥ श्रीः ॥
५.१६५. अध्यायः १६५

Mahabharata - Udyoga Parva - Chapter Topics
भीष्मेण दुर्योधनाय स्वसामर्थ्यकथनपूर्वकमभयप्रदानम् ॥ १ ॥
तथा दुर्योधनप्रश्नेन स्वसेनायां रथातिरथसंख्यानम् ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१६५-० (३७५६३)
धृतराष्ट्र उवाच। ५-१६५-०क्ष् (३८६५)
प्रतिज्ञाते फाल्गुनेन वधे भीष्मस्य संयुगे ।
किमकुर्वत मे मन्दाः पुत्रा दुर्योधनादयः ॥ ५-१६५-१ (३७५६४)
हतमेव हि पश्यामि गाङ्गेयं पितरं रणे ।
वासुदेवसहायेन पार्थेन दृढधन्वना ॥ ५-१६५-२ (३७५६५)
स चापरिमितप्रज्ञस्तच्छ्रुत्वा पार्थभाषितम् ।
किमुक्तवान्महेष्वासो भीष्मः प्रहरतां वरः ॥ ५-१६५-३ (३७५६६)
सैनापत्यं च संप्राप्य कौरवाणां धुरंधरः ।
किमचेष्टत गाङ्गेयो महाबुद्धिपराक्रमः ॥ ५-१६५-४ (३७५६७)
वैशम्पायन उवाच। ५-१६५-५क्ष् (३८६६)
ततस्तत्सञ्जयस्तस्मै सर्वमेव न्यवेदयत् ।
यथोक्तं कुरुवृद्धेन भीष्मेणामिततेजसा ॥ ५-१६५-५ (३७५६८)
सञ्जय उवाच। ५-१६५-६क्ष् (३८६७)
सैनापत्यमनुप्राप्य भीष्मः शान्तनवो नृप ।
दुर्योधनमुवाचेदं वचनं हर्षयन्निव ॥ ५-१६५-६ (३७५६९)
नमस्कृत्य कुमाराय सेनान्ये शक्तिपाणये ।
अहं सेनापतिस्तेऽद्य भविष्यामि न संशयः । ५-१६५-७ (३७५७०)
सेनाकर्मण्यिज्ञोऽस्मि व्यूहेषु विविधेषु च ।
कर्म कारयितुं चैव भृतानप्यभृतांस्तथा ॥ ५-१६५-८ (३७५७१)
यात्रायाने च युद्धे च तथा प्रशमनेषु च ।
भृशं वेद महाराज यथा वेद बृहस्पतिः ॥ ५-१६५-९ (३७५७२)
व्यूहानां च समारम्भान्दैवगान्धर्वमानुषान् ।
तैरहं मोहयिष्यामि पाण्डवान्व्येतु ते ज्वरः ॥ ५-१६५-१० (३७५७३)
सोऽहं योत्स्यामि तत्त्वेन पालयंस्तव वाहिनीम् ।
यथावच्छास्त्रतो राजन्व्येतु ते मानसो ज्वरः ॥ ५-१६५-११ (३७५७४)

दुर्योधन उवाच। ५-१६५-१२क्ष् (३८६८)
विद्यते मे न गाङ्गेय भयं देवासुरेष्वपि ।
समस्तेषु महाबाहो सत्यमेतद्ब्रवीमि ते ॥ ५-१६५-१२ (३७५७५)
किं पुनस्त्वयि दुर्धर्षे सैनापत्ये व्यवस्थिते ।
द्रोणे च पुरुषव्याघ्रे स्थिते युद्धाभिनन्दिनि ॥ ५-१६५-१३ (३७५७६)
भवद्भ्यां पुरुषाग्र्याभ्यां स्थिताभ्यां विजयो मम ।
न दुर्लभं कुरुश्रेष्ठ देवराज्यमपि ध्रुवम् ॥ ५-१६५-१४ (३७५७७)
रथसङ्ख्यां तु कात्स्न्र्येन परेषामात्मनस्तथा ।
तथैवातिरथानां च वेत्तुमिच्छामि कौरव ॥ ५-१६५-१५ (३७५७८)
पितामहो हि कुशलः परेषामात्मनस्तथा ।
श्रोतुमिच्छाम्यहं सर्वैः सहैभिर्वसुधाधिपैः ॥ ५-१६५-१६ (३७५७९)
भीष्म उवाच। ५-१६५-१७क्ष् (३८६९)
गान्धारे श्रृणु राजेन्द्र रथसंख्यां स्वके बले ।
ये रथाः पृथिवीपाल तथैवातिरथाश्च ये ॥ ५-१६५-१७ (३७५८०)
बहूनीह सहस्राणि प्रयुतान्यर्बुदानि च ।
रथानां तव सेनायां यथामुख्यं तु मे श्रुणु ॥ ५-१६५-१८ (३७५८१)
भवानग्रे रथोदारः सह सर्वैः सहोदरैः ।
दुःशासनप्रभृतिभिर्भ्रातृभिः शतसंमितैः ॥ ५-१६५-१९ (३७५८२)
सर्वे कृतप्रहरणाश्छेदभेदविशारदाः ।
रथोपस्थे गजस्कन्धे गदाप्रासासिचर्मणि ॥ ५-१६५-२० (३७५८३)
संयन्तारः प्रहर्तारः कृतास्त्रा भारसाधनाः ।
इष्वस्त्रे द्रोणशिष्याश्च कृपस्य च शरद्वतः ॥ ५-१६५-२१ (३७५८४)
एते हनिष्यन्ति रणे पाञ्चालान्युद्धदुर्मदान् ।
कृतकिल्बिषाः पाण्डवेयैर्धार्तराष्ट्रा मनस्विनः ॥ ५-१६५-२२ (३७५८५)
तथाऽहं भरतश्रेष्ठ सर्वसेनापतिस्तव ।
शत्रून्विध्वंसयिष्यामि कदर्थीकृत्य पाण्डवान् ॥ ५-१६५-२३ (३७५८६)
न त्वात्मनो गुणान्वक्तुमर्हामि विदितोऽस्मि ते ।
कृतवर्मा त्वयिरथो भोजः शस्त्रभृतां वरः ॥ ५-१६५-२४ (३७५८७)
अर्थसिद्धिं तव रणे करिष्यति न संशयः ।
शस्त्रविद्भिरनाधृष्यो दूरपाती दृढायुधः ॥ ५-१६५-२५ (३७५८८)
हनिष्यति चमूं तेषां महेन्द्रो दानवानिव ।
मद्रराजो महेष्वासः शल्यो मेऽतिरथो मतः ॥ ५-१६५-२६ (३७५८९)
स्पर्धते वासुदेवेन नित्यं यो वै रणेरणे ।
भागिनेयान्निजांस्त्यक्त्वा शल्यस्तेऽतिरथो मतः ।
एष योत्स्यति संग्रामे पाण्डवांश्च महारथान् ॥ ५-१६५-२७ (३७५९०)
सागरोर्मिसमैर्बाणैः प्लावयन्निव शातवान् ।

भूरिश्रवाः कृतास्त्रश्च तव चापि हितः सुहृत् ॥ ५-१६५-२८ (३७५९१)
सौमदत्तिर्महेष्वासो रथयूथपयूथपः ।
वलक्षयममित्राणां सुमहान्तं करिष्यति ॥ ५-१६५-२९ (३७५९२)
सिन्धुराजो महाराज मतो मे द्विगुणो रथाः ।
योत्स्यते समरे राजन्विक्रान्तो रथसत्तमः ॥ ५-१६५-३० (३७५९३)
द्रौपदीहरणे राजन्परिक्लिष्टश्च पाण्डवैः ।
संस्मरंस्तं परिक्लेशं योत्स्यते परवीरहा ॥ ५-१६५-३१ (३७५९४)
एतेन हि तदा राजंस्तप आस्थाय दारुणम् ।
सुदुर्लभो वरो लब्धः पाण्डवान्योद्धुमाहवे ॥ ५-१६५-३२ (३७५९५)
स एष रथशार्दूलस्तद्वैरं संस्मरन्रणे ।
योत्स्यते पाण्डवैस्तात प्राणांस्त्यक्त्वा सुदुस्त्यजान् ॥ ॥ ५-१६५-३३ (३७५९६)

इति श्रीमन्महाभारते उद्योगपर्वणि रथातिरथसंख्यानपर्वणि
पञ्चषष्ट्यधिकशततमोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-१६५-८ भृतान् वेतनभक्षकान् । अभृतान्मैत्र्या समागतान् ॥
५-१६५-९ यात्रार्थं याने प्रयाणे प्रशमनेष्ठ परास्त्राष्णं
प्रतीकारेषु विषयेषु वेद वेञ्चि ॥

उद्योगपर्व - अध्याय १६६
॥ श्रीः ॥
५.१६६. अध्यायः १६६

Mahabharata - Udyoga Parva - Chapter Topics
भीष्मेण दुर्योधनसेनायां रथातिरथसंख्यानम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१६६-० (३७५९७)
भीष्म उवाच। ५-१६६-०क्ष् (३८७०)
सुदक्षिणस्तु काम्भोजो रथ एकगुणो मतः ।
तवार्थसिद्धिमाकाङ्क्षन्योत्स्यते समरे परैः ॥ ५-१६६-१ (३७५९८)
एतस्य रथसिंहस्य तवार्थे राजसत्तम ।
पराक्रमं यथेन्द्रस्य द्रक्ष्यन्ति कुरवो युधि ॥ ५-१६६-२ (३७५९९)
एतस्य रथवंशे हि तिग्मवेगप्रहारिणः ।
काम्भोजानां महाराज शलभानामिवायतिः ॥ ५-१६६-३ (३७६००)

नीलो माहिष्यतीवासी नीलवर्मा रथस्तव ।
रथवंशेन कदनं शत्रूणां वै करिष्यति ॥ ५-१६६-४ (३७६०१)
कृतवैरः पुरा चैव सहदेवेन मारिष ।
योत्स्यते सततं राजंस्तवार्थे कुरुनन्दन ॥ ५-१६६-५ (३७६०२)
विन्दानुविन्दावावन्त्यौ संमतौ रथसत्तमौ ।
कृतिनौ समरे तात दृढवीर्यपराक्रमौ ॥ ५-१६६-६ (३७६०३)
एतौ तौ पुरुषव्याघ्रौ रिपुसैन्यं प्रधक्ष्यतः ।
गदाप्रासासिनाराचैस्तोमरैश्च करच्यतैः ॥ ५-१६६-७ (३७६०४)
युद्धाभिकामौ समरे क्रीडन्ताविव यूथपौ ।
यूथमध्ये महाराज विचरन्तौ कृतान्तवत् ॥ ५-१६६-८ (३७६०५)
त्रिगर्ता भ्रातरः पञ्च रथोदारा मता मम ।
कृतवैराश्च पार्थैस्ते विराटनगरे तदा ॥ ५-१६६-९ (३७६०६)
मकरा इव राजेन्द्र समुद्धततरङ्गिणीम् ।
गङ्गां विक्षोभयिष्यन्ति पार्थानां युधि वाहिनी ॥ ५-१६६-१० (३७६०७)
ते रथाः पञ्च राजेन्द्र येषां सत्यरथो मुखम् ।
एते योत्स्यन्ति सङ्ग्रामे संस्मरन्तः पुराकृतमक् ॥ ५-१६६-११ (३७६०८)
व्यलीकं पाण्डवेयेन भीमसेनानुजेन ह ।
दिशो विजयता राजञ्श्वेतवाहेन भारत ॥ ५-१६६-१२ (३७६०९)
ते हनिष्यन्ति पार्थानां तानासाद्य महारथान् ।
वरान्वरान्महेष्वासान्क्षत्रियाणां धुरंधरान् ॥ ५-१६६-१३ (३७६१०)
लक्ष्मणस्तव पुत्रश्च तथा दुःशासनस्य च ।
उभौ तौ पुरुषव्याघ्रौ संग्रामेष्वपलायिनौ ॥ ५-१६६-१४ (३७६११)
तरुणौ सुकुमारौ च राजपुत्रौ रतस्विनौ ।
युद्धानां च विशेषज्ञौ प्रणेतारौ च सर्वशः ॥ ५-१६६-१५ (३७६१२)
रथौ तौ कुरुशार्दूल मतौ मे रथसत्तमौ ।
क्षत्रधर्मरतौ वीरौ महत्कर्म करिष्यतः ॥ ५-१६६-१६ (३७६१३)
दण्डधारो महाराज रथ एको नरर्षभ ।
योत्स्यते तव सङ्ग्रामे स्वेन सैन्येन पालितः ॥ ५-१६६-१७ (३७६१४)
बृहद्बलस्तथा राजा कौसल्यो रथसत्तमः ।
रथो मम मतस्तात महावेगपराक्रमः ॥ ५-१६६-१८ (३७६१५)
एष योत्स्यति सङ्ग्रामे स्वान्बन्धून्संप्रहर्षयन् ।
उग्रायुधो महेष्वासो धार्तराष्ट्रहिते रतः ॥ ५-१६६-१९ (३७६१६)
कृपः शारद्वतो रजन्रथयूथपयूथपः ।
प्रियान्प्राणान्परित्यज्य प्रधक्ष्यति रिपूंस्तव ॥ ५-१६६-२० (३७६१७)
गौतमस्य महर्षेर्य आचार्यस्य शरद्वतः ।
कार्तिकेय इवाजयः शरस्तम्बात्सुतोऽभवत् ॥ ५-१६६-२१ (३७६१८)

एष सेनाः सुबहुला विविधायुधकार्मुकाः ।
अग्निवत्समरे तात चरिष्यति विनिर्दहन् ॥ ॥ ५-१६६-२२ (३७६१९)

इति श्रीमन्महाभारते उद्योगपर्वणि रथातिरथसंख्यानपर्वणि
षट्षष्त्यधिकशततमोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-१६६-१० समुद्धततरङ्गिणीं उच्छ्रितपताकां सेनां
उच्छ्रिततरङ्गवतीं गङ्गां ॥

उद्योगपर्व - अध्याय १६७
॥ श्रीः ॥
५.१६७. अध्यायः १६७

Mahabharata - Udyoga Parva - Chapter Topics
भीष्मेण दुर्योधनसैन्यस्य रथातिरथसंख्यानम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१६७-० (३७६२०)
भीष्म उवाच । ५-१६७-०क्ष् (३८७१)
शकुनिर्मातुलस्तेऽसौ रथ एको नराधिप ।
प्रयुज्य पाण्डवैर्वैरं योत्स्यते नात्र संशयः ॥ ५-१६७-१ (३७६२१)
एतस्य सेना दुर्धर्षा समरे प्रतियायिनः ।
विकृतायुधभूयिष्ठा वायुवेगसमा जवे ॥ ५-१६७-२ (३७६२२)
द्रोणपुत्रो महेष्वासः सर्वानेवातिधन्विनः ।
समरे चित्रयोधी च दृढास्त्रश्च महारथः ॥ ५-१६७-३ (३७६२३)
एतस्य हि महाराज यथा गाण्डीवधन्वनः ।
शरासनविनिर्मुक्ताः संसक्ता यान्ति सायकाः ॥ ५-१६७-४ (३७६२४)
नैष शक्यो मया वीरः संख्यातुं रथसत्तमः ।
निर्दहेदपि लोकांस्त्रीनिच्छन्नेष महारथः ॥ ५-१६७-५ (३७६२५)
क्रोधस्तेजश्च तपसा संभृतोश्रमवासिनाम् ।
द्रोणेनानुगृहीतश्च दिव्यैरस्त्रैरुदारधीः ॥ ५-१६७-६ (३७६२६)
दोषस्त्वस्य महानेको येनैव भरतर्षभ ।
न मे रथो नातिरथो मतः पार्थिवसत्तम ॥ ५-१६७-७ (३७६२७)
जीवितं प्रियमत्यर्थमायुष्कामः सदा द्विजः ।

न ह्यस्य सदृशः कश्चिदुभयोः सेनयोरपि ॥ ५-१६७-८ (३७६२८)
हन्यादेकरथेनैव देवानामपि वाहिनीम् ।
वपुष्मांस्तलघोषेण स्फोटयेदपि पर्वतान् ॥ ५-१६७-९ (३७६२९)
असंख्येयगुणो वीरः प्रहन्ता दारुणद्युतिः ।
दण्डपाणिरिवासह्यः कालवत्प्रचरिष्यति ॥ ५-१६७-१० (३७६३०)
युगान्ताग्निसमः क्रोधात्सिंहग्रीवो महाद्युतिः ।
एष भारत युद्धस्य पृष्ठं संशयमिष्यति ॥ ५-१६७-११ (३७६३१)
पिता त्वस्य महातेजा वृद्धोऽपि युवभिर्वरः ।
रणे कर्म महत्कर्ता अत्र मे नास्ति संशयः ॥ ५-१६७-१२ (३७६३२)
अस्त्रवेगानिलोद्भूतः सेनाकक्षेन्धनोत्थितः ।
पाण्डुपुत्रस्य सैन्यानि प्रधक्ष्यति रणे धृतः ॥ ५-१६७-१३ (३७६३३)
रथयूथपयूथानां यूथपोऽय नरर्षभः ।
भरद्वाजात्मजः कर्ता कर्म तीव्रं हितं तव ॥ ५-१६७-१४ (३७६३४)
सर्वमूर्धाभिषिक्तानामाचार्यः स्थविरो गुरुः ।
गच्छेदन्तं सृञ्जयानां प्रियस्त्वस्य धनञ्जयः ॥ ५-१६७-१५ (३७६३५)
नैष जातु महेष्वासः पार्थमक्लिष्टकारिणम् ।
हन्यादाचार्यकं दीप्तं संस्मृत्य गुणनिर्जितम् ॥ ५-१६७-१६ (३७६३६)
श्लाघते यं सदा वीर पार्थस्य गुणविस्तरैः ।
पुत्रादभ्यधिकं चैनं भारद्वाजोऽनुपश्यति ॥ ५-१६७-१७ (३७६३७)
हन्यादेकरथेनैव देवगन्धर्वमानुषान् ।
एकीभूतानपि रणे दिव्यैरस्त्रैः प्रतापवान् ॥ ५-१६७-१८ (३७६३८)
पौरवो राजशार्दूलस्तव राजन्महारथः ।
मतो मम रथोदारः परवीररथारुजः ॥ ५-१६७-१९ (३७६३९)
स्वेन सैन्येन महता प्रतपञ्शत्रुवाहिनीम् ।
प्रधक्ष्यति स पाञ्चालान्कक्षमग्निगतिर्यथा ॥ ५-१६७-२० (३७६४०)
सत्यश्रवा रथस्त्वेको राजपुत्रो बृहद्बलः ।
तव राजन्रिपुबले कालवत्प्रचरिष्यति ॥ ५-१६७-२१ (३७६४१)
एतस्य योधा राजेन्द्र विचित्रकवचायुधाः ।
विचरिष्यन्ति सङ्ग्रामे निन्घन्तः शास्त्रवांस्तव ॥ ५-१६७-२२ (३७६४२)
वृषसेनो रथस्तेऽग्र्यः कर्णपुत्रो महारथः ।
प्रधक्ष्यति रिपूणां ते बलं तु बलिनां वरः ॥ ५-१६७-२३ (३७६४३)
जघसन्धो महातेजा राजन्रथवरस्तव ।
त्यक्ष्यते समरे प्राणान्माधवः परवीरहा ॥ ५-१६७-२४ (३७६४४)
एष योत्स्यति सङ्ग्रामे गजस्कन्धविशारदः ।
रथेन वा माहबाहुः क्षपयञ्शत्रुवाहिनीम् ॥ ५-१६७-२५ (३७६४५)
रथ एष महाराज मतो मे राजसत्तम ।

त्वदर्थे त्यक्ष्यते प्राणान्सहसैन्यो महारणे ॥ ५-१६७-२६ (३७६४६)
एष विक्रान्तयोधी च चित्रयोधी च संगरे ।
वीतभीश्चापि ते राजञ्शत्रुभिः सह योत्स्यते ॥ ५-१६७-२७ (३७६४७)
बाह्लीकोऽतिरथश्चैव समरे चानिवर्तनः ।
मम राजन्मतो युद्धे शूरो वैवस्वतोपमः ॥ ५-१६७-२८ (३७६४८)
न ह्येष समरं प्राप्य निवर्तेत कथञ्चन ।
यथा सततगो राजन्स हि हन्यात्परान्रणे ॥ ५-१६७-२९ (३७६४९)
सेनापतिर्महाराज सत्यवांस्ते महारथः ।
रणेष्वद्भुतकर्मा च रथी पररथारुजः ॥ ५-१६७-३० (३७६५०)
एतस्य समरं दृष्ट्वा न व्यथास्ति कथञ्चन ।
उत्स्मयन्नुत्पतत्येष परान्रथपथे स्थितान् ॥ ५-१६७-३१ (३७६५१)
एष चारिषु विक्रान्तः कर्म सत्पुरुषोचितम् ।
कर्ता विमर्दे सुमहत्त्वदर्थे पुरुषोत्तमः ॥ ५-१६७-३२ (३७६५२)
अलम्बुसो राक्षसेन्द्रः क्रूरकर्मा महारथः ।
हनिष्यति पराञ्राजन्पूर्ववैरमनुस्मरन् ॥ ५-१६७-३३ (३७६५३)
एष राक्षससैन्यानं सर्वेषां रथसत्तमः ।
मायावी दृढवैरश्च समरे विचरिष्यति ॥ ५-१६७-३४ (३७६५४)
प्राग्ज्योतिषाधिपो वीरो भगदत्तः प्रतापवान् ।
गजाङ्कुशधरश्रेष्ठो रथे चैव विशारदः ॥ ५-१६७-३५ (३७६५५)
एतेन युद्धमभवत्पुरा गाण्डीवधन्वनः ।
दिवसान्सुबहून्राजन्नुभयोर्जयगृद्धिनोः ॥ ५-१६७-३६ (३७६५६)
ततः सखायं गान्धारे मानयन्पाकशासनम् ।
अकरोत्संविदं तेन पाण्डवेन महात्मना ॥ ५-१६७-३७ (३७६५७)
एष योत्स्यति सङ्ग्रामे गजस्कन्धविशारदः ।
ऐरावतगतो राजा देवानामिव वासवः ॥ ॥ ५-१६७-३८ (३७६५८)

इति श्रीमन्महाभारते उद्योगपर्वणि रथातिरथसंख्यानपर्वणि
सप्तषष्ट्यधिकशततमोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-१६७-६ आश्रमवासिनामृषीणां क्रोधस्तेजश्च तयोः समुदायरूप
इत्यर्थः ॥
५-१६७-११ पृष्ठं शेषम् ॥
५-१६७-३१ उत्स्मयन् हृष्यन् ॥
५-१६७-३७ संविदं मैत्रीम् ॥

॥ श्रीः ॥
५.१६८. अध्यायः १६८

Mahabharata - Udyoga Parva - Chapter Topics
भीष्मेण कर्णस्यार्धरथत्वे कथिते तेन भूष्मोपालम्भनपूर्वकं
तज्जीवितावधि स्वेन युद्धाकरणप्रतिज्ञा ॥ १ ॥
भीष्मेण कर्णगर्हणे दुर्योधनेन भीष्मंप्रति सान्त्वनपूर्वकं
परसेनायां रथातिरथसंख्यानप्रार्थना ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१६८-० (३७६५९)
भीष्म उवाच। ५-१६८-०क्ष् (३८७२)
अचलो वृषकश्चैव सहितौ भ्रातरावुभौ ।
रथौ तव दुराधर्षौ शत्रून्विध्वंसयिष्यतः ॥ ५-१६८-१ (३७६६०)
बलवन्तौ नरव्याघ्रौ दृढक्रोधौ प्रहारिणौ ।
गान्धारमुख्यौ तरुणौ दर्शनीयौ महाबलौ ॥ ५-१६८-२ (३७६६१)
सखा ते दयितो नित्यं य एष रणकर्कशः ।
उत्साहयति राजंस्त्वां विग्रहे पाण्डवैः सह ॥ ५-१६८-३ (३७६६२)
परुषः कत्थनो नीचः कर्णो वैकर्तनस्त्रव ।
मन्त्री नेता च बन्धुश्च मानी चात्यन्तमुच्छ्रितः ॥ ५-१६८-४ (३७६६३)
एष नैव रथः पूर्णो न चाप्यतिरथो रणे ।
वियुक्तः कवचेनैष सहजेन विचेतनः ॥ ५-१६८-५ (३७६६४)
कुण्डलाभ्यां च दिव्याभ्यां वियुक्तः सततं घृणी ।
अभिशापाच्च रामस्य ब्राह्मणस्य च भाषणात् ॥ ५-१६८-६ (३७६६५)
करणानां वियोगाच्च तेन मेऽर्धरथो मतः ।
नैष फाल्गुनमासाद्य पुनर्जीवन्विमोक्ष्यते ॥ ५-१६८-७ (३७६६६)
ततोऽब्रवीत्पुनर्द्रोणः सर्वशस्त्रभृतां वरः ।
एवमेतद्यथाऽऽत्थ त्वं न मिथ्यास्ति कदाचन ॥ ५-१६८-८ (३७६६७)
रणेरणेऽभिमानी च विमुखश्चापि दृश्यते ।
घृणी कर्णः प्रमादी च तेन मेऽर्धरथो मतः ॥ ५-१६८-९ (३७६६८)
संजय उवाच। ५-१६८-१०क्ष् (३८७३)
एतच्छ्रुत्वा तु राधेयः क्रोधादुल्फाल्य लोचने ।
उवाच भीष्मं राधेयस्तुदन्वाग्भिः प्रतोदवत् ॥ ५-१६८-१० (३७६६९)
पितामह यथेष्टं मां वाक्षरैरुपकृन्तसि ।
अनागसं सदा द्वेषादेवमेव पदेपदे ॥ ५-१६८-११ (३७६७०)

मर्षयामि च तत्सर्वं दुर्योधनकृतेन वै ।
त्वं तुं मां मान्यसे मन्दं यथा कापुरुषं तथा ॥ ५-१६८-१२ (३७६७१)
भवानर्धरथो मह्यं मतो वै नात्र संशयः ।
सर्वस्य जगतश्चैव गाङ्गेयो न मृषा वदेत् ॥ ५-१६८-१३ (३७६७२)
कुरूणामहितो नित्यं न च राजाऽवबुध्यते ।
को हि नाम समानेषु राजसूदारकर्मसु ॥ ५-१६८-१४ (३७६७३)
तेजोवधमिमं कुर्याद्विभेदयिषुराहवे ।
यथा त्वं गुणविद्वेषादपरागं चिकीर्षसि ॥ ५-१६८-१५ (३७६७४)
न हायनैर्न पलितैर्न वित्तैर्न च बन्धुभिः ।
महारयत्वं संख्यातुं शक्यं क्षत्रस्य कौरव ॥ ५-१६८-१६ (३७६७५)
बलज्येष्ठं स्मृतं क्षत्रं मन्त्रज्येष्ठा द्विजातयः ।
धनज्येष्ठाः स्मृता वैश्याः शूद्रास्तु वयसाऽधिकाः ॥ ५-१६८-१७ (३७६७६)
यथेच्छकं स्वयं ब्रूया रथानतिरथांस्तथा ।
कामद्वेषसमायुक्तो मोहात्प्रकुरुते भवान् ॥ ५-१६८-१८ (३७६७७)
दुर्योधन महाबाहो साधु सम्यगवेक्ष्यताम् ।
त्यज्यतां दुष्टभावोऽयं भीष्मः किल्बिषकृत्तव ॥ ५-१६८-१९ (३७६७८)
भिन्ना हि सेना नृपते दुःसन्धेया भवत्युत ।
मौला हि पुरुषव्याघ्र किमु नानासमुत्थिताः ॥ ५-१६८-२० (३७६७९)
एषां द्वैधं समुत्पन्नं योधानां युधि भारत ।
तेजोवधो नः क्रियते प्रत्यक्षेण विशेषतः ॥ ५-१६८-२१ (३७६८०)
रथानां क्वच विज्ञानं क्वच भीष्मोऽल्पचेतनः ।
अहमावारयिष्यामि पाण्डवानामनीकिनीम् ॥ ५-१६८-२२ (३७६८१)
आसाद्य माममोघेषुं गमिष्यन्ति दिशो दश ।
पाण्डवाः सहपञ्चालाः शार्दूलं वृषभा इव ॥ ५-१६८-२३ (३७६८२)
क्वच युद्धं विमर्दो वा मन्त्रे सुव्याहृतानि च ।
क्वचभीष्मो गतवयामन्दात्मा कालचोदितः ॥ ५-१६८-२४ (३७६८३)
एकाकी स्पर्धति नित्यं सर्वेण रमता सह ।
न चान्यं पुरुषं कंचिन्मन्यते मोघदर्शनः ॥ ५-१६८-२५ (३७६८४)
श्रोतव्यं खलु वृद्धानमिति शास्त्रनिदर्शनम् ।
न त्वेव ह्यतिवृद्धानां पुनर्बालाहि ते मताः ॥ ५-१६८-२६ (३७६८५)
अहमेको हनिष्यामि पाण्डवानानीकिनीम् ।
सुयुद्धे राज्यशार्दूल यशो भीष्मं गमिष्यति ॥ ५-१६८-२७ (३७६८६)
कृतः सेनापतिस्त्वेष त्वया भीष्मो नराधिप ।
सेनापतौ यशो गन्ता न तु योधान्कथञ्चन ॥ ५-१६८-२८ (३७६८७)
नाहं जीवति गाङ्गेये योत्स्ये राजन्कथञ्चन ।
हते भीष्मे तु योद्धाऽस्मि सर्वैरेव महारथैः ॥ ५-१६८-२९ (३७६८८)

भीष्म उवाच। ५-१६८-३०क्ष् (३८७४)
समुद्यतोयं भारो मे सुमहान्सागरोपमः ।
धार्तराष्ट्रस्य संग्रामे वर्षपूगाभिचिन्तितः ॥ ५-१६८-३० (३७६८९)
तस्मिन्नभ्यागते काले प्रतप्ते रोमहर्षणे ।
मिथो भेदो न मे कार्यस्तेन जीवसि सूतज ॥ ५-१६८-३१ (३७६९०)
न ह्यहं त्वद्य विक्रम्य स्थविरोऽपि शिशोस्तव ।
युद्धश्रद्धामहं छिन्द्यां जीवितस्य च सूतज ॥ ५-१६८-३२ (३७६९१)
जामदग्न्येन रामेण महास्त्राणि विमुञ्चता ।
न मे व्यथा कृता काचित्त्वं तु मे कि करिष्यसि ॥ ५-१६८-३३ (३७६९२)
कामं नैतत्प्रशंसन्ति सन्तः स्वबलसंस्तवम् ।
वक्ष्यामि तु त्वां सन्तप्तो निहीन कुलपांसन ॥ ५-१६८-३४ (३७६९३)
समेतं पार्थिवं क्षत्रं काशिराजस्वयंवरे ।
निर्जित्यैकरथेनैव याः कन्यास्तरसाहृताः ॥ ५-१६८-३५ (३७६९४)
ईदृशानां सहस्राणि विशिष्टानामथो पुनः ।
मयैकेन निरस्तानि ससैन्यानि रणाजिरे ॥ ५-१६८-३६ (३७६९५)
त्वां प्राप्य वैरपुरुषं कुरूणामनयो महान् ।
उपस्थितो विनाशाय यतस्व पुरुषो भव ॥ ५-१६८-३७ (३७६९६)
युध्यस्व समरे पार्थं येन विस्पर्धसे सह ।
द्रक्ष्यामि त्वां विनिर्मुक्तमस्माद्युद्धात्सुदुर्मते ॥ ५-१६८-३८ (३७६९७)
तमुवाच ततो राजा धार्तराष्ट्रः प्रतापवान् ।
मां समीक्षस्व गाङ्गेय कार्यं हि महदुद्यतम् ॥ ५-१६८-३९ (३७६९८)
चिन्त्यतामिदमेकाग्रं मम निःश्रेयसं परम् ।
उभावपि भवन्तौ मे महत्कर्म करिष्यतः ॥ ५-१६८-४० (३७६९९)
भूयश्च श्रोतुमिच्छामि परेषां रथसत्तमान् ।
ये चैवातिथास्तत्र ये चैव रथयूथपाः ॥ ५-१६८-४१ (३७७००)
बलाबलममित्राणां श्रोतुमिच्छामि कौरव ।
प्रभातायां रजन्यां वै इदं युद्धं भविष्यति ॥ ॥ ५-१६८-४२ (३७७०१)

इति श्रीमन्महाभारते उद्योगपर्वणि रथातिरथसंख्यानपर्वणि
अष्टषष्ट्यधिकशततमोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-१६८-५ विचेतनः मूर्खः ॥
५-१६८-६ घृणी निन्दकः ॥
५-१६८-७ करणाना सहजकवचादीनाम् ॥
५-१६८-१३ भवान् कर्णोऽधरथो मह्यं मम मत इति गाङ्गेयो वदेत्तन्न

मृषेति सर्वस्य जगतो मत इति संबन्धः । त्वद्वाक्यात्सर्वेपि
मामवमंस्यन्त इति भावः । गाङ्गेय न मृषावदे इति खो घो पाठः ॥
५-१६८-१५ अपरायां द्वेषम् ॥
५-१६८-१८ प्रकुरुते प्रकारं भेदं कुरुते । प्रकारस्तुल्यभेदयोरिति
विश्वः ॥
५-१६८- पारंपर्यागताः तेपि भिन्नाः सन्तो दुःसधेया भवन्ति नाना
पृथक्भूताः एककार्यार्थं ॥॥॥॥॥।

उद्योगपर्व - अध्याय १६९
॥ श्रीः ॥
५.१६९. अध्यायः १६९

Mahabharata - Udyoga Parva - Chapter Topics
भीष्मेण पाण्डवसेनायां रथातिरथसंख्यानम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१६९-० (३७७०२)
भीष्म उवाच । ५-१६९-०क्ष् (३८७५)
एते रथास्तवाख्यातास्तथैवातिरथा नृप ।
ये चाप्यर्धरथा राजन्पाण्डवानामतः शृणु ॥ ५-१६९-१ (३७७०३)
यदि कौतूहलं तेऽद्य पाण्डवानां बले नृप ।
रथसंख्यां शृणुष्व त्वं सहैभिर्वसुधाधिपैः ॥ ५-१६९-२ (३७७०४)
स्वयं राजा रथोदारः पाण्डवः कुन्तनन्दनः ।
अग्निवत्समरे तात चरिष्यति न संशयः ॥ ५-१६९-३ (३७७०५)
भीमसेनस्तु राजेन्द्र रथोऽष्टगुणसंमितः ।
न तस्यास्ति समो युद्धे गदया सायकैरपि ॥ ५-१६९-४ (३७७०६)
नागायुतबलो मानी तेजसा न स मानुषः ।
माद्रीपुत्रो च रथिनौ द्वावेव पुरुषर्षभौ ॥ ५-१६९-५ (३७७०७)
अश्विनाविव रूपेण तेजसा च समन्वितौ ।
एते चमूमुखगताः स्मरन्तः क्लेशमुत्तमम् ॥ ५-१६९-६ (३७७०८)
रुद्रवत्प्रचरिष्यन्ति तत्र मे नास्ति संशयः ।
सर्व एव महात्मानः सालस्तम्भा इवोद्गताः ॥ ५-१६९-७ (३७७०९)
प्रादेशेनाधिकाः पुंभिरन्यैस्ते च प्रमाणतः ।
सिंहसंहननाः सर्वे पाण्डुपुत्रा महाबलाः ॥ ५-१६९-८ (३७७१०)
चरितब्रह्मचर्याश्च सर्वे तात तपस्विनः ।
ह्रीमन्तः पुरुषव्याघ्रा व्याघ्रा इव बलोत्कटाः ॥ ५-१६९-९ (३७७११)

जवे प्रहारे संमर्दे सर्व एवातिमानुषाः ।
सर्वैर्जिता महीपाला दिग्जये भरतर्षभ ॥ ५-१६९-१० (३७७१२)
न चैषां पुरुषाः केचिदायुधानि गदाः शरान् ।
विषहन्ति सदा कर्तुमधिज्यान्यपि कौरव ॥ ५-१६९-११ (३७७१३)
उद्यन्तुं वा गदा गुर्वीः शरान्वा क्षेप्तुमाहवे ।
जवे लक्ष्यस्य हरणे भोज्ये पांसुविकर्षणे ॥ ५-१६९-१२ (३७७१४)
बालैरपि भवन्तस्तैः सर्व एव विशेषिताः ।
एतत्सैन्यं समासाद्य सर्व एव बलोत्कटाः ॥ ५-१६९-१३ (३७७१५)
विध्वंसयिष्यन्ति रणे मा स्म तैः सह संगमः ।
एकैकशस्त संमर्दे हन्युः सर्वान्महीक्षितः ॥ ५-१६९-१४ (३७७१६)
प्रत्यक्षं तव राजेन्द्र राजसूये यथाभवत् ।
द्रौपद्याश्च परिक्लेशं द्यूते च परुषा गिरः ॥ ५-१६९-१५ (३७७१७)
ते स्मरन्तश्च सङ्ग्रामे चरिष्यन्ति च रुद्रवत् ।
लोहिताक्षो गुडाकेशो नारायणसहायवान् ॥ ५-१६९-१६ (३७७१८)
उभोयोः सेनयोर्वीरो रथो नास्तीति तादृशः ।
न हि देवेषु वा पूर्वं मनुष्येषूरगेषु च ॥ ५-१६९-१७ (३७७१९)
राक्षसेष्वथ यक्षेषु नरेषु कुत एव तु ।
भूतोथ वा भविष्यो वा रथः कश्चिन्मया श्रुतः ॥ ५-१६९-१८ (३७७२०)
समायुक्तो महाराज रथः पार्थस्य धीमतः ।
वासुदेवश्च संयन्ता योद्धा चैव धनञ्जयः ॥ ५-१६९-१९ (३७७२१)
गाण्डीवं च धनुर्दिव्यं ते चाश्वा वातरंहसः ।
अभेद्यं कवचं दिव्यमक्षय्यौ च महेषुधी ॥ ५-१६९-२० (३७७२२)
अस्त्रग्रामश्च माहेन्द्रो रौद्रः कौबेर एवच ।
याम्यश्च वारुणश्चैव गदाश्चोग्रप्रदर्शनाः ॥ ५-१६९-२१ (३७७२३)
वज्रादीनि च मुख्यानि नानाप्रहरणानि च ।
दानवानां सहस्राणि हिरण्यपुरवासिनाम् ॥ ५-१६९-२२ (३७७२४)
हतान्येकरथेनाजौ कस्तस्य सदृशो रथः ।
एष हन्याद्धि संरम्भी बलवान्सत्यविक्रमः ॥ ५-१६९-२३ (३७७२५)
तव सेनां महाबाहुः स्वां चैव परिपालयन् ।
अहं चैनं प्रत्युदियामाचार्यो वा धनञ्जयम् ॥ ५-१६९-२४ (३७७२६)
न तृतीयोऽस्ति राजेन्द्र सेनयोरुभयोरपि ।
य एनं शरवर्षाणि वर्षन्तमुदियाद्रथी ॥ ५-१६९-२५ (३७७२७)
जीमूत इव घर्मान्ते महावातसमीरितः ।
समायुक्तस्तु कौन्तेयो वासुदेवसहायवान् ।
तरुणश्च कृती चैव जीर्णावावामुभावपि ॥ ५-१६९-२६ (३७७२८)
वैशम्पायन उवाच। ५-१६९-२७क्ष् (३८७६)

एतच्छ्रुत्वा तु भीष्मस्य राज्ञां दध्वंसिरे तदा ।
काञ्चनाङ्गदिनः पीना भुजाश्चन्दनरूषिताः ॥ ५-१६९-२७ (३७७२९)
मनोभिः सह संवेगैः संस्मृत्य च पुरातनम् ।
सामर्थ्यं पाण्डवेयानां यथा प्रत्यक्षदर्शनात् ॥ ॥ ५-१६९-२८ (३७७३०)

इति श्रीमन्महाभारते उद्योगपर्वणि रथातिरथसंख्यानपर्वणि
एकोनसप्तत्यधिकशततमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-१६९-१२ भोज्ये कौटिल्ये मर्मपीडने इतियावत् । भुज कौटिल्येऽस्य
रूपम्। पांसुविकर्षणे पांसुषु विकर्षणे भूमौ मुष्टियुद्धे इत्यर्थः
॥
५-१६९-२४ प्रत्युदियां युद्धे संमुखः स्याम् ॥

उद्योगपर्व - अध्याय १७०
॥ श्रीः ॥
५.१७०. अध्यायः १७०

Mahabharata - Udyoga Parva - Chapter Topics
भीष्मेण पाण्डवसेनायां रथातिरथसंख्यानम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१७०-० (३७७३१)
भीष्म उवाच। ५-१७०-०क्ष् (३८७७)
द्रौपदेया महाराज सर्वे पञ्च महारथाः ।
वैराटिरुत्तरश्चैव रथोदारो मतो मम ॥ ५-१७०-१ (३७७३२)
अभिमन्युर्महाबाहू रथयूथमयूथपः ।
समः पार्थेन समरे वासुदेवेन चारिहा ॥ ५-१७०-२ (३७७३३)
लघ्वस्त्रश्चित्रयोधी च मनस्वी च दृढव्रतः ।
संस्मरन्वै परिक्लेशं स्वपितुर्विक्रमिष्यति ॥ ५-१७०-३ (३७७३४)
सात्यकिर्माधवः शूरो रथयूथपयूथपः ।
एष वृष्णिप्रवीराणाममर्षी जितसाध्वसः ॥ ५-१७०-४ (३७७३५)
उत्तमौजास्तथा राजन्रथोदारो मतो मम ।
युधामन्युश्च विक्रान्तो रथोदारो मतो मम ॥ ५-१७०-५ (३७७३६)
एतेषां बहुसाहस्रा रथा नागा हयास्तथा ।
योत्स्यन्ते ते तनूस्त्यक्त्वा कुन्तीपुत्रप्रियेप्सया ॥ ५-१७०-६ (३७७३७)

पाण्डवैः सह राजेन्द्र तव सेनासु भारत ।
अग्निमारुतवद्राजन्नाह्वयन्तः परस्परम् ॥ ५-१७०-७ (३७७३८)
अजेयौ समरे वृद्धौ विराटद्रुपदौ तथा ।
महारथौ महावीर्यौ मतौ मे पुरुषर्षभौ ॥ ५-१७०-८ (३७७३९)
वयोवृद्धावपि हि तौ क्षत्रधर्मपरायणौ ।
यतिष्येते परं शक्त्या स्थितौ वीरगते पथि ॥ ५-१७०-९ (३७७४०)
संबन्धिकेन राजेन्द्र तौ तु वीर्यबलान्वयात् ।
आर्यवृत्तौ महेष्वासौ स्नेहवीर्यसितावुभौ ॥ ५-१७०-१० (३७७४१)
कारणं प्राप्य तु नराः सर्व एव महाभुजाः ।
शूरा वा कातरा वापि भवन्ति कुरुपुङ्गव ॥ ५-१७०-११ (३७७४२)
एकायनगतावेतौ पार्थिवौ दृढधन्विनौ ।
प्राणांस्त्यक्त्वा परं शक्त्या घट्टितारौ परन्तप ॥ ५-१७०-१२ (३७७४३)
पृथगक्षौहिणीभ्यां तावुभौ संयति दारुणौ ।
संबन्धिभावं रक्षन्तौ महत्कर्म करिष्यतः ॥ ५-१७०-१३ (३७७४४)
लोकवीरौ महेष्वासौ त्यक्तात्मानौ च भारत ।
प्रत्ययं परिरक्षन्तौ महत्कर्म करिष्यतः ॥ ॥ ५-१७०-१४ (३७७४५)

इति श्रीमन्महाभारते उद्योगपर्वणि रथातिरथसंख्यानपर्वणि
सप्तत्यधिकशततमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-१७०-९ वीरगते वीरैरनुसृते ॥
५-१७०-१० सितौ बद्धौ ॥

उद्योगपर्व - अध्याय १७१
॥ श्रीः ॥
५.१७१. अध्यायः १७१

Mahabharata - Udyoga Parva - Chapter Topics

भीष्मेण पाण्डवसेनायां रथातिरथसंख्यानम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१७१-० (३७७४६)
भीष्म उवाच । ५-१७१-०क्ष् (३८७८)
पाञ्चालराजस्य सुतो राजन्परपुरंजयः ।
शिखण्डी रथमुख्यो मे मतः पार्थस्य भारत ॥ ५-१७१-१ (३७७४७)

एष योत्स्यति संग्रामे नाशयन्पूर्वसंस्थितम् ।
परं यशो विप्रथयंस्तव सेनासु भारत ॥ ५-१७१-२ (३७७४८)
एतस्य बहुलाः सेनाः पाञ्चालाश्च प्रभद्रकाः ।
तेनासौ रथवंशेन महत्कर्म करिष्यति ॥ ५-१७१-३ (३७७४९)
धृष्टद्युम्नश्च सेनानीः सर्वसेनासु भारत ।
मतो मेऽतिरथो राजन्द्रोणशिष्यो महारथः ॥ ५-१७१-४ (३७७५०)
एष योत्स्यति संग्रामे सूदयन्वै परान्रणे ।
भगवानिव संक्रुद्धः पिनाकी युगसंक्षये ॥ ५-१७१-५ (३७७५१)
एतस्य तद्रथानीकं कथयन्ति रणप्रियाः ।
बहुत्वात्सागरप्रख्यं देवानामिव संयुगे ॥ ५-१७१-६ (३७७५२)
क्षत्रधर्मा तु राजेन्द्र मतो मेऽर्धरथो नृप ।
धृष्टद्युम्नस्य तनयो बाल्यान्नातिकृतश्रमः ॥ ५-१७१-७ (३७७५३)
शिशुपालसुतो वीरश्चेदिराजो महारथः ।
धृष्टकेतुर्महेष्वासः संबन्धी पाण्डवस्य ह ॥ ५-१७१-८ (३७७५४)
एष चेदिपतिः शूरः सह पुत्रेण भारत ।
महारथानां सुकरं महत्कर्म करिष्यति ॥ ५-१७१-९ (३७७५५)
क्षत्रधर्मरतो मह्यं मतः परपुरंजयः ।
क्षत्रदेवस्तु राजेन्द्र पाण्डवेषु रथोत्तमः ॥ ५-१७१-१० (३७७५६)
जयन्तश्चामितौजाश्च सत्यजिच्च महारथः ।
महारथा महात्मानः सर्वे पाञ्चालसत्तमाः ॥ ५-१७१-११ (३७७५७)
योत्स्यन्ते समरे तात संरब्धा इव कुञ्जराः ।
अजो भोजश्च विक्रान्तौ पाण्डवार्थे महारथौ ॥ ५-१७१-१२ (३७७५८)
योत्स्येते बलिनौ शूरौ परं शक्त्या यतिष्यतः ।
शीघ्रास्त्राश्चित्रयोद्धारः कृतिनो दृढविक्रमाः ॥ ५-१७१-१३ (३७७५९)
केकयाः पञ्च राजेन्द्र भ्रातरो दृढविक्रमाः ।
सर्वे चैव रथोदाराः सर्वे लोहितकध्वजाः ॥ ५-१७१-१४ (३७७६०)
काशिकः सुकुमारश्च नीलो यश्चापरो नृप ।
सूर्यदत्तश्च शङ्खश्च मदिराश्वश्च नामतः ॥ ५-१७१-१५ (३७७६१)
सर्व एव रथोदाराः सर्वे चाहवलक्षणाः ।
सर्वास्त्रविदुषः सर्वे महात्मानो मता मम ॥ ५-१७१-१६ (३७७६२)
वार्धक्षेमिर्महाराज मतो मम महारथः ।
चित्रायुधश्च नृपतिर्मतो मे रथसत्तमः ॥ ५-१७१-१७ (३७७६३)
स हि सङ्ग्रामशोभी च भक्तश्चापि किरीटिनः ।
चेकितानः सत्यधृतिः पाण्डवानां महारथौ ।
द्वाविमौ पुरुषव्याघ्रौ रथोदारौ मतौ मम ॥ ५-१७१-१८ (३७७६४)
व्याघ्रदत्तश्च राजेन्द्र चन्द्रसेनश्च भारत ।

मतौ मम रथोदारौ पाण्डवानां न संशयः ॥ ५-१७१-१९ (३७७६५)
सेनाबिन्दुश्च राजेन्द्र क्रोधहन्ता च नामतः ।
यः समो वासुदेवेन भीमसेनेन वा विभो ॥ ५-१७१-२० (३७७६६)
स योत्स्यति हि विक्रम्य समरे तव सैनिकैः ।
मां च द्रोणं कृपं चैव यथा संमन्यते भवान् ॥ ५-१७१-२१ (३७७६७)
तथा स समरश्लाघी मन्तव्यो रथसत्तमः ।
काश्यः परमशीघ्रास्त्रः श्लाघनीयो नरोत्तमः ॥ ५-१७१-२२ (३७७६८)
रथ एकगुणो मह्यं ज्ञेयः परपुरंजयः ।
अयं च युधि विक्रान्तो मन्तव्योष्टगुणो रथः ॥ ५-१७१-२३ (३७७६९)
सत्यजित्समरश्लाघी द्रुपदस्यात्मजो युवा ।
गतः सोऽतिरथत्वं हि धृष्टद्युम्नेन संमितः ॥ ५-१७१-२४ (३७७७०)
पाण्डवानां यशस्कामः परं कर्म करिष्यति ।
अनुरक्ताश्च शूरश्च रथोऽयमपरो महान् ॥ ५-१७१-२५ (३७७७१)
पाण्ड्यराजो महावीर्यः पाण्डवानां धुरंधरः ।
दृढधन्वा महेष्वासः पाण्डवानां महारथः ॥ ५-१७१-२६ (३७७७२)
श्रेणिमान्कौरवश्रेष्ठ वसुदानश्च पार्थिवः ।
उभावेतावतिरथौ मतौ परपुरंजयौ ॥ ॥ ५-१७१-२७ (३७७७३)

इति श्रीमन्महाभारते उद्योगपर्वणि रथातिरथसंख्यानपर्वणि
एकसप्तत्यधिकशततमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-१७१-२ नाशयन् पूर्वसंस्थितं प्राचीनं स्त्रीत्वेनावस्थानं अदर्शयन्
। पौरुषं दर्शयन्नित्यर्थः ॥
५-१७१-१३ शक्त्या क्षयिष्यत इति डो झो पाठः । क्षयिष्यतः
सामर्थ्यं दर्शयिष्यतः । ऐश्वर्यार्थोयं क्षयतिः ॥
५-१७१-१६ विदुषः विद्वांसः ॥

उद्योगपर्व - अध्याय १७२
॥ श्रीः ॥
५.१७२. अध्यायः १७२

Mahabharata - Udyoga Parva - Chapter Topics
भीष्मेण दुर्योधनंप्रति शिखण्डिनः स्त्रीपूर्वत्वमभिधाय तेन सह
युद्धाकरणप्रतिज्ञा ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१७२-० (३७७७४)
भीष्म उवाच। ५-१७२-०क्ष् (३८७९)
रोचमानो महाराज पाण्डवानां महारथः ।
योत्स्यतेऽमरवत्संख्ये परसैन्येषु भारत ॥ ५-१७२-१ (३७७७५)
पुरुजित्कृन्तिभोजश्च महेष्वासो महाबलः ।
मातुलो भीमसेनस्य स च मेऽतिरथो मतः ॥ ५-१७२-२ (३७७७६)
एष वीरो महेष्वासः कृती च निपुणश्च ह ।
चित्रयोधी च शक्तश्च मतो मे रथपुङ्गवः ॥ ५-१७२-३ (३७७७७)
स योत्स्यति हि विक्रम्य मघवानिव दानवैः ।
योधा ये चास्य विख्याताः सर्वे युद्धविशारदाः ॥ ५-१७२-४ (३७७७८)
भागिनेयकृते वीरः स करिष्यति संगरे ।
सुमहत्कर्म पाण्डूनां स्थितः प्रियहिते रतः ॥ ५-१७२-५ (३७७७९)
भैमसेनिर्महाराज हैडिम्बो राक्षसेश्वरः ।
मतो मे बहुमायावी रथयूथपयूथपः ॥ ५-१७२-६ (३७७८०)
योत्स्यते समरे तात मायावी समरप्रियः ।
ये चास्य राक्षसा वीराः सचिवा वशवर्तिनः ॥ ५-१७२-७ (३७७८१)
एते चान्ये च बहवो नानाजनपदेश्वराः ।
समेताः पाण्डवस्यार्थे वासुदेवपुरोगमाः ॥ ५-१७२-८ (३७७८२)
एते प्राधान्यतो राजन्पाण्डवस्य महात्मनः ।
रथाश्चातिरथाश्चैव ये चान्येऽर्धरथा नृप ॥ ५-१७२-९ (३७७८३)
नेष्यन्ति समरे सेनां भीमां यौधिष्ठिरीं नृप ।
महेन्द्रेणेव वीरेण पाल्यमानां किरीटिना ॥ ५-१७२-१० (३७७८४)
तैरहं समरे वीर मायाविद्भिर्जयैषिभिः ।
योत्स्यामि जयमाकाङ्क्षन्नथ वा निधनं रणे ॥ ५-१७२-११ (३७७८५)
वासुदेवं च पार्थं च चक्रगाण्डीवधारिणौ ।
सन्ध्यागताविवार्केन्दू सभेष्येते रथोत्तमौ ॥ ५-१७२-१२ (३७७८६)
यं चैव ते रथोदाराः पाण्डुपुत्रस्य सैनिकाः ।
सह सैन्यानहं तांश्च प्रतीयां रणमूर्धनि ॥ ५-१७२-१३ (३७७८७)
एते रथाश्चातिरथाश्च तुभ्यं
यथाप्रधानं नृप कीर्तिता मया ।
तथा परे येऽर्धरथाश्च केचि-
त्तथैव तेषामपि कौरवेन्द्र ॥ ५-१७२-१४ (३७७८८)
अर्जुनं वासुदेवं च ये चान्ये तत्र पार्थिवाः ।
सर्वांस्तान्वारयिष्यामि यावद्द्रक्ष्यामि भारत ॥ ५-१७२-१५ (३७७८९)
पाञ्चाल्यं तु महाबाहो नाहं हन्यां शिखण्डिनम् ।

उद्यतेषमथो दृष्ट्वा प्रतियुध्यन्तमाहवे ॥ ५-१७२-१६ (३७७९०)
लोकस्तं वेद यदहं पितुः प्रियचिकीर्षया ।
प्राप्तं राज्यं परित्यज्य ब्रह्मचर्यव्रते स्थितः ॥ ५-१७२-१७ (३७७९१)
चित्राङ्गदं कौरवाणामाधिपत्येऽभ्यषेचयम् ।
विचित्रवीर्यं च शिशुं यौवराज्येऽभ्यषेचयम् ॥ ५-१७२-१८ (३७७९२)
देवव्रतत्वं विज्ञाप्य पृथिवीं सर्वराजसु ।
नैव हन्यां स्त्रियं जातु न स्त्रीपूर्वं कदाचन ॥ ५-१७२-१९ (३७७९३)
स हि स्त्रीपूर्वको राजञ्शिखण्डी यदि ते श्रुतः ।
कन्या भूत्वा पुमाञ्चातो न योत्स्ये तेन भारत ॥ ५-१७२-२० (३७७९४)
सर्वांस्त्वन्यान्हनिष्यामि पार्थिवान्भरतर्षभ ।
यान्समेष्यामि समरे न तु कुन्तीसुतान्नृप ॥ ॥ ५-१७२-२१ (३७७९५)

इति श्रीमन्महाभारते उद्योगपर्वणि रथातिरथसंख्यानपर्वणि
द्विसप्तत्यधिकशततमोऽध्यायः ॥ ॥ समाप्तं च
रथातिरथसंख्यानपर्व ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-१७२-१९ देवव्रतत्वं ब्रह्मचारिव्रतवत्त्वम् ॥

उद्योगपर्व - अध्याय १७३
॥ श्रीः ॥
५.१७३. अध्यायः १७३

Mahabharata - Udyoga Parva - Chapter Topics
शिखण्डिनोऽसंहरणकारणप्रश्ने तत्कथनाय भीष्मेण
दुर्योधनंप्रति अम्बोपाख्यानकथनारम्भः ॥ १ ॥
तथा स्वयंवरे स्वेन अम्बादिकन्यात्रयहरणकथनम् ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१७३-० (३७७९६)
दुर्योधनं उवाच । ५-१७३-०क्ष् (३८८०)
किमर्थं भरतश्रेष्ठ नैव हन्याः शिखण्डिनम् ।
उद्यतेषुमथो दृष्ट्वा समरेष्वाततायिनम् ॥ ५-१७३-१ (३७७९७)
पूर्वमुक्त्वा महाबाहो पाञ्चालान्सह सोमकैः ।
हनिष्यामीति गाङ्गेय तन्मे ब्रूहि पितामह ॥ ५-१७३-२ (३७७९८)

भीष्म उवाच। ५-१७३-३क्ष् (३८८१)
शृणु दुर्योधन कथां सहैभिर्वसुधाधिपैः ।
यदर्थं युधि संप्रेक्ष्य नाहं हन्यां शिखण्डिनम् ॥ ५-१७३-३ (३७७९९)
महाराजो मम पिता शान्तनुर्लोकविश्रुतः ।
दिष्टान्तमाप धर्मात्मा समये भरतर्षभ ॥ ५-१७३-४ (३७८००)
ततोऽहं भरतश्रेष्ठ प्रतिज्ञां परिपालयन् ।
चित्राङ्गदं भ्रातरं वै महाराज्येऽभ्यपेचयम् ॥ ५-१७३-५ (३७८०१)
तस्मिंश्च निधनं प्राप्ते सत्यवत्या मते स्थितः ।
विचित्रवीर्यं राजानमभ्यषिञ्चं यथाविधि ॥ ५-१७३-६ (३७८०२)
मयाऽभिषिक्तो राजेन्द्र यवीयानपि धर्मतः ।
विचित्रवीर्यो धर्मात्मा मामेव समुदैक्षत ॥ ५-१७३-७ (३७८०३)
तस्य दारक्रियां तात चिकीर्षुरहमप्युत ।
अनुरूपादिव कुलादित्येव च मनो दधे ॥ ५-१७३-८ (३७८०४)
तथाऽश्रौषं महाबाहो तिस्रः कन्याः स्वयंवरे ।
रूपेणाप्रतिमाः सर्वाः काशिराजसुतास्तदा ।
अम्बां चैवाम्बिकां चैव तथैवाम्बालिकामपि ॥ ५-१७३-९ (३७८०५)
राजानश्च समाहूताः पृथिव्यां भरतर्षभ ।
अम्बा ज्येष्ठाभवत्तासामम्बिका त्वथ मध्यमा ॥ ५-१७३-१० (३७८०६)
अम्बालिका च राजेन्द्र राजकन्या यवीयसी ।
सोऽहमेकरथेनैव गतः काशिपतेः पुरीम् ॥ ५-१७३-११ (३७८०७)
अपश्यं ता महाबाहो तिस्रः कन्याः स्वलङ्कृताः ।
राज्ञश्चैव समाहूतान्पार्थिवान्पृथिवीपते ॥ ५-१७३-१२ (३७८०८)
ततोऽहं तान्नृपान्सर्वानाहूय समरे स्थितान् ।
रथमारोपयाञ्चक्रे कन्यास्ता भरतर्षभ ॥ ५-१७३-१३ (३७८०९)
वीर्यशुल्काश्च ता ज्ञात्वा समारोप्य रथं तदा ।
अवोचं पार्थिवान्सर्वानहं तत्र समागतान् ।
भीष्मः शान्तनवः कन्या हरतीति पुनःपुनः ॥ ५-१७३-१४ (३७८१०)
ते यतध्वं परं शक्त्या सर्वे मोक्षाय पार्थिवाः ।
प्रसह्य हि हराम्येष मिषतां वो नरर्षभाः ॥ ५-१७३-१५ (३७८११)
ततस्ते पृथिवीपालाः समुत्पतुरुदायुधाः ।
योगो योग इति क्रुद्धाः सारथीनभ्यचोदयन् ॥ ५-१७३-१६ (३७८१२)
ते रथैर्गसङ्काशैर्गजैश्च गजयोधिनः ।
पुष्टैश्चाश्वैर्महीपालाः समुत्पेतुरुदायुधाः ॥ ५-१७३-१७ (३७८१३)
ततस्ते मां महीपालाः सर्व एव विशां पते ।
रथव्रातेन महता सर्वतः पर्यवारयन् ॥ ५-१७३-१८ (३७८१४)
तानहं शरवर्षेण समन्तात्पर्यवारयम् ।

सर्वान्नृपांश्चाप्यजयं देवराडिव दानवान् ॥ ५-१७३-१९ (३७८१५)
अपातयं शरैर्दीप्तैः प्रहसन्भरतर्षभ ।
तेषामापततां चित्रान्ध्वजान्हेमपरिष्कृतान् ॥ ५-१७३-२० (३७८१६)
एकैकेन हि बाणेन भूमौ पातितवानहम् ।
हयांस्तेषां गजांश्चैव सारथींश्चाप्यहं रणे ॥ ५-१७३-२१ (३७८१७)
ते निवृत्ताश्च भग्नाश्च दृष्ट्वा तल्लाघवं
मम। ५-१७३-२२ब्ग्प्रणिपेतुश्च सर्वे वै प्रशशंसुश्च पार्थिवाः ॥
५-१७३-२२ (३७८१८)
तत आदाय ताः कन्या नृपतींश्च विसृज्य तान्।'
अथाऽहं हास्तिनपुरमायां जित्वा महीक्षितः ॥ ५-१७३-२३ (३७८१९)
ततोऽहं ताश्च कन्या वै भ्रातुरर्थाय भारत ।
तच्च कर्म महाबाहो सत्यवत्यै न्यवेदयम् ॥ ॥ ५-१७३-२४ (३७८२०)

इति श्रीमन्महाभारते उद्योगपर्वणि अम्बोपाख्यानपर्वणि
त्रिसप्तत्यधिकशततमोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-१७३-४ दिष्टान्तं मरणम् ॥

उद्योगपर्व - अध्याय १७४
॥ श्रीः ॥
५.१७४. अध्यायः १७४

Mahabharata - Udyoga Parva - Chapter Topics
भीष्मेण विचित्रवीर्यस्य कन्यात्रयेण विवाहप्रयतने अम्बया स्वस्य
साल्वकामत्वकथनपूर्वकं तत्समीपगमने भीष्मंप्रत्यनुज्ञायाचनम्
॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१७४-० (३७८२१)
भीष्म उवाच। ५-१७४-०क्ष् (३८८२)
ततोऽहं भरतश्रेष्ठ मातरं वीरमातरम् ।
अभिगम्योपसंगृह्य दाशेयीमिदमब्रुवम् ॥ ५-१७४-१ (३७८२२)
इमाः काशिपतेः कन्या मया निर्जित्य पार्थिवान् ।
विचित्रवीर्यस्य कृते वीर्यशुल्का हृता इति ॥ ५-१७४-२ (३७८२३)
ततो मूर्धन्युपाघ्राय पर्यश्रुनयना नृप ।

आह सत्यवती हृष्टा दिष्ट्या पुत्र जितं त्वया ॥ ५-१७४-३ (३७८२४)
सत्यवत्यास्त्वनुमते विवाहे समुपस्थिते ।
उवाच वाक्यं सव्रीडा ज्येष्ठा काशिपतेः सुता ॥ ५-१७४-४ (३७८२५)
भीष्म त्वमसि धर्मज्ञः सर्वशास्त्रविशारदः ।
श्रुत्वा च वचनं धर्म्यं मह्यं कर्तुमिहार्हसि ॥ ५-१७४-५ (३७८२६)
मया साल्वपतिः पूर्वं मनसाऽभिवृतो वरः ।
तेन चास्मि वृता पूर्वं रहस्यविदिते पितुः ॥ ५-१७४-६ (३७८२७)
कथं मामन्यकामां त्वं राजधर्ममतीत्य वै ।
वासयेथा गृहे भीष्म कौरवः सन्विशेषतः ॥ ५-१७४-७ (३७८२८)
एतद्बुद्ध्या विनिश्चित्य मनसा भरतर्षभ ।
यत्क्षमं ते महाबाहो तदिहारब्धुमर्हसि ॥ ५-१७४-८ (३७८२९)
स मां प्रतीक्षते व्यक्तं साल्वराजो विशांपते ।
तस्मान्मां त्वं कुरुश्रेष्ठ समनुज्ञातुमर्हसि ॥ ५-१७४-९ (३७८३०)
कृपां कुरु महाबाहो मयि धर्मभृतां वर ।
त्वं हि सत्यव्रतो वीर पृथिव्यामिति नः श्रुतम् ॥ ॥ ५-१७४-१० (३७८३१)

इति श्रीमन्महाभारते उद्योगपर्वणि अम्बोपाख्यनपर्वणि
चतुःसप्तत्यधिकशततमोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-१७४-१ उपसंगृह्य पादयोः पतित्वा ॥
५-१७५-५ मह्यं मम ॥

उद्योगपर्व - अध्याय १७५
॥ श्रीः ॥
५.१७५. अध्यायः १७५

Mahabharata - Udyoga Parva - Chapter Topics
भीष्मानुज्ञया साल्वं गताया अम्बायास्तेन परित्यागः ॥ १ ॥
अम्बया भीष्मस्य प्रतिचिकीर्षया तापसाश्रममेत्य तेषु
स्ववृत्तान्तनिवेदनम् ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१७५-० (३७८३२)
भीष्म उवाच। ५-१७५-०क्ष् (३८८३)

ततोऽहं समनुज्ञाप्य कालीं गन्धवतीं तदा ।
मन्त्रिणश्चर्त्विजश्चैव तथैव च पुरोहितान् ।
समनुज्ञामिषं कन्यामम्बां ज्येष्ठां नराधिप ॥ ५-१७५-१ (३७८३३)
अनुज्ञाता ययौ सा तु कन्या साल्वपतेः पुरम् ।
वृद्धैर्द्विजातिभिर्गुप्ता धात्र्या चानुगता तदा ॥ ५-१७५-२ (३७८३४)
अतीत्य च तमध्वानमासमाद नराधिपम ।
सा तमासाद्य राजानं साल्वं वचनमब्रवीत् ॥ ५-१७५-३ (३७८३५)
आगताहं महाबाहो त्वामुद्दिश्य महामते ।
ग्अभिनन्दस्व मां राजन्सदा प्रियहिते रताम् ॥ ५-१७५-४ (३७८३६)
प्रतिपादय मां राजन्धर्मादींश्चर धर्मतः ।
त्वं हि मे मनसा ध्यातस्त्वया चाप्युपमन्त्रिता ॥ ५-१७५-५ (३७८३७)
भीष्म उवाच।' ५-१७५-६क्ष् (३८८४)
तामब्रवीत्साल्वपतिः स्मयन्निव विशांपते ।
त्वयाऽन्यपूर्वया नाहं भार्यार्थी वरवर्णिनि ॥ ५-१७५-६ (३७८३८)
गच्छ भद्रे पुनस्तत्र सकाशं भीष्मकस्य वै ।
नाहमिच्छामि भीष्मेण गृहीतां त्वां प्रसह्य वै ॥ ५-१७५-७ (३७८३९)
त्वं हि भीष्मेण निर्जित्य नीता प्रीतिमती तदा ।
परामृश्य महायुद्धे निर्जित्य पृथिवीपतीन् ॥ ५-१७५-८ (३७८४०)
नाहं त्वय्यन्यपूर्वायां भार्यार्थी वरवर्णिनि ।
कथमस्मद्विधो राजा परपूर्वां प्रवेशयेत् ॥ ५-१७५-९ (३७८४१)
नारीं विदितविज्ञानः परेषां धर्ममादिशन् ।
यथेष्टं गम्यतां भद्रे मा त्वां कालोऽत्यगादयम् ॥ ५-१७५-१० (३७८४२)
अम्बा तमब्रवीद्राजन्नन्नङ्गशरपीडिता ।
नैवं वद महीपाल नैतदेवं कथंचन ॥ ५-१७५-११ (३७८४३)
नास्मि प्रीतिमती नीता भीष्मेणामित्रकर्शन ।
बलान्नीतास्मि रुदती विद्राव्य पृथिवीपतीन् ॥ ५-१७५-१२ (३७८४४)
भजस्व मां साल्वपते भक्तां बालामनागसम् ।
भक्तानां हि परित्यागो न धर्मेषु प्रशस्यते ॥ ५-१७५-१३ (३७८४५)
साहमामन्त्र्य गाङ्गेयं समरेष्वनिवर्तिनम् ।
अनुज्ञाता च तेनैव ततोऽहं भृशमागता ॥ ५-१७५-१४ (३७८४६)
न स भीष्मो महाबाहुर्मामिच्छति विशांपते ।
भ्रातृहेतोः समारम्भो भीष्मस्येति श्रुतं मया ॥ ५-१७५-१५ (३७८४७)
भगिन्यौ मम ये नीते अम्बिकाम्बालिके नृप ।
प्रादाद्विचित्रवीर्याय गाङ्गेयो हि यवीयसे ॥ ५-१७५-१६ (३७८४८)
यथा साल्वपते नान्यं वरं यामि कथंचन ।
त्वामृते पुरुषव्याघ्र तथा मूर्धानमालभे ॥ ५-१७५-१७ (३७८४९)

न चान्यपूर्वा राजेन्द्र त्वामहं समुपस्थिता ।
सत्यं ब्रवीमि साल्वैतत्सत्येनात्मानमालभे ॥ ५-१७५-१८ (३७८५०)
भजस्व मां विशालाक्ष स्वयं कन्यामुपस्थिताम् ।
अनन्यपूर्वां राजेन्द्र त्वत्प्रसादाभिकाङ्क्षिणीम् ॥ ५-१७५-१९ (३७८५१)
तामेवं भाषमाणां तु साल्वः काशिपतेः सुताम् ।
अत्यजद्भरतश्रेष्ठ जीर्णां त्वचमिवोरगः ॥ ५-१७५-२० (३७८५२)
एवं बहुविधैर्वाक्यैर्याच्यमानस्तया नृपः ।
नाश्रद्दधत्साल्वपतिः कन्यायां भरतर्षभ ॥ ५-१७५-२१ (३७८५३)
ततः सा मन्युनाऽऽविष्टा ज्येष्ठा काशिपतेः सुता ।
अब्रवीत्साश्रुनयना बाष्पविप्लुतया गिरा ॥ ५-१७५-२२ (३७८५४)
त्वया त्यक्ता गमिष्यामि यत्र तत्र विशांपते ।
तत्र मे गतयः सन्तु सन्तः सत्यं यथा ध्रुवम् ॥ ५-१७५-२३ (३७८५५)
एवं तां भाषमाणां तु कन्यां साल्वपतिस्तदा ।
परित्यत्याज कौरव्य करुणं परिदेवतीम् ॥ ५-१७५-२४ (३७८५६)
गच्छ गच्छेति तां साल्वः पुनः पुनरभाषत ।
बिभेमि भीष्मात्सुश्रोणि त्वं च भीष्मपरिग्रहः ॥ ५-१७५-२५ (३७८५७)
एवमुक्ता तु सा तेन साल्वेनादीर्घदर्शिना ।
निश्चक्राम पुराद्दीना रुदती कुररी यथा ॥ ५-१७५-२६ (३७८५८)
भीष्म उवाच। ५-१७५-२७क्ष् (३८८५)
निष्क्रामन्ती तु नगराच्चिन्तयामास दुःखिता ।
पृथिव्यां नास्ति युवतिर्विषमस्थतरा मया ॥ ५-१७५-२७ (३७८५९)
बन्धुभिर्विप्रहीणास्मि साल्वेन च निराकृता ।
न च शक्यं पुनर्गन्तुं मया वारणसाह्वयम् ॥ ५-१७५-२८ (३७८६०)
अनुज्ञाता तु भीष्मेण साल्वमुद्दिश्य कारणम् ।
किं नु गर्हाम्यथात्मानमथ भीष्मं दुरासदम् ॥ ५-१७५-२९ (३७८६१)
अथवा पितरं मूढं यो मेऽकार्षीत्स्वयंवरम् ।
मयाऽयं स्वकृतो दोषो याऽहं भीष्मरथात्तदा ॥ ५-१७५-३० (३७८६२)
प्रवृत्ते दारुणे युद्धे साल्वार्थं नापतं पुरा ।
तस्येयं फलनिर्वृत्तिर्यदापन्नाऽस्मि मूढवत् ॥ ५-१७५-३१ (३७८६३)
धिग्भीष्मं धिक्क मे मन्दं पितरं मूढचेतसम् ।
येनाहं वीर्यशुल्केन पण्यस्त्रीव प्रचोदिता ॥ ५-१७५-३२ (३७८६४)
धिङ्मां धिक्साल्वराजानं धिग्धातारमथापि वा ।
येषां दुर्नीतभावेन प्राप्तास्म्यापदमुत्तमाम् ॥ ५-१७५-३३ (३७८६५)
सर्वथा भागधेयानि स्वानि प्राप्नोति मानवः ।
अनयस्यास्य तु मुखं भीष्मः शान्तनवो मम ॥ ५-१७५-३४ (३७८६६)
सा भीष्मे प्रतिकर्तव्यमहं पश्यामि सांप्रतम् ।

तपसा वा युधा वापि दुःखहेतुः स मे मतः ॥ ५-१७५-३५ (३७८६७)
को नु भीष्मं युधा जेतुमुत्सहेत महीपतिः ।
एवं सा परिनिश्चित्य जगाम नगराद्बहिः ॥ ५-१७५-३६ (३७८६८)
आश्रमं पुण्यशीलानां तापसानां महात्मनाम् ।
ततस्तामवसद्रात्रिं तापसैः परिवारिता ॥ ५-१७५-३७ (३७८६९)
आचख्यौ च यथावृत्तं सर्वमात्मनि भारत ।
विस्तरेण महाबाहो निखिलेन शुचिस्मिता ।
हरणं च विसर्गं च साल्वेन च विसर्जनम् ॥ ५-१७५-३८ (३७८७०)
ततस्तत्र महानासीद्ब्राह्मणः संशितव्रतः ।
शैखावत्यस्तपोबृद्धः शास्त्रे चारण्यके गुरुः ॥ ५-१७५-३९ (३७८७१)
आर्ता तामाह स मुनिः शैखावत्यो महातपाः ।
निःश्वसन्तीं सतीं बालां दुःखशोकपरायणाम् ॥ ५-१७५-४० (३७८७२)
एवं गते तु किं भद्रे शक्यं कर्तुं तपस्विभिः ।
आश्रमस्थैर्महाभागे तपोयुक्तैर्महात्मभिः ॥ ५-१७५-४१ (३७८७३)
सा त्वेनमब्रवीद्राजन्क्रियतां मदनुग्रहः ।
प्राव्राज्यमहमिच्छामि तपस्तप्स्यामि दुश्चरम् ॥ ५-१७५-४२ (३७८७४)
मयैव यानि कर्माणि पूर्वदेहे तु मूढया ।
कृतानि नूनं पापानि तेषामेतत्फलं ध्रुवम् ॥ ५-१७५-४३ (३७८७५)
नोत्सहे तु पुनर्गन्तुं स्वजनं प्रति तापसाः ।
प्रत्याख्याता निरानन्दा साल्वेन च निराकृता ॥ ५-१७५-४४ (३७८७६)
उपदिष्टमिहेच्छामि तापस्यं वीतकल्मषाः ।
युष्माभिर्देवसंकाशैः कृपा भवतु वो मयि ॥ ५-१७५-४५ (३७८७७)
स तामाश्वासयत्कन्यां दृष्टान्तागमहेतुभिः ।
सान्त्वयामास कार्यं च प्रतिजज्ञे द्विजैः सह ॥ ॥ ५-१७५-४६ (३७८७८)

इति श्रीमन्महाभारते उद्योगपर्वणि अम्बोपाख्यानपर्वणि
पञ्चसप्तत्यधिकशततमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-१७५-३९ शैखावत्यः शिखावान् वह्निस्तत्साध्यानि श्रौतस्मार्तकर्माणि
शैखावतानि तेषु साधुः शैखावत्यः । आरण्यके उपनिषदि
गुरुब्रह्मविदित्यर्थः ॥
५-१७५-४६ दृष्टान्तो लौकिकोदाहरणम् । आगमो वेदः । हेतुर्युक्तिः ॥

उद्योगपर्व - अध्याय १७६
॥ श्रीः ॥

Mahabharata - Udyoga Parva - Chapter Topics

अम्बांप्रति तापसेषु चिन्तयत्सु होत्रवाहनाम्नोऽम्बामातामहस्य तत्रागमनम् ॥ १ ॥
तेनाम्बायाः परशुरामंप्रति शरणागतिचोदना ॥ २ ॥
तत्र यदृच्छासमागते अकृतव्रणनाम्नि महर्षौ अम्बया स्ववृत्तन्तनिवेदनम् ॥ ३ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१७६-० (३७८७९)
भीष्म उवाच। ५-१७६-०क्ष् (३८८६)
ततस्ते तापसाः सर्वे कार्यवन्तोऽभवंस्तदा ।
तां कन्यां चिन्तयन्तस्ते किंकार्यमिति धर्मिणः ॥ ५-१७६-१ (३७८८०)
केचिदाहुः पितुर्वेश्म नीयतामिति तापसाः ।
केचिदस्यदुमालम्भे मतिं चक्रुर्हि तापसाः ॥ ५-१७६-२ (३७८८१)
केचित्साल्वपतिं गत्वा नियोज्यमिति मेनिरे ।
नेति केचिद्व्यवस्यन्ति प्रत्याख्याता हि तेन सा ॥ ५-१७६-३ (३७८८२)
एवं गते तु किं शक्यं भद्रे कर्तुं मनीषिभिः ।
पुनरूचुश्च तां सर्वे तापसाः संशितव्रताः ॥ ५-१७६-४ (३७८८३)
अलं प्रव्रजितेनेह भद्रे श्रृणु हितं वचः ।
इतो गच्छस्व भद्रं ते पितुरेव निवेशनम् ॥ ५-१७६-५ (३७८८४)
प्रतिपस्त्यति राजा स पिता ते यदनन्तरम् ।
तत्र वत्स्यसि कल्याणि सुखं सर्वगुणान्विता ॥ ५-१७६-६ (३७८८५)
न च तेऽन्या गतिर्न्याय्या भवेद्भद्रे यथा पिता ।
पतिर्वापि गतिर्नार्याः पिता वा वरवर्णिनि ।
गतिः पतिः समस्थाया विषमे च पिता गतिः ॥ ५-१७६-७ (३७८८६)
प्रव्रज्या हि सुदुःखेयं सुकुमार्या विशेषतः ।
राजपुत्र्याः प्रकृत्या चक कुमार्यास्तव भामिनि ॥ ५-१७६-८ (३७८८७)
भद्रे दोषा हि विद्यन्ते बहवो वरवर्णिनि ।
आश्रमे वै वसन्त्यास्ते न भवेयुः पितुर्गृहे ॥ ५-१७६-९ (३७८८८)
ततस्त्वन्येऽब्रुवन्वाक्यं तापसास्तां तपस्विनीम् ॥ ५-१७६-१० (३७८८९)
त्वामिहैकाकिनीं दृष्ट्वा निर्जने गहने वने ।
प्रार्थयिष्यन्तिराजानस्तस्मान्मैवं मनः कृथाः ॥ ५-१७६-११ (३७८९०)
अम्बोवाच। ५-१७६-१२क्ष् (३८८७)

न शक्यं काशिनगरं पुनर्गन्तुं पितुर्गृहान् ।
अवज्ञाता भविष्यामि बान्धवानां न संशयः ॥ ५-१७६-१२ (३७८९१)
उषितास्मि तथा बाल्ये पितुर्वेश्मनि तापसाः ।
नाहं गमिष्ये भद्रं वस्तत्र यत्र पिता मम ।
तपस्तप्तुमभीप्सामि तापसैः परिरक्षिता ॥ ५-१७६-१३ (३७८९२)
यथा परेऽपि मे लोके न स्यादेवं महात्ययः ।
दौर्भाग्यं तापसश्रेष्ठास्तस्मात्तप्स्याम्यहं तपः ॥ ५-१७६-१४ (३७८९३)
भीष्म उवाच। ५-१७६-१५क्ष् (३८८८)
इत्येवं तेषु विप्रेषु चिन्तयन्सु यथातथम् ।
राजर्षिस्तद्वनं प्राप्तस्तपस्वी होत्रवाहनः ।
ग्तां तथा भाविनीं दृष्ट्वा श्रुत्वा चोद्विग्रमानसः' ५-१७६-१५ (३७८९४)
ततस्ते तापसाः सर्वे पूजयन्ति स्म तं नृपम् ।
पूजाभिः स्वागताद्याभिरासनेनोदकेन च ॥ ५-१७६-१६ (३७८९५)
तस्योपविष्टस्य सतो विश्रान्तस्योपशृण्वतः ।
पुनरेव कथां चक्रुः कन्यां प्रति वनौकसः ॥ ५-१७६-१७ (३७८९६)
अम्बायास्तां कथां श्रुत्वा काशिराज्ञश्च भारत ।
राजर्षिः स महातेजा बभूवोद्विग्रमानसः ॥ ५-१७६-१८ (३७८९७)
तां तथावादिनीं श्रुत्वा दृष्ट्वा च स महातपाः ।
राजर्षिः कृपयाविष्टो महात्मा होत्रवाहनः ॥ ५-१७६-१९ (३७८९८)
स वेपमान उत्थाय मातुस्तस्याः पिता तदा ।
तां कन्यामङ्कमारोप्य पर्यश्वासयत प्रभो ॥ ५-१७६-२० (३७८९९)
स तामपृच्छत्कात्स्न्र्येन व्यसनोत्पत्तिमादितः ।
सा च तस्मै यथावृत्तं विस्तरेण न्यवेदयत् ॥ ५-१७६-२१ (३७९००)
ततः स राजर्षिरभूद्दुःखशोकसमन्वितः ।
कार्यं च प्रतिपेदे तन्मनसां सुमहातपाः ॥ ५-१७६-२२ (३७९०१)
अब्रवीद्वपमानश्च कन्यामार्तां सुदुःखितः ।
मा गाः पितुर्गृहं भद्रे मातुस्ते जनको ह्यहम् ॥ ५-१७६-२३ (३७९०२)
दुःखं छिन्द्यामहं ते वै मयि वर्तस्व पुत्रिके ।
पर्याप्तं ते मनो वत्से यदेवं परिशुष्यसि ॥ ५-१७६-२४ (३७९०३)
गच्छ मद्वचनाद्रामं जामदग्न्यं तपस्विनम् ।
रामस्ते सुमहद्दुःखं शोकं चैवापनेष्यति ॥ ५-१७६-२५ (३७९०४)
हनिष्यति रणे भीष्मं न करिष्यति चेद्वचः ।
तं गच्छ भार्गवश्रेष्ठं कालाग्निसमतेजसम् ॥ ५-१७६-२६ (३७९०५)
प्रतिष्ठापयिता स त्वां समे पथि महातपाः ।
ततस्तु सुस्वरं बाष्पसुत्सृजन्ती पुनः पुनः ॥ ५-१७६-२७ (३७९०६)
अब्रवीत्पितरं मातुः मा तदा होत्रवाहनम् ।

अभिवादयित्वा शिरसा गमिष्ये तव शासनात् ॥ ५-१७६-२८ (३७९०७)
अपि नामाद्य पश्येयमार्यं तं लोकविश्रुतम् ।
कथं च तीव्रं दुःकं मे नाशकयिष्यति भार्गवः ।
एतदिच्छाम्यहं ज्ञातुं यथा यास्यमि तत्र वैः ॥ ५-१७६-२९ (३७९०८)
होत्रवाहन उवाच। ५-१७६-३०क्ष् (३८८९)
रामं द्रक्ष्यसि भद्रे त्वं जामदग्न्यं महावने ।
उग्रे तपसि वर्तन्तं सत्यसन्धं महाबलम् ॥ ५-१७६-३० (३७९०९)
महेन्द्रं वै गिरिश्रेष्ठं रामो नित्यमुपास्ति ह ।
ऋषयो वेदविद्वांसो गन्धर्वाप्सरसस्तथा ॥ ५-१७६-३१ (३७९१०)
तत्र गच्छस्व भद्रं ते ब्रूयाश्चैनं वचो मम ।
अभिवाद्य च तं मूर्ध्ना तपोवृद्धं दृढव्रतम् ॥ ५-१७६-३२ (३७९११)
ब्रूयाश्चैनं पुनर्भद्रे यत्ते कार्यं मनीषितम् ।
मयि संकीर्तिते रामः सर्वं तत्ते करिष्यति ॥ ५-१७६-३३ (३७९१२)
मम रामः सखा वत्से प्रीतियुक्तः सुहृच्च मे ।
जमदग्निसुतो वीरः सर्वशस्त्रभृतां वरः ॥ ५-१७६-३४ (३७९१३)
एवं ब्रुवति कन्यां तु पार्थिवे होत्रवाहने ।
अकृतव्रणः प्रादुरासीद्रामस्यानुचरः प्रियः ॥ ५-१७६-३५ (३७९१४)
ततस्ते मनुयः सर्वे समुत्तस्थुः महस्रशः ।
स च राजा वयोवृद्धः सृञ्ययो होत्रवाहनः ॥ ५-१७६-३६ (३७९१५)
ततो दृष्ट्वा कृतातिथ्यमन्योन्यं ते वनौकसः ।
सहिता भरतश्रेष्ठ निषेदुः परिवार्य तम् ॥ ५-१७६-३७ (३७९१६)
ततस्ते कथयामासुः कथास्तास्ता मनोरमाः ।
धन्या दिव्याश्च राजेन्द्र प्रीतिहर्षमुदा युताः ॥ ५-१७६-३८ (३७९१७)
ततः कथान्ते राजर्षिर्महात्मा होत्रवाहनः ।
रामं श्रेष्ठं महर्षीणामपृच्छदकृतव्रणम् ॥ ५-१७६-३९ (३७९१८)
क्व संप्रति महाबाहो जामदग्न्यः प्रतापवान् ।
अकृतव्रण शक्यो वै द्रष्टुं वेदविदां वर ॥ ५-१७६-४० (३७९१९)
अकृतव्रण उवाच। ५-१७६-४१क्ष् (३८९०)
भवन्तमेव सततं रामः कीर्तयति प्रभो ।
सृञ्जयो मे प्रियसखो राजर्षिरिति पार्थिव ॥ ५-१७६-४१ (३७९२०)
इह रामः प्रभाते श्वो भवितेति मतिर्मम ।
द्रष्टस्येनमिहायान्तं तव दर्शनकाङ्क्षया ॥ ५-१७६-४२ (३७९२१)
इयं च कन्या राजर्षे किमर्थं वनमागता ।
कस्य चेयं तव च का भवतीच्छामि वेदितुम् ॥ ५-१७६-४३ (३७९२२)
होत्रवाहन उवाच। ५-१७६-४४क्ष् (३८९१)
दौहित्रीयं मम विभो काशिराजसुता प्रिया ।

ज्येष्ठा स्वयंवरे तस्थौ भगिनीभ्यां सहानघ ॥ ५-१७६-४४ (३७९२३)
इयमम्बेति विख्याता ज्येष्ठा काशिपतेः सुता ।
अम्बिकाम्बालिके कन्ये कनीयस्यौ तपोधन ॥ ५-१७६-४५ (३७९२४)
समेतं पार्थिवं क्षत्रं काशिपुर्यां ततोऽभवत् ।
कन्यानिमित्तं विप्रर्षे तत्रासीदुत्सवो महान् ॥ ५-१७६-४६ (३७९२५)
तता किल महावीर्यो भीष्मः शान्तनवो नृपान् ।
अधिक्षिप्य महातेजास्तिस्त्रः कन्या जहार ताः ॥ ५-१७६-४७ (३७९२६)
निर्जित्य पृथिवीपालानथ भीष्मो जगाह्वयम् ।
आजगाम विशुद्धात्मा कन्याभिः सह भारतः ॥ ५-१७६-४८ (३७९२७)
सत्यवत्यै निवेद्याथ विवाहं समनन्तरम् ।
भ्रातुर्विचित्रवीर्यस्य समाज्ञापयत प्रभुः ॥ ५-१७६-४९ (३७९२८)
तं तु वैवाहिकं दृष्ट्वा कन्येयं समुपार्जितम् ।
अब्रवीत्तत्र गाङ्गेयं मन्त्रिमध्ये द्विजर्षभ ॥ ५-१७६-५० (३७९२९)
मया साल्वपतिर्वीरो मनसाऽभिवृतः पतिः ।
न ममार्हसि धर्मज्ञ दातुं भ्रात्रेऽन्यमानसाम् ॥ ५-१७६-५१ (३७९३०)
तच्छ्रुत्वा वचनं भीष्मः संमन्त्र्य सह मन्त्रिभिः ।
निश्चित्य विससर्जेमां सत्यवत्या मते स्थितः ॥ ५-१७६-५२ (३७९३१)
अनुज्ञाता तु भीष्मेण साल्वं सौभपतिं ततः ।
कन्येयं मुदिता तत्र काले वाचनमब्रवीत् ॥ ५-१७६-५३ (३७९३२)
विसर्जितास्मि भीष्मेण धर्मं मां प्रतिपादय ।
मनसाभिवृत्तः पूर्वं मया त्वं पार्थिवर्षम ॥ ५-१७६-५४ (३७९३३)
प्रत्याचख्यौ च साल्वोऽस्याश्चारित्रस्याभिशङ्कितः ।
सेयं तपोवनं प्राप्ता तापस्येऽभिरता भृशम् ॥ ५-१७६-५५ (३७९३४)
मया च प्रत्यभिज्ञाता वंशस्य परिकीर्तनात् ।
अस्य दुःखस्य चोत्पत्तिं भीष्ममेवेह मन्यते । ५-१७६-५६ (३७९३५)
अम्बोवाच। ५-१७६-५७क्ष् (३८९२)
भगवन्नेवमेवेह यथाह पृथिवीपतिः ।
शरीरकर्ता मातुर्मे सृञ्जयो होत्रवाहनः ॥ ५-१७६-५७ (३७९३६)
न ह्युत्सहे स्वनगरं प्रतियातुं तपोधन ।
अपमानभयाच्चैव व्रीडया च महामुने ॥ ५-१७६-५८ (३७९३७)
यत्तु मां भगवान्रामो वक्ष्यति द्विजसत्तम ।
तन्मे कार्यतमं कार्यमिति मे भगवन्मतिः ॥ ॥ ५-१७६-५९ (३७९३८)

इति श्रीमन्महाभारते उद्योगपर्वणि अम्बोपाख्यानपर्वणि
षट्सप्तत्यधिकशततमोऽध्यायः ॥

५-१७६-१४ महात्ययः सुखनाशः । मम उद्धव उत्सव इति कोशः ॥
५-१७६-५६ उत्पत्तिं कारणम् ॥

उद्योगपर्व - अध्याय १७७
॥ श्रीः ॥
५.१७७. अध्यायः १७७

Mahabharata - Udyoga Parva - Chapter Topics
अकृतव्रणेन सविमर्शं भीष्मस्य प्रतीकारनिर्धारणम् ॥ १ ॥
अम्बया परेद्युरागतं जामदग्न्यंप्रति भीष्मवधप्रार्थना ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१७७-० (३७९३९)
अकृतव्रण उवाच । ५-१७७-०क्ष् (३८९३)
दुःख द्वयोरिदं भद्रे कतरस्य चिकीर्षसि ।
प्रतिकर्तव्यमबले तत्त्वं वत्से वदस्व मे ॥ ५-१७७-१ (३७९४०)
यदि सौभपतिर्भद्रे नियोक्तव्यो मतस्तव ।
नियोक्ष्यति महात्मा स रामस्त्वद्धितकाम्यया ॥ ५-१७७-२ (३७९४१)
अथापगेयं भीष्मं त्वं रामेणेच्छसि धीमता ।
रणे विनिर्जितं द्रष्टुं कुर्यात्तदपि भार्गवः ॥ ५-१७७-३ (३७९४२)
सृञ्जयस्य वचः श्रुत्वा तव चैव शुचिस्मिते ।
यदत्र ते भृशं कार्यं तदद्यैव विचिन्त्यताम् ॥ ५-१७७-४ (३७९४३)
अम्बोवाच । ५-१७७-५क्ष् (३८९४)
अपनीतास्मि भीष्मेण भगवन्नविजानता ।
नाभिजानाति मे भीष्मो ब्रह्मन्साल्वगतं मनः ॥ ५-१७७-५ (३७९४४)
एतद्विचार्य मनसा भवानेतद्विनिश्चयम् ।
विचिनोतु यथान्यायं विधानं क्रियतां तथा ॥ ५-१७७-६ (३७९४५)
भीष्मे वा कुरुशार्दूले शाल्वराजेऽथवा पुनः ।
उभयोरेव वा ब्रह्मन्युक्तं यत्तत्समाचर ॥ ५-१७७-७ (३७९४६)
निवेदितं मया ह्येतद्दुःखमूलं यथातथम् ।
विधानं तत्र भगवन्कर्तुमर्हसि युक्तितः ॥ ५-१७७-८ (३७९४७)
अकृतव्रण उवाच । ५-१७७-९क्ष् (३८९५)
उपपदमिदं भद्रे यदेवं वरवर्णिनि ।
धर्मं प्रतिवचो ब्रूयाः शृणु चदं वचो मम ॥ ५-१७७-९ (३७९४८)
यदि त्वामापगेयो वै न नयेद्ऋजसाह्वयम् ।

साल्वस्त्वा शिरसा भीरु गृह्णीयाद्रामचोदितः ॥ ५-१७७-१० (३७९४९)
तेन त्वं निर्जिता भद्रे यस्मान्नीतासि भामिनि ।
संशयः साल्वराजस्य तेन त्वयि सुमध्यमे ॥ ५-१७७-११ (३७९५०)
भीष्मः पुरुषमानी च जितकाशी तथैव च ।
तस्मात्प्रतिक्रिया युक्ता भीष्मे कारयितुं तव ॥ ५-१७७-१२ (३७९५१)
अम्बोवाच। ५-१७७-१३क्ष् (३८९६)
ममाप्येष सदा ब्रह्मन्हृदि कामोऽभिवर्तते ।
घातयेयं यदि रणे भीष्ममित्येव नित्यदा ॥ ५-१७७-१३ (३७९५२)
भीष्मं वा साल्वराजं वा यं वा दोषेण गच्छसि ।
प्रशाधि तं महाबाहोयत्कृतेऽहं सुदुःखिता ॥ ५-१७७-१४ (३७९५३)
भीष्म उवाच। ५-१७७-१५क्ष् (३८९७)
एवं कथयतामेव तेषां स दिवसो गतः ।
रात्रिश्च भरतश्रेष्ठ सुखशीतोष्णमारुता ॥ ५-१७७-१५ (३७९५४)
ततो रामः प्रादुरासीत्प्रज्वलन्निव तेजसा ।
शिष्यैः परिवृतो राजञ्जटाचीरधरो मुनिः ॥ ५-१७७-१६ (३७९५५)
धनुष्पाणिरदीनात्मा खड्गं बिभ्रत्परश्वधी ।
विरजा राजशार्दूल सृञ्जयं सोऽभ्ययान्नृपम् ॥ ५-१७७-१७ (३७९५६)
ततस्तं तापसा दृष्ट्वा स च राजा महातपाः ।
तस्थुः प्राञ्जलयो राजन्सा च कन्या तपस्विनी ॥ ५-१७७-१८ (३७९५७)
पूजयामासुरव्यग्रा मधुपर्केण भार्गवम् ।
अर्चितश्च यथान्यायं निषसाद सहैव तैः ॥ ५-१७७-१९ (३७९५८)
ततः पूर्वव्यतीतानि कथयन्तौ स्म तावुभौ ।
आसातां जामदग्न्यश्च सृञ्जयश्चैव भारत ॥ ५-१७७-२० (३७९५९)
तथा कथान्ते राजर्षिर्भृगुश्रेष्ठं महाबलम् ।
उवाच मधुरं काले रामं वचनमर्थवत् ॥ ५-१७७-२१ (३७९६०)
रामेयं मम दौहित्री काशिराजसुता प्रभो ।
अस्याः श्रृणु यथातत्त्वं कार्यं कार्यविशारद ॥ ५-१७७-२२ (३७९६१)
परमं कथ्यतां चेति तां रामः प्रत्यभाषत ।
ततः साभ्यवदद्रामं ज्वलन्तमिव पावकम् ॥ ५-१७७-२३ (३७९६२)
ततोऽभिवाद्य चरणौ रामस्य शिरसा शुभौ ।
स्पृष्ट्वा पद्मदलाभाभ्यां पाणिभ्यामग्रतः स्थिता ॥ ५-१७७-२४ (३७९६३)
रुरोद सा शोकवती बाष्पव्याकुललोचना ।
प्रपेदे शरणं चैव शरण्यं भृगुनन्दनम् ॥ ५-१७७-२५ (३७९६४)
राम उवाच। ५-१७७-२६क्ष् (३८९८)
यथा त्वं सृंजयस्यास्य तथा मे त्वं नृपात्मजे ।
ब्रूहि यत्ते मनोदुःखं करिष्ये वचनं तव ॥ ५-१७७-२६ (३७९६५)

अम्बोवाच। ५-१७७-२७क्ष् (३८९९)
भगवञ्शरणं त्वाद्य प्रपन्नाऽस्मि महाव्रतम् ।
शोकपङ्कार्णवान्मग्नं घोरादुद्धर मां विभो ॥ ५-१७७-२७ (३७९६६)
भीष्म उवाच। ५-१७७-२८क्ष् (३९००)
तस्याश्च दृष्ट्वा रूपं च वपुश्चाभिनवं पुनः ।
सौकुमार्यं परं चैव रामश्चिन्तापरोऽभवत् ॥ ५-१७७-२८ (३७९६७)
किमियं वक्ष्यतीत्येवं विममर्श भृगूद्वहः ।
इति दध्यौ चिरं रामः कृपयाभिपरिप्लुतः ॥ ५-१७७-२९ (३७९६८)
कथ्यतामिति सा भूयो रामेणोक्ता शुचिस्मिता ।
सर्वमेव यथातत्त्वं कथयामास भार्गवे ॥ ५-१७७-३० (३७९६९)
तच्छ्रुत्वा जामदग्न्यस्तु राजपुत्र्या वचस्तदा ।
उवाच तां वरारोहां निश्चित्यार्थविनिश्चयम् ॥ ५-१७७-३१ (३७९७०)
राम उवाच। ५-१७७-३२क्ष् (३९०१)
प्रेषयिष्यामि भीष्माय कुरुश्रेष्ठाय भामिनि ।
करिष्यति वचो मह्यं श्रुत्वा च स नराधिपः ॥ ५-१७७-३२ (३७९७१)
न चेत्करिष्यति वचो मयोक्तं जाह्नवीसुतः ।
धक्ष्याम्यहं रणे भद्रे सामात्यं शस्त्रतेजसा ॥ ५-१७७-३३ (३७९७२)
अथवा ते मतिस्तत्र राजपुत्रि न वर्तते ।
यावत्साल्वपतिं वीरं योजयाम्यत्र कर्मणि ॥ ५-१७७-३४ (३७९७३)
अम्बोवाच। ५-१७७-३५क्ष् (३९०२)
विसर्जिताऽहं भीष्मेण श्रुत्वैव भृगुनन्दन ।
साल्वराजगतं भावं मम पूर्वं मनीषितम् ॥ ५-१७७-३५ (३७९७४)
सौभराजमुपेत्याहमवोचं दुर्वचं वचः ।
न च मां प्रत्यगृह्णात्स चारित्र्यपरिशङ्कितः ॥ ५-१७७-३६ (३७९७५)
एतत्सर्वं विनिश्चित्य स्वबुद्ध्या भृगुनन्दन ।
यदत्रौपयिकं कार्यं तच्चिन्तयितुमर्हसि ॥ ५-१७७-३७ (३७९७६)
मम तु व्यसनस्यास्य भीष्मो मूलं महाव्रतः ।
येनाहं वशमानीता समत्क्षिप्य बलात्तदा ॥ ५-१७७-३८ (३७९७७)
भीष्मं जहि महाबाहो यत्कृते दुःखमीदृशम् ।
प्राप्ताहं भृगुशार्दूल चराम्यप्रियमुत्तमम् ॥ ५-१७७-३९ (३७९७८)
स हि लुब्धश्च नीचश्च जितकाशी च भार्गव ।
तस्मात्प्रतिक्रिया कर्तुं युक्ता तस्मै त्वयाऽनघ ॥ ५-१७७-४० (३७९७९)
एष मे ह्रियमाणाया भारतेन तदा विभो ।
अभवद्धृदि संकल्पो घातयेदं महाव्रतम् ॥ ५-१७७-४१ (३७९८०)
तस्मात्कामं ममाद्येमं राम संपादयानघ ।
जहि भीष्मं महाबाहो यथा वृत्रं पुरन्दरः ॥ ॥ ५-१७७-४२ (३७९८१)

इति श्रीमन्महाभारते उद्योगपर्वणि अम्बोपाख्यानपर्वणि
सप्तसप्तत्यधिकशततमोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-१७७-१ द्वयोः सकाशादिति शेषः ॥
५-१७७-२ नियोक्तव्यस्तव पाणिणार्थमिति शेषः ५-१७७-६ विधानं
प्रतीकारम् ॥
५-१७७-२३ परमं तव विवक्षितं यत्तन्मेऽवश्यं वक्तव्यमित्यर्थः ॥

उद्योगपर्व - अध्याय १७८
॥ श्रीः ॥
५.१७८. अध्यायः १७८

Mahabharata - Udyoga Parva - Chapter Topics
श्रीपरशुरामेण अम्बादिभिः सह कुरुक्षेत्रं गत्वा भीष्मानयनम् ॥ १ ॥
रामेण स्वेन चोदनेपि भीष्मेण अम्बापरिग्रहानङ्गीकारे युद्धाय
तस्याह्वानम् ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१७८-० (३७९८२)
भीष्म उवाच। ५-१७८-०क्ष् (३९०३)
एवमुक्तस्तदा रामो जहि भीष्ममिति प्रभो ।
उवाच रुदतीं कन्यां चोदयन्तीं पुनः पुनः ॥ ५-१७८-१ (३७९८३)
काश्ये न कामं गृह्णामि शस्त्रं वै वरवर्णिनि ।
ऋते ब्रह्मविदां हेतोः किमन्यत्करवाणि ते ॥ ५-१७८-२ (३७९८४)
वाचा भीष्मश्च साल्वश्च मम राज्ञि वशानुगौ ।
भविष्यतोऽनवद्याङ्गि तत्करिष्यामि मा शुचः ॥ ५-१७८-३ (३७९८५)
न तु शस्त्रं ग्रहीष्यामि कथंचिदपि भामिनि ।
ऋते नियोगाद्विप्राणामेष मे समयः कृतः ॥ ५-१७८-४ (३७९८६)
अम्बोवाच। ५-१७८-५क्ष् (३९०४)
मम दुःखं भगवता व्यपनेयं यतस्ततः ।
तच्च भीष्मप्रसूतं मे तं जहीश्वर मा चिरम् ॥ ५-१७८-५ (३७९८७)
राम उवाच। ५-१७८-६क्ष् (३९०५)
काशिकन्ये पुनर्ब्रूहि भीष्मस्ते चरणावुभौ ।
शिरसा वन्दनार्होऽपि ग्रहीष्यति गिरा मम ॥ ५-१७८-६ (३७९८८)

अम्बोवाच। ५-१७८-७क्ष् (३९०६)
जहि भीष्मं रणे राम मम चेदिच्छसि प्रियम् ।
प्रतिश्रुतं च यदपि तत्सत्यं कर्तुमर्हसि ॥ ५-१७८-७ (३७९८९)
भीष्म उवाच। ५-१७८-८क्ष् (३९०७)
तयोः संवदतोरेवं राजन्रामाम्बयोस्तदा ।
अकृतव्रणो जामदग्न्यमिदं वचनमब्रवीत् ॥ ५-१७८-८ (३७९९०)
शरणागतां महाबाहो कन्यां न त्यक्तुमर्हसि ।
यदि भीष्मो रणे राम समाहूतस्त्वया मृधे ॥ ५-१७८-९ (३७९९१)
निर्जितोऽस्मीति वा ब्रूयात्कुर्याद्वा वचनं तव ।
कृतमस्या भवेत्कार्यं कन्याया भृगुनन्दन ॥
वाक्यं सत्यं च ते वीर भविष्यति कृतं विभो ।
इयं चापि प्रतिज्ञा ते तदा राम महामुने ॥ ५-१७८-१० (३७९९२)
जित्वा वै क्षत्रियान्सर्वान्ब्रह्मणेषु प्रतिश्रुता ।
ब्राह्मणः क्षत्रियो वैश्यः शूद्रश्चैव रणे यदि ॥ ५-१७८-१२ (३७९९३)
ब्रह्मद्विड्भविता तं वै हनिष्यामीति भार्गव ।
शरणार्थे प्रपन्नानां भीतानां शरणार्थिनाम् ॥ ५-१७८-१३ (३७९९४)
न शक्ष्यामि परित्यागं कर्तुं जीवन्कथंचन ।
यश्च कृत्स्नं रणे क्षत्रं विजेष्यति समागतम् ॥ ५-१७८-१४ (३७९९५)
दीप्तात्मानमहं तं च हनिष्यामीति भार्गव ।
स एवं विजयी राम भीष्मः कुरुकुलोद्वहः ।
तेन युध्यस्व सङ्ग्रमे समेत्य भृगुनन्दन ॥ ५-१७८-१५ (३७९९६)
राम उवाच। ५-१७८-१६क्ष् (३९०८)
स्मराम्यहं पूर्वकृतां प्रतिज्ञामृषिसत्तम ।
तथैव त्त करिष्यामि यथा साम्नैव लप्स्यते ॥ ५-१७८-१६ (३७९९७)
कार्यमेतन्महद्ब्रह्मन्काशिकान्यामनोगतम् ।
गमिष्यामि स्वयं कन्यामादाय यत्र सः ॥ ५-१७८-१७ (३७९९८)
यदि भीष्मो रणश्लाघी न करिष्यति मे वचः ।
हनिष्याम्येनमुद्रिक्तमिति मे निश्चिता मतिः ॥ ५-१७८-१८ (३७९९९)
न हि बाणा मयोत्सृष्टाः सज्जन्तीह शरीरिणाम् ।
कायेषु विदितं तुभ्यं पुरा क्षत्रियसंगरे ॥ ५-१७८-१९ (३८०००)
भीष्म उवाच। ५-१७८-२०क्ष् (३९०९)
एवमुक्त्वा ततो रामः सह तैर्ब्रह्मवादिभिः ।
प्रयाणाय मतिं कृत्वा समुत्तस्थौ महातपाः ॥ ५-१७८-२० (३८००१)
ततस्ते तामुषित्वा तु रजनीं तत्र तापसाः ।
हुताग्नयो जप्तजप्याः प्रतस्थुर्मञ्जिघांसया ॥ ५-१७८-२१ (३८००२)
अभ्यगच्छत्ततो रामः सह तैर्ब्रह्मवादिभिः ।

कुरुक्षेत्रं महाराज कन्यया सह भारत ॥ ५-१७८-२२ (३८००३)
न्यविशन्त ततः सर्वे परिगृह्य सरस्वतीम् ।
तापसास्ते महात्मानो भृगुश्रेष्ठपुरस्कृताः ॥ ५-१७८-२३ (३८००४)
ततस्तृतीये दिवसे समे देशे व्यवस्थितः ।
प्रेषयामास मे राजन्प्राप्तोऽस्मीति महाव्रतः ॥ ५-१७८-२४ (३८००५)
तमागतमहं श्रुत्वा विषयान्तं महाबलम् ।
अभ्यगच्छं जवेनाशु प्रीत्या तेजोनिधिं प्रभुम् ॥ ५-१७८-२५ (३८००६)
गां पुरस्कृत्य राजेन्द्र ब्राह्मणैः परिवारितः ।
ऋत्विग्भिर्देवकल्पैश्च तथैव च पुरोहितैः ॥ ५-१७८-२६ (३८००७)
स मामभिगतं दृष्ट्वा जामदग्न्यः प्रतापवान् ।
प्रतिजग्राह तां पूजां वचनं चेदमब्रवीत् ॥ ५-१७८-२७ (३८००८)
राम उवाच। ५-१७८-२८क्ष् (३९१०)
भीष्म कां बुद्धिमास्थाय काशिराजसुता तदा ।
अकामेन त्वया नीता पुनश्चैव विसर्जिता ॥ ५-१७८-२८ (३८००९)
विभ्रंशिता त्वया हीयं धर्मादास्ते यशस्विनी ।
परामृष्टां त्वया हीमां को हि गन्तुमिहार्हति ॥ ५-१७८-२९ (३८०१०)
प्रत्याख्याता हि साल्वेन त्वया नीतेति भारत ।
तस्मादिमां मन्नियोगात्प्रतिगृह्णीष्व भारत ॥ ५-१७८-३० (३८०११)
स्वधर्मं पुरुषव्याघ्र राजपुत्री लभत्वियम् ।
न युक्तस्त्ववमानोऽयं राज्ञां कर्तुं त्वयाऽनघ ॥ ५-१७८-३१ (३८०१२)
भीष्म उवाच। ५-१७८-३२क्ष् (३९११)
ततस्तं वै विमनसमुदीक्ष्याहमथाब्रुवम् ।
नाहमेनां पुनर्दद्यां ब्रह्मन्भ्रात्रे कथञ्चन ॥ ५-१७८-३२ (३८०१३)
साल्वस्याहमिति प्राह पुरा मामेव भार्गव ।
मया चैवाभ्यनुज्ञाता गतेयं नगरं प्रति ॥ ५-१७८-३३ (३८०१४)
न भयान्नाप्यनुक्रोशान्नार्थलोभान्न काम्यया ।
क्षात्रं धर्ममहं जह्यमिति मे व्रतमाहितम् ॥ ५-१७८-३४ (३८०१५)
अथ मामब्रवीद्रामः क्रोधपर्याकुलेक्षणः ।
न करिष्यसि चेदेतद्वाक्यं मे नरपुङ्गव ॥ ५-१७८-३५ (३८०१६)
हनिष्यामि सहामात्यं त्वामद्येति पुनः पुनः ।
संरम्भादब्रवीद्रामः क्रोधपर्याकुलेक्षणः ॥ ५-१७८-३६ (३८०१७)
तमहं गीर्भिरिष्टाभि पुनः पुनररिन्दम ।
अयाचं भृगुशार्दूलं न चैव प्रशशाम सः ॥ ५-१७८-३७ (३८०१८)
प्रणम्य तमहं मूर्ध्ना भूयो ब्राह्मणसत्तमम् ।
अब्रुवं कारणं किं तद्यत्त्वं युद्धं मयेच्छसि ॥ ५-१७८-३८ (३८०१९)
इष्वस्त्रं मम बालस्य भवतैव चतुर्विधम् ।

उपदिष्टं महाबाहो शिष्योऽस्मि तव भार्गव ॥ ५-१७८-३९ (३८०२०)
ततो मामब्रवीद्रामः क्रोधसंरक्तलोचनः ।
जानीषे मां गुरुं भीष्म गृह्णासीमां न चैव ह ॥ ५-१७८-४० (३८०२१)
सुतां काश्यस्य कौरव्य मत्प्रियार्थं महामते ।
न हि मे विद्यते शान्तिरन्यथा कुरुनन्दन ॥ ५-१७८-४१ (३८०२२)
गृहाणेमां महाबाहो रक्षस्व कुलमात्मनः ।
त्वया विभ्रंशिता ह्रीयं भर्तारं नाधिगच्छति ॥ ५-१७८-४२ (३८०२३)
तथा ब्रुवन्तं तमहं रामं परपुरंयम् ।
नैतदेवं पुनर्भावि ब्रह्मर्षे किं श्रमेण ते ॥ ५-१७८-४३ (३८०२४)
गुरुत्वं त्वयि संप्रेक्ष्य जामदग्न्य पुरातनम् ।
प्रसादये त्वां भगवंस्त्यक्तैषा तु पुरा मया ॥ ५-१७८-४४ (३८०२५)
को जातु परभावां हि नारीं व्यालीमिव स्थिताम् ।
वासयेत गृहे जानन्स्त्रीणां दोषो महात्ययः ॥ ५-१७८-४५ (३८०२६)
न भयाद्वासवस्यापि धर्मं जह्यां महाव्रत ।
प्रसीद मा वा यद्वा ते कार्यं तत्कुरु मा चिरम् ॥ ५-१७८-४६ (३८०२७)
अयं चापि विशुद्धात्मन्पुराणे श्रूयते विभो ।
मरुत्तेन महाबुद्धे गीतः श्लोको महात्मना ॥ ५-१७८-४७ (३८०२८)
गुरोरप्यवलिप्तस्य कार्याकार्यमजानतः ।
उत्पथं प्रतिपन्नस्य परित्यागो विधीयते ॥ ५-१७८-४८ (३८०२९)
स त्वं गुरुरिति प्रेम्णा मया संमानितो भृशम् ।
गुरुवृत्तिं न जानीषे तस्माद्योत्स्यामि वै त्वया ॥ ५-१७८-४९ (३८०३०)
गुरुं न हन्यां समरे ब्राह्मणं च विशेषतः ।
विशेषतस्तपोवृद्धमेवं क्षान्तं मया तव ॥ ५-१७८-५० (३८०३१)
उद्यतेषुमथो दृष्ट्वा ब्राह्मणं क्षत्रबन्धुवत् ।
यो हन्यात्समरे क्रुद्धं युध्यन्तमपलायिनम् ॥ ५-१७८-५१ (३८०३२)
ब्रह्महत्या न तस्य स्यादिति धर्मेषु निश्चयः ।
क्षत्रियाणां स्थितो धर्मं क्षत्रियोऽस्मि तपोधन ॥ ५-१७८-५२ (३८०३३)
यो यथा वर्तते यस्मिंस्तस्मिन्नेव प्रवर्तयन् ।
नाधर्मं समवाप्नोति न चाश्रेयश्च विन्दति ॥ ५-१७८-५३ (३८०३४)
अर्थे वा यदि वा धर्मे समर्थो देशकालवित् ।
अर्थसंशयमापन्नः श्रोयान्निःसंशयो नरः ॥ ५-१७८-५४ (३८०३५)
यस्मात्संशयितेऽप्यर्थेऽयथान्यायं प्रवर्तसे ।
तस्माद्योत्स्यामि सहितस्त्वया राम महाहवे ॥ ५-१७८-५५ (३८०३६)
पश्य मे बाहुवीर्यं च विक्रमं चातिमानुषम् ।
एवं गतेऽपि तु मया यच्छक्यं भृगुनन्दन ॥ ५-१७८-५६ (३८०३७)
तत्करिष्ये कुरुक्षेत्रे योत्स्ये विप्र त्वया सह ।

द्वन्द्वे राम यथेष्टं मे सञ्जीभव महाद्युते ॥ ५-१७८-५७ (३८०३८)
तत्र त्वं निहतो राम मया शरशतार्दितः ।
प्राप्स्यसे निर्जिताँल्लोकाञ्शस्त्रपूतो महारणे ॥ ५-१७८-५८ (३८०३९)
स गच्छ विनिवर्तस्व कुरुक्षोत्रं रणप्रिय ।
तत्रैष्यामि महाबाहो युद्धाय त्वांतपोधन ॥ ५-१७८-५९ (३८०४०)
अपि यत्र त्वया राम कृतं शौचं पुरा पितुः ।
तत्राहमपि हत्वा त्वां शौचं कर्तास्मि भार्गव ॥ ५-१७८-६० (३८०४१)
तत्र राम समागच्छ त्वरितं युद्धदुर्मद ।
व्यपनेष्यामि ते दर्प पौराणं ब्राह्मणब्रुव ॥ ५-१७८-६१ (३८०४२)
यच्चापि कत्थसे राम बहुशः परिवत्सरे ।
निर्जिताः क्षत्रिया लोके मयैकेनेति तच्छ्रुणु ॥ ५-१७८-६२ (३८०४३)
न तदा जातवान्भीष्मः क्षत्रियो वापि मद्विधः ।
पञ्चाञ्चातानि तेजांसि तृणेषु ज्वलितं त्वया ॥ ५-१७८-६३ (३८०४४)
यस्ते युद्धमयं दर्पं कामं च व्यपनाशयेत् ।
सोऽहं जातो महाबाहो भीष्मः परपुरंजयः ।
व्यपनेष्यामि ते दर्पं युद्धे राम न संशयः ॥ ५-१७८-६४ (३८०४५)
ततो मामब्रवीद्रामः प्रहसन्निव भारत ।
दिष्ट्या भीष्म मया सार्धं योद्धुमिच्छसि संगरे ॥ ५-१७८-६५ (३८०४६)
अयं गच्छामि कौरव्य कुरुक्षेत्रं त्वया सह ।
भाषितं ते करिष्यामि तत्रागच्छ परंतप ॥ ५-१७८-६६ (३८०४७)
तत्र त्वां निहतं माता मया शरशताचितम् ।
जाह्नवी पश्यतां भीष्म गृध्रकङ्कबलाशनम् ॥ ५-१७८-६७ (३८०४८)
कृपणं त्वामभिप्रेक्ष्य सिद्धचारणसेविता ।
मया विनिहतं देवी रोदतामद्य पार्थिव ॥ ५-१७८-६८ (३८०४९)
अतदर्हा महाभागा भगीरथसुताऽनघा ।
या त्वामजीजनन्मन्दं युद्धकामुकमातुरम् ॥ ५-१७८-६९ (३८०५०)
एहि गच्छ मया भीष्म युद्धकामुक दुर्मद ।
गृहाण सर्वं कौरव्य रथादि भरतर्षभ ॥ ५-१७८-७० (३८०५१)
इति ब्रुवाणं तमहं रामं परपुरंजयमक् ।
प्रणम्यक शिरसा राममेवमस्त्विवत्यथाब्रवम् ॥ ५-१७८-७१ (३८०५२)
एवमुक्त्वा ययौ रामः कुरुक्षेत्रं युयुत्सया ।
प्रविश्य नगरं चाहं सत्यवत्यै न्यवेदयम् ॥ ५-१७८-७२ (३८०५३)
ततः कृतस्वस्त्ययनो मात्रा च प्रतिनन्दितः ।
द्विजातीन्वाच्य पुण्याहं स्वस्ति चैव महाद्युते ॥ ५-१७८-७३ (३८०५४)
रथमास्थाय रुचिरं राजतं पाण्डुरैर्हयैः ।
सूपस्करं स्वधिष्ठानं वैयाघ्रपरिवारणम् ॥ ५-१७८-७४ (३८०५५)

उपपन्नं महाशस्त्रैः सर्वोपकरणान्वितम् ।
तत्कुलीनेन वीरेण हयशास्त्रविदा रणे ॥ ५-१७८-७५ (३८०५६)
यत्तं सूतेन शिष्टेन बहुशो दृष्टकर्मणा ।
दंशितः पाण्डुरेणाहं कवचेन वपुष्मता ॥ ५-१७८-७६ (३८०५७)
पाण्डुरं कार्मुकं गृह्य प्रायां भरतसत्तम ।
पाण्डुरेणातपत्रेण ध्रियमाणेन मूर्धनि ॥ ५-१७८-७७ (३८०५८)
पाण्डुरैश्चापि व्यजनैर्वीज्यमानो नराधिप ।
शुक्लवासाः सितोष्णीषः सर्वशुक्लविभूषणः ॥ ५-१७८-७८ (३८०५९)
स्तूयमानो जयाशीर्भिर्निष्क्रम्य गजसाह्वयात् ।
कुरुक्षेत्रं रणक्षेत्रमुपायां भरतर्षभ ॥ ५-१७८-७९ (३८०६०)
ते हयाश्चोदितास्तेन सूतेन परमाहवे ।
अवहन्मां भृशं राजन्मनोमारुतरंहसः ॥ ५-१७८-८० (३८०६१)
गत्वाऽहं तत्कुरुक्षेत्रं स च रामः प्रतापवान् ।
युद्धाय सहसा राजन्पराक्रान्तौ परस्परम् ॥ ५-१७८-८१ (३८०६२)
ततः सदर्शनेऽतिष्ठं रामस्यातितपस्विनः ।
प्रगृह्य शङ्खप्रवरंक ततः प्राधममुत्तमम् ॥ ५-१७८-८२ (३८०६३)
ततस्तत्र द्विजा राजंस्तापसाश्च वनौकसः ।
अपश्यन्त रणं दिव्यं देवाः सेन्द्रगणास्तदा ॥ ५-१७८-८३ (३८०६४)
ततो दिव्यानि माल्यानि प्रादुरासंस्ततस्ततः ।
वादित्राणि च दिव्यानि मेघवृन्दानि चैव ह ॥ ५-१७८-८४ (३८०६५)
ततस्ते तापसाः सर्वे भार्गवस्यानुयायिनः ।
प्रेक्षकाः समपद्यन्त परिवार्य रणाजिरम् ॥ ५-१७८-८५ (३८०६६)
ततो मामब्रवीद्देवी सर्वभूतहितैषिणी ।
माता स्वरूपिणी राजन्किमिदं ते चिकीर्षितम् ॥ ५-१७८-८६ (३८०६७)
गत्वाऽहं जामदग्न्यं तु प्रयाचिष्ये कुरूद्वह ।
भूष्मेण सह मा योत्सीः शिष्येणेति पुनः पुनः ॥ ५-१७८-८७ (३८०६८)
मा मैवं पुत्र निर्बन्धं कुरु विप्रेण पार्थिव ।
जामदग्न्येन समरे योद्धुमित्येव भर्त्सयत् ॥ ५-१७८-८८ (३८०६९)
किं न वै क्षत्रियहणो हरतुल्यपराक्रमः ।
विदितः पुत्र रामस्ते यतस्तं योद्धुमिच्छसि ॥ ५-१७८-८९ (३८०७०)
ततोऽहमब्रवं देवीमभिवाद्य कृताञ्जलिः ।
सर्वं तद्भरतश्रेष्ठ यथावृत्तं स्वयंवरे ॥ ५-१७८-९० (३८०७१)
यथा च रामो राजेन्द्र मया पूर्वं प्रचोदितः ।
काशिराजसुतायाश्च यथा कर्म पुरातनम् ॥ ५-१७८-९१ (३८०७२)
ततः सा राममभ्येत्य जननी मे महानदी ।
मदर्थं तमृषिं वीक्ष्य क्षमयामास भार्गवम् ॥ ५-१७८-९२ (३८०७३)

भीष्मेण सह मा योत्सीः शिष्येणेति वचोऽब्रवीत् ।
स च तामाह याचन्तीं भीष्ममेव निवर्तय ।
न च मे कुरुते काममित्यहं तमुपागमम् ॥ ५-१७८-९३ (३८०७४)
ततो गङ्गा सुतस्नोहान्मां सा पुनरुपागमत् ।
नास्या अकरवं वाक्यं क्रोधपर्याकुलेक्षणः ॥ ५-१७८-९४ (३८०७५)
अथादृश्यत धर्मात्मा भृगुश्रेष्ठो महातपाः ।
आह्वयामास च तदा युद्धाय द्विजसत्तमः ॥ ॥ ५-१७८-९५ (३८०७६)

इति श्रीमन्महाभारते उद्योगपर्वमि अम्बोपाख्यानपर्वणि
अष्टसप्तत्यधिकशततमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-१७८-२ काश्ये काशिराजकन्ये ॥
५-१७८-४८ अवलिप्तस्य दृप्तस्य । प्रतिपन्नस्य कार्यं भवति
शासनमिति को धो पाठः ॥
५-१७८-५३ यः पुमान् यस्मिन्नरे यथा प्रीत्या द्वेषेण वा वर्तते स
नरस्तस्मिन् तथैव प्रीति द्वेषं वा प्रवर्तयन् ॥
५-१७८-५४ ननु त्वामर्थे प्रवर्तयन्नहं त्वयि प्रीतिमेव
करोमीत्याशङ्क्याह अर्थेवेति । अर्थे द्युस्वाक्याद्वारकरणे धर्मे
पितृप्रीत्यर्थं स्वीकृते ब्रह्मचर्ये विषये देशकालानुसारेण
समर्थो विवेककुशलः। तत्र धर्मलोपेन गुरुवाक्यात् प्राप्यमाणोऽर्थः
श्रेयानुत नेत्यर्थे संशयवानुत गुरुवाक्यविरोधेनापि पाल्यमानो
धर्मः श्रेयानुत नेति धर्मे संशयवान्। एतयोर्मध्ये अर्थे
संशयमापन्नोऽर्थमननुतिष्ठन् श्रेयान्। परिशेषात् धर्मे तु
निःशंसयो धर्ममेवानुतिष्ठन् श्रोयानित्यर्थ ॥
५-१७८-६१ पौराणं पुराकृतम् ॥
५-१७८-६७ बलाः काकाः तेषामशनं अन्नभूतम् ॥

उद्योगपर्व - अध्याय १७९
॥ श्रीः ॥
५.१७९. अध्यायः १७९

Mahabharata - Udyoga Parva - Chapter Topics
भीष्मजामदग्न्ययुद्धवर्णनम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१७९-० (३८०७७)
भीष्म उवाच। ५-१७९-०क्ष् (३९१२)
तमहं स्मयन्निव रणे प्रत्यभाषं व्यवस्थितम् ।
भूमिष्ठं नोत्सहे योद्धुं भवन्तं रथमास्थितः ॥ ५-१७९-१ (३८०७८)
आरोह स्यन्दनं वीर कवचं च महाभुज ।
बधान समरे राम यदि योद्धुं मयेच्छसि ॥ ५-१७९-२ (३८०७९)
ततो मामब्रवीद्रामः स्मयमानो रणाजिरे ।
रथो मे मेदिनी भीष्म वाहा वेदाः सदश्ववत् ॥ ५-१७९-३ (३८०८०)
सूतश्च मातरिश्वा वै कवचं वेदमातरः ।
सुसंवीतो रणे ताभिर्योत्स्येऽहं कुरुनन्दन ॥ ५-१७९-४ (३८०८१)
एवं ब्रुवाणो गान्धारे रामो मां सत्यविक्रमः ।
शरव्रातेन महता सर्वतः प्रत्यवारयत् ॥ ५-१७९-५ (३८०८२)
ततोऽपश्यं जामदग्न्यं रथमध्ये व्यवस्थितम् ।
सर्वायुधवरे श्रीमत्यद्भुतोपमदर्शने ॥ ५-१७९-६ (३८०८३)
मनसा विहिते पुण्ये विस्तीर्णे नगरोपमे ।
दिव्याश्वयुजि सन्नद्धे काञ्चनेन विभूषिते ॥ ५-१७९-७ (३८०८४)
कवचेन महाबाहो सोमार्ककृतलक्ष्मणा ।
धनुर्धरो बद्धतूणो बद्धगोधाङ्गुलित्रवान् ॥ ५-१७९-८ (३८०८५)
सारथ्यं कृतवांस्तत्र युयुत्सोरकुतव्रणः ।
सखा वेदविदत्यन्तं दयितो भार्गवस्य ह ॥ ५-१७९-९ (३८०८६)
आह्वयानः स मां युद्धे मनो हर्षयतीव मे ।
पुनः पुनरभिक्रोशन्नभियाहीति भार्गवः ॥ ५-१७९-१० (३८०८७)
तमादित्यमिवोद्यन्तमनाधृष्यं महाबलम् ।
क्षत्रियान्तकरं राममेकमेकः समासदम् ॥ ५-१७९-११ (३८०८८)
ततोऽहं बाणपातेषु त्रिषु वाहान्निगृह्य वै ।
अवतीर्य धनुर्न्यस्य पदातिर्ऋषिसत्तमम् ॥ ५-१७९-१२ (३८०८९)
अभ्यागच्छं तदा राममर्चिष्यन्द्विजसत्तमम् ।
अभिवाद्य चैनं विधिवदब्रुवं वाक्यमुत्तमम् ॥ ५-१७९-१३ (३८०९०)
योत्स्ये त्वया रणे राम सदृशेनाधिकेन वा ।
गुरुणा धर्मशीलेन जयमाशास्व मे विभो ॥ ५-१७९-१४ (३८०९१)
राम उवाच। ५-१७९-१५क्ष् (३९१३)
एवमेतत्कुरुश्रेष्ठ कर्तव्यं भूतिमिच्छता ।
धर्मो ह्येष महाबाहो विशिष्टैः सह युध्यताम् ॥ ५-१७९-१५ (३८०९२)
शपेयं त्वां नचेदेवमागच्छेथा विशांपते ।
युध्यस्व त्वं रणे यत्तो धैर्यमालम्ब्य कौरव ॥ ५-१७९-१६ (३८०९३)
न तु ते जयमाशासे त्वां विजेतुमहं स्थितः ।

गच्छ युध्यस्व धर्मेण प्रीतोऽस्मि चरितेन ते ॥ ५-१७९-१७ (३८०९४)
ततोऽहं तं नमस्कृत्य रथमारुह्य सत्वरः ।
प्राध्मापयं रणे शङ्खं पुनर्हेमपरिष्कृतम् ॥ ५-१७९-१८ (३८०९५)
ततो युद्धं समभवन्मम तस्य च भारत ।
दिवसान्सुबहून्राजन्परस्परजिगीषया ॥ ५-१७९-१९ (३८०९६)
स मे तस्मिन्रणे पूर्वं प्राहरत्कङ्कपत्रिभिः ।
वष्ट्या शतैश्च नवभिः शराणां नतपर्वणाम् ॥ ५-१७९-२० (३८०९७)
चत्वारस्तेन मे वाहाः सूतश्चैव विशांपते ।
प्रतिरुद्धास्तथैवाहं समरे दंशितः स्थितः ॥ ५-१७९-२१ (३८०९८)
नमस्कृत्य च देवेभ्यो ब्राह्मणेभ्यो विशेषतः ।
तमहं स्मयन्निव रणे प्रत्यभाषं व्यवस्थितम् ॥ ५-१७९-२२ (३८०९९)
आचार्यता मानिता मे निर्मर्यादे ह्यपि त्वयि ।
भूयश्च शृणु मे ब्रह्मन्संपदं धर्मसंग्रहे ॥ ५-१७९-२३ (३८१००)
ये ते वेदाः शरीरस्था ॥॥ यच्च ते महत् ।
तपश्च ते महत्तप्तं न तेभ्यः प्रहराम्यहम् ॥ ५-१७९-२४ (३८१०१)
प्रहरे क्षत्रधर्मस्य यं त्वं राम समाश्रितः ।
ब्राह्मणः क्षत्रियत्वं हि याति शस्त्रसमुद्यमात् ॥ ५-१७९-२५ (३८१०२)
पश्य मे धनुषो वीर्यं पश्य बाह्वोर्बलं मम ।
एष ते कार्मुक वीर छिनद्मि निशितेषुणा ॥ ५-१७९-२६ (३८१०३)
तस्याहं निशितं भल्लं चिक्षेप भरतर्षभ ।
तेनास्य धनुषः कोटिं छित्वा भूमावपातयम् ॥ ५-१७९-२७ (३८१०४)
तथैव च पृषत्कानां शतानि नतपर्वणाम् ।
चिक्षेप कङ्कपत्राणां जामदग्न्यरथं प्रति । ५-१७९-२८ (३८१०५)
काये विषक्तास्तु तदा वायुना समुदीरिताः ।
चेलुः क्षरन्तो रुधिरं नागा इव च ते शराः ॥ ५-१७९-२९ (३८१०६)
क्षतजोक्षितसर्वाङ्गः क्षरन्स रुधिरं रणे ।
बभौ रामस्तथा राजन्प्रफुल्ल इव किंशुकः ॥ ५-१७९-३० (३८१०७)
हेमन्तान्तेऽशोक इव रक्तस्तबकमण्डितः ।
बभौ रामस्तथा राजन्प्रफुल्ल इव किंशुकः ॥ ५-१७९-३१ (३८१०८)
ततोऽन्यद्धनुरादाय रामः क्रोधसमन्वितः ।
हेमपुङ्खान्सुनिशिताञ्शरांस्तान्हि ववर्ष सः ॥ ५-१७९-३२ (३८१०९)
ते समासाद्य मां रौद्रा बहुधा मर्मभेदिनः ।
अकम्पयन्महावेगाः सर्पानलविषोपमाः ॥ ५-१७९-३३ (३८११०)
तमहं समवष्टभ्य पुनरात्मानमाहवे ।
शतसंख्यैः शरैः क्रुद्धस्तदा राममवाकिरम् ॥ ५-१७९-३४ (३८१११)
स तैरग्न्यर्कसङ्काशैः शरैराशीविषोपमैः ।

शितैरभ्यर्दितो रामो मन्दचेता इवाभवत् ॥ ५-१७९-३५ (३८११२)
ततोऽहं कृपयाऽऽविष्टो विनिन्द्यात्मानमात्मना ।
धिग्धिगित्यब्रुवं युद्धं क्षत्रधर्मं च भारत ॥ ५-१७९-३६ (३८११३)
असकृच्चाब्रुवं राजञ्शोकवेगपरिप्लुतः ।
अहो बत कृतं पापं मयेदं क्षत्रधर्मं च भारत ॥ ५-१७९-३७ (३८११४)
गुरुर्द्विजातिर्धर्मात्मा यदेवं पीडितः शरैः ।
ततो न प्राहरं भूयो जामदग्न्याय भारत ॥ ५-१७९-३८ (३८११५)
अथावताप्य पृथिवीं पूषा दिवसमंक्षये ।
जगामास्तं सहस्रांशुस्ततो युद्धमुपारमत् ॥ ॥ ५-१७९-३९ (३८११६)

इति श्रीमन्महाभारते उद्योगपर्वणि अम्बोपाख्यानपर्वणि
एकोनाशीत्यधिकशततमोऽध्यायः ॥

उद्योगपर्व - अध्याय १८०
॥ श्रीः ॥
५.१८०. अध्यायः १८०

Mahabharata - Udyoga Parva - Chapter Topics
रामभीष्मसमरवर्णनम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१८०-० (३८११७)
भीष्म उवाच। ५-१८०-०क्ष् (३९१४)
आत्मनस्तु ततः सूतो हयानां च विशांपते ।
मम चापनयामास शल्यान्कुशलसंमतः ॥ ५-१८०-१ (३८११८)
स्नातापवृत्तैस्तुरगैर्लब्धतोयैरविह्वलैः ।
प्रभाते चोदिते सूर्ये ततो युद्धमवर्तत ॥ ५-१८०-२ (३८११९)
दृष्ट्वा भां तूर्णमायान्तं दंशितं स्यन्दने स्थितम् ।
अकरोद्रथमत्यर्थं रामः सज्जं प्रतापवान् ॥ ५-१८०-३ (३८१२०)
ततोऽहं राममायान्तं दृष्ट्वा समरकाङ्क्षिणम् ।
धनुःश्रेष्ठं समित्सृज्य सहसावतरं रथात् ॥ ५-१८०-४ (३८१२१)
अभिवाद्य तथैवाहं रथमारुह्य भारत ।
युयुत्सुर्जामदग्न्यस्य प्रमुखे वीतभीः स्थितः ॥ ५-१८०-५ (३८१२२)
ततोऽहं शरवर्षेण महता समवाकिरम् ।
स च मां शरवर्षेण वर्षन्तं समवाकिरम् ॥ ५-१८०-६ (३८१२३)
संक्रुद्धो जामदग्न्यस्तु पुनरेव सुतेजितान् ।

संप्रैषीन्मे शरान्घोरान्दीप्तास्यानुरगानिव ॥ ५-१८०-७ (३८१२४)
ततोऽहं निशितैर्भल्लैः शतशोऽथ सहस्रशः ।
अच्छिदं सहसा राजन्नन्तरिक्षे पुनः पुनः ॥ ५-१८०-८ (३८१२५)
ततस्त्वस्त्राणि दिव्यानि जामदग्न्यः प्रतापवान् ।
मयि प्रयोजयामास तान्यहं प्रत्यषेधयम् । ५-१८०-९ (३८१२६)
अस्त्रैरेव महाबाहो चिकीर्षन्नधिकां क्रियाम् ।
ततो विदि महान्नादः प्रादुरासीत्समन्ततः ॥ ५-१८०-१० (३८१२७)
ततोऽहमस्त्रं वायव्यं जामदग्न्ये प्रयुक्तवान् ।
प्रत्याजघ्ने च तद्रामो गुह्यकास्त्रेण भारत ॥ ५-१८०-११ (३८१२८)
ततोऽहमस्त्रमाग्नेयमनुमन्त्र्य प्रयुक्तवान् ।
वारुणेनैव तद्रामो वारयामास मे विभुः ॥ ५-१८०-१२ (३८१२९)
एवमस्त्राणि दिव्यानि रामस्याहमवारयम् ।
रामश्च मम तेजस्वी दिव्यास्त्रविदरिन्दमः ॥ ५-१८०-१३ (३८१३०)
ततो मां सव्यतो राजन्रामः कुर्वन्द्विजोत्तमः ।
उरस्यविध्यत्संक्रुद्धो जामदग्न्यः प्रतापवान् ॥ ५-१८०-१४ (३८१३१)
ततोऽहं भारतश्रेष्ठ संन्यषीदं रथोत्तमे ।
ततो मां कश्मलाविष्टं सूतस्तूर्णमुदावहत् ॥ ५-१८०-१५ (३८१३२)
ग्लायन्तं भरश्रेष्ठ रामबाणप्रपीडितम् ।
ततो मामपयातं वै भृशं विद्धमचेतसम् ॥ ५-१८०-१६ (३८१३३)
रामस्यानुचरा हृष्टाः सर्वे दृष्ट्वा विचुक्रुशुः ।
अकृतव्रणप्रभृतयः काशिकन्या च भारत ॥ ५-१८०-१७ (३८१३४)
ततस्तु लब्धसंज्ञोऽहं ज्ञात्वा सूतमथाब्रुवम् ।
याहि सूत यतो रामः सज्जोऽहं गतवेदनः ॥ ५-१८०-१८ (३८१३५)
ततो मामवहत्सूतो हयैः परमशोभितैः ।
नृत्यद्भिरिव कौरव्य मारुतप्रतिमैर्गतौ ॥ ५-१८०-१९ (३८१३६)
ततोऽहं राममासाद्य बाणवर्षैश्च कौरव ।
अवाकिरं सुसंरब्धः संरब्धं च जिगीषया ॥ ५-१८०-२० (३८१३७)
तानापतत एवासौ रामो बाणानजिह्मगान् ।
बाणैरेवाच्छिनत्तूर्णमेकैकं त्रिभिराहवे ॥ ५-१८०-२१ (३८१३८)
ततस्ते सूदिताः सर्वे मम बाणाः सुसंशिताः ।
रामबाणैर्द्विधा च्छिन्नाः शतशोऽथ सहस्रशः ॥ ५-१८०-२२ (३८१३९)
ततः पुनः शरं दीप्तं सुप्रभं कालसंमितम् ।
असृजं जामदग्न्याय रामायाहं जिघांसया ॥ ५-१८०-२३ (३८१४०)
तेन त्वभिहतो गाढं बाणवेगवशं गतः ।
मुमोह समरे रामो भूमौ च निपपात ह ॥ ५-१८०-२४ (३८१४१)
ततो हाहाकृतं कसर्वं रामे भूतलमाश्रिते ।

जगद्भारत संविग्नं यथार्कपतने भवेत् ॥ ५-१८०-२५ (३८१४२)
तत एनं समुद्विग्नाः सर्व एवाभिदुद्रुवुः ।
तपोधनास्ते सहसा काश्या च कुरुनन्दन ॥ ५-१८०-२६ (३८१४३)
तत एनं परिष्वज्य शनैराश्वासयंस्तदा ।
पाणिभिर्जलशीतैश्च जयाशीर्भिश्च कौरव ॥ ५-१८०-२७ (३८१४४)
ततः स विह्वलं वाक्यं राम उत्थाय चाब्रवीत् ।
तिष्ठ भीष्म हतोऽसीति बाणं संधाय कार्मुके ॥ ५-१८०-२८ (३८१४५)
स मुक्तो न्यपतत्तूर्णं सव्ये पार्श्वे महाहवे ।
येनाहं भृशमुद्विग्नो व्याघूर्णित इव द्रुमः ॥ ५-१८०-२९ (३८१४६)
हत्वा हयांस्ततो रामः शीघ्रास्त्रेण महाहवे ।
अवाकिरन्मां विस्रब्धो बाणैस्तैर्लोमवाहिभिः ॥ ५-१८०-३० (३८१४७)
ततोऽहमपि शीघ्रास्त्रं समरप्रतिवारणम् ।
अवासृजं महाबाहो तेन्तराधिष्ठिताः शराः ॥ ५-१८०-३१ (३८१४८)
रामस्य मम चैवाशु व्योमावृत्य समन्ततः ।
न स्म सूर्यः प्रतपति शरजालसमावृतः ॥ ५-१८०-३२ (३८१४९)
मातरिश्वा ततस्तस्मिन्मेघरुद्ध इवाभवत् ।
ततो वायोः प्रकम्पाच्च सूर्यस्य च गभस्तिभिः ॥ ५-१८०-३३ (३८१५०)
अभिघातप्रभावाच्च पावकः समजायत ।
ते शराः स्वसमुत्थेन प्रदीप्ताश्चित्रभानुना ॥ ५-१८०-३४ (३८१५१)
भूमौ सर्वे तदा राजन्भस्मभूताः प्रपेदिरे ।
तदा शतसहस्राणि प्रयुतान्यर्बुदानि च ॥ ५-१८०-३५ (३८१५२)
अयुतान्यथ खर्वाणि निखर्वाणि च कौरव ।
रामः शराणां संक्रुद्धो मयि तूर्णं न्यपातयत् ॥ ५-१८०-३६ (३८१५३)
ततोऽहं तानपि रणे शरैराशीविषोपमैः ।
संछिद्य भूमौ नृपते पातयेयं नगानिव ॥ ५-१८०-३७ (३८१५४)
एवं तदभवद्युद्धं तदा भरतसत्तम ।
सन्ध्याकाले व्यतीते तु व्यपायात्स च मे गुरुः ॥ ॥ ५-१८०-३८ (३८१५५)

इति श्रीमन्महाभारते उद्योगपर्वणि अम्बोपाख्यानपर्वणि
अशीत्यधिकशततमोऽध्यायः ॥

उद्योगपर्व - अध्याय १८१
॥ श्रीः ॥
५.१८१. अध्यायः १८१

Mahabharata - Udyoga Parva - Chapter Topics
रमभीष्मसमरवर्णनम् ॥ १ ॥

५-१८१-० (३८१५६)
भीष्म उवाच। ५-१८१-०क्ष् (३९१५)
समागतस्य रामेण पुनरेवातिदारुणम् ।
अन्येद्युस्तुमुलं युद्धं तदा भरतसत्तम ॥ ५-१८१-१ (३८१५७)
ततो दिव्यास्त्रविच्छूरो दिव्यान्यस्त्राण्यनेकशःक ।
अयोजयत्स धर्मात्मा दिवसे दिवसे विभुः ॥ ५-१८१-२ (३८१५८)
तान्यहं तत्प्रतीघातैरस्त्रैरस्त्राणि भारत ।
व्यधमं तुमुलेयुद्धेप्राणांस्त्यक्त्वासुदुस्त्यजान् ॥ ५-१८१-३ (३८१५९)
अस्त्रैरस्त्रेषु बहुधा हतेष्वेव च भारत ।
अक्रुध्यत महातेजास्त्यक्तप्राणः स संयुगे ॥ ५-१८१-४ (३८१६०)
ततः शक्तिं प्राहिणोद्घोररूपा-
मस्त्रे रुद्धे जामदग्न्यो महात्मा ।
कालोत्सृष्टां प्रज्वलितामिवोल्कां
संदीप्ताग्रां तेजसा व्याप्य लोकम् ॥ ५-१८१-५ (३८१६१)
ततोऽहं तामिषुभिर्दीप्यमानां
समायान्तीमन्तकालार्कदीप्ताम् ।
छित्त्वा त्रिधा पातयामास भूमौ
ततो ववौ पवनः पुण्यगन्धिः ॥ ५-१८१-६ (३८१६२)
तस्यां छिन्नायां क्रोधदीप्तोऽथ रामः
शक्तीर्घोराः प्राहिणोद्द्वादशान्याः ।
तासां रूपं भारत नोत शक्यं
तेजस्वित्वाल्लाघवाच्चैव वक्तुम् ॥ ५-१८१-७ (३८१६३)
किन्त्वेवाहं विह्वलः संप्रदृश्य
दिग्भ्यः सर्वास्ता महोल्का इवाग्नेः ।
नानारूपास्तेजसोग्रेण दीप्ता
यथाऽऽदित्या द्वादश लोकसंक्षये ॥ ५-१८१-८ (३८१६४)
ततो जालं बाणमयं विवृत्तं
संदृश्य भित्त्वा शरजालेन राजन् ।
द्वादशेषून्प्राहिणवं रणेऽहं
ततः शक्तीरप्यधमं घोररूपाः ॥ ५-१८१-९ (३८१६५)
ततो राजञ्जामदग्न्यो महात्मा
शक्तीर्घोरा व्याक्षिपद्धेमदण्डाः ।
विचित्रिताः काञ्चनपट्टनद्धा

यथा महोल्का ज्वलितास्तथा ताः ॥ ५-१८१-१० (३८१६६)
ताश्चाप्युग्राश्चर्मणा वारयित्वा
खड्गेनाजौ पातयित्वा नरेन्द्र ।
बाणैर्दिव्यैर्जामदग्न्यस्य सङ्ख्ये
दिव्यानश्वानभ्यवर्षं ससूतान् ॥ ५-१८१-११ (३८१६७)
निर्मिक्तानां पन्नगानां सरूपा
दृष्ट्वा शक्तीर्हेमचित्रा निकृत्ताः ।
प्रादुश्चक्रे दिव्यमस्त्रं महात्मा
क्रोधाविष्टो हैहयेशममाथी ॥ ५-१८१-१२ (३८१६८)
ततः श्रेण्यः शलभानामिवोग्राः
समापेतुर्विशिखानां प्रदीप्ताः ।
समाचिनोच्चापि भृशं शरीरं
हयान्सूतं सरथं चैव मह्यम् ॥ ५-१८१-१३ (३८१६९)
रथः शरैर्मे निचितः सर्वतोऽभू-
त्तथा वाहाः सारथिश्चैव राजन् ।
युगं रथेषां च तथैव चक्रे
तथैवाक्षः शरकृत्तोऽथ भग्नः ॥ ५-१८१-१४ (३८१७०)
ततस्तस्मिन्बाणवर्षे व्यतीते
शरौघेण प्रत्यवर्षं गुरुं तम् ।
स विक्षतो मार्गणैर्ब्रह्मराशि-
र्देहादसक्तं मुमुचे भूरि रक्तम् ॥ ५-१८१-१५ (३८१७१)
यथा रामो बाणजालाभितप्त-
स्तथैवाहं सुभृशं गाढविद्धः ।
ततो युद्धं व्यरमच्चापराह्णे
भानावस्तं प्रतियाते महीध्रम् ॥ ॥ ५-१८१-१६ (३८१७२)

इति श्रीमन्महाभारते उद्योगपर्वणि अम्बोपाख्यानपर्वणि
एकाशीत्यधिकशततमोऽध्यायः ॥

उद्योगपर्व - अध्याय १८२
॥ श्रीः ॥
५.१८२. अध्यायः १८२

Mahabharata - Udyoga Parva - Chapter Topics
रामेण रथादधः पातितस्य भीष्मस्य दिव्यपुरुषैः समाश्वासनम् ॥ १ ॥
भीष्मेण रामस्य रथादधः पातनम् ॥ २ ॥
समुद्बुध्य पुनर्युयुत्सो रामस्य महर्षिभिर्युद्धात्प्रतिनिवर्तनम् ॥ ३ ॥

५-१८२-० (३८१७३)
भीष्म उवाच। ५-१८२-०क्ष् (३९१६)
ततः प्रभाते राजेन्द्र सूर्ये विमलतां गते ।
भार्गवस्य मया सार्धं पुनर्युद्धमवर्तत ॥ ५-१८२-१ (३८१७४)
ततोऽभ्रान्ते रथे तिष्ठन्रामः प्रहरतां वरः ।
ववर्ष शरजालानि मयि मेध इवाचले ॥ ५-१८२-२ (३८१७५)
ततः सूतो मम सुहृच्छरवर्षेण ताडितः ।
अपयातो रथोपस्थान्मनो मम विषादयन् ॥ ५-१८२-३ (३८१७६)
ततः सूतो ममात्यर्थं कश्मलं प्राविशन्महत् ।
पृथिव्यां च शराघातान्निपपात मुमोह च ॥ ५-१८२-४ (३८१७७)
ततः सूतो जहात्प्राणान्रामबाणप्रपीडितः ।
मुहूर्तादिव राजेन्द्र मां च भीराविशत्तदा ॥ ५-१८२-५ (३८१७८)
ततः सूते हते तस्मिन्क्षिपतस्तस्य मे शरान् ।
प्रमत्तमनसो रामः प्राहिणोन्मृत्युसंमितम् ॥ ५-१८२-६ (३८१७९)
ततः सूतव्यसनिनं विप्लुतं मां स भार्गवः ।
शरेणाभ्यहनद्गाढं विकृष्य बलवद्धनुः ॥ ५-१८२-७ (३८१८०)
स मे भुजान्तरे राजन्निपत्य रुधिराशनः ।
मयैव सह राजेन्द्र जगाम वसुधातलम् ॥ ५-१८२-८ (३८१८१)
मत्वा तु निहतं रामस्ततो मां भरतर्षभ ।
मेघवद्विननादोच्चैर्जहृषे च पुनः पुनः ॥ ५-१८२-९ (३८१८२)
तथा तु पतिते राजन्मयि रामो मुदा युतः ।
उदक्रोशन्महानादं सह तैरनुयायिभिः ॥ ५-१८२-१० (३८१८३)
मम तत्राभवन्ये तु कुरवः पार्श्वतः स्थिताः ।
आगता अपि युद्धं तञ्जनास्तत्र दिदृक्षवः ।
आर्तिं परमिकां जग्मुस्ते तदा पतिते मयि ॥ ५-१८२-११ (३८१८४)
ततोऽपश्यं पतितो राजसिंह
द्विजानष्टौ सूर्यहुताशनाभान् ।
ते मां समन्तात्परिर्वाय तस्थुः
स्वबाहुभिः परिधार्याजिमध्ये ॥ ५-१८२-१२ (३८१८५)
रक्ष्यमाणश्च तैर्विप्रैर्नाहं भूमिमुपास्पृशम् ।
अन्तरिक्षे धृतो ह्यस्मि तैर्विप्रैर्बान्धवैरिव ॥ ५-१८२-१३ (३८१८६)
श्वसन्निवान्तरिक्षे च जलबिन्दुभिरुक्षितः ।
ततस्ते ब्राह्मणा राजन्नब्रुवन्परिगृह्य माम् ॥ ५-१८२-१४ (३८१८७)

मा भैरिति समं सर्वे स्वस्ति तेऽस्त्विति चासकृत् ।
ततस्तेषामहं वाग्भिस्तर्पितः सहसोत्थितः ।
मातरं सरितां श्रेष्ठामपश्यं रथमास्थिताम् ॥ ५-१८२-१५ (३८१८८)
हयाश्च मे संगृहीतास्तयाऽऽस-
न्महानद्या संयति कौरवेन्द्र ।
पादौ जनन्याः प्रतिगृह्य चाहं
तथा पितॄणां रथमभ्यरोहम् ॥ ५-१८२-१६ (३८१८९)
ररक्ष सा मां सरथं हयांश्चोपस्काराणि च ।
तामहं प्राञ्जलिर्भूत्वा पुनरेव व्यसर्जयम् ॥ ५-१८२-१७ (३८१९०)
ततोऽहं स्वयमुद्यम्य हयांस्तान्वातरंहसः ।
अयुध्यं जामदग्न्येन निवृत्तेऽहनि भारत ॥ ५-१८२-१८ (३८१९१)
ततोऽहं भरतश्रेष्ठ वेगवन्तं महाबलम् ।
अमुञ्चं समरे बाणं रामाय हृदयच्छिदम् ॥ ५-१८२-१९ (३८१९२)
ततो जगाम वसुधां मम बाणप्रपीडितः ।
जानुभ्यां धनुरुत्सृज्य रामो मोहवशं गतः ॥ ५-१८२-२० (३८१९३)
ततस्तस्मिन्निपतिते रामे भूरिसहस्रदे ।
आववृर्जलदा व्योम क्षरन्तो रुधिरं बहु ॥ ५-१८२-२१ (३८१९४)
उल्काश्च शतशः पेतुः सनिर्घाताः सकम्पनाः । ५-१८२-२२बर्कं च
सहसा दीप्तं स्वर्भानुरभिसंवृणोत् ॥ ५-१८२-२२ (३८१९५)
ववुश्च वाताः परुषाश्चलिता च वसुंधरा ।
गृध्रा बलाश्च कङ्काश्च परिपेतुर्गुदा युताः ॥ ५-१८२-२३ (३८१९६)
दीप्तायां दिशि गोमायुर्दारुणं मुहुरुन्नदत् ।
अनाहता दुन्दुभयो विनेदुर्भृशनिःस्वनाः ॥ ५-१८२-२४ (३८१९७)
एतदौत्पातिकं सर्वं घोरमासीद्भयंकरम् ।
विसंज्ञकल्पे धरणीं गते रामे महात्मनि ॥ ५-१८२-२५ (३८१९८)
ततो वै सहसोत्थाय रामो मामभ्यवर्तत ।
पुनर्युद्धाय कौरव्य विह्वलः क्रोधमूर्छितः ॥ ५-१८२-२६ (३८१९९)
आददानो महाबाहुः कार्मुकं तालसन्निभम् ।
ततो मय्याददानं तं राममेव न्यवारयन् ॥ ५-१८२-२७ (३८२००)
महर्षयः कृपायुक्ताः क्रोधाविष्टोऽपि भार्गवः ।
समाहरदमेयात्मा शरं कालानलोपमम् ॥ ५-१८२-२८ (३८२०१)
सतो रविर्मन्दमरीचिमण्डलो
जगामास्तं पांसुपुञ्जावगूढः
निशा व्यगाहत्सुखशीतमारुता
ततो युद्धं प्रत्यवहारयाव- ॥ ५-१८२-२९ (३८२०२)
एवं राजन्नवहारो बभूव

ततः पुनर्विमलेऽभूत्सुघोरम् ।
कल्यंकल्यं विंशतिं वै दिनानि
तथैव चान्यानि दिनानि त्रीणि ॥ ॥ ५-१८२-३० (३८२०३)

इति श्रीमन्महाभारते उद्योगपर्वणि अम्बोपाख्यानपर्वणि
द्व्यशीत्यधिकशततमोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-१८२-२ अभ्रान्ते मेघमण्डलसमीपे ॥
५-१८२-१२ द्विजान् ब्राह्मणरूपधरान् वसून् ॥
५-१८२-२१ भूयिष्तहस्नदे स्वर्णसहस्राणां दातरि ॥
५-१८२-२२ सकम्पनाः सविद्युतः ॥
५-१८२-२३ बलाः बलाकाः ॥
५-१८२-३० कल्यंकल्यं प्रातःप्रातः ॥

उद्योगपर्व - अध्याय १८३
॥ श्रीः ॥
५.१८३. अध्यायः १८३

Mahabharata - Udyoga Parva - Chapter Topics
सप्रमाणं देवतादिप्रार्थनापूर्वकं शायितस्य भीष्मस्य दिव्यपुरुषैः
स्वप्ने समाश्वासनपूर्वकं ज्ञातपूर्वप्रस्वापनास्त्रानुस्मारणम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१८३-० (३८२०४)
भीष्म उवाच। ५-१८३-०क्ष् (३९१७)
ततोऽहं निशि राजेन्द्र प्रणम्य शिरसा तदा ।
ब्राह्मणानां पितॄणां च देवतानां च सर्वशः ॥ ५-१८३-१ (३८२०५)
नक्तंचराणां भूतानां राजन्यानां विशांपते ।
शयनं प्राप्य रहिते मनसा समचिन्तयम् ॥ ५-१८३-२ (३८२०६)
जामदग्न्येन मे युद्धमिदं परमदारुणम् ।
अहानि च बहून्यद्य वर्तते सुमहात्ययम् ॥ ५-१८३-३ (३८२०७)
न च रामं महावीर्यं शक्नोमि रणमूर्धनि ।
विजेतुं समरे विप्रं जामदग्न्यं महाबलम् ॥ ५-१८३-४ (३८२०८)
यदि शक्यो मया जेतुं जामदग्न्यः प्रतापवान् ।
दैवतानि प्रसन्नानि दर्शयन्तु निशां मम ॥ ५-१८३-५ (३८२०९)

ततो निशि च राजेन्द्र प्रसुप्तः शरविक्षतः ।
दक्षिणेनेह पार्श्वेन प्रभातसमये तदा ॥ ५-१८३-६ (३८२१०)
ततोऽहं विप्रमुख्यैस्तैर्यैरस्मि पतितो रथात् ।
उत्थापितो धृतश्चैव मा भैरिति च सान्त्वितः ॥ ५-१८३-७ (३८२११)
त एव मां महाराज स्वप्ने दर्शनमेत्य वै ।
परिवार्याब्रुवन्वाक्यं तन्निबोध कुरूद्वह ॥ ५-१८३-८ (३८२१२)
उत्तिष्ठ मा भैर्गाङ्गेय न भयं तेऽस्ति किंचन ।
रक्षामहे त्वां कौरव्य स्वशरीरं हि नो भवान् ॥ ५-१८३-९ (३८२१३)
न त्वां रामो रणे जेता जामदग्न्यः कथंचन ।
त्वमेव समरे रामं विजेता भरतर्षभ ॥ ५-१८३-१० (३८२१४)
इदमस्त्रं सुदयितं प्रत्यभिज्ञास्यते भवान् ।
विदितं हि तवाप्येतत्पूर्वस्मिन्देहधारणे ॥ ५-१८३-११ (३८२१५)
प्राजापत्यं विश्वकृतं प्रस्वापं नाम भारत ।
न हीदं वेद रामोऽपि पृथिव्यां वा पुमान्क्वचित् ॥ ५-१८३-१२ (३८२१६)
तत्स्मरस्व महाबाहो भृशं संयोजयस्व च ।
उपस्थास्यति राजेन्द्र स्वयमेव तवानघ ॥ ५-१८३-१३ (३८२१७)
येन सर्वान्महावीर्यान्प्रशासिष्यसि कौरव ।
न च रामः क्षयं गन्ता तेनास्त्रेण नराधिप ॥ ५-१८३-१४ (३८२१८)
एनसा न तु संयोगं प्राप्स्यसे जातु मानद ।
स्वप्स्यते जामदग्न्योऽसौ त्वद्बाणबलपीडितः ॥ ५-१८३-१५ (३८२१९)
ततो जित्वा त्वमेवैनं पुनरुत्थापयिष्यसि ।
अस्त्रेण दयितेनाजौ भीष्म संबोधनेन वै ॥ ५-१८३-१६ (३८२२०)
एवं कुरुष्व कौरव्य प्रभाते रथमास्थितः ।
प्रसुप्तं वा मृतं वेति तुल्यं मन्यामहे वयम् ॥ ५-१८३-१७ (३८२२१)
न च रामेण मर्तव्यं कदाचिदपि पार्थिव ।
ततः समुत्पन्नमिदं प्रस्वापं युज्यतामिति ॥ ५-१८३-१८ (३८२२२)
इत्युक्त्वान्तर्हिता राजन्सर्व एव द्विजोत्तमाः ।
अष्टौ सदृशरूपास्ते सर्वे भासुरमूर्तयः ॥ ॥ ५-१८३-१९ (३८२२३)

इति श्रीमन्महाभारते उद्योगपर्वणि अम्बोपाख्यानपर्वणि
त्र्यशीत्यधिकशततमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-१८३-५ निशां निशि । दर्शयन्तु आत्मानं प्रकाशयन्तु ॥

उद्योगपर्व - अध्याय १८४
॥ श्रीः ॥

Mahabharata - Udyoga Parva - Chapter Topics

रामभीष्मयोरायोधनम् ॥ १ ॥
भीष्मस्य प्रस्वापनास्त्रप्रतिभानम् ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१८४-० (३८२२४)
भीष्म उवाच। ५-१८४-०क्ष् (३९१८)
ततो रात्रौ व्यतीतायां प्रतिबुद्धोऽस्मि भारत ।
ततः संचिन्त्य वै स्वप्नमवापं हर्षमुत्तमम् ॥ ५-१८४-१ (३८२२५)
ततः समभवद्युद्धं मम तस्य च भारत ।
तुमुलं सर्वभूतानां रोमहर्षणमद्भुतम् ॥ ५-१८४-२ (३८२२६)
ततो बाणमयं वर्ष ववर्ष मयि भार्गवः ।
न्यवारयमहं तच्च शरजालेन भारत ॥ ५-१८४-३ (३८२२७)
ततः परमसंक्रुद्धः पुनरेव महातपाः ।
ह्यस्तनेन च कोपेन शक्तिं वै प्राहिणोन्मयि ॥ ५-१८४-४ (३८२२८)
इन्द्राशनिसमस्पर्शां यमदण्डसमप्रभाम् ।
ज्वलन्तीमग्निवत्सङ्ख्ये लेलिहानां समन्ततः ॥ ५-१८४-५ (३८२२९)
ततो भरतशार्दूल धिष्ण्यमाकाशगं यथा ।
सा ममाभ्यवधीत्तूर्णं जत्रुदेशे कुरूद्वह ॥ ५-१८४-६ (३८२३०)
अथास्रमस्रवद्घोरं गिरेर्गैरिकधातुवात् ।
रामेण सुमहाबाहो क्षतस्य क्षतजेक्षण ॥ ५-१८४-७ (३८२३१)
ततोऽहं जामदग्न्याय भृशं क्रोधसमन्वितः ।
चिक्षेप मृत्युसंकाशं बाणं सर्पविषोपमम् ॥ ५-१८४-८ (३८२३२)
स तेनाभिहतो वीरो ललाटे द्विजसत्तमः ।
अशोभत महाराज शृङ्गवानिव पर्वतः ॥ ५-१८४-९ (३८२३३)
स संरब्धः समावृत्य शरं कालान्तकोपमम् ।
संदधे बलवत्कृष्य घोरं शत्रुनिबर्हणम् ॥ ५-१८४-१० (३८२३४)
स वक्षसि पापतोग्रः शरो व्याल इव श्वसन् ।
महीं राजंस्ततश्चाहमगमं रुधिरावृतः ॥ ५-१८४-११ (३८२३५)
संप्राप्य तु पुनः संज्ञां जामदग्न्याय धीमते ।
प्राहिणवं विमलां शक्तिं ज्वलन्तीमशनीमिव ॥ ५-१८४-१२ (३८२३६)
सा तस्य द्विजमुख्यस्य निपपात भुजान्तरे ।
विह्वलश्चाभवद्राजन्वेपथुश्चैनमाविशत् ॥ ५-१८४-१३ (३८२३७)

तत एनं परिष्वज्य सखा विप्रो महातपाः ।
अकृतव्रणः शुभैर्वाक्यैराश्वासयदनेकधा ॥ ५-१८४-१४ (३८२३८)
समाश्वस्तस्ततो रामः क्रोधामर्षसमन्वितः ।
प्रादुश्चक्रे तदा ब्राह्मं परमास्त्रं महाव्रतः ॥ ५-१८४-१५ (३८२३९)
ततस्तत्प्रतिघातार्थं ब्राह्ममेवास्त्रमुत्तमम् ।
मया प्रयुक्तं जज्वाल युगान्तमिव दर्शयत् ॥ ५-१८४-१६ (३८२४०)
तयोर्ब्रह्मास्त्रयोरासीदन्तरा वै समागमः ।
असंप्राप्यैव रामं च मां च भारतसत्तम ॥ ५-१८४-१७ (३८२४१)
ततो व्योम्नि प्रादुरभूत्तेज एव हि केवलम् ।
भूतानि चैव सर्वाणि जग्मुरार्तिं विशांपते ॥ ५-१८४-१८ (३८२४२)
ऋषयश्च सगन्धर्वा देवताश्चैव भारत ।
संतापं परमं जग्मुरस्त्रतेजोभिपीडिताः ॥ ५-१८४-१९ (३८२४३)
ततश्चचाल पृथिवी सपर्वतवनद्रुमा ।
संतप्तानि च भूतानि विषादंक जग्मुरुत्तमम् ॥ ५-१८४-२० (३८२४४)
प्रजज्वाल नभो राजन्धूमायन्ते दिशो दश ।
न स्थातुमन्तरिक्षे च शेकुराकाशगास्तदा ॥ ५-१८४-२१ (३८२४५)
ततो हाहाकृते लोके सदेवासुरराक्षसे ।
इदमन्तरमित्येवं मोक्तुकामोऽस्मि भारत ॥ ५-१८४-२२ (३८२४६)
प्रस्वापमस्त्रं त्वरितो वचनाद्ब्रह्मवादिनाम् ।
चिन्तितं च तदस्त्रं मे मनसि प्रत्यभात्तदा ॥ ॥ ५-१८४-२३ (३८२४७)

इति श्रीमन्महाभारते उद्योगपर्वणि अम्बोपाख्यानपर्वणि
चतुरशीत्यधिकशततमोऽध्यायः ॥

उद्योगपर्व - अध्याय १८५
॥ श्रीः ॥
५.१८५. अध्यायः १८५

Mahabharata - Udyoga Parva - Chapter Topics
भीष्मे रामंप्रति प्रस्वापनास्त्रं प्रयोक्तुकामे नारदेन तन्निषेधनम् ॥ १ ॥
भीष्मेण दिव्यपुरुषवचनाच्च प्रस्वापनास्त्रप्रतिसंसंहारे रामेण
स्वस्य पराजितत्वोक्तिः ॥ २ ॥
नारदादिवचनाद्युद्धोपरमः ॥ ३ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१८५-० (३८२४८)

भीष्म उवाच। ५-१८५-०क्ष् (३९१९)
ततो हलहलाशब्दो दिवि राजन्महानभूत् ।
प्रस्वापं भीष्म मा स्राक्षीरिति कौरवनन्दन ॥ ५-१८५-१ (३८२४९)
अयुञ्जमेव चैवाहं तदस्त्रं भृगुनन्दने ।
प्रस्वापं मां प्रयुञ्जानं नारदो वाकयमब्रवीत् ॥ ५-१८५-२ (३८२५०)
एते वियति करव्य दिवि देवगणाः स्थिताः ।
ते त्वां निवारयन्त्यद्य प्रस्वापं मा प्रयोजय ॥ ५-१८५-३ (३८२५१)
रामस्तपस्वी ब्रह्मण्यो ब्राह्मणश्च गुरुश्च ते ।
तस्यवमानं कौरव्य मास्म कार्षीः कथञ्चन ॥ ५-१८५-४ (३८२५२)
ततोऽपश्यं दिविष्ठान्वै तानष्टौ ब्रह्मवादिनः ।
ते मां स्मयन्तो राजेन्द्र शनकैरिदमब्रुवन् ॥ ५-१८५-५ (३८२५३)
यथाऽऽह भरतश्रेष्ठ नारदस्तत्तथा कुरु ।
एतद्धि परमं श्रेयो लोकानां भरतर्षभ ॥ ५-१८५-६ (३८२५४)
ततश्च प्रतिसंहृत्य तदस्त्रं स्वापनं महत् ।
ब्रह्मास्त्रं दीपयाञ्चक्रे तस्मिन्युधि यथाविधि ॥ ५-१८५-७ (३८२५५)
ततो रामो हृषितो राजसिंह
दृष्ट्वा तदस्त्रं विनिवर्तितं वै ।
जितोऽस्मि भीष्मेण सुमन्दबुद्धि-
रित्येव वाक्यं सहसा व्यमुञ्चत् ॥ ५-१८५-८ (३८२५६)
ततोऽपश्यत्पितरं जामदग्न्यः
पितुस्तथा पितरं चास्य मान्यम् ।
ते तत्र चैनं परिवार्य तस्थु-
रूचुश्चैनं सान्त्वपूर्वं तदनीम् ॥ ५-१८५-९ (३८२५७)
पितर ऊचुः। ५-१८५-१०क्ष् (३९२०)
मा स्मैवं साहसं तात पुनः कार्षीः कथञ्चन ।
भीष्मेण संयुगं गन्तुं क्षत्रियेण विशेषतः ॥ ५-१८५-१० (३८२५८)
क्षत्रियस्य तु धर्मोऽयं यद्युद्धं भृगुनन्दन ।
स्वाध्यायो व्रतचर्याऽथ ब्राह्मणानां परं धनम् ॥ ५-१८५-११ (३८२५९)
इदं निमित्ते कस्मिंश्चिदस्माभिः प्रागुदाहृतम् ।
शस्त्रधारणमत्युग्रं तच्चाकार्यं कृतं त्वया ॥ ५-१८५-१२ (३८२६०)
वत्स पर्याप्तमेतावद्भीष्मेण सह संयुगे ।
विमर्दस्ते महाबाहो व्यपयाहि रणादितः ॥ ५-१८५-१३ (३८२६१)
पर्याप्तमेतद्भद्रं ते तव कार्मुकधारणम् ।
विसर्जयैतद्दुर्धर्ष तपस्तप्यस्व भार्गव ॥ ५-१८५-१४ (३८२६२)
एष भीष्मः शान्तनवो देवैः सर्वैर्निवारितः ।
निवर्तस्व रणादस्मादिति चैव प्रसादितः ॥ ५-१८५-१५ (३८२६३)

रामेण सह मायोत्सीर्गुरुणेति पुनः पुनः ।
न हि रामो रणे जेतुं त्वया न्याय्यः कुरूद्वह ॥ ५-१८५-१६ (३८२६४)
मानं कुरुष्व गाङ्गेय ब्राह्मणस्य रणाजिरे ।
वयं तु गुरवस्तुभ्यं तस्मात्त्वां वारयामहे ॥ ५-१८५-१७ (३८२६५)
भीष्मो वसूनामन्यतमो दिष्ट्या जीवसि पुत्रक ।
गाङ्गेयः शन्तनोः पुत्रो वसुरेष महायशाः ॥ ५-१८५-१८ (३८२६६)
कथं शक्यस्त्वया जेतुं निवर्तस्वेह भार्गव ।
अर्जुनः पाण्डवश्रेष्ठः पुरन्दरसुतो बली ॥ ५-१८५-१९ (३८२६७)
नरः प्रजापतिर्वीरः पूर्वदेवः सनातनः ।
सव्यसाचीति विख्यातस्त्रिषु लोकेषु वीर्यवान् ।
भीष्ममृत्युर्यथाकालं विहितो वै स्वयंभुवा ॥ ५-१८५-२० (३८२६८)
भीष्म उवाच। ५-१८५-२१क्ष् (३९२१)
एवमुक्तः स पितृभिः पितृन्नामोऽब्रवीदिदम् ।
नाहं युधि निवर्तेयमिति मे व्रतमाहितम् ।
न निवर्तितपूर्वश्च कदाचिद्रणमूर्धनि ॥ ५-१८५-२१ (३८२६९)
निवर्त्यतामापगेयः कामं युद्धात्पितामहाः ।
न त्वहं विनिवर्तिष्ये युद्धादस्मात्कथंचन ॥ ५-१८५-२२ (३८२७०)
ततस्ते मुनयो राजन्नृचीकप्रमुखास्तदा ।
नारदेनैव सहिताः समागम्येदमब्रुवन् ॥ ५-१८५-२३ (३८२७१)
निवर्तस्व रणात्तात मानयस्व द्विजोत्तमम् ।
इत्यवोचमहं तांश्च क्षत्रधर्मव्यपेक्षया ॥ ५-१८५-२४ (३८२७२)
मम व्रतमिदं लोके नाहं युद्धात्कदाचन ।
विमुखो विनिवर्तेयं पृष्ठतोऽभ्याहतः शरैः ॥ ५-१८५-२५ (३८२७३)
नाहं लोभान्न कार्पण्यान्न भयान्नार्थकारणात् ।
त्यजेयं शाश्वतं धर्ममिति मे निश्चिता मतिः ॥ ५-१८५-२६ (३८२७४)
ततस्ते मुनयः सर्वे नारदप्रमुखा नृप ।
भागीरथी च मे माता रणमध्यं प्रपेदिरे ॥ ५-१८५-२७ (३८२७५)
तथैवात्तशरो धन्वी तथैव दृढनिश्चयः ।
स्थितोऽहमाहवे योद्धुं ततस्ते राममब्रुवन् ॥ ५-१८५-२८ (३८२७६)
समेत्य सहिता भूयः समरे भृगुनन्दनम् ।
नावनीतं हि हृदयं विप्राणां शाम्य भार्गव ॥ ५-१८५-२९ (३८२७७)
राम राम निवर्तस्व युद्धादस्मादिद्विजोत्तम ।
अवध्यो वै त्वया भीष्मस्त्वं च भीष्मस्य भार्गव ॥ ५-१८५-३० (३८२७८)
एवं ब्रुवन्तस्ते सर्वे प्रतिरुद्ध्य रणाजिरम् ।
न्यासयाञ्चक्रिरे शस्त्रं पितरो भृगुनन्दनम् ॥ ५-१८५-३१ (३८२७९)
ततोऽहं पुनरेवाथ तानष्टौ ब्रह्मवादिनः ।

अद्राक्षं दीप्यमानान्वै ग्रहानष्टाविवोदितान् ॥ ५-१८५-३२ (३८२८०)
ते मां सप्रणयं वाक्यमब्रुवन्समरे स्थितम् ।
प्रैहि रामं महाबाहो गुरुं लोकहितं कुरु ॥ ५-१८५-३३ (३८२८१)
दृष्ट्वा निवर्तितं रामं सुहृद्वाक्येन तेन वै ।
लोकानां च हितं कुर्वन्नहमप्याददे वचः ॥ ५-१८५-३४ (३८२८२)
ततोऽहं राममासाद्य ववन्दे भृशविक्षतः ।
रामश्चाभ्युत्स्मयन्प्रेम्णा मामुवाच महातपाः ॥ ५-१८५-३५ (३८२८३)
त्वत्समो नास्ति लोकेऽस्मिन्क्षत्रियः पृथिवीचरः ।
गम्यतां भीष्म युद्धेऽस्मिंस्तोषितोऽहं भृशं त्वया ॥ ५-१८५-३६ (३८२८४)
मम चैव समक्षं तां कन्यामाहूय भार्गवः ।
उक्तवान्दीनया वाचा मध्ये तेषां महात्मनाम् ॥ ॥ ५-१८५-३७ (३८२८५)

इति श्रीमन्महाभारते उद्योगपर्वणि अम्बोपाख्यानपर्वणि
पञ्चाशीत्यधिकशततमोऽध्यायः ॥

उद्योगपर्व - अध्याय १८६
॥ श्रीः ॥
५.१८६. अध्यायः १८६

Mahabharata - Udyoga Parva - Chapter Topics
राममामन्त्र्य गतया अम्बया पुण्याश्रमादिषु दुष्करतपश्चरणम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१८६-० (३८२८६)
राम उवाच। ५-१८६-०क्ष् (३९२२)
प्रत्यक्षमेतल्लोकानां सर्वेषामेव भामिनि ।
यथाशक्त्या मया युद्धं कृतं वै पौरुषं परम् ॥ ५-१८६-१ (३८२८७)
न चैवमपि शक्नोमि भीष्मं शस्त्रभृतां वरम् ।
विशेषयितुमत्यर्थमुत्तमास्त्राणि दर्शयन् ॥ ५-१८६-२ (३८२८८)
एषा मे परमा शक्तिरेतन्मे परमं बलम् ।
यथेष्टं गम्यतां भद्रे किमन्यद्वा करोमि ते ॥ ५-१८६-३ (३८२८९)
भीष्ममेव प्रपद्यस्व न तेऽन्या विद्यते गतिः ।
निर्जितो ह्यस्मि भीष्मेण महास्त्राणि प्रमुञ्चता ॥ ५-१८६-४ (३८२९०)
एवमुक्त्वा ततो रामो विनिःश्वस्य महामनाः ।
तूष्मीमासीत्ततः कनक्या प्रोवाच भृगुनन्दनम् ॥ ५-१८६-५ (३८२९१)
भगवन्नेवमेवैतद्यथाऽऽह भगवांस्तथा ।

अजेयो युधि भीष्मोऽयमपि देवैरुदारधीः ॥ ५-१८६-६ (३८२९२)
यथाशक्ति यथोत्साहं मम कार्यं कृतं त्वया ।
अनिवार्यं रणे वीर्यमस्त्राणि विविधानि च ॥ ५-१८६-७ (३८२९३)
ने चैव शक्यते युद्धे विशेषयितुमन्ततः ।
न चाहमेनं यास्यामि पुनर्भीष्मं कथंचन ॥ ५-१८६-८ (३८२९४)
गमिष्यामि तु तत्राहं यत्र भीष्मं तपोधन ।
समरे पातयिष्यामि स्वयमेव भृगूद्वह ॥ ५-१८६-९ (३८२९५)
एवमुक्त्वा ययौ कन्या रोषव्याकुललोचना ।
तापस्ये धृतसंकल्पा सा मे चिन्तयती वधम् ॥ ५-१८६-१० (३८२९६)
ततो महेन्द्रं सहितैरमुनिभिर्भृगुसत्तमः ।
यथाऽऽगतं तथा सोऽगन्मामुपामन्त्र्य भारत ॥ ५-१८६-११ (३८२९७)
ततो रथं समारुह्य स्तूयमानो द्विजातिभिः ।
प्रविश्य नगरं मात्रे सत्यवत्यै न्यवेदयम् ॥ ५-१८६-१२ (३८२९८)
यथावृत्तं महाराज सा च मां प्रत्यनन्दत ।
पुरुषांश्चादिशं प्राज्ञान्कन्यावृत्तान्तकर्मणि ॥ ५-१८६-१३ (३८२९९)
दिवसे दिवसे ह्यस्या गतिजल्पितचेष्टितम् ।
प्रत्याहरंश्च मे युक्ताः स्थिताः प्रियहिते सदा ॥ ५-१८६-१४ (३८३००)
यदैव हि वनं प्रायात्सा कन्या तपसे धृता ।
तदैव व्यथितो दीनो गतचेता इवाभवम् ॥ ५-१८६-१५ (३८३०१)
न हि मां क्षत्रियः कश्चिद्वीर्येण व्यजयद्युधि ।
ऋते ब्रह्मविदस्तात तपसा संशितव्रतात् ॥ ५-१८६-१६ (३८३०२)
अपि चैतन्मया राजन्नारदेऽपि निवेदितम् ।
व्यासे चैव तथा कार्यं तौ चोभौ मामवोचताम् ॥ ५-१८६-१७ (३८३०३)
न विषादस्त्वया कार्यो भीष्म काशिसुतां प्रति ।
दैवं पुरुषकारेण को निवर्तितुमुत्सहेत् ॥ ५-१८६-१८ (३८३०४)
सा कन्या तु महाराज प्रविश्याश्रममण्डलम् ।
यमुनातीरमाश्रित्य तपस्तेपेऽतिमानुषम् ॥ ५-१८६-१९ (३८३०५)
निराहारा कृशा रूक्षा जटिला मलपङ्किनी ।
षण्मासान्वायुभक्षा च स्थाणुभूता तपोधना ॥ ५-१८६-२० (३८३०६)
यमुनाजलमाश्रित्य संवत्सरमथाऽपरम् ।
उदवासं निराहारा पारयामास भामिनी ॥ ५-१८६-२१ (३८३०७)
शीर्णपर्णेन चैकेन पारयामास सा परम् ।
संवत्सरं तीव्रकोपा पादाङ्गुष्ठाग्रधिष्ठिता ॥ ५-१८६-२२ (३८३०८)
एवं द्वादश वर्षाणि तापयामास रोदसी ।
निवर्त्यमानापि च सा ज्ञातिभिर्नैव शक्यते ॥ ५-१८६-२३ (३८३०९)
ततोऽगमद्वत्सभूमिं सिद्धचारणसेविताम् ।

आश्रमं पुण्यशीलानां तापसानां महात्मनाम् ॥ ५-१८६-२४ (३८३१०)
तत्र पुण्येषु तीर्थेषु साऽऽप्लुताङ्गी दिवानिशम् ।
व्यचरत्काशिकन्या सा यथाकामविचारिणी ॥ ५-१८६-२५ (३८३११)
नन्दाश्रमे महाराज तथोलूकाश्रमे शुभे ।
च्यवनस्याश्रमे चैव ब्रह्मणः स्थान एव च ॥ ५-१८६-२६ (३८३१२)
त्रयागे देवयजने देवारण्येषु चैव ह ।
भोगवत्यां महाराज कौशिकस्याश्रमे तथा ॥ ५-१८६-२७ (३८३१३)
माण्डव्यस्याश्रमे राजन्दिलीपस्याश्रमे तथा ।
रामह्रदे च कौरव्य पैलगर्गस्य चाश्रमे ॥ ५-१८६-२८ (३८३१४)
एतेषु तीर्थेषु तदा काशिकन्या विशांपते ।
आप्लावयत गात्राणि व्रतमास्थाय दुष्करम् ॥ ५-१८६-२९ (३८३१५)
तामब्रवीच्च कौरव्य मम माता जले स्थिता ।
किमर्थं क्लिश्यसे भद्रे तथ्यमेव वदस्व मे ॥ ५-१८६-३० (३८३१६)
सैनामथाब्रवीद्राजन्कृताञ्जलिरनिन्दिता
भीष्मेण समरे रामो निर्जितश्चारुलोचनि ॥ ५-१८६-३१ (३८३१७)
कोऽन्यस्तमुत्सहेञ्जेतुमुद्यतेषुं महीपतिः ।
साहं भीष्मविनाशाय तपस्तप्स्ये सुदारुणम् ॥ ५-१८६-३२ (३८३१८)
विचरामि महीं देवि यथा हन्यामहं नृपम् ।
एतद्व्रतफलं देवि परमस्मिन्यथा हि मे ॥ ५-१८६-३३ (३८३१९)
ततोऽब्रवीत्सागरगा जिह्मं चरसि भामिनि ।
नैष कामोऽनवद्याङ्गि शक्यः प्राप्तुं त्वयाऽबले ॥ ५-१८६-३४ (३८३२०)
यदि भीष्मविनाशाय काश्ये चरसि वै व्रतम् ।
व्रतस्था च शरीरं त्वं यदि नाम विमोक्ष्यसि ॥ ५-१८६-३५ (३८३२१)
नदी भविष्यसि शुभे कुटिला वार्षिकोदका ।
दुस्तीर्था न तु विज्ञेया वार्षिकी नाष्टमासिकी ॥ ५-१८६-३६ (३८३२२)
भीमग्राहवती घोरा सर्वभूतभयंकरी ।
एवमुक्त्वा ततो राजन्काशिकन्यां न्यवर्तत ॥ ५-१८६-३७ (३८३२३)
माता मम महाभागा स्मयमानेव भामिनी ।
कदाचिदष्टमे मासि कदाचिद्दशमे तथा ।
न प्राश्नीतोदकमपि पुनः सा वरवर्णिनी ॥ ५-१८६-३८ (३८३२४)
सा वत्सभूमिं कौरव्य तीर्थलोभात्ततस्ततः ।
पतिता परिधावन्ती पुनः काशिपतेः सुता ॥ ५-१८६-३९ (३८३२५)
सा नदी वत्सभूम्यां तु प्रथिताम्बेति भारत ।
वार्षिकी ग्राहबहुला दुस्तीर्था कुटिला तथा ॥ ५-१८६-४० (३८३२६)
सा कन्या तपसा तेन देहार्धेन व्यजायत ।
नदी च राजन्वत्सेषु कन्या चैवाभवत्तदा ॥ ॥ ५-१८६-४१ (३८३२७)

इति श्रीमन्महाभारते उद्योगपर्वणि अम्बोपाख्यानपर्वणि
षडशीत्यधिकशततमोऽध्याय- ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-१८६-३६ वार्षिकी वर्षास्वेव वहतीति वार्षिकी ॥

उद्योगपर्व - अध्याय १८७
॥ श्रीः ॥
५.१८७. अध्यायः १८७

Mahabharata - Udyoga Parva - Chapter Topics
अम्बया तपस्तोषितान्महादेवात् जन्मान्तरे पुंस्त्वप्राप्त्या
भीष्महननरूपवमुपलभ्याग्नौ प्रवेशः ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१८७-० (३८३२८)
भीष्म उवाच। ५-१८७-०क्ष् (३९२३)
ततस्ते तापसाः सर्वे तपसे धृतनिश्चयाम् ।
दृष्ट्वा न्यवर्तयंस्तात किं कार्यमिति चाब्रुवन् ॥ ५-१८७-१ (३८३२९)
तानुवाच ततः कन्या तपोवृद्धानृषींस्तदा ।
निराकृतास्मि भीष्मेण भ्रंशिता पतिधर्मतः ॥ ५-१८७-२ (३८३३०)
वधार्थं तस्य दीक्षा मे न लोकार्थं तपोधनाः ।
निहत्य भीष्मं गच्छेयं शान्तिमित्येव निश्चयः ॥ ५-१८७-३ (३८३३१)
यत्कृते दुःखवसतिमिमां प्राप्तऽस्मि शाश्वतीम् ।
पतिलोकाद्विहीना च नैव स्त्री न पुमानिह ॥ ५-१८७-४ (३८३३२)
नाहत्वा युधि गाङ्गेयं निवर्तिष्ये तपोधनाः ।
एष मे हृदि संकल्पो यदिदं कथितं मया ॥ ५-१८७-५ (३८३३३)
स्त्रीभावे परिनिर्विण्णा पुंस्त्वार्थे कृतनिश्चया ।
भीष्मे प्रतिचिकीर्षामि नास्मि वार्येति वै पुनः ॥ ५-१८७-६ (३८३३४)
तां देवो दर्शयामास शूलपाणिरुमापतिः ।
मध्ये तेषां महार्षीणां स्वेन रूपेण तापसीम् ॥ ५-१८७-७ (३८३३५)
छन्द्यमाना वरेणाथ सा वव्रे मत्पराजयम् ।
हनिष्यसीति तां देवः प्रत्युवाच मनस्विनीम् ॥ ५-१८७-८ (३८३३६)
ततः सा पुनरेवाथ कन्या रुद्रमुवाच ह ।

उपपद्येत्कथं देव स्त्रिया युधि जयो मम ॥ ५-१८७-९ (३८३३७)
स्त्रीभावेन च मे गाढं मनः शान्तमुमापते ।
प्रतिश्रुतश्च भूतेश त्वया भीष्मपराजयः ॥ ५-१८७-१० (३८३३८)
यथा स सत्यो भवति तथा कुरु वृषध्वज ।
यथा हन्यां समागम्य भीष्मं शान्तनवं युधि ॥ ५-१८७-११ (३८३३९)
तामुवाच महादेवः कन्यां किल वृषध्वजः ।
न मे वागमृतं प्राह सत्यं भद्रे भविष्यसि ॥ ५-१८७-१२ (३८३४०)
हनिष्यसि रणे भीष्मं पुरुषत्वं च लप्स्यति ॥
स्मरिष्यसि च तत्सर्वं देहमन्यं गता सती ॥ ५-१८७-१३ (३८३४१)
द्रुपदस्य कुले जाता भविष्यसि महारथः ।
शीघ्रास्त्रश्चित्रयोधी च भविष्यसि सुसंमतः ॥ ५-१८७-१४ (३८३४२)
यथोक्तमेव कल्याणि सर्वमेतद्भविष्यति ।
भविष्यसि पुमान्पश्चात्कस्माच्चित्कालपर्ययात् ॥ ५-१८७-१५ (३८३४३)
एवमुक्त्वा महादेवः कपर्दी वृषभध्वजः ।
पश्यतामेव विप्राणां तत्रैवान्तरधीयत ॥ ५-१८७-१६ (३८३४४)
ततः सा पश्यतां तेषां महर्षीणामनिन्दिता ।
समाहृत्य वनात्तस्मात्काष्ठानि वरवर्णिनी ॥ ५-१८७-१७ (३८३४५)
चितां कृत्वा सुमहतीं प्रदाय च हुताशनम् ।
प्रदीप्तेऽग्नौ महाराज रोषदीप्तेन चेतसा ॥ ५-१८७-१८ (३८३४६)
उक्त्वा भीष्मवधायेति प्रविवेश हुताशनम् ।
ज्येष्ठा काशिसुता राजन्यमुनामभितो नदीम् ॥ ॥ ५-१८७-१९ (३८३४७)

इति श्रीमन्महाभारते उद्योगपर्वणि अम्बोपाख्यानपर्वणि
सप्ताशीत्यधिकशततमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-१८७-१० शान्तं शौर्यधर्मरहितम् ॥
५-१८७-१९ यमुनामभितः यमुनाद्वीपे इत्यर्थः ॥

उद्योगपर्व - अध्याय १८८
॥ श्रीः ॥
५.१८८. अध्यायः १८८

Mahabharata - Udyoga Parva - Chapter Topics
पुत्रार्थं तपस्यते द्रुपदाय महादेवेन स्त्री भूत्वा पुमान्भविष्यतीति
वरदानम् ॥ १ ॥
द्रुपदभार्यया स्त्र्यपत्यजननेऽपि तस्य पुंस्त्वख्यापनम् ॥ २ ॥

द्रुपदेन तस्य स्त्रीत्वं प्रच्छाद्य पुंवज्जातकर्मादिकरणपूर्वकं
शिखण्डीति नामकरणम् ॥ ३ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१८८-० (३८३४८)
दुर्योधन उवाच। ५-१८८-०क्ष् (३९२४)
कथं शिखण्डी गाङ्गेय कन्यां भूत्वा पुरा तदा ।
पुरुषोऽभूद्युधिश्रेष्ठ तन्मे ब्रूहि पितामह ॥ ५-१८८-१ (३८३४९)
भीष्म उवाच। ५-१८८-२क्ष् (३९२५)
भार्या तु तस्य राजेन्द्र द्रुपदस्य महीपतेः ।
महिषी दयिता ह्यासीदपुत्रा च विशांपते ॥ ५-१८८-२ (३८३५०)
एतस्मिन्नेव काले तु द्रुपदो वै महीपतिः ।
अपत्यार्थे महाराज तोषयामास शङ्करम् ॥ ५-१८८-३ (३८३५१)
अस्माद्वधार्थं निश्चित्य तपो घोरं समास्थितः ।
ऋते कन्यां महादेव पुत्रो मेस्यादिति ब्रुवन् ॥ ५-१८८-४ (३८३५२)
भगवन्पुत्रमिच्छामि भीष्मं प्रतिचिकीर्षया ।
इत्युक्तो देवदेवेन स्त्रीपुमांस्ते भविष्यति ॥ ५-१८८-५ (३८३५३)
निवर्तस्व महीपाल नैतज्जात्वन्यथा भवेत् ।
स तु गत्वा च नगरं भार्यामिदमुवाच ह ॥ ५-१८८-६ (३८३५४)
कृतो यत्नो महादेवस्तपसाऽऽराधितो मया ।
कन्या भूत्वा पुमान्भावी इति चोक्तोस्मि शंभुना ॥ ५-१८८-७ (३८३५५)
पुनः पुनर्याच्यमानो दिष्टमित्यब्रवीच्छिवः ।
नतदन्यच्च भविता भवितव्यं हि तत्तथा ॥ ५-१८८-८ (३८३५६)
ततः सा नियता भूत्वा ऋतुकाले मनस्विनी ।
पत्नी द्रुपदराजस्य द्रुपदं प्रविवेश ह ॥ ५-१८८-९ (३८३५७)
लेभे गर्भं यथाकालं विधिदृष्टेन कर्मणा ।
पार्षतस्य महीपाल यथा मां नारदोऽब्रवीत् ॥ ५-१८८-१० (३८३५८)
ततो दधार सा देवी गर्भं राजीवलोचना ।
तां स राजा प्रियां भार्यां द्रुपदः कुरुनन्दन ॥ ५-१८८-११ (३८३५९)
पुत्रस्नेहान्महाबाहुः मुखं पर्यचरत्तदा ।
सर्वानभिप्रायकृतान्भार्याऽलभत कौरव ॥ ५-१८८-१२ (३८३६०)
अपुत्रस्य सतो राज्ञो द्रुपदस्य महीपतेः ।
यथाकालं तु सा देवी महिषी द्रुपदस्य ह ॥ ५-१८८-१३ (३८३६१)
कन्यां प्रवररूपां तु प्राजायत नराधिप ।
अपुत्रस्य तु राज्ञः सा द्रुपदस्य मनस्विनी ॥ ५-१८८-१४ (३८३६२)

ख्यापयामास राजेन्द्र पुत्रो ह्येष ममेति वै ।
ततः स राजा द्रुपद प्रच्छन्नाया नराधिप ॥ ५-१८८-१५ (३८३६३)
पुत्रवत्पुत्रकार्याणि सर्वाणि समकारयत् ।
रक्षणं चैव मन्त्रस्य महिषी द्रुपदस्य सा ॥ ५-१८८-१६ (३८३६४)
चकार सर्वयत्नेन ब्रुवणा पुत्र इत्युत ।
न च तां वेदक नगरे कश्चिदन्यत्र पार्षतात् ॥ ५-१८८-१७ (३८३६५)
श्रद्दधानो हि तद्वाक्यं देवस्याच्युततेजसः ।
छादयामास तां कन्यां पुमानिति च सोब्रवीत् ॥ ५-१८८-१८ (३८३६६)
जातकर्माणि सर्वाणि कारयामास पार्थिवः ।
पुंवद्विधानयुक्तानि शिखण्डीति च तां विदुः ॥ ५-१८८-१९ (३८३६७)
अहमेकस्तु चारेण वचनान्नारदस्य च ।
ज्ञातवान्देववाक्येन अम्बायास्तपसा तथा ॥ ॥ ५-१८८-२० (३८३६८)

इति श्रीमन्महाभारते उद्योगपर्वणि अम्बोपाख्यानपर्वणि
अष्टाशीत्यधिकशततमोऽध्यायः ॥

उद्योगपर्व - अध्याय १८९
॥ श्रीः ॥
५.१८९. अध्यायः १८९

Mahabharata - Udyoga Parva - Chapter Topics
पुंवेषगूहितया शिखण्डिन्या द्रोणाद्धनुर्विद्याभ्यसनम् ॥ १ ॥
द्रुपदेन शिखण्डिन्याः दशार्णाधिपतिकन्यया विवाहकरणम् ॥ २ ॥
दाशार्णकसुतया धात्रीद्वारा स्वपित्रे शिखण्डिन्याः स्त्रीत्वज्ञापनम् ॥ ३ ॥
दाशार्णकेन दूतमुखेन द्रुपदंप्रति स्वविप्रलम्भफलतया
सबन्धोस्तस्य समुच्छेदनिवेदनम् ॥ ४ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१८९-० (३८३६९)
भीष्म उवाच। ५-१८९-०क्ष (३९२६)
चकार यत्नं द्रुपदः सुतायाः सर्वकर्मसु ।
ततो लेख्यादिषु तथा शिल्पेषु च परंतप ॥ ५-१८९-१ (३८३७०)
इष्वस्त्रे चैव राजेन्द्र द्रोणशिष्यो बभूव ह ।
तस्य माता महाराज राजानं वरवर्णिनी ॥ ५-१८९-२ (३८३७१)
चोदयामास भार्यार्थं कन्यायाः पुत्रवत्तदा ।
ततस्तां पार्षतो दृष्ट्वा कन्यां संप्राप्तयौवनाम् ।

स्त्रियं मत्वा ततश्चिन्तां प्रपेदे सह भार्यया ॥ ५-१८९-३ (३८३७२)
द्रुपद उवाच। ५-१८९-४क्ष् (३९२७)
कन्या ममेयं संप्राप्ता यौवनं शोकवर्धिनी ।
मया प्रच्छादिता चेयं वचनाच्छूलपाणिनः ॥ ५-१८९-४ (३८३७३)
भार्योवाच। ५-१८९-५क्ष् (३९२८)
न तन्मिथ्या महाराज भविष्यति कथंचन ।
त्रैलोक्यकर्ता कस्माद्धि वृथा वक्तुमिहार्हति ॥ ५-१८९-५ (३८३७४)
यदि ते रोचते राजन्वक्ष्यामि श्रृणु मे वचः ।
श्रुत्वेदानीं प्रपद्येथाः स्वां मतिं पृषतात्मज ॥ ५-१८९-६ (३८३७५)
क्रियतामस्य यत्नेन विधिवद्दारसंग्रहः ।
भविता तद्वचः सत्यमिति मे निश्चिता मतिः ॥ ५-१८९-७ (३८३७६)
ततस्तौ निश्चयं कृत्वा तस्मिन्कार्येऽथ दंपती ।
वरयाञ्चक्रतुः कन्यां दशार्णाधिपतेः सुताम् ॥ ५-१८९-८ (३८३७७)
ततो राजा द्रुपदो राजसिंहः
सर्वान्राज्ञः कुलतः सन्निशाम्य ।
दाशार्णकस्य नृपतेस्तनूजां
शिखण्डिने वरयामास दारान् ॥ ५-१८९-९ (३८३७८)
हिरण्यवर्मेति नृपो योऽसौ दाशार्णकः स्मृतः ।
स च प्रादान्महीपालः कन्यां तस्मै शिखण्डिने ॥ ५-१८९-१० (३८३७९)
स च राजा दशार्णेषु महानासीत्सुदुर्जयः ।
हिरण्यवर्मा दुर्धर्षो महासेनो महामनाः ॥ ५-१८९-११ (३८३८०)
कृते विवाहे तु तदा सा कन्या राजसत्तम ।
यौवनं समनुप्राप्ता सा च कन्या शिखण्डिनी ॥ ५-१८९-१२ (३८३८१)
कृतदारः शिखण्डी च काम्पिल्यं पुनरागमत् ।
न च सा वेद तां कन्यां कंचित्कालं स्त्रियं किल ।
यदा त्वेनामजानात्सा स्त्रियमेव नृपात्मजा ॥ ५-१८९-१३ (३८३८२)
धात्रीणां च सखीनां च व्रीडयाना न्यवेदयत् ।
कन्यां पाञ्चालराजस्य सुतां तां वै शिखण्डिनीम् ॥ ५-१८९-१४ (३८३८३)
ततस्ता राजशार्दूल धात्र्यो दाशार्णिकास्तदा ।
जग्मुरार्ति परां प्रेष्याः प्रेषयामासुरेव च ॥ ५-१८९-१५ (३८३८४)
ततो दशार्णाधिपतेः प्रेष्याः सर्वा न्यवेदयन् ।
विप्रलम्भं यथावृत्तं स च चुक्रोध पार्थिवः ॥ ५-१८९-१६ (३८३८५)
शिखण्ड्यपि महाराज पुंवद्राजकुले तदा ।
विजहार मुदा युक्तः स्त्रीत्वं नैवातिरोचयन् ॥ ५-१८९-१७ (३८३८६)
ततः कतिपयाहस्य तच्छ्रुत्वा भरतर्षभ ।
हिरण्यवर्मा राजेन्द्र रोषादर्तिं जगाम ह ॥ ५-१८९-१८ (३८३८७)

ततो दाशार्णको राजा तीव्रकोपसमन्वितः ।
दूतं प्रस्थापयामास द्रुपदस्य निवेशनम् ॥ ५-१८९-१९ (३८३८८)
ततो द्रुपदमासाद्य दूतः काञ्चनवर्मणः ।
एक एकान्तसुत्सार्य रहो वचनमब्रवीत् ॥ ५-१८९-२० (३८३८९)
दाशार्णराजो राजंस्त्वामिदं वचनमब्रवीत् ।
अभिष्णात्प्रकुपितो विप्रलब्धस्त्वयाऽनघ ॥ ५-१८९-२१ (३८३९०)
अवमन्यसे मां नृपते नूनं दुर्मन्त्रितं तव ।
यन्मे कन्यां स्वकन्यार्थे मोहाद्याचितवानसि ॥ ५-१८९-२२ (३८३९१)
तस्याद्य विप्रलम्भस्य फलं प्राप्नुहि दुर्मते ।
एष त्वं सजनामात्यमुद्धरामि स्थिरो भव ॥ ५-१८९-२३ (३८३९२)
अवमत्य च वीर्यं मे कुलं चारित्रमेव च ।
विप्रलम्भस्त्वयापूर्वो मनुष्येषु प्रवर्तितः ॥ ५-१८९-२४ (३८३९३)
कुरु सर्वाणि कार्याणि भुङ्क्ष्व कभोगाननुत्तमान् ।
अभियास्यामि शीघ्रं त्वां समुद्धर्तुं सबान्धवम् ॥ ॥ ५-१८९-२५ (३८३९४)

इति श्रीमन्महाभारते उद्योगपर्वणि अम्बोपाख्यानपर्वणि
एकोननवत्यधिकशततमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-१८९-४ शूलयुक्तः पाणिः शूलपाणिः सोऽस्यास्तीति शूलपाणी तस्य ॥
५-१८९-२० उत्सार्य नीत्वा ॥
५-१८९-२१ अभिषङ्गात्पराभवात् ॥

उद्योगपर्व - अध्याय १९०
॥ श्रीः ॥
५.१९०. अध्यायः १९०

Mahabharata - Udyoga Parva - Chapter Topics
दाशार्णकेन पुनर्दूतप्रेषणे द्रुपदेन पत्न्यासह कर्तव्यालोचनम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१९०-० (३८३९५)
भीष्म उवाच। ५-१९०-०क्ष् (३९२९)
एवमुक्तस्य दूतेन द्रुपदस्य तदा नृप ।
चोरस्येव गृहीतस्य न प्रावर्तत भारती ॥ ५-१९०-१ (३८३९६)

स यत्नमकरोत्तीव्रं संबन्धिन्युनुमानने ।
दूतैर्मधुरसंभाषैर्न तदस्तीति संदिशन् ॥ ५-१९०-२ (३८३९७)
स राजा भूय एवाथ ज्ञात्वा तत्त्वमथागमत् ।
कन्येति पाञ्चालसुतां त्वरमाणो विनिर्ययौ ॥ ५-१९०-३ (३८३९८)
ततः संप्रेषकयामास मित्रांणाममितौजसाम् ।
दुहितुर्विप्रलम्भं तं धात्रीणां वचनात्तदा ॥ ५-१९०-४ (३८३९९)
ततः समुदयं कृत्वा बलानां राजसत्तमः ।
अभियाने मतिं चक्रे द्रुपदं प्रति भारत ॥ ५-१९०-५ (३८४००)
ततः संमन्त्रयामास मन्त्रिभिः स महीपतिः ।
हिरण्यवर्मा राजेन्द्र पाञ्चाल्यं पार्थिवं प्रति ॥ ५-१९०-६ (३८४०१)
तत्र वै निश्चितं तेषामभूद्राज्ञां महात्मनाम् ।
तथ्यं भवति चेदेतत्कन्या राजञ्शिखण्डिनी ॥ ५-१९०-७ (३८४०२)
बद्ध्वा पाञ्चालराजानमानयिष्यामहे गृहम् ।
अन्यं राजानमाधाय पाञ्चालेषु नरेश्वरम् ॥ ५-१९०-८ (३८४०३)
घातयिष्याम नृपतिं पाञ्चालं सशिखण्डिनम् ॥ ५-१९०-९ (३८४०४)
स तदा द्रुतमाज्ञाय पुनर्दूतान्नराधिपः ।
प्रास्थापयत्पार्षतया निहन्मीति स्थिरो भव ॥ ५-१९०-१० (३८४०५)
भीष्म उवाच। ५-१९०-११क्ष् (३९३०)
स हि प्रकृत्या वै भीतः किल्बिषी च नराधिपः ।
भयं तीव्रमनुप्राप्तो द्रुपदः पृथिवीपतिः ॥ ५-१९०-११ (३८४०६)
विसृज्य दूतान्दाशार्णे द्रुपदः शोकमूर्च्छितः ।
समेत्य भार्यां रहिते वाक्यमाह नराधिपः ॥ ५-१९०-१२ (३८४०७)
भयेन महताऽऽविष्टो हृदि शोकेन चाहतः ।
पाञ्चालराजो दयितां मातरं वै शिखण्डिनः ॥ ५-१९०-१३ (३८४०८)
अभियास्यति मां कोपात्संबन्धी सुमहाबलः ।
हिरण्यवर्मा नृपतिः कर्षमाणो वरूथिनीम् ॥ ५-१९०-१४ (३८४०९)
किमिदानीं करिष्यावो मूढौ कन्यामिमां प्रति ।
शिखण्डी किल पुत्रस्ते कन्येति परिशङ्कितः ॥ ५-१९०-१५ (३८४१०)
इति संचिन्त्य यत्नेन समित्रः सबलानुगः ।
वञ्चितोऽस्मीति मन्वानो मां किलोद्धर्तुमिच्छति ॥ ५-१९०-१६ (३८४११)
किमत्र तथ्यं सुश्रोणि मिथ्या किं ब्रूहि शोभने ।
श्रुत्वा त्वत्तः शुभं वाक्यं संविधास्याम्यहं तथा ॥ ५-१९०-१७ (३८४१२)
अहं हि संशयप्राप्तो बाला चेयं शिखण्डिनी ।
त्वं च राज्ञि महत्कृच्छ्रं संप्राप्ता वरवर्णिनि ॥ ५-१९०-१८ (३८४१३)
सा त्वं सर्वविमोक्षाय तत्त्वमाख्याहि पृच्छतः ।
तथा विदध्यां सुश्रोणि कृत्यमाशु शुचिस्मिते ॥ ५-१९०-१९ (३८४१४)

शिखण्डिनि च मा भैस्त्वं विधास्ये तत्र तत्त्वतः ।
कृपयाहं वरारोहे वञ्चितः पुत्रधर्मतः ॥ ५-१९०-२० (३८४१५)
मया दाशार्णको राजा वञ्चितः स महीपतिः ।
तदाचक्ष्व महाभागे विधास्ये तत्र यद्धितम् ॥ ५-१९०-२१ (३८४१६)
जनाता ह नरेन्द्रेण ख्यापनार्थं परस्य वै ।
प्रकाशं चोदिता देवी प्रत्युवाच महीपतिम् ॥ ॥ ५-१९०-२२ (३८४१७)

इति श्रीमन्महाभारते उद्योगपर्वणि अम्बोपाख्यानपर्वणि
नवत्यधिकशततमोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-१९०-३ अगमत् ज्ञातवान् ॥
५-१९०-५ समुदयं समुदायम् ॥

उद्योगपर्व - अध्याय १९१
॥ श्रीः ॥
५.१९१. अध्यायः १९१

Mahabharata - Udyoga Parva - Chapter Topics
शिखण्डिन्या पित्रोः शोकस्य स्वमूलकत्वचिन्तनेन दुर्गमारण्यमेत्य
स्थूणनाम्नः कुबेरानुचरस्य गृहसमीपे प्रायोपवेशः ॥ १ ॥
स्थूणचोदितया शिखण्डिन्या तंप्रति पुंस्त्ववरणम् ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१९१-० (३८४१८)
भीष्म उवाच। ५-१९१-०क्ष् (३९३१)
ततः शिखण्डिनो माता यथातत्त्वं नराधिप ।
आचचक्षे महाबाहो भर्त्रे कन्यां शिखण्डिनीम् ॥ ५-१९१-१ (३८४१९)
अपुत्रया मया राजन्सपत्नीनां भयादिदम् ।
कन्या शिखण्डिनी जाता पुरुषो वै निवेदिता ॥ ५-१९१-२ (३८४२०)
त्वया चैव नरश्रेष्ठ तन्मे प्रीत्याऽनुमोदितम् ।
पुत्रकर्म कृतं चैव कन्यायाः पार्थिवर्षभ ॥ ५-१९१-३ (३८४२१)
भार्या चोढा त्वया राजन्दशार्णाधिपतेः सुता ।
मया च प्रत्यभिहितं देववाक्यार्थदर्शनात् ।
कन्या भूत्वा पुमान्भावीत्येवं चैतदुपेक्षितम् ॥ ५-१९१-४ (३८४२२)
एतच्छ्रुत्वा द्रुपदो यज्ञसेनः

सर्वं तत्त्वं मन्त्रविद्भ्यो निवेद्य ।
मन्त्रं राजा मन्त्रयामास राजन्
यथायुक्तं रक्षणे वै प्रजानाम् ॥ ५-१९१-५ (३८४२३)
संबन्धकं चैव समर्थ्य तस्मिन्
दाशार्णके वै नृपतौ नरेन्द्र ।
स्वयं कृत्वा विप्रलम्भं यथाव-
न्मन्त्र्यैकाग्रो निश्चयं वै जगाम ॥ ५-१९१-६ (३८४२४)
स्वभावगुप्तं नगरमापत्काले तु भारत ।
गोपयामास राजेन्द्र सर्वतः समलङ्कृतम् ॥ ५-१९१-७ (३८४२५)
आर्तिं च परमां राजा जगाम सह भार्यया ।
दशार्णपतिना सार्धं विरोधे भरतर्षभ ॥ ५-१९१-८ (३८४२६)
कथं संबन्धिना सार्धं न मे स्याद्विग्रहो महान् ।
इति संचिन्त्य मनसा देवतामर्चयत्तदा ॥ ५-१९१-९ (३८४२७)
तं तु दृष्ट्वा तदा राजन्देवी देवपरं तदा ।
अर्चां प्रयुञ्जानमथो भार्या वचनमब्रवीत् ॥ ५-१९१-१० (३८४२८)
देवानां प्रतिपत्तिश्च सत्यं साधुमता सताम् ।
किमु दुःस्वार्णवं प्राप्य तस्मादर्चयतां गुरून् ॥ ५-१९१-११ (३८४२९)
दैवतानि च सर्वाणि पूज्यनां भूरिदक्षिणम् ।
अग्नयश्चापि हूयन्तां दाशार्णप्रतिषेधने ॥ ५-१९१-१२ (३८४३०)
अयुद्धेन निवृत्तिं च मनसा चिन्तय प्रभो ।
देवतानां प्रसादेन सर्वमेतद्भविष्यति ॥ ५-१९१-१३ (३८४३१)
मन्त्रिभिर्मन्त्रितं सार्धं त्वया पृथुललोचन ।
पुरस्यास्याविनाशाय यच्च राजंस्तथा कुरु ॥ ५-१९१-१४ (३८४३२)
दैवं हि मानुषोपेतं भृशं सिद्ध्यति पार्थिव ।
परम्परविरोधाद्धि सिद्धिरस्ति न चैतयोः ॥ ५-१९१-१५ (३८४३३)
तस्माद्विधाय नगरे विधानं सचिवैः सह ।
अर्चयस्व यथाकामं दैवतानि विशांपते ॥ ५-१९१-१६ (३८४३४)
एवं संभाषमाणौ तु दृष्ट्वा शोकपरायणौ ।
शिखण्डिनी तदा कन्या व्रीडितेव तपस्विनी ॥ ५-१९१-१७ (३८४३५)
ततः सा चिन्तयामास मन्कृते दुःखितावुभौ ।
इमाविति ततश्चक्रे मतिं प्राणविनाशने ॥ ५-१९१-१८ (३८४३६)
एवं सा निश्चयं कृत्वा भृशं शोकपरायणा ।
निर्जगाम गृहं त्यक्त्वा गहनं निर्जनं वनम् ॥ ५-१९१-१९ (३८४३७)
यक्षेणर्द्धिमता राजन्स्थूणाकर्णेन पालितम् ।
तद्भयादेव च जनो विसर्जयति तद्वनम् ॥ ५-१९१-२० (३८४३८)
तत्र च स्थूणभवनं सुधामृत्तिकलेपनम् ।

लाजोल्लापिकधूमाढ्यमुच्चप्राकारतोरणम् ॥ ५-१९१-२१ (३८४३९)
तन्प्रविश्य शिखण्डी सा द्रुपदस्यात्मजा नृप ।
अनश्नाना बहुतिथं शरीरमुदशोपयत् ॥ ५-१९१-२२ (३८४४०)
दर्शयामास तां यक्षः स्थूणो मार्दवसंयुतः ।
किमर्थोऽयं तवारम्भः करिष्ये ब्रूहि माचिरम् ॥ ५-१९१-२३ (३८४४१)
अशक्ययिति सा यक्षं पुनः पुनरुवाच ह ।
करिष्यामीति वै क्षिप्रं प्रत्युवाचाथ गुह्यकः ॥ ५-१९१-२४ (३८४४२)
धनेश्वरस्यानुचरो वरदोऽस्मि नृपात्मजे ।
अदेयमपि दास्यादि ब्रूहि यत्ते विवक्षितम् ॥ ५-१९१-२५ (३८४४३)
ततः शिखण्डी तत्सर्वमखिलेन न्यवेदयत् ।
तस्मै यक्षप्रधानाय स्थूणाकर्णाय भारत ॥ ५-१९१-२६ (३८४४४)
शिखण्ड्युवाच। ५-१९१-२७क्ष् (३९३२)
आपन्नो मे पिता यक्ष न चिरान्नाशमेष्यति ।
अभियास्यति सक्रोधो दशार्णाधिपतिर्हि तम् ॥ ५-१९१-२७ (३८४४५)
मन्निमित्तं महोत्साहः सहेमकवचो नृपः ।
तस्माद्रक्षस्व मां यक्ष मातरं पितरं च मे ॥ ५-१९१-२८ (३८४४६)
प्रतिज्ञातो हि भवता दुःखप्रतिशमो मम ।
भवेयं पुरुषो यक्ष त्वत्प्रसादादनिन्दितः ॥ ५-१९१-२९ (३८४४७)
यावदेव स राजा वै नोपयाति पुरं मम ।
तावदेव महायक्ष प्रसादं कुरु गुह्यक ॥ ॥ ५-१९१-३० (३८४४८)

इति श्रीमन्महाभारते उद्योगपर्वणि अम्बोपाख्यनपर्वणि
एकनवत्यधिकशततमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-१९१-११ साधुमता कल्याणवतापि देवानां सतां साधूनां च प्रतिपत्तिः
पूजा नित्यं कर्तव्येति शेषः । किमु दुःखार्णवं प्राप्य कर्तव्येति
। तस्मात् भवान् गुरून् देवाराधनार्थं ब्राह्मणान् अर्चयतां पूजयतु ॥
५-१९१-२१ लाजोल्लापिकः लाजानि उशीराणि उल्लापयति सूचयतीति
लाजोल्लापिकः । उशीरपरिमलयुक्तधूमाढ्यमित्यर्थः । उशीरे
लाजमुद्दिष्टमिति विश्वः। राजोपलेपधूमाढ्यं इतिओ कोड पाठः ॥

उद्योगपर्व - अध्याय १९२
॥ श्रीः ॥
५.१९२. अध्यायः १९२

Mahabharata - Udyoga Parva - Chapter Topics

स्थूणेन शिखण्डिन्यै पुनःपुंस्त्वप्रत्यर्पणप्रतिज्ञापनपूर्वकं
तदीयस्त्रीत्वस्वीकारेण स्वीयपुंस्त्वसमर्पणम् ॥ १ ॥
दाशार्णकेन उपायात् शिखण्डिनः पुंस्त्वं निर्धार्य स्वपुरगमनम् ॥ २ ॥
अत्रान्तरे स्थूणगृहमागतेन कुबेरेण तंप्रति स्त्रीत्वधारणस्य
शिखण्डिमरणावधिकत्वरूपशापदानम् ॥ ३ ॥
पुंस्त्वप्रत्यर्पणाय गतेन शिखण्डिना स्थूणात्तद्वृत्तान्तमुपलभ्य
हर्षात्स्वगृहागमनम् ॥ ४ ॥
इति भीष्मेण दुर्योधनंप्रति शिखण्डिना सह स्वेन युद्धाकरणे
कारणाभिधानम् ॥ ५ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१९३-० (३८४४९)
भीष्म उवाच। ५-१९३-०क्ष (३९३३)
शिखण्डिवाक्यं श्रुत्वाऽथ स यक्षो भरतर्षभ ।
प्रोवाच मनसा चिन्त्य दैवेनोपनिपीडितः ॥ ५-१९२-१ (३८४५०)
भवितव्यं तथा तद्धि मम दुःखाय कौरव ।
भद्रे कामं करिष्यामि समयं तु निबोध मे ॥ ५-१९२-२ (३८४५१)
ग्स्वं ते पुंस्त्वं प्रदास्यामि स्त्रीत्वं धारयिताऽस्मि ते'
किंचित्कालं तु ते दास्ये पुल्लिङ्गं स्वमिदं तव ।
आगन्तव्यं त्वया काले सत्यं चैव वदस्व मे ॥ ५-१९२-३ (३८४५२)
प्रभुः संकल्पसिद्धोऽस्मि कामचारी विहंगमः ।
मत्प्रसादात्पुरं चैव त्राहि बन्धूंश्च केवलम् ॥ ५-१९२-४ (३८४५३)
स्त्रीलिङ्गं धारयिष्यामि तवेदं पार्थिवात्मजे ।
सत्यं मे प्रतिजानीहि करिष्यामि प्रियं तव ॥ ५-१९२-५ (३८४५४)
शिखण्ड्युवाच। ५-१९२-६क्ष (३९३४)
प्रतिदास्यामि भगवन्पुलिङ्गं तव सुव्रत ।
किंचित्कालान्तरं स्त्रीत्वं धारयस्व निशाचर ॥ ५-१९२-६ (३८४५५)
प्रतियाते दशार्णे तु पार्थिवे हेमवर्मणि ।
कन्यैव हि भविष्यामि पुरुषस्त्वं भविष्यसि ॥ ५-१९२-७ (३८४५६)
भीष्म उवाच। ५-१९२-८क्ष (३९३५)
इत्युक्त्वा समयं तत्र चक्राते तावुभौ नृप ।
अन्योन्यस्यानभिद्रोहे तौ संक्रामयतां ततः ॥ ५-१९२-८ (३८४५७)
स्त्रीलिङ्गं धारयामास स्थूणो यक्षोऽथ भारत ।
यक्षरूपं च तद्दीप्तं शिखण्डी प्रत्यपद्यत ॥ ५-१९२-९ (३८४५८)
ततः शिखण्डी पाञ्चाल्यः पुंस्त्वमासाद्य पार्थिव ।

विवेश नगरं हृष्टः पितरं च समासदत् ॥ ५-१९२-१० (३८४५९)
यथावृत्तं तु तत्सर्वमाचख्यौ द्रुपदस्य तत् ।
ग्मातुश्च रहिते राजन्प्रसादं यक्षजं तदा।'
द्रुपदस्तस्य तच्छ्रुत्वा हर्षमाहारयत्परम् ॥ ५-१९२-११ (३८४६०)
सभार्यस्तच्च सस्मार महेश्वरवचस्तदा ।
ततः संप्रेषयामास दशार्णाधिपतेर्नृपः ॥ ५-१९२-१२ (३८४६१)
पुरुषोऽयं मम सुतः श्रद्धत्तां मे भवानिति ।
अथ दाशार्णको राजा सहसाभ्यागमत्तदा ॥ ५-१९२-१३ (३८४६२)
पाञ्चालराजं द्रुपदं दुःखशोकसमन्वितः ।
ततः काम्पिल्यमासाद्य दशार्णाधिपतिस्ततः ॥ ५-१९२-१४ (३८४६३)
प्रेषयामास सत्कृत्य दूतं ब्रह्मविदां वरम् ।
ब्रूहि मद्वचनाद्भूत पाञ्चाल्यं तं नृपाधमम् ॥ ५-१९२-१५ (३८४६४)
यन्मे कन्यां स्वकन्यार्थे वृतवानसि दुर्मते ।
फलं तस्यावलेपस्य द्रक्ष्यस्यद्य न संशयः ॥ ५-१९२-१६ (३८४६५)
एवमुक्तश्च तेनासौ ब्राह्मणो राजसत्तम ।
दूतः प्रयातो नगरं दाशार्णनृपचोदितः ॥ ५-१९२-१७ (३८४६६)
ततः आसादयामास पुरोधा द्रुपदं पुरे ।
तस्मै पाञ्चालको राजा गामर्घ्यं च सुसत्कृतम् ॥ ५-१९२-१८ (३८४६७)
प्रापयामास राजेन्द्र सह तेन शिखण्डिना ।
तां पूजां नाभ्यनन्दत्स वाक्यं चेदमुवाच ह ॥ ५-१९२-१९ (३८४६८)
यदुक्तं तेन वीरेण राज्ञा काञ्चनवर्मणा ।
यत्तेऽहमधमाचार दुहित्राऽस्म्यभिवञ्चितः ॥ ५-१९२-२० (३८४६९)
तस्य पापस्य करणात्फलं प्राप्नुहि दुर्मते ।
देहि युद्धं नरपते ममाद्य रणमूर्धनि ॥ ५-१९२-२१ (३८४७०)
उद्धरिष्यामि ते सद्यः सामात्यसुतबान्धवम् ।
तदुपालम्भसंयुक्तं श्रावितः किल पार्थिवः ॥ ५-१९२-२२ (३८४७१)
दशार्णपतिना चोक्तो मन्त्रिमध्ये पुरोधसा ।
अभवद्भरतश्रेष्ठ द्रुपदः प्रणयानतः ॥ ५-१९२-२३ (३८४७२)
यदाह मां भवान्ब्रह्मन्संबन्धिवचनाद्वचः ।
अस्योत्तरं प्रतिवचो दूतो राज्ञे वदिष्यति ॥ ५-१९२-२४ (३८४७३)
ततः संप्रेषयामास द्रुपदोऽपि महात्मने ।
हिरण्यवर्मणे दूतं ब्राह्मणं वेदपारगम् ॥ ५-१९२-२५ (३८४७४)
तमागम्य तु राजानं दशार्णाधिपतिं तदा ।
तद्वाक्यमाददे राजन्यदुक्तं द्रुपदेन ह ॥ ५-१९२-२६ (३८४७५)
आगमः क्रियतां व्यक्तः कुमारोऽयं सुतो मम ।
मिथ्यैतदुक्तं केनापि तदश्रद्धेयमित्युत ॥ ५-१९२-२७ (३८४७६)

ततः स राजा द्रुपदस्य श्रुत्वा ।
विमर्शयुक्तो युवतीर्वरिष्ठाः ।
संप्रेषयामास सुचारुरूपाः
शिखण्डिनं स्त्रीपुमान्वेति वेत्तुम् ॥ ५-१९२-२८ (३८४७७)
ताः प्रेषितास्तत्त्वभावं विदित्वा
प्रीत्या राज्ञे तच्छशंसुर्हि सर्वम् ।
शिखण्डिनं पुरुषं कौरवेन्द्र
दाशार्णराजाय महानुभावम् ॥ ५-१९२-२९ (३८४७८)
ततः कृत्वा तु राजा स आगमं प्रीतिमानथ ।
संबन्धिना समागम्य हृष्टो वासमुवास ह ॥ ५-१९२-३० (३८४७९)
शिखण्डिने च मुदितः प्रादाद्वित्तं जनेश्वरः ।
हस्तिनोऽश्वांश्च गाश्चैव दासीर्बहुशतास्तथा । ५-१९२०३१च्
पूजितश्च प्रतिययौ निर्भर्त्स्य तनयां किल ॥ ५-१९२-३१ (३८४८०)
विनीतकिल्विषे प्रीते हेमवर्मणि पार्थिवे ।
प्रतियाते दशार्णे तु हृष्टरूपा शिखण्डिनी ॥ ५-१९२-३२ (३८४८१)
कस्यचित्त्वथ कालस्य कुबेरो नरवाहनः ।
लोकयात्रां प्रकुर्वाणः स्थूणस्यागान्निवेशनम् ॥ ५-१९२-३३ (३८४८२)
स नद्गृहस्योपरि वतमान
आलोकयामास धनाधिगोप्ता ।
स्थूणस्य यक्षस्य विवेश वेश्म
स्वलंकृतं माल्यगुणैर्विचित्रैः ॥ ५-१९२-३४ (३८४८३)
लाचैश्च गन्धैश्च तथा वितानै-
रभ्यर्चितं धूनधूपितं च ।
ध्वजैः पताकाभिरलंकृतं च
भक्ष्यान्नपेयामिपदत्तमोदम् ॥ ५-१९२-३५ (३८४८४)
तत्स्थानं तस्य दृष्ट्वा तु सर्वतः समलंकृतम् ।
मणिरत्नसुवर्णानां मालाभिः परिपूरितम् ॥ ५-१९२-३६ (३८४८५)
नानाकुसूमगन्धाढ्यं सिक्तसंमृष्टशोभितम् ।
अथाब्रवीद्यक्षपतिस्तान्यक्षाननुगांस्तदा ॥ ५-१९२-३७ (३८४८६)
स्वलंकृतमिदं वेश्म स्थूणस्यामितविक्रमाः ।
नोपसर्पति मां चैव कस्मादद्य स मन्दधीः ॥ ५-१९२-३८ (३८४८७)
यस्माज्जानन्स मन्दात्मा मामसौ नोपसर्पति ।
तस्मात्तस्मै महादण्डो धार्यः स्यादिति मे मतिः ॥ ५-१९२-३९ (३८४८८)
यक्षा ऊचुः । ५-१९२-४०क्ष् (३९३६)
द्रुपदस्य सुता राजन्नाज्ञो जाता शिखण्डिनी ।
तस्या निमित्ते कस्मिंश्चित्प्रादात्पुरुषलक्षणम् ॥ ५-१९२-४० (३८४८९)

अग्रहील्लक्षणं स्त्रीणां स्त्रीभूता तिष्ठते गृहे ।
नोपसर्पति तेनासौ सव्रीडः स्त्रीसरूपवान् ॥ ५-१९२-४१ (३८४९०)
एतस्मात्कारणाद्राजन्स्थूणो न त्वाऽद्य सर्पति ।
श्रुत्वा कुरु यथान्यायं विमानमिह तिष्ठताम् ॥ ५-१९२-४२ (३८४९१)
आनीयतां स्थूण इति ततो यक्षाधिपोऽब्रवीत् ।
कर्तास्मि निग्रहं तस्य प्रत्युवाच पुनः पुनः ॥ ५-१९२-४३ (३८४९२)
सोऽभ्यगच्छत यक्षेन्द्रमाहूतः पृथिवीपते ।
स्त्रीमरूपो महाराज तस्थौ व्रीडासमन्वितः ॥ ५-१९२-४४ (३८४९३)
तं शशापाथ संक्रुद्धो धनदः कुरूनन्दन ।
एवमेव भवत्वद्य स्त्रीत्वं पापस्य गुह्यकाः ॥ ५-१९२-४५ (३८४९४)
ततोऽब्रवीद्यक्षपतिर्महात्मा
यस्माददास्त्ववमन्येह यक्षान् ।
शिखण्डिनो लक्षणं पापबुद्धे
स्त्रीलक्षणं चाग्रहीः पापकर्मन् ॥ ५-१९२-४६ (३८४९५)
अप्रवृत्तं सुदुर्बुद्धे यस्मादेतत्त्वया कृतम् ।
तस्मादद्य प्रभृत्येव स्त्री त्वं सा पुरुषस्तथा ॥ ५-१९२-४७ (३८४९६)
ततः प्रसादयामासुर्यक्षा वैश्रवणं किल ।
स्थूणस्यार्थे कुरुष्वान्तं शापस्येति पुनः पुनः ॥ ५-१९२-४८ (३८४९७)
ततो महात्मा यक्षेन्द्रः प्रत्युवाचानुगामिनः ।
सर्वान्यक्षगणांस्तात शापस्यान्तचिकीर्षया ॥ ५-१९२-४९ (३८४९८)
शिखण्डिनि हते यक्षाः स्वं रूपं प्रतिपत्स्यते ।
स्थूणो यक्षो निरुद्वेगो भवत्विति महामनाः ॥ ५-१९२-५० (३८४९९)
इत्युक्त्वा भगवान्देवो यक्षराजः सुपूजितः ।
प्रययौ सहितः सर्वैर्निमेषान्तरचारिभिः ॥ ५-१९२-५१ (३८५००)
स्थूणस्तु शापं संप्राप्य तत्रैव न्यवसत्तदा ।
समये चागमूत्तूर्णं शिखण्डी तं क्षपाचरम् ॥ ५-१९२-५२ (३८५०१)
सोऽभिगम्याब्रवीद्वाक्यं प्राप्तोऽस्मि भगवन्निति ।
तमब्रवीत्ततः स्थूणः प्रीतोऽस्मीति पुनः पुनः ॥ ५-१९२-५३ (३८५०२)
आर्जवेनागतं दृष्ट्वा राजपुत्रं शिखण्डिनम् ।
सर्वमेव यथावृत्तमाचचक्षे शिखण्डिने ॥ ५-१९२-५४ (३८५०३)
भीष्म उवाच। ५-१९२-५५क्ष् (३९३७)
शप्तो वैश्रवणेनाहं त्वत्कृते पार्थिवात्मज ।
गच्छेदानीं यथाकामं चर लोकान्यथासुखम् ॥ ५-१९२-५५ (३८५०४)
दिष्टमेतत्पुरा मन्ये न शक्यमतिवर्तितुम् ।
गमनं तव चेतो हि पौलस्त्यस्य च दर्शनम् ॥ ५-१९२-५६ (३८५०५)
भीष्म उवाच। ५-१९२-५७क्ष् (३९३८)

एवमुक्तः शिखण्डी तु स्थूणयक्षेण भारत ।
प्रत्याजगाम नगरं हर्वेण महतावृतः ॥ ५-१९२-५७ (३८५०६)
पूजयामास विविधैर्गन्धमाल्यैर्महाधनैः ।
द्विजातीन्देवताश्चैव चैत्यानथ चतुष्पथान् ॥ ५-१९२-५८ (३८५०७)
द्रुपदः सह पुत्रेण सिद्धार्थेन शिखण्डिना ।
मुदं च परमां लेभे पाञ्चाल्यः सह बान्धवैः ॥ ५-१९२-५९ (३८५०८)
शिष्यार्थं प्रददौ चाथ द्रोणाय कुरुपुङ्गव ।
शिखण्डिनं महाराज पुत्रं स्त्रीपूर्विणं तथा ॥ ५-१९२-६० (३८५०९)
प्रतिपेदे चतुष्पादं धनुर्वेदं नृपात्मजः ।
शिखण्डी सह युष्माभिर्धृष्टद्युम्नश्च पार्षतः ॥ ५-१९२-६१ (३८५१०)
मम त्वेतच्चरास्तात यथावत्प्रत्यवेदयन् ।
जडान्धबधिराकारा ये मुक्ता द्रुपदे मया ॥ ५-१९२-६२ (३८५११)
एवमेष महाराज स्त्री पुमान्द्रुपदात्मजः ।
स संभूतः कुरुश्रेष्ठ शिखण्डी रथसत्तमः ॥ ५-१९२-६३ (३८५१२)
ज्येष्ठा काशिपतेः कन्या अम्बा नामेति विश्रुता ।
द्रुपदस्य कुले जाता शिखण्डी भरतर्षभ ॥ ५-१९२-६४ (३८५१३)
नाहमेनं धनुष्पाणिं युयुत्सुं समुपस्थितम् ।
मुहूर्तमपि पश्येयं प्रहरेयं न चाप्युत ॥ ५-१९२-६५ (३८५१४)
व्रतमेतन्मम सदा पृथिव्यामपि विश्रुतम् ।
स्त्रियां स्त्रीपूर्वके चैव स्त्रीनाम्नि स्त्रीसरूपिणि ॥ ५-१९२-६६ (३८५१५)
न मुञ्चेयमहं बाणमिति कौरवनन्दन ।
न हन्यामहमेतेन कारणेन शिखण्डिनम् ॥ ५-१९२-६७ (३८५१६)
एतत्तत्त्वमहं वेद जन्म तात शिखण्डिनः ।
ततो नैनं हनिष्यामि समरेष्वाततायिनम् ॥ ५-१९२-६८ (३८५१७)
यदि भीष्मः स्त्रियं हन्यात्सन्तः कुर्युर्विगर्हणम् ।
नैनं तस्माद्धनिष्यामि दृष्ट्वापि समरे स्थितम् ॥ ५-१९२-६९ (३८५१८)
वैशम्पायन उवाच। ५-१९२-७०क्ष् (३९३९)
एतच्छ्रुत्वा तु करव्यो राजा दुर्योधनस्तदा ।
मुहूर्तमिव स ध्यात्वा भीष्मे युक्तममन्यत ॥ ॥ ५-१९२-७० (३८५१९)

इति श्रीमन्महाभारते उद्योगपर्वणि अम्बोपाख्यानपर्वणि
द्विनवत्यधिकशततमोऽध्यायः ॥

Mahabharata - Udyoga Parva - Chapter Footnotes

५-१९२-४ विहंगमः आकाशगामी ॥
५-१९२-८ अभिसंदेहे इति झो पाठः । संदेहे लिङ्गे सम्यग् दिह्यते

उपचीयेते रतिकाले प्रथेते इति व्युत्पत्तेरिति तत्रार्थः ॥
५-१९२-२४ उत्तरं उत्कृष्टतरम् ॥
५-१९२-२७ आगमः परीक्षा ॥
५-१९२-६१ चतुष्पादं ग्रहणधरणप्रयोगप्रातीकारैश्चतुर्भिः
पादैर्युक्तम् ॥
५-१९२-

उद्योगपर्व - अध्याय १९३
॥ श्रीः ॥
५.१९३. अध्यायः १९३

Mahabharata - Udyoga Parva - Chapter Topics
दुर्योधनेन भीष्मादीन्प्रति युष्माभिः कियता कालेन
समग्रपरसेनाक्षपणं कर्तुं शक्यमिति प्रश्ने तैः
पृथक्पृथक्तदुत्तरदानम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१९३-० (३८५२०)
संजय उवाच। ५-१९३-०क्ष् (३९४०)
प्रभातायां तु शर्वर्यां पुनरेव सुतस्तव ।
मध्ये सर्वस्य सैन्यस्य पितामहमपृच्छत ॥ ५-१९३-१ (३८५२१)
दुर्योधन उवाच। ५-१९३-२क्ष् (३९४१)
पाण्डवेयस्य गाङ्गेय यदेतत्सैन्यमुद्यतम् ।
प्रभूतनरनागाश्वं महारथसमाकुलम् ॥ ५-१९३-२ (३८५२२)
भीमार्जुनप्रभृतिभिर्महेष्वासैर्महाबलैः ।
लोकपालसमैर्गुप्तं धृष्टद्युम्नपुरोगमैः ॥ ५-१९३-३ (३८५२३)
अप्रधृष्यमनावार्यमुद्भूतमिव सागरम् ।
सेनासागरमक्षोभ्यमपि देवार्महाहवे ॥ ५-१९३-४ (३८५२४)
केन कालेन गाङ्गेय क्षपयेथा महाद्युते ।
आचार्यो वा महेष्वासः कृपो वाऽऽशु महाबलः ॥ ५-१९३-५ (३८५२५)
कर्णो वा समरश्लाघी द्रौणिर्वा द्विजसत्तमः ।
दिव्यास्त्रविदुषः सर्वे भवन्तो हि बले मम ॥ ५-१९३-६ (३८५२६)
एतदिच्छाम्यहं ज्ञातुं परं कौतूहलं हि मे ।
हृदि नित्यं महाबाहो वक्तुमर्हसि तन्मम ॥ ५-१९३-७ (३८५२७)
भीष्म उवाच। ५-१९३-८क्ष् (३९४२)
अनुरूपं कुरुश्रेष्ठ त्वय्येतत्पृथिवीपते ।

बलाबलममित्राणां तेषां यदिह पृच्छसि ॥ ५-१९३-८ (३८५२८)
शृणु राजन्मम रणे या शक्तिः परमा भवेत् ।
शस्त्रवीर्ये रणे यच्च भुजयोश्च महाभुज ॥ ५-१९३-९ (३८५२९)
आर्जवेनैव युद्धेन योद्धव्य इतरो जनः ।
मायायुद्धेन मायावी इत्येतद्धर्मनिश्चयः ॥ ५-१९३-१० (३८५३०)
हन्यामहं महाभाग पाण्डवानामनीकिनीम् ।
दिवसे दिवसे कृत्वा भागान्भागान्निजान्मम ॥ ५-१९३-११ (३८५३१)
योधानां दशसाहस्रं कृत्वा भागं महाद्युते ।
सहस्रं रथिनामेकमेष भागो मतो मम ॥ ५-१९३-१२ (३८५३२)
अनेनाहं विधानेन सन्नद्धः सततोत्थितः ।
क्षपयेयं महत्सैन्यं कालेनानेन भारत ॥ ५-१९३-१३ (३८५३३)
मुञ्चेयं यदि वास्त्राणि महान्ति समरे स्थितः ।
शतसाहस्रघातीनि हन्यां मासेन भारत ॥ ५-१९३-१४ (३८५३४)
संजय उवाच। ५-१९३-१५क्ष् (३९४३)
श्रुत्वा भीष्मस्य तद्वाक्यं राजा दुर्योधनस्ततः ।
पर्यपृच्छत राजेन्द्र द्रोणमङ्गिरसां वरम् ॥ ५-१९३-१५ (३८५३५)
आचार्य केन कालेन पाण्डुपुत्रस्य सैनिकान् ।
निहन्या इति तं द्रोणः प्रत्युवाच हसन्निव ॥ ५-१९३-१६ (३८५३६)
स्थविरोऽस्मि महाबाहो मन्दप्राणविचेष्टितः ।
शस्त्राग्निना निर्दहेयं पाण्डवानामनीकिनीम् ॥ ५-१९३-१७ (३८५३७)
यथा भीष्मः शान्तनवो मासेनेति मतिर्मम ।
एषा मे परमा शक्तिरेतन्मे परमं बलम् ॥ ५-१९३-१८ (३८५३८)
द्वाभ्यामेव तु मासाभ्यां कृपः शारद्वतोऽब्रवीत् ।
द्रौणिस्तु दशरात्रेण प्रतिजज्ञे बलक्षयम् ।
कर्णस्तु पञ्चरात्रेण प्रतिजज्ञे महास्त्रवित् ॥ ५-१९३-१९ (३८५३९)
तच्छ्रुत्वा सूतपुत्रस्य वाक्यं सागरगासुतः ।
जहास सस्वनं हासं वाक्यं चेदमुवाच ह ॥ ५-१९३-२० (३८५४०)
न हि यावद्रणे पार्थं बाणशङ्खधनुर्धरम् ।
वासुदेवसमायुक्तं रथेनायान्तमाहवे ॥ ५-१९३-२१ (३८५४१)
समागच्छसि राधेय तेनैवमभिमन्यसे ।
शक्यमेवं च भूयश्च त्वया वक्तुं यथेष्टतः ॥ ॥ ५-१९३-२२ (३८५४२)

इति श्रीमन्महाभारते उद्योगपर्वणि अम्बोपाख्यानपर्वणि
विनवत्यधिकशततमोऽध्यायः ॥

उद्योगपर्व - अध्याय १९४
॥ श्रीः ॥

५.१९४. अध्यायः १९४

Mahabharata - Udyoga Parva - Chapter Topics

युधिष्ठिरेण चारमुखात् भीष्मादिभिः स्वस्वशक्तिप्रकाशनं निशम्य
अर्जुनंप्रति तच्छक्तिनिवेदनचोदने तत्कथनम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१९४-० (३८५४३)
वैशम्पायन उवाच। ५-१९४-०क्ष् (३९४४)
एतच्छ्रुत्वा तु कौन्तेयः सर्वान्भ्रातॄनुपह्वरे ।
आहूय भरतश्रेष्ठ इदं वचनमब्रवीत् ॥ ५-१९४-१ (३८५४४)
युधिष्ठिर उवाच। ५-१९४-२क्ष् (३९४५)
धार्तराष्ट्रस्य सैन्येषु ये चारपुरुषा मम ।
ते प्रवृत्तिं प्रयच्छन्ति ममेमां व्युषितां निशाम् ॥ ५-१९४-२ (३८५४५)
दुर्योधनः किलापृच्छदापगेयं महाव्रतम् ।
केन कालेन पाण्डूनां हन्याः सैन्यमिति प्रभो ॥ ५-१९४-३ (३८५४६)
मासेनेति च तेनोक्तो धार्तराष्ट्रः सुदुर्मतिः ।
तावता चापि कालेन द्रोणोपि प्रतिजज्ञिवान् ॥ ५-१९४-४ (३८५४७)
गौतमो द्विगुणं कालमुक्तवानिति नः श्रुतम् ।
द्रौणिस्तु दशरात्रेण प्रतिजज्ञे महास्त्रवित् ॥ ५-१९४-५ (३८५४८)
तथा दिव्यास्त्रवित्कर्णः संपृष्टः कुरुसंसदि ।
पञ्चभिर्दिवसैर्हन्तुं ससैन्यं प्रतिजज्ञिवान् ॥ ५-१९४-६ (३८५४९)
तस्मादहमपीच्छामि श्रोतुमर्जुन ते वचः ।
कालेन कियता शत्रून्क्षपयेरिति फाल्गुन ॥ ५-१९४-७ (३८५५०)
एवमुक्तो गुडाकेशः पार्थिवेन धनञ्जयः ।
वासुदेवं समीक्ष्येदं वचनं प्रत्यभाषत ॥ ५-१९४-८ (३८५५१)
सर्व एते महात्मानः कृतास्त्राश्चित्रयोधिनः ।
असंशयं महाराज हन्युरेव न संशयः ॥ ५-१९४-९ (३८५५२)
अपैतु ते मनस्तापो यथा सत्यं ब्रवीम्यहम् ।
हन्यामेकरथेनैव वासुदेवसहायवान् ॥ ५-१९४-१० (३८५५३)
सामरानपि लोकांस्त्रीन्सर्वान्स्थावरजङ्गमान् ।
भूतं भव्यं भविष्यं च निमेषादिति मे मतिः ॥ ५-१९४-११ (३८५५४)
ग्यावदिच्छेद्धरिरयं तावदस्ति न चान्यथा।'
यत्तद्घोरं पशुपतिः प्रादादस्त्रं महन्मम ।
कैराते द्वन्द्वयुद्धे तु तदिदं मयि वर्तते ॥ ५-१९४-१२ (३८५५५)

यद्युगान्ते पशुपतिः सर्वभूतानि संहरन् ।
प्रयुङ्क्ते पुरुषव्याघ्र तदिदं मयि वर्तते ॥ ५-१९४-१३ (३८५५६)
तन्न जानाति गाङ्गेयो न द्रोणो न च गौतमः ।
न च द्रोणसुतो राजन्कुत एव तु सूतजः ॥ ५-१९४-१४ (३८५५७)
न तु युक्तं रणे हन्तुं दिव्यैरस्त्रैः पृथग्जनम् ।
आर्जवेनैव युद्धेन विजेष्यामो वयं परान् ॥ ५-१९४-१५ (३८५५८)
तथेमे पुरुषव्याघ्राः सहायास्तव पार्थिव ।
सर्वे दिव्यास्त्रविद्वांसः सर्वे युद्धाभिकाङ्क्षिणः ॥ ५-१९४-१६ (३८५५९)
वेदान्तावभृथस्नाताः सर्व एतेऽपराजिताः ।
निहन्युः समरे सेनां देवानामपि पाण्डव ॥ ५-१९४-१७ (३८५६०)
शिखण्डी युयुधानश्च धृष्टद्युम्नश्च पार्षतः ।
भीमसेनो यमौ चोभौ युधामन्यूत्तमौजसौ ॥ ५-१९४-१८ (३८५६१)
विराटद्रुपदौ चोभौ भीष्मद्रोणसमौ युधि ।
शङ्खश्चैव महाबाहुर्हैडिम्बश्च महाबलः ॥ ५-१९४-१९ (३८५६२)
पुत्रोऽस्याञ्जनपर्वा तु महाबलपराक्रमः ।
शैनेयश्च महाबाहुः सहायो रणकेविदः ॥ ५-१९४-२० (३८५६३)
अभिमन्युश्च बलवान्द्रौपद्याः पञ्च चात्मजाः ।
स्वयं चापि समर्थोसि त्रेलोक्योत्सादनेपि च ॥ ५-१९४-२१ (३८५६४)
क्रोधाद्यं पुरुषं पश्येस्तथा शक्रसमद्युते ।
स क्षिप्रं नभवेद्व्यक्तमिति त्वां वेद्मि कौरव ॥ ॥ ५-१९४-२२ (३८५६५)

इति श्रीमन्महाभारते उद्योगपर्वणि अम्बोपाख्यनपर्वणि
चतुर्नवत्यधिकशततमोऽध्यायः ॥
Mahabharata - Udyoga Parva - Chapter Footnotes

५-१९४-२ व्युषितां निशां प्रभातकाले ॥

उद्योगपर्व - अध्याय १९५
॥ श्रीः ॥
५.१९५. अध्यायः १९५

Mahabharata - Udyoga Parva - Chapter Topics
दुर्योधनेन त्रेधाविभज्य सेनानां यापनम् ॥ १ ॥
सर्वेषां शिबिरप्रवेशः ॥ २ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१९५-० (३८५६६)
वैशम्पायन उवाच। ५-१९५-०क्ष् (३९४६)
ततः प्रभाते विमले धार्तराष्ट्रेण चोदिताः ।
दुर्योधनेन राजानः प्रययुः पाण्डवान्प्रति ॥ ५-१९५-१ (३८५६७)
आप्लाव्य शुचयः सर्वे स्रग्विणः शुक्लवाससः ।
गृहीतशस्त्रा ध्वजिनः स्वस्ति वाच्य हुताग्नयः । ५-१९५-२ (३८५६८)
सर्वे ब्रह्मविदः शूराः सर्वे सुचरितव्रताः ।
सर्वे कामकृतश्चैव सर्वे चाहवलक्षणाः ॥ ५-१९५-३ (३८५६९)
आहवेषु पराँल्लोकाञ्जिगीषन्तो महाबलाः ।
एकाग्रमनसः सर्वे श्रद्दधानाः परस्परम् ॥ ५-१९५-४ (३८५७०)
विन्दानुविन्दावावन्त्यौ केकया बाह्लिकैः सह ।
प्रययुः सर्व एवैते भारद्वाजपुरोगमाः ॥ ५-१९५-५ (३८५७१)
अश्वत्थामा शान्तनवः सैन्धवोऽथ जयद्रथः ।
दाक्षिणात्याः प्रतीच्याश्च पार्वतीयाश्च ने नृपाः ॥ ५-१९५-६ (३८५७२)
गान्धारराजः शकुनिः प्राच्योदीच्याश्च सर्वशः ।
शकाः किराता यवनाः शिबयोऽथ वसातयः ॥ ५-१९५-७ (३८५७३)
स्वैः स्वैरनीकैः सहिताः परिवार्य महारथम् ।
एते महारथाः सर्वे द्वितीये निर्ययुर्बले ॥ ५-१९५-८ (३८५७४)
कृतवार्मा सहानीकस्त्रिगर्तश्च महारथः ।
दुर्योधनश्च नृपतिर्भ्रातृभिः परिवारितः ॥ ५-१९५-९ (३८५७५)
शलो भूरिश्रवाः शल्यः कौसल्योऽथ बृहद्रथः ।
एते पश्चादनुगता धार्तराष्ट्रपुरोगमाः ॥ ५-१९५-१० (३८५७६)
ते समेत्य यथान्यायं धार्तराष्ट्रा महाबलाः ।
कुरुक्षेत्रस्य पश्चार्धे व्यवातिष्ठन्त दंशिताः ॥ ५-१९५-११ (३८५७७)
दुर्योधनस्तु शिबिरं कारयामास भारत ।
यथैव हास्तिनपुरं द्वितीयं समलंकृतम् ॥ ५-१९५-१२ (३८५७८)
न विशेषं विजानन्ति पुरस्य शिबिरस्य वा ।
कुशला अपि राजेन्द्र नरा नगरवासिनः ॥ ५-१९५-१३ (३८५७९)
तादृशान्येव दुर्गाणि राज्ञामपि महीपतिः ।
कारयामास कौरव्यः शतशोऽथ सहस्रशः ॥ ५-१९५-१४ (३८५८०)
पञ्चयोजनमुत्सृज्य माण्डलं तद्रणाजिरम् ।
सेनानिवेशास्ते राजन्नाविशञ्छतसङ्कशः ॥ ५-१९५-१५ (३८५८१)
तत्र ते पृथिवीपाला यथोत्साहं यथाबलम् ।
विविशुः शिबिराण्यत्र द्रव्यवन्ति सहस्रशः ॥ ५-१९५-१६ (३८५८२)
तेषां दुर्योधनो राजा ससैन्यानां महात्मनाम् ।
व्यादिदेश स बाह्यानां भक्ष्यभोज्यमनुत्तमम् ॥ ५-१९५-१७ (३८५८३)

सनागाश्वमनुष्याणां ये च शिल्पोपजीविनः ।
ये चान्येऽनुगतास्तत्र सूतमागधबन्दिनः ॥ ५-१९५-१८ (३८५८४)
वणिजो गणिकाश्चारा ये चैव प्रेक्षका जनाः ।
सर्वांस्तन्कौरवो राजा विधिवत्प्रत्यवैक्षत ॥ ॥ ५-१९५-१९ (३८५८५)

इति श्रीमन्महाभारते उद्योगपर्वणि अम्बोपाख्यानपर्वमि
पञ्चनवत्यधिकशततमोऽध्यायः ॥

उद्योगपर्व - अध्याय १९६
॥ श्रीः ॥
५.१९६. अध्यायः १९६

Mahabharata - Udyoga Parva - Chapter Topics
युधिष्ठिरेणापि त्रेधाविभज्य स्वसेनानां प्रेषणम् ॥ १ ॥

Mahabharata - Udyoga Parva - Chapter Text

५-१९६-० (३८५८६)
वैशम्पायन उवाच। ५-१९६-०क्ष् (३९४७)
तथैव राजा कौन्तेयो धर्मपुत्रो युधिष्ठिरः ।
धृष्टद्युम्नमुखान्वीरांश्चोदयामास भारत ॥ ५-१९६-१ (३८५८७)
चेदिकाशिकरूशानां नेतारं दृढविक्रमम् ।
सेनापतिममित्रघ्नं धृष्टकेतुमथादिशत् ॥ ५-१९६-२ (३८५८८)
विराटं द्रुपदं चैव युयुधानं शिखण्डिनम् ।
पाञ्चाल्यौ च महेष्वासौ युधामन्यूत्तमौजसौ ॥ ५-१९६-३ (३८५८९)
ते शूराश्चित्रवर्माणस्तप्तकुण्डलधारिणः ।
आज्यावसिक्ता ज्वलिता धिष्ण्येष्विव हुताशनाः ॥ ५-१९६-४ (३८५९०)
अशोभन्त महेष्वासा ग्रहाः प्रज्वलिता इव ।
अथ सैन्यं यथायोगं पूजयित्वा नरर्षभः ॥ ५-१९६-५ (३८५९१)
दिदेश तान्यनीकानि प्रयाणाय महीपतिः ।
तेषां युधिष्ठिरो राजा ससैन्यानां महात्मनाम् ॥ ५-१९६-६ (३८५९२)
व्यादिदेश सबाह्यानां भक्ष्यभोज्यमनुत्तमम् ।
स गजाश्वमनुष्याणां ये च शिल्पोपजीविनः ॥ ५-१९६-७ (३८५९३)
अभिमन्युं बृहन्तं च द्रौपदेयांश्च सर्वशः ।
धृष्टद्युम्नमुखानेतान्प्राहिणोत्पाण्डुनन्दनः ॥ ५-१९६-८ (३८५९४)
भीमं च युयुधानं च पाण्डवं च धनंजयम् ।
द्वितीयं प्रेषयामास बलस्कन्धं युधिष्ठिरः ॥ ५-१९६-९ (३८५९५)

भाण्डं समारोपयतां चरतां संप्रधावताम् ।
हृष्टानां तत्र योधानां शब्दो दिवमिवास्पशत् ॥ ५-१९६-१० (३८५९६)
स्वयमेव ततः पश्चाद्विराटद्रुपदान्वितः ।
अथापरैर्महीपालैः सह प्रायान्महीपतिः ॥ ५-१९६-११ (३८५९७)
भीमधन्वायती सेना धृष्टद्युम्नेन पालिता ।
गङ्गेव पूर्णा स्तिमिता स्यन्दमाना व्यदृश्यत ॥ ५-१९६-१२ (३८५९८)
ततः पुनरनीकानि न्ययोजयत बुद्धिमान् ।
मोहयन्धृतराष्ट्रस्य पुत्राणां बुद्धिनिश्चयम् ॥ ५-१९६-१३ (३८५९९)
द्रौपदेयान्महेष्वासानभिमन्युं च पाण्डवः ।
नकुलं सहदेवं च सर्वांश्चैव प्रभद्रकान् ॥ ५-१९६-१४ (३८६००)
दश चाश्वसहस्राणि द्विसहस्त्राणि दन्तिनाम् ।
अयुतं च पदातीनां रथाः पञ्चशतं तथा ॥ ५-१९६-१५ (३८६०१)
भीमसेनस्य दुर्धर्षं प्रथमं प्रादिशद्बलम् ।
मध्यमे च विराटं च जयत्सेनं च पाण्डवः ॥ ५-१९६-१६ (३८६०२)
महारथौ च पाञ्चाल्यौ युधामन्यूत्तमौजसौ ।
वीर्यवन्तौ महात्मानौ युधामन्यूत्तमौजसौ ॥ ५-१९६-१७ (३८६०३)
अन्वयातां तदा मध्ये वासुदेवधनञ्जयौ ।
ग्तौ दृष्ट्वा पृथिवीपाला नष्टमित्येव मेनिरे ।
अन्तरिक्षगताः सर्वे देवाः सेन्द्रपुरोगमाः '॥ ५-१९६-१८ (३८६०४)
बभूवुरतिसंरब्धाः कृतप्रहरणा नराः ।
तेषां विंशतिसाहस्रा हयाः शूरैरधिष्ठिताः ।
पञ्च नागसहस्राणि रथवंशाश्च सर्वशः ॥ ५-१९६-१९ (३८६०५)
पदातयश्च ये शूराः कार्मुकासिगदाधराः ।
सहस्रशोऽन्वयुः पश्चादग्रतश्च सहस्रशः ॥ ५-१९६-२० (३८६०६)
युधिष्ठिरो यत्र सैन्ये स्वयमेव बलार्णवे ।
तत्र ते पृथिवीपाला भूयिष्ठं पर्यवस्थिताः ॥ ५-१९६-२१ (३८६०७)
तत्र नागसहस्राणि हयानामयुतानि च ।
तथा रथसहस्राणि पदातीनां च भारत ॥ ५-१९६-२२ (३८६०८)
चेकितानः स्वसैन्येन महता पार्थिवर्षभ ।
धृष्टकेतुश्च चेदीनां प्रणेता पार्थिवो ययौ ॥ ५-१९६-२३ (३८६०९)
सात्यकिश्च महेष्वासो वृष्णीनां प्रवरो रथः ।
वृतः शतसहस्रेण रथानां प्रमुदन्बली ॥ ५-१९६-२४ (३८६१०)
क्षत्रदेवब्रह्मदेवौ रथस्थौ पुरुषर्षभौ ।
जघनं पालयन्तौ च पृष्ठतोऽनुप्रजग्मतुः ॥ ५-१९६-२५ (३८६११)
शकटापणवेशाश्च यानं युग्यं च सर्वशः ।
तत्र नागसहस्राणि हयानामयुतानि च ।

फल्गु सर्वं कलत्रं च यत्किंचित्कृशदुर्बलम् ॥ ५-१९६-२६ (३८६१२)
कोशसञ्चयवाहांश्च कोष्ठागारं तथैव च ।
गजानीकेन संगृह्य शनैः प्रायाद्युधिष्ठिरः ॥ ५-१९६-२७ (३८६१३)
तमन्वयात्सत्यधृतिः सौचित्तिर्युद्धदुर्मदः ।
श्रेणिमान्वसुदानश्च पुत्रः काश्यस्य वा विभुः ॥ ५-१९६-२८ (३८६१४)
रथा विंशतिसाहस्रा ये तेषामनुयायिनः ।
हयानां दश कोट्यश्च महतां किंकिणीकिनाम् ॥ ५-१९६-२९ (३८६१५)
गजा विंशतिसाहस्रा ईषादन्ताः प्रहारिणः ।
कुलीना भिन्नकरटा मेघा इव विसर्पिणः ॥ ५-१९६-३० (३८६१६)
षष्टिर्नागसहस्राणि दशान्यानि च भारत ।
युधिष्ठिरस्य यान्यासन्युधि सेना महात्मनः ॥ ५-१९६-३१ (३८६१७)
क्षरन्त इव जीमूताः प्रभिन्नकरटामुखाः ।
राजानमन्वयुः पश्चाच्चलन्त इव पर्वताः ॥ ५-१९६-३२ (३८६१८)
एवं तस्य बलं भीमं कुन्तीपुत्रस्य धीमतः ।
यदाश्रित्याथ युयुधे धार्तराष्ट्रं सुयोधनम् ॥ ५-१९६-३३ (३८६१९)
ततोऽन्ये शतशः पश्चात्सहस्रायुतशो नराः ।
नर्दन्तः प्रययुस्तेषाणनीकानि सहस्रशः ॥ ५-१९६-३४ (३८६२०)
तत्र भेरीसहस्राणि शङ्खानामयुतानि च ।
न्यवादयन्त संहृष्टाः सहस्रायुतशो नराः ॥ ॥ ५-१९६-३५ (३८६२१)

इति श्रीमन्महाभारते शतसाहस्र्यां संहितायां वैयासिक्यां
उद्योगपर्वणि अम्बोपाख्यानपर्वणि षण्णवत्यधिकशततमोऽध्यायः
। । ॥ समाप्तमम्बोपाख्यानपर्व ॥ उद्योगपर्व च ॥ अस्यानन्तरं
भीष्मपर्व भविष्यति तस्ययमाद्य श्लोकः । जनमेजय
उवाच। कथं युयुधिरे वीराः कुरुपाण्डवसोमकाः। पार्थिवाः
सुमहात्मानो नानादेशसमागताः ॥ इदं उद्योगपर्व कुंभघोणस्थेन
टीओ आरो कृष्णाचार्येण टीओ आरो व्यासाचार्येण च मुंबय्यां
निर्णयसागरमुद्रायन्त्रे मुद्रापितम् । शकाब्दाः १८२८ सन १९०७
Mahabharata - Udyoga Parva - Chapter Footnotes

५-१९६-१२ भीमधन्वायनीति झो पाठे भीमधन्वानः अयन्ते
प्रचरन्त्यस्यामिति भीमधन्वायनी ॥
५-१९६-१९ कृतप्रहरणाः ग्कृतयुद्धाः ' ॥
५-१९६-२६ शकटा भाण्डवन्ति अनांसि । आपणो वणिस्कमुदायः। वेशो
वेश्याजनः। यानं युद्धयोग्यं वाहनम्। युग्यं केवलं वाहनम्। फल्गु
बालादिकम्। कलत्रं स्त्र्यादिकम् ॥

५-१९६-२७ कोशो धनम् । कोष्ठो धान्यादिसामग्री। संगृह्य एकीकृत्य ॥
५-१९६-

Please send corrections to sanskrit@cheerful.com
Last updated October 14, 2013
http://sanskritdocuments.org